सनातनधर्मप्रदीपे

शास्त्री. चीमनलाल हरिशंकर भट्ट

साहित्यभूषण, [illegible]

शुद्धिप्रकाशविवाहप्रकाशौ

श्री सन्तोजिमहाराजादिचाल्यमानसनातनध-
र्मोज्जीविनीसभाङ्गग्रन्थनिर्माणसमित्या
समालोचनार्थं सर्वेषां पण्डितानां
सविध उपाह्रियमाणौ ।

कलिकाता नगरस्थ वणिक् प्रेसद्वारा
मुद्राप्य प्रकाशितौ ।

शास्त्री. चीमनलाल हरिशंकर भट्ट
साहित्यभूषण, [illegible]

समालोचनार्थं मासत्रि-
तयमवसरः । } विना मूल्यं वितरणम् ।

श्री अखण्डानन्द पुस्त[illegible]
संख्या २०२
विषय १५
न्यास आनन्द कुटीर मोती[illegible]

॥ श्रीः ॥

निवेदनम्

अयं हि निबन्धो बहूनां पण्डितप्रवराणामनुमत्योपदेशानुसारेण च संगृहीतः सांप्रतमनिर्णीतावस्थायामेव विद्यमानश्च तत्तत्सनातनधर्मसंस्थानां तथा पण्डिप्रवराणां च सविधे समालोचनार्थम्, समालोच्य स्वीयसमालोचनेन साकमधोनिर्दिष्टं स्थानं प्रति प्रतिप्रेषणार्थं च प्रेष्यते । अतस्तत्तत्संस्थाप्रवर्तकान् पण्डितप्रवराँश्च श्रीमतः प्रति साञ्जलिबन्धमिदमेव प्रार्थ्यते—यत् तत्त्वगवेषणबुद्ध्यैवायं समालोचनीय इति तत्तादृशाः नासंभवन्तः प्रमादाः, तत्परिहारोपायाश्च सप्रमाणं यदि सूच्यन्ते, तर्हि उपरितनविचारकसमित्या महाननुग्रहः कृतः स्यादिति दैनिकपत्रादिष्वप्रकाशनेनैव समालोचनं स्वीयं मासत्रयाभ्यन्तर एव प्रेषणीयमिति ।

इति

कलकत्ता
१–७–२६

श्रीयुक्तानन्तकृष्णशास्त्री
ग्रन्थनिर्माणसमितिसम्पादकः

प्रेषणस्थानम्—

श्रीसन्तोजिमहाराजाः,

C/O. श्रीमदोंकारदास चौधरी, तलोदा

वणिक् प्रेस, १, सरकार लेन कलकत्ता ।

शास्त्री. चमनलाल हरिशंकर
चमनलाल

श्रीः

शुद्धिप्रकाशविषयानुक्रमणिका

—:०:—

अथ विवाहप्रकाशविषयानुक्रमणिका ।

शुद्धिप्रकाश शुद्धाशुद्धिपत्रिका

शु	अशु	पृष्ठ	पंक्ति	शु	अशु	पृष्ठ	पंक्ति
क	कि	२	१८	णान् न दुष्टम्, णान्		१३२	१६
नश्च	नांच	३	८	न	म	१३३	१
ह्दा	ह्दा	५	१२	तएव	तो	१३४	३
ह्र	ह्र	६	३	भाष्ये	भाष्यं	,,	,,
ता	दा	१२	१२	द्व्य	व्य	१३५	१३
१३ शो पृष्ठे सर्वथा तु इति पंक्ति र्नापेक्षिता				र्था	र्थ	१५३	२०
गस्य	गँण	१८	५	न्ा	ता	१५४	२४
स्थ्यये	स्थोय	२०	६	स्रौ	स्त्रौ	१५५	२०
* ध्य	ध्य	२२	२२	त्वा	त्वा	१५५	२१
अन	अ	४२	१४	रि	द्रि	१५६	१३
न	नस्य	४७	१८	च्छु	छ	१५६	१५
र्ण	णं	५३	६	र्गे	र्से	१६०	२२
द्वा	द्धा	५४	२३	व	य	१६८	२२
ति	तिन	५५	६	ह्वा	ह्वा	१७०	८
श्य	भ्य	,,	१०	ण्य	न्य	१७०	२०
य	वाय	,,	१४	वा	मा	२०५	८
ये	र्ते	५६	१२	ण	णू	२०६	२
त्याऽ	त्या	६०	१३	ध्य	श्य	,,	१४
स	ग	६२	५	ह्वा	ह्वा	२१३	१४
स्म	स्म	,,	१६	वः	व	,,	१८
मे	भे	६३	११	त्य	त	२१४	१६
द्वा	द्वा	८२	२२	क्त	क	२२५	२४
च्छ्र	च्छु	११०	६	शू	श	२३६	२३
म	न	१३०	१५	परतः	पः	२४०	४

* ध्य स्थाने ध्य इति बहुषु स्थलेषु संशोधकानां नूतनेन परिचयेन संजातम् इत्यत्यत्र संसूच्यते, एवं चोक्तशुद्धिरुपरितनेषु स्थलेषु विद्यमाना न संग्रहीष्यते ।

शु	अ॰	पृ०	पंक्ति	शु	अशु	पृ०	पंक्ति
ता	ति	२४२	१	ङ्ग्र	ङ्ग	३८८	२४
र्थ	थ	२४६	२४	त्व	त्वि	३८६	७
य	द्य	२४७	१५	त	न	,,	१४
नि	ति	२४८	७	रि	री	,,	१६
नान	ना	२४८	११	लाः	लः	,,	२१
नु	न	२६६	६	ति	नि	,,	२४
श्चे	च	,,	६	नु	मु	३६०	८
शा	श	२६७	१०	प्ये	ष्ये	,,	६
व्या	व्य	,,	२१	ष्पा	ष्पा	,,	,,
त्रो	त्तो	२६८	१	यि	लि	,,	,,
धात्	धा	,,	१८	ती	नी	,,	१०
मात्र	मस्त्र	२६८	२०	उत	मुन	,,	१७
हु	ह	२६६	१	र्ये	ये	,,	,,
यैं	य	,,	३	मि	मिवे	,,	,,
त्ये	त्य	,,	१४	ति	त्ति	,,	१८
ग्राह्य	बाह्य	,,	१७	ना	नां	,,	२२
श्चा	श्चा	३१२	१६	वं	व	३६१	२५
र्या	य	३१५	२३	क्ष्य	स्य	,,	४
वं	व	३१६	५	मै	म	,,	८
बा	ब	३३४	१६	न्या	न्य	,,	१६
पा	प	३३७	२१	कु	कृ	,,	१७
ह्न	ह	३४१	१३	तच्छा	च्छा	३६३	१४
न्त्रा	न्ताः	३४२	३	र्य	पं	३६४	३
सि	मि	३४८	२२	ह्य	व्व	३६६	२०
र्यां	यें	३८५	२१	वचा	व	४१४	५
व्यव	प्य	३८६	७	एक	यदि एक	४१६	१०
र्थपर	र्थ	३८७	१५	गु	वा	४१७	२
त्या	त्य	,,	१६	के	क	,,	११
र्वां	र्वा	,,	१८	र्भे	भ	,,	१६

शु	अशु	पृ०	पंक्ति
प्साऽ	प्सा	४१७	४
स्त्री	स्वस्त्री	,,	५
द्रुव्य	व्य	,,	,,
नि।	नि	,,	८
लासु	लात्स्व	,,	६
रुध	रुध्य	,,	१४
ह्री *	ह्री	४१८	१
वद्	क्द्	४१६	१७
स्वा	ला	४२२	११
प्पा	प्प	४२५	५
आशौ	अशौ	४३०	७
र्वं	र्वं	,,	१७
र्शनं	र्शं	४३१	२
,,	,,	,,	३
न्ते	ते	,,	४

विवाहप्रकाश शुद्धा शुद्ध पत्रिका

शु	अशु	पृ०	पंक्ति
थिषि	थि	३	२३
पृष्ठ	प	४	१२
णात्	णा	५	२२
र्मं	म	७	६
ढा	ढा	,,	१०
तृ	तृ	१०	२
विं	वि	,,	६
च्छलो	च्छी	११	२४
प	प्र	१६	१८
यं	य	,,	२२
ना	न	१७	११
च्च	श्च	,,	२२
विवा	विव	२०	४
ष्टाम्ता	ष्टा	२२	१
याः	या	२६	२०
द्	ढ	२६	१
याः	या	६५	१४
स्य	स्यस्य	,,	१६
पपप	पप	८१	२०
क	का	८३	१४
र्व्य	व्य	८५	३
म्य	म्प	,,	६
न्या	या	,,	१४
भ्यु	यु	८८	१४
यों	यो	,,	२०
ह्व	ह्व	८६	१३
न्त्र	न्त	,,	१६
मे	मै	६०	१६
दं	द	,,	२०
मे	म	६२	२१
तें	त	६३	२
वाः	वाकदाचित्	६७	६
द्वे	देव	६८	१३
ङ्क्षिः	ङ्क्ष	१००	१
या	त्यात्	,,	१७
र्धा	धा	,,	१८
न्	त्	१०१	२
न्त्र	न्त्रा	१०३	८
ता	त	,,	१५

शु	अशु	पृ०	पंक्ति	शु	अशु	पृ०
विं	वि	१०३	२३	नं	तं	"
हते	हिप्रे	११३	१७	र	रं	२०२
या	त्या	११६	५	त्ता	त्त	२०३
द्वं	दु	"	२३	भ्रू	भ्र	"
त	न	१२५	२२	न्ध	न्द	२१६
रंयु	च्यु	१२६	६	प	ए	२२०
द्यं	द्य	१५५	१८	कत्र	त्क	२२१
षं:	ष:	१५१	२	यां	या	२२३
वाहस्य	बाल्य	१५६	१०	र्य	य	२३४
र्व:	व:	१६४	१०	नवरि	सस	२४०
र्ष	ष	१७१	२	हित	हि	२४४
दी	दि	१७६	२३	स्तू	स्त्वो	२४५
ते	नै	"	२४	नकथ	कथ	"
द्व	दु	१८०	२०	ष्प्र	ष्प	"
नोपरुन्ध्या	इति	१८१	१७	स्या	स्य	"
द्रजस्वलामिति				वि	नि	२४६
त्येव	त्यव	१८२	४	नेवोक्त	नोक्त	२४८
ब	बं	१८४	८	ना	न	"
ति	त	"	२१	ज्ञा	ज्ञा	"
न्त्रादिसमावे	मन्त्रान्त	१८५	२३	विं	वि	२४९
शनान्त				भ्र	भ्र	२५०
म	स	१८६	३	का	कां	२५४
की	कि	"	८	त्तु	त्व	२५५
र्मा	मा	१९२	१४	त्तु	त्रु	"
नासं	नसं	"	२०	स्त्रा	त्रा	२५६
ह	हा	१९५	११	र्त	त	२६३
मो	मे	१९५	१४	र्ण	णं	२६४
श्री	वी	१९७	३	द्वोऽ	द्वोऽश्र	२६५
र्थ	थ	१९८	१०	गुह्य	गुह	"
बा	वा	१९९	२	हि	हि	२७३

॥ श्रीः ॥
॥ श्रीमहागणपतये नमः ॥
॥ श्रीविट्ठलेशाय नमः ॥
॥ श्रीगुरुभ्यो नमः ॥

सनातनधर्मप्रदीपः

(३) शुद्धिप्रकाशः ।

मातामहमहाशैलं महस्तदपितामहम् ।
कारणं जगतां वन्दे कण्ठादुपरि वारणम् ॥

[अस्पृश्यानां देवालयप्रवेशविचारः]

अस्पृश्यानामन्त्यजानां स्पर्शो न परिहर्तव्यः देवालयप्रवेशश्च तेषां न निषेद्धव्य इत्येवमन्त्यजविषयं मतमिदानीं लोके प्रथते ।

अत्र सौकर्यार्थं सच्छूद्रचाण्डालयोः कश्चन संवाद उपन्यस्यते ।

सच्छूद्रः—भद्र, श्रूयते देवालयं प्रविविक्षुरसीति । किं तत्र ते साध्यम् ?

चाण्डालः—यद्भवतस्तदेव ममापि । यथाहि भवादृशा देवतानामाराधनया कल्याणं सम्पादयितुमिच्छन्ति, तथैव तन्मयापि सम्पादनीयम् ।

सच्छूद्रः—सन्ति तत्र तत्र बहवः पाषाणाः । तेषामेकतमं बहून् वा पूजयित्वा त्वं कल्याणं लभस्व । कोऽयं देवालयगत एव पाषाणेऽभिनिवेशः ?

चाण्डालः—देवालये देवो विद्यते । अन्यत्र तु पाषाणाः । अहन्तु देवमाराधयितुमिच्छन् कथमिव पर्वतस्थितान् पाषाणान् पूजयेयम् ?

सच्छूद्रः—भद्र, योऽयं देवालये देवो नाम, सोऽपि पूर्वं पर्वतगत आसीत् । शिल्पिभिस्तु तक्षणादिकर्मणा प्रतिमाकारं नीत इत्येतावानुभयत्र भेदः । यदि पुनराकारमात्रे भवतोऽभिनिवेशस्तदा वयमन्यामतिरमणीयां प्रतिमां युष्मद्वर्ग्येभ्यो दास्यामः । आयतनं चापरं निर्मास्यामहे । तत्र गत्वा सन्तोष्टव्यं युष्माभिरिति ।

चाण्डालः—अत्र हि देवालये स्थिता प्रतिमा ब्राह्मणैर्होमादीनि कर्माणि यथाविधि विधाय वेदोक्तैर्मन्त्रैः प्रतिष्ठापिता । अत एव सा देवतेत्युच्यते । अन्यथा तु पाषाणान्तरेभ्यः कः प्रतिमाया भेदो नाम स्यात् ?

सच्छूद्रः—त्वमपि तावदस्मद्दत्तां प्रतिमामायतने स्थापयित्वा परश्शतान् वारान् सजातीयैः सह देवो देव इति घोषय । ततस्तत्रापि देवत्वं स्यात् ।

चाण्डालः—नैवं स्यात् । धर्मशास्त्रोक्तेन विधिना पाषाणेषु देवत्वमुपजायते । अन्यथा तु यत्र कुत्रापि देवत्वं सुसाधं भवेत् । कश्चिद्धि पाषाणं शिरसि कृत्वा विकटं नृत्यन् हन्त ! देवोऽयमिदानीं संवृत्त इति ब्रूयात्, अपरश्च किमपि पाषाणं लगुडेन पोथयित्वा देवत्वं सम्पादयेत्, इतरश्चोल्कां प्रज्वाल्य समन्तात् भ्रामयित्वा देवोऽयमिदानीं सञ्जातः, प्रणमतैनमित्याघोषयेत्, भावो हि देवकलासान्निध्ये कारणम् । ईदृशश्च मे भावो यत्समन्तत उल्काभ्रामणेन पाषाणो देवत्वं लभत इति । एवमनवस्था मा भूदिति धर्मशास्त्रोक्तेन विधिना देवताभावं गतैव मूर्तिराराधयितुं युज्यते ।

सच्छूद्रः—यद्येवम्, तर्हि प्रकृते विषये सर्वेऽपि धर्मशास्त्रोक्ता विधयो निषेधाश्चानुवर्तितव्या भवन्ति।

चाण्डालः—काममेतदेवमस्तु। किं तेन तव स्यात्?

सच्छूद्रः—एतन्मे स्यात्। धर्मशास्त्रेण हि मूर्तेश्चण्डालादिसान्निध्यं दूरतः प्रतिषिद्धम्। चाण्डालादिस्पर्शे तावत्तस्या मूर्तेः पुनःसंस्कार उक्तः। शास्त्रोक्तेन विधिना सम्यगाचरितेन यन्मूर्तौ देवत्वमुत्पद्यते, तदस्पृश्यसान्निध्यादपगच्छतीति स्पष्टमेव तत्रोक्तम्। एवं स्थिते देवतासन्निधिं गच्छन्नस्पृश्य आत्मनां च परेषाञ्च भद्रं विनाशयेत्। तस्माद् दुरभिनिवेश एवायम्।

[देवालयेऽन्त्यजाप्रवेशे वैखानसाद्यागमपरीक्षणम्]

तदत्रान्त्यजानां देवालयप्रवेशे प्रायश्चित्तविधायकानि कानिचन पञ्चरात्राद्यागमवाक्यानि संगृह्य प्रकाशयामः। तद्यथा—श्रीवैखानसे भगवद्धर्मशास्त्रे श्रीमरीचिमहर्षिप्रणीतमहाशास्त्रे विमानार्चनकल्पे प्रमाणानि—"पञ्चमहापातकैः चाण्डालाद्यैश्चालये प्रविष्टे तत्स्पृष्टनिवेदने च सप्ताहं महाशान्तिं हुत्वा, देवं कलशैः संस्नाप्य, पुनः प्रतिष्ठां कारयेत्। पतिते गर्भगृहे प्रविष्टे वास्तुशुद्धिं कृत्वा महाशान्तिं हुत्वाऽर्चयेत्। तेषु प्रथमावरणे द्वितीये वा नैरन्तर्येण सञ्चारत्सु मासेऽतीते मासमेकं महाशान्तिं हुत्वा, कर्षणादि पुनःसंस्कारं कृत्वा, महाप्रतिष्ठां कारयेत्। तेषु प्रासादाभ्यन्तरबाह्येषु संचरत्सु संवत्सरेऽतीतेऽर्चनादि संत्यज्य कौतुकादिरक्षणं कृत्वा, गर्भागारादिसप्तप्रकारेषु सर्वत्र गा वासयित्वा, मासेऽतीते सर्वत्र शुद्धिं कृत्वा, मासत्रयं महाशान्तिं हुत्वा, कर्षणादिपुनस्संस्कारं कृत्वा, बालालयं संकल्प्य, जलाधिवासादीनि कारयित्वा, बिम्बशुद्धिं कृत्वाऽशीत्यधिकसहस्र (१००) कलशैः संस्नाप्य ब्राह्मणान् भोजयि-

त्वा वैष्णवान् सम्पूज्य देवं बालालये प्रतिष्ठाप्यालयादि सर्वत्र नवीकरणं कृत्वा महाप्रतिष्ठां कारयेत् । इति ।

अर्चनानवनीतेऽपि सेवाप्रकारे इदं विवेचितम्—

तद्यथाः—

गर्भागारे च सेवार्थं वैखानसकुलोद्भवः ।
वेदाध्ययनविप्रेण अर्धमण्डपसेवितम् ॥
यतीनां विष्णुभक्तानां महामण्डपसेवितम् ।
वैश्यशूद्रानुलोमानां ब्रह्ममण्डपसेवितम् ॥
शेषाणां हरिभक्तानां गोपुरं तु विधीयते ।
प्रतिलोमान्त्यजातीनां स्थूपिं दृष्ट्वा समाचरेत् ॥इति॥

भृगुरपि—गर्भालयप्रवेशे तु अन्यसूत्रद्विजोत्तमैः ॥
अष्टोत्तरशतैरेव कलशैरभिषेचयेत् ।
प्रमादात् स्पर्शने तेषां संप्रोक्षणमथाचरेत् ॥
अज्ञानादर्चने चैव प्रतिष्ठां पुनराचरेत् ॥
आस्थानमण्डपादौ तु यदा संपूज्यते हरिः ।
चातुर्वर्ण्यं यथेष्टं हि सेवते च महोत्सवे ॥ इति ॥

अत्र भृगुवचने महोत्सवे सर्वेषां सेवार्थं न स्थाननियम इति यत् वर्णितम्, तदिदं चातुर्वर्ण्यविषयमेव, नान्त्यजादिविषयमिति, अन्त्यजानां महोत्सवादावपि व्यवस्थिते स्थान एवावस्थाय दर्शनं कर्तव्यम् । तच्च स्थानं अशीतिदण्डविप्रकृष्टमित्यपि अत्रिप्रोक्तेऽर्चनातन्त्रे विवेचितम् । तद्यथा—आलयस्याशीतिदण्डाभ्यन्तरे वीथ्यां शवे स्थिते तत्रोत्सवं न कुर्यात् । चेत्, आभिचारकं भवति । तच्छीघ्रमपहाय प्रायश्चित्तं महाशान्तिं पार्षदं च हुत्वा पुनरुत्सवं कारयेत्—इत्यादि । अत्र यद्यपि शवस्यैवानुकीर्तनं वर्तते, तथापि

अन्त्यजानामपि तदुपलक्षणम् । अन्त्यजानां स्मृतिषु स्पर्शनिषेधे श्वसाहचर्यस्य बहुशो दर्शनात् । सर्वथान्त्यजानां देवालयप्रवेशनं न योग्यमेव । तदुक्तं भृगुसंहितायाम्—चण्डालैरन्त्यजैश्चैव तथान्यप्रतिलोमजैः । म्लेच्छैश्च नीचचाण्डालै गुरुनिन्दादिदूषितैः । एवमादिभिः संस्पृष्टे देवागारे विशेषतः । स्पृष्टे प्रवेशने बाधा पूजाकाले च दर्शने ॥ इति । अत्र पूजाकाले बहिरवस्थाय दर्शनमपि न कर्त्तव्यमिति यत् बोधितम्, तदिदं तेषां स्थूपिदर्शनपर्याप्तस्थानेऽवस्थानमपि पूजाकाले दर्शनं यथा न स्यात्, तथैवेति गमयति । एतदेवाभिप्रेत्य दक्षिणदेशे यत्र वैखानसादिसंप्रदायेनैव पूजाविधिः प्रतिष्ठाविधिश्च, तत्र वीथ्यादावपि अन्त्यजस्पर्शो निषिध्यते । तथाच वीथ्यादौ प्रवेशे न केवलं तत्रत्यानां ब्राह्मणादीनामेवाशुचित्वम्, किन्तु देवस्यापीति सिद्धम् । गोपुरादिकं हि महदाकारं दक्षिणदेशे क्षेत्रोत्तमेषु श्रीरामेश्वरादिषु अन्त्यजानां भगवद्दर्शनार्थमेव संपादितम् । यतः शैवागमादिषु वैखानसागमादिषु च गोपुरदर्शनमेवान्त्यजानां सभक्तिकं परमसुखाधायकं प्रतिपादितम् ।

श्रीपाञ्चरात्रे पाद्मतन्त्रे चर्यापादे १८ अध्याये प्रमाणानि—

आशौचवत्प्रवेशे च पूर्ववद्विधिरिष्यते ।
चण्डालः श्वपचो वापि तादृशाः पुल्कसादयः ॥ १ ॥
अज्ञानाद्भगेहे तु कर्मस्वधिकृता यदि ।
वसेयुश्चैव तैः सार्धं भोज्यं वा वस्तु तादृशम् ॥ २ ॥
स्पृष्टभागधनाङ्गं चेत्स्पृष्टं वा कौतुकं यदि ।
क्रियासमभिहारेण प्रायश्चित्तमिहोच्यते ॥ ३ ॥
शोधयेत् मन्दिरं पूर्वं गोमयालेपनादिभिः ।
पुण्याहं वाचयित्वाथ ब्राह्मणांस्तत्र भोजयेत् ॥ ४ ॥

स्वाध्यायं परिकुर्वीरन् ब्राह्मणा वेदपारगाः ।
इतिहासपुराणानि पठेयुश्च दिवानिशम् ॥ ५ ॥
कपिलाश्च प्रदेशेषु तत्र तत्राभिवासयेत् ।
एवं मासादिकालेषु दोषगौरवलाघवम् ॥ ६ ॥
अवेक्ष्य शोधिते धाम्नि ब्राह्मणांस्तोषयेद्धनैः ।
प्रतिमानां यथायोगमुद्धारो वा नवीकृते ॥ ७ ॥
कुर्यात्ततो यथापूर्वं निमित्ते वा नवीकृते ।
प्रतिष्ठाप्य यथाशास्त्रं स्नापयेत्कलशैरपि ॥ ८ ॥
सहस्रेण पुरावृत्तदोषाणामपनुत्तये ।
अन्ते महोत्सवः कार्यो न चेद्राष्ट्रनृपक्षयः ॥ ९ ॥
बिम्बं न चालयेच्छैलं न नवीकरणं तथा ।
तथैव दिव्यमार्षं च स्वयं व्यक्तं च कौतुकम् ॥ १० ॥
तथान्यैर्मागधाद्यैश्च प्रतिलोमैश्च गर्हितैः ।
प्रथमादिप्रविष्टं चेद्धामावरणभूतलम् ॥ ११ ॥
धामस्पर्शे तथान्यस्य बलिपीठादिकस्य च ।
स्पर्शे कृत्वा यथापूर्वं शान्तिहोमं समाचरेत् ॥ १२ ॥
सहस्रकलशैर्देवं स्नापयेत्तस्य शान्तये ।
श्वापदैश्च शृगालाद्यैश्चण्डालैश्चैव गर्हितैः ॥ १३ ॥

इति ॥ एतैर्हि स्पष्टमेव पुनः संस्कारविधानात् चाण्डालादीनां प्राकारादिप्रवेशोऽपि निषिध्यत इति स्पष्टमेव सर्वेषाम् ।

[परम्परास्पर्शस्य स्पर्शपदार्थत्वम्]

यद्यपि स्पर्शशब्देनावयवसंयोगः साक्षादेव विवक्ष्यते, तथापि चण्डालस्पर्शमात्रे परम्परासंयोगोऽपि स्पर्श एवेति शूलपाणिकृतजातिविवेके विवेचितमिति न दोषः । एतेन—विरोधे त्वनपेक्ष्यं स्यादिति सूत्रं शाबरं भाष्यमपि—व्याख्यातम्;

तस्य चण्डालस्पर्शेतरविषयत्वात् । व्यक्तं चैतत्तन्त्रवार्तिके १०० तमे पृष्ठे विवेचितम् ।

अस्पृश्यास्पर्श्यतायां चरकाद्याशयसंग्रहणम्

आयुर्वेदाचार्या अपि चरकादयश्चण्डालादिच्छायातिक्रमणमपि दोषाय मन्वानाः परम्परासम्बन्धोऽपि स्पर्शपदार्थ इति मन्यन्त एव । तदत्र द्विश्राणामायुर्वेदपण्डितप्रवराणामाशयं संगृह्य प्रकाशयामः । तद्यथा महामहोपाध्याय श्रीयुक्त गणनाथसेनसरस्वतीमहोदया मन्यन्ते—

"गवाशनादिदुश्चरितशतपरायणतादर्शनात् पतितानां सहवासो न केवलं धर्मशास्त्रे प्रत्युत वैद्यकग्रन्थेष्वपि निषिद्धः । यथा चरके' "न पतितैः सहासीत" इत्यादिवचनैः । अत्र च हेतुविशेषेण तत्सहवासस्य कुष्ठादिनिन्दितव्याधिकारित्वमेव ; प्रायस्तादृशजनेषु तत्तद्रोगबाहुल्यदर्शनात् । तदुक्तं सुश्रुते—प्रसङ्गाद्गात्रसंस्पर्शान्निःश्वासात्सहभोजनात् । सह शय्यासनाच्चापि गन्धमाल्यानुलेपनात् । कुष्ठं ज्वरश्च शोषश्च नेत्राभिष्यन्द एव च । औपसर्गिकरोगाश्च संक्रामन्ति नरान्तरम् ॥इति॥ किञ्च कदाचारपराणां शरीरेषु साक्रामिकरोगप्राचुर्यमाङ्ग्लवैद्यकमतावलम्बिभिरपि बहुधा परीक्षाशतैर्निर्णीतमेवेति युक्तिशास्त्राभ्यां सम्यगनुमतैव केषाञ्चिद्धीनानामस्पृश्यतेति सम्मतिः—महामहोपाध्यायोपाधिक श्रीगणनाथसेनशर्मणः—इति ।

श्रीयुक्तयामिनीभूषणरायमहोदया अप्यत्रैवानुकूलाः । तद्यथाः—

"आयुर्वेदशास्त्रस्य हि स्वास्थ्यमूलकत्वात् दृष्टफलकत्वमेव प्राधान्येनाङ्गीकर्तव्यम् । तच्च दृष्टफलं विधिष्वारोप्यं निषेधेषु रोगश्चेति । तथाचायुर्वेदे चरकादिषु ग्रन्थेषु 'सहासीत नोन्मत्तैर्न पतितैर्न क्षुद्रै'रित्यादिवचनैः पतितैः स्वकर्मभ्रष्टैर्हीनै म्लेच्छैः चा-

चण्डालादिभिः सममासनस्य निषेधादेभिः सह संसर्गेण रोगस-म्भावना वर्तत इति। अत्र पतितशब्देन स्वकर्मभ्रष्टो यो विवक्ष्यते, स हि चण्डालसंसर्ग्यपि भवति इति, तत्संसर्गिसंसर्गस्य दोषत्वे तत्संसर्गस्य दोषत्वं कैमुतिकन्यायसिद्धमेव। एवमपि न क्षुद्रै रिति पुनस्तत्संसर्गस्य निषेधेनेदं ज्ञायते यद्विशेषप्रतिषेधोऽत्र क्रियत इति। तथाचायुर्वेदोक्तानामपि निषेधानां क्वचित्कर्मविपाकाध्यायोक्तरीत्या जन्मान्तरीयफलकत्वेऽपि "अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते" इति न्यायेन चण्डालादिसंसर्गस्यैहिकरोगनिदानत्वमेव सम्भाव्यते। अभक्ष्यभक्षणादूषितानां श्वपचादीनामपि क्रिमिकुष्ठादिरोगसम्बन्धादौपसर्गिकरोगाणां सहासीनेष्वन्येषु संक्रमणं सम्भवति। तदुक्तं सुश्रुते—'प्रसङ्गाद्गात्रसंस्पर्शात्' इत्यादि। इदमेवभिप्रेत्य आमशोफच्छेदकस्य पक्वशोफाच्छेदकस्य च "यश्छिनत्त्याममज्ञानात् यश्च पक्वमुपेक्षते। श्वपचाविव मन्तव्यौ तावनिश्चितकारिणौ" (सु०सूत्र०अ०१७) इति वचनेऽसंव्यवहार्यत्वे-श्वपचदृष्टान्तत्वमुक्तम्। अस्मिन् प्रसङ्गे इदमपि सूच्यते—यत् "न चैत्यध्वजगुरुपूज्यात्यस्तच्छायामतिक्रमे" दिति वचने अत्यस्तपदेन श्वपचादिविवक्षणात् तच्छायातिक्रमणमपि निषिध्यमानं तेषामन्येषाञ्च कियद्दूरमन्तरेणावस्थानमेव समुचितम्—इति।

तथाच धर्मशास्त्राणामपि आयुर्वेदेन महान् सम्बन्धो वर्तत इति यावच्छक्ति धर्मशास्त्राविरोधेन, यत्र पृथगायुर्वेदेऽपि निषेधस्तत्र यथावदेव यथाशक्ति तस्य परित्यागेन व्यवहरणमेव सर्वेषां समुचितमिति—

यामिनी भूषणरायः।
एम्०ए०, एम्०बी० एम्०आर० ए०एस०, प्रेसिडेन्ट आल इन्डिया आयुर्वेदिक कान्फरन्स, प्रिंसिपाल—अष्टांगायुर्वेदविद्यालयः।

वैद्यरत्नश्रीयुक्तयोगेन्द्रनाथकविराजमहोदयास्त्वन्यथा मन्यमाना इव लिखन्ति । तद्यथा—

"चण्डालादिभिर्नीचवर्णैः सह व्यवहारात् सहवासाद्वा दृष्ट-दोषत्वमायुर्वेदेषु नोपपादितम् । न पतितैः सहासीतेत्यादीनि वच-नानि विद्यन्ते नाम । तत्र तु हीनवर्णत्वं नेप्सितम् । अपि त्वाचार-भ्रंशजपातित्यमेव । न केवलमायुर्वेदेषु, धर्मशास्त्रेष्वपि शास्त्राचार-विधयः स्वस्थवृत्तविधयश्च बहुशो निबद्धाः । शीलशौचाचारवन्तः सदैव स्वास्थ्यसम्पन्नाः सुखिनो वर्तन्त इति शास्त्रे लोकेऽपि दृश्यते। आचारभ्रंशाद् बहवो व्याधय उत्पद्यन्त इत्यपि प्रत्यक्षज्ञानलब्धं तथ्यमेव। असदाचारैः सह संसर्गात् स्वास्थ्यहानिशङ्का बहुशो विद्यते। अतस्तैः सह संसर्गान्मेलनमायुर्वेदेषु निन्दितम्। ये खलु सदाचारभ्रंशात्पतितास्तानेवाभिप्रेत्य "न पतितैः सहासीते-" त्यादयः शास्त्रकृद्भिरुक्ताः, न पुनरन्त्यजान्। ये तु हीनवर्णा अपि सदाचाराः, न तैः सह संसर्गात्कापि दृष्टदोषाशङ्काऽऽयुर्वेदेषु प्रतिपादिता।

महामतिः सम्राडकबरशाहः क्षत्रियकन्यां परिणीतवान्। तयोरपत्यं जहांगीरशाहः। सोऽप्यूढायां क्षत्रियकन्यायां शहाजहा-नाख्यं तनयं जनयामास। जहांगीरशहाजहानौ अतीव पराक्रान्तौ प्रजारञ्जकौ गुणसम्पन्नौ च नरेन्द्रौ बभूवतुः। गिल्वार्टबेकेट इत्याख्यः कश्चिदिंग्लण्डीयः सारासेनवंशीयां कन्यां परिणीय तस्यां 'टमासबेकेट" नामानं पुत्रं जनयामास। पुण्यश्लोकोऽसाव-द्यापि सेन्टमास इत्याख्यया स्वदेशवासिभिः सभक्ति स्मर्यते पूज्यते च। अस्मद्देशेषु व्होलारमहोदयः रेवारेशट् कृष्णमोहनबा-नर्जिमहाशयस्य कन्यां परिणीतवान्। तयोरपत्यं मि० ई० एम्

ह्वीलार महोदयो महामनाः सुपण्डितश्चासीत्। यदि तावदीदृशेषु बहुष्वपि मिश्रविवाहेषु न कोऽप्यैहिको दोषो दम्पत्योरपत्यानां वा दृश्यते, का कथा तर्हि स्वस्थवृत्ताचारादिपरिपालनपरैर्हीनवर्णैरन्यैर्यैतरैश्च सहावस्थानस्य। यथा धर्मशास्त्रे रसोनस्याभक्ष्यत्वानुशासनेऽपि दृष्टगुणत्वादस्यौषधार्थं प्रयोग आयुर्वेदानुमत एव। तथैव हीनवर्णेर्यैतरैः सहवासः पारलौकिकानिष्टशङ्कया धर्मशास्त्रविगर्हितोऽपि स्वस्थवृत्तादिपरायणैस्तैः सह संसर्गो दृष्टदोषत्वाभावादायुर्वेदेषु न निषिद्धः। इति—योगीन्द्रनाथसेनस्य मतम्।

परन्त्वेतेषामपि पतितसंसर्गस्य रोगनिदानत्वं मन्यमानानां चण्डालसंसर्गस्य येन पतितत्वं शास्त्रतोऽगम्यते, तस्य रोगनिदानत्वमवश्यमेवाङ्गीकर्तव्यम्। सर्वथा तु लोकदृष्ट्या युक्तिदृष्ट्या चान्त्यजस्पर्शो दोषायैव भवतीत्यवश्यमङ्गीकर्तव्यम्। अथ प्रतिपत्तिसौकर्यार्थमपरस्यायुर्वेदपण्डितवरस्याशयमत्र प्रकाशयामः। तद्यथा-

“वैद्यकशास्त्रस्य हि स्वास्थ्यमूलकत्वाद् दृष्टफलकत्वमेव प्राधान्येनाङ्गीकर्तव्यम्। तथाहि—तदुक्तविधिना चरितेनारोग्यं तद्वैपरीत्येन च वैपरीत्यं भवति। चरकादिषु वैद्यकसंहिताग्रन्थेषु “सहासीत न पतितैर्न क्षुद्रैरि”त्यादिवाक्यानुसारेण पतितादिभिः समवस्थानादेरपि रोगजनकत्वं सूचितम्। एतेन तैः सह भोजनादिव्यापारस्य सुतरां प्रतिषेधः।

पृथग्जातिगतसाम्यस्य भिन्नतया जात्यन्तरसंसर्गोऽपि वर्जनीय एवेति वैद्यकसिद्धान्तः। तथाहि—आहाराचारचेष्टाभिर्यादृशीभिः समन्वितौ। स्त्रीपुंसौ समुपेयातां तयोः पुत्रोऽपि तादृशः। किञ्च—मातापित्रोस्तु नास्तिक्यादशुभैश्च पुराकृतैः। वातादीनाञ्च कोपेन गर्भो विकृतिमाप्नुयात्। अन्यच्च—“देवताब्राह्मणपराः

शौचाचारहिते रताः। महागुणान् प्रसूयन्ते विपरीतास्तु निर्गुणान्" इत्यादिसुश्रुतानुशासनात् सदाचारादीनामार्योचितरीत्यैव समाधानमुक्तं भवति। अभक्ष्यभक्षणाद्यनार्यशीलानामधमजातीयानां श्वपचादीनां सर्वथा सम्पर्कोऽनयैव युक्त्या पर्युदस्तः।

किञ्च वैद्यकशास्त्रे 'न चैत्यध्वजगुरुपूज्यात्यस्तच्छायामतिक्रमेत्, इत्याद्युक्तेरप्रशस्तजनानां सामीप्येनावस्थानमपि रोगनिदानत्वेन विज्ञापितम्। अत्रात्यस्तशब्देन हीनजातिरेवाभिप्रेता। इत्य युक्तिभिर्युक्तिभिश्च भिन्नजातिगतसंसर्गो न कर्तव्य इति परा मतिः—अष्टाङ्गायुर्वेदविद्यालयाध्यापकस्य काव्य-व्याकरण-सांख्यतर्कतीर्थोपाधिकस्य श्रीनलिनीरञ्जनसेनस्य (कलकत्ता)

[अस्पृश्यानां ग्रामादिप्रवेशायोग्यतायां शिल्पशास्त्रम्]

शिल्पशास्त्रगतान्यपि वचनान्यधो निर्दिश्यमानानि चाण्डालचर्मकारादीनां ग्रामाद् बहिः क्रोशद्वयाद्दूरे एवावासव्यवस्थापनम्, तथा चण्डालादिस्त्रीणां नगरमध्ये ग्राममध्ये वा प्रातःकाले मलनिष्कासार्थं केवलं प्रवेशाधिकारं च शासति इदमेव गमयन्ति—यत् चण्डालादीनां ग्रामप्रवेशादिकं यथेच्छं न योग्यमिति। अत्रैतानि वचनानि सचित्रहिन्दीशिल्पशास्त्रसाराभिधे ग्रन्थे उल्लिखितानि। यथा नगरव्यवस्थाप्रकरणे—

शस्तं सर्वत्र वाप्यादि ह्युत्तरे पुष्पवाटिका।
दक्षिणे गणिकावाटं परितः शूद्रजन्मनाम्॥
वैश्यानां वणिजां प्राच्यां मध्ये राजापणो भवेत्।
प्रागुदीच्यां कुलालानां वापकानां च वायवे॥
जालिकानां च वायव्ये सूनानां पश्चिमे तथा॥

इति कश्यपसंहिता।

तैलविक्रयिणां सौम्ये तद्वणां चाऽप्यनले तथा ।
वायव्ये कारुकादीनां रजकानां च पश्चिमे ॥

इति भृगुसंहिता ।

क्रोशद्वये तु तस्यार्धे बहिश्चण्डालपक्कणम् ।
प्रागुत्तरेण तु क्रोशात् बहिः पितृवनं भवेत् ॥
अनुक्तानां तथान्येषां युक्त्यावासं प्रकल्पयेत् ॥

इति मयमतम् ।

देवालयमथ मध्ये परितो ग्रामो यथा विहितः ।
परितः सर्वजनालयमुदितं किञ्चित्ततो दूरे ॥
चाण्डालकुटीराणि तत्रैव च कोलिकानां हि ॥ अ० ११।
चाण्डालकुटीराणि पूर्वायां क्रोशमात्रे स्युः ।
चाण्डालयोषिताद्यास्ताम्रायःसीसभूषणाः सर्वाः ॥
पूर्वाण्हे मलमोक्षक्रियोचिता ग्राममावेश्याः ॥

मयमतम् (अ० ६)

चाण्डालचर्मकारश्मशानं तोयाशयापयानं स्यात् ।
एतेषामपि तत्तद्दूरे देशे श्मशानं स्यात् ॥ भृगुसंहिता ।

एतेन—शिल्पशिक्षणम् इत्याभिधोऽपि "कृष्णाजी विनायकवझे" महोदयसंपादितो ग्रन्थोऽपि—व्याख्यातः । तत्रापि हि नगररचनाविद्यायां पूर्वोद्धृतान्येव सर्वाणि वचनानि संगृहीतानि । पुस्तकद्वयेनापीदमेव संसूच्यते—यत् अन्त्यजानां न केवलं यथेच्छं विना कार्यं ग्रामप्रवेशयोग्यता, न वा सर्वसाधारणं जलाशयादिसम्बन्धयोग्यता, किन्तु न ब्राह्मणक्षत्रियवैश्यशूद्ररथ्यादिष्वावासयोग्यतापीति । तथाच आयुर्वेदशास्त्रतः, तथा शिल्पशास्त्रतोऽपीदं सिध्यति, यच्चण्डालादयो न ग्रामान्तः प्रवेशनीयाः, न वा

सर्वसाधारणकूपादिव्यवहारयोग्याः इत्यादीति। एतदेवाभिप्रेत्यो-क्तं भगवता मनुना—

चण्डालश्वपचानान्तु बहिर्ग्रामात् प्रतिश्रयः।
अपपात्राश्च कर्तव्या धनमेषां श्वगर्दभम् ॥१-।५१ ॥
वासांसि मृतचेलानि भिन्नभाण्डेषु भोजनम्।
कार्ष्णायसमलङ्कारः परिव्रज्या च नित्यशः ॥ ५२ ॥
न तैः समयमन्विच्छेत् पुरुषो धर्ममाचरन्।
व्यवहारो मिथस्तेषां विवाहः सदृशैः सह ॥ ५३ ॥
अन्नमेषां पराधीनं देयं स्याद् भिन्नभाजने।
अबान्धवं शवं चैव निर्हरेयुरिति स्थितिः ॥ ५४ ॥
रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च।
दिवा चरेयुः कार्यार्थं चिन्हिता राजशासनैः ॥ ५५ ॥
वध्यांश्च हन्युः सततं यथाशास्त्रं नृपाज्ञया।
वध्यवासांसि गृह्णीयुः शय्याश्चाभरणानि च ॥
(५६ । अ० १०) इति।

सर्वथा तु स्पर्शास्पर्शविचारोऽयं न सङ्घटनविरोधीति सिद्धम्॥

[कलौ स्पर्शदोषास्तित्वविचारः]

अथ साधकबाधकप्रमाणबलाबलविचारार्थं प्रवर्तमाना वयं स्पर्शास्पर्शविषयाणि प्रमाणजातानि समालोचयामः। तत्रेदं प्रथमत आलोचनीयम्—यत्कलियुगे स्पर्श-दोषो वर्तते वा न वेति। अत्र केचित्प्रत्यवतिष्ठन्ते—न कलौ स्पर्श-दोष एव समस्ति। अत एव हि पराशरस्मृतौ—त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत्। द्वापरे कुलमेकन्तु कर्तारन्तु कलौ युगे—इति कलौ कर्तृमात्रस्य दुष्टत्वमुपवर्ण्यमानमुपपद्यते। अत्र हि क-र्तृशब्देन महापातकादिकर्तैव विवक्ष्यते। तथा च कलौ युगे ब्रह्म-

हत्यादिपापाचरणमेव पातित्यनिदानम्, न तु पतितसंसर्गविशेषमात्रमिति नियतमूरीकर्तव्यम्। अन्यथा हि--कृते सम्भाषणादेव त्रेतायां स्पर्शनेन च। द्वापरे चान्नमादाय कलौ पतति कर्मणा—इति कर्ममात्रस्य पातित्यनिदानत्वमुपवर्णितमसङ्गतमेव स्यात्। अत्र हि "त्रेतायां स्पर्शनेन च" "कलौ पतति कर्मणा" इति विभागावसरे हि स्पर्शनपदस्य कर्मपदस्य च प्रयोगेणेदं स्पष्टमवगम्यते—यत्स्पर्शदोषो द्वापरे सुतरां कलौ च नास्त्येवेति। तथाचावश्यमिदमूरीकर्तव्यं यत्पराशराचार्याणामाशयः कलौ न स्पर्शदोषोऽस्तीति। अत्र चेदमवश्यं सूचनीयं समापतितं यत्स्मृत्यन्तरेण विरोधे कलौ पराशरस्मृतिरेव समादरणीया, विशेषतश्च प्रायश्चित्तविषये। तदुक्तं माधवीये—एतदेव विवक्षित्वा प्रतिजज्ञे विशेषतः। पराशरेण यत्प्रोक्तं प्रायश्चित्तमितीदृशम्—इति। एतेन—

ब्रह्महा मद्यपस्तेनो गुरुतल्पग एव च।
एते महापातकिनो यश्च तैः सह संवसेत्॥
संल्लापस्पर्शनिश्वाससहयानासनाशनात्।
याजनाध्यापनाद्यौनात्पापं संक्रमते नृणाम्॥
एते महापातकिनस्तत्संसर्गी च पञ्चमः॥
यो येन पतितेनैषां संसर्गं याति मानवः।
स तस्यैव व्रतं कुर्यात्तत्संसर्गविशुद्धये॥

इत्यादिवचनान्यपि—व्याख्यातानि; एतेषां सर्वेषां युगान्तरविषयत्वस्यैवोरीकर्तव्यत्वात्। एतेन—पतितान्नभक्षणादिनिषेधा अपि व्याख्याताः। तथाच पतितस्पर्शस्य चण्डालादिस्पर्शस्य च कलौ युगे न दोषत्वमेव। यत्तु युगान्तरे चाण्डालादिस्पर्शस्य

दोषत्वमुपवर्णितम्, तदपि नैकान्तेन ; तीर्थविवाहादिषु हि स्पर्श-दोषो नास्तीति बहुषु स्मृतिषु निरूपितम् ।

तद्यथाः—

देवयात्राविवाहेषु यज्ञप्रकरणेषु
उत्सवेषु च सर्वेषु स्पृष्टास्पृष्टिर्न विद्यते ॥ अत्रिः ॥
दाने विवाहे यज्ञे च संग्रामे देशविप्लवे ।
आपद्यपि हि कष्टायां सद्यः शौचं विधीयते ॥ याज्ञ० ॥

इत्यादि । तथाचापदाद्यवस्थासु चण्डालादिस्पर्शस्य युगान्तरेऽपि दोषत्वनिरासात्कलौ सर्वथा तद्दोषत्वस्य पराशराचार्यै निषेधसूचनाच्च चण्डालादिस्पर्शो नेदानीं दोषाय भविष्यतीति ।

अत्र समुचितमस्मदीयमाशयमुपवर्णयितुं वयं पश्यामः प्रथमं प्रामाणिकानां निबन्धकाराणामन्येषामाशयः संग्रहणीय इति । अत्र यद्यपि माधवाचार्याः कृते सम्भाषणादेवेति श्लोकव्याख्यावसरे कलौ पतितसम्भाषणादिना न स्वयं पतति, किन्तु वधादिना कर्मणैव पतितो भवतीत्येव—व्याचक्षते । तथापि नात्र माधवाचार्याणां पतितसम्भाषणादीनां न दोषत्वमित्याशयोऽभ्युपगन्तुं शक्यते । अन्यथा हि "कर्तारन्तु कलौ युगे" इति विवरणावसरे "कर्तृत्यागः सम्भाषणादिवर्जनम्" इति विवरणमसङ्गतं स्यात् । अनेन हि विवरणेनेदमवगम्यते यत्सम्भाषणादिकमपि कलौ वर्ज्यमिति । यद्यपि "कलौ पतति कर्मणा" इति विवरणावसरगतं वाक्यजालं विरुद्धमिव प्रतिभाति, तथापि द्वादशाध्यायान्ते "आसनाच्छयनाद्यानात्सम्भाषात् सहभोजनात् । संक्रामन्तीह पापानि तैलबिन्दुरिवाम्भसि" इति पराशरवचनस्य तद्विवरणस्य च माधवाचार्यसम्बन्धिनश्चानुसारेणाभ्यस्तसहासनादिपरत्वमेव तत्र विव-

त्रणीयमिति न विरोधः। अन्यथा—"श्वपाकं चापि चण्डालं विप्रः सम्भाषते यदि। द्विजसम्भाषणं कुर्यात्सावित्रीं च सकृज्जपेत्॥ चण्डालैः सह सुप्ते तु त्रिरात्रमुपवासयेत्। चण्डालैकपथं गत्वा गायत्रीस्मरणाच्छुचिः॥ चण्डालदर्शने सद्य आदित्यमवलोकयेत्। चण्डालस्पर्शने चैव सचैलं स्नानमाचरेत्॥ चाण्डालखातवापीषु पीत्वा सलिलमग्रजः। अज्ञानादेकभक्तेन त्वहोरात्रेण शुध्यति॥ चण्डालभाण्डसंस्पृष्टं पीत्वा कूपगतं जलम्॥ गोमूत्रयावकाहारस्त्रिरात्राच्छुद्धिमाप्नुयात्॥

चण्डालघटसंस्थन्तु यत्तोयं पिबति द्विजः।
तत्क्षणात्क्षीयते तस्य प्राजापत्यं समाचरेत्॥
चरेत्सान्तपनं विप्रः प्राजापत्यमनन्तरम्।
तदर्धन्तु चरेद्वैश्यः पादं शूद्रस्तथा चरेत्॥
भाण्डस्थमन्त्यजानान्तु जलं दधि पयः पिबेत्।
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैव प्रमादतः॥
ब्रह्मकूर्चोपवासेन द्विजातीनान्तु निष्कृतिः।
शूद्रस्य चोपवासेन तथा दानेन शक्तितः॥
भुङ्क्तेऽज्ञानाद् द्विजश्रेष्ठश्चाण्डालान्नं कथञ्चन।
गोमूत्रयावकाहारो दशरात्रेण शुध्यति॥
अविज्ञातस्तु चण्डालो यत्र वेश्मनि तिष्ठति।
विज्ञातरूपं विन्यस्य द्विजाः कुर्युरनुग्रहम्॥
चण्डालैः सह सम्पर्कं मासं मासार्धमेव च।
गोमूत्रयावकाहारो मासार्धेन विशुध्यति॥
गृहस्याभ्यन्तरं गच्छेच्चाण्डालो यदि कस्यचित्।
तमागाराद्विनिःसार्य मृद्भाण्डं च परित्यजेत्॥

श्वचाण्डालोदक्यदृष्टश्च भोजनं परिवर्जयेत् ।
यो वै समाचरेद्विप्रः पतितादिष्वकामतः ॥
पञ्चाहं वा दशाहं वा द्वादशाहमथापि वा ।
मासार्धमेकमासं वा मासद्वयमथापि वा ॥
अब्दार्धमब्दमेकं वा भवेदूर्ध्वन्तु तत्समः ॥

इति पराशराचार्यैरेव चण्डालादिसम्भाषणादीनामपि कथं प्रायश्चित्तमुपवर्णितमुपपद्यते ? तदयं निष्कर्षः—यत्कृतयुगादौ सद्यः सम्भाषणमात्रेणापि पातित्यम्, कलौ अभ्यस्तेन तेन पातित्यमिति। एतेन—एतैः सह समायोगं यः करोति दिने दिने । तुल्यतां याति सोप्याशु कलौ संवत्सरे गते—इति पाद्मवाक्यम्, "संवत्सरेण पतति पतितेन सहाचरन् । याजनाध्यापनाद्यौनान्न तु यानासनाशनात्" ॥ बोधा० ॥ पतितैः सम्प्रयोगे च ब्राह्मेण यौनेन वा तेभ्यः सकाशान्मात्रोपलब्धास्तेषां परित्यागस्तैश्च न संवसेत् ॥ वसि० पञ्च महापातकान्याचक्षते गुरुतल्पं सुरापानं भ्रूणहत्या ब्राह्मणस्वन्यासापहरणं पतितसम्प्रयोगं च ब्राह्मेण यौनेन वा, अत्राप्युदाहरन्ति—संवत्सरेण पतति पतितेन सहाचरन् । याजनाध्यापनाद्यौनान्न तु यानासनाशनात्—इति । वसिष्ठः । ब्रह्महसुरापगुरुतल्पगमातृपितृयोनिसम्बन्धस्तेननास्तिकनिन्दितकर्माभ्यासिपतितात्याग्यपतितत्यागिनः पातकसम्प्रयोजकास्तैः साकं समाचरन्" इति गोतमः, "संवत्सरेण पतति संसर्गं कुरुते तु यः । यो हि शय्यासने नित्यं वसन् वै पतितो भवेत् । याजनं योनिसम्बन्धं तथैवाध्ययनं द्विजः । सद्यः कृत्वा पतेज्ज्ञानात्सहभोजनमेव च। अविज्ञायापि यो मोहात्कुर्यादध्ययनं द्विजः । संवत्सरेण पतति सहाध्ययनमेव च" इति उशनाः, इत्यादिवचनान्यपि—व्याख्यातानि । सर्वथा

तु बहुस्मृतिसार्थक्यार्थं पराशरवाक्यानामेवोत्तरसन्दर्भगतानां सा-र्थक्यार्थञ्च कलौ युगेऽपि चाण्डालादिस्पर्शस्य दूषणत्वमूरीकर्त-व्यमेव। वस्तुतस्तु कृते सम्भाषणादेवेति वाक्यं पतितसंसर्गविष-यम्, न तु चाण्डालादिसंसर्गविषयमिति नियतमूरीकर्तव्यम्। तथा च पतितसंसर्गस्य पूर्वोक्तप्रकारेण संवत्सरपर्यन्तमभ्यस्तेन पातित्ये-ऽपि चण्डालस्पर्शेन सकृत्कृतेनापि पातित्यमिति सिद्धान्तेऽपि न विरोधः। अत एव पराशरस्मृतावपि चण्डालसम्भाषणमपि निषिध्यमानमुपपद्यते। अत्र प्रसङ्गे इदमपि सूच्यते यत्—त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत्। द्वापरे कुलमेकन्तु कर्तारन्तु कलौ युगे—इति वचनस्य "कृते सम्भाषणादेव त्रेतायां स्पर्शनेन च। द्वापरे चान्नमादाय कलौ पतति कर्मणा" इति वचनस्य च परस्प-रसम्बन्धोऽङ्गीकर्तव्यः। तदुक्तं विद्वन्मनोहराख्यायां पराशरस्मृति-व्याख्यायाम्—"एतेन—पूर्वोक्तेषु देशादित्यागेष्वेतानि निमित्ता नि दर्शितानि। यथा कृते सम्भाषणमात्रात्पातित्यम्,तच्चैकदेशवा-सेऽवश्यम्भावीति देशत्यागः। त्रेतायां स्पर्शनेन, स चैकग्रामवासे-ऽवश्यम्भावीति ग्रामस्यैव त्यागः। द्वापरे त्वन्नभोजनेन, तच्चैक-कुलवासेऽवश्यम्भावीति कुलस्यैव त्यागः। कलौ तु कर्मणैवेति कर्तृमात्रत्यागः। तदुक्तं वृद्धपराशरेणापि—त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत्। द्वापरे कुलमेकन्तु कर्तारन्तु कलौ युगे। कृते सम्भाष्य पतति त्रेतायां स्पर्शनेन तु। द्वापरे भक्षणेऽन्नस्य कलौ पतति कर्मणा। इति। एवं च यत्र सम्भाषस्यापि निषेधस्तत्र देशत्याग इत्यादीनां विवरणं पराशराचार्यसम्मतमित्यूरीकर्तव्यमि-ति पराशराचार्यैरेव चण्डालसम्भाषणस्यापि निषेधाच्चण्डालदेश-त्यागोऽपि पराशराचार्यसम्मत इत्यवश्यमूरीकर्तव्यम्। अत्र च

देशपदेन नगरं विवक्ष्यते। नगरलक्षणन्तु भृगुप्रोक्तमिदमेव—यत् "पण्यक्रयादिनिपुणैश्चातुर्वर्ण्यस्य यद्युतम्। अनेकजातिसम्बद्धं नैकशिल्पिसमाकुलम्। सर्वदैवतसम्बद्धं नगरं त्वभिधीयते" इति। एतेन ग्रामलक्षणमपि व्याख्यातम्। "विप्राश्च विप्रभृत्याश्च यत्र वै निवसन्ति ते। स तु ग्राम इति प्रोक्तः शूद्राणां वास एव च" इति। तथा चेदं सिद्धं कलावपि नगरनिवासो न धर्मभीरूणां युक्त इति। यदि चावश्यं नगरनिवासोऽपि कर्तव्यः समापतति, एवमपि चण्डालादिभाषणं विनावस्थानन्तु नियतमेव। अत्र च प्रसङ्गे इदमपि सूच्यते—यन्नगरनिवासादिष्वपि स्पर्शदोषपरिहारार्थं चण्डालादीनामन्येषाञ्च कियद्दूरमन्तरं रथ्यादावपि रक्षणीयमिति। तदुक्तं पराशरस्मृतौ—युगं युगद्वयं चैव त्रियुगञ्च चतुर्युगम्। चण्डालसूतिकोदक्यापतितानामधः क्रमात्। ततः सन्निधिमात्रेण सचेलं स्नानमाचरेत्। स्नात्वाऽवलोकयेत्सूर्यमज्ञानात्स्पृशते यदि" इति। अत्र विद्वन्मनोहराव्याख्या—"चण्डालादिस्पर्शनिर्णयस्य शेषमाह युगे युगे चेति। चण्डालादीनामधःक्रमात् प्रातिलोम्यक्रमेणैकद्वित्रिचतुर्युगमन्तरं स्पर्शनिवारणाय न्याय्यम्। तेनायमर्थः—पतितस्य व्यवधानमेकेन युगेन, उदक्याया युगद्वयेन, सूतिकाया युगत्रयेण, चण्डालस्य युगचतुष्टयेन कार्यमिति। किञ्चोक्तव्यवधानाभावेन सन्निधिमात्रेण स्पर्शाभावेऽपि सचैलं स्नानं कार्यम्। अज्ञानतः स्पर्शे तु स्नानं सूर्यावलोकनञ्च। कामतः स्पर्शे तु च्यवनः—"श्वानं श्वपाकं प्रेतधूमं देवद्रव्योपजीविनं ग्रामयाजकं सोमविक्रयिणं यूपं चितिं चितिकाष्ठं मद्यं मद्यभाण्डं सस्नेहं मानुषास्थि शवस्पृशं रजस्वलां महापातकिनं च कामतः स्पृष्ट्वा सचैलाम्भोऽवगाह्योत्तीर्याग्निमुपस्पृश्य गायत्र्यष्टशतं जपेत्, घृतं प्राश्य

पुनः स्नात्वा त्रिराचामेदिति। एवमन्येषामस्पृश्यानां स्पर्शे स्नानम्, तत्स्पृष्टस्य स्पर्शे त्वाचमनम्। तृतीयस्य श्रोत्रस्पर्श इत्याद्यवगन्तव्यम्। यद्यपि—चण्डालस्पर्शने चैव सचैलं स्नानमाचरेत्—इति षष्ठेऽभिहितम्। तथाप्यज्ञानविषयतां तस्य स्पष्टयितुं पुनरत्रोपन्यासः। पूर्वोक्तव्यवधाने तु व्याघ्रपादः—"चण्डालं पतितं चैव दूरतः परिवर्जयेत्" इति। तदिदं सिद्धं यत्पराशरस्मृतिपर्यालोचनेन सर्वथा चण्डालादिस्पर्शो दोषायैवेति।

अत्र वैद्यनाथदीक्षितसंमता आह्निककाण्डगता व्यवस्थयेमेव। सा यथा—चण्डालादीनां व्यवधाने देशपरिमाणमाह पराशरः—युगं युगद्वयं चैव त्रियुगं च चतुर्युगम्। चण्डालसूतिकोदक्यापतितानामधः क्रमात्। ततः सन्निधिमात्रेण सचेलं स्नानमाचरेत्। स्नात्वावलोकयेत् सूर्यमज्ञानात् स्पृशते यदि। इति। अत्राङ्गस्पर्शे मज्जनसंख्यापि स्मर्यते—वृषलं चान्त्यजातिं च चण्डालं पतितं तथा। आर्तवाभिप्लुतां नारीं स्पृष्ट्वा स्नानं समाचरेत्। एकं च दशकं चैव द्वात्रिंशत् त्रिंशकं तथा। द्वात्रिंशच्च क्रमेणैव मज्जनं तु विधीयते। इति। स्मृत्यन्तरे—चण्डालस्य चतुषष्टिपदं श्रेणाः शतद्वयम्। द्वात्रिंशदथवा तस्य मनः शुद्धिं समाचरेत्॥ अस्पृश्यस्पर्शने चैव त्रयोदश निमज्जनम्। आचम्य प्रयतः पश्चात् स्नानं विधिवदाचरेत्। इति। व्यासः—सूतिकां पतितं तूदक्यां चण्डालं च चतुर्थकम्। यथाक्रमं परिहरेदेकद्वित्रिचतुर्युगमिति। अत्र व्यासपराशरवचनयोर्विरोधे विकल्पो द्रष्टव्यः। यत्तु—चण्डालं पतितं चैव दूरतः परिवर्जयेत्। गोबालव्यजनादूर्ध्वं सवासा जलमाविशेत्—इति व्याघ्रपादवचनम्, तदिदं संकटविषयम्। यदाह संवर्तः—संकटे विषमे चैव दुर्गे चैव विशेषतः। हट्टपत्तनमार्गे च

यथासंभवमिष्यते। तृणकाष्ठादिघातेन कुड्येनान्तरिते तथा। गोवालव्यजने चापि स्नानं तत्र न विद्यते—इति। यस्तु च्छायां श्वपाकस्य ब्राह्मणो ह्यधिरोहति। तत्र स्नानं प्रकुर्वीत घृतं प्राश्य विशुध्यति। चण्डालपतितच्छायां स्पृष्ट्वा स्नानं समाचरेत्। चत्वारिंशतत्पदादूर्ध्वं छायादोषो न विद्यते। इति। प्राज्ञापाठशालास्थाः द्विवेकरशास्त्रिमहोदयास्तु चण्डालादिस्पर्शस्य दोषत्वमूरीकुर्वाणा अपि तद्दोषपरिहारार्थमाचमनमेव कर्तव्यम्, न तु स्नानादिकमिति यद्वदन्ति, तत्र तेषामुपष्टम्भकं वचनं स्मृतिचन्द्रिकाद्युद्धृतम्--रजकश्चर्मकारश्च व्याधजालोपजीविनौ। निर्णेजकस्सूनिकश्च नटश्शैलूषकास्तथा। एतैर्यदङ्गं स्पृष्टं स्यात् शिरोवर्जं द्विजातिषु। तोयेन क्षालनं कृत्वा आचान्तः प्रयतो मतः इति शातातपवचनमेव। इदं च वचनं वैद्यनाथदीक्षितीयादिपर्यालोचनेन द्वितीयादिस्नानविषयं गम्यते।

अनया हि व्यवस्थयेदमेवावगम्यते—यत् स्पर्शनिमित्ताचनविधिपराणां सर्वेषां वचनानां चण्डालव्यतिरिक्तस्पर्शविषयत्वमेवाऽथवा कामकृतद्वितीयस्पर्शविषयत्वमेवेति। अस्तु वा कथमपि रजकश्चर्मकृच्चैवेति पूर्वोक्तवचनानुसारेण प्राथमिकरजकादिस्पर्शे शिरोवर्जं प्रक्षालनपूर्वकमाचमनमेव प्रायश्चित्तमिति, एवमपि अत्र शिरोग्रहणेन नाभेरूर्ध्वभागस्यैव ग्रहणात् नाभेरधोभागे तत्स्पर्शनिमित्तमाचमनविधान एव तात्पर्यमूरीकर्तव्यम्।

यत्तु पराशरस्मृतौ—शिल्पिनः कारुका वैद्या दासीदासाश्च नापिताः। राजानः श्रोत्रियाश्चैव सद्यः शौचाः प्रकीर्तिताः॥

सव्रतः सत्रपूतश्च आहिताग्निश्च यो द्विजः।
राज्ञश्च सूतकं नास्ति यस्य चेच्छति पार्थिवः॥

उद्यतो निधने दाने आर्तो विप्रनिमन्त्रितः।
तदैव ऋषिभिर्दृष्टं यथाकाले विशुध्यति ॥

इत्यादिकमुपन्यस्तम्। तदिदं मृतसूतकादिविषयमेव; न चण्डालस्पर्शादिविषयम्। एतेन—विवाहोत्सवयज्ञेषु त्वन्तरा मृतसूतके। पूर्वसंकल्पितं द्रव्यं दीयमानं न दुष्यति—इति पराशरवचनमपि व्याख्यातम् ॥ अत्र यथावसरमन्येषामपि स्मृतिकाराणां वचनानि चण्डालस्पर्शादिदूषणपराणि सङ्गृह्यन्ते। तद्यथा—याज्ञवल्क्यः—विनायकः कर्मविघ्नसिद्ध्यर्थं विनियोजितः।

गणानामाधिपत्ये च रुद्रेण ब्रह्मणा तथा ॥
तेनोपसृष्टो यस्तस्य लक्षणानि निबोधत ॥
अन्त्यजैर्गर्दभैरुष्ट्रैः सहैकत्रावतिष्ठते।
तेनोपसृष्टो लभते न राज्यं राजनन्दनः ॥

इत्यादि ॥ अत्र यद्यप्यन्त्यजैः साकमवस्थानं विघ्नोपसृष्टचिन्हतयैव निरूपितम्, तथापि तद्दुष्टमित्यत्र तु न विवादः ॥ एतेन—शूद्रप्रेष्यं हीनसख्यं हीनयोनिनिषेवणम्—इत्यादिकमपि व्याख्यातम्। मनुः—

दिवाकीर्तिमुदक्यां च पतितं सूतिकीं तथा ॥
शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुध्यति ॥
चण्डालम्लेच्छसम्भाषे स्त्रीशूद्रोच्छिष्टभाषणे।
उच्छिष्टं पुरुषं स्पृष्ट्वा भोज्यं चापि तथाविधम् ॥२२॥
अन्त्यस्यात्ययिनोऽन्नं च तप्तकृच्छ्रमुदाहृतम्।
चाण्डालान्नं द्विजो भुक्त्वा सम्यक् चान्द्रायणं चरेत् ॥
चाण्डालकूपभाण्डेषु यदज्ञानाज्जलं पिबेत्।
चरेत् सान्तपनं कृच्छ्रं ब्राह्मणः पापशोधनम् ॥४७॥

चण्डालेन च संस्पृष्टं पीत्वा वारि द्विजोत्तमः।
त्रिरात्रेण विशुध्येत पञ्चगव्येन शुध्यति ॥४७॥
दृष्ट्वा महापातकिनं चण्डालं वा रजस्वलाम्।
प्रमादाद् भोजनं कृत्वा त्रिरात्रेण विशुध्यति॥५३॥
वेदधर्मपरित्यागश्चण्डालस्य च भाषणम्।
चान्द्रायणेन शुद्धिः स्यान्न ह्यन्या तस्य निष्कृतिः॥
उच्छिष्टो यदि नाचान्तश्चण्डालादीन् स्पृशेद्द्विजः।
उच्छिष्टस्तत्र कुर्वीत प्रजापत्यं विशुद्धये ॥ ७४॥
चण्डालसूतिकाशवान् तथो नारीं रजस्वलाम्।
स्पृष्ट्वा स्नायाद्विशुध्यर्थं तत्स्पृष्टान् पतितांस्तथा॥
चण्डालसूतिकाशवैः संस्पृष्टं स्पर्शयेत् यदि।
प्रमादात्स्नात आचम्य जपं कृत्वा विशुध्यति॥
अस्पृष्टस्पर्शनं कृत्वा स्नात्वा शुध्येद्द्विजोत्तमः।
आचामेत विशुध्यर्थं प्राह देवः पितामहः ॥७७॥
चण्डालन्तु शवं स्पृष्ट्वा चरेत् कृच्छ्रं द्विजोत्तमः॥
दृष्ट्वा नभस्थं नक्षत्रमहोरात्रेण शुध्यति ॥७६॥

पराशरमाधवीये—चण्डालश्चपचैः स्पृष्टो विण्मूत्रोच्छिष्ट एव च।
त्रिरात्रेण विशुद्धः स्याद् भुक्तोच्छिष्टः षड़ाचरेत्॥

अङ्गिराः—अन्त्यानामपि सिद्धान्नं भक्षयित्वा द्विजातयः।
चान्द्रं कृच्छ्रं तदर्धं वा ब्रह्मक्षत्रविशां विदुः।अ०१।८।
रजकश्चर्मकारश्च नटो बुरुड एव च।
कैवर्तमेदभिल्लाश्च सप्तैते चान्त्यजाः स्मृताः॥३॥
अन्त्यजानां गृहे तोयं भाण्डे पर्युषितं च यत्।
प्रायश्चित्तं यदा पीतं तदैव हि समाचरेत्॥ ४॥

चाण्डालकूपभाण्डेषु त्वज्ञानात्पिबते यदि ।
प्रायश्चित्तं कथं तेषां वर्णे वर्णे विधीयते ॥ ५ ॥
चरेत्सान्तपनं विप्रः प्राजापत्यन्तु भूमिपः ।
तदर्धन्तु चरेद्वैश्यः पदं शूद्रेषु दापयेत् ॥ ६ ॥
अज्ञानात्पिबते तोयं ब्राह्मणस्त्वन्त्यजातिषु ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ॥७ इति॥

यमः—अस्तङ्गतो यदा सूर्यश्चण्डालरजकस्त्रियः ।
संस्पृष्टस्तु तदा कैश्चित्प्रायश्चित्तं कथं भवेत् ॥ अ०११८॥
जातरूपं सुवर्णं च दिवानीतं च यज्जलम् ।
तेन स्नात्वा च पीत्वा च सर्वे ते शुचयः स्मृताः ॥१६
रजकश्चर्मकारश्च नटो बुरुड एव च ।
कैवर्तमेदभिल्लाश्च सप्तैते चान्त्यजाः स्मृताः ॥५४॥
एषां गत्वा तु योषां वै तप्तकृच्छ्रं समाचरेत् ॥५५॥
विप्रः स्पृष्टो निशायान्तु उदक्या पतितेन च ।
दिवानीतेन तोयेन गृहे स्नानं समाचरेत् ॥

अत्रिः—रजकः शैलुषश्चैव वेणुकर्मोपजीविनः ।
एतेषां यस्तु भुङ्क्ते वै द्विजश्चान्द्रायणं चरेत्।अ१६८॥
सर्वान्त्यजानां गमने भोजने सम्प्रवेशने ।
पराकेन विशुद्धिः स्याद्भगवानत्रिरब्रवीत् ॥ १६६ ॥
चण्डालभाण्डे यत्तोयं पीत्वा चैव द्विजोत्तमः ।
गोमूत्रयावकाहारः सप्तत्रिंशदहान्यपि ॥१७०॥
चण्डालं पतितं म्लेच्छं मद्यभाण्डं रजस्वलाम् ।
द्विजः स्पृष्ट्वा न भुञ्जीत भुञ्जानो यदि संस्पृशेत् ॥
चर्मके रजके वैण्ये धीवरे नटके तथा ।

एतान् स्पृष्ट्वा द्विजो मोहादाचामेत्प्रयतोऽपि सन् ॥
एतैः स्पृष्टो द्विजो नित्यमेकरात्रं पयः पिबेत् ।
संस्पृष्टो यस्तु पक्वान्नमन्त्यजैर्वाऽप्युदक्यया ।
अज्ञानाद् ब्राह्मणोऽश्नीयात् प्राजापत्यार्धमाचरेत्॥१७१।
चण्डालान्नं यदा भुङ्क्ते चातुर्वर्ण्यस्य निष्कृतिः ।
चान्द्रायणं चरेद्विप्रः क्षत्रः सान्तपनं चरेत् ॥ १७२ ॥
षड्रात्रमाचरेद्वैश्यः पञ्चगव्यं तथैव च ।
त्रिरात्रमाचरेच्छूद्रो दानं दत्वा विशुध्यति ॥ १७३ ॥
ब्राह्मणो वृक्षमारूढश्चण्डालो मूलसंस्पृशः ।
फलान्यत्ति स्थितस्तत्र प्रायश्चित्तं कथं भवेत् ॥१७४।
ब्राह्मणान् समनुज्ञाप्य सवासाः स्नानमाचरेत् ।
नक्तभोजी भवेद्विप्रो घृतं प्राश्य विशुध्यति ॥१७५॥
एकवृक्षसमारूढश्चाण्डालो ब्राह्मणस्तथा ।
फलान्यत्ति स्थितस्तत्र प्रायश्चितं कथं भवेत् ॥१७६॥
ब्राह्मणान् समनुज्ञाप्य सवासः स्नानमाचरेत् ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ॥१७७॥
एकशाखासमारूढश्चाण्डालो ब्राह्मणस्तथा ,
फलान्यत्ति स्थितं तत्र प्रायश्चित्तं कथं भवेत् ॥१७८॥
त्रिरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ॥१७९॥
चण्डालम्लेच्छश्वपचकपालव्रतधारिणः ।
अकामतः स्त्रियो गत्वा पराकेन विशुध्यति ॥१८३॥
कामतस्तु प्रसूता वा तत्समो नात्र संशयः ।
स एव पुरुषस्तत्र गर्भो भूत्वा प्रजायते ॥१८४॥
तैलाभ्यक्तो घृताभ्यक्तश्चाण्डालं स्पृशते द्विजः ।

अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ॥१८५॥
चण्डालेन तु संस्पृष्टं यत्तोयं पिबति द्विजः ।
कृच्छ्रपादेन शुध्येत आपस्तम्बोऽब्रवीन्मनुः ॥८०८॥
चण्डालस्य च संस्पृष्टं विण्मूत्रस्पृष्टमेव च ।
त्रिरात्रेण विशुद्धिः स्याद्भुक्तोच्छिष्टं तथाचरेत् ॥२२५॥
वापीकूपतडागानां दूषितानां च शोधनम् ।
उद्धरेद्घटशतं पूर्णं पञ्चगव्येन शुध्यति ॥
(१)गोदोहने चर्मपुटे च तोयं यत्रान्तरे कारकशिल्पिहस्तौ ।
स्त्रीबालवृद्धाचरितानि यान्यप्रत्यक्षदृष्टानि शुचीनि तानि ॥
प्राकाररोधे विषमप्रदेशे सेनानिवेशे भवनस्य दाहे ।
आरब्धयज्ञेषु महोत्सवेषु तथैव दोषा न विलपनीयाः ॥
प्रपास्वरण्ये घटके च कूपे द्रोण्यां जलं कोशविनिर्गतं च ।
श्वपाकचाण्डालपरिग्रहे तु पीत्वा जलं पञ्चगव्येन शुद्धिः॥
चण्डालेन तु संस्पृष्टो स्नानमेव विधीयते ॥२३५॥
आदित्येऽस्तमिते रात्रावस्पृश्यं स्पृशते यदि ।
भगवन्केन शुद्धिः स्यात्ततो ब्रूहि तपोधन ॥२३६ ॥

(१) गोदोहन इत्यादिकं वचनं हि हिन्दुसभापण्डितपरिषदि गिरिधरशर्मप्रभृतिभिश्चण्डालस्पर्शस्यादोषतायां गमकतयोपन्यस्तम्, परन्तु वाक्यशेषे 'चण्डालपरिग्रहे तु' इत्यस्य पर्यालोचनं यदि क्रियते, तर्हि चण्डालेतरस्पर्शादोषत्वमेव तत्र विवक्ष्यत इति गम्यत इति सर्वविदितमिदम् ॥ एतेनात्रिस्मृतिगतं—देवयात्राविवाहेषु यज्ञ प्रकरणेषु च । उत्सुवेषु च सर्वेषु स्पृष्टास्पृष्टिर्न विद्यते(२४५) इति वचनमपि व्याख्यातम् । अस्यापि पूर्वतनवाक्यैकवाक्यतानुसारेण चण्डालपरिग्रहेतरविषयत्वस्यैव युक्तत्वात् ॥

आदित्येऽस्तमिते रात्रौ स्पृशन्नीतं दिवाजलम् ।
तेनैव सर्वशुद्धिः स्याच्छ्वस्पृष्टन्तु वर्जयेत् ॥ २४५ ॥
पतितान्नं यदा भुक्तं भुक्तं चण्डालवेश्मनि ।
मासार्धन्तु पिबेद्वारि इति शातातपोऽब्रवीत् ॥ २३७ ॥
यश्चण्डालीं द्विजो गच्छेत् कथञ्चित्काममोहितः ।
त्रिभिः कृच्छ्रैर्विशुध्येत प्राजापत्यानुपूर्वशः ॥ २६० ॥
चण्डालं पतितं म्लेच्छं मद्यभाण्डं रजस्वलाम् ।
द्विजः स्पृष्टा न भुञ्जीत भुञ्जानो यदि संस्पृशेत् ॥ २६२ ॥
अतः परं न भुञ्जीत त्यक्त्वाऽन्नं स्नानमाचरेत् ।
ब्राह्मणैस्समनुज्ञातस्त्रिरात्रमुपवासयेत् ।
सघृतं यावकं प्राश्य व्रतशेषं समापयेत् ॥ २६३ ॥
उदक्यां सूतिकां वापि अन्त्यजां स्पृशते यदि ।
त्रिरात्रेणैव शुद्धिः स्याद्विधिरेष सनातनः ॥ २६४ ॥
रजस्वला यदा स्पृष्टा श्वानचण्डालवायसैः ।
निराहारा भवेत्तावत्स्नात्वा कालेन शुध्यति ॥ २७२ ॥
चर्मको रजको वेणो धीवरो नटकस्तथा ।
एतान् स्पृष्ट्वा द्विजो नित्यमेकरात्रं पयःपिबेत् ॥ २७२ ॥ इति ॥

संवर्तः—

चण्डालं पुक्कसं चैव श्वपाकं पतितं तथा ।
एतान् श्रेष्ठस्त्रियो गत्वा कुर्युश्चान्द्रायणत्रयम् ॥ १६८ ॥
चण्डालं पतितं दृष्ट्वा शवमन्त्यजमेव च ।
उदक्यां सूतिकां नारीं सवासाः स्नानमाचरेत् ॥
अस्पृश्यं स्पर्शयेद्यस्तु स्नानं तेन विधीयते ।
उर्ध्वमाचमनं प्रोक्तं द्रव्याणां प्रोक्षणन्तथा ॥ १०८ ॥

चण्डालाद्यैश्च संस्पृष्ट उच्छिष्टश्च द्विजोत्तमः ।
गोमूत्रयावकाहारः षड्रात्रेण विशुध्यति ॥ १७० ॥
चण्डालभाण्डसंस्पृष्टं पीत्वा कूपगतं जलम् ।
गोमूत्रयावकाहारस्त्रिरात्रेण विशुध्यति ॥ १७३ ॥
अन्त्यजैः स्वीकृते तीर्थे तटाकेषु नदीषु च ।
शुध्यते पञ्चगव्येन पीत्वा तोयमकामतः ॥१७५॥
चण्डालैः सङ्करे विप्रः श्वपाकैः पुक्कसैरपि ।
गोमूत्रयावकाहारो मासार्धेन विशुध्यति ॥१७६॥इति॥

शातातपः—

अस्पृश्यस्पर्शसङ्गी च वस्तुमाश्रित्य शास्त्रहृत् ।
पतितो मद्यविक्रेताऽनपत्यो द्विजवत्त्रहृत् ॥ १७ ॥
चितिवृक्षश्चितियूपश्चण्डालो वेदविक्रयी ।
एतान् वै ब्राह्मणः स्पृष्ट्वा सचैलो जलमाविशेत् ॥

इति वृद्धशातातपः—

चण्डालं पतितं व्यङ्गमुन्मत्तं शवमन्त्यजम् ।
शृगालं सूतिकां नारीं रजसा च परिप्लुताम् ॥ २२ ॥
श्वकुक्कुटवराहांश्च ग्राम्यान् स्पृशति मानवः ।
सचैलं सशिरः स्नात्वा तदानीमेव शुध्यति ॥
अशुद्धः स्वयमप्येतानशुद्धांश्च यदा स्पृशेत् ।
विशुध्यत्युपवासेन शातातपवचो यथा ॥ इति ॥
पतितान्नं यदा भुङ्क्ते भुङ्क्ते चण्डालवेश्मनि ।
स मासार्धं चरेद्वारि मासं कामकृतेन तु ॥७०॥
योगेन पतितेनैव स्पर्शे स्नानं विधीयते ।
तेनैवोच्छिष्टसंस्पृष्टः प्राजापत्यं समाचरेत् ॥७१॥

चण्डालोदकसंस्पर्शे स्नानं येन विधीयते ॥७६॥
चण्डालघटभाण्डस्थं यत्तोयं पिबते नरः।
तत्क्षणात्क्षिपते यस्तु प्राजापत्यं समाचरेत् ॥७०॥
शूद्रान्नरससम्पुष्टा ब्राह्मणाः पङ्क्तिदूषकाः।अ०१३।४॥
शूद्रान्नं ब्राह्मणो भुक्त्वा तथा रङ्गावतारिणः।
चर्मकारस्य वेनस्य कीरस्य पतितस्य च ॥
रुक्मकारस्य तक्ष्णश्च तथा वार्धुषिकस्य च ॥
कदर्यस्य नृशंसस्य वेश्यायाः कितवस्य च।
गणान्नं भूपिपालान्नं अन्नं चैवास्त्रजीविनः॥३८॥
सौनिकान्नं सूतिकान्नं भुक्त्वा मासं व्रतं चरेत् ॥
इत्यादि ॥ गौतमः—

पतितचण्डालसूतिकोदक्याशवस्पृष्टितत्स्पृष्ट्युपस्पर्शने सचैलोदकोपस्पर्शनाच्छुध्येत् ॥ श्वपचचण्डालपतितावेक्षणे दुष्टम् ॥
अ० १४ । १५ ॥

न म्लेच्छाशुच्यधार्मिकैः सम्भाषेत। सम्भाष्य पुण्यकृतो मनसा ध्यायेत्, ब्राह्मणेन वा सह सम्भाषेत।

बौधायनः—चैत्यवृक्षं चितिं यूपं चण्डालं वेदविक्रयम्। एतानि ब्राह्मणः स्पृष्ट्वा सचैलो जलमाविशेत् ॥

आपस्तम्बः—प्रपास्वरण्ये च जलेऽथ तीरे द्रोण्यां जलं यच्च विनिःसृतम्भवेत्। श्वपाकचण्डालपरिग्रहेषु पीत्वा जलं पञ्चगव्येन शुद्धिः ॥

चण्डालकूपभाण्डेषु योऽज्ञानात्पिबते जलम्।
प्रायश्चित्तं कथं तस्य वर्णे वर्णे विधीयते॥अ०४।१
चरेत्सान्तपनं विप्रः प्राजापत्यन्तु भूमिपः।

तदर्धन्तु चरेद्वैश्यः पादं शूद्रस्य दापयेत् ॥२॥
भुक्तोच्छिष्टस्त्वनाचान्तश्चण्डालैः श्वपचेन वा।
प्रमदात्स्पर्शनं गच्छेत्तत्र कुर्याद्विशोधनम् ॥ ३॥
चण्डालेन यदा स्पृष्टो विण्मूत्रे च कृते द्विजः।
प्रायश्चित्तं त्रिरात्रं स्याद्भुक्तोच्छिष्टः षडाचरेत्॥४॥
वृक्षारूढे तु चण्डाले द्विजस्तत्रैव तिष्ठति ॥
फलानि भक्षयेत्तस्य कथं शुद्धिं विनिर्दिशेत्॥१०॥
ब्राह्मणान् समनुज्ञाप्य सवासाः स्नानमाचरेत्।
एकरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ॥७७॥
चण्डालेन यदा स्पृष्टो द्विजवर्णः कदाचन।
अनभ्युदय पिबेत्तोयं प्रायश्चित्तं कथं भवेत् ॥अ०५
अन्त्यजातिश्वपाकेन संस्पृष्टा वै रजस्वला।
अहानि तान्यतिक्रम्य प्रायश्चित्तं प्रकल्पयेत् ॥
शूद्रान्नं शूद्रसम्पर्कं शूद्रेणैव सहासनम्।
शूद्राज्ज्ञानागमः कश्चिज्ज्वलन्तमपि पातयेत्।८।८।
रजकव्याधशैलूषवेणुकर्मोपजीविनाम्।
भुक्त्वैषां ब्राह्मणश्चान्नं शुद्धिं चान्द्रायणेन तु॥६।
भुक्तोच्छिष्टस्त्वनाचान्तश्चण्डालैः श्वपचेन वा।
प्रमादाद्यदि संस्पृष्टो ब्राह्मणो ज्ञानदुर्बलः ॥३८॥
स्नात्वा त्रिषवणं नित्यं ब्रह्मचारी धराशयः।
स त्रिरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ॥३९॥
चण्डालेन तु संस्पृष्टो यश्चापः पिबति द्विजः।
अहोरात्रोषितो भूत्वा त्रिषवणेन शुध्यति ॥४०॥
वसिष्ठः—एतदेव चण्डालपतितान्नभक्षणेषु ।

ततः पुनरुपनयनं वपनादीनान्तु निवृत्तिः ।

पराशरमा०—पृ० ३६—पतितचण्डालारात्रश्रवणे त्रिरात्रं वाग्यता अनश्नन्त आसीरन् ॥

स्मृत्यन्तरे वीरमित्रोदये—

चण्डालान्नं द्विजो भुक्त्वा सम्यक् चान्द्रायणं चरेत् ।
बुद्धिपूर्वे तु कृच्छ्राब्दं पुनः संस्कारमर्हति ॥

पराशरः—श्वचाण्डालोद्वयादृष्टश्च भोजनं परिवर्जयेत् ।अ०६६६

चैत्यवृक्षश्चितिर्यूपश्चण्डालः सोमविक्रयी ।
एतांस्तु ब्राह्मणः स्पृष्ट्वा सवासा जलमाविशेत् ॥

हारीतः—चण्डालैः सह सम्भाष्य द्विजसम्भाषणाच्छुचिः ।

सावित्रीं व्याहरद्वापि..............

उच्छिष्टैः सह सम्भाषेत् त्रिरात्रेण विशुध्यति ।
चण्डालानां प्रमादेन यदि भुञ्जीत वै द्विजः ॥
ततश्चान्द्रायणं कुर्यान्मासमेकं व्रतं चरेत् ।
शूद्रो वाप्यर्धमासं वै भुक्त्वा चैवाजितेन्द्रियः ॥
त्रिरात्रमुपवासं च ब्राह्मणांस्तर्पयेच्छुचिः
चण्डालैः सह संवासे दीर्घकालमकामिकम् ॥
विज्ञानान्मृण्मयं पात्रं सर्वं त्यजेत तद्गृहात् ।
बालकृच्छ्रं ततः कुर्यात्तप्तकृच्छ्रं तथैव च ॥
ब्राह्मणांस्तर्पयेत्पश्चाद्ब्रह्मकूर्चेन शुध्यति ॥
गृहस्याभ्यन्तरे यस्य चण्डालो यदि गच्छति ।
पार्थिवानां परित्यागः सर्वेषां सद्य एव हि ॥
अनष्टरसभाण्डानां ग्रहणं मन्यते तथा ।
अजस्य गोः प्रवेशाद्धि शुध्यते नात्र संशयः॥इति

देवलः—श्वपाकं पतितं व्यङ्गमुन्मत्तं शवदाहकम् ।
सूतकं सूतिकां नारीं रजसा च परिप्लुताम् ॥
श्वकुक्कुटवराहांश्च ग्राम्यान् संस्पृश्य मानवः ।
सचैलः सशिराः स्नात्वा तदानीमेव शुध्यति ॥
चण्डालाध्युषितं यत्र यत्र विष्ठादिसङ्कृतिः ।
एवं कश्मलभूयिष्ठा भूरमेध्या प्रकीर्तिता ॥
सभायां स्पर्शने चैव म्लेच्छेन सह संविशेत् ।
कुर्यात्स्नानं सचैलन्तु दिनमेकनभोजनम् ॥

च्यवनः—चण्डालसङ्करे स्वभवने दहनं सर्वभाण्डभेदनं दारवाणां तु तक्षणं शङ्खशक्तिसुवर्णरजतचैलानामद्भिः शुद्धिः प्रक्षालनं कांस्यपात्राणामाकरे शुद्धिः सौवीरपयोदधितक्राणामपरित्यागो गोमूत्रयावकाहारो मासं क्षपयेत् । बालवृद्धस्त्रीणामर्धं प्रायश्चित्तमाषोडशाद् बालः सप्तत्यूर्ध्वं वृद्धः । चीर्णे प्रायश्चित्ते ब्राह्मणभोजनं गोदानं दद्यात् अभावे सर्वस्वमिति । बालस्त्र्यहं भुञ्जीतेत्यादि ॥

व्याघ्रः—अस्पृश्यस्पर्शनं कृत्वा यदा भुङ्क्ते गृहाश्रमी । अकामत-
स्त्रिरात्रं स्यात्षड्रात्रं कामश्चरेत् ॥

बृहस्पति—अस्नात्वा तु यदा भुङ्क्ते पिण्डं दत्त्वा पितुर्व्रती स्पृष्ट्वा
शवमुदक्यां वा चण्डालं सूतिकां तथा ॥
अकामतस्त्रिरात्रं स्याद्बुद्ध्या सान्तपनं चरेत् ।

मार्कण्डेयः—अपांक्तेयस्य यः कश्चित्पंक्तौ भुंक्ते द्विजोत्तमः
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ॥

षट्त्रिंशन्मतसङ्ग्रहे—चण्डालश्रोत्रावकाशे श्रुतिस्मृतिपाठे एकरात्रमभोजनम् ॥

साधकानि तु वचनान्येतान्येव भवितुमर्हन्ति । तानि यथा—

अत्रिः—गोदोहने चर्मपुटे च तोयं यन्त्राकरे कारुकशिल्पिहस्ते।
स्त्रीबालवृद्धाचरितानि यानि प्रत्यक्षदृष्टानि शुचीनि तानि।
प्राकाररोधे विषमप्रदेशे सेनानिवेशे भवनस्य दाहे।
आरब्धयज्ञेषु महोत्सवेषु तेष्वेव दोषा न विकल्पनीयाः॥
प्रपास्वरण्ये घटकस्य कूपे द्रोण्यां जलं कोशविनिर्गतञ्च।

देवयात्राविवाहेषु यज्ञप्रकरणेषु च।
उत्सवेषु च सर्वेषु स्पृष्टास्पृष्टिर्न विद्यते॥

इत्यादीनि। अत्र प्रथमस्य श्लोकद्वयस्य 'श्वपाकचाण्डलपरिग्रहेषु पीत्वा जलं पञ्चगव्येन शुद्धि' रित्युक्तवाक्याच्चण्डालस्पर्शातिरिक्तविषयत्वमिति स्पष्टं ज्ञायते। एतेन—स्मृत्यन्तरगतानि—

तीर्थे विवाहे यात्रायां सङ्ग्रामे राष्ट्रविप्लवे।
आपद्यपि च कष्टायां स्पृष्टास्पृष्टिर्न विद्यते—

इत्यादीनि वचनान्यपि—व्याख्यातानि; तस्य सर्वस्यापि सूतकाशौचिस्पर्शविषयत्वस्य निबन्धकारैर्व्यवस्थापितत्वात्॥ अत एव—"प्रपास्वरण्ये च जले च तीरे द्रोण्यां जलं यच्च विनिःसृतं भवेत्। श्वपाकचण्डालपरिग्रहेषु पीत्वा जलं पञ्चगव्येन शुद्धिः" इत्यापस्तम्बस्मृतिवचनमुपपद्यते। एतेन—शिल्पिनः कारुका वैद्या दासीदासाश्च नापिताः। राजानो राजभृत्याश्च सद्यः शौचाः प्रकीर्तिताः॥ सव्रतः सत्रपूतश्चाहिताग्निश्चैव यो द्विजः। राज्ञश्च सूतकं नास्ति यस्य चेच्छति पार्थिवः॥ उद्यतो निधने दाने आर्तो विप्रो निमन्त्रितः। तदैव ऋषिभिर्दृष्टं यथा कालेन शुद्ध्यति—इत्यादिवचनान्यपि व्याख्यातानि॥ एषु हि स्पष्टमेवाशौचस्यैव विवाहादावदोषत्वमुक्तम्, नान्त्यजस्पर्शस्य। यत्त्वत्र नापितस्यापि सद्यः शौचत्वं प्रतिपादितम्, तत्तस्य न जातिकृत-

स्पर्शदोषत्वनिराकारणपरम्, किन्तु तस्याशौचकृतस्पर्शदोषनिरा- करणपरम्। अत एव खलु राजश्रोत्रियादिसाहचर्यमत्र श्रूयमाण- मुपपद्यते। अत एव हि माधवीय उक्तश्लोकव्याख्यावसरे—

दाने विवाहे यज्ञे च संग्रामे राष्ट्रविप्लवे।
आपद्यपि च कष्टायां सद्यः शौचं विधीयते॥ इति॥

याज्ञवल्क्यवचनम् (३।२८।२६),

"संग्रामस्थश्च राजन्यो वैश्यो मध्ये गवां स्थितः॥" इति॥ हारीतवचनम्॥

विवाहयज्ञदुर्गेषु यात्रायां तीर्थकर्मणि।
न तत्र सूतकं तद्वत्कर्म यज्ञादि कारयेत्॥" इति पैठी- नसिवचनम्॥

अथ देवप्रतिष्ठायां गणयात्रादि कर्मणि।
श्राद्धादौ पितृयज्ञे च कन्यादाने च नो भवेत्॥" इत्य- ङ्गिरोवचनम्,

राज्यनाशस्तु येन स्याद्विना राज्ञा स्वमण्डले।
प्रयास्यतश्च संग्रामे होमे प्रास्थानिके सति॥
मन्त्रादितर्पणेवापि प्रजानां शान्तिकर्मणि।
गोमङ्गलादौ वैश्यानां कृषिकालात्ययेष्वपि॥
आशौचं न भवेल्लोके सर्वत्रान्यत्र विद्यते—

इति ब्रह्मपुराणवचनं चोपोद्बलकतया निर्दिष्टमुपपद्यते। अनेन हि पराशरमाधवीयग्रन्थेन स्पष्टमिदं सूच्यते—यज्जाति- कृतस्पर्शास्पर्शविषयं न—"तीर्थे विवाहे यात्रायां संग्रामे राष्ट्रवि- प्लवे। आपद्यपि च कष्टायां स्पर्शास्पर्शौ न विद्यते—इत्यादि वच- नजातमिति। तथा चोक्तविधवचनजालानां पूर्वापरसन्दर्भ—स्मृत्य-

न्तरैकवाक्यतानिबन्धकाराद्दृतव्यवस्थादिकं पामराणां पुरतोऽनुप-स्थाप्य पण्डितवरगिरिधरशर्मप्रभृतिभिरुक्तवचनमात्रोपस्थापनेनान्त्य-जस्पर्श इदानीं न दोषायेति यद्धिन्दुसभादिषु साहसमवलम्ब्यते, तदिदं केवलं सन्दिग्धमतीनां मृदुलचित्तानां शास्त्रविश्वासिनां च पामाराणां प्रतारणमेव, न तु वस्तुस्थितिकथनमिति सुधीरमुद्घो-षयामः।

अत्र स्मृतिचन्द्रिकागतं नैमित्तिकस्नानप्रकरणमपि नासंग्र-ह्ययोग्यम्। तद्यथा—

अथ नैमित्तिकस्नानानि। तत्र मनुः—

दिवकीर्तिमुदक्यां च पतितं सूतिकां तथा।
शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुद्ध्यति॥

दिवाकीर्तिश्चण्डालः। उदक्या रजस्वला। स्नानेन सचेलेनेति शेषः;

शवस्पृष्टिमथोदक्यां सूतिकां पतितं तथा।
स्पृष्ट्वा स्नानेन शुद्धस्स्यात्सचेलेन न शंशयः॥

इत्यङ्गिरस्स्मरणात्। तत्र तच्छब्देन दिवाकीर्त्यादिशवपर्य-न्तानां ग्रहणं न शवमात्रस्य; तेषामप्यशुचित्वेन शवतुल्यत्वादे-कवाक्योपादानाच्च। न चात्रानन्तर्याच्छव एव तत्स्पृष्टिन्याय इति शङ्कनीयम्, यत आह गौतमः—

'पतितचण्डालसूतिकोदक्याशवस्पृष्टितत्स्पृष्ट्युपस्पर्शने सचे-लोदकोपस्पर्शनाच्छुद्ध्येत्'—इति।

अनेन पतितादिस्पृष्टिनमारभ्य तृतीयस्यापि सचेलं स्नानमि-त्युक्तं भवति। न चात्रापि पतिताद्युदक्यान्तानां शवस्पृष्टिनां सम्बन्ध इति तत्रैव तत्स्पृष्टिन्याय इति शङ्कनीयम्, चण्डालादि-ष्वपि स्मृत्यन्तरे तत्स्पृष्टिन्यायाभिधानात्—

'शवचण्डालपतितसूतिकोदक्यातत्स्पृष्टिस्पर्शने स्नानम्' इति। सङ्ग्रहकारोऽपि—

चण्डालसूतिकोदक्यापतिताश्शव एव च।
एतेषामेव संस्पर्शे तत्स्पृष्टिन्याय इष्यते॥ इति।
एवकारः कटधूमादिस्पृष्टिन्यायनिवृत्त्यर्थः।

तदाह—स एव—

कटधूमस्पृशं वान्तं विरिक्तं क्षुरकर्मिणम्।
मैथुनाचारितारं च स्पृष्ट्वा स्नानेन शुध्यते॥ इति।

यत्तु संवर्तेन—

तत्स्पृष्टिनं स्पृशेद्यस्तु स्नानं तस्य विधीयते।
ऊर्ध्वमाचमनं प्रोक्तं द्रव्याणां प्रोक्षणं तथा॥

इति द्वयोरेव स्नानमुक्तम्, तदबुद्धिपूर्वकस्पर्शनविषयम्। तथाच सङ्ग्रहकारः—

अबुद्धिपूर्वकस्पर्शे द्वयोस्स्नानं विधीयते।
त्रयाणां बुद्धिपूर्वे तु तत्स्पृष्टिन्यायकल्पना॥ इति।

चतुर्थस्य त्वाचमनमेव—

उपस्पृशेच्चतुर्थस्तु तदूर्ध्वं प्रोक्षणं स्मृतम्। इति मरीचिस्मरणात्। यत्तु कूर्मपुराणे—

चण्डालसूतिकोदक्या संस्पृष्टं संस्पृशेद्यदि।
प्रमादात्तत आचम्य जपं कुर्यात्समाहितः॥
तत्स्पृष्टस्पृष्टिनं स्पृष्ट्वा बुद्धिपूर्वं द्विजोत्तमः।
आचामेत्तद्विशुद्ध्यर्थं प्राह देवः पितामहः॥

इति, तदुभयं द्वितीयादिविषयम्, अन्यथा गौतमादिवचनविरोधात्। अनेनैवाभिप्रायेण याज्ञवल्क्योऽपि—

उदक्याशुचिभिस्स्नायात्संस्पृष्टस्तैरुपस्पृशेत् ।
अब्लिङ्गानि जपेच्चैव गायत्रीं मनसा सकृत् ॥

इति । उदक्याशुचिभिश्चण्डालपतिताद्यैस्संस्पृष्टस्स्नायात् । तैरुदक्याभिस्स्पृष्टैस्स्पृष्ट उपस्पृशेत् आचामेदित्यर्थः । भाष्यकारैस्तु दण्डादिस्पर्शविषयमित्येतद्व्याख्यातम् । यद्वा तैरुदक्यादिभिस्स्पृष्टैस्स्पृष्ट उपस्पृशेत् स्नायादिति संवर्तवचनेन समानार्थम् । यदपि देवलेनोक्तम्—

संस्पृश्याशुचिसंस्पृष्टं द्वितीयं चापि मानवः ।
हस्तौ पादौ च तोयेन प्रक्षाल्याचम्य शुद्ध्यति ॥

इति; तदपि याज्ञवल्क्येन समानार्थम् । यदपि वृद्धशातातपेन—

अशुचिं संस्पृशेदन्यमेक एव स दुष्यति ।
तत्स्पृष्टोऽन्यो न दुष्येत सर्वद्रव्येष्वयं विधिः ॥

इति, तदपि तेनैव समानार्थम् । यदप्यादित्यपुराणे—

ससूतकं समृतकं प्रसूतां वा रजस्वलाम् ।
स्पृष्ट्वा स्नायात्तु तत्स्पृष्टसंस्पर्शादाचमेद्बुधः ॥

इति, तदपि संवर्तवचनेन समानार्थम् । अत्र कात्यायनः—

चण्डालसूतिकोदक्यापतिताशौचकृच्छ्वान् ।
स्पृष्ट्वा स्नात्वा शुचिः प्रेतमनुगम्यानलं स्पृशेत् ॥

इति, एतत्प्रमादसंस्पर्शविषयम्;—

पतितं सूतिकामन्त्यं शवं स्पृष्ट्वा च कामतः ।
स्नात्वा सचेलं स्पृष्ट्वाऽग्निं घृतं प्राश्य विशुध्यति ।

इति स्मरणात् । अत्र प्रचेताः—

वस्त्रान्तरितसंस्पर्शस्साक्षात्स्पर्शोऽभिधीयते ।
साक्षात्स्पर्शे तु यत्प्रोक्तं तद्वस्त्रान्तरितेऽपि च ॥

इति । व्यासोऽपि—

चण्डालपतितौ दृष्ट्वा नरः पश्येत भास्करम् ।
स्नात्वा त्वेतौ समालोक्य सचेलं स्नानमर्हति ॥
सूतिकापतितोदक्याचण्डालं च चतुर्थकम् ।
यथाक्रमं परिहरेदेकद्वित्रिचतुर्युगम् ॥

वैयाघ्रपादोऽपि—

चण्डालं पतितं चैव दूरतः परिवर्जयेत् ।
गोवालव्यजनाद्र्वाक्सवासा जलमाविशेत् ॥

इति । एतदतिसङ्कटस्थानविषयमिति कैश्चित् व्याख्यातम् । विष्णुरपि—

चण्डालोदक्यासंस्पर्शे स्नानं कृत्वा विशुद्ध्यति ।

इति । पराशरोऽपि—

चैत्यवृक्षश्चितिर्यूपश्चाण्डालस्सोमविक्रयी ।
एतांस्तु ब्राह्मणः स्पृष्टा सचेलो जलमाविशेत् ॥

इति । चितिप्रदेशारोपितवृक्षः चैत्यवृक्षः । अङ्गिरा अपि—

यस्तु छायां श्वपाकस्य ब्राह्मणो ह्यधिरोहति ।
तत्र स्नानं प्रकुर्वीत घृतं प्राश्य विशुध्यति ॥

आपस्तम्बोऽपि—

एकशाखां समारूढश्चण्डालादिर्यदा भवेत् ।
ब्राह्मणस्तत्र निवसन् स्नानेन शुचितामियात् ॥

इति । शाखाग्रहणमेवंजातीयकद्रव्योपलक्षणार्थम् ।

अत्र सङ्ग्रहकारः—

तार्णे संस्तर एकस्मिन् अस्पृश्यैस्सह तिष्ठति ।
अस्पृश्यैस्तैरदुष्टोऽस्मीत्येवं मूढस्तु मन्यते ॥

इति । तार्णे तृणनिर्मिते ।

मार्कण्डेयपुराणेऽपि—

अभोज्यसूतिकाषण्डमार्जाराखुश्वकुक्कुटम् ।
पतितापविद्धचण्डालमृताहारांश्च धर्मवित् ॥
संस्पृश्य शुद्धयति स्नानोन्नोदक्याग्रामसूकरौ ।
तद्वच्च सूतिकाशौचदूषितौ पुरुषावपि ॥

षट्त्रिंशन्मते—

बौद्धान्पाशुपताञ्जैनान्लोकायतिककापिलान् ।
विकर्मस्थान् द्विजान् स्पृष्ट्वा सचेलो जलमाविशेत् ॥
कापालिकांस्तु संपृश्य प्राणायामोऽधिको मतः ।

ब्रह्माण्डपुराणेऽपि—

शैवान् पाशुपतान् स्पृष्ट्वा लोकायतिकनास्तिकान् ।
विकर्मस्थान्द्विजान् शूद्रान्सवासा जलमाविशेत् ॥

संवर्तोऽपि—

शूद्रोच्छिष्टं द्विजः स्पृष्ट्वा उच्छिष्टं शूद्रमेव वा ।
शुचिमप्यवगूह्यैनं सवासा जलमाविशेत् ॥

अवगूह्य स्पृष्ट्वेत्यर्थः । स्मृत्यन्तरेऽपि—

चितिं च चितिकाष्ठं च यूपं चण्डालमेव च ।
स्पृष्ट्वा देवलकं चैव सवासा जलमाविशेत् ॥
देवार्चनपरो विप्रो वित्तार्थी वत्सरत्रयम् ।
स वै देवलको नाम हव्यकव्येषु गर्हितः ॥

यमोऽपि—

शुना चैव श्वपाकेन मृतनिर्हरणेन वा ।
स्पृष्टमात्रस्तु कुर्वीत सचेलं प्लावनं जले ॥

इति । शुनि विशेषमाहापस्तम्बः—

'शुनोपहतस्सचेलोऽवगाहेत । प्रक्षाल्य वा तं देशमग्निना संस्पृश्य पुनः प्रक्षाल्य पादौ चाचम्य प्रयतो भवति"

इति । सचेलावगाहनं नाभेरूर्ध्वाङ्गस्पर्शनविषयम् । तथा च विष्णुः-

नाभेरधः कराग्रं वा शुना यद्युपहन्यते ।
प्रक्षाल्य दर्भैस्संज्वाल्य पुनराचम्य शुध्यति ॥
नाभेरूर्ध्वं शुना स्पृष्टो लिप्तोऽमेध्येन वा पुनः ।
प्रक्षाल्य मृद्भिरङ्गानि सचेलं स्नानमर्हति ॥

इति । एवं रजकादिस्पर्शने वेदितव्यम् । तथा च शातातपः

रजकश्चर्मकृच्चैव व्याधजालोपजीविनौ ।
निर्णेजकस्सौनिकश्च नटश्शैलूषकस्तथा ।
मुखेभगास्तथा श्वा च वनितास्सर्ववर्णगाः ॥
चक्री ध्वजी वध्यघाती ग्रामकुक्कुटसूकरौ ।
एतैर्यदङ्गं स्पृष्टं स्याच्छिरोवर्जं द्विजातिषु ।
तोयेन क्षालनं कृत्वा आचान्ताः प्रयता मताः ॥

रजको वस्त्रादिरागकर्ता निर्णेजकश्चेलधावकः । सौनिको हिंस्रः । नटो जातिविशेषः । अनटोऽपि रङ्गावतरणजीवी शैलूषकः । मुखेभगष्षण्डविशेषः । ध्वजी मद्यविक्रेता । अत्रापि श्वसाहचर्याच्छिरोग्रहणं नाभेरूर्ध्वाङ्गोपलक्षणार्थम् । शङ्खोऽपि--

रथ्याकर्दमतोयेन ष्ठीवनाद्येन वा तथा
नाभेरूर्ध्वं नरस्स्पृष्ट्वा सद्यस्स्नानेन शुद्ध्यति ॥

जातूकर्णोऽपि

ऊर्ध्वं नाभेः करौ मुक्त्वा यदङ्गं स्पृशते खगः ।
स्नानं तत्र प्रकुर्वीत शेषं प्रक्षाल्य शुद्ध्यति ॥

खगः पक्षी । यदि पुनरशुद्ध एव श्वादीन् स्पृशति, तदा विशेषो देवलेन दर्शितः—

श्वपाकं पतितं व्यङ्गमुन्मत्तं शवदाहकम् ।
सूतिकां स्राविकां नारीं रजसा च परिप्लुताम् ॥
शुककुक्कुटवाराहान्ग्राम्यान् संस्पृश्य मानवः ।
सचेलस्सशिरास्स्नात्वा तदानीमेव शुद्धयति ॥
अशुद्धान्स्वयमप्येतानशुद्धस्तु यदि स्पृशेत् ।
विशुद्धयत्युपवासेन तथा कृच्छ्रेण वा पुनः ॥

इति । स्राविका प्रसवस्य कारयित्री । एतदबुद्धिपूर्वकस्य स्पर्शविषयम् । तथा च कूर्मपुराणम्—

उच्छिष्टोऽद्भिरनाचान्तश्चण्डालं वा स्पृशेद् द्विजः ।
प्रमादाद्वा जपेत्स्नात्वा गायत्र्यष्टसहस्रकम् ॥
चण्डालपतितादींस्तु कामाद्यस्संस्पृशेद् द्विजः ।
उच्छिष्टस्तत्र कुर्वीत प्राजापत्यं विशुद्धये ॥

इति । अनेनैवाभिप्रायेण विष्णुरपि—

अनुच्छिष्टेन संस्पृष्टे स्नानं येन विधीयते ।
तेनैवोच्छिष्टसंस्पृष्टः प्राजापत्येन शुद्धयति ॥

अत्र संवर्तः—

नीलीं नीलीविकारांश्च मानुष्यास्थ्यपि वा द्विजाः ।
चण्डालपतितच्छायां स्पृष्ट्वा स्नानं समाचरेत् ॥

अत्र शातातपः—

ग्रामे तु यत्र संस्पृष्टिर्यात्रायां कलहादिषु ।
ग्रामसंदूषणे चैव स्पृष्टिदोषो न विद्यते ॥

ग्रामे राजमार्गादौ । षट्त्रिंशन्मतेऽपि—

देवयात्राविवाहेषु यज्ञेषु प्रकृतेषु च ।
उत्सवेषु च सर्वेषु स्पृष्ट्वा स्पृष्टिर्न विद्यते ।

बृहस्पतिरपि—

तीर्थे विवाहे यात्रायां सङ्ग्रामे देशविप्लवे ।
नगरग्रामदाहे च स्पृष्ट्वा स्पृष्टिर्न दुष्यति ॥

एतच्च वाक्यत्रयं यत्राहमनेन स्पृष्ट इति ज्ञानं नास्ति, तद्विषयमिति केचित्। उच्छिष्टाशुचिस्पर्शनविषयमित्यन्ये । तत्रापस्तम्बः—

'शक्तिविषये न मुहूर्तमप्यप्रयतः स्यात्' इति।

अनेन हीदं स्पष्टं प्रतिपाद्यते—यत् तीर्थविवाहादिषु स्पर्शदोषाभावोऽपि,—यत्र स्पर्शज्ञानासम्भवः, तद्विषयमेव "तीर्थे विवाहे इत्यादिकमिति स्मृतिचन्द्रिकासिद्धान्तेनेदमेव निर्णीयते, तीर्थादिष्वपि स्पर्शदोषाभावव्यवस्थापनेन स्पर्शव्यवस्थापनप्रयत्नोऽयमनुपपन्न एवेति । एतेन—अनन्त्यजादिस्पर्शे आचमनमेव युक्तं व्यवस्थापयितुम्, ननु स्नानमिति वादोऽपि—व्याख्यातः । यद्यपि "शुनोपहतस्सचेलोवगाहेत प्रक्षाल्य वा तं देशं अग्निना संस्पृश्य पुनः प्रक्षाल्य पादौ चाचम्य प्रयतो भवति" "नाभेरधःकराग्रं वा शुना यद्युपहन्यते । प्रक्षाल्य दर्भैस्संज्वाल्य पुनराचम्य शुध्यति । 'रजकश्चर्मकारश्च व्याधजालोपजीविनौ । निर्णेजकस्सौनिकश्च नटश्शैलूषकस्तथा । एतैर्यदङ्गं संस्पृष्टं शिरोवर्जं द्विजातिषु । तोयेन क्षालनं कृत्वा आचान्ताः प्रयता मताः " इत्यादिवचनैरस्पृश्यस्पर्शविशेषे आचमनमात्रेण शुद्धिरवगम्यते, तथापि नाभ्यधस्तनभागस्पर्शपरत्वाद् कवचनानां तदूर्ध्वतनभागस्पर्शविषयत्वाभावात्, अशक्तविषयत्वाद्वा सत्यां शक्तौ स्पर्शसामान्येऽपि स्नानव्य-

वस्थापनमेव योग्यम्। तथा च अस्पृश्या हि—तत्स्पृष्टनाभ्यधस्तनाङ्ग-मात्रक्षालनेन यद्याचमनं क्रियते, तावता यदि मतान्तरं न प्रवेदयन्ति, तर्हि कथमपि शुना स्पर्शादाविव तदङ्गक्षालनमात्रं व्यवस्थापयितुं शक्येतैव, वचनप्रामाण्यात्। इदमेवात्रालोचनीयमेतावताऽप्यस्पृश्यानामस्पृश्यत्वं कथं वारितं भवतीति। अस्मिन् प्रसङ्गे इदमपि न विस्मर्तव्यम्—यत् येषां स्पर्शो दूरतोऽपि वर्ज्य इति शास्त्रतोऽवगम्यते, न तद्विषयमिदं वचनजातम्, किन्तु तद्व्यतिरिक्तविषयमेवेति। एतेन—उदक्याशुचिभिः स्नायात् संस्पृष्टस्तैरुपस्पृशेत्—इति याज्ञवल्क्यमिताक्षरापि—व्याख्याता। तद्यथा—

कुलव्यापिनीं शुद्धिमभिधायेदानीं प्रसङ्गात्प्रतिपुरुषव्यापिनीं शुद्धिमाह—

उदक्याशुचिभिः स्नायात्संस्पृष्टस्तैरुपस्पृशेत्।
अब्लिङ्गानि जपेच्चैव गायत्रीं मनसा सकृत्॥ ३०॥

ननु 'उदक्यासंस्पृष्टः स्नायादि' त्येकवचननिर्दिष्टस्य कथं तैरिति बहुवचने परामर्शः। सत्यमेव; किंत्वत्र उदक्यादिसंस्पृष्टव्यतिरिक्तस्नानार्हमात्रस्पर्शेऽप्याचमनविधानार्थं तैरिति बहुवचननिर्देश इत्यविरोधः। ते च स्नानार्हाः स्मृत्यन्तरेऽवगन्तव्याः। यथाह पराशरः—"दुःस्वप्ने मैथुने वान्ते विरिक्ते क्षुरकर्मणि। चितियूपश्मशानस्थस्पर्शने स्नानमाचरेदिति"। तथा च मनुः। (अ० ५ श्लो० १४४)। "वान्तो विरिक्तः स्नात्वा तु घृतप्राशनमाचरेत्। आचामेदेव भुक्त्वाऽन्नं स्नानं मैथुनिनः स्मृतमिति। मैथुनिनः स्नानमृतुकालविषयम्। 'अनृतौ तु यदा गच्छेच्छौचं मूत्रपुरीषवदिति' २५ बृहस्पतिस्मरणात्। अनृतावपि कालविशेषेण स्मृत्यन्तरे स्नानमुक्तम्। अष्टम्यां च चतुर्दश्यां दिवा पर्वणि मैथुनम्। कृत्वा स-

चैलं स्नात्वा च वारुणीभिश्च मार्जयेदिति'। तथा च समयः—
"अजीर्णेऽभ्युदिते वान्ते तथाऽप्यस्तमिते रवौ। दुःस्वप्ने दुर्जनस्पर्शे स्नानमात्रं विधीयते" इति। तथा बृहस्पतिः—मैथुने कटधूमे च सद्यः स्नानं विधीयते' इत्येतदसचेलस्पर्शविषयम् सचैले तु चित्यादिस्पर्शे सचैलमेव स्नानम्। यथाह च्यवनः—श्वानं श्वपाकं प्रेतधूम्रं देवद्रव्योपजीविनम् ग्रामयाजिनं सोमविक्रयिणं यूपचितिं चितिकाष्ठं मद्यं मद्यभाण्डं सस्नेहं मानुषास्थि शवस्पृष्टं रजस्वलां महापातकिनं शवं स्पृष्ट्वा सचैलमम्भोऽवगाह्योत्तीर्याग्निमुपस्पृश्य गायत्रीमष्टवारं जपेत्। घृतं प्राश्य पुनः स्नात्वा त्रिराचामेदिति।

एतच्च बुद्धिपूर्वविषयम्। अन्यत्र स्नानमात्रम्। 'शवस्पृष्टं दिवाकीर्तिं चितिं यूपं रजस्वलाम्। स्पृष्ट्वा त्वकामतो विप्रः स्नानं कृत्वा विशुध्यतीति' बृहस्पतिस्मरणात्। एवमन्यत्राऽपि वक्ष्यमाणेषु विषयसमीकरणमूहनीयम्। तथा च कश्यपः—'उदयास्तमययोः स्कन्दयित्वा अक्षिस्पन्दने कर्णाक्रोशने चित्यारोहणे यूपसंस्पर्शने च सचैलं स्नानं पुनर्मन इति जपेत्, महाव्याहृतिभिः सप्ताज्याहुतीर्जुहुयादिति। तथा स्मृत्यन्तरे—"स्पृष्ट्वा देवलकं चैव सवासा जलमाविशेत्। देवार्चनपरो विप्रो वित्तार्थे वत्सरत्रयम्। असौ देवलको नाम हव्यकव्येषु गर्हितः॥" तथा ब्रह्माण्डपुराणे—शैवान्पाशुपतान्स्पृष्ट्वा लोकायतिकनास्तिकान्। विकर्मस्थान्द्विजान्शूद्रान्सवासा जलमाविशेदिति'॥ तथा— अस्वर्ग्या ह्याहुतिः सा स्याच्छूद्रसंपर्कदूषितेति लिङ्गाच्च शूद्रस्पर्शने निषेधः॥ तथाऽङ्गिराः—"यस्तु छायां श्वपाकस्य ब्राह्मणो ह्यधिरोहति। तत्र स्नानं प्रकुर्वीत घृतं प्राश्य विशुध्यतीति"॥ तथा

व्याघ्रपादः— "चाण्डालं पतितं चैव दूरतः परिवर्जयेत्। गोबालव्यजनाद्र्वाक्सवासा जलमाविशेदिति"। एतदतिसंकटस्थलविषयम्। अन्यत्र तु बृहस्पतिनोक्तम् "युगं च द्वियुगं चैव त्रियुगं च चतुर्युगम्। चण्डालसूतिकोदक्यापतितानामधः क्रमादिति॥" तथा पैठीनसिः—काकोलूकस्पर्शने सचेलं स्नानमनुदकमूत्रपुरीषकरणे सचैलं स्नानं महाव्याहृतिहोमश्च। अनुदकमूत्रपुरीषकरणे इत्येतच्चिरकालमूत्रपुरीषाशौचाकरणपरम्। तथाऽङ्गिराः—"भासवायसमार्जारखरोष्ट्रं च श्वसूकरान्। अमेध्यानि च संस्पृश्य सचैलो जलमाविशेदिति"॥ मार्जारस्पर्शनिमित्तं स्नानमुच्छिष्टसमयेऽनुष्ठानसमये च वेदितव्यम्। समाचारात्। अन्यदा तु 'मार्जारश्चैव दर्वी च मारुतश्च सदा शुचिरिति स्नानाभावः। श्वस्पर्शे तु स्नानं नाभेरूर्ध्वं वेदितव्यम्। अधस्तात्तु क्षालनमेव। नाभेरूर्ध्वं करौ मुक्त्वा शुना यद्युपहन्यते। तत्र स्नानमधस्तच्चेत्प्रक्षाल्याचम्य शुध्यतीति" तेनैवोक्तत्वात्॥ तथा पक्षिस्पर्शे विशेषो जातूकर्ण्येनोक्तः। ऊर्ध्वं नाभेः करौ मुक्त्वा यदङ्गं संस्पृशेत्खगः। स्नानं तत्र प्रकुर्वीत शेषं प्रक्षाल्य शुध्यतीति॥ अमेध्यस्पर्शेऽपि विष्णुना विशेषो दर्शितः— 'नाभेरधस्तात्प्रबाहुषु च कायिकैर्मलैः सुराभिर्मद्यैर्वोपहतो मृत्तोयैस्तदङ्गं प्रक्षाल्याचान्तः शुध्येत्॥ अन्यत्रोपहतो मृत्तोयैस्तदङ्गं प्रक्षाल्य स्नायात्। तैरिन्द्रियेषूपहतस्तूपोष्य स्नात्वा पञ्चगव्येन दशनच्छदोपहतश्चेति।

एतच्च परकीयामेध्यस्पर्शविषयम्। आत्मीयमलस्पर्शे तु ऊर्ध्वमपि नाभेः क्षालनमेव। यथाह देवलः—"मानुषास्थि वसां विष्ठामार्तवं मूत्ररेतसी। मज्जानं शोणितं वाऽपि परस्य यदि

संस्पृशेत् ॥ स्नात्वा प्रमृज्य लेपादीनाचम्य स शुचिर्भवेत् । तान्येव स्वानि संस्पृश्य पूतः स्यात्परिमार्जनादिति ॥ तथा शङ्खः ।"रथ्या-कर्दमतोयेन ष्ठीवनाद्येन वा तथा । नाभेरूर्ध्वं नरः स्पृष्टः सद्यः स्नानेन शुध्यतीति ॥ यमेनाप्यत्र विशेष उक्तः—'सकर्दमं तु वर्षासु प्रविश्य ग्रामसङ्करम् । जङ्घयोर्मृत्तिकास्तिस्रः पादयोर्द्विगुणास्ततः" इति ॥ ग्रामसङ्करं ग्रामसलिलप्रवाहप्रवेशं सकर्दमं प्रविश्येत्यर्थः ॥ मारुतशोषिते तु कर्दमादौ न दोषः । "रथ्याकर्दमतोयानि स्पृष्टान्यन्त्यश्ववायसैः । मारुतेनैव शुध्यन्ति पक्वेष्टकचितानि चेति" प्रागुक्तत्वात् (आचारे १६७) ॥

अस्थनि मनुना विशेष उक्तः (अ० ५ श्लो० ८७) । "नारं स्पृष्ट्वाऽस्थि सस्नेहं स्नात्वा विप्रो विशुध्यति । आचम्यैव तु निःस्नेहं गां स्पृष्ट्वा वीक्ष्य वा रविमिति" । इदं द्विजातास्थिविषयम् । अन्यत्र वशिष्ठोक्तम् (अ० १२ सू० २४) मानुषास्थि स्निग्धं स्पृष्ट्वा त्रिरात्रमाशौचमस्निग्धे त्वहोरात्रम् । अमानुषे तु विष्णूक्तम्—'भक्ष्यवर्ज्यं पञ्चनखशवं तदस्थि च सस्नेहं स्पृष्ट्वा स्नातः पूर्ववत्' प्रक्षालितं बिभृयादिति ॥ एवमन्येऽपि स्नानार्हाः स्मृत्यन्तरतोऽवबोद्धव्याः ॥

एवं स्नानार्हाणां बहुत्वात्तदभिप्रायं तैरिति बहुवचनमविरुद्धम् । 'उदक्याशुचिभिः स्नायादित्येतच्चाण्डालाद्यचेतनव्यवधानस्पर्शे वेदितव्यम् । चेतनव्यवधाने तु मानवम् (अ० ५ श्लो० ८५) । 'दिवाकीर्तिमुदक्यां च पतितं सूतिकां तथा । शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुध्यतीति ॥ तृतीयस्य त्वाचमनमेव । तमेव तु स्पृशेद्यस्तु स्नानं तस्य विधीयते । ऊर्ध्वमाचमनं प्रोक्तं द्रव्याणां प्रोक्षणं तथेति" संवर्तस्मरणात् ।

एतच्चाबुद्धिपूर्वकविषयम्। मतिपूर्वे तु तृतीयस्यापि स्नानमेव। तथाह गौतमः (अ० १४ सू० २७) 'पतितचाण्डालसूतिकोदक्याशवस्पृष्टत्युपस्पर्शने सचैलमुदकोपस्पर्शनाच्छुध्येदिति"। चतुर्थस्य त्वाचमनम्। उपस्पृश्याशुचिस्पृष्टं तृतीयं वाऽपि मानवः। हस्तौ पादौ च तोयेन प्रक्षाल्याचम्य शुध्यतीति देवलस्मरणात्। अशुचिना पुनरुदक्यादिस्पर्शे देवलेन विशेष उक्तः—

"श्वपाकं पतितं व्यङ्गमुन्मत्तं शवहारकम्।
सूतिकां साविकां नारीं रजसा च परिप्लुताम्॥'
"श्वकुक्कुटवराहांश्च ग्राम्यान्संस्पृश्य मानवः।
सचैलः सशिरः स्नात्वा तदानीमेव शुध्यति॥
"अशुद्धान्स्वयमप्येतानशुद्धस्तु यदि स्पृशेत्।
विशुध्यत्युपवासेन तथा कृच्छ्रेण वा पुनरिति'॥

साविका प्रसवस्य कारयित्री। कृच्छ्रः श्वपाकादिविषयः। श्वादिषु तूपवास इति व्यवस्था॥ ३०॥

अनेन हीदमेवात्रगम्यते—यत् चण्डालादिस्पृष्टाचेतनस्पर्शे यत्र स्नानं स्मृत्यन्तरे विहितम्, तदिदमुक्तयाज्ञवल्क्यवचनेन न बाध्यते इति। तदयमत्र निष्कर्षः—यच्चण्डालादिस्पर्शे सर्वत्र मतेषु स्नानमेव प्रायश्चित्तम्, तत्स्पृष्टस्याचेतनस्पर्शे तु मिताक्षरादिमते आचमनमेव, तादृशचेतनस्पर्शे तु स्नानमेव सर्वत्रापि मतेषु। सर्वथा उक्तमिताक्षरानुसारेण केषांचन स्नानस्य चण्डालादिस्पर्शेऽपि आचमनेन बाध इति कल्पनमप्रामाणिकमुक्तसन्दर्भविरुद्धं चेति सिद्धम्।

अयं भावः—अस्पृश्यत्वं हि जातिकृतम्, एवमाशौचादिकृतम्, अशुचिस्पर्शकृतं चेति त्रिविधम्। तत्र जातिकृतस्यास्पृश्यत्वस्य

न परिहारोपायलेशोऽपि शास्त्रेषु विद्यते । एतेन—चण्डालादीनामपि शोभनवस्त्रादिधारणाऽव्यवस्थापनादिना स्पृश्यत्वव्यवस्थापनं कर्तव्यमिति वादोऽपि—परास्तः । अन्ययोस्तु परिहारोपायः संभवत्येव । तथाच यानि वचनानि स्पर्शदोषाभावबोधकानि, तान्यपि सुपरिहरस्पर्शास्पर्शविषयाणीति कल्पनमेव योग्यम् । अन्यथा हि सर्वत्र स्पृश्यत्वव्यवस्थापने प्रतिलोमसंकरोऽपि न दोषायेति सर्वसंकरायैव द्वारमुद्घाटितं स्यात् । सत्यमिदानींतना अस्पृश्यैः साकं विवाहं न कांक्षन्ति, न वा सह भोजनमपि, एवमपीदमालोचनीयमेव—यत् अनुलोमसङ्करापेक्षया प्रतिलोमसङ्कराणां विशेषव्यवस्थापनं कथं कर्तव्यमिति ? तत्र चान्ततो गत्वाऽनुलोमसङ्करेषु सहभोजनादोषता, वर्णेषु तु परस्परं विवाहसम्बन्धव्यवस्थापनमित्यादिकं कर्तव्यं स्यादित्यसवर्णाविवाहादयः कति वा धर्माः परिवर्तनीया भविष्यन्तीति सर्व एव समालोचयन्तु ।

तथा च बहूनामेतद्विषयाणां वचनानां सार्थक्यार्थं पतितसंसर्गश्चण्डालादिसंसर्गश्चावश्यमेव दोषनिदानमित्यूरीकर्तव्यम् । इदमभ्यस्तसंसर्गविषयतया योजनमूरीकृत्य वर्णितम् । अत्रापि योजने सकृत्कृतस्य पतितसंसर्गस्य न सर्वथाऽदोषत्वम् । किन्तु पातित्यानापादकत्वमात्रम्, न तु पापानापादकत्वमिति । तथा च सकृत्कृतस्यापि पतितसंसर्गादेः प्रकीर्णप्रायश्चित्तमवश्यमेव कर्तव्यम्, यत्तत्र तत्र वचनविशेषैः पूर्वोपन्यस्तैरुपक्षिप्तम् । इदं चात्र 'संसर्गदोषःपापेषु' इति कलिवर्ज्यप्रकरणगतस्य वचनस्य यथाश्रुतार्थत्वमनुसन्धाय विवेचितम् । वीरमित्रोदये तु कृते सम्भाषणादेवेत्यादिवचनानामन्यथाऽभिप्रायो वर्णितः । तद्यथा—अत्र 'अन्ये कृतयुगे धर्मा' इत्यनेन तत्तद्युगीयपुरुषसामर्थ्यानुरूपानुष्ठानका विभिन्ना

एव धर्मा इत्युक्तम्। तेषु च कलियुगीयपुरुषसामर्थ्यानुरूपानुष्ठानकधर्माणां प्राचुर्येण मन्वादिस्मृत्यप्रतिपाद्यत्वं 'कृते तु मानवा धर्माः' इत्यादिना सूचयन् तद्धर्मजिज्ञासायां स्वधर्मगोचरप्रवृत्त्यर्थं "कलौ पाराशराः स्मृताः" इत्यनेन स्वग्रन्थस्य प्राचुर्येण तद्धर्मप्रतिपादकत्वरूपमुत्कर्षं ज्ञापयति। ननु मन्वादिस्मृतीनां परस्परविरोधे युगभेदेन बलीयस्त्वम्? स्मृत्यन्तराविरोधे श्रौतस्य मनुस्मृतिबलीयस्त्वस्य स्मृत्यन्तराणां च परस्परविरोधे विकल्पस्याबाधेनोपपत्तौ बाधकल्पनाया अन्याय्यत्वात्। तथा—'त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत्। द्वापरे कुलमेकन्तु कर्तारन्तु कलौ युगे—' इत्यत्र युगान्तरे पतिताधिष्ठितदेशसंसर्गो निषिध्यते। कलौ तु पातकिसंसर्गमात्रम्। तथा—'कृते सम्भाषणादेव त्रेतायां स्पर्शनेन च। द्वापरे चान्नमादाय कलौ पतति कर्मणा—इत्यत्र कृतादौ युगत्रये ब्रह्मवधादिकर्मकर्तृसम्भाषणमात्रादिभ्य एव पातित्यम्। कलौ तु ब्रह्मवधादिरूपेण ब्रह्मवधादिकर्तृयाजनयौनादिगुरुतरसंसर्गरूपेण कर्मणा पातित्यम्। न तु कृतयुगादिष्विव ब्रह्मवधादिकर्मकारिसम्भाषणमात्रादिभ्य इत्यर्थः। ननु 'संसर्गदोषः पापेषु' इति वक्ष्यमाणकलिवर्ज्यप्रकरणगतवाक्येन कलौ संसर्गदोषस्य व्युदासात् कर्मणेत्यनेन कथं ब्रह्मवधादिकर्तृयाजनयौनादिगुरुतरसंसर्गोऽपि लभ्यत इति चेत्सत्यम्; 'संसर्गदोषः पापेषु' इति वाक्यस्य 'कृते सम्भाषणादेव' इत्यनेन त्यजेद्देशं कृतयुगे, इत्यनेन च पराशरवाक्येनैकवाक्यतया सम्भाषणमात्रादिरूपसंसर्गदोषस्यैकदेशवासादिरूपसंसर्गस्य च दोषत्वाभावलाभात् प्रकृतवाक्ये कर्मणेत्यनेनास्मदभिमतसंसर्गस्यापि लाभे बाधकाभावात्। तयोर्वाक्ययोरेकवाक्यत्वाभावे च विधिद्वयकल्पनागौरवप्रसङ्गात्।

अपि च 'संसर्गदोषः पापेषु' इति वाक्यस्य यथाश्रुतार्थकत्वे पातकिनमुपक्रम्य "एभिः सह समायोगं यः करोति दिने दिने। तुल्यतां याति विप्रेन्द्र कलौ संवत्सरे गते" इति स्कान्दपुराणवाक्यम् 'कर्तारं तु कलौ युगे' इति पराशरवाक्यं च कलौ कर्तृसंसर्गस्य दोषत्वाभिधायकं विरुध्येत"—इति॥

अत्रापि पक्षे पतितसंसर्गस्य पातित्यापादकत्वम्। संसर्गिसंसर्गस्य तु पापमात्रापादकत्वम्। व्यक्तश्चायं पक्षो निर्णयसिन्धुटीकायां कृष्णंभट्टकृतायां उत्तरत्रोद्धरिष्यमाणायां प्रकाशित इति तत एवाधिकमवगन्तव्यम्। सर्वथा 'संसर्गदोषः पापेषु' इत्यादिवचनेन कलौ पतितसंसर्गोऽपि न दोषायेति वादो हीदानीन्तनानामनुपपन्न एव। महामहोपाध्यायप्रमथनाथतर्कभूषणप्रभृतयो ये खलु संसर्गदोषः पापेष्विति वाक्यमनुसृत्य चण्डालादिसंसर्गस्यापि न दोषत्वमिदानीं कलाविति वदन्ति, ते सर्वेऽपि प्रकृतं वीरमित्रोदयसन्दर्भं न पर्यालोचयन्तीत्येवास्माकं वक्तव्यम्। नान्यत्किमपि। अन्यथा पतितसंसर्गस्यापि कलौ निषिद्धत्वाभावे कर्तुरपि कलौ स्वीकरणीयत्वापत्त्या 'कर्तारं तु कलौ युगे' इति कर्तुः परित्याग उपवर्णितः कथं वोपपद्येत? यथा च पराशराचार्यैरपि पतितसंसर्गे चण्डालादिसंसर्गे वा प्रायश्चित्तं वर्णितं तत्पूर्वमेव निरूपितमिति सर्वविदितमिदम्। अत्रायं विशेषः—यत्पतितसंसर्गोऽपि गुरुतरो भोजनादिरूपः सद्य एव पातित्यप्रयोजक इति वीरमित्रोदयकारा वर्णयन्ति। प्रथमपक्षे तु अभ्यस्त एव संसर्गो भोजनादिरूपोऽपि पातित्यापादक इति। अत्र प्रथमं मतम् "संवत्सरेण पतति पतितेन सहाचरन्। याजनाध्यापनाद्यौनान्न तु यानासनाशनात्" इति बौधायनस्मृतौ सहाशनस्यापि सहासनादि-

साहचर्येण पाठेन तस्य न गुरुतरसंसर्गत्वमिति केषाञ्चन मतेन प्रवृत्तम्। वीरमित्रोदयकारमतन्तु "संवत्सरेण पतति संसर्गं कुरुते तु यः। यो हि शय्यासने नित्यं वसन् वै पतितो भवेत्। याजनं योनिसम्बन्धं तथैवाऽध्ययनं द्विजैः। कृत्वा सद्यः पतेज्ज्ञानात्सहभोजनमेव च" इत्युशनोवचने सहभोजनस्यापि यौनसम्बन्धादिसाहचर्येण सद्यःपातित्यप्रयोजकत्ववर्णनात्सहभोजनं गुरुतरसंसर्ग एवेति पक्षेण प्रवृत्तम्। सहभोजनमपि गुरुतरसंसर्गतया ये ये मन्यन्ते, तेषां सर्वेषां तत्तादृशानि वाक्यानि कृतप्रायश्चित्तानां पतितानां व्यवहार्यत्वं वाऽव्यवहार्यत्वं वेति विषयसमालोचनावसरे विलिखिष्यामः। सर्वथा तु कलौ पतति कर्मणेत्यत्रापि कर्मपदेन संसर्गविशेषग्रहणमुपपद्यत एव। तथा च पतितसंसर्गेण यथा पातित्यम्, एवं चण्डालसंसर्गेण चण्डालत्वमिति न्यायसिद्धं भवतीति चण्डालसंसर्गः सर्वथा निषिद्ध इत्येव सर्वेषामपि निबन्धकाराणामाशयः। अत्र चण्डालसंसर्गेण चण्डालत्वं यद्विवक्षितम्, न तज्जातिपरिवृत्तिरूपम्, किन्तु प्रायश्चित्तादिना कर्मानधिकारस्य प्रायश्चित्ताभावस्य वेह जन्मनि प्रतिपादनाभिप्रायम्। जन्मान्तरे तु तेषां चण्डालत्वमेव जात्यापि भविष्यतीत्यत्र तु न विवादः। व्यक्तं चैतच्चातुर्वर्ण्यव्यवस्थावसरे विवेचितम्। अत एव हि पराशरेणापि चण्डालादिसम्भाषणमपि निषिध्यमानमुपपद्यते। व्यक्तं चैतत् "युगं युगद्वयं चैव त्रियुगं च चतुर्युगम्। चण्डालसूतिकोदक्यापतितानामधः क्रमात्" इत्यादिपराशरवचनोपन्यासपूर्वकं निरूपितमिति न पिष्टपेषणार्थं प्रयतामहे। विद्वन्मनोहराख्यव्याख्याकारास्तु पराशरस्मृतिव्याख्यावसरे—पतितसंसर्गेण पतिततुल्यत्वं कलौ, युगान्तरे तु पतितत्वमिति व्याचक्षते।

तद्यथा—"ननु चतुर्णामेव निमित्तानां युगचतुष्टये व्यवस्थापने "संलापस्पर्शनिःश्वाससहयानासनाशनात्। याजनाध्यापनाद्यौनात् पापं संक्रमते नृणाम्—इत्यादिवाक्यैर्निमित्तान्तराणां परिगणनमनर्थकं स्यादिति चेन्न ; तेषां संवत्सरान्ते पातित्यापादकत्वात्, मूलोक्तवचनानान्तु कृतादिषु सद्यः पातित्यजनकताभिप्रायत्वात् ; सद्यः पातित्यहेतुकर्मसाहचर्यात्। तथाच सम्भाषणादिभिः कलौ न सद्यः पातित्यं कृतादिष्विव, किन्तु कर्मणैव। सम्भाषणादिभिस्तु संवत्सरान्तेऽपि कलौ न पातित्यम्, किन्तु पतिततुल्यतामात्रम् ; 'भवेदूर्ध्वन्तु तत्समः' इति वक्ष्यमाणत्वात्; "एते महापातकिनस्तत्संसर्गी च पञ्चमः। एतैः सह समायोगं यः करोति दिने दिने। तुल्यतां याति सोऽप्याशु कलौ संवत्सरे गते" इति पाद्मवाक्याच्च। नचैतावतैव पातित्यं गम्यते। राजसमो मन्त्रीतिवत्साम्यबोधकत्वेऽपि तत्त्वानवबोधकत्वात्। अत एव 'संसर्गदोषः पापेषु' इति संसर्गदोषाभावः कलिवर्ज्यप्रकरणेऽभिहितः सङ्गच्छते। नचैवं 'संसर्गमाचरन् विप्रः' इत्यादीनाऽग्रे प्रायश्चित्तविधानमसङ्गतं स्यादिति वाच्यम् ; तस्य संसर्गोत्पन्नपापविषयत्वेन पातित्यविषयत्वाभावात्, दोषः पातित्यम्, 'भवेदूर्ध्वन्तु तत्समः' इति साम्याभिधानेऽपि तत्प्रायश्चित्तानभिधानाच्च। तच्च सर्वत्र यथासम्भवं व्यवस्थाप्यते। न च कर्मणः सर्वत्रापि सद्यः पातकत्वेन कलाविति व्यर्थमिति वाच्यम् ; अन्यत्र सम्भाषणादेस्तस्य च सद्यः पातकत्वम्, कलौ तु केवलस्यैवेत्यर्थात्। तस्मात्कलौ कर्मणैव पातित्यं न संसर्गेण यौनादिनाऽपि। नच "यौनस्रौवमौख्यैः सद्यः पतति" इति विष्णुवाक्यविरोधः ; तेषां कृतविषयमुखसम्भवसम्भाषणाध्यापनादिसाहचर्येण कृतादिविषयत्वात्। तथाहि मुख्यस्य मुख-

सम्भवाध्यापनस्य सम्भाषणत्वेन सम्भाषणेऽन्तर्भावः। यौनस्य मैथुनस्य योनिलिङ्गस्पर्शत्वेन स्पर्शेऽन्तर्भावः। स्रौवस्य याजनस्य पुरोडाशादिभक्षणत्वेनान्नादनेऽन्तर्भावः इति सर्वं सुस्थम्। ननु 'संवत्सरेण पतति पतितेन सहाचरन्' इत्यादिशङ्खादिवाक्यैः संवत्सरमात्रसंसर्गेण पातित्यस्यैवाभिधानात् कथं संवत्सरानन्तरं संसर्गेण पतितसाम्यमेव न पातित्यमिति चेत्सत्यमिदम्; युगभेदेन व्यवस्थितविषयाणां स्मृतीनामेकमूलत्वासम्भवेनैकवाक्यत्वाभाभावात्। संवत्सरेण पातित्योत्पत्तौ वक्ष्यमाणषड्वार्षिकप्रायश्चित्तानुपपत्तेश्च। अत्र हि सम्पूर्णमहापातके प्रायश्चित्ताभावः। न च तद् यथाऽनुपपत्त्या संवत्सरशब्दः किञ्चिन्न्यूनसंवत्सरपरः कल्प्यः; मुख्यार्थे बाधकाभावेन लक्षणाया अन्याय्यत्वात्। न च वचनान्तरविरोधो बाधकः; तस्यैतच्छास्त्रोत्पत्तिप्रयोजनप्रपञ्चेनैव परिहृतत्वात्। पातित्यं तूत्पादकाभावादेव न; 'कलौ पतति कर्मणा' इत्यभिधानात्। संसर्गपातित्यस्य युगान्तरविषयत्वेन त्रिपोद्या व्यवस्थापनात्। अत एव "संसर्गदोषः पापेषु" इति कलिवर्ज्यप्रकरणेऽभिहितमित्युक्तम्। ननु निमित्तपरिगणने नवमोऽपि पक्ष उपन्यस्तो 'भवेदूर्ध्वन्तु तत्समः' इति, तत्कथमत्र प्रायश्चित्तं नोपदिष्टमिति चेत्सत्यम्; समत्वाभिधानेनैव तस्योक्तत्वात्। तथाहि— पतितसंसर्गो न पातित्यहेतुः, कलौ पतति कर्मणेत्यभिधानात् 'संसर्गदोषः पापेषु' इति कलिवर्ज्यनिषेधाच्च। महापातकप्रकरणे तत्प्रायश्चित्तानभिधानाच्च। ततश्च महापातकत्वाभावे पापहेतुत्वे च सति समत्वाभिधानेन प्रायश्चित्तमतिदेशेनागच्छत्पक्षान्तरव्यवहितत्वादूर्ध्वमेव भविष्यति गुर्वधिक्षेपादिष्विव। तथाच स्मरन्ति सङ्ग्रहकाराः—व्रतादेशे च पादोनं समे त्वर्धं प्रकीर्तितम्। अतिदेशे स्वतः

प्राप्तिः समत्वे चानुमानिकी—इति। अत एव धर्मप्रदीपे वर्षाधिक-संसर्गेऽपि षडब्दमेवोक्तम् 'अत ऊर्ध्वन्तु संसर्गे षडब्दव्रतमाचरेत्' इति। अनेन कामतोऽपि वर्षाधिकसंसर्गे षडब्दाभिधानेनाकाम-तस्ताहशसंसर्गेऽर्धं प्रायश्चित्तं कैमुतिकन्यायेनैव दर्शितमिति सुस्थम्। ननु—यो येन पतितेनैषां संसर्गं याति मानवः। स तस्यैव व्रतं कुर्यात्तत्संसर्गविशुद्धये' इति मन्वादिभिः पूर्णप्रायश्चित्ताभिधानात्कथमिदमर्धं प्रायश्चित्तमुच्यते ? सत्यम्।

"संवत्सरेण पतति पतितेन सहाचरन्" इत्यनेन पूर्णपातित्य-मभिधाय तदभिधानात्। पातित्ये च पूर्णं प्रायश्चित्तं युक्तमेव। प्रकृते तु न पातित्यमभिमतमित्युक्तमेव। नचैवं 'एभिस्तु संवसेद्यो वै वत्सरं सोऽपि तत्समः ?" इति याज्ञवल्क्यवचनेऽप्यर्धं प्रायश्चित्तं व्याख्यायेत, समत्वाभिधानादिति वाच्यम्; 'एते महापातकिनो यश्च तैः सह संवसेत्" इत्यनेनाहत्य संसर्गिणोऽपि तत्र महापात-कित्वोपदेशात्। उक्तपक्षे तु प्रायश्चित्तानुष्ठानानन्तरं तदङ्गतया पक्षसंख्याप्रमाणेन प्रथमपक्षे किञ्चित्सुवर्णं द्वितीये द्विगुणं तृतीये त्रिगुणमित्यादिक्रमेण दक्षिणा दातव्या। पतितोत्पन्नत्वमपि संस-र्गविशेषः। तदाह वशिष्ठः—पतितोत्पन्नः पतितो भवत्यन्यत्र स्त्रियाः ? इतीत्यादि। अत्र पक्षे पतितसंसर्गिणः पतितसमत्वे षड-ब्दप्रायश्चित्तादिकं गमकमित्येका युक्तिः। 'अत ऊर्ध्वन्तु तत्समः, इति कण्ठत एव समत्वोक्तिरपरा युक्तिरिति सर्वविदितमिदम्। तत्र प्रथमायुक्तिर्न विकल्पसहा। नहि प्रायश्चित्ताल्पत्वं तन्महत्त्वं वा पापाल्पतायां तन्महत्तायां वा प्रयोजकमिति हि माधवाचार्यैः स्पष्ट-मेव विवेचितमुपोद्धाते। तदुक्तं माधवीये "यथाल्पनाशो महता महन्नाशस्तथाल्पतः। किं न स्याद्विस्फुलिङ्गेन तृणराशिर्हि दह्यते।

अतोऽल्पं वा महद्वापि व्रतं पापनिवर्तकम्" इति। यस्तु प्रायश्चित्तगौरवलाघवमभ्यसति निर्णायकान्तरे पापाल्पत्वमहत्त्वप्रयोजकमिति सर्वेषामेव निबन्धकाराणां सिद्धान्तः, सोऽपीदानीमविरुद्ध एव; उत्तरत्र वक्ष्यमाणरीत्या संवत्सराधिकसंसर्गस्य महत्त्वस्यानिर्णीतत्वात्। द्वितीययुक्तौ त्विदमेवास्माकं वक्तव्यं यत्तत्सम इत्यनेन याज्ञवल्क्यस्मृताविवात्यभ्यासिपतितत्वमित्येव विवक्षणीयम्। अन्यथा हि महापातकित्वाभावे पृथक् प्रायश्चित्तविधिरत्रापेक्षितः स्यात्। न चैतदस्ति। यद्यपि समत्वाभिधानेनैवातिदेशेन प्रायश्चित्तस्य प्राप्तिरस्त्येवेति विध्यपेक्षा, तथापि विद्वन्मनोहराव्याख्यानुसारेण समत्वमात्रविवक्षायां साभ्याभिधानबलादातिदेशिकस्यैवार्धप्रायश्चित्तस्याभ्युपगन्तव्यतया संवत्सराधिकानेककालाभ्यासेऽपि पतितसंसर्गिणामर्धमेव प्रायश्चित्तं व्यवतिष्ठेतेति पञ्चाहदशाहाभ्यासे सति पापवृद्धिः, संवत्सराभ्यस्तस्य पुनरनेककालाभ्यासेऽपि प्रत्ययतारतम्यविरह इति वैषम्यं दुर्वारमेव स्यात्। संवत्सरादूर्ध्वमभ्यस्तस्य संसर्गस्य पातित्यापादकतया वचनानारोहादिति तत्समशब्देन वस्तुगत्या पातित्यस्य विवक्षाया एवानायत्याङ्गीकरणीयत्वम्। सर्वथा तु पतितसंसर्गिणोऽपि प्रायश्चित्तार्हत्वे तु न विवाद एव। चतुर्विंशतिमतसंग्रहेऽपि पतितसंसर्गिणो न पातित्यम्; 'संसर्गदोषः पापेषु' इति तस्य महापातकत्वाभावप्रतिपादनात्। किन्तु दुष्टमात्रमित्येव विवेचितम्। तद्यथा—संसर्गदोषः पतितसंसर्गेण पातित्यम् 'संवत्सरेण पतति पतितेन सहाचरन्', इत्यनेन प्रतिपादितम्। तथाच पराशरः—कलौ पतति कर्मणेति। एतेन-संसर्गः शोधितैरपीत्यनेन शोधितसंसर्गस्यापि निषेधमधिगम्य पतितसंसर्गे दोषाभावोक्ति विरुध्येत-इति परास्तम्। पातित्यानभ्यु-

पगमेऽपि दोषाभ्युपगमात्। एतच्च—आसनाच्छयनाद्यानात् सम्भाषात्सहभोजनात्। संक्रामन्ति हि पापानि तैलबिन्दुरिवाम्भसि—इति पराशरवचनव्याख्यावसरे माधवाचार्यैरपि स्फुटीकृतम्।

[माधवीय-समालोचनम्]

तदत्रावसरे माधवाचार्याणामाशयसंकलनं नियतं कर्तव्यमिति तदेव कर्तुं प्रयतामहे। माधवाचार्या हि 'कलौ पाराशराः स्मृता' इतिवचनस्य प्रायश्चित्तविषयत्वं मन्वानाः कलौ युगे मरणान्तप्रायश्चित्तं निवारयन्तोऽपि कृतप्रायश्चित्तानामपि पतितानां व्यवहारायोग्यत्वमेव मन्यन्ते। मरणान्तप्रायश्चित्तपक्षे हि आमरणं स्वकर्माधिकारोऽपि नास्ति, साधारणसंसर्गयोग्यताऽपि नास्तीति हि सर्वसम्मतमिदम्। अत्र तु पतितानां कृतप्रायश्चित्तानां स्वजीवनकाले यथेच्छमेव स्वकर्माधिकारो भाविप्रत्यवायपरिहारसामर्थ्यम्, साधारणयोग्यता च वर्तत इति कृत एव संकोचः पराशराचार्यैरिति न दोषः। नहि मरणान्तप्रायश्चित्तस्य निषेधमात्रेण कृतप्रायश्चित्तानां सर्वथा व्यवहार्यत्वमपि प्रायश्चित्तेन भवतीति कल्पनं सम्भवति। अत्र च विषये 'कामतो व्यवहार्यस्तु' इति वचनविवरणाशयविवेचनावसरे बहुनुपदमेवोपपादयिष्याम इति नात्र विस्तरीतुमिच्छामः। सर्वथा तु पतितत्वे पतिततुल्यत्वे वा चण्डालादिसंसर्गिणां कृतप्रायश्चित्तानामप्यसंव्यवहार्यत्वमित्येवोरीकर्तव्यम्, न तु व्यवहार्यत्वमपि। तेषां स्वधर्मानुष्ठानं च परस्परं याजकत्वादिस्वीकारेणैव सम्भवति। व्यवस्थापितं चैवं बौधायनधर्मसूत्रे आपस्तम्बधर्मसूत्रे च—"अथ पतिताःसमवसाय धर्मांश्चरेयुरितरेतरयाजका इतरेतराध्यापका मिथो विवहमानाः" इत्यादिना। तथाच पतितसंसर्गस्य—कलौ पतति कर्मणेतिपराशर-

वचनानुसारेण पातित्यानापादकत्वेऽपि चण्डालसम्भाषणादीनां पराशरस्मृतावेव निषिद्धत्वेन चण्डालसंसर्गस्य चण्डालताप्रयोजकत्वस्य वर्णनीयत्वादभ्यस्तैश्चण्डालसम्पर्कादिभिश्चण्डालत्वमेव ब्राह्मणानां स्यादित्येव निबन्धकाराणामाशयः। माधवाचार्या अपि हि पतितसंसर्गस्य प्रकीर्णकत्वं—'यो वै समाचरेद्विप्रः पतितादिष्वकामतः। पञ्चाहं वा दशाहं वा द्वादशाहमथापि वा। मासार्धं मासमेकं वा मासद्वयमथापि वा। अब्दार्धमब्दमेकं वा तदूर्ध्वं चैव तत्समः" इति श्लोकोक्तस्य किञ्चिदूनाब्दपर्यन्तस्यैवाभिप्रयन्ति, न तदधिकस्य। अत एव—'तदूर्ध्वं चैव तत्समः' इत्यभिधानात् पूर्वत्र तत्साम्याभावेऽपि ततोऽर्वाचीनं पापं कालतारतम्येन भवतीत्यवगम्यते। यः समाचरेत्स पापी भवतीत्यध्याहृत्य निन्दा योजनीया। अत्र किञ्चिदूनसंवत्सरसंसर्गोऽष्टमः पक्षः। यद्यपि किञ्चिदूनत्वं न श्रुतम्; तथापि सम्पूर्णसंवत्सरसंसर्गस्य पातित्यप्रयोजकत्वात् किञ्चिदूनत्वं कल्प्यते। तच्च पातित्यहेतुत्वं याज्ञवल्क्येन दर्शितम्। 'संवत्सरेण पतति पतितेन सहाचरन्' इति। इत्थं पतितसंसर्गे प्रकीर्णके निमित्तानुसारेण प्रायश्चित्तं व्युत्पादितमित्युक्तम्। अत्र 'तदूर्ध्वन्तु तत्समः' इति वाक्ये वस्तुगत्या पतित एव विवक्ष्यते। याज्ञवल्क्यवचनोपन्यासपूर्वकं तथा विवरणात्। तथा च तत्समशब्दप्रयोगोऽपि व्याख्यातः। अत्र—एभिस्तु संवसेद्यो वै वत्सरं सोऽपि तत्समः—इति हि याज्ञवल्क्यस्मृतौ तत्समशब्दप्रयोगेऽपि हि पातित्यमेव खलु सर्वसम्मतम्। तथा चात्र याज्ञवल्क्यसिद्धान्तानुसन्धानेन माधवाचार्या इदं सूचयन्ति--यत् तत्समशब्दप्रयोगेऽपि पूर्णसंवत्सरसंसर्गेण वस्तुगत्या पतितत्वमेवेति। एतेन विद्वन्मनोहराव्याख्या माधवीयाशयविरुद्धेति सूचितम्। तत्रापि

हि व्याख्यायां याज्ञवल्क्यस्मृतौ तत्समशब्देन महापातक्येव विवक्ष्यत इति स्पष्टमेव विवेचितमित्यनुपदमेव विवेचितम्। यथा चात्र—आसनाच्छयनाद्यानात्संल्लापात्सहभोजनात्। संक्रामन्ति हि पापानि तैलबिन्दुरिवाम्भसि॥ एकशय्यासनं पङ्क्तिर्भाण्डं पङ्क्त्यन्नमिश्रणम्। याजनाध्यापने योनिस्तथा च सहभोजनम्। संल्लास्पर्शनिश्वासात् सहशय्यासनाशनात्। याजनाध्यापनाद्यौनात् पापं संक्रामते नृणाम्— इत्यादि कण्वबृहस्पति-देवलादिवचनानुसारेण प्रकीर्णकेष्वपि सहशयनादिकं दोषाय, तथा माधवीय एव व्यक्तम्। एवं चात्र स्मृत्यन्तरात् पराशरस्मृतेः को वा विशेष इति शङ्कायां त्विदमेव माधवाचार्या मन्यन्ते—यत्किञ्चिदूनसंवत्सरपर्यन्तं सहशयनादीनां युगान्तरे प्रकीर्णकैरपि निषेधः, कलौ याजनाध्यापनादिभिरेव संसर्गैः प्रायश्चित्ताधिकारितेति। तदुक्तं माधवीये चतुर्थाध्याये—एतच्च पूर्वस्मिन् युगे। अत्र तु मूलवचनोक्त द्रष्टव्यम्; याजनादेर्वक्ष्यमाणत्वात्। संयोगश्चात्र याजनादिर्ग्राह्यः—इति। अत्रेदं न विस्मर्तव्यम्—यो वै समाचरेद्विप्रः—इति वचनमकामकृतसंसर्गमेव प्रकीर्णकतया बोधयति, न तु कामकृतमिति। कामकृते तु संसर्गे द्विगुणप्रायश्चित्तं वा प्रायश्चित्ताभावो वेति विशयेऽपि माधवाचार्याः—इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजम्। कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते॥ मतिपूर्वं हते तस्मिन् निष्कृतिर्नोपलभ्यते॥ अ० ८ पृ० ८००॥ अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः। कामकारकृतेऽप्याहुरेके श्रुतिनिदर्शनात्॥ अकामकृतपापानां ब्रुवन्ति ब्राह्मणा व्रतम्। कामकारकृतेऽप्येके द्विजानां वृषलस्य च॥ अभिसन्धिकृते पापे सकृद्वा नेह निष्कृतिः। अपरे

निष्कृतिं प्राहुरभिसन्धिकृतेऽपि च ॥ ऋषयो निष्कृतिं तस्य वद-न्त्यमतिपूर्वके । मतिपूर्वं हते तस्मिन् निष्कृतिर्नोपलभ्यते ॥ प्रायश्चित्तमकामानां कामावाप्तौ न विद्यते—इत्यादिना प्रायश्चित्ताभावमुपवर्ण्य—स्यात्त्वकामकृते यत्तु द्विगुणं तद्विशुद्धये—इत्यङ्गिरोवचनस्यैकस्यानुसारेण द्विगुणप्रायश्चित्तसत्त्वपक्षमपि चोपपादयामासुः । अत्र पक्षद्वयस्यापि वस्तुगत्या न विरोध इति केषाञ्चिन्मतम् । ये खलु प्रायश्चित्ताभाववचनानां नरकनिवर्तनत्व-मप्रायश्चित्ताभावपरतया प्रायश्चित्तसत्त्ववादिनां वचनानां व्यवहारायोग्यतानिवर्तनत्वमप्रायश्चित्तविषयतया च कामकारकृते पापे कामकारिणो मरणान्तप्रायश्चित्तेन नरकमात्रनिवृत्तिः, व्रतचर्यया तु व्यवहारसिद्धिरिति च मन्यन्ते । अपरेषां तु मतम्—व्रतचर्यया नरकनिवृत्तिः, नत्वव्यवहार्यतानिवृत्तिरिति प्रायश्चित्ताभाववचनानां व्यवहारयोग्यतासम्पादकप्रायश्चित्ताभावपरतया प्रायश्चित्तसत्त्ववचनानां नरकनिवारणत्वमप्रायश्चित्तविषयतया च योजनमेव युक्तमिति ।

[कृतप्रायश्चित्तानां व्यवहार्यतापक्षपरीक्षणम्]

अत्र पक्षद्वयेऽपि निमित्तं 'कामतो व्यवहार्यस्तु वचनादिह जायते' इति वचने 'व्यवहार्य' इति 'अव्यवहार्य' इति च पदच्छेदपक्षभेद एवेति सर्व एवेदं विजानन्ति । माधवाचार्या अपीममेव पक्षभेदमवलम्ब्योक्तमतद्वयमपि निरूपयन्ति । अत्र मतद्वयेऽपि माधवाचार्या इदं मन्यन्ते—यद् व्यवहार्यत्वमव्यवहार्यत्वं वा वचनानुसारेण व्यवस्थापनीयम्, न तु यथेच्छम् । तथाच—बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः । शरणागतहन्तॄंश्च स्त्रीहन्तॄंश्च न संवसेत्—इत्यादिवचनं यत्र शोधितैरप्यव्यवहार्यत्वं बो

धयति, तेषामेवाऽव्यवहार्यत्वमन्येषान्तु व्यवहार्यत्वमेव। अयं च विषयो माधवाचार्यैः 'बहिस्तूभयथापि स्मृतेराचाराच्च' इत्यस्यावकीर्णिमात्रविषयत्वं न तूपपातकिसामान्यविषयत्वमिति व्यवस्थापनेन सूच्यते। अत्रेमानि माधवाचार्याणां वाक्यानि—"ननूपपातकिनामपि कृतप्रायश्चित्तानां बहिष्कार एवोचितः। तथाच वैयासिकं सूत्रम्—बहिस्तूभयथापि स्मृतेराचाराच्च" इति। अस्यायमर्थः—यद्युपपातकं यदि वा महापातकमुभयथापि कृतप्रायश्चित्ताः शिष्टैरव्यवहार्याः। 'प्रायश्चित्तं न पश्यामि' इति निन्दास्मृतेः, शिष्टाचाराच्चेति चेत्, मैवम्। अयं हि बहिष्कार ऊर्ध्वरेतोविषयः, नतु गृहस्थविषयः। ऊर्ध्वरेतोविचाराणामेव तत्र प्रस्तुतत्वात्। इदं च कौशिकेन स्पष्टीकृतम्—नैष्ठिकानां वनस्थानां यतीनां चावकीर्णिनाम्। शुद्धानामपि लोकेऽस्मिन् प्रत्यापत्तिर्न विद्यते—इति। तथाच प्रागुक्तरीत्या कामकृतस्य संसर्गस्यैव संवत्सरन्यूनकालिकस्य प्रकीर्णत्वात् कामकृतस्य संवत्सराधिककालिकस्य च पातित्यापादकत्वं न विरुद्धम्। यत्तु माधवाचार्यैः—यस्तु पतितैर्ब्रह्महादिभिः सह संवत्सरं संसर्गं कृत्वा स्वयमपि पतितः, तस्य प्रायश्चित्तं मनुराह—यो येन पतितेनैषां संसर्गं याति मानवः। स तस्यैव व्रतं कुर्यात्संसर्गस्य विशुद्धये इति। आचार्यस्तु कलियुगे संसर्गदोषाभावमभिप्रेत्य संसर्गप्रायश्चित्तं नाभ्यधात्। अत एव स्मृत्यन्तरे कलौ वर्ज्यानामनुक्रमणे 'संसर्गदोषः पापेषु इत्युक्तमिति—वर्णितम्, तदप्यकामकृतपापसंसर्गविषयमेव। अन्यथा कथं वा कामकृतस्यापि संसर्गस्य विशेषेण पराशरस्मृतावकामकृतस्येव व्यवस्था न क्रियते। एवं रीत्याऽऽदरणेन हि यो येन पतितेनैषामिति मनुवचनं संसर्गदोषः पापेष्विति स्मृत्यन्तर-

वचनमुभयं च चरितार्थं भविष्यति । अयं भावः--संसर्गप्रायश्चित्तानभिधानस्य हि द्विविधा गतिर्भवति । एका संसर्गदोषः पापेष्विति वचनानुसारिव्यवस्थोरीकारेण, अपरा यो येन पतितेनेति मनुवचनानुसारिव्यवस्थोरीकारेण च । तत्र च मनुवचनानुसारिव्यवस्थाया अनादरणीयत्वं हि स्पष्टं पराशरेण व्यवस्थान्तरकरणं विना न संभवति । तथाच वचनद्वयस्यापि सार्थक्यार्थमुक्तविधैव व्यवस्थाऽऽदरणीया भवति। एतेन संसर्गदोषस्य पातित्यापादकत्वाभावेऽपि पापमात्रापादकत्वमस्तीत्याहेति 'आसनाच्छयनाद्यानात्, इति पराशरवचनावतरणमपि व्याख्यातम् । इदं हि वचनमकामकृतसंसर्गविषयमित्येव माधवाचार्याणामाशयः । अत एव "यो वै समाचरेत् विप्रः' इति श्लोकव्याख्यावसरे "समाचरणं यानासनादि । तथाच कण्वः—आसनाच्छयनाद्यानात्संल्लापादित्याद्येतत्समानार्थकश्लोकोपन्यास उपपद्यते । अनेन चेदं सूच्यते यत्कामकृतस्य संसर्गस्य लघुतरस्यापि पातित्यापादकत्वमिति । एतेन—आसनादित्यादिवचनस्य कामाकामकृतसंसर्गविषयत्वेऽपि न दोष इति सूचितम् । नहि पातित्यमेवानर्थायाव्यवहाराय च भवति, न पापमित्यत्र प्रमाणमस्ति । सम्भवति हि पापसामान्येन कामकृतेन वचनविशेषात् व्यवहारानापादकत्वम् । तथाचासनादिना पतितसंसर्गिणीव पतितसंसर्गिसंसर्गिण्यपि व्यवहारायोग्यताशक्तिः संक्रामतीत्येवोरीकर्तव्यमिति द्वितीयोऽपि संसर्गी दुष्ट एव । तथाच संसर्गस्य पापत्वेनापि पतितसंसर्गो निषिद्ध एवावगम्यते । तथाच संसर्गदोषः पापेषु इत्यत्र संसर्गस्य महापातकत्वमात्रमेव नास्तीति बोध्यत इति न दोषः । स च संसर्गः संसर्गिसंसर्गः साक्षात्पतितसंसर्गश्चेति मतद्वयं पूर्वमेव सूचितमस्ति ।

तत्र मतद्वयेऽपि पतितो वर्ज्य एव। तथाच पतितसंसर्गेण चाण्डालसंसर्गेण सहभोजनादिरूपेण यौनादिरूपेण वा न कथमपि व्यवहारयोग्यता सम्भवति। व्यक्तं चैतत्पूर्वमेव विवेचितम्। अयं भावः—

यथा हि कलिवर्ज्यप्रकरणे संसर्गदोषः पापेषु इति पठितम्, एवं संसर्गः शोधितैरपीत्यपि स्मृत्यन्तरे पठितमिति कलौ प्रायश्चित्तेनापि पतितानां न व्यवहार्यत्वमित्यपि व्यवस्थापितमिति पापमात्रस्य यस्य प्रायश्चित्तानन्तरमपि व्यवहारनिरोधकशक्तिरनुवर्तते, तस्य व्यवहारयोग्यतापादकत्वमप्यवश्यमेवोरीकर्तव्यम्। यद्यपि "सवर्णान्याङ्गनादुष्टैः संसर्गः शोधितैरपि" इत्यसवर्णास्त्रीसङ्गिनामेव कृतप्रायश्चित्तानामव्यवहार्यत्वं वर्णितम्। तथापि न दोषः; चण्डालानामसवर्णत्वात्, तदीययौनसम्बन्धस्य सर्वथा व्यवहारनिरोधकत्वसम्भवात्। पतितविषये तु तस्यासवर्णत्वाभावेन यद्यपि नेदं वचनं प्रवर्तते, तथापि पूर्वोक्तबौधायनस्मृतिगतव्यवस्थानुसारेण कृतप्रायश्चित्तैरपि पतितैः न व्यवहार्यत्वम्। तथाच 'संसर्गः शोधितैरपि' इतिवचनस्य यत्र यत्र संसर्गनिषेधस्तत्सामान्यपरत्वं सम्भवत्येव। यत्तु मिताक्षरादिषु व्यवहार्यत्वपक्षो व्युत्पादितः, तन्मतेनापि स्तेयान्यमहापातकनिष्कृतेः कलिवर्ज्यप्रकरणे पठितत्वात् सुवर्णस्तेयादिपरत्वमेव, न पापसामान्यपरत्वम्। तथाच येन स्वर्णस्तेयः कृतस्तस्य कृतप्रायश्चित्तस्य व्यवहार्यत्वमित्येव भवति। न तु सर्वस्य तादृशस्य। यस्तु खलु ब्रह्महत्यादिकं करोति, यश्चासवर्णाङ्गनासङ्गी भवति, तस्य तु पतितस्य न व्यवहार्यत्वमेव। यदा तु बलात्कारेण म्लेच्छादिभिरुपभुक्ताया स्त्रिया अपि संवर्तादिस्मृतिसिद्धप्राजापत्यादि-

प्रायश्चित्तनिषेधः कलौ क्रियते, तदा कैव कथा म्लेच्छस्त्रीसङ्गिनां पुंसां न प्रायश्चित्तेन व्यवहारयोग्यतेति मतान्तरं प्रविष्टानां पतितानां पुनःपूर्वतनजातिप्रवेशः सर्वनिबन्धाशयविरुद्ध एव। आचारोऽपि चण्डालादिसंस्पृष्टानां म्लेच्छादिमतान्तरप्रविष्टानां वाऽव्यवहारविषय एव कृतप्रायश्चित्तानामपि वर्तत इति 'बहिस्तूभयथापि स्मृतेराचाराच्चेति" सूत्रोपवर्णितेन न्यायेन कृतप्रायश्चित्तानामपि पतितानामसंव्यवहार्यत्वमेव। ये हि माधवाचार्याः—'संसर्गदोषः पापेषु, इति कलिवर्ज्यगतप्रकरणानुसारेण संसर्गस्य मन्वादिवचनसिद्धमपि पातित्यापादकत्वं न पराशरसम्मतमिति व्यवस्थापयन्ति, ते हि संसर्गः शोधितैरपीति कलिवर्ज्यप्रकरणगतवचनान्तरानुसारेण कृतप्रायश्चित्तानामपि पतितानामसंव्यवहार्यत्वमेवाङ्गीकर्तुमर्हन्ति। व्यवस्थापितं चैवं चतुर्विंशतिमतसङ्ग्रहेऽपीति तत एव द्रष्टव्यम्। तथा चायं विशेषः सिद्धो भवति-जातितः पतितानां चण्डालानां केनापि प्रायश्चित्तेन न जातिपरिवृत्तिः। केवलं चण्डालोचितकर्ममात्रपरिपालनं युक्तम्। कर्मपतितानान्तु प्रायश्चित्तविशेषैः स्वस्वपूर्वतनजातिपरिवृत्तिमात्रं जातियोग्यधर्माधिकारश्च भवतीति। नन्वेतावता कलिकाले यत्र विशेषतो धर्माणां ग्लानिरेव दरीदृश्यते, तत्र कृतप्रायश्चित्तानामपि पतितानामव्यवहार्यत्वं यदि सम्पाद्यते, तर्हि को नाम संकोचः क्रियते? युगान्तरे हि व्यवहारयोग्यताऽऽसीत्, इदानीन्तु सापि नास्तीत्यनेन तु नियमानामाधिक्यमेव खलु सम्पाद्यते, न सङ्कोच इति चेदत्रेदं माधवाचार्या मन्यन्ते-यत् युगान्तरे सहाशनादयः सर्वेऽपि व्यवहाराः पातित्यप्रयोजका आसन्, प्रायश्चित्तेन तु सर्वेषां व्यवहाराणां सिद्धिः। कलौ तु पापप्रयोजकः संसर्गो यौनाध्यापनादिरेवेति

गुरुतरस्य संसर्गस्य निषिद्धस्य सर्वथा परित्यागार्थं प्रायश्चित्तानन्तरमपि न व्यवहारसिद्धिरिति विशेष इति ॥ तथाच कलौ सहासनादिलघुसंसर्गस्यादोषत्वव्यवस्थापन एव संसर्गदोषः पापेष्वित्यादीनां तात्पर्यम्, नतु गुरुतरसंसर्गस्यादोषत्वव्यवस्थापनेऽपि। तदुक्तं माधवीये प्रायश्चित्तकाण्डोपसंहारे—संसर्गमाचरेद्विप्र इत्यादिसंसर्गप्रायश्चित्तं लोकविलक्षणयाजनादिविषयत्वेनान्यथासिद्धम्। आसनाच्छयनादिति तु पापमात्रापादकत्वेनान्यथासिद्धमिति। अत्रेदं विचारणीयम्—यदि यौनादिसंसर्गस्यैव संसर्गमाचरेद्विप्र इत्यादौ विवक्षा, तर्हि यौनादिसंसर्गस्य सम्पूर्णं संवत्सरमभ्यस्यमानस्य पातित्यहेतुत्वं विवक्ष्यते न वेति? आद्ये तु 'संसर्गदोषः पापेषु' इत्यनेन संसर्गस्य पापमात्रापादकत्वोक्त्ययोगः। द्वितीये तु सहासनादीनामपि पापमात्रापादकत्वेनाविशेषात् 'संसर्गमाचरेद्विप्रः' इत्यत्र ग्रहणप्रसङ्गः इति तत्र यौनादीनामेव ग्रहणम्, न सहाशनादीनामिति प्रकृतग्रन्थानुपपत्तिः। अथ यदि संसर्गदोषः पापेष्विति वाक्येऽकामकृतसंसर्गस्यैव विवक्षा, कामकृतसंसर्गस्य तु पातित्यापादकत्वमपि विद्यत एव। अत एव "संपूर्णसंवत्सरसंसर्गस्य पातित्यहेतुत्वम्, तच्च पातित्यं याज्ञवल्क्येन दर्शितम्" इत्यादि माधवाचार्यग्रन्थोपपत्तिः। अत्र यद्यप्यकामकृतसंसर्गस्यैव विचारः क्रियते, "यो वै समाचरेद्विप्रः पतितादिष्वकामतः" इत्येतत् श्लोकव्याख्यावसर एवोक्तग्रन्थप्रवृत्तेः, तथापि पूर्णसंवत्सरसंसर्गस्याकामकृतस्यापि पातित्यप्रयोजकत्वे कामकृतस्य तादृशस्य तस्य तदेव वचनसिद्धमित्यत्र न संशयलेशोऽपीति चिन्त्यते, तर्हि कलावपि कामकृतानां पूर्णसंवत्सरपर्यन्तमभ्यस्तानां वा सहासनादीनामपि पातित्यप्रयोजकत्वं भवतामपि

सम्मतमिति संसर्गमाचरेदित्यत्र लोकविलक्षणयाजनादिविषयत्व-व्यवस्थापनमसङ्गतमिति सर्वतः पाशा रज्जुरिति कथमत्रोपपत्ति-रिति। अत्रेदं प्रतिभाति—यल्लोकविलक्षणेत्यनेन कामतः प्राप्त-मित्येव विवक्षितमिति याजनादित्यादिपदेन कामप्राप्तसहासनादी-नामपि ग्रहणं माधवाचार्यसम्मतमेवेति ॥ अत्र याजनादित्यनेने-दमेव सूच्यते याजनं कथमप्यकामतः प्राप्तं न भवतीति सद्यः प्रा-प्तिरये कामप्राप्तत्वमेव निषिद्धाचरणस्य प्रयोजकं नान्यदिति। तथाच संसर्गदोषः पापेष्विति वचनस्यापि अकाम-कृतकिञ्चिदूनसंवत्सरसंसर्गादोषत्व एव तात्पर्यमिति पतितसंसर्ग-स्य कलौ न महापातकत्वमिति सिद्धान्तो न माधवाचार्यसम्मतः। यथाच सर्वथापि कृतप्रायश्चित्तानामपि म्लेच्छादिसंसर्गिणां न व्यवहारयोग्यता, तथा पूर्वमेव विवेचितमिति कृतप्रायश्चित्तानामपि तेषां व्यवहारायोग्यत्वे जातितः पतितानां चाण्डालादीनामकृतप्रा-यश्चित्तानां चाण्डालादिसंसृष्टानां चण्डाल्यादौ कृतापत्योत्पादना-नां च व्यवहारायोग्यत्वं कैमुतिकन्यायसिद्धमेवेति चण्डालादिसंस-र्गाऽदोषतावाद इदानीन्तनानामप्रामाणिक एव।

परमार्थतस्तु—कामतो व्यवहार्यस्तु इत्यत्र न सर्वेषां पापिनां कृतप्रायश्चित्तानां व्यवहार्यत्वं मिताक्षरादीनामपि सम्मतम्। येषां हि मरणान्तिकं प्रायश्चित्तं विहितम्, तेषां हि न कथमपि व्य-वहार्यत्वस्य प्रसङ्गः। उक्तं ह्यापस्तम्बेनापि "नास्यास्मिन् लोके प्रत्यासत्तिर्वर्तते" इति, किन्तु येषां मरणान्तप्रायश्चित्तातिरिक्तं प्रायश्चित्तं तेषामेव व्यवहार्यत्वे हि चतुर्थे नास्ति निष्कृतिरिति वच-नमेव गमकम्; तत्र चतुर्गुणप्रायश्चित्तस्य प्रसङ्गात्। सम्मत-मिदं मिताक्षराकाराणामपि। तथा चोक्तसिद्धान्तानुसारेणेयं

व्यवस्था भवति—यत् सकृदकामकृतत्वे पुनः कामकृतत्वे च प्रायश्चित्तेन व्यवहार्यत्वम्। सकृत्कामकृतत्वे पुनरपि कामकृतत्वे तु न व्यवहार्यत्वमिति। परे तु—चतुर्थे नास्ति निष्कृतिरित्यस्य चतुर्थवारे पापाचरणे न प्रायश्चित्तमिति—वदन्ति, एतन्मतेऽपि अकामतश्चतुर्थवारे तु न प्रायश्चित्तमित्यभिप्रायात् द्वितीयवारे कामकृतत्वे न प्रायश्चित्तमित्येव फलितम्। येषान्तु न मरणान्तिकप्रायश्चित्तम्, तेषामेवेयं व्यवस्था। मरणान्तिक प्रायश्चित्तन्तु स्तेयनिमित्तं-यत्तस्य कलावप्यनिषेधात् तत्रापि सकृत्कामकृतत्व एव चतुर्विंशतिवर्षप्रायश्चित्तानन्तरं व्यवहार्यत्वम्, न त्वभ्यासे। तथा च व्यवहार्यत्वं कृतप्रायश्चित्तानां यन्मते, तेषामप्यभ्यासे प्रायश्चित्ताभावस्सम्मत एव। इति।

अत्र वीरमित्रोदयकाराः प्रायश्चित्तप्रकाशे वदन्ति—तत्र तावत्प्रायश्चित्तं द्विविधम्। क्रत्वर्थं पुरुषार्थं च। पुरुषार्थमपि द्विविधं प्रारब्धसञ्चितपापनाशार्थत्वेन। तत्रेह पुरुषार्थमैहिकसञ्चितपापनाशार्थं प्रायश्चित्तमुच्यते। क्रत्वर्थं प्रारब्धपापनाशार्थं च क्वचिदिति। ननु किं पापं यन्नाशार्थं प्रायश्चित्तविधिः? उच्यते। कालान्तरीयाधर्मस्यान्यकालीननरकादिफलसाधनताप्रायश्चित्तान्यथानुपपत्तिभ्यां कल्पितमपूर्वम्। न च प्रायश्चित्तस्य फलप्रतिबन्धकता; तस्याशुविनाशित्वेन तन्नाशोत्तरं फलप्रसङ्गात्। नच पूर्वोक्तराङ्गसाहित्यान्यथानुपपत्तिकल्पितापूर्वद्वारा प्रतिबन्धकतेति वाच्यम्; प्रतिबन्धकत्वं हि प्रतिबन्धकाभावेतरसामग्रीसत्त्व एव भवति। नच दुरितापूर्वाभावे तत्सत्त्वम्। ननु मा-प्रायश्चित्तस्य प्रतिबन्धकता, तत्प्रागभावसहिता निषिद्धक्रियैव फलजनिकेति चेन्न; कृतेऽपि(?)विरोधविहितप्रायश्चित्ते तदन्यप्रायश्चित्तप्रागभावमादाय तस्याः फल-

जनकत्वं स्यात्। न च तत्तत्क्रियानिमित्तकतत्तत्प्रायश्चित्तप्रागभावानां स्वनिमित्तभूततत्क्रियासहकारितेति वाच्यम्; अकृते प्रायश्चित्ते प्रतियोग्यप्रसिध्या तत्प्रागभावाप्रसिद्धौ अधर्मफलाभावप्रसङ्गात्। अतो न प्रायश्चित्तप्रागभावसहिता निषिद्धक्रिया फलजनिका। नापि प्रायश्चित्तस्य फलप्रतिबन्धकता। तस्मादस्ति निषिद्धक्रियादिजन्यं पापम्, तन्नाशकत्वन्तु प्रायश्चित्तस्य। तथा चाङ्गिराः—

उद्यन्यद्वदथादित्यस्तमः सर्वं व्यपोहति।
तद्वत्कल्याणमातिष्ठन् सर्वं पापं व्यपोहति॥
पापं चेत्पुरुषः कृत्वा कल्याणमभिपद्यते।
मुच्यते पातकैः सर्वैर्महाभ्रैरिव चन्द्रमाः॥

कल्याणं प्रायश्चित्तम्। याज्ञवल्क्योऽपि—

विहितस्याननुष्ठानान्निन्दितस्य च सेवनात्।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति॥
तस्मात्तेनेह कर्तव्यं प्रायश्चित्तं विशुद्धये॥

पतनं पापम्। अनिग्रहादित्यादि विधिनिषेधविलक्षणपुरुषार्थपर्युदासातिक्रमसङ्ग्रहार्थम्। एवमेव विज्ञानेश्वरमेधातिथिकुल्लूकभट्टादयः। अत्र पुरुषार्थपदं नानुयाजेष्वित्यादिक्रत्वर्थपर्युदासव्यावृत्त्यर्थम्; तदतिक्रमे दोषाभावस्य वक्ष्यमाणत्वात्। यत्तु मनुवाक्यम्—अकुर्वन् विहितं कर्म निन्दितं च समाचरन्।

प्रसजंश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नर इति। तदपि फलत एतत्समानार्थमेव। यत्तु कल्पतरुः—प्रसजन्नित्याद्यविहितानिषिद्धेऽपि अत्यन्तासक्तिवारणायेत्याह, तन्न; शब्दत आत्यन्तिकत्वाप्रतीतेः। प्रसजंश्चेत्यत्र प्रशब्देन तदुपादाने—अज्ञानाद्यदि वा

ज्ञानात् कृत्वा कर्म विगर्हितम्। तस्माद्विशुद्धिमन्विच्छन् द्वितीयं न समाचरेत्—इति मनुवचनेन पौनरुक्त्यापत्तेः। किञ्च नहि निषिद्धब्रह्महत्याद्यपेक्षयाऽऽत्यन्तिकेन्द्रियप्रसङ्गस्य दोषाधिक्यार्थत्वं सम्भवति। यच्च शूलपाणिः—इन्द्रियार्थप्रसङ्गे नात्र स्वकार्यौ श्वादिदंशमिथ्याभिशापौ लक्ष्येते। तयोरपि पापोत्पादकत्वप्रतिपादनार्थमिदमिति, तदपि न; इन्द्रियार्थप्रसङ्गो हि दंशस्य कर्तुः कर्मणो वा? नाद्यः; प्रसजन् प्रायश्चित्तीयत इति सामानाधिकरण्यानुपपत्तेः? नान्त्यः; नहि पलायमानस्य बलाच्छुना दश्यमानस्येन्द्रियप्रसङ्गः श्वदंशकारणम्। अस्मदुक्तार्थेनैवोपपत्तौ लक्षणायां प्रमाणाभावाच्च।

अथ किं प्रायश्चित्तम्? उच्यते। विहिताननुष्ठानविषिद्धसेवनेन्द्रियानिग्रहेषु निमित्तेषु विहितं सत्तथाऽनुष्ठीयमानम्। अत्र पूर्वदलं भ्रान्तेनैतदन्यतरनिमित्तेऽनुष्ठीयमानभोजनादावतिप्रसङ्गवारणाय। उत्तरदलन्तु फलार्थत्वेनानुष्ठीयमाने चान्द्रायणाश्वमेधादावतिप्रसङ्गवारणाय। प्रारब्धप्रायश्चित्तस्य तु निमित्तेऽविधानाद्रोगनाशकदानवत्केवलकाम्यत्वाच्च मासाग्निहोत्रशब्दवद् गौण्या प्रायश्चित्तपदवाच्यत्वम्। श्वदंशादेस्तु जन्मान्तरीयप्रारब्धदुरितद्योतकत्वेन तन्निमित्तेऽपि कर्मणि प्रायश्चित्तपदं गौणम्।

श्वशृगालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च।
नराश्वोष्ट्रवराहैश्च प्राणायामेन शुध्यति—

इत्यादि विष्णुधर्मोत्तरोक्तादिवाक्यैः शुद्ध्यभिधानन्तु प्रारब्धपापनाशपरम्। विज्ञानेश्वरोऽपि—

कुनखी श्यावदन्तश्च कृच्छ्रार्धं दशरात्रं चरेत्—

इत्यादिप्रतिपादितकर्मणां क्षामवत्यादिवन्न नैमित्तिकत्वमिति

वदन् प्रारब्धपापनाशके कर्मणि प्रायश्चित्तपदं गौणमभिप्रैति ।
माधवोऽपि—नह्यत्र प्रायश्चित्तमभिधीयते; तत्प्रकरणपाठाभावात् ।
चिकित्साप्रकरणे हीदं पठितम् । यथाच चिकित्सा रोगनिवृत्ते
दृष्टोपायस्तथा दानादिरदृष्टोपायः । तथा सति चिकित्सावद्दाना-
देर्नात्र प्रायश्चित्तत्वम्, किन्तु रोगनिवर्तकं किञ्चित्सुकृतापूर्व-
मुत्पादयन्ति दानादयः—इति वदन्नेवमेवाह । एतल्लक्षणगमके
पूर्वप्रदर्शितमनुयाज्ञवल्क्यवाक्ये "अकुर्वन् विहितं कर्म"ति "विहित-
स्याननुष्ठानादि"ति च । न चात्रैवं निमित्तोद्देशेन प्रायश्चित्तविधा-
नानुपपत्तिः; विहितत्वगर्भप्रायश्चित्तपदार्थाज्ञानादिति वाच्यम्,
अर्थतस्तज्ज्ञानात् । यथा ह्यप्रसिद्धेऽपि धर्मे यो धर्मः स चोदनाल-
क्षण इति प्रमाणवचनव्यक्तौ अर्थादिदं सिद्धं भवति यश्चोदना-
लक्षणः स धर्म इति, एवमिहाप्यप्रसिद्धेऽपि प्रायश्चित्ते एतेषु
प्रायश्चित्तं कुर्यादित्युक्तेऽर्थादिदं ज्ञायते, यदेतेषु निमित्तेषु विधी-
यते क्रियते च तदेव प्रायश्चित्तमिति । अतश्च प्रायश्चित्तपदा-
र्थस्य पूर्वं विशिष्याज्ञानेपि सामान्यतः प्रायश्चित्तपदप्रतिपाद्यत्व-
रूपेण पदार्थज्ञानाद्वाक्यार्थज्ञानोपपत्तिरविरुद्धा । यद्यपि पूर्वोक्तया-
ज्ञवल्क्यवाक्ये एतन्न प्रतीयते, तथापि—तस्मात्तेनेह कर्तव्यं प्राय-
श्चित्तं विशुद्धये—इत्युत्तरवाक्ये तस्मादिति पञ्चम्यन्तेन पूर्वोक्त-
पञ्चम्यन्तपरामर्शादयमर्थो गम्यते । ननु तेषामप्राधान्यान्न परा-
मर्श इति चेन्न; अथ खल्वयं पुरुषः पापेन कर्मणा लिप्यते । तथैत-
द्याज्ययाजनमभक्ष्यभक्षणमवन्द्यवन्दनं शिष्टस्याक्रिया प्रतिषिद्ध-
सेवनं तत्र प्रायश्चित्तं कुर्यादिति गौतमीये तत्रेति सप्तम्यर्थे त्रला
शिष्टाक्रियात्मकविहिताकरणस्य प्रतिसिद्धसेवनस्य तद्विशेषाणा-
ञ्चायाज्ययाजनादीनां गोबलीवर्दन्यायेनोपात्तानां स्पष्टं निमित्त-

त्वमुक्तम् । तथा मानवीयेऽप्यकुर्वन्नित्यत्र त्रितयस्य निमित्तत्वमुक्तम् । अत एतदुभयबलेन याज्ञवल्कीयेऽपि तस्मादिति पञ्चम्यन्तेन गुणीभूतानामपि परामर्शोपपत्तेः । अपरार्केऽपि विहितानुष्ठानादिनिमित्तकत्वमेवोक्तम्प्रायश्चित्तस्य । एवं प्रायश्चित्तशब्दस्य योगोऽपि प्रदर्शितोऽङ्गिरसा—

प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते ।
तपोनिश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतमिति ॥

निश्चयोऽत्र फलावश्यम्भावनिश्चयः श्रद्धाख्यः । हारीतोऽपि—प्रयतत्वोद्वोपचितमशुभं नाशयतीति प्रायश्चित्तमिति ॥ यत्तु शूलपाणिः—पापक्षयमात्रसाधनकं कर्म प्रायश्चित्तम्, मात्रशब्दस्तु तुलापुरुषाश्वमेधादिव्यावृत्त्यर्थः—इति, तत्तुच्छम्; 'धर्मार्थन्तु चरेदेतच्चन्द्रस्यैति सलोकताम्' इत्यादियाज्ञवल्क्यवाक्यैः फलान्तरार्थविहितचान्द्रायणादौ क्रत्वङ्गभ्रेषनिमित्तके च प्रायश्चित्तेऽव्याप्तेः । नहि क्रत्वङ्गभूतप्रयाजाद्यकरणे पापमस्ति, किन्तु क्रतोर्वैगुण्यम् । तच्चाङ्गजन्योपकाराभाव एव । प्रायश्चित्तेन तु स एवोपकारो जन्यते । नचैवमाग्नेयमष्टाकपालं निर्वपेद्रुक्काम इतिवच्चान्द्रायणादौ फलाख्यानुपादेयगुणसत्त्वात्कर्मभेद इति वाच्यम्; सन्निधानात्तत्तायोः प्रवृत्तेः । तस्मात्संयोगपृथक्त्वन्यायेन ज्योतिष्टोमवदेकस्यैवोभयार्थत्वम् । यत्तु कश्चिद्दुरितनिवर्तकं प्रायश्चित्तमित्युक्तम्, तन्न; दर्शपूर्णमासादौ अतिव्याप्तेः । नच तदपि लक्ष्यम्; अभियुक्तानां तथा व्यवहाराभावात्, क्रत्वङ्गभ्रेषप्रायश्चित्तेऽव्याप्तेश्च । यत्तु मिताक्षरायां प्रायश्चित्तशब्दश्चायं नैमित्तिके कर्मविशेषे रूढ इत्युक्त्वा श्वदंशमिथ्याभिशापादिनिमित्ते प्रायश्चित्तेऽव्याप्तिवारणाय श्वदंशादिजन्यदुःखहेतुभूतप्राग्भवीयपा-

पनाशार्थत्वमुक्तं श्वदंशादिनिमित्तप्रायश्चित्तस्य, तदेतत्कर्मणि विशेषस्य निरूपयितुमशक्यत्वात् क्रत्वङ्गश्रेषप्रायश्चित्ते पूर्वोक्ताऽव्याप्तेरपरिहाराच्चापतत एवोक्तमिति भाति। वस्तुतस्तु यथा भट्टाचार्यैस्तच्चोदकेषु मन्त्राख्येति सौत्रेऽभिधायकत्वरूपे मन्त्रलक्षणे वैदिकयाज्ञिकानां मन्त्रत्वेन प्रसिद्धेषु 'वसन्ताय कपिञ्जलानालभेत' इत्यादिष्वव्याप्तेर्यत्र वैदिकयाज्ञिकानामभियुक्तानां मन्त्र इति प्रसिद्धिः स मन्त्र इति सूत्रतात्पर्यं वर्णितम्, एवमिहापि यत्राभियुक्तानां प्रायश्चित्तप्रसिद्धिस्तत्प्रायश्चित्तमिति लक्षणे मनुयाज्ञवल्क्यादिवाक्यानां तात्पर्यमुन्नेयम्। ततश्च न क्वाप्यव्याप्त्यतिव्याप्तिगौरवादिदोषापत्तिः। यत्तु मदनरत्ने पापस्यैव प्रायश्चित्ते निमित्तत्वम्, तस्मिंश्च विहिताद्यकरणस्येति, तन्मन्दम्; मानाभावात्, कर्माङ्गप्रायश्चित्तेऽव्याप्तेः, पूर्वोक्तमनुयाज्ञवल्क्यगौतमवाक्यविरोधाच्च। ताभ्यां हि विहिताकरणादेरेव निमित्तत्वमुक्तम्, न तु पापस्य। यच्च माधवीये नाग्निहोत्रादिवज्जीवनमधिकारिविशेषणमपि त्वन्यदेव विहिताकरणादिनिमित्तमधिकारिविशेषणमित्युपक्रम्य मध्ये च तत्साधकं विहितस्याननुष्ठानादित्यादिबार्हस्पत्यमुपन्यस्यान्ते उपक्रमविरुद्धमिवोपसंहृतम्, तच्च निमित्तं दुरितापूर्वमुत्पत्तिकारणमिति, तदप्युपक्रमानुरोधेनैवं व्याख्येयं दुरितापूर्वमुत्पत्तेर्नैमित्तिकानुष्ठानस्य कारणं निमित्तं निवर्त्यत्वेन प्रयोजनम्। मशकार्थो धूम इतिवदिति सर्वं शिवम्। इति प्रायश्चित्तनिर्वचनम्।

[प्रायश्चित्तस्य नैमित्तिकत्वविचारः]

तदेतत्प्रायश्चित्तं नैमित्तिकम्; निमित्ते विधानात्। नैमित्तिकं धर्मजातं गदतो मे निबोधत॥
विहितस्याननुष्ठानात्प्रतिषिद्धनिषेवणात्।
प्रायश्चित्तं यत्क्रियते तन्नैमित्तिकमुच्यते॥

इत्युपक्रमेण—नैमित्तिकं समाख्यातं प्रायश्चित्तं समासतः इत्युपसंहारेण च बृहस्पतिना नैमित्तिकत्वोक्तेश्च। अत्र च विहिताद्यकरणस्य पापे प्रायश्चित्ते च न सामान्यरूपेण विहिताद्यकरणत्वेन निमित्तत्वम्; सामान्यरूपे विहिताद्यकरणे प्रायश्चित्तानुक्तेः, किन्तु ब्राह्मणहत्यादिप्रातिस्विकेनैव रूपेण; तत्त्वेनैव प्रायश्चित्तविधेः। यथा "य इष्ट्या पशुना सोमेनामावास्यायां पौर्णमास्यां वे"त्यत्र न सामान्यत इष्टौ पर्वकालत्वविधिः, किन्तु सौर्यादिप्रातिस्विक एव रूप इति। नचैतन्निरयम्; सन्ध्यावन्दनाग्निहोत्रवद्वीप्साया जीवनस्य वाऽधिकारिविशेषणस्याभावात्। यत्तु मानवीये—चरितव्यमतो नित्यं प्रायश्चित्तं विशुद्धये—इति नित्यपदं तदावश्यकत्वपरम्। ननु प्रायश्चित्तैरपैत्येन इत्यादिवाक्यैरेनोनिराकरणस्य फलस्यश्रवणात्काम्यत्वं स्यादिति चेन्न; जातेष्टिवत्संवलिताधिकारात्। तथाच जाबालः—अतः काम्यं नैमित्तिकं च प्रायश्चित्तमिति स्थितिरिति।

[प्रायश्चित्ताकरणे प्रायश्चित्तान्तराभावः]

तस्मात्सर्वाङ्गोपसंहारासमर्थेनापि कार्यम्।

अत्र केचित्प्रायश्चित्तस्य नैमित्तिकत्वेन विहितस्याननुष्ठानादित्यादिवाक्यनिचयात् प्रायश्चित्ताकरणेपि प्रत्यवायान्तरमस्तीत्याहुः, तत्तुच्छम्; नैमित्तिकत्वावगतावावश्यकत्वनिर्वाहार्थं हि नैमित्तिकाकरणे प्रत्यवायः कल्प्यते। प्रायश्चित्ते तु तन्नाश्यदोषेणैवावश्यकत्वनिर्वाहात्प्रायश्चित्ताकरणे पापं तत्र च प्रायश्चित्तान्तरमित्यनवस्थानाच्च न पापान्तरं कल्प्यते। किञ्च निषिद्धक्रियोत्तरं प्रायश्चित्ते कालविलम्बानुसारेण तदाधिक्यस्योक्तत्वात्तत्र भवन्मते प्रतिक्षणमनन्तपापकल्पनागौरवं स्यात्। अस्मन्मते तु कालविलम्बे निमित्ते पूर्वपापनाशार्थमेव नैमित्तकी प्रायश्चित्ताधि-

क्यकल्पनेति लाघवम् । ननु कालविलम्बेन पापाभावेऽविलम्बि-तप्रायश्चित्तानुष्ठानानुपपत्तिरिति चेन्न ; प्रायश्चित्ताधिक्यभयेन तदुपपत्तेः । अतश्च विहितस्याननुष्ठानादित्यादि यथा काम्याननुष्ठाने यथा वा कृत्वङ्गशेषप्रायश्चित्ताननुष्ठाने न प्रवर्तते, एवं पुरुषार्थविहितप्रायश्चित्ताननुष्ठानेऽपि न प्रवर्तते, किन्तु यत्र नैमित्तिकनाश्यदोषाभावो राहूपरागस्नानादौ, तत्रैव प्रवर्तते । यत्तु मानवीयम्—चरितव्यमतो नित्यं प्रायश्चित्तं विशुद्धये ।

निन्द्यैर्हि लक्षणैर्युक्ता जायन्ते निष्कृतैनसः ॥ इति ॥

यच्च याज्ञवल्कीयम्—

प्रायश्चित्तमकुर्वाणाः पापेषु निरता नराः ।

अपश्चात्तापिनः कष्टान्नरकान्यान्ति दारुणान् ॥ इति ।

तत्प्रायश्चित्तानाश्यदोषफलप्रतिपादनपरमेव ; नतु प्रायश्चित्ताकरणनिमित्तकदोषान्तरफलप्रतिपादनपरम् । नन्वस्तु निषिद्धसेवनस्य प्रत्यवायजनकत्वं विहिताकरणस्य त्वभावस्य कथं भावरूपप्रत्यवायजनकत्वम् ? अत्र केचित्—विहितसन्ध्यावन्दनाकरणेनाग्निहोत्राद्यनधिकारो द्योत्यते, तन्निवर्तकश्च प्रायश्चित्तमिति । तच्चिन्त्यम् । द्योतकत्वं हि ज्ञानजनकत्वम् । ज्ञानन्तु भाव एवेति । अस्तु वा—सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु—इत्यादिवाक्यात्सन्ध्यावन्दनाद्यननुष्ठानस्य तथात्वम्, यत्र त्वग्निहोत्रादौ शुचित्वसम्पादनद्वारा कर्माङ्गत्वाभावस्तत्र तूत्तरकर्मानधिकाररूपाशुचित्वद्योतकप्रमाणाभावान्न सर्वत्र विहिताकरणस्याशुचित्वद्योतकत्वम् । एतेन विहिताकरणं जन्मान्तरीयदुरितज्ञापकमिति कस्यचिदुक्तिः परास्ता ; ज्ञापकत्वस्य ज्ञानाख्यभावजनकत्वात् । एतेनैव विहिताकरणेनाग्निहोत्रादिविषयाधिकारा-

सिद्धिरूपः प्रत्यवायो जन्यते इति विज्ञानेश्वरोक्तिः परास्ता; प्रत्यवायस्य भावरूपत्वात्। तस्मादेवं समाधेयम्। अभावस्यापि भावजनकत्वं दृष्टमेव। यथा प्रागभावस्य घटादिजनकत्वम्। यथा वाऽनुपलब्धेर्घटाभावादिबुद्धिजनकत्वम्। न्यायसुधायान्तु गुरुमतेनैवं समाहितम्। विहिताननुष्ठानकाले यच्चिन्तितनिमेषादि करोति, तेनैव प्रत्यवायो जन्यते, नाभावेनेति। तदुक्तं वार्तिके—

अकुर्वन् विहितं कर्म करोत्यन्यदचेतनः।
प्रत्यवायोऽस्य तेनैव नाभावेन स जन्यते॥ इति॥

एतेन पापस्यापूर्वात्मकत्वात्तस्य च कृत्युद्देश्यत्वे सति साध्यत्वान्नाक्रियारूपाकरणजन्यत्वमिति परास्तम्; आलस्योपेक्षादेरपि पापोत्पादकत्वदर्शनात्। तथाच मनुः—

अनभ्यासाच्च वेदानामाचारस्य च वर्जनात्।
आलस्यादन्नदोषाच्च मृत्युर्विप्राञ्जिघांसति॥

स्कान्दे—नाभिरक्षन्ति ये शक्ता दीनं चातुरमाश्रितम्।
आर्तं च नानुकम्पन्ते ते वै निरयगामिनः॥इति॥

कृतिसाध्यत्वन्त्वपूर्वस्य विहितनिषिद्धक्रियाजन्यापूर्व एव। यत्तु टोडरानन्दे माधवीये च—नैयायिकमते वेदकर्तृत्वादीश्वरस्य विहिताननुष्ठाने ईश्वराज्ञोल्लङ्घनेन भावेनैव भावः प्रत्यवायो जन्यत इति, तदयुक्तम्; आज्ञोल्लङ्घनस्यैव प्रत्यवायजनकत्वे विधिनिषेधपर्युदासोल्लङ्घनानां पार्थक्येन प्रत्यवायनिमित्तगणनावैयर्थ्यादुल्लङ्घनस्याभावत्वाच्चेति। ननु माधवीये "नाभुक्तं क्षीयते कर्मे"ति स्मृतेः 'न हि कर्म क्षीयत,इति गौतमोक्तेः "अवश्यमेव—भोक्तव्यं कृतं कर्म शुभाशुभमि"ति मदनरत्ने स्मरणाच्च कथं

प्रायश्चित्तेन पापं नाश्यत इति चेन्न ; यथा "ज्ञानाग्निः सर्व-कर्माणि भस्मसात्कुरुतेऽर्जुने" त्यादि श्रीभगवद्वाक्ये तत्त्वज्ञानस्य सञ्चितपापनाशकत्वम्, यथा वा काशीमरणस्य देशान्तरकृतपापनाशकत्वं च यथा वा, विहितनिषिद्धकर्मणोर्धर्माधर्मारम्भकत्वं भोगस्य चोभयनाशकत्वं शास्त्रगम्यम्, तथा प्रायश्चित्तस्यापि पापनाशकत्वं शास्त्रत एवावगम्यते। तथाच गौतमः--प्रायश्चित्तं कुर्यान्न कुर्यादिति मीमांसन्ते, न कुर्यादित्याहुः। नहि कर्म क्षीयते। कुर्यादित्यपरे। पुनःस्तोमेनेति पुनः सवनमायान्तीति विज्ञायते व्रात्यस्तोमेनेति तरति सर्वं पाप्मानं तरति ब्रह्महत्यां योऽश्वमेधेन यजत इति। आहुरितीति पूर्वपक्षः। अपर इति सिद्धान्तः। नहि कर्म क्षीयत इति भोगं विनेति शेषः। पुनस्तोमो यागः। पुनः सवनमायान्ति ज्योतिष्टोमाद्यधिकारिणो भवन्तीत्यर्थः। मनुश्च-"चरितव्यमतो नित्यं प्रायश्चित्तं विशुद्धये॥ भविष्येऽपि—व्यतिक्रमाद्यथा पुत्र दोषोत्पत्तिर्भवेदिह। प्रायश्चित्तात्तथैवेह दोषक्षय इति श्रुतिः॥ हारीतोपि-यथा क्षारोपस्वेदचण्डनिर्णोदनप्रक्षालनादिभिर्वासांसि शुद्ध्यन्त्येवं तपोयज्ञदानैः पापकृतः शुद्धिमुपयान्ति धम्यमाना इवाग्नौ धातवः। तस्माद्विस्रम्भात्प्रमादात्कल्याणमभ्यसेदिति॥ चण्डोऽग्निः। निर्णोदनं तस्मिन्नधिश्रयणं क्लेदनमित्यर्थः। एवञ्च नाभुक्तमित्यादि पूर्वोक्तवाक्यत्रयमकृतप्रायश्चित्तपापपरमकीर्तितादिधर्मपरञ्च। तस्माद्युक्तं पापनाशकत्वं प्रायश्चित्तस्य। अतश्च—पूर्वजन्मकृतं पापं व्याधिरूपेण बाधते। तच्छान्तिरौषधैर्दानैर्जपहोमार्चनादिभिः—इति मानवोदाहृतवाक्याज्जपादिप्रायश्चित्तानामपि प्रारब्धपापनाशकत्वं सिद्धम्। तेषान्तु निषिद्धाचरणादिनिमित्तेऽविधाने नैमित्तिकत्वाभावाद्दानादि-

वत्काम्यत्वमेव। यत्तु विज्ञानेश्वरः—प्रारब्धेन चरमं स्वफलमारब्धमेव। अतस्तन्नाशे प्रयोजनाभावः। भावे वा निमित्तकारणनाशात्कार्यस्यानाशात्पापस्य च फले निमित्तकारणत्वात्तन्नाशेऽपि न फलनाशः। किञ्च कौनख्यादेरन्त्यफलत्वात्तदुत्पत्त्या स्वकारणपापनाशो जात एव मथिताग्निनेवारणेः। अतो न प्रारब्धपापनाशार्थं प्रायश्चित्तम्। या त्वत्र "कुनखी श्यावदन्तश्च कृच्छ्रं द्वादशरात्रं चरेदि"त्यादि कर्मविपाकोक्तिः, सा क्षामवत्यादिवन्नैमित्तिकयेव। अत एव न संव्यवहारार्थमपीदं प्रायश्चित्तम्। रोग्यादिभिर्व्यवहाराभावस्यादर्शनात्। यस्तु कुनखादेः श्राद्धादौ व्यवहाराभावः, स गोत्रजव्यवहाराभाववत्क्रत्वर्थत्वेन, न तु पापभयात्। कुष्ठ्यपस्मार्यादिभिस्तु रोगसंक्रमणभयादिति, तदसत्; यद्यपि प्रारब्धेन स्वचरमफलं रोगाद्यारब्धम्, तथापि रोगजन्यदुःखव्यक्तीनामनेकत्वाद्भाविदुःखव्यक्तिनिरासायाऽवश्यं प्रायश्चित्तापेक्षाऽस्त्येव। पापरूपनिमित्तकारणनाशे न यद्यप्युत्पन्नरोगादिकार्यनाशः, तथापि तन्नाशे भाविरोगादिकार्यानुत्पादोऽस्त्येव प्रायश्चित्तप्रयोजनम्। रोगादेरन्त्यफलत्वन्तु निश्चितम्।

प्रायश्चित्तविहीनानां महापातकिनां नृणाम्।
न चैकान्ते भवेज्जन्म चिन्हाङ्कितशरीरिणाम्॥
प्रतिजन्म भवेत्तेषां चिन्हं तत्पापसूचकम्।
प्रायश्चित्ते कृते याति पश्चात्तापवतां पुनः॥
महापापोद्भवं चिन्हं सप्तजन्मानि जायते।
अतिपापोद्भवं पञ्च त्रीणि पापसमुद्भवम्॥
दुष्कर्मजा नृणां रोगा यान्ति चैवं क्रमादिह।
जपैः सुरार्चनैर्होमैर्दानैस्तेषां शमो भवेत्॥

पूर्वजन्मकृतं पापं नरकस्य परिक्षये।
बाध्यते व्याधिरूपेण तस्य कृच्छ्रादिभिः क्षयः॥

इति शातातपोक्तेः। किञ्च प्रायश्चित्तकर्मविपाकयोः स्नामवत्स्यादिवन्नैमित्तिकत्वे तद्वदेवाकरणे प्रत्यवायः स्यात्॥ न चैतयोरकरणे कस्यचित्प्रत्यवाय इष्टः। एवञ्च यदा कृतेऽपि कर्मविपाके यत्कौनख्यादि न गच्छति, तत्र तस्य महापातकादिजन्यत्वेनानेकजन्मभोग्यत्वाज्जन्मान्तरीयकौनख्याद्यनुत्पत्त्यर्थ एव प्रारब्धपापनाशः। यत्र तु मूको वागपहारक इत्यादावेकजन्मसाध्य एव भोगस्तत्र तन्नाशार्थे कर्मणि वैगुण्यमेव कल्प्यम्। यत्तु कश्चित्समाधत्ते—प्रायश्चित्तादिकरणेऽपि रोगादेरनाशे चरमजन्मीयत्वं कल्प्यम्। यतस्तदुत्पत्त्या पापं नष्टम्, अतश्च कृतेऽपि प्रायश्चित्ते तन्नाश्यस्य पापस्याभावात् तद्रहितस्य चानधिकारित्वात्तत्कृतप्रायश्चित्तस्य वा कृतप्रायत्वात्तेन रोगाद्यनाश इति। इत्थमेव भट्टविश्वेश्वरोऽप्यभिप्रैति, तदेतत्तुच्छम्; यद्यपि चरमजन्मीयं रोगादिफलमुत्पन्नम्, तथापि यथा चरमजन्मीयफलावध्यपूर्वसत्तेष्टा, तथा चरमजन्मफले दुःखव्यक्तीनामनेकत्वादन्त्यदुःखव्यक्त्यन्तमपूर्वसत्ताऽऽवश्यिकेति पापरूपाधिकारिविशेषणलाभात्तद्वता कृतस्य च साङ्गत्वात्स्यादेव तेनापि पापनाशाद् भोगनाशः। न च पापेन चरमजन्मनि रोगादि जन्यते, तेन चाद्य दुःखव्यक्तय इति न चरमदुःखव्यक्त्यन्ते पापसत्तेति वाच्यम्, रोगावस्थानामप्यनेकत्वात्। तासां च दृष्टकारणमात्राजन्यत्वादन्त्यदुःखव्यक्त्युत्पत्तये आवश्यिकी पापसत्तेति तन्नाशद्वारा स्यादेव चरमजन्मरोगनाश इति नैतत्समाधानं साध्विति दिक्। माधवस्तु—इहैव फलकर्मेदं प्रारब्धं प्रतिबध्य च। फलं ददाति स्वप्ने वा जाग्र-

त्कालेऽथवाऽनघ ॥ निमित्तप्रतिबन्धन्तु प्रारब्धं कर्म सत्तम । निरुद्धांशफलं स्वप्ने ददाति स्थिरमुत्तमम् ।

तथा—एवं निरुद्धं भोगन्तु स्वप्ने जाग्रति वा फलम् ।
आरब्धस्यानुगुण्येन मुक्तदेही न संशयः ॥

इत्यादिपराशरीयपुराणवाक्यबलात्तत्कालीनप्रबलदानादिप्रतिबद्धमपि दुर्बलं कर्म स्वप्ने जन्मान्तरे वा फलं ददातीत्याह। तस्मात्पूर्वोक्तरीत्या प्रारब्धपापनाशकत्वेन प्रायश्चित्तस्य दानादेश्च सिद्धः समुच्चयः । नन्वनयोर्दोषनिर्घातार्थत्वेनैव कार्यत्वात् समुच्चयस्त्व दोषनिर्घातार्थेष्विति न्यायेन विकल्प इति चेत्, मैवम्; यद्यप्येवं विकल्पः प्राप्तः, तथापि यथाग्निहोत्रे "यदग्नये च प्रजापतये च सायं जुहोति, यः सूर्याय च प्रजापतये च प्रातर्जुहोती" त्यत्रा "ग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति, सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातरि" ति मन्त्रवर्णप्राप्ताग्निसूर्यानुवादेन प्रजापतिसाहित्यप्रतीतिः, तथेहापि प्रातिस्विकवाक्यप्राप्तदानानुवादेन 'प्रायश्चित्तमकृत्वा तु न कुर्यात्कर्म किञ्चन । अनिस्तीर्णमघं यस्मात्तद्वर्द्धता गुणां पुनः, इति कर्मविपाकसङ्ग्रहवाक्यात्क्रमविधिवशात्समुच्चयो लभ्यते । यद्वा प्रायश्चित्तदाने पापक्षयरोगक्षयरूपकार्ये भेदेन समुच्चिते एव भवतः । तत्र भिन्नस्मृतिप्राप्तयोः क्रमाकांक्षायां तन्मात्रमनेन विधीयते । यत्र तु केवलं दानाद्येवाम्नातम्, तत्र तस्य रोगनिवर्तकत्वेनैव सिद्धेः पापनाशकाकांक्षायामेतद्वचनान्यथानुपपत्त्या च कल्प्यं प्रायश्चित्तम्। तत्तु 'प्रायश्चित्तार्धमहन्ति स्त्रियो रोगिण एव च, इति याज्ञवल्क्यवाक्यादर्धम् । यत्र तु प्रातिस्विकमाम्नातं 'कुनखी' श्यावदन्तश्च कृच्छ्रं द्वादशरात्रं चरेत्' इत्यादौ, तत्र तदेव । ननु यत्र रोगाद्यभावः प्रातिस्विकप्राय-

श्चित्ताभावश्च, तत्र कथमिति चेत्, अत्र केचित्——कर्म विपाकवतः प्रायेण नरकभोगादेर्जातत्वात्तत्कर्मविपाकनिदानभूत-पापनिमित्तकं पूर्णं प्रायश्चित्तमनुमतम्। अतश्च प्रायश्चित्ता-न्तराकांक्षायामर्धं भवति। तथा च कर्मविपाकसारे—एकां कृच्छ्रे-ऽतिकृच्छ्रे द्वे तिस्रश्चान्द्रायणव्रते। गवामभावे निष्कं वा साशीति-शतकृच्छ्रदः—इति॥ अत्र षड्वार्षिकं द्वादशवार्षिकोद्धृतम्। अतस्त-ऽशीत्युत्तरं कृच्छ्राणां शतं भवति। तथा चैतद्द्वादशवार्षिकप्रयो-जकब्रह्महत्यादिनिदानके रोगादौ भवति। एतल्लिङ्गेन चान्यत्राप्य-र्धमेवेति। वस्तुतस्तु लिङ्गस्यासाधकत्वात्प्रापकप्रमाणस्य चाभावात्—उच्यन्तेऽथ निदानानि प्रायश्चित्तानि च क्रमात्। महापापेषु सर्वं स्यात्तदर्धन्तूपपातके॥ तदर्धमुपपापीयं षष्ठार्धम्। दद्यात्पापेषु ष-ष्ठांशं कल्प्यं व्याधिबलाबलमिति शातातपोक्ते भोगेऽनौचित्या-भावः। अतश्चैतद्वचनोपात्तनिदानके एतद्वचनोपात्तमेव प्रायश्चित्तं भवति। अनुपात्ते तु सङ्करीकरणादौ सम्पूर्णमेव। यन्निदानभूते पापे प्रायश्चित्तमेव नोक्तम्, तत्र दण्डाद्यनुसारात्कल्प्यम्। साशीति-शतकृच्छ्रद इति तु महापापनिदानक एवाशक्तौ बोध्यमिति दिक्। इति प्रायश्चित्तस्य पापनाशकत्वनिरूपणम्।

[प्रायश्चित्ताधिकार-विवेचनम्]

अथ प्रायश्चित्ताधिकारिविशेषणम्। तत्र प्राय-श्चित्तस्य नैमित्तिकत्वप्रदर्शनेन संवलिताधि-कारोक्त्या च विहिताननुष्ठानादिरूपं निमित्तं पापक्षयकामना चा-धिकारिविशेषणमित्युक्तमेव। अनुतापस्याप्यधिकारिविशेषणत्वमा-ह्ङ्गिराः—दह्यमानोऽनुतापेन कृत्वा पापानि मानवः। शोचमानो अहोरात्रं प्राणायामैः प्रमुच्यते इति। प्राणायामपदं प्रायश्चित्तमा-त्रोपलक्षकम्।

शोचेत मनसा नित्यं दुःखात्तान्यनुचिन्तयन् ।
तपस्वी वा प्रमत्तश्च पापेभ्यः स प्रमुच्यते ॥

इति कल्पतरूदाहृतवाक्येन तपस्विपदोपादानात् । पैठीनसिः-अथातः पञ्चधा शुद्धिर्ब्राह्मणस्य त्यागेन क्लेशेनोपरमेण साधुसम्प्रदानेन तपसा चेति ॥ त्यागेन निषिद्धस्य । क्लेशेनोपवासादिना । उपरमेण वैराग्येण । साधुसम्प्रदानेन समीचीनदानेन । तपसा कायसन्तापेन । अत्र ब्राह्मणपदं नरमात्रोपलक्षकम्; सर्वस्मिन्नरत्वजात्यवच्छिन्ने प्रायश्चित्तस्य वक्ष्यमाणत्वात् । पञ्चधेति न परिसंख्या; तीर्थयात्रादीनां प्रायश्चितत्वप्रतिपादकेन—

सेतुं दृष्ट्वा समुद्रस्य ब्रह्महत्यां व्यपोहति—इत्यादिना

विरोधापातात्, दोषत्रयापत्तेश्च । पुनरङ्गिराः—

विकर्मणा तप्यमानः पापाद्विपरिमुच्यते—इति ॥

अत्रानुतापमात्रस्य पापनाशकत्वानुपपत्तेः पापनाशकप्रायश्चित्तेऽधिकारिविशेषणत्वेन पापनाशप्रयोजकत्वमुक्तम् । विष्णुरपि—मनःसन्तापनात्तीव्रमुद्वहेच्छोकमन्ततः इति । अत्राप्यधिकारिविशेषणत्वमेव मनःसन्तापस्य शोकोद्वहनप्रयोजकत्वमिति । याज्ञवल्क्योऽपि—

प्रायश्चित्तमकुर्वाणाः पापेषु निरता नराः ।
अपश्चात्तापिनः कष्टान्नरकान्यान्ति दारुणान् ॥ इति॥

कष्टान् द्वेष्यान् । तत्र हेतुर्दारुणत्वं दुःसहत्वम् । अपश्चात्तापिनो यान्ति नरकानतिदारुणानिति त्वपरार्के पाठः । अत्राप्यनुतापाभावस्य नरकप्रयोजकत्वोक्त्या व्यतिरेकमुखेनानुतापस्याधिकारिविशेषणत्व एव तात्पर्यम् । अत्र सर्वत्रानुतापस्य विहितत्वेनाङ्गत्वेऽपि कालराजत्वादिवदनुपादेयत्वाभावेऽपि च "दतो धावति,

नखानि निकृन्तते" इत्यादिवद्दीक्षितत्ववैराग्यवत्त्वाधिकारिविशेषण-त्वमेवेति। तथा याज्ञवल्कीये नरः पतन्मृच्छतीतिप्रायश्चित्तप्रयो-जकनिषिद्धाचरणादिपापहेतूक्तौ नरपदोपादानात् अहिंसासत्यम-स्तेयमित्यादिसाधारणानां प्रातिस्विकानाञ्च विधिनिषेधानां सर्वान् प्रति प्रवृत्तेश्च सर्ववर्णाश्रमस्थादीनामप्रतिबद्धोऽधिकारः। तत्र स्त्रिया भर्त्राद्यनुज्ञयैवाधिकारः।

नारी खल्वननुज्ञाता भर्त्रा पित्रा सुतेन वा।
विफलं तद्भवेत्तस्या यत् करोत्यौर्ध्वदेहिकम्॥

[स्त्रीशूद्रबालादीनां प्रायश्चित्ताधिकार-विचारः]

इत्यादित्यपुराणादिति केचित्। परे तु प्राय-श्चित्तस्य नैमित्तिकत्वेनावश्यम्भावादनुज्ञां वि-नाप्यधिकार इत्याहुः। पित्रेति कन्यात्वे, भर्त्रेति सौभाग्यदशायाम्। सुतेनेति वैधव्यदशायाम्। और्ध्वदेहिकं व्रतादीति हेमाद्रिः। ननु यथान्धादेराज्यावेक्षणाद्यसम्भवाद्दर्श-पूर्णमासादावनधिकारस्तथा स्त्रीशूद्रादीनामप्यविद्यत्वाद्वेदमन्त्र-घटिते प्रायश्चित्तेऽपशूद्राधिकरणन्यायेनानधिकार इति चेन्न, दर्श-पूर्णमासादौ न्यायापवादकशूद्राधिकारप्रतिपादकवाक्याभावादन-धिकारो युक्तः। प्रायश्चित्ते त्वाहत्य स्त्रीशूद्रादीनां निषादेष्टिवदधि-कारस्मृतेर्युक्तोऽधिकारः। तथाच याज्ञवल्क्यः—शूद्रोऽधिकारहीनो-ऽपि कालेनानेन शुद्ध्यति—इत्यधिकारहीनः कालेन प्रायश्चित्ता-धिकरणभूतेन। शूद्रोक्तिः स्त्रीणां प्रतिलोमानां चोपलक्षिका। "वदन्ति केचिद्विद्वांसः स्त्रीणां शूद्रसमानताम्" इति सूतसंहितोक्तेः। "शूद्राणान्तु सधर्माणः सर्वेऽपध्वंसजाः स्मृताः" इति स्मृतेश्च स्त्रीणां प्रतिलोमानां च शूद्रसधर्मत्वात्। यद्यपि शूद्रादेर्वेदमन्त्रजपे नाधिकारस्तथापि नमस्कारोऽस्य मन्त्र इति स्मृतेर्नमस्कारमन्त्रजपो

भवत्येवेति केचित्। नमस्कारोऽस्येति स्मृते नमस्कारेण मन्त्रेण पञ्चयज्ञान्न हापयेदिति याज्ञवल्क्योक्तेन पञ्चयज्ञमात्रविषयत्वेनोपसंहारात् जपाद्यङ्गरहितमेव भवतीत्यपरे। वयन्तु—यथा दाशमिके हिरण्यगर्भाधिकरणे उक्तं 'प्रकृतावुपदिष्टयोराधारयोः पूर्वोऽमन्त्रक उत्तरः कुर्यात् प्रत्यवायजिहासया, इति वार्तिकोक्तेर्ज्ञानिनोऽपि तदकरणजनितप्रत्यवायपरिहारार्थत्वेन तन्निषिद्धकर्मजनितप्रत्यवायपरिहारार्थत्वेन च युक्तमेव प्रायश्चित्तम्। न च मिथ्याज्ञानवासनारूपाधिकारिविशेषणाभावान्निषेधाप्रवृत्तिरिति वाच्यम्। वासनाया अधिकारिविशेषणत्वे प्रमाणाभावादिति चेन्न, ज्ञानिनोऽप्युत्पन्नपापस्योत्तरोत्तरज्ञानेनैव नाशान्न प्रायश्चित्तेन प्रयोजनम्। वार्तिकन्त्वनुत्पन्नज्ञानविषयम्, मोक्षार्थीत्युपादानात्, नतूत्पन्नज्ञानविषयम्। अत्र ब्रह्मचारिणो द्विगुणयोक्तिः षोडशवर्षादूर्ध्वम्। ततः पूर्वन्त्वाहाङ्गिराः—अशीतिर्यस्य वर्षाणि बालो वाऽप्यूनषोडशः। प्रायश्चित्तार्धमर्हन्ति स्त्रियो रोगिण एव च। तथाऽऽदिपर्वणि—आचतुर्दशकाद्वर्षान्न भविष्यति पातकम्। परतः कुर्वतामेवं दोष एव भविष्यति। तथा पुनरङ्गिराः—अर्वाग्घि द्वादशान् वर्षानशीतेरूर्ध्वमेव च। अर्धमेव भवेत्पुंसां तुरीयं तत्र योषिताम्॥ इति। अत्र षोडशचतुर्दशद्वादशविधयो न दीक्षितस्यान्नमश्नीयादिति निषिद्धे दीक्षितान्नभोजने "अग्नीषोमीये संस्थिते यजमानस्य गृहेऽशितव्यमथाहुरशितव्यमेव" हुतायां वपायां क्रीतराजको भोज्यान्नः" इत्यवधित्रयवच्छक्ताशक्तविषयाः। तत्रापि द्वादशादर्वागित्यधमगुणवद्बालविषयम्।

यत्तु विष्णुः—स्त्रीणामर्धं प्रदातव्यं वृद्धानां रोगिणां तथा।
पादो बालेषु दातव्यः सर्वपापेष्वयं विधिरिति॥

तदुपनयनादर्वाग्ज्ञेयम् । प्रागुपनयनादित्युपनीतानुपनीताव-स्थयोर्वैषम्यदर्शनात् । ऊनैकादशवर्षस्य बालस्य प्रायश्चित्तं भ्रात्रादिः कुर्यादित्याह शङ्खः—

ऊनैकादशवर्षस्य पञ्चवर्षात्परस्य च ।
प्रायश्चित्तं चरेद् भ्राता पिता वान्यः सुहृज्जनः ॥

इति । अपरार्के तु पञ्चवर्षात्पूर्वं मद्यपाने दोषाभाव इति । तत्र च कुमारः—मद्यमूत्रपूरीषाणां भक्षणे नास्ति कश्चन । दोषस्त्वा-पञ्चमाद्वर्षादूर्ध्वं पित्रोः सुहृद्गुरोरिति । शङ्खोऽपि—अतो बालतर-स्यास्य नापराधो न पातकम् । राजदण्डो न तस्यास्ति प्रायश्चित्तं न विद्यत इत्युक्तम् । भवदेवादिस्वरसोऽप्येवम् । मिताक्षरा तु—'नित्यं मद्यं ब्राह्मणो वर्जयेत्' 'न हिंस्यात्सर्वा भूतानि' इत्येवमा-दीनामाश्रमवयोऽवस्थानैरपेक्ष्येणैव श्रूयमाणत्वात् 'सुरापाननिषेध-स्तु जात्याश्रय इति स्थितिरिति कुमारवाक्यात् ।

"अनुपेतस्तु यो बालो मद्यं मोहात्पिबेद्यदि ।
तस्य कृच्छ्रत्रयं कुर्यान्माता भ्राता तथा पिता ॥

इति विज्ञानेश्वरोदाहृतवाक्याच्च । कुमारशङ्खवाक्ये तु सम्पूर्णश्चित्ताभावपरे । यत्तु गौतमः—प्रागुपनयात्कामचारकाम-वादकामभक्षया इति ॥

जातमात्रः शिशुस्तावद्यावदष्टौ समा वयः ।
स हि गर्भसमो ज्ञेयो व्यक्तिमात्रप्रदर्शितः ॥
......तथापेये वाच्यावाच्ये तथानृते ।
तस्मिन्काले न दोषः स्यात्स यावन्नोपनीयते ॥ इति ।

तन्मद्येतरविषयम्—इत्याह । यत्तु शूलपाणिः—पादविधि-रयमूनैकादशवर्षपञ्चवर्षाधिकविषयः । ऊनैकादशवर्षस्येति वा-

कुर्यात्—इत्याह । तन्मन्दम् । नहीदं वाक्यं पादविषयं न वा तद्व्यवस्थापकम्, किन्तु यथा प्राप्तप्रायश्चित्तानुवादेन कर्तृमात्र-व्यवस्थापकमिति । एवञ्च पञ्चवर्षन्यूनस्यापि प्रायश्चित्तं पित्रा-दिरेव कुर्यात् । पुत्रानुत्पाद्य संस्कृत्य वेदमध्याप्य वृत्तिं विदध्या-दिति तस्यैव पुत्रहितकरणेऽधिकृतत्वात्तत्स्थानापन्नत्वाच्च भ्रात्रा-दिरिति । इदं वार्द्धादि द्वादशाब्दादिमौलिकापेक्षया ज्ञेयम् । ब्रह्महा द्वादशाब्दानीत्यादिसामान्यविधीनां पर्षद्या ब्राह्मणानामिति वचनेन वाक्यान्तरोपदिष्टपर्षदो ब्राह्मणपरत्वेनोपसंहारपूर्वकं पर्ष-द्वच्च व्रतं चरेदित्यनेनोपदिष्टमौलिकद्वादशाब्दादिप्रायश्चित्ता-नामपि ब्राह्मणपरत्वेनातिदेशरूपेणोपसंहारात् । एतानि च द्वादशवार्षिकादिधनदानपर्यन्तानि ब्राह्मणस्यैवेति वदतो विज्ञाने-श्वरस्याप्ययमेवाशयो लक्ष्यते । एवञ्च क्षत्रियादिनिमित्तकद्वैगु-ण्यादिविधीनां स्त्रीबालरोग्यादिनिमित्तकार्द्धादिविधीनाञ्च परस्प-रानपेक्षया मौलिकद्वादशाब्दादिविधिमपेक्ष्य युगपदेव प्रवृत्तिः । तथा च न क्षत्रियादिनिमित्तकद्वैगुण्यादिविध्युत्तरकालं स्त्रीबालरो-ग्यादिनिमित्तकार्धादिविधिप्रवृत्तिः । येन क्षत्रियादेर्द्वैगुण्यापेक्षयै-वार्धाद्यवगतिः स्यात् । तस्मान्मौलिकद्वादशाब्दादेरेव क्षत्रियादे-र्द्वैगुण्यादिकं स्त्रीबालादेरपि तस्यैवार्धादिविधिः । शक्त्यनुसारान्न्यू-नत्वं कल्प्यम् । तथा क्षत्रियादेर्द्वैगुण्यादिविधेर्ब्रह्मचारिद्वैगुण्यादि-विधेश्च परस्परमनपेक्ष्य मौलिकद्वादशाब्दादिविधिमुपजीव्य युग-पत्प्रवृत्ते न क्षत्रियब्रह्मचारिणः क्षत्रियत्वनिमित्तकद्वैगुण्याद्यपे-क्षया द्विगुणमष्टाचत्वारिंशदब्दं भवति, न वा वैश्यब्रह्मचारिणो वैश्यत्वनिमित्तकत्रैगुण्यापेक्षया द्विगुणं द्विसप्तत्यब्दं भवति । अत्र च स्त्रीत्वबालत्वादिप्रयुक्तार्धादिविधेरशक्तिनिबन्धना यत्रार्द्धादि

प्रयोजकनिमित्तद्वयत्रयसंनिपातस्तत्रार्धापेक्षयाऽर्धादि च। क्षत्रियवैश्यब्रह्मचारिणोर्मौलिकद्वादशाब्दात् द्विगुणम्। ब्राह्मणब्रह्मचारिणा तुल्यमेव भवति। अन्यथा वैश्यपतेर्ज्ञानतो ब्रह्मवधे द्वादशोनशतत्रयाब्दप्रवृत्तेः। क्षत्रियपतेश्चाष्टोनशतद्वयाब्दप्रवृत्तेस्तद्विधीनामननुष्ठानलक्षणाप्रमाण्यप्रसङ्गात्। ननु भवन्मतेऽपि शूद्रस्य बुद्धिपूर्वं विप्रवधादौ षोडशवर्षादूर्ध्वं षण्णवत्यब्दप्रवृत्तेस्तावत आयुषोऽसम्भावात्तद्विधेरप्यप्रामाण्यं स्यादिति चेन्न, साग्रं वर्षशतं जीवेति श्रुतेः सपादवर्षशतसम्भवात्। इदानीं लोके उपलम्भाच्च। या तु शतायुर्वै पुरुष इति श्रुतिः, साऽवयुत्यानुवादः। अनुग्राहकादीनामपि मौलिकमेव पादोनादिकम्। यत्तु विज्ञानेश्वरः—यस्मिन् साक्षात् कर्ता यः प्रयोजकत्वमापन्नस्तस्यैवार्धादि कार्यमित्यादि, तन्न, विप्रादीनां ब्रह्मवधादौ शूद्रादीनां साक्षात्कर्तॄणामनुग्रहे षट्त्रिंशदब्दमितं साक्षात्कर्तृत्वे द्वादशाब्दादीत्यनौचित्यप्रसङ्गात्। केचित्तु स्वस्य साक्षात्कर्तृत्वे यत्प्राप्तं तदपेक्षयाऽनुग्रहे पादन्यूनमित्याहुः, तदपि न, ब्रह्मवधे विप्रानुग्राहकशूद्रस्य षट्त्रिंशदब्दमितं साक्षात्कर्तुर्विप्रस्य द्वादशाब्दमित्यनौचित्यप्रसङ्गात्, शूद्रकर्तृकवेदाध्यापनादौ विप्रस्यानुग्राहकत्वे प्रायश्चित्ताभावप्रसङ्गाच्च। इति प्रायश्चित्ततारतम्यम्।

प्रायश्चित्तकर्तृत्वादिविचारः

अथ साक्षात्कर्त्रादीन्निरूपयितुं साधारणं कर्तृलक्षणमुच्यते। तत्र स्वतन्त्रः कर्ता, तत्प्रयोजको हेतुश्च, इति सूत्रद्वयतात्पर्यमभिप्रेत्याहुर्भट्टाचार्याः-यद्व्यापारं धातुः प्राधान्येनाह स कर्ता। ग्रामं गच्छतीत्यत्र ग्रामादिप्राप्त्यवच्छिन्नकर्मणो गमनत्वादुपसर्जनतयोक्तायाः प्राप्तेर्ग्रामव्यापारत्वाद् ग्रामस्य कर्तृत्वप्रसक्तौ तन्निवृत्त्यर्थं प्राधान्येनेति। यद्वा यद्व्यापारं तिङ्-

प्रत्ययः प्राधान्येनाह स कर्ता। ओदनं पचतीत्यत्र स्वर्गभावनयेव प्रयाजादिभावनानामोदनभावनया ज्वलनादिभावनानामप्युपसर्जनतयोपादानात् तद्गतां काष्ठानां कर्तृत्वप्रसक्तौ तद्वारणाय प्राधान्येनेति। अत्र स्वतन्त्रः कर्तेति पूर्वसूत्रं साक्षात्कर्तारमाह। द्वितीयन्तु प्रयोजककर्तारम्। स च कर्त्रन्तरव्यवहितः कर्ता। हरिणा तु स्वतन्त्रकर्तृ लक्षणमन्यथोक्तम्।

प्रवृत्तौ वा निवृत्तौ वा कारकाणां य ईश्वरः।
अप्रयुक्तः प्रयुक्तो वा स कर्ता नाम कारकम्॥

भवदेवोऽपि—क्रियासिध्यनुकूलेतरकारकप्रयोजकत्वमाह। हिंसायान्तु साक्षात्कर्ता यद्व्यापारसमनन्तरं कालान्तरे वा कारणान्तरनिरपेक्षः प्राणवियोगो भवति स उच्यते। प्रयोजयित्रनुमन्त्रोहिंसादिनिषिद्धक्रियाफलमाहापस्तम्बः—प्रयोजयिताऽनुमन्ता कर्ता चेति स्वर्गनरकफलेषु कर्मसु भागिन इति। एतदन्येषामप्युलक्षणाम्। यथा पैठीनसिः—

हन्ता मन्तोपदेष्टा च तथा सम्प्रतिपादकः।
प्रोत्साहकः सहायश्च तथा मार्गानुदेशकः॥
आश्रा यः शस्त्रदाता च भक्तदाता विकर्मिणाम्।
उपेक्षकः शक्तिमांश्च दोषवक्तानुमोदकः॥
अकार्यकारिणस्तेषां प्रायश्चित्तं प्रकल्पयेत्॥

अपरार्के तु विकर्मिणामित्यस्याग्रे—

युद्धोपदेशकश्चैव तद्विनाशप्रदर्शकः।
उपेक्षाकार्ययुक्तश्च दोषवक्ताऽनुमोदकः॥
अनिषेद्धा क्षमो यस्तु सर्वे तत्कार्यकारिणः।

इति पाठ उक्तः। हन्ता साक्षाद्धन्ता। मन्ताऽनुमन्ता। प्रवृत्त-

प्रवर्तकः । उपदेष्टेत्याज्ञापयितृभ्यर्थयित्रोरप्युपलक्षणम् । तत्राज्ञापयिता स्वयमुच्चः सन्नीचं भृत्यादिकं यः प्रेरयति इदं कुर्विति । नन्वत्र भृत्यस्य स्वामिहस्तादिस्थलीयत्वादृत्विगादिवन्न फलसम्बन्धो युक्तः, किन्त्वाज्ञापयितुरेवेति चेन्न ; पुण्यफले हि कामनाधिकारिविशेषणम् । अतश्च तद्वत एवाधिकारः । "शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात्तस्मात्स्वयं प्रयोगे स्यादिति" न्यायात् । ऋत्विगादीनान्तु दक्षिणाद्यर्थं प्रवृत्तत्वात्कामनाऽभावाच्च न क्रतुफलसम्बन्धः । निषिद्धे तु प्रवृत्तमात्रस्यैवाधिकारित्वम् । अतः सर्वेषामपि प्रयोजकसाक्षात्कर्त्रादीनां फलसम्बन्धो युक्तः । अभ्यर्थयमानस्तु यः प्रार्थनादिनोच्चं प्रवर्तयति । उपदेष्टा पुनस्त्वं शत्रुमित्थं व्यापादयेति मर्मोद्घाटनाद्युपदेशपुरःसरं प्रेरयति । सोऽयं त्रिविधोऽप्यप्रवृत्तप्रवर्तकत्वात्प्रयोजक उपदेष्टृपदेन संगृहीतः । सम्प्रतिपादकोऽनुग्राहकः । स च यः पलायमानममित्रमुपरुन्धनपरेभ्यश्च हन्तारं रक्षन् हन्तुर्दृढिमानं जनयन्नुपकरोति । अत्र हन्यमानोपरोधहन्तृरक्षणयोश्च प्रत्येकमपि दोषहेतुत्वम् । अस्य च हिंसाफलसम्बन्धमाह मनुः—

बहूनामेककार्याणां सर्वेषां शस्त्रधारिणाम् ।
यद्येको घातयेत्तत्र सर्वे तद्घातकाः स्मृताः ॥

इति । कैश्चिददोषघ्नन्ताऽप्यनुग्राहक उक्तः । प्रोत्साहकोऽर्थवादवत्साहकः । सहायो यो मरणाद्युद्देशेन शस्त्राद्यगृहीत्वा सह केवलं गच्छति । अनुमोदको यो हन्तुर्हर्षमनुमोदते हृष्यति । इतरे प्रसिद्धाः । अत्र भक्तग्रहणमौषधस्नेहाद्युपलक्षणम् । एते च निषिद्धक्रियोद्देशे सत्येव दोषभाजः । अन्यथा हन्तुर्धर्मार्थभक्त-

दातुरपि दोषप्रसङ्गात्। न चेष्टापत्तिः। क्रियमाणोपकारे तु मृते पातकमिति याज्ञवल्कीये—

औषधं स्नेहमाहारं दद्द्गोब्राह्मणो द्विजः।
दीयमाने विपत्तिः स्यान्न स पापेन लिप्यते॥

तथा—दाहच्छेदशिराभेदप्रयोगैरुपकुर्वताम्।
द्विजानां गोहितार्थन्तु प्रायश्चित्तं न विद्यते॥

इति विज्ञानेश्वरोदाहृतवाक्ययोः।

कूपखाते च धर्मार्थे गृहदाहे च या मृताः।
ग्रामदाहे तथा घोरे प्रायश्चित्तं न विद्यते॥

इति पराशरवाक्ये च।

औषधं स्नेहमाहारं दद्द्गोब्राह्मणेषु च।
प्राणिनां च प्रवृत्यर्थं प्रायश्चित्तं न विद्यते॥

इति संवर्तवाक्ये चाधर्मजनकीभूतायामप्युपकारधर्मार्थक्रियमाणायां क्रियायां दोषाभावोक्तेस्तत्तुल्यन्यायतयाऽत्रापि दोषाभावस्योचितत्वात्। अपरादिष्वप्येवमेव। औषधदाने विशेषमाह मदनरत्नेऽङ्गिराः—

औषधे तु न दोषोऽस्ति स्वेच्छया तु पिबेद्यदि।
अन्यथा दीयमाने तु प्रायश्चित्ती न संशयः॥ इति॥

उद्दिष्टमरणफलकमन्यूत्पादने दोषमाह विष्णुः—

आक्रुष्टस्ताडितो वापि धनैर्वा विप्रयोजितः।
यमुद्दिश्य त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्॥

तथा—ज्ञातिमित्रकलत्रार्थं सुहृत्क्षेत्रार्थमेव च। उत्तरार्धं तदेव। उद्देशस्तु न शब्दैकगम्य एव। लिखनाद्यनुमितेऽप्युद्देशे दोषसत्त्वात्। अयं वाऽऽक्रोशादिनिमित्तीत्युच्यते इति निबन्धकृतः।

तथा च निमित्ती पादमादध्यादिति पादप्रायश्चित्तमेतस्यैव भवति। या तु "सम्बन्धेन विना (देव) शुष्कवादेन कोपितः" इति भविष्ये वार्षिकप्रायश्चित्तोक्तिः, सा परिहासकृताक्रोशनिमित्तपरा। यत्तु शूलपाणिः—शुष्कवादेन कोपित इत्यभिधानात्केवलं वाक्कृतसम्बन्धपरेत्याह। तत्तुच्छम्। आक्रोशादीनि हि वधजन्यदोषे निमित्तानि। तेषाञ्च साहित्यमविवक्षितम्। अतः केवलेनाप्याक्रोशेन भवत्येव त्रैवार्षिकं निमित्युपदिष्टं सम्पूर्णं प्रायश्चित्तमिति दिक्। निमित्तिनश्च मरणोद्देशं विनाऽप्याक्रोशेन गते मृते च विप्रादौ दोषोऽस्त्येव। उद्देशे तु कामकृतत्वाद् द्विगुणः। पैठीनस्युक्तेषु त्रयोदशस्वेव धर्मार्थं क्रियमाणायां क्रियायां दोषाभावोक्तेः। ननु कृतेऽप्याक्रोशनादौ मन्यूत्पत्त्यदर्शनादाक्रोशादेरनिमित्ततेति चेन्न; नरस्वभाववैचित्र्यात्, एकतरेणापि निमित्तेन जातमन्यवो भवन्ति; तेषु निमित्तदर्शनात्। एते च सर्वे स्वार्थपरार्थप्रवृत्तत्वेन द्विविधाः। यत्तु जिनकः—प्रयोजयिताऽनुमन्ता कर्ता चेति स्वर्गनरकफलेषु कर्मसु भागिन इत्यापस्तम्बोक्तं त्रीनेव भेदानाह, यदपि भवदेवः शूलपाणिश्च—अनुग्राहकनिमित्तवाक्ये अप्युपन्यस्य पञ्चैव भेदानाह, तदेतच्चिन्त्यम्; पूर्वोक्तपैठीनसिवाक्यात्। यदि तु कथञ्चित्स्वेच्छाकल्पितलक्षणैः क्वचित्केषाञ्चिदन्तर्भाव इष्यते, तथा सति यथाकथञ्चिदैकध्यद्वैविध्याद्यपि शक्यं वक्तुम्। तस्मात् स्मृतिकारैर्पर्यायशब्दैर्ये परिगणितास्ते सर्वेऽपि निषिद्धक्रियाफलभाजः। क्वचिन्निमित्तताप्रयुक्तदोषापवादमाह मदनपारिजाते सुमन्तुः—

> असम्बन्धेन यः कश्चिद् द्विजः प्राणान्समुत्सृजेत्।
> तस्यैव तद्भवेत्पापं न तु पापं प्रकीर्तयेत्॥

तथा भविष्ये—पुत्रः शिष्यस्तथा भार्या शासतश्चेत्प्रणश्यति।
न शास्ता तत्र दोषेण लिप्यते देवसत्तम॥
इदञ्च—पुत्रः शिष्यस्तथा भार्या दासी दासस्तु पञ्चमः।
प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा॥
पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कदाचन।
अतोऽन्यथा तु प्रहरंश्चोरस्याप्नोति किल्बिषम्॥

इति मनूक्तेरभ्यनुज्ञातशासनपरम्। अनभ्यनुज्ञातत्वे त्वस्येव दोषः। तथा च विष्णुः—

उद्दिश्य कुपितो हत्वा तोषितः श्रावयेत्पुनः।
तस्मिन् मृते न दोषोऽस्ति द्वयोरुच्छ्रावणे कृते॥

तोषितो निमित्तिना; तस्यैव दोषाभाववक्त्रेनोपस्थितत्वात्। हत्वा द्वयोरुच्छ्रावणे कृत इति सम्बन्धः। द्वयोरिति त्र्यादीनामप्युपलक्षणम्। भट्टविश्वेश्वरस्तु—उच्छ्रावणेऽन्यस्य कस्यचित्कृते द्वयोर्न दोषोऽस्तीति सम्बन्धं कृत्वाऽऽत्मघातकाक्रोशकयोर्दोषाभावमाह। अपवादान्तरमाह बृहस्पतिः—

आक्रुष्टस्तु यदाक्रोशंस्ताडितः प्रतिताडयन्।
हत्वाऽऽततायिनं चैव नाततायी भवेन्नरः। इति।

व्याघ्रादिविशिष्टकान्तारादौ सम्भावितमरणे देशे शिष्यान् प्रेषयितुर्गुर्वादेर्दोषमाह याज्ञवल्क्यः—

कृच्छ्रत्रयं गुरुः कुर्यान्म्रियते प्रहितो यदीति। साक्षात्कर्त्रनुमन्त्रादयः। अथैतेषाम्प्रायश्चित्तकल्पनम्। तत्र सम्प्रतिपादकाख्यानुग्राहकस्य पलायमानामित्रोपरुन्धनादौ व्यापारबाहुल्यान्मौलिकमेव पादोनम्। उच्चमभ्यर्थयिता, सममुपदेष्टा, नीचमाज्ञापयितेति त्रिविधः प्रयोजकः। तस्य साक्षाद्धन्तृप्रवृत्तिमात्रजनकत्वेना-

नुग्राहकाद्यत्रहितत्वादर्धोनम् । अनुमन्तुः प्रवृत्तप्रवर्तकत्वेनाप्रवृत्त-प्रवर्तकोत्प्रयोजकादल्पव्यापारत्वेन सार्धपादमितम् । निमित्तिनस्तु त्रैवार्षिकम् । तथा च सुमन्तुः—

तिरस्कृतो यदा विप्रो हत्वात्मानं मृतो यदि ।
निर्गुणात्सहसा क्रोधाद् गृहक्षेत्रादिकारणात् ॥
त्रैवार्षिकं व्रतं कुर्यात्प्रतिलोमां सरस्वतीम् ।
गच्छेद्वापि विशुद्ध्यर्थं तत्पापस्येति निश्चितम् ॥

त्रैवार्षिकं प्रकृत्य भविष्ये—

तिरस्कृतो यदा विप्रो निर्गुणो म्रियतेऽनघ ।
सनिमित्तं यदा विप्रस्तदैवं शुद्धये चरेत् ॥
त्रैवार्षिकं ब्रह्मचर्यं कृत्वा शुद्ध्येत विप्रहा ॥

एवं यत्र यत्र व्यापारन्यूनाधिकभावस्तत्र सर्वत्र दोषन्यूनाधिकभावेन प्रायश्चित्तन्यूनाधिकभाव एष्टव्यः । अनेनैव न्यायेन प्रोत्साहकसहायानुग्राहकादीनामपि । येऽनुग्राहकादयस्तेषामपि प्रत्यासत्तितारतम्याद्दोषतारतम्येन प्रायश्चित्ततारतम्यमेष्टव्यम् । प्रयोजयिता अनुमन्ता कर्ता चेति स्वर्गनरकफलेषु कर्मसु भागिनः, यो भूय आरभते, तस्मिन् फलविशेष इत्यापस्तम्बोक्तेः । प्रयोजकविशेषेण पादोनार्धादिरूपे यत्ताविशेषे तु ग्रन्थकारलिखनमेव मानम् । यत्तु शूलपाणिः—

अनुमन्तुर्निमित्तिन इव त्रैवार्षिकमित्याह । तन्मन्दम्; अनुमन्तुर्मरणानुसन्धानेन प्रत्यासत्तेः । निमित्तिनस्तु तदभावादिति । यत्तु मनुः—हन्ता मन्तोपदेष्टा च विशस्ता क्रयविक्रयी । संस्कर्ता चोपहर्ता च खादकश्चाष्टघातकाः—इति । तत्र विशस्त्रादिपश्चानां हिंसोत्तरकालप्रवृत्तत्वादुक्तेभ्यः सर्वेभ्योऽपि न्यूनो दोषः

प्रायश्चित्तञ्च। घातकशब्दस्तु प्राणभृदादिवल्लिङ्गसमवायाद् गौण इति। यत्तु शूलपाणिना—चरे ? तमहत्वापि घातार्थं चेत्समाहितः—इत्यस्यानुग्राहकत्वमुक्तम्। तदतितुच्छम्; तस्य हिंसाफलसम्बन्धाभावात्। किन्तु मरणोद्देश्यकशस्त्रप्रहारादिव्यापारसमवायमात्रेण स्वातन्त्र्येणैव वचनाद्दोषः प्रायश्चित्तञ्च। क्वचित्तु साक्षाद्धिंसाकर्तृत्वेऽपि दोषापवादमाह बृहस्पतिः—नाततायिवधे हन्ता किल्बिषं शक्नुयात्क्वचित्। विनाशार्थिनमायान्तं घातयन्नापराध्नुयादिति। अत्र किल्बिषापराधाभावौ यथाक्रमं प्रायश्चित्तदण्डनिषेधार्थौ। एतच्च 'सर्वत आत्मानं गोपायेदिति' श्रुतेः सर्वथा पलायमानेऽप्यात्मरक्षणासम्भवे बोद्धव्यम्। आततायिनश्चाह वसिष्ठः—अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः। क्षेत्रदारापहारी च षडेते ह्याततायिनः। भवदेवीये त्विदं मानवीयत्वेनोक्तम्। शस्त्रपाणिर्हन्तुमुद्यतशस्त्रः। क्षेत्रपदं शासनस्याप्युपलक्षकम्। अत्र यावद्प्रहारे जीवनच्छेदो भवति, स एवाततायिताप्रयोजकः, अपरार्के व्यासः कल्पतरौ विष्णुकात्यायनौ—उद्यतासिं विषाग्निं च शापोद्यतकरं तथा। आथर्वणेन हन्तारं पिशुनं चैव राजसु। भार्यातिक्रमिणं चैव विद्यात्सप्ताततायिनः। यशोवित्तहराणाहुरन्यान् धर्मार्थहारकान्॥ तथा मात्स्ये—गृहक्षेत्रादिहन्तारं तथा पत्न्यभिगामिनम्। अग्निदं गरदं चैव तथा चाप्युद्यतायुधम्॥ अभिचारन्तु कुर्वाणं राजगामि च पैशुनम्। एते हि कथिता लोके धर्मज्ञैराततायिनः॥ तथा भवदेवीये वृद्धवसिष्ठः—उद्यताग्निः प्रियाधर्षी धनहर्ता गरप्रदः। अथर्वहन्ता तेजोघ्नः षडेते आततायिनः॥ अथर्ववेदोक्ताभिचारादिना हन्ता अथर्वहन्तेति। विनैव कारणं असद्दोषारोपणनिर्भर्त्सनेनाप्रतिभाकरस्तेजोघ्न इति। मर्यादिद्दानादिना

ब्राह्मादितेजोनाशको वा। विशेषमाह कात्यायनः—अनाचारितपूर्वो
त्कस्यापराधे प्रवर्तते। प्राणद्रव्यापहारे च प्रवृत्तस्याततायितेति।
अनाचारितोऽनपकृतः। तेन पूर्वकृतापराधस्य नाततायितेति तद्वधे
भवत्येव दोषः। अयं चाऽऽततायिवधे दोषाभावो गोब्राह्मणातता-
यिव्यतिरिक्तविषयः। तथा च सुमन्तुः—नाततायिवधे दोषोऽन्यत्र
गोब्राह्मणादिति। अयञ्च पाठोऽपरार्कविज्ञानेश्वरप्रभृतीनां सम्म-
तः। कल्पतरुस्तु सुमन्तुरित्युक्त्वा 'आततायिन्यदोषोऽन्यत्र गोब्रा-
ह्मणात्' यदा हनेत्, प्रायश्चित्तं न स्यात्. इति पाठं लिखित्वा प्राय-
श्चित्तं न स्याद्गोविप्रातिरिक्तवधे इति व्याख्यातवान्। इदं च वचः
सर्वयुगसाधारणमिति केचित्। वयन्तु "आततायिद्विजाग्र्याणां
धर्मयुद्धेन हिंसनम् ?" इति कलिनिषिद्धपतितेनोपसंहारात्कलावेव
विप्रवधे दोषोक्त्यर्थम्। अन्यदा त्वेतयोर्वधे नास्त्येव दोष इति
प्रतीमः। प्रायश्चित्तविवेके संवर्तः—आततायिवधे न दोषोऽन्यत्र
गोब्राह्मणाद्यदा हन्यात्तदा प्रायश्चित्तं कुर्यादिति। प्रायश्चित्तं कुर्या-
द्गोविप्रवधे इत्यर्थः। यत्तु भवदेवेनोक्तम्—विप्राततायिवधेऽप्यदो-
ष इति। यत्तु 'आततायिवधे न दोषोऽन्यत्र गोब्राह्मणात्स्नातः
प्रायश्चित्तं कुर्यात्' इति सुमन्तुवचः, तदप्येवं त्रेधा वाक्यभेदेन
व्याख्यातम्। तद्यथा—ब्रह्मवधसंसर्गप्रायश्चित्तमुक्त्वैतस्याभि-
धानादाततायिवधे न इत्येतत्सूत्रं पूर्वोक्तप्रायश्चित्तनिषेधकम्, दोषो-
ऽन्यत्रेति चाततायिव्यतिरिक्तवधे दोषप्रतिपादकम्। गोब्राह्मणा-
त्स्नातः प्रायश्चित्तं कुर्यादिति च प्रायश्चित्ताङ्गस्नानप्रतिपादकम्।
गोहेतुकं स्नानं व्यासेनोक्तम्—श्रूयन्ते यानि तीर्थानि त्रिषु लोकेषु
नित्यशः। अभिषेकः समस्तेषां गवां शृङ्गोदकस्य त्विति। ब्रा-
ह्मणशब्देनात्र स्नानविधिवाक्यमपेक्षितं तद्धेतुकं स्नानम्। यथा

विहिताद्यमर्षणादिप्रवर्तकम्। तेन गोहेतुकं स्नातो ब्राह्मणहेतुकं च स्नातः प्रायश्चित्ताधिकारी भवति, न त्वाप्लवनमात्रेणेति वाक्यार्थः—इति। तन्मन्दम्; इह हि यद्यपि स्नातः प्रायश्चित्तं कुर्यादिति वाक्यशेषः कल्पतर्वादावदृष्टोऽपि साकरस्तथापि वाक्यत्रयमन्तरेणानुपपत्तौ स्यादपि वाक्यभेदायम्। इह तु "यजतिषु ये यजामहं करोति नानुयाजेष्व" तिवत्पर्युदासाश्रयणेन गोब्राह्मणव्यतिरिक्ताततायिवधे न दोषः इत्येवमेकवाक्यत्वमेव ब्राह्मणादित्यन्तस्य युक्तम्। अतो न गोब्राह्मणयोः स्नानविशेषणत्वम्। न वा ब्राह्मणपदस्य जातिवाचिगोपदसमभिव्याहृतस्य प्रसिद्धं जातिवाचित्वं हित्वा विधिकाण्डवाचित्वं युक्तम्। स्नात इत्यादेस्तु यद्यपि प्रायश्चित्ताङ्ग स्नानविधायित्वम्, तथापि—सर्वेषु पापेषु सर्वेषां व्रतानां विधिपूर्वकम्। ग्रहणं सम्प्रवक्ष्यामि प्रायश्चित्ते चिकीर्षिते। दिनान्ते नखरोमादीन् प्रवाप्य (स्नानमाचरेदिति) स्नानविधायित्वमेवास्य युक्तम्; एकमूलकल्पनालाघवात्। न तु मूलान्तरकल्पनागौरवग्रस्तं स्नानान्तरविधायित्वं न्याय्यमिति। भविष्यपुराणेऽपि ब्राह्मणरूपाततायिवधे दोष उक्तः—हत्वा तु प्रहरन्तं वै ब्राह्मणं वेदपारगम्। कामतश्चेच्चरेद्वीर द्वादशाब्दाख्यमुत्तममिति। यत्त्वस्याप्यन्यथा व्याख्यानं कृतं भवदेवेन—इदमपि नाततायिविषयम्; प्रहारशब्दस्य वधानभिधायकत्वात्। तेनायमर्थः, यो हि चक्षुराद्यवयवानां प्रकर्षेण हनने प्रवृत्तस्तद्वधे कामतोऽपि द्वादशवार्षिकमेव प्रायश्चित्तमिति। तदपि मन्दम्; प्रहरन्तमित्यनेन रूढ्या वधोद्यतस्य शस्त्रपाण्यादेः प्रहारकर्तुरभिधातुं शक्यत्वेन रूढ्या योगबाधाच्चक्षुरादिपदाध्याहारे मानाभावाच्चेति। यदपि कात्यायनः आततायिनि चोत्कृष्टे तपःस्वाध्यायजन्मतः। वधस्तत्र तु नैव स्या-

त्पापे हीने वधो भवेत् ॥ वचो भृगुरिति क्वचित्पाठः । तत्रापि जन्मतपःस्वाध्यायैर्ब्राह्मण्यमेवोपलक्ष्यते । तेषां ब्राह्मण्योपलक्षकत्वं व्यासेन स्मृतम् । यत्त्वत्र शूलपाणिः—जन्मशब्देन जातिः कुलञ्चोच्यते । तेन यो यदपेक्षया जन्मतपःस्वाध्यायैरुत्कृष्टस्तस्याततायिनोऽपि वधे दोष एवेति । तदनेनैवापास्तम्, मूलान्तरकल्पनागौरवप्रसङ्गाच्च । पापमेवाश्रयेदितिवचनाच्च बुद्धिपूर्वके तु व्रतस्यैव द्वैगुण्यम् । व्रतन्तु पादोनमिति विज्ञानेश्वरादयः । सर्वत्रातिदेशिके पादोनमिति तैः परिभाषितत्वात् । अत्र फलोपहितत्वं नरान्तरव्यापारमद्वारीकृत्य मरणजनकत्वम् । तेन व्रणपाकपरम्परामृतेऽपि अयमेव दोषः ।

अथ कामाकामकृतप्रायश्चित्तव्यवस्था

तत्र याज्ञवल्क्यः—प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत् । कामतो व्यवहार्यस्तु वचनादिह जायते ॥ अत्र पूर्वार्धेऽज्ञानपदोपादानात्तत्प्रतियोगितया ज्ञानपदे उपादातव्ये कामपदोपादानं कृतम्, तेन ज्ञानकामयोस्तुल्यफलत्वम् । एवमज्ञानाकामयोरपि । विहितं यदकामानां कामात्तत् द्विगुणं भवेत् । तथा—म्लेच्छैर्वाऽधिगतः शूद्रस्त्वज्ञानात्तु कथञ्चन । कृच्छ्रत्रयं प्रकुर्वीत ज्ञानात्तु द्विगुणं भवेदित्यादिवचनेषु ज्ञानकामनयोरज्ञानाकामनयोश्च तुल्यप्रायश्चित्तोक्त्या तुल्यफलत्वावगमात् । किञ्च बलात्प्रवर्त्यमानस्य यद्यपि ज्ञानमस्ति, न कामना, तथाप्यत्र सतोऽपि ज्ञानस्य प्रवृत्तिहेतुत्वाभावेनासत्कल्पत्वात्स्वतन्त्रप्रवृत्तिजनने ज्ञानकामनयोरव्यभिचार एव । एवमेव शुष्के पिपतिषोर्भ्रमात्कर्दमपतने वास्तवज्ञानाभावात्तद्विषयाऽपि कामनाऽसत्तुल्यैव । अतो न स्वतन्त्रप्रवृत्तौ ज्ञानकामनयोर्व्यभिचारः । अतश्च बुद्धिज्ञानकामाभिसन्धिशब्दानामबुध्य-

ज्ञानाकामानभिसन्धिशब्दानां चाऽभिचारात् द्विविधमेव पापं तत्प्रायश्चित्तञ्च। तदाह बृहस्पतिः—कामाकामकृतत्वेन पातकं द्विविधं स्मृतम्। पुरुषापेक्षया चैव निष्कृतिर्द्विविधा स्मृतेति वचनात्कामतोऽपि प्रायश्चित्तविधायकात्। तदाह मनुः—अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः। कामकारकृतेऽप्याहुरेके श्रुतिनिदर्शनात्।

अकामतः कृतं पापं वेदाभ्यासेन शुद्ध्यति।
कामतस्तु कृते मोहात्प्रायश्चित्तैः पृथक् पृथक्॥ इति।

श्रुतिनिदर्शनम् 'तरति मृत्युं तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेदेति। अत्र य उ वेदेत्यादेरन्याऽनर्थक्यादर्थवादत्वेऽपि 'तरति' इत्यादिः फलविधिरिष्ट एव। वेदाभ्यासेन शुद्ध्यतीति कामकृतप्रायश्चित्तापेक्षया लघुप्रायश्चित्तोपलक्षणम्॥ मोहशब्देन देवेन्द्र बुद्धिपूर्वो व्यतिक्रमः। उच्यते पण्डितैर्नित्यं पुराणे शांशपायने, इति भविष्योक्तिः। मोहो धर्मविमूढत्वमिति व्यासोक्तिश्चाकर्तव्ये कर्तव्यभ्रमपरा। तेन सत्यधर्मत्वज्ञाने पापगौरवार्थं मोहादिति पृथक् कामकारे विहितैर्द्विगुणयोदिभिः। तथा चाङ्गिराः—अकामतः कृते पापे प्रायश्चित्तं न कामतः। स्यात्त्वकामकृते यत्तद्द्विगुणं बुद्धिपूर्वके॥ मध्यमाङ्गिराः—विहितं यदकामानां कामात्तद्द्विगुणं भवेत्॥ तथाच ब्रह्महगुरुतल्पगमातापितृसम्बन्धोगस्तेननास्तिकनिन्दितकर्माभ्यासिपतितात्याग्यपतितत्यागिनः पतिताः पातकसंयोजकाश्चेति गौतमेन यत्र दोषातिशयार्थं विशेषतो व्यवहारो निषिद्धस्तत्र कामतो व्यवहार्यस्त्विति याज्ञवल्कीयेन व्यवहार्यतामात्रोक्तेर्नामुष्मिकी शुद्धिरित्युच्यते। तेन नरकादि भवत्येवेति। अन्यत्र तु 'एनस्विभिरनिर्णिक्तैर्नार्थं किञ्चित् समाचरेत्' इति मनुनाऽव्यवहार्यत्वमुक्तम्। तत्र कृतनिर्णेजनांश्चैव

न जुगुप्सेत कर्हिचित्' इति मनुना 'जुगुप्सेरन्न चाप्येनं संवसेयुश्च सर्वशः' इति याज्ञवल्क्येन च संव्यवहार्यत्वमुक्तमेव। यत्र तु कामकृते मरणान्तिकम्, तत्र तद्विध्यानर्थक्यापत्ते 'र्नास्यास्मिंल्लोके प्रत्यापत्तिर्विद्यते कल्मषन्तु निर्हरत्येवेत्यापस्तम्बोक्ते श्च पापशुद्धि-र्भवत्येव। तथाच मध्यमाङ्गिराः—

कामतस्तु महापापं नरः कुर्यात्कथञ्चन।
न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते॥

तथा—प्राणान्तिकन्तु यत्प्रोक्तं प्रायश्चितं मनीषिभिः।
तत्कामकारविषयं विज्ञेयं नात्र संशयः॥

तथा व्यासः—कामतो ब्राह्मणवधे निष्कृतिर्नास्ति जीविनः।
यस्तु सर्वं परित्यज्य यावज्जीवं चरेद् व्रतम्
स तु शुद्धः शुभांल्लोकान् विप्रो गच्छेन्न संशय इति॥

तथा चाङ्गिराः—शरीरं न दहेद्यावद् ब्रह्महा पापकृत्तमः।
तावन्न तस्य शुद्धिः स्याद्भगवान्मनुरब्रवीदिति।

तथा यमः—महापातककर्तारश्चत्वारो मतिपूर्वकम्।
अग्निं प्रविश्य शुध्यन्ति च्छित्वा वा महति क्रतौ॥

महाक्रतुरश्वमेधः। अयञ्चाश्वमेधो 'यजेत वाश्वमेधेन क्षत्रि-यस्तु महीपतिरिति, पराशरस्मृतेर्नासार्वभौमो यजेतेति प्रतिषेधाच्च सार्वभौमस्यैव। तथा चाश्वमेधस्य कामकारविषयमरणान्तिकक-ल्पत्वोक्तया समानविषयत्वावगमादश्वमेधोऽपि सार्वभौमस्य कामकारविषय एव। ननु यदि कामकृतेऽप्यस्ति प्रायश्चित्तम्, तदा अनभिसन्धिकृतेऽपराधे प्रायश्चित्तमिति वसिष्ठवचनस्य, तथा—इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजम्। कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते—इति मनुवाक्यस्य च का गतिरिति चेन्न;

आद्यस्य शुद्धिकरमित्यध्याहारेण 'प्रायश्चित्तैरपैत्येनो' इति याज्ञवल्कीयपूर्वार्धसमानविषयत्वान्न कामकृते प्रायश्चित्ताभावपरत्वम्। द्वितीये त्वियमिति सर्वनाम्ना पूर्वप्रदर्शितद्वादशवार्षिकस्यैवपरामर्शात्कामतस्तस्यैव निष्कृतिर्न विधीयत इत्यनेन प्रतिषेधो न तु प्रायश्चित्तमात्रस्य। कामतोऽपि बहुतरमरणान्तिकादिप्रायश्चित्तविधायकवाक्यविरोधात्। ननु कामकृतेऽपि प्रायश्चित्तसद्भावेन पापक्षयावश्यम्भावो वाच्यः। इतरथा तु व्यवहार्यत्वमपि न स्याद्विशेषादिति चेन्न; व्यवहार्यतामात्रोक्तिबलादेव नरकोत्पादिका व्यवहारनिरोधिका चेति पापस्य द्वे शक्ती कल्प्येते। तत्र कामकृते द्विगुणप्रायश्चित्तेन अन्यतरशक्तिनाशेऽप्यन्यतरशक्त्यविनाशो नानुपपन्नः। अकामकृते तु सर्वथा पापक्षयोऽपि भवत्येव। प्राणान्तिकप्रायश्चित्ते तु व्यवहारस्यासम्भवात् अगत्या पापक्षय इति प्रागुक्तम्। यत्तु शूलपाणिः—अज्ञानविहितेनैव प्रायश्चित्तेन कामकृतेऽर्धपापक्षयात्सम्भाषणस्पर्शनदर्शनादिरूपो लघुव्यवहारः कार्यो न तु भोजनपरिणयनादिरूपोऽपीति कामतो व्यवहार्यस्त्वित्यर्थ इति। तदपि शक्त्यभिप्रायमेव लक्ष्यते। अन्यथाऽमूर्तस्यार्धादिकल्पनाऽत्यन्तासम्बद्धैव। किञ्च कामे द्वैगुण्यविधायकविशेषशास्त्रेण स्वविषये सामान्यशास्त्रस्य बाधात्तात्पर्यतस्तस्याकाम एव प्रवृत्तेर्न कामेऽपि प्रवृत्तिरस्तीति। तेनार्धनाशकल्पनोक्तिरमीमांसकतामाविष्कारोतीति। एवं तावत्सकलनिबन्धसम्मतव्यवहार्य इति पदच्छेदेन याज्ञवल्क्यव्याख्यानमुक्तम्। शारीरकमीमांसायान्तु बहिस्तूभयथापि स्मृतेराचाराच्चेत्यतः प्राक्तनसूत्रे नैष्ठिकस्याप्यवकीर्णित्वे उपकुर्वाणकवच्छ्रौतं नैर्ऋतगर्दभयागरूपप्रायश्चित्तं भवतीति स्थापितम्। अतो बहिस्त्विति सूत्रे तुशब्देन तत्रैव विशेषो-

क्तिप्रतीतेर्बहिःशब्दोक्तमव्यवहार्यत्वं कृतप्रायश्चित्तविषयमेवेति निश्चीयते। तत्र तु साधकं स्मृतेरिति सूत्रोक्तं स्मृतिद्वयं शङ्कराचार्यैरुपन्यस्तम्।

आरूढो नैष्ठिकं कर्म यस्तु प्रच्यवते पुनः।
प्रायश्चित्तं न पश्यामि येन शुध्येत्स आत्महा॥

अत्रिः—आरूढपतितं विप्रं मण्डलाच्च विनिःसृतम्।
उद्बद्धं कृमिदष्टञ्च स्पृष्ट्वा चान्द्रायणं चरेदिति॥

अत्राद्यस्मृतेरयमर्थः—यः प्रच्यवते तस्य तत्प्रायश्चित्तं तत्कृतमपि येन शुद्ध्येत्तादृशं न पश्यामि। शुद्धिशब्दश्च व्यवहारयोग्यतापरो दृष्टो लोके। अतः कृतप्रायश्चित्तोऽपि व्यवहार्यो न भवतीति। द्वितीयस्मृतेरपि कृतप्रायश्चित्तविषयत्वमेव। अकृतप्रायश्चित्तस्य 'एनस्विभिरनिर्णिक्तैर्नार्थं कञ्चित्समाचरेत्', इति सामान्यवचनेनैवाऽव्यवहार्यतासिद्धेः। आरूढपतितमिति कृतप्रायश्चित्तस्याऽव्यवहार्यत्वे मनुवाक्योक्तो दृष्टान्त उक्तः।

बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः।
शरणागतहन्तॄंश्च स्त्रीहन्तॄंश्च न सम्पिबेदिति॥

न सम्पिबेदित्यन्योन्यं भोजनादिव्यहारं न कुर्यादित्यर्थः। ततः कृतप्रायश्चित्तस्यैवाऽव्यवहार्यत्वे प्रमाणत्वेन याज्ञवल्कीयमप्युपन्यस्तं प्रायश्चित्तैरपैत्येन इति। तत्र कामतोऽपीत्यपिशब्दमध्याहृत्य पूर्वार्धशेषत्वेनैव योजितम्। तदर्थस्तु यदज्ञानकृतैनो यच्च कामतोऽप्येनस्तदुभयमपि प्रायश्चित्तैरपैति। तदनन्तरमव्यवहार्य इत्यकारप्रश्लेषेण श्लोकशेषो व्याख्यातः। अस्मिंश्च मते वचनादित्यनेन न द्वैगुण्यादिवचनमुच्यते, किन्तु पूर्वप्रदर्शितमाचार्योक्तं स्मृत्याद्येव। अस्मिंश्च पक्षे कामाकामयोरुभयत्रापि कृतेऽपि प्रा-

यश्चित्तेऽव्यवहार्यता सम्मता; अव्यवहार्यस्त्वित्यस्योभयशेषत्वेन व्याख्यानात्। अतश्चास्यानारभ्याधीतस्य याज्ञवल्कीयसामान्यवाक्यस्य पूर्वप्रदर्शितमाचार्योक्तं स्मृतिद्वयमुपसंहारकमिति फलितं भवति। एवं 'नैष्ठिकानां वनस्थानां यतीनां वात्रकीर्णिनाम्। वृद्धानामपि लोकेऽस्मिन्प्रत्यापत्तिर्न विद्यते,—इति कौशिकवाक्यम्, तथा बालघ्नांश्चेति पूर्वदर्शितं मनुवाक्यम्, तथा—शरणागतबालस्त्रीहिंसकान् संवसेन्न तु। चीर्णव्रतानपि सतः कृतघ्नसहितानिमान्— इति याज्ञवल्क्यवाक्यमपि कामाकामविषयमेव। अत इदं तत्परमेव। अत्र वेदान्तकल्पतरौ ब्रह्मवधादिग्रहणं बालघ्नाद्युपलक्षणार्थमित्युक्तम्। तेनायं तस्याभिप्रायो लक्ष्यते—गौतमवाक्यमपि ब्रह्महेत्यारभ्य पातकसंयोजकाश्चेत्यन्तं कृतप्रायश्चित्तस्यैव संसर्गनिषेधार्थम्, न याज्ञवल्क्यवाक्यस्योपसंहारार्थमेवेति। यत्तु भवदेवेन याज्ञवल्कीयवाक्येन ज्ञानकृतपापस्य प्रायश्चित्तेनाप्यनपगम इति उक्तम्, तत्सकामपापप्रवृत्तिनिन्दार्थमेव। नानाव्रचनेषु मृतः शुद्धिमवाप्नुयादित्यनेन पापक्षयशुद्धिप्रतिपादनादिति। तदपि व्यवहार्यताविधिपरत्वानङ्गीकारात् द्विगुणप्रायश्चित्तस्य स्थाने 'जुगुप्सेरन्न चाप्येनं संवसेयुश्च सर्वशः' इत्युक्तौत्सर्गिकी व्यवहार्यतैव महापातकादौ सिद्धेति पूर्वव्याख्याफलमेव लभ्यत इति। यच्च कल्पतरौ संसर्ग्यनुवृत्तौ छागलेय इत्युक्त्वा 'ज्ञात्वा करोति यः सकृत् निष्कृतिर्न विधीयते। प्रायश्चित्तमकामानां कामावाप्तौ न विद्यते॥ उपपातक एवं स्यात्तथा चात्मोपघातने, इति पठित्वा व्याख्यातम्—कामावाप्तौ न विद्यते—इति पातकिभिः कामतः कृतसंसर्गाणां प्रायश्चित्तमिह लोके नास्तीत्यर्थः। उपपातक आत्मोपघातने चैवं कामकृते न प्रायश्चित्तं संव्यवहार्यताकरमिति

वोद्धव्यमिति, तदयुक्तम्; पूर्वार्धतुरीयचरणयोः पौनरुक्त्यापत्तेः। तथा कामतो व्यवहार्यस्त्विति याज्ञवल्कीये पूर्वं व्यवहार्यस्त्विति पदच्छेदं कृत्वा महापातकादौ कामतः कृते द्वादशाब्दादिनैव संव्यवहार्यतामुक्तवत इह चोपपातके कामकृतेऽसंव्यवहार्यतोक्तिरत्यनुचितैवेति। अतश्चापरार्ककृतव्याख्यैव ज्यायसी। तथाहि—कामावाप्तौ कामपूर्वके पापे प्रायश्चित्ते पापक्षयपर्यन्तता न विद्यते। उपपातकात्महननयोस्तु स्याद्विद्यत एवेति। आद्यार्धमेव कामकृतसंसर्गे आमुष्मिकशुद्धिकरप्रायश्चित्ताभावोक्तिविषयम्। एतन्मते उपपातक एवेति पाठः। अत्रात्मघाते विशेष उक्तो मदनपारिजाते—आत्महननार्थं विषभक्षणादिके कृते यदि जीवति, तदा स्वयमेव प्रायश्चित्तं कुर्यादथ मृतस्तदा तद्धितेच्छुः पुत्रादिः कुर्यादिति। यच्च बौधायनः—

अमत्या ब्राह्मणं हत्वा दुष्टो भवति धर्मतः।
ऋषयो निष्कृतिं तस्य वदन्त्यमतिपूर्वके॥
मतिपूर्वे फले तस्मिन्निष्कृतिर्नोपलभ्यते॥

इति। तदुभयपक्षेऽप्यविरुद्धम्। तथाहि—व्यवहार्य इत्याद्यपक्षे मतिपूर्वे पापे फले आमुष्मिके मरणान्तातिरिक्ता निष्कृतिर्नोपलभ्यत इति। द्वितीयपक्षे फले व्यवहारे निष्कृतिर्नास्तीति। इति कामाकामव्यवस्था।

अथ तन्त्रप्रसङ्गापत्तिविचारः

तत्र केचिदाहुः—कामतो विजातीयानेकपातकेषु युगपत् क्रमेण वा कृतेषु नैव तन्त्रता; अग्निप्रवेशाग्निवर्णसुरापानमुसलघातज्वलत्सूर्मीसमालिङ्गनानां मरणप्रकाराभिन्नत्वादिनि; तन्न;

यः कामतो महापापं नरः कुर्यात्कथञ्चन।

न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते ॥

इति मध्यमाङ्गिरसोक्तस्य साधारणैकप्रकारकप्रायश्चित्तस्य विद्यमानत्वेन तन्त्रत्वोपपत्तेरिति। यत्तु तैरेवोक्तम्—अकामकृत-सजातीयविजातीयेषु महापातकादिषु द्वादशाब्दादि तन्त्रेण भवति; समानदेशकालकर्तृत्वस्यागृह्यमाणविशेषत्वस्य च तन्त्रत्वोपयिकस्य प्रयाजपशुमत्यादिश्रौतैरमावास्याव्यतीपातादिनिमित्तक-श्राद्धादिस्मार्तैश्च तुल्यत्वात्। ननु सकृदनुष्ठितैकद्वादशाब्देन युगपदनेकपापनाशोत्पत्तौ चातुर्थिकयोगसिद्ध्यधिकरणविरोध इति चेन्न; तत्र हि सर्वेभ्यःकामेभ्यो दर्शपूर्णमासावित्यादौ सर्वत्वमाधिकारिकमित्यनेन न्यायेनान्यत्र श्रुतान्येव फलान्युद्दिश्यन्ते। तेषाञ्च प्रातिस्विकपरस्परनैरपेक्ष्येणैव साध्यत्वावगमात्। इहापि चैकवाक्यैकपदोपात्तत्वेऽप्युद्देश्यसाहित्यस्याऽविवक्षितत्वादन्योन्यनैरपेक्ष्येणैव साध्यत्वावगमादेकप्रयोगेणानेकफलासिद्धिर्युक्ता। इह न तादृक्फलनैरपेक्ष्यावगमकमस्तीति तन्त्रेणानेकफलसिद्धिर्युक्ता। ननु कर्माण्यारम्भभाव्यत्वादित्येकादशाधिकरणविरोधः; एकज्योतिष्टोमादिप्रयोगेऽपि तत्फलस्वर्गादेरनेकस्याप्युत्पत्तिप्रसङ्गात्, तथा सकृदनुष्ठितनिषिद्धात्तत्फलानेकनरकोत्पत्तिप्रसङ्गादिति चेन्न; आद्ये षष्टिवर्षमात्राद्युपभोग्य-स्वर्गादिफलश्रुतिविरोधान्न तादृक् फलानेकत्वप्रसङ्गः। द्वितीये कल्पमन्वन्तराद्युपभोग्यनरकादिफलश्रुतिविरोधादेव न पूर्वोक्तानिष्टप्रसङ्ग इति। न च ब्रह्महत्यां व्यपोहतीत्यादिप्रायश्चित्तविधावेकस्या एव ब्रह्महत्याया नाश्यत्वोक्तेर्नानेकनाशोपपत्तिरिति वाच्यम्, ग्रहैकत्ववदेकत्वस्याविधेयविशेषणत्वेनाविवक्षितत्वात्। यत्तु देवलः—

यत्स्यादनभिसन्धाय पापं कर्म सकृत्कृतम् ।
तस्येयं निष्कृतिः प्रोक्ता धर्मविद्भिर्मनीषिभिः ॥
विधेः प्राथमिकादस्माद् द्वितीये द्विगुणं भवेत् ।
तृतीये त्रिगुणं प्रोक्तं चतुर्थे नास्ति निष्कृतिरिति ॥

तच्च महापातकमात्रविषयम्; द्वितीय इत्यादि च नावृत्तिविधायकम्, किन्त्वावृत्तावधिकदोषप्रतिपादनमुखेन निन्दार्थवादः । स च समानजातीयमहापातकादिविषय एव । विजातीयेषु तु द्वितीयादिशब्दस्वरसान्नैव प्रवर्तते इति भवदेवः । केचित्तु तन्त्रन्यायात्प्राक् प्रतिनिमित्तं नैमित्तिकावृत्त्यनुवादेन चतुर्थे नास्ति निष्कृतिरित्येव विधीयत इत्याहुः । ब्रह्मवधे तु विशेष उक्तो भविष्ये—

ब्रह्महा द्वादशाब्दानि कूटं कृत्वा वने वसेत् ।
अत्र वक्तव्यमस्त्येव तन्निबोध सुरोत्तम ॥
ब्राह्मणस्य ब्राह्मणयोर्ब्राह्मणानाञ्च पुत्रक ।
प्रायश्चित्तस्य चैकत्वं जातिमाश्रित्य लक्ष्यते ॥
क्षामवत्यादिना यद्वत्कर्मणा पूतनायते ।
दैवयोगादकरणाऽज्ञातदोषकदम्बके ।
होमेनैकेन दोषाणां सर्वेषां क्षयमादिशेत् ।
एकया क्षामवत्यासौ होमेनैकेन तस्य वै ॥
पुरोडाशादसन्देह इति यज्ञविदो विदुः ।
ब्रह्महाऽप्येकमेवेह प्रायश्चित्तं समाचरेत् ॥
एवमेव न सन्देहः किन्त्वत्र गदतः शृणु ।
एककालं यदा हन्याद्युगपत्सुरसत्तम ॥
निमित्तमेकमाश्रित्य इति नैकेन वा मृतौ ।
ब्राह्मणं ब्राह्मणौ वीर ब्राह्मणान्सुबहूनपि ॥

निहत्य युगपद्वीर एकं प्राणान्तिकं चरेत् ।
किन्त्वत्र सुरशार्दूल विशेषं गदतः शृणु ॥
अकामतो यदा हन्याद् ब्राह्मणान्मानवो गुह ।
चरेत्तदा वने घोरे यावत्प्राणपरिक्षयम् ॥
कामतश्च यदा हन्याद् ब्राह्मणान्सुरसत्तम ।
तदात्मानं दहेदग्नौ विधिना येन तच्छृणु ॥
भूत्वा निष्कालको वीर वेष्टयित्वा च वाससा ।
घृताक्तेन महाबाहो दत्वा सर्वस्वमेव हि ॥
कृत्वा पादौ करीषाग्नौ दहेदात्मानमादरात् ।
आ उत्तमाङ्गाद्विधिवदत्र सत्सुरसत्तम ॥

अयमर्थः—अत्राद्येन सकृदमत्यैकब्राह्मणवधे द्वादशाब्दं विधाय ततो ब्राह्मणस्य ब्राह्मणयोरित्यादिना ब्रह्महाऽप्येकमेवेह प्रायश्चित्तं समाचरेदित्यन्तेन क्षामवतीदृष्टान्तेनामत्या क्रमशोऽनेकब्राह्मणवधे द्वादशाब्दप्रायश्चित्तस्य तन्त्रतोक्ता । तत एककालमित्यादिनोक्तं प्राणान्तिकं कामकारविषयमित्यपरार्के । ततोऽकामतो युगपदनेकब्राह्मणवधे यावत्प्राणक्षयं प्राकृतं ब्रह्मचर्यं तृतीयं प्रायश्चित्तम् । ततः कामतः क्रमेण बहुब्राह्मणवधे कारीषाग्निमरणं चतुर्थं प्रायश्चित्तमिति । अत्र बहूनित्यनुवादः । यत्तु कश्चित् ब्राह्मणानिति बहुवचनेनैव कपिञ्जलाधिकरणन्यायेन बहुत्वे सिद्धे चतुरादिब्राह्मणवधोक्त्यर्थमित्याह, तत्तुच्छम्; कपिञ्जलाधिकरणन्यायस्योपादेय एव प्रवृत्तेः । तस्मादनेकब्राह्मणवधे सिद्धा द्वादशाब्दस्य तन्त्रतेति । अत एव श्रीरामेण रावणकुम्भकर्णाद्यनेकवधनिमित्तं तन्त्रेणैव श्रीरामेश्वरप्रतिष्ठा कृता । तथा युधिष्ठिरेणापि द्रोणकृपाद्यनेकवधनिमित्तं तन्त्रेणैवाश्वमेधः कृत इति । तदेतद-

युक्तम्। तथाहि—सत्यं यद्यपि तत्र न्यायः प्रवर्तते, तथापि विधायिना देवलवचनेन बाध्यते। यत्तावदर्थवाद इत्युक्तं भवदेवेन, तत्रेदं वाच्यं कस्यायं विधेरर्थवाद इति? न तावद्दूरस्थानां सम्भवति। नापि यत्स्यादनभिसन्धायेत्यस्य; पूर्वपतितस्योत्तरोत्तरं हि दोषाधिक्यं द्विगुणादिविधानेन सम्बध्यते, न तु द्वादशाब्दस्य सकृदनुष्ठानविधिना। किञ्च नात्र दोषाधिक्यं श्रूयते। किन्तु साक्षात् द्विगुणादिविधिरेव। द्वैगुण्यादिकं हि न केनापि प्राप्तम्, यदनूद्येत। अतोऽधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयतीतिवद्विधिरवश्यं कल्पनीय एव। यद्यपि हि शब्दवर्तमानापदेशाद्यपि स्यात्; तत्त्विह नास्त्येव, प्रत्युतानुपहतशक्तिको विधिरेव श्रूयते द्वितीये द्विगुणं भवेदिति। तत्समभिव्याहाराच्चोत्तरत्रापि विधिरुन्नीयते, तेनानुवादः। वस्तुतस्तु क्षामवत्यादिवन्नेह तन्त्रन्यायप्रसक्तिः। तत्र हि कार्यस्यैवावैलक्षण्याद्युक्ता तन्त्रता, इह चतुर्थे नास्ति निष्कृतिरित्यादिलिङ्गदर्शनाद्यो भूय आरभते, तस्मिन्फलविशेष इत्यापस्तम्बवाक्याच्च प्रसक्त्यतिशयेन हन्यमानब्राह्मणसंख्याधिक्ये दोषगौरवमवगम्यते। ततश्च विलक्षणयोर्गुरुलघुदोषयोः क्षयो न तन्त्रेण सम्भवति। अतः कार्यवैलक्षण्यादपि न तन्त्रता। अत्र 'यत्स्यादनभिसन्धाये'ति देवलवचनं सकृत्कृत एव द्वादशाब्दं नियमयत् द्विरावृत्त्यादौ तन्त्रन्यायप्राप्तं द्वादशाब्दैक्यं व्यावर्तयति। अवश्यं चायं नियमो विधेयः। अन्यथा चतुर्थावृत्तिपर्युदासेन निमित्तावृत्तावावृत्तप्रायश्चित्तविधौ चतुर्थ्याद्यावृत्तौ द्वादशाब्दप्रसक्तिः केन वार्येत? नहि पर्युदासविषये कार्यस्य प्रवृत्तिनिवृत्त्योरन्यतरत्प्रतीयते। अतश्चतुर्थ्याद्यावृत्तौ प्रायश्चित्तापत्तिविधेः प्रवृत्तेः ब्रह्महा द्वादशाब्दानीति प्रवर्तेत। तन्नि-

वश्यर्थं सकृत्कृत एव द्वादशाब्दमिति नियमोऽवश्याभ्युपेय इति। किञ्च देवलीयद्वादशाब्दादिविधावस्य नियामकत्वाभावे वैयर्थ्यमेव प्रसज्येतेति नियमरूपगुणविधिरेवायमिति। यत्तु शूलपाणिः— विधित्वमभ्युपेत्य यत्र यत्र द्वैगुण्यादि विहितम् 'गोघ्न. . वहितः... कल्पश्चान्द्रायणमथापि वा। अभ्यासे तु ततो भूयस्ततः शुद्धि-मवाप्नुयात्। सवर्णायाम् ?' इत्याद्यापस्तम्बवाक्येषु प्राय-श्चित्तद्वैगुण्यादिविधेस्तद्विषयमेवेदं 'विधेः प्राथमिकादस्मादि'ति, तदपि न, एवं हि वदताऽर्थादुपसंहार एवोक्तः। स चात्र न सम्भवति। मनुयाज्ञवल्क्यादिसर्वस्मृतिवदेव हि देवलस्मृतावपि ब्रह्मवधादिनिमित्तक्रमेण द्वादशाब्दानि प्रथमं विहितानि। ततः सर्वाणि प्रायश्चित्तानि। तत्रेदं द्वादशाब्दविध्यन्तरं वाम्नातं स्यात्सर्वानन्तरं वा, उभयथापि प्राथमिकादित्यनेन प्रथमविहितं द्वादशाब्दमेव परामृश्यते। विधीयत इति व्युत्पत्त्या विधिशब्देना-पि तदेव परामृश्यते। तस्यैव च द्वैगुण्यादि तदुपस्थितस्य द्वैगु-ण्यादौ विधीयते। अतश्चेदं द्वादशाब्दमात्रविषयमेवेति न सामा-न्यरूपम्। अतो विशेषान्तरविषये द्वैगुण्यादिविधिभिर्नोपसंहार-मर्हति। तदुक्तमाचार्यैः—

> सामान्यविधिरस्पष्टः संह्रियेत विशेषतः।
> स्पष्टस्य तु विधेर्नान्यैरुपसंहारसम्भवः॥ इति॥

यत्तु प्रतिनिमित्तं नैमित्तिकशास्त्रावृत्त्यनुवादेन चतुर्थे निष्कृत्य-भाव एव विधेय इति, तदपि न; उत्तरकालप्रवृत्ततन्त्रन्यायबाधित-स्यानुवादासम्भवात्। नच वाक्यभेदप्रसङ्गाद् बाधितस्याप्यनुवादो युक्तः। यथा रागप्राप्तस्य 'मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च, इति निषेधबाधितस्यापि मातुलकन्यापरिणयनस्य 'मातुलस्यैव

योषेति' मन्त्रेऽनुवाद इति वाच्यम्; "यजतिषु ये यजामहं करोति नानुयाजेष्विति" चतुर्थावृत्तिपर्युदासेन निमित्तावृत्तौ प्रायश्चित्ता-वृत्तिविधानादवाक्यभेदोपपत्तेरिति। यच्च भविष्यपुराणवचनात् क्रमे-णाकामकृतब्रह्मवधे द्वादशाब्दतन्त्रतेति, तदपि न; ब्रह्महाऽप्येकमेवेह प्रायश्चित्तं समाचारेदित्यस्यैव तदग्रिमप्राणान्तिक विध्यर्थवादत्व-सम्भवात्। चामवत्थादिवदकामतोऽनेकब्राह्मणवधे देवलादिवाक्य-बाधितमप्येकमेव प्रायश्चित्तं स्यादपि कथञ्चित्। कामतस्तु मरणान्तिकमेवेत्यौचित्येन स्तुतिः सम्भवत्येवेति। किञ्च ब्राह्म-णस्य ब्राह्मणयोर्ब्राह्मणानां च पुत्रकेत्युपक्रमादयमुपसंहारे एकप्रा-यश्चित्तविधिरेकांशेऽनुवादोऽनेकांशे विधिरिति विध्यनुवाददोषप्र-सङ्ग इत्यर्थवादतैव न्याय्या। विधित्वमभ्युपेत्यापि ब्रूमः—ब्राह्मण-स्य ब्राह्मणयोरित्यनेनैव ब्राह्मणत्वजातिलाभे पुनर्जातिमाश्रित्ये-ति जातिमात्रलाभार्थम्। ततश्चाज्ञानतो जातिमात्रहालिकाद्यने-कब्राह्मणवधे भवतु नामानेन तन्त्रविधिः। एतदेव पूर्वयोर्वर्णयोर्वे-दाध्यापिनं हत्वेत्यापस्तम्बवचनात् । वेदाध्यापिविषयनियतस्य द्वादशाब्दस्यावृत्तिर्देवलवाक्येन विधातुं शक्यैवेति। तस्मात्स-जातीयविजातीयेषु अकामकृतेष्वनेकमहापातकेषु युक्तैव द्वादशा-ब्दस्यावृत्तिरिति। किञ्च चतुर्थे नास्ति निष्कृतिरित्यादिपूर्वप्रद-र्शितानेकलिङ्गदर्शनान्निमित्तावृत्तौ दोषगौरवावगमाद्यत्राहत्य द्वै-गुण्यादि नोक्तमुपपातकस्तेयादौ, तत्रापि यो भूय आरभते इति वचनादेनसि गुरुणि गुरु लघुनि लध्विति वचनाच्च शतकृत्व आ-वृत्त्यादौ गुरुप्रायश्चित्तकल्प एवानुष्ठेयः, यत्र तु लघुगुरुकल्पौ न स्तः, तत्रापि पादपादन्यूनादिद्वितीयाद्यावृत्तौ कल्प्यम्। अत एव सवर्णायामनन्यपूर्वायां पादः पततीत्येकस्यामेव गमनाभ्या-

से पादन्यूनं कल्प्यमिति मिताक्षरायामुक्तम्। यत्तु श्रीरामयुधिष्ठिरयो रामेश्वरलिङ्गप्रतिष्ठादेस्तन्त्रत्वदर्शनमुक्तम्, तदाततायिवधविषयमिति ११॥ इत्येवं विवेचितम्।

अत्र प्रायश्चित्तानां नैमित्तिकत्वं प्रारब्धपापनाशकत्वादिकं च यद्यपि न साक्षात् प्रकृतोपयुक्तम्। तथापि स्वरूपज्ञानार्थं तत्सङ्गृहीतमिति द्रष्टव्यम्। प्रकृतोपयुक्तन्त्वत्र—अथ कामाकामकृतप्रायश्चित्तव्यवस्थैव। परम्परया तदुपयोगो भावीति। अत्र हि प्रथमं व्यवहार्यत्वपक्षं सर्वनिबन्धकारसम्मतं मरणान्तिकप्रायश्चित्तरहितपापविषये शूलपाणिमतनिरासपूर्वकमुपपाद्य शारीरमीमांसकमतानुसारेणाव्यवहार्यत्वपक्षः सविस्तरमुपपादितः।

[उक्तार्थे भाष्याद्युपष्टम्भः]

अत्र च सर्वेषां भाष्यकाराणामैकमत्यमेव वर्तते। अत्र शाङ्करभाष्यं यथा—

॥ बहिस्तूभयथापि स्मृतेराचाराच्च॥

यद्यूर्ध्वरेतसां स्वाश्रमेभ्यः प्रच्यवनं महापातकम्, यदि वोपपातकम्, उभयथापि शिष्टैस्ते बहिष्कर्तव्याः।

आरूढो नैष्ठिकं कर्म यस्तु प्रच्यवते पुनः।
प्रायश्चित्तं न पश्यामि येन शुद्ध्येत्स आत्महा। इति।

आरूढपतितं विप्रं मण्डलाच्च विनिःसृतम्।
उद्बद्धं कृमिदष्टञ्च स्पृष्ट्वा चान्द्रायणं चरेत्॥

इति चैवमादिनिन्दातिशयस्मृतिभ्यः। शिष्टाचाराच्च। नहि यज्ञाध्ययनविवाहादीनि तैः सहाचरन्ति शिष्टाः—इति॥

अत्रैव भामती यथा—यदि नैष्ठिकादीनामस्ति प्रायश्चित्तम्, तत्किमेतैः कृतनिर्णेजनैः सव्यवहर्तव्यमुत नेति? तत्र दोषकृतत्वा-

दसंव्यवहारस्य प्रायश्चित्तेन तन्निबर्हणादनिबर्हणे वा तत्करणवै-
यर्थ्यात्संव्यवहार्या एवेति प्राप्ते उच्यते—

बहिस्तूभयथापि स्मृतेराचाराच्च

निषिद्धकर्मानुष्ठानजन्यमेनो लोकद्वयेऽप्यशुद्धिमापादयति
द्वैधम्। कस्यचिदेनसो लोकद्वयेऽप्यशुद्धिरपनीयते प्रायश्चित्तैरे-
नोनिर्बर्हणं कुर्वाणैः। कस्यचित्तु परलोकाशुद्धिमात्रमपनीयते प्राय-
श्चित्तैरेनोनिबर्हणं कुर्वाणैः। इह लोकाशुद्धिस्त्वेनसापादिता न
शक्यापनेतुम्। यथा स्त्रीबालादिघातिनाम्। यथाहुः—विशुद्धा-
नपि धर्मतो न सम्पिबेदिति। तथाच प्रायश्चित्तैरपैत्येनो यदज्ञा
नकृतम् भवेत्॥ कामतः कृतमपि। बालघ्नादिस्तु कृतनिर्णेजनोऽपि
वचनादव्यवहार्य इह लोके जायते—इति॥ वचनञ्च बालघ्नांश्चे-
त्यादि। तस्मात्सर्वमवदातम्—इति॥

तथा श्रीभाष्येऽपि 'तद्भूतस्य तु नातद्भावो जैमिनेरपि निय-
मात्तद्रूपाभावेभ्यः, इति सूत्रेण नैष्ठिकवैखानसपरिव्राजकाश्रमेभ्यः
प्रच्युतानामपि ब्रह्मविद्यायामधिकारोऽस्ति न वेति चिन्तायां विधु-
रादिवन्नैतेषामनाश्रमित्वेनावस्थानं न सम्भवीति जैमिनिमतेनोप-
पाद्य कदाचिद् भ्रष्टेषु प्रायश्चित्तेन पुनरपि ब्रह्मविद्याधिकारसम्भ-
व इति शङ्कायां 'आधिकारिकमपि पतनानुमानात्तदयोगात्, इति
सूत्रेण प्रायश्चित्ताभावप्रदर्शनेन प्रायश्चित्तस्येतरब्रह्मचारिविषयत्व-
मुपपाद्य 'उपपूर्वमपीत्येके भावमशनवत्तदुक्तम्' इति सूत्रेण तेषामा-
श्रमप्रच्युतेरुपपातकत्वेन मध्वशनादिवत् प्रायश्चित्तमस्तीति म-
तान्तरेणोपपाद्योक्तम्—

बहिस्तूभयथापि स्मृतेराचाराच्च—इति।

तु शब्दो मतान्तरव्यावृत्त्यर्थः। उपपातकत्वे महापात-

कत्वेऽप्येते बहिर्भूता एव ब्रह्मविद्याधिकारिभ्यः। ब्रह्मविद्यायामनधिकृता इत्यर्थः। कुतः, स्मृतेः। पूर्वोक्तात् पतनस्मरणात्। यद्यपि कलुषनिर्हरणाय कैश्चिद्वचनैः प्रायश्चित्ताधिकारो विद्यते, तथापि कर्माधिकारानुगुणशुद्धिहेतुप्रायश्चित्तं न सम्भवति। 'प्रायश्चित्तं न पश्यामि येन शुद्ध्येत्स आत्महा' इति स्मृतेरित्यर्थः। आचाराच्च। विशिष्टा हि नैष्ठिकादीन् भ्रष्टान् कृतप्रायश्चित्तानपि वर्जयन्ति। तेभ्यो ब्रह्मविद्यादिकं नोपदिशन्ति। अतस्तेषां नास्ति ब्रह्मविद्यायामधिकारः, इति। व्यक्तं चैतच्छ्रुतप्रकाशिकायामपि। तथा श्रीकण्ठभाष्यं शिवार्कमणिदीपिका च यथा—

उपपातकत्वे महापातकत्वेऽपि कर्माधिकारादिबहिष्कृता एते, "प्रायश्चित्तं न पश्यामि येन शुद्ध्येत्स आत्महा" इति स्मृतेः, शिष्टबहिष्काराच्च। अतः सर्वथैवारूढपतितानां न विद्याधिकारः—इति।

पापानां द्वे शक्ती, इह कर्माधिकारशिष्टविरोधिनी, परत्र नरकापादिनी च। नैष्ठिकानां प्रायश्चित्तसद्भावेऽपि तेन परत्र नरकापादिन्येव पापशक्तिर्हीयते, न त्विह प्रत्यापत्त्यापादिनी। "नास्यास्मिंल्लोके प्रत्यापत्तिर्विद्यते, कल्मषं तु निर्हण्यते" "प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत्। कामतोऽव्यवहार्यस्तु वचनादिह जायते" इत्यादिस्मरणात्। अतः प्रायश्चित्तं न पश्यामीत्यादिस्मरणमप्यैहिकप्रत्यापत्त्यापादकप्रायश्चित्ताभिप्रायमिति भावः।

तथा प्रायश्चित्तमयूखः—

[उक्तार्थं प्रायश्चित्तमयूखः]

कामाकामकृतप्रायश्चित्तव्यवस्था प्रारभ्यते। बृहस्पतिः—कामाकामकृतन्त्वेव पातकं द्विविधं स्मृतम्। पुरुषापेक्षया चैव निष्कृतिर्द्विविधा स्मृता। इति।

यत्तु याज्ञवल्क्यवाक्ये—

प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत्
कामतो व्यवहार्यस्तु वचनादिह जायते ॥

इत्यज्ञानपदम्, तदप्यकामपरम्। अत एव तत्प्रतियोगिरूपं कामतःपदं सङ्गच्छते। एवं वाक्यान्तरीयाणि बुद्धिज्ञानाभिसन्धिपदानि कामपराणि। अबुद्ध्यज्ञोनानभिसन्धिपदानि वाऽकामपराणि। तेन बलात्कारिते पापे सत्यपि ज्ञाने न द्विगुणं प्रायश्चित्तम्; तत्र प्रयोजककामाभावात्। अत्राकामकृतपापस्य व्यवहारनिरोधिका नरकजनिका चेति शक्तिद्वयमपि नश्यति प्रायश्चित्तेन। कामकृतस्य तु व्यवहारनिरोधिकैव नश्यति, न तु नरकानुकूलेति विज्ञानेश्वरादयो निबन्धकृतः। एतच्च यैश्चाहत्य व्यवहारो निषिद्धस्तत्परम्। तथा चाह गौतमः—ब्रह्महसुरापगुरुतल्पगमातृपितृयोनिसम्बन्धागस्तेननास्तिकनिन्दितकर्माभ्यासिपतितात्यागयपतितत्यागिनः पतिताः पातकसंयोजकाश्चेति। एतेष्वेव व्यवहारो निषिद्धो नान्यत्र।

एनस्विभिरनिर्णिक्तैर्नार्थं किञ्चित्समाचरेत् ॥

इति मानवीयमेनस्विपदमपि ब्रह्महादिपरमेव। इतरपापेषु तु नरकानुकूलतामयते। सर्वरहस्यपापेषु ब्रह्महत्यादिप्रकाशेषु मरणान्तिकप्रायश्चित्ते चैवम्; व्यवहारनिरोधनाभावेन तदनुकूलशक्त्यभावात्। श्रीशङ्कराचार्यास्तु—कामतो व्यवहार्यस्त्वित्यकारप्रश्लेषेणेदं याज्ञवल्क्यवचो 'बहिस्तूभयथापि स्मृतेराचाराच्च, इति सूत्रे कृतप्रायश्चित्तनैष्ठिकब्रह्मचार्यादिपरम्।

आरूढो नैष्ठिके धर्मे यस्तु प्रच्यवते पुनः।
प्रायश्चित्तं न पश्यामि येन शुद्ध्येत्स आत्महा ॥इति।
आरूढपतितं विप्रं मण्डलाच्च विनिःसृतम्।

उद्बद्धकृमिदष्टं च स्पृष्ट्वा चान्द्रायणं चरेत् ॥

इति च स्मृतेरिति । येन शुद्ध्यै व्यवहारयोग्यो भवेत्तत्प्रायश्चित्तं न पश्यामीति । कृतप्रायश्चित्तमप्यारूढपतितादिकं स्पृष्ट्वा चान्द्रायणं कुर्यादिति वाक्यद्वयार्थः—इत्याहुः । तत्सूत्रे वाचस्पतिमिश्रास्तु—बालघ्नादिपरमप्याहुः—बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः । शरणागतहन्तॄंश्च स्त्रीहन्तॄंश्च न सम्पिबेदिति स्मृतेः । न सम्पिबेन्न व्यवहरेत् । अत एव याज्ञवल्क्यः—

शरणागतबालस्त्रीहिंसकान् संविशेन्न तु ।
चीर्णव्रतानपि सतः कृतघ्नसहितानिमान् ॥

तेनाचार्यमतेऽवकीर्णिनैष्ठिकादिभिर्बालघ्नादिभिश्च कृते प्रायश्चित्ते नरकानुकूला शक्तिर्नाश्यते, व्यवहारनिरोधिका त्वस्त्येव । इतरपापेषु कामकृतेष्वपि शक्तिद्वयमपि नाश्यते द्विगुणप्रायश्चित्तेन । तदाहाङ्गिराः—

विहितं यदकामानां कामात्तद् द्विगुणं भवेत् ॥

महापापे तु कामकृते मरणमेव । तथा च स एव ।

यः कामतो महापापं नरः कुर्यात्कथञ्चन ।
न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते ॥

तथा—प्राणान्तिकन्तु यत्प्रोक्तं प्रायश्चित्तं मनीषिभिः ।
तत्कामकारविषयं विज्ञेयं नात्र संशयः ॥

व्यासः—कामतो ब्राह्मणवधे निष्कृतिर्नास्ति जीविनः ।
यस्तु सर्वं परित्यज्य यावज्जीवं चरेद्व्रतम् ।
स विशुद्धश्चरेल्लोकान्विप्रो गच्छेन्न संशयः ॥

(अथ तन्त्रप्रसङ्गौ)

तत्रानेकनिमित्तेषु प्राजापत्यादीनां सजातीयानां प्रायश्चित्तानां

देशकालकर्त्रैक्ये तन्त्रम्। तत्र चैकस्मिन्निमित्ते प्राजापत्यद्वयमेक-त्रैकमिति विशेषणाग्रहणे द्वयमेव कार्यम्। तेनैवैकप्राजापत्यकार्य-मपि सिद्ध्यतीति प्रसङ्गः। यथा गौतमः—द्वे परदारे त्रीणि श्रो-त्रियस्येति सामान्यतः परदारमात्रगमने श्रोत्रियपत्नीगमने च श्रो-त्रियपत्नीगमननिमित्तकर्त्रा त्रैवार्षिकमेव केवलं कार्यम्। तेनैव द्वैवार्षिकसिद्धिः। शङ्खलिखितौ—गुप्तायां वेश्यायामवकीर्णः संव-त्सरं त्रिषवणमनुतिष्ठेत् क्षत्रियायां द्वे वर्षे ब्राह्मण्यां त्रीणि वर्षाणि। अत्र तिसृष्वप्यवकीर्णेषु ब्राह्मणीनिमित्तकर्त्रैकवार्षिकमेव कार्यमिति। निमित्तानां व्याप्यव्यापकभावेऽपि व्याप्यनिमित्ते न व्यापकनिमित्त-स्य प्रसङ्गतः सिद्धिः। यथा—

अवगूर्य चरेत्कृच्छ्रमतिकृच्छ्रं निपातने।
कृच्छ्रातिकृच्छ्रेऽसृक्पाते कृच्छ्रोऽभ्यन्तरशोणिते॥ इति॥

अत्रैव मिताक्षरापि यथा—

अत्रेदं चिन्तनीयम्—किं तत्र द्वित्रब्राह्मणवधे प्रायश्चित्तस्य तन्त्रत्वमुतावृत्तिरिति। तत्र केचिन्मन्यन्ते—ब्रह्महा द्वादशाब्दा-नीत्यत्र ब्रह्मशब्दस्यैकस्मिन् द्वयोर्बहुषु साधारणत्वादेकस्मिन्ब्राह्म-णवधे यत्प्रायश्चित्तं तदेव द्वितीये तृतीयेऽपि। तत्रैकब्राह्मणव-धनिमित्तैकप्रायश्चित्तानुष्ठाने सतीदं कृतमिदं नेति यत्प्रायश्चित्तं न शक्यते वक्तुम्। देशकालकर्तॄणां प्रयोगानुबन्धभूतानामभेदे-नागृह्यमाणविशेषत्वात्तन्त्रानुष्ठानेनैव पापक्षयलक्षणकार्यनिष्पत्ति-र्युक्ता। यथा तन्त्रानुष्ठितैः प्रयाजादिभिराग्नेयादिषु तन्त्रेणै-वानेकोपकारलक्षणकार्याणां निष्पत्तिः। न चैवं वाच्यम्; 'द्वित्र-ब्राह्मणवधे पापस्य गुरुत्वादेनसि गुरुणि गुरूणि लघुनि लघूनीति' गौतमवचनोक्तमेव प्रायश्चित्तानुष्ठानं युक्तम्; विलक्षणकार्ययो-

स्तन्त्रेण निष्पत्त्यनुपपत्तेरिति । यतो नेदं वचनावृत्तिविधायकम्, किंतूपदिष्टानां गुरुलघुकल्पानां व्यवस्थाप्रतिपादनपरम् । न च द्वितीयब्राह्मणवधे पापस्य गुरुत्वम्; प्रमाणाभावात् । यच्च मनुदेवलाभ्यामुक्तम् 'विधेः प्राथमिकादस्मात् द्वितीये द्विगुणं भवेत् । तृतीये त्रिगुणं प्रोक्तं चतुर्थे नास्ति निष्कृतिरिति', तदपि "प्रतिनिमित्तं नैमित्तिकमावर्तते" इति न्यायेन द्वित्रब्राह्मणवधगोचरनैमित्तिकशास्त्रावृत्त्यनुवादेन चतुर्थे तदभावविधिपरम्, न पुनर्द्वितीयब्राह्मणवधे प्रायश्चित्तानुष्ठानद्वैगुण्यविधिपरमिति; वाक्यभेदप्रसङ्गात् । तस्मात् द्वित्रब्राह्मणवधेऽपि सकृदेव द्वादशवार्षिकाद्यनुष्ठानं युक्तम् । यथा 'अग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेदि' त्यादिगृहदाहादिनिमित्तेषु चोदितानां क्षामवत्यादीनां युगपदनेकेष्वपि गृहदाहादिनिमित्तेषु सकृदेवानुष्ठानम्, अत्रोच्यते । न हि वचनविरोधे न्यायः प्रभवति । वचनं च विधेः प्राथमिकादित्यादिकं द्वित्रब्राह्मणवधे प्रायश्चित्तानुष्ठानावृत्तिविधिपरम् । एवं सति न्यायलभ्यतन्त्रानुष्ठानबाधेनावृत्तिविधायिदं वचनं प्रवृत्तिविशेषकरं स्यात् । इतरथा शास्त्रतः प्राप्त्यनुवादकत्वेनानर्थकं स्यात् ।

न च वाक्यभेदः; चतुर्थादिब्रह्मवधपर्युदासेनेतरत्रावृत्तप्रायश्चित्तविधानेनैकार्थत्वात् । किंच 'चतुर्थे नास्ति निष्कृतिरिति' लिङ्गदर्शनाद्धन्यमानब्राह्मणसंख्योत्कर्षे दोषगौरवं गम्यते; तथा देवलादिवचनाच्च । "यत्स्यादनभिसंधाय पापं कर्म सकृत्कृतम् । तस्येदं निष्कृतिर्दृष्टा धर्मविद्भिर्मनीषिभिरिति" । न च विलक्षणयोर्गुरुलघुदोषयोः तन्त्रेण निष्पद्यते । अत एवंविधेषु दोषगुरुत्वेन कार्यवैलक्षण्यादपि प्रतिनिमित्तं नैमित्तिकस्यावृत्ति-

युक्ता। क्षामवत्यादिषु पुनः कार्यस्यावैलक्षण्याद्युक्तस्तन्त्रभाव- इत्यलं प्रपञ्चेन। यच्चेदं 'चतुर्थे नास्ति निष्कृतिरिति' तदपि महापातकविषयम्; पापस्यातिगुरुत्वेन प्रायश्चित्ताभावप्रतिपादन- परत्वात्। अतः शूद्रान्नसेवनादौ बहुशोऽभ्यस्ते तदनुगुणप्रा- यश्चित्तावृत्तिः कल्पनीया, न पुनः प्रायश्चित्ताभावः। अत एवोक्तं मनुना (अ० ११ श्लो० १४०)। "पूर्णं चानस्यनस्थ्नां तु शूद्र- हत्याव्रतं चरेदिति।"

[कृतप्रायश्चित्तस्य- व्यवहार्याऽव्यवहार्यत्व- विचारः]

सत्यपि चैवं व्यवहार्यत्वपक्ष एव समुचित इ- त्यप्यत्र निरूपितम्। अत्र व्यवहारः सहभो- जनादिरूपोऽपि संमत इत्यपि विवेचितमिति कृतप्रायश्चित्तानां व्यवहार्यत्वपक्षमेव वीरमित्रोदयप्रायश्चित्तप्रकाशः स्वीकरोति। एवमपि हि चतुर्थे नास्ति निष्कृतिरित्येतेषामपि सम्म- तमेव। अत्र व्यवहार्यतापक्षमनुजानन्तोऽपीमे यत्राहत्य व्यवहार- निषेधस्तत्राऽव्यवहार्यत्वमेव मन्यन्त इति कलौ संसर्गः शोधितैर- पीति कृतिप्रायश्चित्तसंसर्गस्यापि निषेधात् अव्यवहार्यत्वपक्ष एव पर्यवसानमिति न विरोधः। चतुर्थे नास्ति निष्कृतिरित्यस्य चतु- र्गुणप्रायश्चित्तावसर इत्येव तात्पर्यम्, तत्र मयूखकारैश्चतुर्थेऽपि प्रायश्चित्तं वर्तत इति बोधितं चेदपि चतुर्थे विंशत्युत्तरशतवार्षिक- प्रायश्चित्तस्यैव योग्यतया न चतुर्थवारे द्विः कामतोऽ- भ्यासे वा प्रायश्चित्तमित्यादिकन्तु मदनपारिजाते कामकृतेऽपि प्रायश्चित्तनिरूपणपूर्वकं यद्विवेचितम्, तस्यापि संग्रहणमत्र समु- चितं पश्यामः। तद्यथा—

[उक्तार्थे मदनपारिजा- तोपष्टम्भः]

अथ कामाकामकृतपापेषु प्रायश्चित्तकर्तव्यता- विकल्पः। तत्र याज्ञवल्क्यः—

प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत् ।
कामतोऽव्यवहार्यस्तु वचनादिह जायते ॥

अज्ञानकृतमेनो ब्रह्महत्यादिपापं प्रायश्चित्तैर्वक्ष्यमाणलक्षणैरपगच्छति । कामतो ज्ञानतः कृतं महापातकादि प्रायश्चित्तैर्नापैति, अपि तु प्रायश्चित्तं व्यतिरिक्तविषयम् । मरणान्तिकप्रायश्चित्ते कृते इहलोके प्रयोजनाभावात्पारलौकिकमेव प्रयोजनं कल्पनीयम् । एतच्च पापनोदनमेवेति मरणान्तिकैः पापमपगच्छतीति सिद्धम् । छागलेयोऽपि—

प्रायश्चित्तमकामानां कामावासौ न विद्यते ।
उपपातक एवं स्यात्तथा चात्मोपघातने ॥

अस्यार्थः—कामावासौ ज्ञानपूर्वकपापे नरकोपभोगनिवारकं प्रायश्चित्तं न विद्यते। उपपातकात्महननयोस्तु ज्ञानपूर्वकृतत्वेऽपि स्याद्विद्यत एवेति । आत्महननार्थमभक्षणे कृते यदि जीवति, तदा प्रायश्चित्तं विद्यते । यदा मृतस्तदा तद्धितेच्छुना कर्तव्यमित्युभयथापि प्रायश्चित्तं विद्यत इति न विरोधः । मनुः—

अकामतः कृते पापे प्रायश्चित्तं विधीयते ।
कामकारकृतेऽप्याहुरेके श्रुतिनिदर्शनात् ॥
अकामतः कृतं पापं वेदाभ्यासेन शुद्ध्यति ।
कामतस्तु कृते मोहात् प्रायश्चित्तैः पृथक् पृथक् ॥

इन्द्रो यतीन् शालावृकेभ्यः प्रायच्छत्तमश्लीला वागभ्यवदत् । स प्रजापतिमुपाधावत् । तस्मायमुपहव्याख्यं प्रायच्छदित्यादि श्रुतिनिदर्शनम् । तस्मात्कामकारकृतेऽपि प्रायश्चित्तमस्तीत्यर्थः । श्रुतेस्त्वयं तात्पर्यार्थः—शालावृकेभ्यश्च विशेषेभ्यो यतीन् बुद्धिपूर्वकं खादयितुं प्रदत्तवत इन्द्राय प्रजापतिरुपहव्याख्यं कर्म प्रायश्चि-

त्त्वेन दत्तवान्। तस्मात्कामकारकृतेऽपि प्रायश्चित्तमस्तीति। हारीतः—मनसा कलयति वाचा वदति कर्मणा करोतीति कामकारकृतमग्न्यनशनवदभिघातकम्। तस्मादकामकृते प्रायश्चित्तं कामकारकृतेऽप्येक इति। देवलः—

यत्स्यादनभिसन्धाय पापं कर्म सकृत्कृतम्।
तस्येयं निष्कृतिः प्रोक्ता धर्मविद्भिर्मनीषिभिः॥
विधेः प्राथमिकात्तस्माद्द्वितीये द्विगुणं भवेत्।
तृतीये त्रिगुणं कृच्छ्रं चतुर्थे नास्ति निष्कृतिः॥
अभिसन्धिकृते पापे सकृद्वा नेह निष्कृतिः।
अपरे निष्कृतिं प्राहुरभिसन्धिकृतेऽपि च॥

अत्र कृच्छ्रमिति विहितप्रायश्चित्तोपलक्षणम्। चतुर्थे नास्ति निष्कृतिरित्यस्यायमर्थः—अज्ञानात् द्वितीयवारं कृते पापे द्विगुणं प्रायश्चित्तम्। तथा तृतीयवारे कृते पापे त्रिगुणम्। एवं चतुर्थवारे कृते पूर्वगुणन्यायेन चतुर्गुणप्रायश्चित्तेन निष्कृतिर्न, अपित्वधिकेनैवेति केचित्। अपरे चतुर्थे तु प्रायश्चित्तमेव नास्तीति वदन्ति। वयन्तु ब्रूमः—प्रथममनभिसन्धिकृते महापातके द्वादशवर्षिकम्। द्वितीयवारे कृते द्विवारम्। तृतीयवारे कृते त्रीणि। चतुर्थे चत्वारि इति द्वादशवार्षिकाणि दश भवन्ति। एतेषामाचरणकाले विंशत्युत्तरशतशरदो भवन्ति। एतावत आयुषोऽभावात् कर्तुमशक्यत्वेन प्रायश्चित्ताभावो न तु स्वरूपत एव प्रायश्चित्ताभाव इति। कासुचित्स्मृतिषु बुद्धिपूर्वे कृते प्रायश्चित्तं नास्तीत्युक्तम्, कासुचिद्विद्यत इति। तत्रेयं व्यवस्था। मरणान्तिकं प्रायश्चित्तं महापातकेषु विद्यत एव। कामात्तु द्विगुणं प्रोक्तमित्यादिवचनबलात् द्वादशवार्षिकादिद्वैगुण्याद्युक्तं प्रायश्चित्तमपि

विद्यते। तेन च प्रायश्चित्तेनेह लोके व्यवहार्यत्वं नित्यकर्मानुष्ठान-प्रतिबन्धकपापशक्त्यपनयनञ्च भवति। तथाच कर्मस्वधिकारात् विहितकर्मकरणात् प्रत्यवायाभावेन पापान्तरं नोत्पद्यते। अतः प्रायश्चित्तमस्तीति प्रायश्चित्तास्तित्वप्रतिपादकानां वचनानामभिप्रायः। परलोके या नरकोपभोगहेतुभूता पापशक्तिस्तस्य अनपायः तादृशशक्त्यपनायकप्रायश्चित्ताभावात् प्रायश्चित्तं नास्तीति प्रायश्चित्ताभावप्रतिपादकानामभिप्रायः—इति ॥

निर्णयसिन्धोरप्येवमेवाशयो वर्तते। तद्यथा—

प्रायश्चित्तविधानञ्च विप्राणां मरणान्तिकम्।
संसर्गदोषः स्तेयान्यमहापातकनिष्कृतिः॥

संसर्गदोषः 'तत्संसर्गी च पञ्चमः' इत्युक्तः। स्तेयञ्च तदन्यानि महापातकानि ब्रह्महत्यासुरापानगुरुतल्पानि त्रीणि। तेषां कामकृतानां मरणान्तिकं प्रायश्चित्तं विप्राणां कलौ नेत्यर्थः। मरणान्तिकं हि जातिवधनिमित्तं द्वाशाब्दं द्विगुणं ब्रह्मवधनिमित्तं च द्विगुणं भवति। तच्चतुर्थे नास्ति निष्कृतिरिति निषिद्धम्। न चात्महत्यानिमित्तस्यैव बाधो न जातिवधनिमित्तस्याभिन्नविषयत्वात्, संसर्गिणस्तु कामतोऽपि व्रतस्यैवोक्तेर्न मरणान्तिकम्। तेन तयोर्मरणान्तिकत्वाभावात् तयोरेव निष्कृतिर्नान्येषां त्रयाणाम्। युगान्तरे तु कलौ निषेधबलात्प्रवृत्तिः। एतद्विप्रपरं न क्षत्रियादेः। तदुक्तम्—विप्राणां मरणान्तिकमिति। विशेषोऽस्मत्कृते प्रायश्चित्तरत्ने ज्ञेयः। इति। तद्यथा—

मध्यमाङ्गिरा अपि—विहितं यदकामानां कामात्तत् द्विगुणं भवेत्, इति। तेन पापस्य द्वे शक्ती। नरकजनिका संसर्गेण पापजनिका च। तत्राद्यायाः सर्वेऽप्यन्त्याया नाशः शास्त्राद्गम्यते। मरणा-

न्तिके तु द्वयोर्नाशः ; मरणोत्तरं व्यवहारायोगात् । तदोहापस्तम्बः—नास्यास्मिंल्लोके प्रत्यापत्तिर्विद्यते, कल्मषन्तु निर्हण्यते इति ।

[कामकृते प्रायश्चित्ताधिकारविचारः]

अथ कामकृते प्रायश्चित्ताधिकारश्चिन्त्यते । तत्र महापातकभिन्नपापे कामकृतेऽधिकारः सर्वसम्मतः ; तत्र तत्र कामकृते तदुपदेशात् । यत्तूपपातकमभ्यस्तं महापातकतां व्रजेदिति, तद्यावत्यभ्यस्ते तत्समव्रतं तत्र गौणं महापापत्वम् ; अन्यथा पञ्चकस्य संज्ञाकरणवैयर्थ्यापत्तेः, व्रात्यतादौ किं महापातकसाम्यमिति नियामकाभावाच्च । अत एव तत्र तत्संसर्गे वा न पातित्यम् । अत्र वचने मूलाभावाच्च । ननूपपातके पारदार्यादौ चीर्णव्रतस्यापि बहिष्कार उक्तो व्याससूत्रे बहिस्तूभयथापि स्मृतेराचाराच्चेति, उपपापे महापापे वोभयथापि चीर्णव्रता अपि बहिष्कार्या इति शङ्कराचार्याः, प्रायश्चित्तं न पश्यामीति स्मृतेः, शिष्टाचाराच्चेत्यर्थः, नैवम् ; अस्य यत्यादिपरत्वात् । तथाच माधवीये कौशिकः—

नैष्ठिकानां वनस्थानां यतीनां चावकीर्णिनाम् ।
शुद्धानामपि लोकेऽस्मिन् प्रत्यापत्तिर्न विद्यते ॥

इति । तेनेतरेषामुपपापादौ कामकृते सिद्धोऽधिकारः । महापापेऽप्यकामकृते विवादाभावः । कामकृते तूच्यते । मनुः—

अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः ।
कामकारकृतेऽप्याहुरेके श्रुतिनिदर्शनात् ॥

तरति पाप्मानं तरति ब्रह्महत्यामिति श्रुतेः । गौतमः—अनभिसन्धिकृतेऽपराधे प्रायश्चित्तम् । माधवीये जाबालिः—अकामकृतपापानां ब्रुवन्ति ब्राह्मणा व्रतम् । कामकारकृतेऽप्येके द्विजानां चाबलस्य च ॥ देवलः—

यत्स्यादनभिसन्धाय पापं कर्म सकृत्कृतम् ।
तस्येह निष्कृतिः प्रोक्ता धर्मविद्भिर्मनीषिभिः ॥
विधेः प्राथमिकादस्माद् द्वितीये द्विगुणं भवेत् ।
तृतीये त्रिगुणं प्रोक्तं चतुर्थे नास्ति निष्कृतिः ॥
अभिसन्धिकृते पापे सकृद्वा नेह निष्कृतिः ।
अपरे निष्कृतिं प्राहुरभिसन्धिकृतेऽपि च ॥

तेनाज्ञानतो हि त्रिब्रह्मवधे च नावृत्तिः । कामतस्तु सकृत्कृतेऽपि नाधिकार इति विज्ञानेश्वरादयः । अपरे इति क्षुद्रपापपरम् । यदा कामतः तदा द्वैगुण्यमाह व्यासः—

गत्वैतदेव कुर्वीत गुरुतल्पमकामतः ।
कामतो द्विगुणं प्रोक्तं पूर्वेषु च यदुच्यते ॥

अङ्गिराः—अकामतः कृते पापे प्रायश्चित्तं न कामतः ।
स्यात्त्वकामकृते यत्तत् द्विगुणं बुद्धिपूर्वके ॥

एषु विशेषानुक्तेरुपपातकादिपरत्वम् । महापापे निषेध एवेत्येके ।

इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजम् ।
कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते ॥

इति मनूक्तेः । माधवीये बोधायनोऽपि—

अमत्या ब्राह्मणं हत्वा दुष्टो भवति धर्मतः ।
मुनयो निष्कृतिं तस्य वदन्त्यमतिपूर्वके ॥
मतिपूर्वं कृते तस्मिन्निष्कृतिर्नैव लभ्यते ॥

छागलेयः—प्रायश्चित्तमकामानां कामावाप्तौ न विद्यते । विज्ञानेश्वरादयस्तु इयमित्युक्तेः कामकृते द्वादशाब्दनिषेधः । प्रास्येदात्मानमग्नौ वा समिद्धे त्रिरवाक्शिराः । लक्ष्यं शस्त्रभृतां

वा स्यादिति मनूक्तेः। अकामावाप्तौ प्रायश्चित्तं कामकारकृते चात्मानमवसादयेदिति शातातपोक्तेः।

यः कामतो महापापं नरः कुर्यात्कथञ्चन।
न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते॥

इति स्मृत्यन्तराच्च। तेनाज्ञानकृते द्वादशाब्दाद्यैरिह लोके परत्र च सर्वथा पापनाशः। कामकृते तु मरणान्तिकेनापि तथा; व्यवहारासम्भवादित्याहुः। मरणान्तिकस्थानीयञ्च द्विगुणं द्वादशाब्दव्रतमित्युक्तमवकीर्णिव्रते। माधवस्तु पक्षद्वयमाह—पापस्य द्वे शक्ती नरकजनिका व्यवहारनिरोधिका च। कामकृते च प्रायश्चित्ताभावपक्षे द्विगुणव्रतेन व्यवहार्यत्वेऽपि नरकमस्त्येव। प्रायश्चित्तेन व्यवहारनिरोधकशक्तिनाशः। तदाह याज्ञवल्क्यः—

प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत्।
कामतो व्यवहार्यस्तु वचनादिह जायते॥

इति। विहितं यदकामानां कामात्तद् द्विगुणं चरेदित्यादेर्वचनात्। अन्ये त्विदं महापापभिन्नपरम्; न तस्येति तत्र मरणान्तिकनियमात्। यस्य तु व्यवहारानपेक्षस्य परलोक एव, शुद्ध्यपेक्षा, स मरणान्तिकमेव कुर्यादित्याहुः। शूलपाणिस्तु सत्यं मरणान्तेन नरकनाशः। द्विगुणत्वेनापि तन्नाश एव, न व्यवहार्यत्वम्। तेन याज्ञवल्कीये अव्यवहार्य इति व्यवच्छेदः। वचनं च मानवम्—

बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः।
शरणागतहन्तॄंश्च स्त्रीहन्तॄंश्च न संवसेत् इति।

याज्ञवल्क्योऽपि-शरणागतबालस्त्रीकृतघ्नान् संविशेन्न तु, इत्याह, तन्न; नह्यत्र बालादयो विप्राः, किन्तु क्षत्रियादयोऽपि। नच विप्रबालहन्तुस्तदपवादः, अकामतोऽपि तदापत्तेः। अतो

नेदं महापापपरम्। किन्तु बालत्वादिनिमित्तोऽपवादः। तेन पूर्वोक्तैव व्याख्या साध्वी। ननु हेमाद्रिमाधवादिसर्वनिबन्धेष्वादिपुराणे कलौ स्तेयभिन्ने महापापे प्रायश्चित्तं निषिद्धम् "संसर्गदोषस्तेयान्यमहापातकनिष्कृति" रिति। क्वत्या कामाकामचर्या? शृणु; स्तेयभिन्ने महापापेऽकामकृते निषेधः। "न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते" इति मरणान्तिकनियमात् तस्य च "प्रायश्चित्तविधानं च विप्राणां मरणान्तिकम्" इति कलौ निषेधात्। तच्च यद्यपि स्तेये तुल्यम्, तथापि स्तेयभिन्नेषु चतुर्षु मरणे स्वयंकर्तृत्वान्निषेधः। स्तेये तु "राज्ञे मुसलमर्पयेत्, राजा तं हन्यादिति" राज्ञः कर्तृत्वं न पापकर्तुः। तस्य तु प्रयोजकत्वान्न महापातकित्वम्। न च विधिना निषेधस्य बाधः, समानविषयत्वे हि बाधः। स चात्महत्याविधानात्तन्निषेधस्यैव, न तु जातिवधनिमित्तस्य। अतश्चतुर्षु आत्मघातदोषाभावेऽपि ब्रह्महत्यादोषोऽस्त्येव। स्तेये तु राज्ञो हिंसाकर्तृत्वान्न पापकर्तुर्दोष इति वयम्प्रतीमः। अत एव विप्राणामित्युक्तम्; क्षत्रियादिवधे महापापत्वाभावात्। तेन स्तेये कामकृते विप्राणां व्रतमेव द्विगुणम्। क्षत्रियादौ तु सर्वत्र द्वयम्। तेन स्तेयेऽतिपातकादौ च व्रतेऽधिकारः। अन्ये महापापिनो बहिष्कार्याः। संसर्गेऽपि पतितसंसर्गदोषसत्वेऽपि पातित्यं नेत्यर्थः। प्रतिलोमविजातीयनारीगामिनां संसर्गेऽपि दोष एव। 'सवर्णान्याङ्गनादुष्टैः संसर्गः शोधितैरपि' इति तत्रैवोक्तेः। इति।

तथाच बहूनां निबन्धकाराणां व्यवहार्य इति पदच्छेदस्यैव 'कामतो व्यवहार्यस्तु' इत्यत्र सम्मतत्वेऽपि कलौ यत्र संसर्गः शोधितैरपीति शोधितसंसर्गोऽप्याहत्य निषिद्धस्तत्र शारीरमीमांसासम्मतः पक्ष एव युक्तः।

[सहाशनादीनां पाति त्यापादकत्व विचारः]

अत्र संवत्सरेण पततीत्यादौ सहाशनादीनां समुच्चित्यानुष्ठितानां पातित्यप्रयोजकत्वमुत पृथक् पृथक्, एवं संवत्सरपर्यन्तं प्रत्यहं सहाशनादिकमेव पातित्यनिमित्तमुत षष्ट्युत्तरत्रिशतदिनपर्यन्तमित्यादिविचारः, तथा पतितोत्पन्नस्य पुत्रस्य कन्यायाश्च विषये शुद्धानां विवाहादिसम्बन्धयोग्यता वर्तते वा न वेत्यादिविचारश्च मदनरत्नप्रदीपे सम्यगेव सम्पादित इति तमपि सङ्गृह्यात्र विलिखामः। तद्यथा—

[प्रकृते मदनरत्न प्रदीपः]

पतनशब्दार्थमाह गौतमः—द्विजातिकर्मभ्यो हानिः पतनं परत्र चासिद्धिरिति। द्विजातीनां यानि विहितानि कर्माणि श्रौतानि स्मार्तानि च तेभ्यो हानिः। तत्रानधिकारिणः। परत्र लोके असिद्धिः पापकर्मप्रतिबन्धाद्युपात्तसुकृतफलानिष्पत्तिरित्यर्थः। अयञ्चानधिकारः प्रायश्चित्ततदङ्गजपादिव्यतिरिक्तेषु बोद्धव्यः। अन्यथा तदुपदेशोऽनर्थकः स्यात्। तत्र द्विजातिग्रहणं तेषामपि पातित्यश्रवणात्। संयोगं चैव तैः सहेति। अत्र तच्छब्देन पूर्वोक्तमहापातकादियुक्ता लक्ष्यन्ते; साक्षात्परकीयपातकसंसर्गस्य कर्तुमशक्यत्वात्। तेनायमर्थः—तैः पूर्वोक्तब्रह्महत्यादिमहापातकचतुष्टयान्यतममहापातकयुक्तैः प्रत्येकं संयोगसंसर्गमपि महापातकमाहुरिति। अत एव याज्ञवल्क्यः स्पष्टमेव महापातकयुक्तसंसर्गस्य महापातकत्वमाह—

ब्रह्महा मद्यपः स्तेनस्तथैव गुरुतल्पगः।
एते महापातकिनो यश्च तैः सह संवसेत्॥ इति।

तैरिति सर्वनाम्ना पूर्वोक्तानां ब्रह्महत्यादिमहापातकयुक्तानां चतुर्णामेव परामर्शात्तत्संसर्गस्यैव महापातकत्वम्, न तु संसर्गिसंसर्गस्या-

पीत्यवगन्तव्यम् । संसर्गिसंसर्गस्य तु 'एनस्विभिरनिर्णिक्तैर्नार्थं किञ्चित्समाचरेदिति' मनुना एनस्विमात्रसंसर्गस्य निषिद्धत्वात्पापजनकत्वमस्त्येव । महापातकिसंसर्गस्य पापहेतुत्वे विशेषमाह मनुरेव—

संवत्सरेण पतति पतितेन सहाचरन् ।
याजनाध्यापनाद्यौनान्न तु यानासनाशनात् । इति ।

अत्र पञ्चम्यौ द्वितीयार्थे । तेनायमर्थः—यानाशनासनानि पतितेन सहाचरन् कुर्वन् संवत्सरेण पतति, याजनाध्यापनयौनानि कुर्वन्न संवत्सरेण पतति, किन्तु सद्य एवेति । अत्र याजनं स्वेन तस्य, तेन वा स्वस्य । अध्यापनमपि स्वेन तस्य, तेन वा स्वस्य, यौनं योनिहेतुकः संसर्गः । तस्मै कन्यादानं तस्माद्वा कन्यायाः प्रतिग्रहः । यानं तेन सहैकयानारोहणम् । अशनं तेन सहैकस्यां पङ्क्तौ भोजनम् । आसनं तेन सहैकस्मिन्नासन उपवेशनम् । अत्रासनग्रहणमेकशय्याशयनस्योपलक्षणम् । वक्ष्यमाणवचनेऽस्यापि पातित्यहेतुत्वाभिधानाच्च । बृहद्विष्णुरपि—

संवत्सरेण पतति पतितेन सहाचरन् । एकयानभोजनासनशयनैर्यौनस्रौवमुख्यैस्तु सद्य एवेति । अत्रैकशब्दः शयनान्तैः सम्बद्ध्यते । एकभोजनमेकपङ्क्तिभोजनम् । एकशयनमेकस्यां शय्यायां तेन सह शयनम् । स्रौवं स्रुक्साध्यं याजनम् । मुख्यं मुखभवमध्यापनम् । अत्र मुख्यग्रहणमेकपात्रभोजनरूपसहभोजनस्योपलक्षणम् । अत एव देवलः—

याजनं योनिसम्बन्धं स्वाध्यायं सहभोजनम् ।
कृत्वा सद्यः पतत्येव पतितेन न संशयः ॥
बान्धवोऽपि पृथक् भूत्वा तत्पापं नाप्नुयात्क्वचित् ।

पृथक् भूतोऽपि संयोगाद्व्रजते दोषतुल्यतामिति ॥

अत्र सहभोजनमेकपात्रभोजनम्, नत्वेकपङ्क्तिभोजनम्। अत्र विनिगमकं व्यवहिताव्यवहितसम्बन्धत्वमेव। अत्र यानग्रहणं भोजनासनशयनानामुपलक्षणम्। एतेन मनुवाक्ये याजनाध्यापनाद्यौनादिति सद्यः पातित्यहेतुषु यौनपदमपि सहभोजनस्योपलक्षणम्। तेनात्र सर्वेषां वाक्यानामयमर्थः—एकयानभोजनशयनासनानि पतितेन सह कुर्वन् संवत्सरेण पतति। याजनाध्यापनविवाहसम्बन्धसहभोजनानि कुर्वन् सद्य एवेति। अत्र च 'एभिस्तु संवसेद्यो वै वत्सरं सोऽपि तत्समः', इति याज्ञवल्क्यवचने वत्सरमित्यत्यन्तसंयोगवाचिन्या द्वितीयायाः श्रवणात् यानादिचतुष्टयस्य संवत्सरं निरन्तराभ्यासे पातित्यहेतुत्वमित्यवगन्तव्यम्।

देवलेन तु स्पष्टमेवोक्तम्—

संवत्सरेण पतति पतितेन सहाचरन्।
भोजनासनशय्यादि कुर्वाणः सार्वकालिकम् ॥

इति। तेन संवत्सरमध्ये दिनमात्रान्तरेणापि दिनान्तरमादाय यदा षष्ट्यधिकशतत्रयदिवसव्यापित्वं संसर्गस्य भवति, तदैव महापातकहेतुत्वम्। अन्यदा तु निषिद्धत्वेन पापजनकत्वमिति विवेकः। अत्र पूर्वोदाहृतबृहद्विष्णुवाक्ये एकयानभोजनासनशयनैरिति द्वन्द्वात्परया तृतीयया इतरेतरयुक्तानामेवैकयानादीनां पातित्यहेतुत्वम्। प्रत्येकन्तु—

आसनाच्छयनाद्यानात्सम्भाषात्सहभोजनात्।
संक्रामन्ति हि पापानि तैलबिन्दुरिवाम्भसि ॥
संलापस्पर्शनिश्वाससहयानासनाशनात्।
याजनाध्यापनाद्यौनात्पापं संक्रामते नृणाम् ॥

इत्यादिभिः पराशरादिवचनैर्निरपेक्षाणामपि पापहेतुत्वावगमात्पापहेतुत्वम्; न तु पातित्यहेतुत्वम्। तस्मिन्नेव वचने यौनस्रौवमुख्यैरिति द्वन्द्वनिर्देशे सत्यपि प्रत्येकमेव यौनादीनां सद्यःपतनहेतुत्वम्। यः पतितैः सह यौनमुख्यस्रौवानां सम्बन्धानामन्यतमं सम्बन्धं कुर्यात्तस्याप्येतदेव प्रायश्चित्तमिति सुमन्तुवचनादित्युक्तं विज्ञानेश्वराचार्यैर्मिताक्षरायाम्। यत्तु—

षाण्मासिके तु संसर्गे याजनाध्यापनादिना।
एकत्रासनशय्याभिः प्रायश्चित्तार्धमाचरेदिति॥

बृहस्पतिना याजनाध्यापनयौनैकपात्रभोजनैः षण्माससंसर्गे पातित्यमुक्तम्, तदकामतोऽत्यन्तापदि पञ्चमहायज्ञादिप्राययाजने पूर्वोक्त एव विषयेऽङ्गाध्यापने दुहितृभगिनीव्यतिरिक्तव्यवहितयोनिसम्बन्धे वेदितव्यम्। अन्यथा पूर्वोदाहृतैर्याजनादीनां सद्यः पातित्यहेतुत्वप्रतिपादकैर्वचनैर्विरोधः स्यात्। यौनसंसर्गविशेषे दोषाभावमाह याज्ञवल्क्यः—कन्यां समुद्वहेदेषां सोपवासामकिञ्चनामिति। एषां पतितानां कन्यां पतितावस्थायामुत्पन्नामकिञ्चनां अलङ्कारादिपित्र्यधनरहिताम्। अत्र विशेषमाह वृद्धहारीतः—

पतितस्य कुमारीं विवस्त्रामहोरात्रमुपोषितां प्रातः शुक्लेनाहतेन वाससाच्छादितां नाहमेतेषां न ममैते इति त्रिरुच्चैरभिदधानां तीर्थे स्वगृहे वोद्वहेदिति॥ अत्र तीर्थे स्वगृहे वोद्वहेदित्यनेन त्यक्तपतितसंसर्गां कन्यां स्वयमेवोद्वहेन्न तु पतितहस्तात्प्रतिगृह्णीयादिति दर्शयति। याज्ञवल्क्यवचने कन्यां समुद्वहेदिति वचनात् कन्याव्यतिरिक्तपतितापत्यस्य संसर्गानर्हता विज्ञायते। अत एव वसिष्ठः—पतितोत्पन्नः पतितो भवत्यन्यत्र स्त्रियः, सा हि परगामिनी, तामरिक्थामुपेयादिति। तदेवं ब्रह्महत्या सुरापानं ब्राह्मणसु-

वर्णस्तेयं गुर्वङ्गनागमनमेभिः प्रत्येकं पूर्वोक्तसंसर्गश्चेति पञ्चमहापातकानि मनुनोक्तानि। तत्र त्रैवर्णिकानां सुरापाननिषेधात् शूद्रस्य सुरापाननिषेधाभावात् सुरापानं त्रैवर्णिकानामेव महापातकं न शूद्रस्य। अन्यानि तु 'ब्राह्मणो न हन्तव्य' इत्यादीनि मनुष्यमात्राधिकारेण निषेधस्य प्रवृत्तत्वान्मनुष्यमात्रस्य महापातकानि—इति॥

अत्रानुसन्धेया मिताक्षरा त्वियमेव। सा यथा—

संसर्गश्च स्वनिबन्धनकर्मभेदादनेकधा भिद्यते। यथाह वृद्धबृहस्पतिः। "एकशय्यासनं पङ्क्तिर्भाण्डपङ्क्त्यन्नमिश्रणम्। याजनाध्यापने योनिस्तथा च सहभोजनम्॥ नवधा संकरः प्रोक्तो न कर्तव्योऽधमैः सहेति। देवलोऽपि—संलापस्पर्शनिःश्वाससहयानासनाशनात्। याजनाध्यापनाद्यौनात्पापं संक्रमते नृणामिति। एकशय्यासनमेकखट्वासनमेकपङ्क्तिभोजनमेकभाण्डपचनमन्नेन मिश्रणं संसर्गस्तदीयान्नभोजनमिति यावत्। याजनं पतितस्य स्वेन स्वस्य वा तेन। अध्यापनं तस्य स्वेन स्वस्य वा तेन। यौनं तस्मै कन्यादानं तत्सकाशाद्वा कन्यायाः प्रतिग्रहः। सहभोजनमेकामत्रभोजनम्। संलापः संभाषणम्। स्पर्शो गात्रसंमर्दः। निःश्वासः पतितमुखवायुसम्पर्कः। सहयानमेकतुरगाद्यारोहणम्। एतेषां मध्ये केन कर्मणा कियता कालेन पातित्यमित्यपेक्षायां वृहद्विष्णुनोक्तम्—संवत्सरेण पतति पतितेन सहाचरन्। एकयानभोजनासनशयनैर्यौनस्रौवमुख्यैस्तु सम्बन्धैः सद्य एवेति'।

अत्रैकभोजनमेकपङ्क्तिभोजनम्। एकपात्रभोजने तु सद्यः पातित्यम्। "याजनं योनिसम्बन्धं स्वाध्यायं सहभोजनम्। कृत्वा सद्यः पतत्येव पतितेन न संशयः' इति देवलस्मरणात्। स्रौवश-

ब्देन याजनमभिधीयते। मुख्यशब्देन मुखभवत्वेनाध्यापनम्। यौनस्रौवमुख्यैरिति सत्यपि द्वन्द्वादिनिर्देशे प्रत्येकमेव तेषां सद्यः पतनहेतुत्वम्। 'यः पतितैः सह यौनमुख्यस्रौवानां संबन्धानामन्यतमं सम्बन्धं कुर्यात्तस्याप्येतदेव प्रायश्चित्तमिति सुमन्तुस्मरणात्। एकयानादिचतुष्टयस्य तु समुदितस्यैव पतनहेतुत्वम्। एकयानभोजनासनशयनैरिति' इतरेतरयुक्तानां निर्देशात्। प्रत्येकानुष्ठानस्य तु पतनहेतुत्वाभावेऽपि दोषहेतुत्वमस्त्येव। "आसनाच्छयनाद्यानात्संभाषात्सहभोजनात्। संक्रामन्ति हि पापानि तैलबिन्दुरिवाम्भसीति" पराशरवचनेन निरपेक्षाणामपि पापहेतुत्वावगमात्। संलापस्पर्शनिःश्वासानां तु यानादिचतुष्टयेनानुषङ्गिकतया समुच्चितानामेव पतनहेतुत्वम्, न पृथग्भूतानामल्पत्वात्। पापहेतुत्वं पुनरस्त्येव; संलापस्पर्शनिःश्वासेति देवलवचनस्य दर्शितत्वात्। अतः संलापादिरहिते सहयानादिचतुष्टये कृते पञ्चमभागोनं द्वादशवार्षिकं प्रायश्चित्तं कुर्यात्। तत्सहिते तु पूर्णम्। एवं च सति "एभिस्तु संवसेद्यो वै वत्सरं सोऽपि तत्समः" इति योगीश्वरवचनमपि सहयानादिचतुष्टयपरमेव युक्तम्। अतः संलापादीनां पृथक्पातित्यहेतुत्वं नास्ति। अत एव मनुना—"संवत्सरेण पतति पतितेन सहाचरन्। याजनाध्यापनाद्यौनान्न तु यानासनाशनादिति" यानादिचतुष्टयस्यैव संवत्सरेण पातित्यहेतुत्वमुक्तम् (अ० ११ श्लो० १८०)। अत्रासनग्रहणं शयनस्याप्युपलक्षणम्।

अत्र च 'संवत्सरेण पतति पतितेन सहाचरन्' यानासनाशनादिति व्यवहितेन सम्बन्धः। प्राग्दर्शितविष्णुवचनानुरोधात्। तथा "संवत्सरेण पतति पतितेन सहाचरन्। भोजनासनश-

ष्यादि कुर्वाणः सर्वकालिकमिति' वचनाच्च। न चानन्वयदोषः; यानासनाशनादिहेतोराचरन्नाचारं कुर्वन्निति भेदविवक्षया सम्बन्धोपपत्तेः। यथा एतया पुनराधेयसंमितयेष्ट्वेति। यद्वा आचरन्निति शत्रा हेत्वर्थस्य गमितत्वात्। यानासनाशनादिति द्वितीयार्थे पञ्चमी। याजनाध्यापनाद्यौनान्न तु संवत्सरेण पतति, किंतु सद्य एव; प्राचीनवचननिचयानुरोधादेव। अतो यौनादिचतुष्टयेन सद्यः पतति, यानादिचतुष्टयेन तु संवत्सरं निरन्तराभ्यासेनेति युक्तं 'वत्सरं सोऽपि तत्समः' इति। अत्यन्तसंयोगवाचिन्या द्वितीयाया दर्शनादन्तरितदिवसगणना कार्या। यथा षष्ट्यधिकशतत्रयदिवसव्यापित्वं संसर्गस्य भवति, ततो न्यूने तु न पतितप्रायश्चित्तं किं त्वन्यदेव। यथाह पराशरः—

"संसर्गमाचरन्विप्रः पतितादिष्वकामतः।
पञ्चाहं वा दशाहं वा द्वादशाहमथापि वा॥"
"मासार्धं मासमेकं वा मासत्रयमथापि वा।
अब्दार्धमेकमब्दं वा भवेदूर्ध्वं तु तत्समः॥"
"त्रिरात्रं प्रथमे पक्षे द्वितीये कृच्छ्रमाचरन्।
चरेत्सान्तपनं कृच्छ्रं तृतीये पक्ष एव तु॥
"चतुर्थे दशरात्रं स्यात्पराकः पञ्चमे ततः।
षष्ठे चान्द्रायणं कुर्यात्सप्तमे त्वैन्दवद्वयम्॥
अष्टमे च तथा पक्षे षण्मासान्कृच्छ्रमाचरेदिति॥"

कामतः संसर्गे पुनर्विशेषः स्मृत्यन्तरेऽभिहितः। सुमन्तुः—"पञ्चाहे तु चरेत्कृच्छ्रं दशाहे तप्तकृच्छ्रकम्। पराकस्त्वर्धमासे स्यान्मासे चान्द्रायणं चरेदिति॥ मासत्रये प्रकुर्वीत कृच्छ्रं चान्द्रायणोत्तमम्। षाण्मासिके तु संसर्गे कृच्छ्रं त्वब्दार्धमाचरेत्॥

संसर्गे त्वाब्दिके कुर्यादब्दं चान्द्रायणं नरः ॥' इति । अत्र चाब्दिके संसर्गे इति किञ्चिन्न्यून इति द्रष्टव्यम् । पूर्णे तु वत्सरे मन्वादिभिर्द्वादशवार्षिकस्मरणात् । यत्तु बार्हस्पत्यवचनम्—"षाण्मासिके तु संसर्गे याजनाध्यापनादिना । एकत्रासनशय्याभिः प्रायश्चित्तार्थमाचरेदिति । याजनाध्यापनयानैकपात्रभोजनानां षण्मासात्पातित्यवचनमेतदकामतोऽत्यन्तापदि पञ्चमहायज्ञादिप्राये याजनेऽङ्गाध्यापने दुहितृभगिनीव्यतिरिक्ते च योनिसम्बन्धे द्रष्टव्यम् ॥ प्रकृष्टयाजनादिभिः सद्यः पातित्यस्योक्तत्वात् ॥

यत्तु सुमन्तुः—चण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च । पतत्यज्ञानतो विप्रो ज्ञानात् साम्यं तु गच्छति ॥". अत्राज्ञानात् सकृत् तत्स्त्रीगमनेऽष्टाचत्वारिंशद्भोजने च द्वादशाब्दम्, ज्ञाने तत्समत्वाद्द्विगुणप्रायश्चित्तेऽप्यव्यवहार्य्यतेति वदतां कमलाकरभट्टानां प्रायश्चित्तरत्नकाराणां तु इदमेव मतमवगम्यते, यत् यत्र यत्र तत्समत्वाभिधानम्, तत्र तत्र कृतप्रायश्चित्तानामपि न व्यवहार्यत्वमिति । तथाच "कामतो व्यवहार्यस्तु वचनादिह जायते" इति वचने व्यवहार्य इति पदच्छेदपक्षेऽपि यत्र न म्लेच्छादिसमत्वम्, तत्रैव प्रवृत्तिः,न पापसामान्ये इति कृतप्रायश्चित्तानामपि मतान्तरप्रविष्टानां यावन्न म्लेच्छसमत्वम्, तावदेव व्यवहारयोग्यता । तदनन्तरं यावत् प्रायश्चित्तविधिविषयता, तावत्—बौधायनवचनानुसारेण परस्परं यजनयाजनादिसम्बन्धः, अनन्तरं तु न स्वकर्माधिकारोऽपीति मन्तव्यम् । अत्र हि मते 'चतुर्थे नास्ति निष्कृति,रित्यस्य द्विवारं ज्ञानकृतपातित्ये न प्रायश्चित्तयोग्यतापीत्यत्रैव तात्पर्यं विवक्षितम् । तथाच मतान्तरं प्रविष्टा अज्ञानात्, मोहात् बलात्कारेण छलाद्वा यदि म्लेच्छस्त्रीसङ्गमं विना, तत्रा-

ष्टाचत्वारिंशदधिकभोजनं विना च स्वमतप्रवेशं काङ्क्षन्ति, तर्हि स्वपूर्वतनजातिप्रवेशो भवितुमर्हत्येवेति प्रतिभाति। अयमेव पक्षः शूलपाणेरपि संमतः।

यत्तु मिताक्षरादिषु षष्ठ्यधिकत्रिशतदिवसपर्यन्तमभ्यासेऽपि न पातित्यापादकत्वं सहासनाशनशयनानामिति निरूपितम्, तत्र सहाशनशब्देनैकपङ्क्तिभोजनस्यैव विवक्षणादत्र चैकामत्रभोजनस्यैव विवक्षितत्वान्न विरोधः। अत्रापि पक्षे एकामत्रभोजनेन सद्यः पातित्यमिति यन्मिताक्षरायामुक्तम्, तदिदमपि अज्ञान एवोक्तावृत्तिनिमित्तत्वम्, न तु ज्ञाने, ज्ञाने तु सकृदेकामत्रभोजनेऽपि पातित्यस्योरीकरणेन विरुद्धं भविष्यति।

अष्टाचत्वारिंशद्वारभोजनावृत्तौ द्वादशाब्दमिति प्रायश्चित्तरत्नाकरव्यवस्था तु चण्डालपक्वान्नविषयैव, न तु तत्सहभोजनादिविषया। तत्र तु मिताक्षरादिसिद्धान्त एव तेषामपि सम्मतः। नहि—चण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य चेति वचने तत्सहभोजनैकभोजनादिविवक्षा समस्ति। तथाच साधारणसहभोजनादिकमेकसंवत्सरपर्यन्तमपि पतितैस्सह न पातित्यापादकमिति सिद्धम्।

अत्रेदमेवालोचनीयम्—यत् कथमष्टाचत्वारिंशत्संख्याया अत्र विवक्षेति। अत्र श्रीआशुतोषशिरोरत्नमहोदया एवं मन्यन्ते—यत् चण्डालान्त्यस्त्रियो गत्वा भुक्त्वाच प्रतिगृह्य च। पातित्यं ज्ञानतोऽज्ञानादिति पातित्याभिधानात्— षड्भिर्वर्षैः कृच्छ्रचारी ब्रह्महा तु विमुच्यते" इति वचनानुसारेण षडब्दकृच्छ्रप्रायश्चित्तस्यैवाशीत्युत्तरधेनुप्रत्याम्नायकस्यानुष्ठेयत्वात्। एवं सकृच्चण्डालान्नभक्षणे—रजकव्याधशैलूषवेणुचर्मोपजीविनः। एतेषां यस्तु

भुञ्जीन द्विजश्चान्द्रायणं चरेत्, इति सकृद्भक्षणे एकचान्द्रायणे सार्धसप्तधेनुप्रत्याम्नायकेऽष्टाचत्वारिंशच्चान्द्रायणानां द्वादशाब्दसमानकस्य त्वस्यैव वक्तव्यत्वाद्वा सर्वोपपत्तिरिति। अत्र प्रथमोपपत्तौ—अज्ञानतोऽष्टचत्वारिंशद्भोजने द्वादशाब्दमित्यस्य षडब्दकृच्छ्रपरत्वे यद्यपि क्लिष्टा कल्पना, द्वितीयोपपत्तौ तु न सापि समस्ति। सर्वथा तु—अज्ञानतोऽपि अष्टाचत्वारिंशदधिकभोजने ज्ञानतश्चतुर्विंशत्यधिकभोजने वा न व्यवहारयोग्यता मतान्तरप्रविष्टानां कृतप्रायश्चित्तानामपीति। तदुक्तं प्रायश्चित्तरत्ने कमलाकरभट्टकृते—ज्ञाने तु तत्समत्वाभिधानात् द्विगुणप्रायश्चित्तेऽव्यवहार्यतेति।

यत्तु पुनर्मिताक्षरायाम्—तत्र मत्यभ्यासे तु प्रतिनिमित्तं नैमित्तिकावृत्तिरिति न्यायात् प्रतिनिमित्तं नैमित्तिकावृत्तौ प्रसक्तायां लोगाक्षिणा विशेष उक्तः, अभ्यासेऽहर्गुणा वृद्धिर्मासादर्वाग् विधीयते। ततो मासगुणा वृद्धिर्यावत्संवत्सरं भवेत्। ततः संवत्सरगुणा यावत्पापं समाचरेत्। इति। इदं मतिपूर्वविषयमिति—वर्णितम्, तदिदं विष्णुस्मृतिव्याख्यायां नन्दपण्डितकृतायां वैजयन्त्याख्यायामभ्यासेहर्गुणा वृद्धिरित्यस्य विशिष्य वेश्यास्त्रीगमनपरत्वस्यैवोरीकरणात्, मिताक्षरायामपि—"साधारणस्त्रीसंभोगे तु हीनयोनिनिषेवणमित्युक्तम्। तत्रापि—पशुवेश्याभिगमने प्राजापत्यं विशोधनम्" इति संवर्तोक्तमकामतो द्रष्टव्यम्। कामतस्तु यमेनोक्तम्—वेश्यागमनजं पापं व्यपोहन्ति द्विजातयः। पीत्वा सकृत्सकृत्तप्तं सप्तरात्रं कुशोदकम्—इत्युक्त्यनन्तरमेवमेव विषयमधिकृत्येदं लौगाक्षिवचनं प्रवृत्तम्। तथाचोक्तवचनानुसारेण बहुकालाभ्यासेऽपि प्रायश्चित्तन्यूनतापादनं केषांचन परास्तम्।

एतेन—म्लेच्छादिस्त्रीगममपि—व्याख्यातम्। तदपि हि साधारणं विशिष्टमिति द्विविधम्। तत्र साधारणेन न सद्यः पातित्यम्। किन्तु बहुकालाभ्यास एव। तदुक्तं मिताक्षरायाम्—"चण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च। पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति"। चण्डालादिसाम्यं प्रतिपादयता मनुनाऽपि कामतोऽत्यन्ताभ्यासे मरणान्तिकं दर्शितम्। तथा ह्यज्ञानतश्चाण्डालीगमनाभ्यासे पतत्यतः पतितप्रायश्चित्तं द्वादशवार्षिकं कुर्यात्। कामतोऽत्यन्ताभ्यासे चाण्डालैः साम्यं गच्छत्यतो द्वादशवार्षिकाधिकं मरणान्तिकं कुर्यात्। एतच्च बहुकालाभ्यासविषयम्। एकरात्राभ्यासे तु वर्षत्रयम्। यथाह मनुः (अ० ११ श्लो० १७८) "यत्करोत्येकरात्रेण वृषलीसेवनाद् द्विजः। तद्भैक्ष-भुग्जपन्नित्यं त्रिभिर्वर्षैर्व्यपोहतीति"। अत्र वृषलीशब्देन चाण्डाल्यभिधीयते। "चण्डाली बन्धकी वेश्या रजःस्था या च कन्यका। ऊढा या च सगोत्रा स्याद्वृषल्यः पञ्च कीर्तिताः" इति स्मृत्यन्तरे वृषलीशब्दप्रयोगदर्शनात्। बन्धकी स्वैरिणी। कथं पुनरत्राभ्यासावगमः? उच्यते; 'यत्करोत्येकरात्रेण' इत्यन्तसंयोगापवर्गवाचिन्यास्तृतीयाया दर्शनात् एकरात्रेण चात्यन्तसंयोगो गमनस्याभ्यासं विनाऽनुपपन्न इति गमनाभ्यासोऽवगम्यते। अत एवैकरात्राद्बहुकालाभ्यासविषयं प्रागुक्तं द्वादशवर्षादिगुरुतल्पव्रतातिदेशिकं मरणान्तिकं च। यदा पुनर्ज्ञानतोऽज्ञानतो वा चाण्डालाद्याः सकृद्गच्छति, तदा "चाण्डालपुल्कसानां तु भुक्त्वा गत्वा च योषितम्। कृच्छ्राब्दमाचरेज्ज्ञानादज्ञानादैन्दवत्रयमिति" यमाद्युक्तं संवत्सरं कृच्छ्रानुष्ठानम्। अमत्या चान्द्रायणत्रयं यथाक्रमेण द्रष्टव्यम्।

अत्र चण्डालम्लेच्छयोरयं विशेषः—यत् म्लेच्छाः मोहम्मदादयः कर्मणा पतिताः, नतु जातितः, म्लेच्छानां प्रतिलोमसंकरत्वाभावात्। अतो महाभाष्यं 'शूद्राणामनिरवसितानामि'ति सूत्रे ग्रामादनिरवसितत्वात् म्लेच्छयवनमिति प्रयोगसाधुतोपपादितोपपद्यते। एतेन मोहम्मदादीनां ग्रामे प्रवेशे चण्डालानां कथं न प्रवेश इति अधुनातनानामाक्षेपोऽपि—परास्तः। पतितस्य ग्रामतोऽपि निष्कासनं हि त्रेतायुगविषयम्। तदुक्तं त्रेतायां ग्राममुत्सृजेदिति। कलौ हि न म्लेच्छानां पतितानां ग्रामपरित्यागः प्रतिषिद्धः। व्यक्तं चैतत्पूर्वमेव विवेचितम्, यत्—पराशराचार्यैश्चण्डालविषये संभाषणस्यापि निषेधात्, चण्डालादिजातिपातित्ये न न्यूनताकल्पनं तत्सम्मतमिति। एवं च 'कर्तारं तु कलौ युगे' इति वदन्त एव पराशराचार्याश्चण्डालदर्शनादावपि प्रायश्चित्तविधानेन धर्मपतितानां विषय एव दोषन्यूनताकल्पनं संभवतीति मन्यन्ते, न जातिपतितविषय इति स्पष्टमेव सूचयन्तीति व्यर्थमेवेदमान्दोलनं मोहम्मदादिदृष्टान्तेन चण्डालादिस्पृश्यतोपपादनार्थम्। एवं वदतामस्माकं मोहम्मदादिभ्यः एकत्र निकर्षेऽपि अस्मदीयशास्त्राधिकारितया व्यवहारे तेषामुत्कर्षो न नाभिमन्यते, इदमेवाभिमतमस्माकम्—यत् स्वधर्मश्रद्धालूनामेतेषां धर्मे श्रद्धा यथा स्यात्, यथा च पराणां प्रतारणपारवश्यं न स्यात्, तथा करणार्थं सर्वैरपि यतितव्यमेव, नतु मोहम्मदादिप्रवेशो मा भूदिति ग्रामादिषु प्रवेशव्यवस्थापनाख्येनोत्कोचेन व्यवहर्तव्यमिति। उत्कोचस्य हि काष्ठा निरवधिरेवेति सर्व एव विजानन्तीति नात्र विस्तरीतुमभिलषामः।

तदयं निष्कर्षः—कृतप्रायश्चित्तस्यापि पतितस्य कलौ न व्यवहार्यत्वम्। तत्र कन्यातिरिक्तपतितापत्यस्यापि पतितत्वमेव। तस्या-

पि कृतप्रायश्चित्तस्य न व्यवहार्यत्वम् । कन्यायास्तु न पातित्यम् । न वाऽव्यवहार्यत्वम् । तत्र च कन्यायाः स्वपित्रादिसम्बन्धः सर्वथा परित्यक्तव्यः । पतिततत्पुत्रादीनान्तु कृतप्रायश्चित्तानां परस्पर-याजनादिना धर्माधिकारः। सोऽपि तन्त्रशास्त्रेष्वेवेति शिवार्कमणि-दीपिकायामुक्तम् । मदनपारिजातमतन्तु स्वीयनित्यकर्मानुष्ठानं प्राचीनमेव भवतीति । तदत्र वयं चतुर्गुणप्रायश्चित्ताधिकारिणा-मव्यवहार्यता, कृतप्रायश्चित्तानां च तान्त्रिकधर्माधिकारः, तन्न्यून-प्रायश्चित्ताधिकारिणां व्यवहार्याणां कृतप्रायश्चित्तानां च वैदिक-धर्माधिकारो योग्य इति सूचयामः। अत्र च धर्मज्ञा एव प्रमाणम् । इदमेवात्रास्माकं वक्तव्यं यत्पतितसंसर्गः सहाशनादिः समुचितो निरन्तरं संवत्सरं न कर्तव्यः । यावच्छक्ति तत्तज्जात्योदिधर्मपरिपा-लनार्थमेव प्रयत्नः कर्तव्य इति च । सर्वथा तु चण्डालादिसंसर्ग-दोषतावाद इदानींतनानामप्रामाणिकः । न वा धर्मज्ञा अपि तव्य-वस्थासम्पादने शक्ता इति सिद्धम् । यत्तु कृतप्रायश्चित्तस्यापि कलौ न व्यवहार्यत्वमिति वर्णितम्, तदिदं कलिवर्ज्यप्रकरणगतानां वाक्यानामनुसरणेनैवेति स्पष्टप्रतिपत्त्यर्थं निर्णयसिन्धुगतं कलिव-र्ज्यप्रकरणमत्रोद्धृत्य प्रकाश्यते । तद्यथा—

यस्तु कार्तयुगो धर्मो न कर्तव्यः कलौ युगे ।
पापप्रयुक्ताश्च सदा कलौ नार्यो नरास्तथा ॥

इत्यादित्यपुराणवचनेन यद्यपि कृतयुगसम्बन्धिधर्मसामान्यं निषिद्धम् । तथापि सर्वस्य तस्य निषेद्धुमशक्यत्वाद्विशेषानाह समुद्रेति ॥ यद्यपि समुद्रयानं न विहितम् । तथापि बोधायनेन समुद्रयानं ब्राह्मणस्य न्यासापहरणमित्यादिना तत्कर्तुः प्रायश्चित्तं विहितम् । तदपि कलौ कर्तव्यमेवेति तत्करणानन्तरं तव्यवहारो

निषिद्ध्यते। "द्विजस्याब्धौ तु नौयातुः शोधितस्यापि संग्रहः" इत्यग्निमवचनाच्च। एतच्च प्रायश्चित्तं रागप्राप्ते समुद्रयान एव। शङ्खोद्धारादितीर्थयात्राविधिनान्तरीयकसमुद्रयानतो दोषाभावात् न प्रायश्चित्तमित्यन्यत्र विस्तरः। अत्र क्रत्वर्थमात्रनिषेधेऽपि न क्षतिः; पुरुषार्थनिषेधान्तरसत्त्वात्। श्राद्धे इत्युपलक्षणम्। तेनोपयाचितकादावपि निषेधः। पशोरिति। महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेदित्यजादिसंग्रहार्थं पशुपदम्। मांसदानमिति। श्राद्धसम्बन्धि क्रत्वर्थं पुरुषार्थं च निषिद्ध्यते। यथा 'वेदिर्बर्हिद्धर्माणां' प्रधानसम्बन्धिमात्रांशे विधिः, न तु तादर्थ्यांशेऽपि, मानाभावात्। तद्वत्—

शौचञ्च पात्रशुद्धिश्च श्रद्धा च परमा यदि
अनन्ततृप्तिकृच्छ्राद्धमेतत्खलु न चामिषम्॥

इति पुरुषार्थमामिषदानं निषिद्ध्यते, न तु क्रत्वर्थम्। विधिस्पृष्टे निषेधानवकाशादित्यपहस्तितम्। वानप्रस्थेति। सुते विन्यस्तपत्नीकस्तया वानुगतो वनम्। वानप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेदिति विहितः। वानप्रस्थो बुभूषुरिति शेषः। दीर्घकालमिति। अष्टचत्वारिंशद्वर्षाणि वेदब्रह्मचर्यमिति श्रुतिविहितम्।

यदि चात्यन्तिको वासो रोचेत स्वगुरोः कुले।
युक्तः परिचरेदेनमाशरीरविमोक्षणात्॥
आचार्ये तु खलु प्रेते गुरुपुत्रे गुणान्विते।
गुरुदारे सपिण्डे वा गुरुवद्वृत्तिमाचरेत्॥
एतेष्वविद्यमानेषु स्थानासनविहारवान्।
प्रयुञ्जानोऽग्निशुश्रूषां साधयेद्देहमात्मनः॥

इति विहितं नैष्ठिकं च। स्थानमङ्गुष्ठाग्रादिना नियतमूर्धा-

वस्थानम्। आसनं नियमोपवेशनम् । विहारो भ्रमणम् , एतैस्तपो-
विशेषो लक्ष्यते। नव्यास्तु दीर्घकालमिति कालापवादमात्रम्,
अन्यथा दीर्घब्रह्मचर्यमित्येव ब्रूयात् । तेन श्रौतमेव निषिद्ध्यते, न
नैष्ठिकम् । तेन द्राविडानां नैष्ठिकाचारोऽपि सङ्गच्छत इत्याहुः।
नरमेधेति । ब्रह्मणे ब्राह्मणमालभेत इति 'तरति ब्रह्महत्यां योऽश्व-
मेधेन यजते' इति विहितौ। महाप्रस्थानेति । यो जीवितुं न शक्नो-
ति महाव्याध्युपपीडितः । सोदग्दिशं महायात्रां कुर्वन् वा न प्रदु-
ष्यतीति विहितमाशरीरपातमुत्तरदिग्गमनम् । गोमेधश्चेति । मैत्रा-
वरुणीं गां वशामनुबन्ध्यामालभेतेति विहितो यागभेदः । चकारा-
द्राजसूयग्रहः। न कलौ क्रियते अश्वमेधो वा वा च गोसवः(१)। नर-
मेधोऽक्षता नारी देवरात्पुत्रसन्ततिः । गर्हितं सप्तकं ह्येतद्राजसूय-
कमण्डलुरिति हेमाद्रौ गारुडाद्वा। राजसूयश्च राजा राजसूयेन
यजेतेति विहितः। कमण्डलुरित्युक्तेः इति । इदमुपलक्षणम्।
दाक्षायणी ब्रह्मसूत्री वेणुमान् सकमण्डलुरित्युक्तस्योपलक्षणम्।
तथाच स्नातकस्येत्युक्तेः । अथ कमण्डलुचर्यामुपदिशन्तीति बौ-
धायनोक्तेतिकर्तव्यताकः काष्ठमयो मृण्मयो वेत्यर्थः । तेन मृण्म-
यो वेति वाकारः सङ्गच्छते । न च कमण्डलुधारणं वानप्रस्थाश्रम
इति मतं सम्यक् ; तस्य पृथगुपादानात् । ननु दत्तापदं कुतो न
वाग्दत्तापरमित्यत आह –ऊढाया इति । ज्येष्ठांशमिति । ज्येष्ठस्य
विंश उद्धारः सर्वद्रव्याच्च यद्वरमिति विहितम् । गोवधमिति ।
मधुपर्के इति शेषः । भ्रातृजायामिति । जायामिति शेषः । पञ्चेति
न परिसंख्या ; वाक्यान्तरदर्शनात् । एतद्वाक्योपात्तत्वोपाधिना च
पञ्चत्वम् । आदिभिरित्यादिना 'क्षतावदृष्टे कन्यैव पुनर्देयेति केचन'
इत्यादिपरिग्रहः । ननु पैतृष्वस्रीयीमातुलकन्ययोर्विवाहे तृतीं जहु-

मित्यादि श्रुतिः प्रमाणम्; श्रुतेः स्मृत्यपेक्षया प्राबल्यादाह—तेनेति। युगान्तरेति। न चैतद्युग एव अर्जुनादीनां कथं मातुलकन्यापरिणय इति वाच्यम्; विहितान्यपि कर्माणीत्यग्रिमवाक्यात्। मद्यमिति। सुरापैष्टीनां चायं निषेधो न विषयीकरोति; सुरामद्ययोर्भेदात्। सुरा वै मलमन्नानां पाप्मा च मलमुच्यते। तस्माद् ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेदिति मनुना द्विजातिसामान्ये तन्निषेधाच्च। न च—माध्वीकमैक्षवं सैरं तालं खार्जूरपानसम्।

मधूत्थं चैव माध्वीकं मैरेयं नारिकेलजम्॥
अमेध्यानि दशैतानि मद्यानि ब्राह्मणस्य तु॥ इति॥

विष्णुना सामान्यत एव तन्निषेधात् 'नित्यं मद्यं ब्राह्मणो वर्जयेत्', इति निषेधान्तराच्च। किन्तु कामादपि हि राजन्यो वैश्यो वापि कथं (१) ... . कादि पुरस्कारेण वामागमादौ विहितं विनायकशान्त्यादौ च क्षत्रियादेरुक्तं मद्यं निषिध्यते, नन्वेतावता निषेधस्य प्राप्तिपूर्वकत्वोपपत्तौ कथं स्त्रीभ्यश्च सुरामाचाममिति सङ्गच्छते; मद्ये सुरालक्षणायां मानाभावात्। शृणु। मद्यमपीह सुराशब्देन ग्रहीतुं शक्यते। गौडीपैष्टीमाध्वीभेदेन तस्यास्त्रिविधत्वात्। विहितमिति। आश्वलायनगृह्ये परेद्युरन्वष्टक्यमित्यत्र विहितमित्यर्थः। ओदनाग्रद्रवं प्राहुराचामं हि मनीषिणः। विधवाया इति। अत्र—विहितान्यपि कार्याणि धर्मलोपभयाद् बुधैः। समापन्ने निवृत्तानि साध्वभावात्कलौ युगे—इति प्रकृतम्। समापन्ने जनमेजयाश्वमेधसमाप्तौ। निवृत्तानि निवर्तितानि। तेन द्रोणादीनां वधे कथं पाण्डवादीनां कलिमध्ये दोषो नास्तीति न शङ्क्यम्। इदं देवराच्च सुतोत्पत्तिरिति च वाग्दानानन्तरं मृते पत्यौ देवरपरम्॥

यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ।
तामनेन विधानेन निजो विन्देत देवरः ॥
अनेन विधानेन घृताभ्यङ्गादिनियमवन्नियोजनविधानेन ।
यथाविध्यभिगम्यैनां शुक्लवस्त्रां शुचिव्रताम् ।
मिथो भजेताऽऽप्रसवात्सकृत्सकृदृतावृताविति ॥
मनुना, अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया ॥
सपिण्डो वा सगोत्रो वा घृताभ्यक्त ऋताविंयादिति ।
याज्ञवल्क्येन च तदनुज्ञानात् ; न तु विवाहानन्तरं विधवायाम् । "नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभि" रिति मनुना विवाहानन्तरं विधवानियोजननिषेधात् । न चैवं भारते कथं सत्यवत्या कनिष्ठभ्रातृभार्यायां विधवायां व्यासो नियुक्त इति वाच्यम् ; तत्र धनेनोपतोष्य कश्चन ब्राह्मणो नियोज्य इति भीष्मानुज्ञया सत्यवत्यास्तथा करणेन निषेधगतान्यपदस्य ब्राह्मणेतरान्यपरत्वात् ; अन्यथा ब्रह्मक्षत्रियदेवक्षत्रियभेदो न स्यात् । महाप्रभावतया दोषकल्पनाविरहेणान्यपदस्य यथाश्रुतार्थत्वाद्वा । देवराच्चेति चकारादनुज्ञातसपिण्डसगोत्रयोरपि ग्रहः । बालाया इति । दत्तायाक्षताया इत्येतत्समानार्थम् । वस्तुतस्तु नन्विदं वाक्यं कथं सङ्गच्छते ? नान्यस्मिन् विधवा नारीति मनुना सर्वदा तन्निषेधात्, मन्वर्थविपरीता तु स्मृतिः सापि न शस्यत इत्यङ्गिरोवाक्यात् । नापि देवरनियोजनं तदर्थः ; देवराच्च सुतोत्पत्तिरित्यनेन पौनरुक्त्यापत्तेः । नापि वाग्दत्ताविषयकम् ; तदानीं क्षतयोनित्वशङ्काया अभावादिति चेन्न ; दत्तामपि हरेत्पूर्वां श्रेयांश्चेद्वर आव्रजेदिति सप्तपद्युपक्रमणात्प्राक् यदन्यस्मै दानमुक्तम्, तद्विषयकत्वात् । ननु पराशरेण कलावनुष्ठेयान् धर्मान् वक्ष्यामीति प्रतिज्ञाय—

नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥

इति वचनाद्वाग्दत्तायाः कलौ पत्यन्तरमस्तीति कथं वाग्दत्ता-पहारः कलिवर्ज्य इति चेत्, वाग्दानानन्तरं तन्मरणे पराशरवचना-त्तस्या वरान्तरेण विवाहः कार्यः।

कन्यायां शुक्लदत्तायां म्रियेत यदि शुक्लदः ।
देवराय प्रदातव्या यदि कन्याऽनुमन्यते ॥

इत्युक्तवाक्ये कन्याया अननुमतौ पुरुषान्तराय दानलाभात्। इयांस्तु विशेषः। कन्यानुमतावपि देवराय सा न विवाह्या; नियोगसाम्यात्, देवराच्च सुतोत्पत्तिरिति सामान्यतो निषेधात्। एवं सगोत्रपिण्डयोरपि न विवाह्यतेति। कन्यानामिति।

तिस्रो वर्णानुपूर्व्येण द्वे तथैका यथाक्रमम् ।
ब्राह्मणक्षत्रियविशां भार्याः स्वा शूद्रजन्मनः ॥

इति याज्ञवल्क्येन विहितः। अत्र—असवर्णासु कन्यासु विवाहश्च द्विजातिभिरिति स्मृत्यन्तरम् द्विजानामसवर्णास्विति प्रागुक्तं चैकार्थकं बोध्यम्। आततायीति।

गुरुं वा बालवृद्धं वा ब्राह्मणं वा बहुश्रुतम् ।
आततायिनमायान्तं हन्यादेवाविचारयन् ॥ इति ॥

सन्मुखकूटशस्त्रेण(१)मारणम्। एतेन—नाततायिवधे दोषोऽ-न्यत्र गोब्राह्मणेभ्यः—इति सौमन्तवं व्याख्यातम्; तस्य कलिपर-त्वात्। एवं सति यत् श्रीरामेण रावणं हत्वा दशकृत्वोऽश्वमेधाः कृता इति रामायणम्, तदाततायिवधे युगान्तरे सपरिहारो दोष इत्येतदर्थम्। वस्तुतस्तु—गुरुं वा बालवृद्धौ वा ब्राह्मणं वेत्यादि-

शब्दस्वारस्यात्कैमुतिकन्यायेन ब्राह्मणभिन्न आततायी वध्य इत्यत्रैव तात्पर्यम्। इदमपि स्ववधोद्यताततायिविषयम्।

उद्यम्य शस्त्रमायान्तं भ्रूणमप्याततायिनम्।
निहत्य भ्रूणहा न स्यादहत्वा भ्रूणहा भवेत्॥

इति गालववचनात्।

स्वाध्यायिनां कुले जातं न हन्यादाततायिनम्।
तं हत्वा भ्रूणहा स स्यादहत्वाऽभ्रूणहा भवेत्॥ इति॥

बृहस्पतिवचनम्—

आततायिनमुत्कृष्टं व्रतस्वाध्यायसंयुतम्।
यो न हन्याद्वधप्राप्तं सोऽश्वमेधफलं लभेत्॥

इति च स्ववधानुद्यताततायिपरमिति। एवं च स्ववधोद्यत-ब्राह्मणभिन्नाततायिवधः कलौ न कार्य इत्याशयेन द्विजानामिति पदम्। सत्रेति। आसनोपायचोदिते सप्तदशावराश्चतुर्दशपरमाः सत्रमासीरन्निति विहिता सत्रदीक्षा सत्राधिकार इति यावत्। महाप्रस्थानम्। आशरीरपातमुत्तरदिग्गमनम्। "यो जीवितुं न शक्नोति महाव्याध्युपपीड़ितः। सोदग्दिशं महायात्रां कुर्वन् वा न प्रदुष्यती" ति विहिता महायात्रा। गोसंज्ञप्तिरिति। गोसव-निषेधार्थम्। अग्निहोत्रेति। अग्निहोत्रं हूयते यथा वैकङ्कतस्रु-चो, साऽग्निहोत्रहवणी तस्या अग्निहोत्रहोमानन्तरं हुतावशिष्टप्रा-शनार्थं जिह्वया लेहः कथञ्चिल्लीढायाः पुनर्ग्रहोऽग्निहोत्रसाधन-त्वम्। प्रायश्चित्तेति। कामकृते महापापादौ। न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते—इत्यादिना विहितस्य विधानमुपदेशः। मतिपूर्व-मनिर्देश्यं प्राणान्तिकमिति स्थितिरिति मनुवाक्यं त्वेतद्युगपरम्। अत्र मरणान्तिकं विधातुर्जीवितवधप्रायश्चित्तं सूच्यते। तच्च

मतिपूर्वनिर्देश एव। अन्यापदेशेन पृष्टं प्रति निर्देशे तदनन्तरं पृच्छकेन तथा चरणे तु न दोष इत्येतदर्थं मतिपूर्वकमित्युक्तम्। अत्र पाठान्तरम्। संसर्गदोषस्तत्संसर्गी च पञ्चम इत्युक्तः, स्तेयं च। तदन्यानि च महापातकानि। ब्रह्महननसुरापानगुरुतल्पगमनानि त्रीणि महापापानि। तेषां कामकृतानां विप्राणां प्रायश्चित्तं मरणान्तिकं कलौ नेत्यर्थः। मरणान्तिके हि जातिवधनिमित्तं द्वादशाब्दं द्विगुणं ब्रह्मवधनिमित्तं च द्विगुणं भवति। तच्चतुर्थे नास्ति निष्कृतिरिति निषिद्धम्। न चात्महत्याविधिना तद्बाधः; तेन हि आत्महत्यानिमित्तस्यैव बाधो न जातिवधनिमित्तस्य। संसर्गिणस्तु कामतोऽपि व्रतस्यैवोक्तेर्न मरणान्तिकम्॥ नापि स्तेये; तत्र राज्ञो वधकर्तृत्वात्। तेन तयोर्मरणान्तिकत्वाभावात् तयोरेव निष्कृतिर्नान्येषां त्रयाणाम्। युगान्तरे तु कलौ निषेधबलादेव प्रवृत्तिः। एतद्विप्रपरम्, न क्षत्रियादेः। तदुक्तम्—विप्राणां मरणान्तिकमिति। विशेषस्त्वत्रस्मत्कृते प्रायश्चित्तरत्ने द्रष्टव्यः। अथैतद् व्याख्यायते। ननु प्रायश्चित्तविधानं चेत्यनेन संसर्गदोषस्तेयान्येत्यस्य पौनरुक्त्यम्; इतरत्र मरणान्तिकाभावादित्यत्रैकदेशिमतमाह—संसर्गेति। विधानं करणम्। क्रियमाणप्रायश्चित्तमिति यावत्, तच्च महापातकनिष्कृतिरित्येकवाक्यम्। आत्महत्या विधिना।

यः कामतो नरः कुर्यान्महापापं कथञ्चन।

न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते इत्यात्महननविधिना। संसर्गदोषस्तेययोः पर्युदासबीजमाह—संसर्गिणस्त्विति। व्रतस्यैवेति।

यो येन पतितेनैषां संसर्गं याति मानवः।

स तस्यैव व्रतं कुर्यात्तत्संसर्गविशुद्धये" इति मनूक्तेः। राज्ञ इति। ब्राह्मणः स्वर्णहारी तु राज्ञे मुसलमर्पयेत्। स्वकर्माख्यापयंस्तेन हतो मुक्तोऽथवा शुचिरिति पाक्षिकमुक्त्यभिधानात्, आत्महननाकरणाच्च। ननु मतिपूर्वमनिर्देश्यं प्राणान्तिकमिति स्थितिरिति मनुनापि मरणान्तिकं निषिद्धमिति युगान्तरेऽपि तद्दुष्करमेवेत्यत्राह—युगान्तरे त्विति। एकमूलकल्पनालाघवेन मानवस्यापि कलिपरत्वादिति भावः। न क्षत्रियादेरिति। तथा च क्षत्रियादेर्मरणान्तिकं प्रायश्चित्तं कलौ भवतीति भावः। नन्वेतन्मते प्रायश्चित्तविधानं चेत्यस्य वैयर्थ्यं दुर्वारमित्यत्राह—विशेषश्चेति। संसर्गदोषश्चेति वाक्यं पृथगेवेत्यभिप्रायः। तच्चाग्रे स्पष्टम्। वस्तुतस्तु—विधेः प्राथमिकादस्माद् द्वितीये द्विगुणं भवेत्। तृतीये त्रिगुणं प्रोक्तं चतुर्थे नास्ति निष्कृतिरित्यत्र विधिपरवशात्प्रथममहापापानन्तरं प्रायश्चित्तं कृत्वा यदि द्वितीयं पापं क्रियते तदा तद् द्विगुणं प्रायश्चित्तं कार्यम्। तदुत्तरं महापापे तु तत् त्रिगुणमिति प्रतिनिमित्तं नैमित्तिकावृत्तिरिति न्यायोज्जीवनेनाभिधाय चतुर्थे महापापे प्रायश्चित्तनिषेधः, न तु प्रकृतेऽकृतप्रायश्चित्तस्य कथञ्चिच्चातुर्विध्ये तत्प्रवृत्तिरिति। अत्र चतुर्थे नास्ति निष्कृतिरित्येव विधायकम्। अतो न वाक्यभेद इत्येके। एतच्च व्रत एव प्रवर्तते न मरणान्तिके; बाधात्। एवञ्च तत्र द्वैगुण्यादिविध्यन्तरमावश्यकमिति परे। वरस्य प्राजापत्यः। अतिथेराग्नावैष्णव इति पशुयागविधिः। वाध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकीत्यादिपित्र्यपशुविधिः। अत्र श्राद्धे पशुयागाभावेन तद्धर्मानतिदेशादुपाकरणाप्राप्तेः पशूपाकरणशब्देन तत्प्रकृतिकं पितृभ्यो मांसपरिवेषणं लक्ष्यते। एवञ्च मधुपर्के पशोर्वधः। मांसदानं तथा श्रा-

च्छे इति च गतार्थम्; एकमूलकल्पना लाघवात्। एवञ्च यस्तु प्राणिवधं कृत्वेत्यादिबृहत्पाराशरमपि कलिपरमेव। दत्तेति।

औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः, इत्यादिद्वादशविधः पुत्रो विहितः। तत्रौरसदत्तकव्यावर्तनाय दत्तौरसेतरेषामिति। शामित्रमिति। आलभेतेति विधिप्राप्तं यज्ञे पशुमारणम्। सोमेति। गवा क्रीणातीति विधिवशसिद्धं सोमविक्रयणम्। शूद्रेष्विति।

शूद्रेषु दासगोपालकुलमित्रार्धसीरिणः।
भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत्॥

इति विहितम्। न चेदं स्नातकप्रकरणत्वात्तेषामेवेति वाच्यम्; उत्तरेषां चैतदविरोधीति गौतमेन गृहस्थादीनामपि तदतिदेशात्। अतश्च गृहस्थपरम्; नाहिताग्निपरं मानाभावात्। दासादिपदञ्च नापितकुम्भकारयोरप्युपलक्षणम्; अन्यथाऽनौचित्यापत्तेः। तीर्थसेवेति। तीर्थयात्रेति पाठान्तरम्। दूरतस्तीर्थमासेव्यमित्युक्तं तीर्थसेवनम्। शिष्यस्येति। गुरुवत्प्रतिपूज्याश्च सवर्णा गुरुयोषितः इत्युक्ता पादस्पर्शादिका। अश्वस्तनिकतेति। त्र्यहैहिको वापि भवेदश्वस्तनिक एव वेति विहिता। प्रजार्थन्त्विति। क्वचिच्छाखायां जातकर्महोमे प्रजाजीवनार्थमरणिपरिग्रहो विहितः। ब्राह्मणानामिति। प्रवासित्वं वृथा, सदा प्रवासशालित्वम्। एवञ्च—प्रवसेत्कार्यवान् विप्रो न वृथैवाचिरं वसेदिति कलिपरमेव। बलात्कारेति। बलात्प्रमथ्य भुक्ता चेदह्यमानेन चेतसा। प्राजापत्येन शुद्धिः स्यात्तत्तस्याः पावनं स्मृतमिति संवर्ताद्युक्तप्रजापत्यादिना संग्रहः। यदा म्लेच्छादिभिर्भुक्ताया अभुक्ताया अप्यतिचिरतरकालं भुक्ततदीयान्नादिना केवलतत्तादाम्यापन्नायाश्च संग्रहः। परन्तु एता-

हणविषये तासां पुंसां च प्रायश्चित्तं कार्यम्, न तु संग्रह इति संग्रहपदोपादानम्। भृग्वग्नीति। वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः। आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः—इति विहितः। णिजर्थाविवक्षया हन्यादित्यर्थः। गवीति। गोतृप्त्यधिके जले 'शुचिगोतृप्तिकृत्तोय' मिति विहितम्। सौत्रामण्यामिति व्याचष्टे सुरेति। सुराग्रह इति कर्तृव्युत्पत्त्या याज्योऽयाज्यश्चाविशेषाद्ग्राह्यः। व्यवहार इत्यनेन कृतप्रायश्चित्तस्यापीति लभ्यते। न च युगान्तरेऽकृतप्रायश्चित्तस्य व्यवहारः स्थित इति वाच्यम्; तर्ह्येतद्वाक्यवैयर्थ्यात्, लौकिकसुराग्रहणातुल्यत्वात्। अनेनेति। मद्यं सुरा। तत्सौत्रामण्यां वर्ज्यमित्यर्थः। निषेधस्येति। 'सामान्यविधिरस्पष्टः संह्रियेत विशेषत' इति यौक्तिकम्। एवञ्च निषेधे तदप्रवृत्तिरिति भावः। साधकाभावमुक्त्वा बाधकमप्याह—न हिंस्यादिति। अन्यत्रेति। एकादश्यां न भुञ्जीतेति सामान्यनिषेधस्य बोधिन्यादावुपवसेदित्यनेनोपसंहारेऽन्यशुक्लैकादश्यां भोजनप्रसङ्गवारणार्थं विधीनामेवोपसंहारो न निषेधानामित्यादिकमुक्तमित्यर्थः। वस्तुतस्तु सुरेह पैष्टीति शङ्का तुच्छैव। तस्माद् ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेदित्येतत्परतया वा योज्या। निरूपितं चेति। न हिंस्यादिति निषेधस्याग्नीषोमीयादि विधिनेव सुरा वै इति निषेधस्य सौत्रामणीसुराग्रहविधिना बाध इति तत्र प्रसक्तः सुराग्रहः कलौ निषिध्यत इत्यर्थः। नन्वेवं राजा राजसूयेनेत्यादौ उद्देश्यविशेषणराजत्वादेरधिकारिसङ्कोचकत्वमिव तादृशस्य सौत्रामणीत्वादेः कर्मसङ्कोचकतया वाजपेयादौ सुरासन्धानापत्तिरित्यत्राह—सुराग्रहस्येति। अविवक्षयेति। समुच्चयार्थकेनापिशब्देन कर्मान्तरसमुच्चयेना-

र्थतस्तद्विवक्षणासम्भवादिति भावः। अहं सम्मार्ष्टीत्यादौ अहत्वं विवक्षितं नत्वेकत्वमितिवत्सुरात्वं विवक्षितम्, न तु सौत्रामणीसम्बन्ध इत्यपि बोध्यम्। वाजपेयेऽपीति। एतेन वामागमादौ विनायकशान्त्यादौ च स्मार्ते सुतरां निषेधः सूचितः। स्त्रीभ्यश्च सुरामाचाममित्यादेरुपलक्षणमेतत्। नन्वेवं क्रमेण सौत्रामण्यामनधिकारे तदङ्गकानां चयनादीनामपि अनधिकारापत्तिरित्यत्राह सौत्रामण्यामिति। वैकल्पिकेति। एतेन सौत्रामण्यां येषां सुराग्रहाः पयोग्रहाश्चोभये, तेषां न तस्यामधिकार इति सूचितम्। मानाभावादिति। सौत्रामणीवाजपेययोः प्रकृतिविकृतिभावासत्त्वात् वाजपेयप्रकरणे पयोग्रहानभिधानाच्चेति भावः। तत्प्रख्येति। तत्प्रख्यं चान्यशास्त्रमिति जैमिनिसूत्रम्। कर्मनामधेयस्य कस्यचिद्योगरूपत्वमस्तीत्यर्थः। प्रकृते च वाजोऽन्नं सुरारूपं हुत्वा पेयं यत्रेति व्युत्पत्त्या तत्र सुरापाननियतत्वप्रतीतेरित्यर्थः। ननु त्रिकाण्डमण्डनेन पयोग्रहणेन वाजपेयेऽधिकार उक्त इत्यत आह त्रिकाण्डेति। निर्मूलमिति; कल्पकारैस्तदनभिधानात्। अनाकरमिति। कल्पसूत्रभाष्यादावपि पयोग्रहप्राप्त्यनभिधानात्। वृत्तेति। वृत्तमग्निहोत्राद्यनुष्ठानम्। स्वाध्यायो वेदाध्ययनम्। एकाहादिति। 'पृथग्वेदाग्नियुक्तस्य त्र्यहमाशौचमिष्यते' इत्यादेरुपलक्षणमेतत्।

> दशाह एव विप्रस्य सपिण्डमरणे सति।
> कल्पान्तराणि कुर्वाणः कलौ भवति किल्बिषी॥

इति वचनात्। प्रायश्चित्तविधानं चेति व्याचष्टे—न तस्येति। कामकृते महापापादौ उपदेश इति। स्वयमेव धर्मशास्त्राज्ज्ञात्वाऽन्यापदेशेन वा पृष्ट्वा तदनुष्ठानन्तु न वार्यते; मतिपूर्वमनिर्देश्यं

प्राणान्तिकमिति स्थितिरिति मानवे मतिपूर्वपदोपादानात् । संसर्गदोष इति व्याचष्टे कलाविति । अत्र दोषपदं यथाश्रुतमलग्नकम् । आसनाच्छयनाद्यानात्सम्भाषात्सहभोजनात् । संक्रामन्ति हि पापानि तैलबिन्दुरिवाम्भसीति पराशरोक्तेर्निर्विषयतापत्तेः । अतः 'संवत्सरेण पतति पतितेन सहाचरन्नि" ति प्रतिपादितं पातित्यं दोषः । तच्च कर्मानधिकारोऽसंव्यवहार्यता चेति । तन्नेत्यर्थः । स्वयं बाधकमाह । अन्यथेति । दोषपदस्य दोषसामान्यार्थकत्वे "सवर्णान्याङ्गनादुष्टैः संसर्गः शोधितैरपी"ति शोधितसंसर्गे दोषः । इह तु पतितसंसर्गे दोषाभाव इति विरोधापत्तेरित्यर्थः । कलौ कर्तैवेति न्यायेन तस्य कर्तर्येव परिसंख्यानात् । कलौ पतति कर्मणेति पराशरोक्तेश्च । नव्यास्तु—

त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत् ।
द्वापरे कुलमेकन्तु कर्तारन्तु कलौ युगे ॥ इति—

पराशरवचनेन संलापादिनवविधसंसर्गाभावेऽपि विहितो देशादित्यागः ।

कृते सम्भाष्य पतति त्रेतायां स्पर्शनेन तु ।
द्वापरे त्वन्नमादाय कलौ कर्तैव लिप्यते ॥

इति पराशरवचनेन सम्भाषणादिजन्यपातित्यं वा दोषः । तस्यैव निषेधः, न तु पतितेन सह संवत्सरं यावन्नवविधसंसर्गप्राप्तपातित्यम्; पूर्वोक्तवचनद्वयबाधमात्रेण चरितार्थस्य वाक्यस्य नवविधसंसर्गप्रतिपादकवाक्यबाधकत्वायोगात्, कलौ पतति कर्मणेति पराशरवचनस्वारस्येन पतितसंसर्गरूपकर्मजन्यपातित्यस्य दुर्निवारत्वाच्च, पतितसंसर्गभिन्नेन ब्रह्महननादिकर्मणा पततीति व्याख्यानस्य निर्बीजत्वाच्च । किञ्च ब्रह्महननसुरापानगुरुतल्पग-

मनादिमहापापसंसर्गप्रायश्चित्तं कलौ न भवतीति नार्थः। पराशरस्मृतावेव 'चातुर्विद्योपपन्नस्तु विधिवद् ब्रह्मघातके। समुद्रसेतुगमनं प्रायश्चित्तं विनिर्दिशेत् ॥

मद्यपश्च द्विजः कुर्यान्नदीं गत्वा समुद्रगाम्।
चान्द्रायणे ततश्चीर्णे कुर्याद् ब्राह्मणभोजनम् ॥
अनडुत्सहितां गाञ्च दद्याद्विप्रेषु दक्षिणाम्।
सुरापानं सकृत्कृत्वा अग्निवर्णां सुरां पिबेत् ॥
स पावयेदथात्मानमिह लोके परत्र च। इति

ब्रह्महमद्यपसुरापनिष्कृतीनां आसनाच्छायनाद्यानादिति संसर्गमभिधाय 'चान्द्रायणं यावकं च तुलापुरुष एव च। गवां चैवानुगमनं सर्वपापप्रणाशनमिति महापातकसंसर्गादिनिष्कृतेश्चोक्तत्वात्। न च पराशरोक्तस्य कलिनिषेधेन बाधः। "कृते तु मानवा धर्मास्त्रेतायां गौतमाः स्मृताः। द्वापरे शङ्खलिखिताः कलौ पराशराः स्मृताः"इति पराशरेणैव विरोधे स्वस्मृतिप्राबल्योक्तेश्च। तस्मात्पतितिसंसर्गे प्रायश्चित्ताचरणं कार्यमेवेति। अन्ये तु—'त्यजेद्देशं कृतयुगे' इत्याद्युक्तदेशादित्यागस्य 'कृते सम्भाष्य पतति' इति सम्भाषणादिजन्यपातित्यस्य वा न निषेधः; कलौ युगान्तरोक्ताप्राप्ते निषेधासम्भवात्। तस्मात्कलौ पतति कर्मणेति कलौ कर्मणा ब्रह्महननादिना पतति न तु संसर्गेणेति व्याख्येयम्। इदानीन्तनानां संसर्गनिमित्तकप्रायश्चित्ताचरणं च पापक्षयार्थमेवेति ग्रन्थं समर्थयन्ते। अत्र केचिदुपन्यस्यन्ति—पापस्याऽव्यवहार्यत्वनरकोत्पादकत्वरूपे द्वे शक्ती। द्विजातिकर्मभ्यो हानिः पतनमिति गौतमात्।

अधोऽधः पतनात्पुंसां पातकं परिकीर्तितम्।
नरकाग्निषु घोरेषु पतनात्पापमुच्यते ॥

इति भविष्यात्। तत्र नरकोत्पादकत्वसत्त्वेऽप्यव्यवहार्यत्वं नास्तीति कथमुच्यते। न च प्रायश्चित्तेन नरकोत्पादकशक्तिसत्त्वेऽपि व्यवहारनिरोधिकाया नाशवादेतदिति वाच्यम्; वैषम्यात्। तथाहि—अकामकृतस्य महापापादेः प्रायश्चित्तेन नाशः। कामकृते तु व्यवहार्यतामात्रम्। प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत्। कामतो व्यवहार्यस्तु वचनादिह जायते। इति शास्त्रात्। विहितं यदकामानां कामात्तद्द्विगुणं भवेदिति वचनान्यथानुपपत्तेश्च। इह तु—पतितेन सहोषित्वा जानन् संवत्सरं द्विजः। निश्चितस्तेन सोऽब्दान्ते स्वयं च पतितो भवेदिति देवलोक्तेः संसर्गिणोऽप्यब्दान्ते पातित्येन प्रायश्चित्तं विना व्यवहाराङ्गीकारासम्भवात्, ब्रह्महननादिना शक्तिद्वयवत्पापं जायते। संसर्गेण त्वेकशक्तिमत्पापमित्यत्र नियामकाभावाच्च। महापापे मरणान्तस्य प्रायश्चित्तत्वे व्यवहारानुपयोगित्वान्नरकनिवर्तकमात्रम्। परिशेषात्तु व्रतात्मकव्यवहारोपयोगि। प्रकृते तु व्यवहारस्य प्रागेव सिद्धत्वात्तद्भङ्ग इत्यादिदूषणगणापत्तेः। कामतोऽव्यवहार्यस्त्वित्यत्राकारप्रश्लेषेणाव्यवहार्यतावादिनां शङ्कराचार्याणां संसर्गपातित्ये व्यवहाराभावस्येष्टत्वात्। तस्मात्संसर्गदोष इत्यस्य ब्रह्महननादौ प्रायश्चित्ते कृतेऽपि व्यवहाराभावः, संसर्गे तु कलौ प्रायश्चित्ते कृते सति स नास्तीत्येवार्थ इति। संसर्गदोष इत्यत्र संसर्गपदं संसर्गिसंसर्गपरम्। कर्तारन्तु कलौ युगे इति कर्तृत्यागविधिना तत्संसर्गे दोषप्रत्ययात्। कलौ कर्तैव लिप्यते इति तु साक्षात्संसर्गेण पातित्याभावव्यञ्जकमिति भट्टदिनकरः। स्तेयान्येति व्याचष्टे—स्तेयभिन्ने इति। नन्वत्र स्तैयान्यमहापापे प्रायश्चित्तं न कार्यमित्यसङ्गतम्। पराशरेणैव प्रत्येकं महापापे प्रायश्चित्ताम्नानात्।

कृते तु मानवा धर्मास्त्रेतायां गौतमाः स्मृताः।
द्वापरे शङ्खलिखिताः कलौ पाराशराः स्मृताः ॥ इति

पराशरस्मृतेः कलौ बलीयस्त्वादित्यत्राह—रहस्येति। तस्मात्प्रकाशयेत्पापमिति पराशरोक्तेः कलौ प्रकाशप्रायश्चित्तमेव कार्यमिति भावः। यत्तु कलौ पाराशरा इति वाक्येन स्तेयान्येत्यस्य सर्वथा बाधे विषयान्तराभावादप्रामाण्यम्। अतः स्तेयान्यमहापापनिष्कृतिर्नोपदेश्या, उपदेशेऽपि संसर्गो न कार्य इति वा तात्पर्यम्। औदुम्बरी सर्वा वेष्टयितव्येति स्मृतेः 'अष्टकाः कर्तव्याः' इतिवन्मूलश्रुतेरनुमानद्वारा प्रामाण्यम् प्राप्य 'औदुम्बरीं स्पृष्ट्वोद्गायेदि'ति प्रत्यक्षश्रुत्या बाधाद्विद्वन्यङ्गुलादिपरिहारेण सर्वा वेष्टनीयेति कल्पनवदिति ; तन्न ; प्रायश्चित्तविधानं चेति तदुपदेशस्य निषिद्धत्वात्; ब्राह्मणभोजनत्रिःसार्थत्रयाय संसर्गस्येष्टत्वात्। स्तेयपर्युदासश्च तत्र रहस्यप्रायश्चित्ताभ्यनुज्ञानार्थः। केचित्तु अकामकृतेषु स्तेयान्यमहापापेषु नरकक्षयार्थं निष्कृतिर्न कार्या, व्यवहार्यत्वार्थन्तु कार्या, मरणान्तिकप्रायपाठादित्याहुः। सवर्णान्येति व्याचष्टे। सवर्णान्येति। दुष्टैर्मैथुनादिभिः। शोधितैः कृतप्रायश्चित्तैः। न च ब्राह्मणादेः क्षत्रियाद्युद्वाहनिषेधेनैव तत्सम्पर्को निषिद्ध इति व्यर्थमेतदिति वाच्यम् ; एतद्वाक्यस्य हीनवर्णासम्पर्कविषयत्वात्। तादृशसम्पर्के कृतप्रायश्चित्तानां संसर्गस्य पूर्वयुगेऽनुज्ञातस्य कलौ निषेध इति। नव्यास्तु—अनुद्वाहेऽपि व्यभिचारादिप्रायश्चित्तानन्तरं संसर्गो नेत्येतत्पर—इत्याहुः। अयोनाविति व्याचष्टे। अयोनाविति। गुरुस्त्रिया ब्राह्मणस्त्रियाः। सङ्ग्रहे गर्भधारणे। परित्यागो गृहान्तरावस्थानम्। पतिघ्नी च विशेषेण जुङ्गितोपगता च येति उत्तरार्धम्। जुङ्गिता हीनयोनिः। युगान्तरे

त्वयोनौ संग्रहे परित्याग एवेति भावः। परोद्देशेति व्याचष्टे—परो-
द्देशेनेति। "गवार्थे ब्राह्मणार्थे वा सद्यः प्राणान् परित्यज्यजेत्" इति
विहितः। यद्वेत्यादि। इदञ्च न सम्यक्; बहुग्रन्थविरोधात्। उद्दि-
ष्टस्यापीति व्याचष्टे—उद्दिष्टस्येति। प्रतीति। प्रतिग्रहसमर्थोऽपि
प्रसङ्गं तत्र वर्जयेदित्यर्थः। प्रतिग्रहसामान्यनिषेधः कलौ वर्ज्य
इत्यर्थः। केचित्तु उच्छिष्टस्यापवर्जनमिति पाठः। स्वाम्युच्छिष्ट-
मुच्छिष्टोपहतं चेति वसिष्ठाद्युक्तम्। तन्निमित्तप्रायश्चित्तं नेत्यर्थः।
अन्ये तु—अपवर्जनं दानम्। विश्राणनं वितरणं स्पर्शनं प्रतिपाद-
नम्। प्रादेशनं निर्वपणमपवर्जनमर्हतिरिति त्रिदण्डिस्मरणात्।
उदगुच्छिष्टं ब्राह्मणाय प्रयच्छेदिति मधुपर्के विहितं तन्नेत्यर्थः—
इत्याहुः। परे तु उच्छिष्टस्यापि वर्जनमिति पाठः। उच्छिष्टस्य
ताम्बूलचर्वणाद्युच्छिष्टस्य परि वर्जनमित्याहुः। प्रतिमेति व्याचष्टे।
वेतनेति। यावज्जीवं मया इयमेव प्रतिमा पूजनीयेत्येवमुद्देशाद्यु-
ल्लेखपूर्वकसङ्कल्पोपलक्षणमेतत्। अस्थीति व्याचष्टे—स्वाशौचेति।
षड्भक्तेति व्याचष्टे—षडिति। षण्णां भक्तानामनशनम्। उपवास
त्रयम्। "तथैव सप्तमे काले भक्तानि षडनश्नता। अश्वस्तनविधानेन
हर्तव्यं हीनकर्मणः" इति मानवमपि संगृहीतमित्याह। अन्नचौर्य-
मिति। आपदीति व्याचष्टे आपदीति। क्षत्रादीति। क्षात्रेण क-
र्मणा जीवेद्विशां वाप्यापदि द्विज इति विहितम्। मुखेनैवेति। "मुखे
नैव धमेदग्निं मुखादेषोऽभ्यजायत। नाग्निं मुखेनेति तु यत् लौ-
किके योजयेत्तु तदि"तीत्यर्थः। नवोदके इति व्याचष्टे। दशाहेनै-
वेति। शुध्येतेतिपाठः। कलौ नवोदके दशाहं त्याज्यत्वं नेत्यर्थः।
काले नवोदकं शुध्येन्न पिबेच्च त्र्यहन्तु तत्। अकाले तु दशाहं
स्यात्पीत्वा नाद्यादहर्निशमिति दशाहप्रतिषेधस्यापवादस्त्रिरात्रप्रति-

षेधप्राप्त्यर्थः। अन्यथा काले त्र्यहप्रतिषेधः। अकाले तु न किञ्चिदित्यनौचित्यापत्तेः। दक्षिणेति व्याचष्टे। गुरवे त्विति। लाभे मूलानां दक्षिणां ददातीति विहिता दक्षिणापीह द्रष्टव्या। ब्राह्मणादिष्विति व्याचष्टे। शूद्रेष्विति। पचनादीत्यादिना भोजनग्रह इत्याशयेनेदम्। शूद्रस्येति। अत्रोभयत्राप्यर्थतः पाकक्रिया लभ्यते; शूद्रकर्तृकपाकं विना तद्भोजनाभावात्। आर्याधिष्ठिताः शूद्राः संस्कर्तारः स्युरित्यापस्तम्बोक्तमपीह ब्राह्मणगृहे शूद्रस्य पक्तृत्वं द्रष्टव्यम्। पितेति व्याचष्टे पितेति। यतेरिति व्याचष्टे यतेरिति। विधूम इति। विधूमे सन्नमुसले व्यङ्गारे भुक्तवज्जने। कालेऽपराह्णभूयिष्ठे नित्यं भिक्षां यतिश्चरेदित्यर्थः। गृहपदस्य भिक्षार्थं गृहगमनपरत्वादिति भावः। यत्र सूर्यास्तो जातस्तत्रावस्थानं सायंगृहत्वमिति मतमाह—पृथ्वीति। सायंगृहो इति। तत्र मध्यम्। यद्यप्यष्टौ मासान् विहारः स्यादित्यस्यैकवाक्यतया अनिकेता इति यतिपरमेव। तथाप्यनाहारा इत्यनेनाहारसामान्याभावबोधनासम्भवादज्ञातेत्युक्तम्। अत एवोक्तो निषेध इत्यसमस्ताभिधानम्। यतिपदं चाविवक्षितार्थकम्। विप्रा इति सामान्यतोऽभिधानात्। शीलपदेन कुलमप्युपलक्षणीयम्। तेन गृहस्थादेरपि संग्रहः। वस्तुतस्तु उक्तनिषेध इति पाठः। उक्तस्य निषेध इत्यर्थः। अनिकेतत्वे सत्यनाहारस्य यतिष्वेव सत्त्वात् यतेरित्यपि विवक्षितम्। तत्र च यत्र सूर्यास्तो जातस्तत्रैव यतेरवस्थानं तद्वर्ज्यमित्यर्थः। तेनेति। अत्राक्षता गोपशुश्चैव श्राद्धे मांसं तथा मध्विति। यच्छ्राद्धं मधुना हीनम्। मधुप्रधानं शूद्रस्येत्यादेर्विषयं वक्ष्यति। पलपैतृकं पैतृकं मांसम्। ननु पूर्वयुगाश्रितेत्यत्र पूर्वयुगेत्यस्य पूर्वयुगानि कृतादीनि, युगस्य कलेः पूर्वभाग इति वाऽर्थः? नाद्यः; एतेनेत्यादिविरोधात्,

चत्वार्यब्दसहस्राणीति कलौ त्रेतापरिग्रहविधानात् । नान्त्यः ; प्रक्रान्तानुपष्टम्भकतापत्तेः । अत्रोच्यते— आद्य एवार्थो ग्रन्थकृत्सम्मतो नापरः । एकदेशिसमासे लक्षणाप्रसङ्गात् । एवञ्च समान्यतो निषिद्धमपि सर्वाधानं व्यासवाक्येन पुनः प्रतिप्रसूयते । इति । यावद्वर्णेति चार्धाधानपरम् । न्यायप्राप्तानुवादः । वेदोच्छेदे वर्णसङ्करे वाधिकाराभावादेव तन्निवृत्तेः प्राप्तत्वात् । सर्वाधानेऽपि विशेषमित्यस्यावधिविशेषपरिच्छिन्ने सर्वाधानेऽर्धाधानावधिमित्यर्थः । त्रिदण्ड इति । वैयासिकी संख्या त्वेकदण्डपरा । गारुडे—

कलौ न क्रियते अश्वमेधो वाप्यथ गोसवः ।
नरमेधोऽक्षता नारी देवरात्पुत्रसन्ततिः ॥
गर्हितं सप्तकं ह्येतद्राजसूयकमण्डलू ॥

आदित्यपुराणे—समयाः शकुनाः प्रश्नाः सामुद्रिकमुपश्रुतिः ।
उपयाचितमादेशा न भवन्ति कलौ क्वचित् ॥
तस्मात्तन्मात्रलाभेन कलौ कार्यं न कारयेत् ॥

इति कलिवर्ज्यप्रकरणम् ॥ इति ॥

कलिवर्ज्यप्रकरणं हीदं पर्युदासविधयैव नेयमिति प्रमाणविचारावसरे विवेचितं मांसमीमांसाद्यनुसारेण । तथाच अग्निहोत्रादिविधीनां कलिभिन्नविषयत्वं कलियुगेऽधिकारितावच्छेदकविद्याशक्त्याद्यभावेन कलावप्रवृत्त्यार्थसिद्धमेवानूद्यते कलिवर्ज्यप्रकरणेनेति न दोषः । तथाच येषामनुष्ठानेऽनर्थवात्स्याशङ्का, तेषामेव निरासः कलिवर्ज्यप्रकरणे क्रियते । यथा देवरेण सुतोत्पत्तौ व्यासादितुल्यो निगृहीतेन्द्रियः सकृद्गमनमात्रेण पुत्रोत्पादनसमर्थोऽनन्तरं तस्यां मातृबुद्ध्यावर्तनशक्तश्चाधिकारी कलौ शशशृङ्गायमाण एव । एतेन विधवाविवाहोऽपि—व्याख्यातः । विधवाविवाहे तु मनुसंमतेऽपि

पृथक्संस्थैव तत्संबन्धिनां युक्तेति मनुनैव सूच्यते । इदानीं तु सूचीप्रवेशे मुसलप्रवेश इति न्यायेन सर्वसांकर्यं स्यादिति सर्वात्मना निषेधः । एतेन लोकगुप्त्यर्थमित्यपि—व्याख्यातम् ।

सर्वथा—धर्मज्ञानां हि सर्वेषां नियमसङ्कोचार्थमपि प्रवर्तमानानां धर्मसंस्थापनमेव परमुद्देश्यम्, नतु धर्मविनाशनमिति सर्वविदितमिदम् । तद्यदि पतितसंसर्गस्य सर्वथाऽदोषत्व एव तेषां तात्पर्यं स्यात्, तर्हि सर्व एव स्वीयं पातित्यमपि भाव्यविगणय्य केवलादृष्टफलैकसाधनेषु धर्मेषु न प्रवर्तेरन् , नतराञ्च निवर्तेरन्निषिद्धकर्मभ्य इति पुरा युगे यदा धर्मश्रद्धा परलोकविश्वासः पारलौकिकफल एवात्योदरश्चासीत्तदाऽभ्यनुज्ञातेऽपि कृतप्रायश्चित्तानां पतितानां व्यवहारे न तथा धर्मस्य ग्लानिर्भवितेति सत्यमभ्यनुज्ञातो व्यवहारः । कलौ त्विदानीं प्रायेण किम्बहुना सर्व एवैहिकफलविश्वसिनः पारत्रिकफलकथाविमुखाः शास्त्रापरतन्त्राश्च वर्तन्त इत्यैहिकव्यवहारेषु निर्बन्धविशेषव्यवस्थापनं विना न धर्मव्यवस्थापनं कथमपि कर्तुं पार्यत इति कृतप्रायश्चित्तानामपि पतितानां व्यवहारायोग्यत्वव्यवस्थापन एव सर्वेऽपि प्रायेण निषिद्धकर्मभ्यो निवर्तेरन्, प्रवर्तेरंश्च विहितेषु धर्मेष्विति 'संसर्गः शोधितैरपीति' कलिवर्ज्यप्रकरणे व्यवहारनिषेधोऽपि शोधितैः क्रियमाणः सर्वथा युक्त एव । न ह्यन्यथा धर्मरक्षणं भवतीति न धर्मज्ञानां उक्तव्यवस्थापकाणां द्वेषादिमूलकत्वकलनं कथमप्यवसरति । दृश्यन्ते हीदानीं बहव एवास्माभिर्धर्मतत्त्वविचारावसरे ये तथा शास्त्रपारतन्त्र्यमात्मनः समुचितममन्वानाः प्रतिवदन्तश्चैहिकपरिस्थितिरेवास्माभिः पर्यालोचनीयेत्यादिकं चेति नेदं कस्यापि तिरोहितम् । तथाच धर्मज्ञानां पूर्वाचार्याणामिदानीन्तनानां व्यवस्थापकम्मन्यानाञ्च

स्पष्ट एवोद्देशभेदो विचारपथभेदश्चेति धर्मज्ञानां विद्वेषमूलकत्वादिदूषणमिदानीन्तनानां वस्तुगत्याऽनादरणीयमेव। प्रसिद्धमिदं सर्वेषाम्—उद्देश्यभेदे मार्गभेदे चाश्रिते परस्परं स्वीयस्वीयोद्देश्यादिमात्रदृष्ट्योद्देश्यान्तरस्वरूपाद्यपर्यालोच्यैव विफलमेव निन्दाः क्रियन्त इति। तदत्र स्तुतिनिन्दादिकं सर्वमेकेन मार्गेणोभयसम्मतेन क्रियमाणमेव कार्यकारि भवति नान्यथा। तद्यदि पूर्वाचार्याणां मार्गो नादरणीय इति मतम्, तर्हि कामं नाद्रियतां स मार्गः। इदमेवास्माकमत्र प्रष्टव्यम्—किमिति वा स्वीयानामपेक्षितानां सर्वेषां पूर्वाचार्यसम्मतत्वस्थापनार्थं प्रयत्नः क्रियत इति? न हि पूर्वाचार्या धर्मव्यवस्थापनार्थमेव कृतदीक्षाः सत्यामप्यापदि मुख्यकल्पानुसारेण यथावदेव शास्त्रपरिपालनमप्यावश्यकं मन्यन्ते। येन लोकपरिस्थिति धर्मज्ञैः कथमपि नावलोकितेति निन्दायास्तेऽवकाशः। कति वा प्रयत्नाः पूर्वाचार्यैरधिकारिभेदेनावस्थाभेदेन कालभेदेन देशभेदेन च धर्मव्यवस्थासम्पादनार्थं समादृता इति सर्व एव विदांकुर्वन्तु। तदत्र वयमिदमेव सूचयामः—यत्पूर्वाचार्याणामुद्देशादिकं तदोयेन विचारमार्गेणाद्य यावदनुवर्तमानेन सर्वैरपि द्रष्टव्यम्, न तु नूतनेन केनापि कल्पितेन मार्गान्तरेणेत्येव सनातनधर्मावलम्बिनामाशयः। तथा विचारेण च कृतेनेदमेव फलति यत्पूर्वोक्तप्रकारेण पतितसंसर्गश्चण्डालादिसंसर्गो वा यौनमौख्यस्त्रौवादिरूपः श्रेयस्कामैः सर्वथा परिहरणीयः॥ इति॥

तत्र कश्चित्—"सिद्धायां खल्वापदि तदनुसृत्या च धर्मपरिवर्तने म्लेच्छचाण्डालदस्युभिर्बलाद्दासीकृतानामत एव पतितानां पतितसंसर्गात्स्वेच्छया पतितानां वा सर्वेषां पुनरपि हिन्दुधर्मे स्वीकारोऽप्यावश्यक इत्यपि सुस्पष्टमेव। स चायम्परिग्रहः कृत-

प्रायश्चित्तानां वाऽकृतप्रायश्चित्तानां सर्वेषामपि यदि स्वधर्मानुष्ठानेच्छा, तदैव। न तु बलात्कारेण। देवलस्मृतौ तु 'बलाद्दासीकृता ये च म्लेच्छचण्डालदस्युभि' रित्यादिश्लोकैः परधर्मे प्रविष्टानामपि पुनरपि स्वधर्मे संग्रहस्त्वनुमत एवेति तत्रैव कणेहत्य समीक्षणीयम्। अत्र च यद्यपि बलादिति पदाद् बलात्कारेण परिभ्रष्टानामेव संग्रहोऽनुमतः, न तु छलमोहादिभिः परिभ्रष्टस्येति समुदेत्याकांक्षा। परञ्च बोधायनेनोक्तस्य—

बलादपहृता कन्या मन्त्रैर्यदि न संस्कृता।
अन्यस्मै विधिवद्देया यथा कन्या तथैव सा॥

इति वचनस्य विवरणावसरे पारस्करगृह्यसूत्रस्य प्रथमकाण्डान्तर्गतायामष्टमकण्डिकायां तद्विवरणानुषङ्गेण बलादिति छलादेरप्युपलक्षणमित्युक्तम्। तद्वदत्रापि बलादित्युपलक्षणं छलादेदिरिति स्वीकारे न कोऽपि दोषो वा शास्त्रव्याघातः। एवञ्च परधर्मे प्रविष्टानामत एव पतितानां पुनरपि सङ्ग्रहो न्याय्यः। न च प्रायश्चित्तानन्तरमेव सङ्ग्रहोऽनुमत इति वाच्यम्; नहि प्रायश्चित्तं नाम कश्चन नाट्यवद्विधिरेव, किन्तु पश्चात्तापोऽपि प्रायश्चित्तमेव। अत एव बहुषु पश्चात्तापेन शुद्ध्यतीति न्यायानुसरणं धर्मज्ञानाम्। संस्कारलोपाद्व्रात्यप्रायश्चित्तमपि मनुनोक्तं ग्राह्यम्। एवञ्च यथाकथमपि स्वधर्मभ्रष्टस्य पश्चात्तापे पुनरपि संग्रहः कर्तव्यः। तेनैव किल हिन्दुसंख्याह्रासपरिहारः स्यादेव। येषां खलु जातिकुलादिकं पूर्वतनं स्मर्यते, तेषां स्वजातौ निवेशः। येषां खलु तदभावस्तेषां पृथग्जातित्वेनावस्थानमिति तु विशेषः। अत्र विषये देवलस्मृतिर्विशेषतो निरीक्षणीया। किञ्च 'अनुक्तनिष्कृतीनान्तु पापानामपनुत्तये। शक्तिं चावेक्ष्य पापञ्च प्रायश्चित्तं

प्रकल्पयेत्' इति (अ० ११ श्लो० २० ६) मनुवचनात्कुत्रचित्पा-पाद्यवेक्षणपूर्वकं प्रायश्चित्तकल्पने धर्मज्ञानां स्वातन्त्र्यं वर्तत एवेति तदनुसारेणापि पतितानां बलाद्भ्रष्टानाञ्च सङ्ग्रहः कर्तव्य एव। सर्वथा न स्वस्वपूर्वतनजातिषु विवाहादिगुरुतरसंसर्गव्यवस्थापन-स्यावश्यकतेति द्रष्टव्यम्। यदि च कृतप्रायश्चित्तानां पृथग्जा-तित्वं कल्प्यते चेन्महाननर्थः स्यात्। यतोऽधुनैव बहूनां जातीनां सद्भावेनान्योन्यं सुहृत्त्वेनावस्थानं दुष्करम्। तत्र यदि पुनरप्येका जातिः कल्प्यते चेत्तेनातीव वैमनस्यमेव। विशेषस्तु पूर्वमेवोक्तः। तत्र त्वगत्या भिन्ना जातिः कल्पनीयैव। परञ्च यावच्छक्यं नान्यजातिकल्पनं समुचितम्पश्यामः। शास्त्रीयविनिर्णयोऽप्यत्र देवलस्मृत्या पूर्वोक्त एव। यथाहि ब्रह्मघ्नानामपि प्रायश्चित्तानन्तरं पूर्वजातौ प्रवेशः, तत्र का नाम कथा परधर्मप्रविष्टानाम्। तस्मा-त्पतितानां स्वधर्मानुष्ठानेच्छा चेत्पुनरपि सङ्ग्रहः कर्तव्य इति सिद्धम्। देवलस्मृतिवचनानि चेत्थम्—

सिन्धुतीरे समासीनं देवलं मुनिसत्तमम्।
समेत्य मुनयः सर्व इदं वचनमब्रुवन्॥ १॥
भगवन्म्लेच्छनीता हि कथं शुद्धिमवाप्नुयुः।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैवानुपूर्वशः॥ २॥

देवल उवाच—प्रायश्चित्तं प्रवक्ष्यामि विस्तरेण महर्षयः।

अपेयं येन सम्पीतमभक्ष्यं चापि भक्षितम्॥
म्लेच्छैर्नीतेन विप्रेण अगम्यागमनं कृतम्॥ ७॥
तस्य शुद्धिम्प्रवक्ष्यामि यावदेकन्तु वत्सरम्।
चान्द्रायणन्तु विप्रस्य सपराकम्प्रकीर्तितम्॥ ८॥
पराकमेकं क्षत्रस्य पादकृच्छ्रेण संयुतम्।

पराकार्धन्तु वैश्यस्य शूद्रस्य दिनपञ्चकम् ॥ ६ ॥
म्लेच्छैर्नीतेन शूद्रैर्वा हारिते दण्डमेखले ।
संस्कारप्रमुखंतस्य सर्वं कार्यं यथाविधि ॥ १२ ॥
तदासौ स्वकुटुम्बानाम्पङ्क्तिंप्राप्नोति नान्यथा ।
स्वभार्यां च यथान्यायं गच्छन्नेव विशुध्यति ॥ १४॥
अथ संवत्सरादूर्ध्वं म्लेच्छैर्नीतो यदा भवेत् ।
प्रायश्चित्ते तु सञ्चीर्णे गङ्गास्नानेन शुद्ध्यति ॥१५॥
गृहीतो यो बलान्म्लेच्छैः पञ्च षट् सप्त वा समाः ।
दशादि विंशतिं यावत्तस्य शुद्धिर्विधीयते ॥ ५३ ॥
प्रायश्चित्तं समाख्यातं यथोक्तं देवलेन तु ।
इतरेषामृषीणाञ्च नान्यथा वाक्यमर्हथ ॥ ७२ ॥

इत्यादीनि । अत्र च स्त्रीविषयकं प्रायश्चित्तमपि ४३-४४ ४७-४८-४९-५०-५१-५२ इत्यत्र श्लोकेषु द्रष्टव्यम् । अत्र च नान्यथा वाक्यमर्हथेत्यनेन 'मिथो याजका मिथोऽध्यापका मिथो विवहमानाश्च' इत्यादिबौधायनवचनं परास्तमिति सूच्यते । किञ्च याज्ञवल्क्ये मिताक्षरायामपि परिग्रहाभोज्यभोजनप्रायश्चित्तविचारे 'यस्तु बलात्कारेण भोज्यते, तस्यापस्तम्बेन विशेष उक्तः—

बलाद्दासीकृता ये तु म्लेच्छचाण्डालदस्युभिः ।
अशुभं कारिताः कर्म गवादिप्राणिहिंसनम् ॥
उच्छिष्टमार्जनं चैव तथोच्छिष्टस्य भोजनम् ।
खरोष्ट्रविड्वराहाणामामिषस्य च भक्षणम् ॥
तत्स्त्रीणाञ्च तथा सङ्गस्ताभिश्च सह भोजनम् ।
मासोषिते द्विजातौ च प्राजापत्यं विशोधनम् ।
चान्द्रायणं पराकञ्च चरेत्संवत्सरोषितः ॥

संवत्सरोषितः शूद्रो मासार्धं यावकं पिबेत् ।
मासमात्रोषितः शूद्रः कृच्छ्रपादेन शुद्ध्यति ॥
ऊर्ध्वं संवत्सरात्कल्प्यं प्रायश्चित्तं द्विजोत्तमैः ।
संवत्सरैस्त्रिभिश्चैव तद्भावं स निगच्छति ॥

इत्युक्तं वर्तते। एवञ्च संवत्सरत्रयादर्वाक् प्रायश्चित्तेन पुनः स्वजातौ निवेशस्तु शास्त्रनिर्णीत एव। देवलस्तु विंशति-संवत्सरपर्यन्तमपि प्रायश्चित्तेन शुद्धिमनुमन्यते। किञ्च तत्रैव मिताक्षरायाम् 'चरितव्रत आयाते निनयेरन्नवं घटम्। जुगुप्सेरन्न चाप्येनं संवसेयुश्च सर्वशः ?' इत्यनेन घट-स्फोटानन्तरमपि स्वजातौ सङ्ग्रहो विहित एव। किञ्च तत्रैव याज्ञवल्क्ये संसर्गिप्रायश्चित्तप्रकरणे 'कन्यां समुद्वहेदेषां सोपवा-सामकिञ्चना' मित्यनेन पतितावस्थायां समुत्पन्ना पतितकन्यापि वोढव्येति विहितम्। अन्यान्यपि प्रमाणान्यूहनीयानि। सर्वथा पतितानां धर्मभ्रष्टानां त्यागो न कुत्रापि विहितः। किञ्च ये हि खलु म्लेछादयः सर्वधर्मबहिष्कृतत्वेन व्यपदिश्यन्ते, तेऽपि पूर्वं क्ष-त्रिया एवासन्! व्रात्यत्वादेव तु तेषां बहिष्कार इत्यपि मनुवा-क्यादवगम्यते।

शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः
वृषलत्वं गता लोके ब्राह्मणादर्शनेन च ॥ १० । ४३ ॥
पौण्ड्रकाश्चौण्ड्रद्रविड़ाः काम्बोजा यवनाः शकाः ।
पारदाः पल्हवाश्चीनाः किराता दरदाः खशाः ॥२०।४४॥
मुखबाहूरुपज्जानां या लोके जातयो बहिः ।
म्लेच्छवाचश्चार्यवाचः सर्वे ते दस्यवः स्मृताः ॥१०।४५॥

इति मनुः। एतेषामपि व्रात्यस्तोमादिप्रायश्चित्तं वर्तत एव ।

न च व्रात्यत्वं नाम पतितसावित्रिकत्वम्। तच्च सावित्र्यधिकारिण्येवेति तद्बहिर्भूतानां न व्रात्यत्वमिति वाच्यम्; पूर्वोक्तवाक्येन पौण्ड्रादीनामपि तथात्वात्। नचानेकपुरुषपर्यन्तमपि व्रात्यत्वे कथं पुनः संस्कार्यत्वमिति वाच्यम्; यस्य पितापितामहावनुपनीतौ स्यातामित्यादिवचनेषु पितापितामहादीनामुपलक्षणत्वस्वीकारे सर्वेषां पूर्वजानामनुपनीतत्वेऽपि माणवकस्य संस्कारसम्भवात्। न चैतादृशोपलक्षणत्वस्वीकारे किम्प्रमाणमिति वाच्यम्; सर्वेषां संस्काराणां पुरुषार्थत्वेन पुरुषोपयोगित्वात्तथासम्भवात्। तथाहि— द्विविधं कर्म क्रत्वर्त्वं पुरुषार्थञ्चेति। यद्भावनाकथम्भावपूरणं विधीयते तत्क्रत्वर्थम्। अन्यत्करणं फलञ्च पुरुषार्थमिति। अस्यैव शास्त्रदीपिकावचनस्य सोमनाथीये विवरणम्—'तत्तच्छास्त्रानपेक्षेच्छाविषयभाव्यकभावनांशत्वे सति क्रत्वर्थभिन्नत्वं पुरुषार्थत्वम्?' अस्ति च वसन्ते ब्राह्मणमुपनयीतेत्यादिशास्त्रविहितस्योपनयनस्येच्छाविषयाध्ययनभाव्यकभावनाकरणत्वे सति भावनाकथम्भावपूरकत्वाभावेन क्रत्वर्थभिन्नत्वात्पुरुषार्थत्वमव्याहतमेव। न च स्वाध्यायोऽध्येतव्य इति शास्त्रापेक्षत्वेन तदनपेक्षतादृशभावनांशत्वाभावेन कथं पुरुषार्थत्वमिति वाच्यम्; तथात्वे हि द्रव्योपार्जननियमस्यापि यागसाधनत्वेन तच्छास्त्रापेक्षतादृशभावनांशत्वात्पुरुषार्थत्वस्य व्याकोपात्। तस्मादपेक्षा नाम शब्दोपात्तैव ग्राह्या। न च स्वाध्यायविधौ शब्दत उपनयनस्यापेक्षा, किन्तु अधिकार्यपेक्षायामुपनयनविधिस्तदङ्गतां भजते। परञ्चोपनयनं खलु माणवकसंस्कारार्थमेव। तेन संस्कृतो हि माणवक एव स्वाध्यायविध्यधिकारीति तस्यैवापेक्षा। तत्संस्काराच्च परम्परयोपनयनापेक्षा। न तु शब्दतः साक्षात्। तस्मादुपनयनं पुरुषार्थमेव। पुरुषार्थाश्च धर्मा आपत्काले विपरि-

णम्यन्ते। अत एव द्रव्योपार्जननियमोऽप्यापत्काले विपरिणतो वैश्यवृत्त्यापि जीवनीयमिति। तस्मादापत्काले पुरुषार्थानां धर्माणां सर्वेषां विपरिवर्तने शास्त्रानुज्ञातेऽत्रापि पितृपितामहादीनामुपलक्षणत्वं स्वीकृत्य स्वधर्मभ्रष्टानां पतितानां व्रात्यानाञ्च पुनः प्रायश्चित्तेन स्वीकरणं न दोषावहम्। पूर्वतनजातिस्मरणाभावे तु पृथग्जातित्वम्, अन्यथा पूर्वतनजातौ प्रवेश इत्येव सिद्धान्तः। आपल्लक्षणन्तु पूर्वमेवोक्तमित्यलं विस्तरेण। सर्वथाऽऽग्रहेण न किञ्चिदपि वक्तव्यम्, किन्तु शास्त्रहेतूनां पर्यालोचनपूर्वकं परिस्थित्यादिकं मनसिकृत्य तर्केण शास्त्रं पर्यालोचनीयम्। 'यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः' इति मनुवचनादिति किमधिकं विदुषाम्। इति॥"

अत्र हि बालाद्दासीकृतानां प्रायश्चित्तेन पुनरपि स्वमते प्रवेशः सम्पादनीय इति देवलस्मृत्यनुसारेण स्वीकर्तव्यमिति यद्विवेचितम्, तत्र वयमपि न विप्रतिपन्नाः। यतो वयमपि स्मृतिपरतन्त्रा एव धर्माधर्मनिर्णयं समुचितं पश्यामः। तदत्र देवलस्मृतिपर्यालोचनात्पूर्वं देवलस्मृतिगतानि प्रकृतोपयुक्तानि वचनानि सङ्गृह्य प्रकाशयामः। तद्यथा—

भगवन्! म्लेच्छनीता हि कथं शुद्धिमवाप्नुयुः।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैवानुपूर्वशः॥
कथं स्नानं कथं शौचं प्रायश्चित्तं कथं भवेत्।
किमाचारा भवेयुस्ते तदाचक्ष्व सविस्तरम्॥

देवल उवाच—अपेयं येन सम्पीतमभक्ष्यं चापि भक्षितम्।
म्लेच्छैर्नीतेन विप्रेण अगम्यागमनं कृतम्॥
तस्य शुद्धिम्प्रवक्ष्यामि यावदेकन्तु वत्सरम्।
चान्द्रायणन्तु विप्रस्य सपराकं प्रकीर्तितम्॥

पराकमेकं क्षत्रस्य पादकृच्छ्रेण संयुतम् ।
पराकार्धन्तु वैश्यस्य शूद्रस्य दिनपञ्चकम् ॥
नखलोमविहीनानां प्रायश्चित्तं प्रदापयेत् ।
चतुर्णामपि वर्णानां नान्यथा शुद्धिरस्ति हि ॥
प्रायश्चित्तविहीनन्तु यदा तेषां कलेबरम् ।
कर्त्तव्यस्तत्र संस्कारो मेखलादण्डवर्जितः ॥
म्लेच्छैर्नीतेन शूद्रैर्वा हारिते दण्डमेखले ।
संस्कारप्रमुखं तस्य सर्वं कार्यं यथाविधि ॥
तदासौ तु कुटुम्बानां पङ्क्तिं प्राप्नोति नान्यथा ।
स्वभार्यां च यथान्यायं गच्छन्नेवं विशुध्यति ॥
अथ संवत्सरादूर्ध्वं म्लेच्छैर्नीतो यदा भवेत् ।
प्रायश्चित्ते तु सञ्चीर्णे गङ्गास्नानेन शुध्यति ॥
बलाद्दासीकृता ये च म्लेच्छचाण्डालदस्युभिः ।
अशुभं कारिताः कर्म गवादिप्राणिहिंसनम् ॥
उच्छिष्टमार्जनं चैव तथा तस्यैव भोजनम् ।
खरोष्ट्रविड्वराहाणामामिषस्य च भक्षणम् ॥
तत्स्त्रीणां च तथा सङ्गस्ताभिश्च सह भोजनम् ।
मासोषिते द्विजातौ तु प्राजापत्यं विशोधनम् ॥
चान्द्रायणं त्वाहिताग्नेः पराकस्त्वथवा भवेत् ।
चान्द्रायणं पराकञ्च चरेत्संवत्सरोषितः ॥
संवत्सरोषितः शूद्रो मासार्द्धं यावकं पिबेत् ।
मासमात्रोषितः शूद्रः कृच्छ्रपादेन शुध्यति ॥
ऊर्ध्वं संवत्सरात्कल्प्यं प्रायश्चित्तं द्विजोत्तमैः ।
संवत्सरैश्चतुर्भिश्च तद्भावमधिगच्छति ॥

ह्रासो न विद्यते यस्य प्रायश्चित्तं दुरात्मनः ।
गुह्यकक्षशिरोभ्रूणां कर्त्तव्यं केशवापनम् ॥
प्रायश्चित्तं समारभ्य प्रायश्चित्तन्तु कारयेत् ।
स्नानं त्रिकालं कुर्वीत धौतवासा जितेन्द्रियः ॥
कुशहस्तः सत्यवक्ता देवलेन ह्युदाहृतम् ।
वत्सरं वत्सरार्धं वा मासं मासार्धमेव वा ॥
बलान्म्लेच्छैस्तु यो नीतस्तस्य शुद्धिस्तु कीदृशी ।
संवत्सरोषिते शूद्रे शुद्धिश्चान्द्रायणेन तु ॥
पराकं वत्सरार्धे च पराकार्धं त्रिमासिके ।
मासिके पादकृच्छ्रं च नखरोमविवर्जितः ॥
पादोनं क्षत्रियस्योक्तमर्धं वैश्यस्य दापयेत् ।
प्रायश्चित्तं द्विजस्योक्तं पादं शूद्रस्य दापयेत् ॥
प्रायश्चित्तावसाने तु दोग्ध्री गौर्दक्षिणा मता ।
तथासौ तु कुटुम्बान्ते ह्युपविष्टो न दुष्यति ॥
अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः ।
प्रायश्चित्तार्धमर्हन्ति स्त्रियो रोगिण एव च ॥
संलापस्पर्शनिश्वाससहयानासनाशनात् ।
याजनाध्यापनाद्यौनात्पापं संक्रमते नृणाम् ॥
याजनं योनिसम्बन्धं स्वाध्यायं सहभोजनम् ।
कृत्वा सद्यः पतत्येव पतितेन न संशयः ॥
संवत्सरेण पतति पतितेन सहाचरन् ।
याजनाशनयज्ञादि कुर्वाणः सार्वकालिकम् ॥
अतः परं प्रवक्ष्यामि प्रायश्चित्तमिदं शुभम् ।
स्त्रीणां म्लेच्छैश्च नीतानां बलात्संवेशने क्वचित् ।

ब्राह्मणी क्षत्रिया वैश्या शूद्रा नीता यदान्त्यजैः ॥
ब्राह्मण्याः कीदृशं न्याय्यं प्रायश्चित्तं विधीयते ।
ब्राह्मणी भोजयेन्म्लेच्छमभक्ष्यं भक्षयेद्यदि ॥
पराकेण ततः शुद्धिः पादेनोत्तरतोत्तरान् ॥
न कृतं मैथुनं ताभिरभक्ष्यं नैव भक्षितम् ॥
शुद्धिस्तदा त्रिरात्रेण म्लेच्छान्ने नैव भक्षिते ॥
म्लेच्छान्नं म्लेच्छसंस्पर्शो म्लेच्छेन सह संस्थितिः ।
वत्सरं वत्सरादूर्ध्वं त्रिरात्रेण विशुद्ध्यति ॥
म्लेच्छैर्हृतानां चोरैर्वा कान्तारेषु प्रवासिनाम् ।
भुक्त्वा भक्ष्यमभक्ष्यं वा क्षुधार्तेन भयेन वा ॥
पुनः प्राप्य स्वकं देशं चातुर्वर्ण्यस्य निष्कृतिः ।
कृच्छ्रमेकं चरेद्विप्रस्तदर्धं क्षत्रियश्चरेत् ।
पादोनञ्च चरेद्वैश्यः शूद्रः पादेन शुद्ध्यति ॥
गृहीता स्त्री बलादेव म्लेच्छैर्गुर्वीकृता यदि ।
गुर्वी न शुद्धिमाप्नोति त्रिरात्रेणेतरा शुचिः ॥
योषा गर्भं विधत्ते या म्लेच्छात्कामादकामतः ।
ब्राह्मणी क्षत्रिया वैश्या शूद्रा वर्णेतरा च या ॥
अभक्ष्यभक्षणं कुर्यात्तस्याः शुद्धिः कथम्भवेत् ।
कृच्छ्रं सान्तपनं शुद्धिर्घृतैर्योनेश्च पाचनम् ॥
असवर्णेन यो गर्भः स्त्रीणां योनौ निषिच्यते ।
अशुद्धा सा भवेन्नारी यावच्छल्यं न मुञ्चति ॥
विनिःसृते ततः शल्ये रजसो वापि दर्शने ।
तदा सा शुद्ध्यते नारी विमलं काञ्चनं यथा ॥
स गर्भो दीयतेऽन्यस्मै स्वयङ्ग्राह्यो न कर्हिचित् ।

स्वजातौ वर्जयेद्यस्मात्संस्कारः स्याद्तोऽन्यथा ॥
गृहीतो यो बलान् म्लेच्छैः पञ्च षट् सप्त वा समाः ।
दशादि विंशतिं यावत्तस्य शुद्धिर्विधीयते ॥
प्राजापत्यद्वयं तस्य शुद्धिरेषा विधीयते ।
अतः परं नास्ति शुद्धिः कृच्छ्रमेव सहोषिते ॥
म्लेच्छैः सहोषितो यस्तु पञ्चप्रभृतिविंशतिः ।
वर्षाणि शुद्धिरेषोक्ता तस्य चान्द्रायणद्वयम् ॥
सभायां स्पर्शने चैव म्लेच्छेन सह संविशेत् ।
कुर्यात्स्नानं सचैलन्तु दिनमेकमभोजनम् ॥
माता म्लेच्छत्वमागच्छेत् पितरो वा कथञ्चन ।
असूतकञ्च नष्टस्य देवलस्य वचो यथा ॥
मातरञ्च परित्यज्य पितरञ्च तथा सुतः ।
ततः पितामहं चैव शेषपिण्डन्तु निर्वपेत् ॥
एकद्वित्रिचतुःसंख्यान् वत्सरान् संवसेद्यदि ।
म्लेच्छवासं द्विजश्रेष्ठः कामतो द्रव्ययोगतः ॥
एकाहेन तु गोमूत्रं द्व्यहेनैव तु गोमयम् ।
त्र्यहात् क्षीरेण संयुक्तं चतुर्थे दधिमिश्रितम् ॥
पञ्चमे घृतसम्पूर्णं पञ्चगव्यं प्रदापयेत् ।
पञ्चसप्तदशाहानि पञ्चदशाच्च विंशतिः ॥
संवासे च प्रवक्ष्यामि देहशुद्धिं द्विजन्मनाम् ।
पञ्चाहं पञ्चगव्यं स्यात्पादकृच्छ्रं दशाहिके ॥
पराकं पञ्चदशभिर्विंशेऽतिकृच्छ्रमेव च ।
उदरं प्रविशेद्यस्य पञ्चगव्यं विधानतः ॥
यत्किञ्चिद्दुष्कृतं तस्य सर्वं नश्यति देहिनः ॥

पञ्च सप्ताष्ट दश वा द्वादशाहोऽपि विंशतिः।
म्लेच्छैर्नीतस्य विप्रस्य पञ्चगव्यं विशोधनम् ॥ इति ॥

[देवलस्मृति समालोचनम्।]

अत्र हि संवत्सरम्लेच्छवासादिना पातित्यम्, संवत्सरचतुष्टयानन्तरं म्लेच्छभावम्, तत एव प्रायश्चित्ताभावम्, विंशतिसंवत्सरपर्यन्तं म्लेच्छगृहीतत्वे प्रायश्चित्तार्हत्वम्, यौनसम्बन्धेन सद्यः पातित्यम्, अगम्यागमनेऽपि प्रायश्चित्तानन्तरम् स्वीयकुटुम्बपङ्क्तिसम्बन्धम्, तत्प्राप्तिञ्च बहुविधं विरुद्धमर्थजातं पश्यतां हि न व्यवस्थितार्थबोधो भवेदिति प्रथमतोऽविरोधसम्पादनार्थं प्रयतामहे। सत्यं संवत्सरेण पातित्यं संवत्सरचतुष्टयानन्तरमेव म्लेच्छभावश्च बोध्यत इति संवत्सरचतुष्टयपर्यन्तं प्रायश्चित्ताधिकारो वर्तते। तथापि तु संवत्सरमध्य एव प्रायश्चित्तेन स्वपूर्वतनकुटुम्बसम्बन्धः, न तु तदनन्तरं म्लेच्छवासादावपीति देवलस्याशयोऽवगम्यते। तथाच किञ्चिदूनसंवत्सरपर्यन्तं म्लेच्छसंसर्गिणां प्रायश्चित्तेन स्वकुटुम्बसम्बन्धेऽपि नेतरेषां तद्योगः।

अत एव—तदासौ स्वकुटुम्बानां पङ्क्तिम्प्राप्नोति नान्यथा।
इत्युक्त्वा—अथ संवत्सरादूर्ध्वं म्लेच्छैर्नीतो यदा भवेत् ॥
प्रायश्चित्ते तु सम्पूर्णे गङ्गास्नानेन शुद्ध्यति। इति ॥

संवत्सराधिकसंसर्गिणां स्वधर्माधिकाराख्यशुद्धिमात्रमाम्नायमानमुपपद्यते। अत्र हि शुद्धिपदेन स्वकुटुम्बपङ्क्तिसम्बन्धविरहित एव कश्चनाधिकारो बोध्यत इति वक्तव्यमिति पूर्णं संवत्सरं संवत्सरचतुष्टयपर्यन्तं वा म्लेच्छसंसर्गिणां पृथक्संस्थैव युक्तेति सिद्धम्। अत्र किञ्चिदूनसंवत्सरकालपर्यन्तं यौनसम्बन्धेऽपि स्वभार्यासम्बन्धः प्रायश्चित्तानन्तरं भवतीति यद्विवेचितम्, तदिदं बलात्कारेणाग-

म्यागमन एव। व्यक्तं चैतन्मदनरत्नप्रदीपे पूर्वोद्धृते वर्तत इति नात्र कापि स्वकपोलकल्पना। युक्तञ्चैतत्। अत एव हि देवलस्मृतावेवोपसंहारे—एकद्वित्रिचतुःसंख्यान् वत्सरान् संवसेद्यदि। म्लेच्छवासं द्विजश्रेष्ठः कामतो द्रव्ययोगतः—इति कामतः क्रियमाणस्य सहवासस्यैव म्लेच्छभावप्रयोजकत्वमुक्तमुपपद्यते। सहवासादीनामपि एकसंवत्सरेणैव पातित्यप्रयोजकत्वन्तु समुदितरूपेणैव न तु पृथक्त्वेनेत्यपि मदनरत्नप्रदीपे विवेचितमिति न कोऽपि विरोधः। यत्तु विंशतिवत्सरपर्यन्तं म्लेच्छवासेऽपि प्रायश्चित्तान्नानं तद् बलादापादितसहवासमात्रविषयमित्येव देवलाशयः। अत एव—गृहीतो यो बलान्म्लेच्छैः पञ्च षट् सप्त वा समाः। दशादि विंशतिं यावत्तस्य शुद्धिर्विधीयते—इति श्लोके बलात्पदोपादानमुपपद्यते। अत्र बलपदस्य छलमोहाद्युपलक्षणत्वेऽपि न विरोधः। यतो वयमप्यकामतो म्लेच्छवासादावेव प्रायश्चित्तविधिमनुमन्यामहे। स्त्रीणां परं गर्भधारणेऽपि शुद्धिः प्रायश्चित्ताधीना देवलस्मृतिबोधिता नास्माकमपि विरुद्धा। तत्रापि गर्भत्यागपूर्वकमेव स्वजातिप्रवेशो न गर्भेण साकमपीति देवलसिद्धान्तादिदमवगम्यते यत्कामतो बहुवारं यावन्म्लेच्छसंसृष्टाया न स्वजातिप्रवेशाधिकार इति। इयान् विशेषः—यत्पुंसामगम्यागमनेन कामकृतेन सद्य एव पातित्यम्, स्त्रीणांतु कामकृतेनापि सकृद्गमनेन न पातित्यमिति। इदन्तु देवलस्मृतिमात्रपर्यालोचनेन। कलिवर्ज्यप्रकरणानुसारेण तु स्त्रीणामपि पातित्यमेवेति पूर्वमेव विवेचितम्। सर्वथा तु संवत्सराधिककालं यावन्म्लेच्छसंसर्गे म्लेच्छभावं गतानां पृथक्संस्थैव न कुटुम्बपंक्तिसम्बन्धयोग्यतापीत्येव देवलाशयः। अत एव—ऊर्ध्वं संवत्सरात्कल्प्यं प्रायश्चित्तं द्विजोत्तमैः—इत्युपक्रम्यान्ते—प्राय-

श्चित्तात्रसानेतु दोग्ध्री गौर्दक्षिणा मता। तथासौ स्वकुटुम्बान्ते ह्युपविष्टो न दुष्यति—इति कृतप्रायश्चित्तस्य तस्य कुटुम्बान्त एवोपवेशमात्रमेव दोषनिमित्तं न भवतीति प्रतिपादितमुपपद्यते। अनेन हीदं स्पष्टमवगम्यते कुटुम्बमध्यसम्बन्धः सहासनव्यतिरिक्तसम्बन्धान्तरञ्च तस्य न योग्यमिति। तथाचानुपदोदाहृताधुनिकप्रबन्धकारा यदि देवलस्मृतिसिद्धान्तानुसारेण व्यवस्थामपेक्षन्ते, तर्हि तु नास्माकमप्यत्र विप्रतिपत्तिः। इदमेवात्रास्माकं वक्तव्यं यद्देवलस्मृतौ नोक्तप्रबन्धकारोक्तरीत्या पश्चात्तापमात्रेण सर्वेषां संग्रहः प्रतिपादित इति। एतेन—येषां खलु जातिकुलादिकं पूर्वतनं स्मर्यते, तेषां स्वजातौ निवेशः, येषां खलु तदभावस्तेषां पृथक्संस्थेति सिद्धान्तोऽपि—परास्तः। नह्ययं सिद्धान्तो देवलस्मृत्यारूढः। तत्र हि स्पष्टमेव किञ्चिदूनसंवत्सरपर्यन्तं म्लेच्छसंसर्गिणामेव स्वजातिकुलसम्बन्धः प्रतिपादित इति स्पष्टमेवानुपदं विवेचितम्। यत्तु देवलस्मृतौ—ऊर्ध्वं संवत्सरात्कल्प्यं प्रायश्चित्तं द्विजोत्तमैरिति विवेचितम्, तदपि सत्यं धर्मज्ञानां प्रायश्चित्तव्यवस्थायां स्वातन्त्र्यं गमयति; संवत्सरचतुष्टयानन्तरं देवलेनैव प्रायश्चित्तनिषेधात्। ह्रासो न विद्यते तस्य प्रायश्चित्तं दुरात्मनः—इति हि तदीयं वचनम्। एतेन—अतः परं नास्ति शुद्धिरिति देवलवचनमपि—व्याख्यातम्।

एतेन—अनुक्तनिष्कृतीनान्तु पापनामपनुत्तये।

शक्तिञ्चावेक्ष्य पापञ्च प्रायश्चित्तं प्रकल्पयेत्॥

[देवलसम्मतशुद्धिव्यवस्था]

इति मनुवचनमपि व्याख्यातम्। एतेन—उक्तवचनानुसारेण धर्मज्ञानां प्रायश्चित्तव्यवस्थापनेऽधिकारो वर्तत इति कथमपि म्लेच्छीभूतानामपि

संग्रहो न्याय्य इति आधुनिकसिद्धान्तोऽपि परास्तः। तथाच देवलसिद्धान्तोऽपि पूर्वोक्तमस्मदीयमेव सिद्धान्तमनुकरोति, न त्वन्यमिति तत्सिद्धान्तानुसारेण किञ्चिदूनसंवत्सरपर्यन्तं म्लेच्छसहवासादि कुर्वतां स्वकुटुम्बसम्बन्धः; तदतिरिक्तानान्तु म्लेच्छसंसर्गिणां संवत्सरचतुष्टयानधिकतत्संसर्गिणां पृथक् संस्था, येषां स्वधर्माधिकारयोग्यताऽप्यनुमन्यते। इतरेषान्तु न प्रायश्चित्ताधिकारयोग्यतेति निष्कर्षः पर्यवसन्नः। यत्तु कृतप्रायश्चित्तानां पृथक्जातित्वकल्पने महाननर्थः स्यादित्यादि पूर्वोद्धृते प्रबन्धे विवेचितम्, दत्तोत्तरमिदं पूर्वमेव जातिभेदो न वैमत्यकारणमिति निरूपणावसरे एव। यत्र त्वगत्या जातिभेदः कल्पनीय एवेति प्रकृतप्रबन्धकारा अपि मन्यन्ते, तत्रागतिरेव किं सङ्घटने भविष्यति, उत सत्यपि तस्मिन् प्रकारान्तरेण सङ्घटनं सम्पादयिष्यते। वयन्तु पश्यामः—पश्चात्तापमात्रेणाकृतप्रायश्चित्ता अपि स्वयं नष्टाः परान्नाशयितुं प्रवृत्ता इत्यपवादविषयतामात्मनः परिहर्तुकामा यावच्छक्ति जन्मान्तरे वापि समुचिता गतिर्भवतु इत्यादिचिन्तया सर्वविधं साहाय्यं कृतप्रायश्चित्तानां शुद्धानां वा सम्पाद्य कथमपि न सङ्घटनविरोधिनो भविष्यन्ति, यदि ते वस्तुगत्या पश्चात्तप्ता भवन्तीति। ब्रह्मघ्नानान्तु येषां निर्णयसिन्धूक्तरीत्या चतुर्गुणं प्रायश्चित्तम्, तेषां 'नास्यास्मिंल्लोके प्रत्यापत्तिर्वर्तते' इत्यापस्तम्बसूत्रानुसारेण मिताक्षरादिसिद्धान्तानुसारेणापि न व्यवहार्यत्वमिति स्पष्टमेव पूर्वमेव विवेचितम्। एतेन—ब्रह्मघ्नानामपि कृतप्रायश्चित्तानां यदि पूर्वजातिप्रवेशस्तर्हि कथं न स मतान्तरप्रविष्टानामिति शङ्कापि परास्ता। यथा च देवलवचनानां संवत्सराधिकम्लेच्छसंसर्गिणां पृथक्संस्थास्थापनौचित्य एव स्वारस्यम्,

तथा पूर्वमेव विवेचितमिति—अथ पतिताः समवसाय धर्मांश्चरे-युरितरेतरयाजका इतरेतराध्यापका मिथो विवहमानाश्च—इत्यादिबौधायनादिवचनमपि व्याख्यातम्। बलाद्दासीकृता ये तु म्लेच्छचाण्डालदस्युभिरित्यादिवचनानि, यान्यापस्तम्बवचनानीति प्रकृतप्रबन्धे उल्लिखितानि, तान्यपि देवलवचनान्येवेति तद्वचनानुसारेणापि न वर्षत्रयपर्यन्तं म्लेच्छसंसर्गिणामपृथग्जातित्वं युक्तम्। वत्सरचतुष्टयेन तद्भाववचनस्य तु तात्पर्यं तदनन्तरं प्रायश्चित्तेन स्वधर्माधिकारस्याप्यभाव एव। अत एव—हासो न विद्यते तस्य प्रायश्चित्तं दुरात्मन इति वाक्यशेष उपपद्यते। एतेन—विंशतिसंवत्सरपर्यन्तं स्वजातिप्रवेशो देवलसम्मत एवेति शङ्कापि—परास्ता। अत्र हीदं देवलवचनम्—गृहीतो यो बलान्म्लेच्छैः पञ्च षट् सप्त वा समाः। दशादिविंशतिं यावत्तस्य शुद्धिर्विधीयते—इति। अत्र बलात्कारेण गृहीतमात्रस्य सहाशनादिसंसर्गरहितस्य विंशतिवत्सरपर्यन्तं स्ववशे म्लेच्छै रक्ष्यमाणस्य स्वीयाहारव्यवहारादिषु म्लेच्छैर्हस्तक्षेपो यत्र न कृतस्तस्यैव ग्रहणमिति न दोषः। एतेन—चरितव्रत आयाते निनयेरन्नवं घटम्। जुगुप्सेरन्न चाप्येनं संवसेयुश्च सर्वशः इति याज्ञवल्क्यवचनमपि—व्याख्यातम्; तस्य किञ्चिदूनवत्सरंम्लेच्छसंसर्गविषयत्वेनाविरोधात्।

[मुद्रित देवलस्मृति प्रामाण्यसन्देहः]

इदमानन्दाश्रममुद्रापितदेवलस्मृतिप्रामाण्यमूरीकृत्य वर्णितम्। वस्तुतस्तु तत्प्रामाण्यमेव संदिग्धं वर्तते। अत्र कारणमिदमेव यत् मुद्रापितदेवलस्मृतौ निबन्धकारोद्धृतत्रिशतवचनमध्ये "संलापस्पर्श निश्वाससहयानासनाशनात्।" संवत्सरेण पतति पतितेन सहाचरन्" इति श्लोकद्वयमेव वर्तते नान्यत्किमपि। मुद्रापितदेव-

लस्मृतौहि नवतिश्लोकाः वर्तन्ते, तत्तन्निबन्धकारोद्धृतवचनानि तु अन्यूनम् त्रिशतानि । तथा च स्मृत्यन्तरानुसारिव्यवस्थयैव पतित-परावर्तनमिदानीं कर्तुं योग्यम्, न तु मुद्रापितदेवलस्मृत्यनुसारेण । अत्र विश्वासार्थम् निबन्धकारोद्धृतानि सर्वाणि देवलवचनानि प्रायेण प्रकाश्यन्ते । तद्यथा—

तत्र विद्वन्मनोहरायां देवलः—
यावद्वर्णविभागोऽस्ति यावद्वेदः प्रवर्तते । पृष्ठम्—
संन्यासं चाग्निहोत्रं च तावत्कुर्यात्कलौ युगे ॥ २८
यः स्वदारानृतुस्नातान् स्वस्थः सन्नोपगच्छति ।
भ्रूणहत्यामवाप्नोति प्रजां प्राप्तां विनाश्य सः ॥३५॥
दशाहाद्धि त्रिभागेन कृते संचयने क्रमात् ।
अङ्गस्पर्शनमिच्छन्ति वर्णानां तत्त्वदर्शितः ॥ १००
सर्ववर्णेषु दायादाः ये स्युर्विप्रस्य बान्धवाः ।
तेषां दशाहमाशौचं विप्रशौचे विधीयते ॥ १०२ ॥
अविभक्तविभक्तानां कुल्यानां वसता सह ।
भूयो दायविभागः स्यात् आचतुर्थादिति स्थितिः ॥
तावत्कुल्याः सपिण्डाः स्युः पिण्डभेदस्ततः परम् ।
समं तत्र सपिण्डानां दायार्थस्य विभाजनम् ॥१०४॥
आत्रिपक्षात् त्रिरात्रं स्यात् षण्मासात् पक्षिणी ततः ।
परमेकाहमावर्षात् उर्ध्वं स्नानेन शुद्ध्यति ॥ १०६ ॥
नैष्ठिकानां वनस्थानां यतीनां ब्रह्मचारिणाम् ।
नाशौचं सूतके प्रोक्तं शावे वापि तथैव च ॥ ११६ ॥
❀ पुनः पाते दशाहात् प्राक् पूर्वेण सह गच्छति ।
दशमेऽह्नि पतेद्यस्य त्र्यहात् स तु विशुध्यति ॥

प्रभाते स त्रिरात्रेण दशरात्रेष्वयं विधिः ॥ १२३ ॥
यः समानोदकं प्रेतं वहेद्वापि दहेत वा ।
तस्याशौचं दशाहं स्यादन्येषां तु त्र्यहं भवेत् ॥१२६॥
विहितं तु सपिण्डानां प्रेतनिर्हरणादिकम् ।
तेषां करोति यः कश्चित् तस्याधिक्यं न विद्यते ॥
श्वपाकं पतितं व्यङ्गमुन्मत्तं शवदाहकम् ।
सूतकं सूतिकां नारीं रजसा च परिप्लुताम् ॥१८६॥
श्वकुक्कुटवराहांश्च ग्राम्यान् संस्पृश्य मानवः ।
सचेलः सशिराः स्नात्वा तदानीमेव शुध्यति ॥ १८६॥
चण्डालाध्युषितं यत्र यत्र विष्ठादिसङ्गतिः ।
एवं कश्मलभूयिष्ठा भूरमेध्या प्रकीर्तिता ॥ १६४ ॥
अक्षोभ्यानि तटाकानि नदीवापीसरांसि च ।
कश्मलाशुचियुक्तानि तीर्थं तत् परिवर्जयेत् ॥२१०॥
❀ अक्षुद्राणामपां नास्ति प्रभूतानां च दूषणम् ।
स्तोकानामुद्धृतानां च कश्मलं दूषणं भवेत् ॥
और्णकौशेयकुतप शाणक्षौमदुकूलजाः ।
अल्पशौचा भवन्त्येते शोषणप्रोक्षणादिभिः ।
तान्येवामेध्ययुक्तानि क्षालयेच्छोधनैः स्वकैः ॥२२१॥
❀ धान्यशुक्लैस्तु फलजैः रसैः क्षमानुगैरपि ।
तूलिकाद्युपधाने च पुष्परक्ताम्बराणि च ॥
शोषयित्वाऽऽतपे किंचित् करैस्तन्मार्जयेत्पुनः ।२२६।
पश्चात्तु वारिणा प्रोक्ष्य विनियुञ्जीत कर्मणि ॥
❀ तान्यप्यतिमलिष्ठानि यथावत्परिशोधयेत् ॥२२६॥
❀ मत्वा गत्वा पुनर्भार्यां गुरोः क्षत्रसुतां द्विजः ।

अण्डाभ्यां वर्जितं लिङ्गं उत्कृत्य च मृतः शुचिः ।२६५।
कन्दूपक्वं स्नेहपक्वं पायसं दधिसक्तवः ।
एतान्यशूद्रान्नभुजो भोज्यानि मनुरब्रवीत् ॥ ३३२ ॥
* क्लिन्नं भिन्नं शवं चैव कूपस्थं यदि दृश्यते ।
पयः पिबेत् त्रिरात्रेण मानुषे द्विगुणं भवेत् ॥३४४॥
* यस्तु चाण्डालभाण्डस्थं अज्ञानादुदकं पिबेत् ।
स तु त्र्यहेण शुध्येत शूद्रस्त्वेकेन शुध्यति ॥ ३४६ ॥
तथा पराशरमाधवीये प्रायश्चित्तकाण्डे देवलः—
अशुद्धान् स्वयमप्येतान् शुद्धस्तु यदि संस्पृशेत् ॥
विशुद्ध्यत्युपवासेन त्रिरात्रेण ततः शुचिः ।
उच्छिष्टं संस्पृशेद्विप्रः पुनः कृच्छ्रेण शुद्ध्यति॥११०॥
प्रायश्चित्तं यथोद्दिष्टमशक्यं दुर्बलादिभिः ।
इष्यतेऽनुग्रहस्तेषां लोकसंग्रहकारणात् ॥ १३०॥
एको नार्हति तत्कर्तुमज्ञो वा नाप्यनुग्रहम् ।
धर्मज्ञा बहवो विप्राः कर्तुमर्हन्त्यनुग्रहम् ॥ १३१ ॥
कर्तारं देशकालौ च प्रमाणं कारणं क्रियाम् ।
अपेक्ष्य च बलं चैव प्रायश्चित्तं विधीयते ॥ १३१ ॥
अविगन्धा रसोपेता निर्मलाः पृथिवीगताः ।
अक्षीणाश्चैव गोपानादापः शुद्धिकराः स्मृताः ॥१५५॥
अल्पशौचे भवेच्छुद्धिः शोषणप्रोक्षणादिभिः ।
तान्येवामेध्ययुक्तानि निर्णिज्यात्क्षारपर्ययैः ॥
तान्यप्यतिमलिष्ठानि यथावत् परिशोधयेत् ॥१८५॥
तरवः पुष्पिता मेध्या ब्राह्मणाश्चैव सर्वदा ।
भस्म क्षौद्रं सुवर्णं च सदर्भाः कुतपास्तिलाः॥१६२॥

अपामार्गशिरीषार्कपद्ममामलकं मणिः ।
माल्यानि सर्षपा दूर्वाः सदा भद्राः प्रियङ्गवः ॥,,
अक्षताः सिकता लाजा हरिद्रा चन्दनं यवाः ।
पलाशखादिराश्वत्थास्तुलसीधातकीवरः ॥ (?)
एतान्याहुः पवित्राणि ब्रह्मज्ञा हव्यकव्ययोः ।
पौष्टिकानि मङ्गलानि शोधनानि च देहिनाम् ॥
अकश्मलैः समृद्धोऽग्निर्दुर्मनुष्यैरदूषितः ।
सर्वेषामप्यशौचानां समर्थः शोधनाय सः ॥
अग्नेर्वृषलभुक्तस्य ग्रहणं नास्त्यनापदि ।
श्वपाको वृषलो भोक्तुं ब्राह्मणाग्निं च नार्हति ॥
❀ चण्डालाग्नेरमेध्याग्नेः सूतकाग्नेश्च कर्हिचित् ।
पतिताग्नेश्चिताग्नेश्च न शिष्टैर्ग्रहणं स्मृतम् ॥१६३॥
❀ अग्राम्या मृद् भवेच्छुद्धा श्लक्ष्णाऽविण्मूत्रदूषिता ।
दहनात् खननाच्चैव उपलेपनधावनात् ॥
पर्जन्यवर्षणात् भूमेः शौचं पञ्चविधं स्मृतम् ॥१६४॥
❀ यस्स्यादनभिसन्धाय पापं कर्म सकृत्कृतम् ।
तस्येयं निष्कृतिः प्रोक्ता धर्मविद्भिर्मनीषिभिः॥२००॥
❀ विधेः प्राथमिकादस्माद् द्वितीये द्विगुणं भवेत् ।
तृतीये त्रिगुणं प्रोक्तं चतुर्थे नास्ति निष्कृतिः ॥२०१॥
❀ अभिसन्धिकृते पापे सकृद्वा नेह निष्कृतिः ।
अपरे निष्कृतिं प्राहुरभिसन्धिकृतेऽपि च ॥
❀ याचितास्तेन ते चापि ब्राह्मणाः पापभीरुणा ।
निष्कृतिं व्यवहारार्थं कुर्युस्तस्मै नृपाज्ञया ॥२३२॥
❀ स्वयं वा ब्राह्मणैः कृच्छ्रमल्पदोषे विधीयते ।

राज्ञा च ब्राह्मणैश्चैव महत्सु सुपरीक्ष्य च ॥ २३३॥
⊛ गोघ्नः षण्मासान् तच्चर्मपरीवृतो ग्रासाहारो ।
गोव्रजनिवासी गोभिरेव सह चरन् मुच्यते ॥
चान्द्रायणं द्विविधम्, यवमध्यं पिपीलिकामध्यमिति ।
एकग्रासममावास्यादि यवमध्यम्, पञ्चदशग्रासादि
पौर्णमास्यादि पिपीलिकामध्यम् ॥
यस्स्यादनभिसन्धाय पापं कर्म सकृत्कृतम् ।
तस्येयं निष्कृतिः प्रोक्ता धर्मविद्भिर्मनीषिभिः ॥
पराशरमाधवीये द्वादशाध्याये—
महानिशा तु विज्ञेया मध्यस्थं प्रहरद्वयम् ॥२३॥
तस्यां स्नानं न कुर्वीत काम्यनैमित्तिकादृते ।
महानिशा द्वे घटिके रात्रेरर्धमयामयोः ॥
सुरापाने ब्राह्मणो रूप्य ताम्रसीसानामन्य—
तममग्निकल्पं पीत्वा शरीरत्यागात्पूतो भवति ॥
सिन्धुसौवीरसौराष्ट्रान् तथा प्रत्यन्तवासिनः ।
अङ्गवङ्गकलिङ्गांश्च गत्वा संस्कारमर्हति ॥ १४७ ॥
मिताक्षरायां देवलः—
द्विविधो गृहस्थः, यायावरः शालीनश्च ।
तयोर्यायावरः प्रवरो याजनाध्यापनप्रतिग्रहरि-
क्थसंचयवर्जनात् । षट्कर्माधिकृतः प्रेष्यचतुष्पा
द्गृहग्रामधनधान्ययुक्तो लोकानुवर्ती शालीनः ।
श्वसूकरखरोष्ट्रादिसंस्पृष्टा दुष्टातां व्रजेत् ।
अङ्गारतुषकेशास्थिभस्माद्यैर्मलिना भवेत् ॥ ५८ ॥
पञ्चधा वा चतुर्धा वा भूरमेध्याऽपि शुद्ध्यति ।

दुष्टान्विता त्रिधा द्वेधा शुद्धयते मलिनैकधा ॥ ५८ ॥
मानुषास्थि वसां विष्ठामार्तवं मूत्ररेतसी ।
मज्जानं शोणितं स्पृष्ट्वा परस्य यदि संस्पृशेत् ॥६०॥
स्नात्वा प्रमृज्य लेपादीनाचम्य स शुचिर्भवेत् ।
तान्येव स्वानि संस्पृश्य पूतः स्यात्परिमार्जनात् ॥
तान्येव स्वानि संस्पृश्य प्रक्षाल्याचम्य शुद्धयति ।
ऊर्ध्वं नाभेः करौ मुक्त्वा यदङ्गमुपहन्यते ।
तत्र स्नानमधस्तात्तु प्रक्षाल्याचम्य शुद्ध्यति ॥
उद्धृताश्चापि शुद्ध्यन्ति शनैः पात्रैः समुद्धृताः ।
एकरात्रोषिता आपस्त्याज्या शुद्धा अपि स्वयम् ॥
पूर्वाह्णे दैविकं कर्म अपराह्णे तु पैतृकम् ॥ ७८ ॥
एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकम् ॥
दशमेऽहनि सम्प्राप्ते स्नानं ग्रामाद्बहिर्भवेत् ।
तत्र त्याज्यानि वासांसि केशश्मश्रुनखानि च ॥
नवश्राद्धेषु यच्छिष्टं गृहे पर्युषितं च यत् ।
दम्पत्योर्भुक्तशिष्टं च न भुञ्जीत कदाचन ॥
प्रथमेऽह्नि तृतीयेऽह्नि पञ्चमे सप्तमे तथा ।
नवमैकादशे चैव तन्नवश्राद्धमुच्यते ॥
स्वाशौचकालाद्विज्ञेयं स्पर्शनं च विभागशः ॥२०७॥
शूद्रविट्क्षत्रविप्राणां यथाशास्त्रं प्रचोदितम् ॥
दशाहादित्रिभागेन कृते संचयने क्रमात् ।
अङ्गस्पर्शनमिच्छन्ति वर्णानां तत्त्वदर्शिनः ॥
त्रिचतुःपञ्चदशभिः स्पृश्या वर्णाः क्रमेण तु ।
भोज्यान्नो दशभिर्विप्रः शेषा द्वित्रिषडुत्तरैः ॥

नाशुद्धिः प्रसवाशौचे व्यतीतेषु दिनेष्वपि । ३२३॥
प्रोषिते कालशेषः स्यादशेषे त्र्यहमेव तु ॥
सर्वेषां वत्सरे पूर्णे प्रेते दत्त्वोदकं शुचिः ।
उपस्पृश्याशुचि स्पृष्टं तृतीयं वापि मानवः ॥
हस्तौ पादौ च तोयेन प्रक्षाल्याचम्य शुद्ध्यति॥३२४॥
जातिशक्तिगुणापेक्षं सकृद् बुद्धिकृतं तथा ॥
अनुबन्धादि विज्ञाय प्रायश्चित्तं प्रकल्पयेत् ।
पतितेन सहोषित्वा जानन् संवत्सरं नरः ॥ २६५ ॥
मिश्रितस्तेन सोऽब्दान्ते स्वयं च पतितो भवेत् ॥
संलापस्पर्शनिश्वाससहयानासनाशनात् ॥ ४१३॥
याजनाध्यापनाद्यौनात् पापं संक्रामते नृणाम् ॥
भोजनासनशय्यादि कुर्वाणः सार्वकालिकम् ॥
चण्डालकूपभाण्डस्थं नरः कामाज्जलं पिबेत् ।
प्रायश्चित्तं कथं तत्र वर्णे वर्णे विनिर्दिशेत् ॥ ४५६ ॥
चरेत्सान्तपनं विप्रः प्राजापत्यं च भूमिपः ।
तदर्धं तु चरेद्वैश्यः शूद्रे पादं विनिर्दिशेत् ॥
चण्डालकूपभाण्डस्थमज्ञानादुदकं पिबेत् ।
स तु त्र्यहेण शुद्ध्येत शूद्रस्त्वेकेन शुद्ध्यति ॥
तथा हेमाद्रौ दानखण्डे देवलः—
दुर्लभं भारते वर्षे जन्म तस्मान्मनुष्यता ।
मानुष्यात् ब्राह्मणत्वं च दुर्लभं सुतरां मतम् ॥ ८ ॥
विप्रत्वे सति दुष्प्रापा विद्यादिगुणयोगिता ।
तत्र न्यायार्जितार्थाप्तिः ततो भक्त्याप्तिरिष्यते ॥९॥
लब्ध्वैतद् गुणसंयोगं तीर्थं पात्रं च पर्व च ।

दानानि ये प्रयच्छन्ति कृतार्थास्ते नरा भुवि ॥
अर्थानामुदिते पात्रे श्रद्धया प्रतिपादनम् ।
दानमित्यभिनिर्दिष्टं व्याख्यानं तस्य कथ्यते ॥१३॥
द्विहेतु षड्धिष्ठानं षडङ्गं षड्विपाकजम् ।
चतुःप्रकारं त्रिविधं त्रिनाशं दानमुच्यते ॥
नाल्पत्वं वा बहुत्वं वा दानस्याभ्युदयावहम् ।
श्रद्धा भक्तिश्च दानानां वृद्धिक्षयकरे उभे ॥
धर्ममर्थं च कामं च व्रीडाहर्षभयानि च ।
अधिष्ठानानि दानानां षडेतानि प्रचक्षते ॥
पात्रेभ्यो दीयते नित्यं अनपेक्ष्य प्रयोजनम् ॥
केवलं त्यागबुद्ध्या यद्धर्मदानं तदुच्यते ॥१४॥
प्रयोजनमपेक्ष्यैव प्रसङ्गाद्यत्प्रदीयते ।
तदर्थदानमित्याहुरैहिकं फलहेतुकम् ॥
स्त्रीदानं मृगपक्षिणां प्रसङ्गाद्यत्प्रदीयते ।
अनर्हेषु च रागेण कामदानं तदुच्यते ॥
संसदि व्रीडया स्तुत्याऽऽचार्यादिभ्यः प्रयाचितः ॥१५॥
प्रदीयते च तद्दानं व्रीडादानमिति स्मृतम् ॥
दृष्ट्वा प्रियाणि श्रुत्वा वा हर्षवत् यत्प्रदीयते ।
हर्षदानमिति प्राहुर्दानं तद्धर्मचिन्तकाः ॥
आक्रोशानर्थहिंसानां प्रतीकाराय यद्भवेत् ।
दीयते तापकर्तृभ्यो भयदानं तदुच्यते ॥
दाता प्रतिग्रहीता च श्रद्धा देयं च धर्मयुक् ॥
देशकालौ च दानानां अङ्गान्येतानि षड् विदुः ।
अपापरोगी धर्मात्मा दित्सुरव्यसनः शुचिः ॥

अनिन्द्यजीवकर्मा च षड्भिर्दाता प्रशस्यते ।
त्रिशुक्तः कृशवृत्तिश्च घृणालुः सकलेन्द्रियः ।
विमुक्तो योनिदोषेभ्यो ब्राह्मणः पात्रमुच्यते ॥
सौमुख्याद्यतिसंप्रीतिरर्थिनां दर्शने सदा । १५ ॥
सत्कृतिश्चानसूया च तदा श्रद्धेति कीर्त्यते ॥
अपापराधमक्लेशं प्रयत्नेनार्जितं धनम् ।
स्वल्पं वा विपुलं वापि देयमित्यभिधीयते ॥
यदत्र दुर्लभं भद्रं यस्मिन् कालेऽपि वा पुनः ।
दानार्हौ देशकालौ च स्यातां श्रेष्ठौ न चान्यथा ॥
अवस्था देशकालानां पात्रदात्रोश्च सम्पदा ।
हीनं वापि भवेच्छ्रेष्ठं श्रेष्ठं वाऽप्यन्यथा भवेत् ॥
दुष्फलं निष्फलं हीनं तुल्यं विपुलमक्षयम् ।
षड्विपाकयुगुद्दिष्टं षडेतानि विपाकतः ॥
नास्तिकस्तेनहिंस्रेभ्यो जाराय पतिताय च ।
पिशुनभ्रूणहन्तृभ्यां प्रदत्तं दुष्फलं भवेत् ॥
महदप्यक्षयं दानं श्रद्धया परिवर्जितम् ।
परबाधाकरं दानं परमप्यूनतां व्रजेत् ।
यथोक्तमपि यद्दत्तं चित्तेन कलुषेण तु ।
तत्तु संकल्पदोषेण दानं तुल्यफलं भवेत् ॥
युक्ताङ्गैः सकलैः षड्भिर्दानं स्याद्विपुलोदयम् ।
अनुक्रोशवशाद्दत्तं दानमक्षयतां व्रजेत् ॥
ध्रुवमाद्यत्विकं काम्यं नैमित्तिकमिति क्रमात् ।
वैदिको दानमार्गोऽयं चतुर्धा वर्ण्यते द्विजैः ॥
प्रपाऽऽरामतडाकादि सर्वकामफलं ध्रुवम् ।

तदाद्यन्त्विकमित्याहुः दीयेत यद् दिने दिने ॥
अपत्यविजयैश्वर्यस्त्रीबालार्थं यदिष्यते ।
इच्छासंस्थन्तु तद् दानं काम्यमित्यभिधीयते ।
कालापेक्षं क्रियापेक्षं अर्थापेक्षमिति स्मृतम् ।
त्रिधा नैमित्तिकं प्रोक्तं सहोमं होमवर्जितम् ॥
नवोत्तमानि चत्वारि मध्यमानि विधानतः ।
अधमानीति शेषाणि त्रिविधत्वमिदं विदुः ॥
आम्लं दधि मधुत्राणं गोभूरुक्माश्वहस्तिनः ।
दानान्युत्तमदानानि उत्तमद्रव्यदानतः ॥
विद्यादानोदनावासपरिभोगौषधानि च ।
दानानि मध्यमान्याहुः मध्यमद्रव्यदानतः ॥
उपानत्प्रेंखयानानि छत्रपानासनानि च ।
दीपकाष्ठफलादीनि चरमं बहुवार्षिकम् ॥
बहुत्वादर्थजातानां संख्या शेषेषु नेष्यते ।
अधमान्यत्रशिष्टानि सर्वदानान्यतो विदुः ॥
इष्टं दत्तमधीतं च भग्नदोषो विपद्यते ।
तस्मादात्मकृतं पुण्यं न वृथापदि कीर्तयेत् ॥१७॥
भुक्तवानिति तत् प्राहुस्तमेव कृतवादिनम् ।

.. ..

मात्रश्च ब्राह्मणश्चैव श्रोत्रियश्च ततः परम् ।
अनूचानस्तथा भ्रूण ऋषिकल्प ऋषिर्मुनिः ॥२६॥
इत्येतेऽष्टौ समुद्दिष्टा विद्यावृत्तविशेषतः ॥
ब्राह्मणानां कुले जातः जातिमात्रो यदा भवेत् ।
अनुपेतः क्रियाहीनो मात्र इत्यभिधीयते ॥

एकदेशमतिक्रम्य वेदस्याचारवान् नृषु ।
स ब्राह्मण इति प्रोक्तो निभृतः सत्यवाक् घृणी ॥
एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य वा ।
षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित् ॥
वेदवेदाङ्गतत्त्वज्ञः शुद्धात्मा पापवर्जितः ।
शेषं श्रोत्रियवत्प्राप्तः सोऽनूचान इति स्मृतः ॥
अनूचानगुणोपेतो यज्ञस्वाध्याययन्त्रितः ।
भ्रूण इत्युच्यते शिष्टैः शेषभोजी जितेन्द्रियः ॥
वैदिकं लौकिकं चैव सर्वज्ञानमवाप्य यः ।
आश्रमस्थो वशी नित्यमृषिकल्प इति स्मृतः ॥
ऊर्ध्वरेतास्तपस्युग्रो नियताशो न संशयी ।
शापानुग्रहयोः शक्तः सत्यसन्धो भवेदृषिः ॥ २७ ॥
निवृत्तः सर्वतत्त्वज्ञः कामक्रोधविवर्जितः ।
ध्यानस्थो निष्क्रियो दान्तस्तुल्यमृत्काञ्चनो मुनिः ॥
एवमन्वयविद्याभ्यां वृत्तेन च समुच्छ्रिताः ।
त्रिशुक्ला नाम विप्रेन्द्राः पूज्यन्ते सवनादिषु ॥
प्रतिग्रहसमर्थोऽपि कृत्वा विप्रो यथाविधि ।
निस्तारयति दातारं आत्मानं च स्वतेजसा ॥
न लोके ब्राह्मणेभ्योऽन्यत् पवित्रं पुण्यमेव वा ।
अशक्यं च द्विजेन्द्राणां नास्ति वृत्तवतामिति ॥
योक्तव्यो हव्यकव्येषु त्रिशुक्लो ब्राह्मणो द्विजैः ।
अभिभूतश्च पूर्वोक्तैर्दोषैः स्पृष्टश्च नेष्यते ॥
अन्यायाधिगतां दत्त्वा सकलां पृथिवीमपि ।
श्रद्धावर्जमपात्राय न काञ्चिद्भूतिमाप्नुयात् ॥४६ ॥

विवत्सां रोगिणीं रूक्षां स्थविरां शृङ्गभीषणीम् ।
क्षीणक्षीरशरीराङ्गां दत्त्वा दोषमवाप्नुयात् ॥ ५२ ॥
राहुदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु ।
स्नानदानादिकं कुर्युर्निशि काम्यव्रतेषु च ॥ ८१ ॥
प्रदाय शाकमुष्टिं वा श्रद्धाभक्तिसमन्वितम् ।
महते पात्रभूताय सर्वाभ्युदयमाप्नुयात् ॥ ५५ ॥
श्रान्तायान्नप्रदः स्वर्गं विमानेनाधिरोहति ।
प्राप्नोति दशगोदानफलं योगिप्रतिक्रियः ॥ १५२ ॥
प्रक्षाल्य पादौ विप्राय लभेद्गोदानजं फलम् ।
चन्दनं तालवृन्तं च फलानि कुसुमानि च ॥
ताम्बूलमासनं शय्यां दत्त्वाऽत्यन्तं सुखी भवेत् ॥
वृषयुग्मं वृषं वापि दत्त्वा गच्छेत् सुरालयम् ।
भुङ्क्ते मन्वन्तरं भोगान् द्विगुणान् युग्मलाङ्गली ४७३
अनड्वाहौ तु यो दद्यात् द्विजे सीरेण संयुतौ ।
अलङ्कृत्य यथा शक्त्या सुवाहौ शुभलक्षणौ ॥
सर्वपापविशुद्धात्मा सर्वकामसमन्वितः ।
वर्षाणि वसति स्वर्गे रोमसंख्याप्रमाणतः ॥
यो ददाति बलीवर्दमुक्तेन विधिना शुभम् ।
अव्यङ्गगोप्रदानाच्च भुङ्क्ते दशगुणं फलम् ॥
श्रेष्ठात् श्रेष्ठतरं प्रोक्तं भूमिदानं द्विजातिभिः ।
तद्दत्त्वा पुरुषः स्वर्गे पूज्यते त्रिदशोत्तमैः ॥ ५०॥
वाञ्छन्ति पितरोऽप्येवं स्वर्गलोके व्यवस्थिताः ॥
यद्यस्मत्कुलजः कश्चित् भवत्यवनिदानकृत् ।
नरकस्था मरुल्लोके स्वर्गस्थाः परमां मुदम् ॥

यथा वयमतीता ये व्रजामस्तत्प्रभावतः ॥
किमत्र चित्रं दातारं यत्समुद्धरते धरा ।
प्रतिग्रहग्रहीतारमपि तारयति द्विजम् ॥
न तद्यज्ञैर्व्रतैर्दानैर्दातृभिः फलमाप्यते ।
अपि यद्दत्तया भूम्या दण्डत्रितयमात्रया ॥
यद्दानं दीयते किञ्चित् परत्र स्यादिहैव हि ।
भूदानेन पुनः सर्वदानानां प्राप्यते फलम् ॥
ते धन्यास्ते सुकृतिनः कृतार्थास्ते न संशयः ।
सत्पात्राय प्रदत्तं यैर्भूदानं विधिना नरैः ॥
तिस्रः कन्या यथान्यायं पालयित्वा निवेद्य च।६७८
न पिता नरकं याति नारी वा स्त्रीप्रसूयिनी ॥
कान्तियुक् सुभगः श्रीमान् भवत्यम्बरदानकृत्६०४
छत्रदश्छायया याति यानेनोपानहप्रदः ॥६२७॥
दीपकोद्योतकृत् राजा भवेन्मार्जनकृन्नरः॥६४१॥
कृत्वा तु पातकं कर्म यद्द्यादन्नमीप्सितम् ॥
ब्राह्मणानां विशेषेण स निहन्त्यात्मनस्तमः॥६७६
आदरेण च भक्त्या च यदन्नमुपदीयते ॥
तत्प्रीणयति गात्राणि नामृतं मानवर्जितम् ।
दुर्लभस्तु मुदा दाता भोक्तारश्च सुदुर्लभाः॥६८०
मुदा दाता च भोक्ता च तावुभौ स्वर्गवासिनौ ॥
योऽन्नं बहुमतं भुङ्क्ते यश्चान्नं नावमन्यते ।
यश्चान्नं प्रीतितो दद्यात् तस्यान्नमुपतिष्ठते ॥
प्रीतितोऽन्नं च यो दद्यात् गृह्णीयाद्योऽभिपूज्य च ।
प्रीतितोऽन्नमश्नाति पूजितः स्वर्गमश्नुते ॥

यो दद्यादप्रियेणान्नं यश्चान्नं नाभिनन्दति ।
तावुभौ नरके मग्नौ वसेतां शरदः शतम् ॥
अघृतं भोजयन् विप्रं स्वगृहे सति सर्पिषि ।
परत्र निरयं घोरं गृहस्थः प्रतिपद्यते ॥ ६८६ ॥
मृष्टमन्नं स्वयं भुक्त्वा पश्चात्कदशनं लघु ।
ब्राह्मणान् भोजयन् मूर्खो निरये चिरमावसेत् ॥
यो मृष्टमन्नं द्विजपुङ्गवानां दद्यात्सुराणामथवाऽतिथिभ्यः ।
स पुत्रपौत्रैरभिवर्धमानः समानतां वृत्ररिपोरुपैति ॥
सतोयां पथिके विप्रे यो दद्यात्करपत्रिकाम् ।६६१।
फलं स कूपखातस्य नूनमाप्नोति मानवः ॥
ग्रामप्रवेशे मणिकं ददाति द्विजसद्मनि ।६६५॥
योऽम्बुपूरितमाप्नोति स तडागकृतः फलम् ॥

हे० ब्र० खं०

व्रतोपवासनियमैः शरीरोत्तापनं नृप ।६॥
शिक्षाव्याकरणनिरुक्तछन्दः कल्पज्योतींषि षडङ्गानि१७

हेमाद्रौ श्राद्धकल्पे देवलः—

* स्वयं धौतेन कर्तव्या क्रिया धर्मा विपश्चिता ।
न तु नेजकधौतेन नाहतेन च कर्हिचित् ॥ ६१२॥
श्मश्रुभिश्च मुखाविष्टैराशौचं नोपदिश्यते । ६७३॥
भोजने दन्तलग्नानि निर्हृत्याचमनं चरेत् ॥ ६७४॥
दन्तलग्नमसंहार्यं लेपं मन्येत दन्तवत् ॥
न तत्र बहुशः कुर्यात् यत्नमुद्धरणे पुनः । ६७५॥
अप्सु पीतासु हृदयं प्राप्तासु ब्राह्मणः शुचिः ।
राजन्यः कण्ठमास्यं च विट् शूद्रः स्पर्शनाच्छुचिः६८६॥

इत्येवमङ्घ्रिराजानु प्रक्षाल्य चरणौ पृथक् ।
हस्तौ चामणिबन्धाभ्यां पश्चादासीत संयतः ॥९८७॥
प्रथमं प्राङ्मुखः स्थित्वा पादौ प्रक्षालयेच्छनैः ।
उदङ्मुखो वा दैवत्ये पैतृके दक्षिणामुखः ॥९८९॥
शिखां बध्वा वसित्वा च निर्णिक्ते वाससी शुभे ।
तूष्णीं भूत्वाऽप आचामेदकुप्यन्नविलोकयन् ॥९९०॥
अथापः प्रथमात्तीर्थात् दक्षिणात् त्रिःपिबेत्समम् ।
अशब्दमनखावमबहिर्जान्वम्बुबुद्बुदम् ॥
द्विस्तथाङ्गुष्ठमूलेन परिमृज्यात्ततो मुखम् ।
ततः कृत्वाऽङ्गुलिस्पर्शं दृग्घ्राणश्रोत्रनाभिषु ॥९९८॥
मूर्धानं चरणौ चाद्भिः संप्रोक्ष्याथ शुचिर्भवेत् ।
कामं प्रतिश्रवस्तेषामनिन्द्यामन्त्रणे कृते ।१००१॥
पूर्वं निमन्त्रितोऽन्येन कुर्यादन्यप्रतिग्रहम् ॥
भुक्ताहारस्तथा भुङ्क्ते सुकृतं तस्य नश्यति ।१००५॥
अक्रोधो निर्वृतः स्वस्थः श्रद्धावानत्वरः शुचिः ।
समाहितमनाः श्राद्धक्रियायामसकृद् भवेत् ॥१०११॥
अन्नपानकशीतोदं ददद्भो ह्यवलोकितः । १०१७॥
वक्तव्ये कारणे संज्ञां कुर्वन् भुञ्जीत पाणिना ॥
योऽप्रसन्नमना भुङ्क्ते सोपानत्कोऽपि वा पुनः ।
प्रलापशीलः क्रुद्धो वा स विप्रः पितृदूषकः ॥१०२१ ॥
नाश्रु वा पातयेच्छ्राद्धे न जल्पेन्न हसेन्मिथः ।
न विभ्रमेन्न संक्रुध्येन्नोद्विजेच्चात्र कर्हिचित् ॥१०२५॥
प्राप्ते हि कारणे श्राद्धे नैव क्रोधं समुच्चरेत् ।
आश्रितः स्विन्नगात्रो वा न तिष्ठेत् पितृसन्निधौ१०३०

न चात्र श्येनकाकादीन् पक्षिणः प्रतिषेधयेत् ।
तद्रूपाः पितरस्ते हि समायान्तीति वैदिकम् ॥
आचान्तेभ्यो द्विजेभ्यस्तु प्रयच्छेदथ दक्षिणाम् १०४४।
अकृते वैश्वदेवे तु स्थालीपाकाः प्रकीर्तिताः ॥
अन्यत्र पिण्डयज्ञात्तु सोऽपराह्णे विधीयते ॥१०६४॥
श्वः कर्तास्मीति लक्षण्यान् तदा विप्रान्निमन्त्रयेत् ।
निरामिषं सकृद् भुक्त्वा सर्वभुक्तजने गृहे ॥
असम्भवे परेद्युर्वा ब्राह्मणांस्तान्निमन्त्रयेत् ।
अज्ञातीनसमानार्षानयुग्मानात्मशक्तितः ॥
एकेनापि हि विप्रेण षट्पिण्डं श्राद्धमाचरेत् ।
षडर्घ्यान् दापयेत्तस्मै षड्भ्यो दद्यात्तथाऽऽसनम् ११४६॥
तिलानवकिरेत्तत्र सर्वतो बन्धयेदजान् ।
आसुरोपहतं सर्वं तिलैः शुद्ध्यत्यजेन च ॥ ११६१॥
तथैव मन्त्रितो दाता प्रातः स्नात्वा सहाम्बरः ॥
आरभेत नवैः पात्रैरन्वारभश्च बान्धवैः ॥ ११६२॥
प्रधानं च पवित्रं च शौचमेवाष्टकाविधौ ।
पितरः शौचकामा हि निस्पृहा धौतकल्मषाः ॥११७४॥
दर्भास्तिला गजच्छाया दौहित्रो मधुसर्पिषी ।
कुतपो नीलषंडश्च पवित्राणि च पैतृके ॥ ११७५ ॥
ततः सर्वाशनं पात्रे गृहीत्वा विविधं पुनः ।
तेषामुच्छोषणस्थाने तेन पात्रेण निक्षिपेत् ॥ १३६६॥
अथ संगृह्य कलशं सदर्भं पूर्णमम्भसा ।
पुरस्तादुपविश्यैषां पिण्डावापं निवेदयेत् ॥ १४०४॥
अभ्युदय मधुसर्पिभ्यां तान् वपेत् कुशसञ्चये ॥१४१२

छायायां हस्तिनश्चैव वस्त (?) दौहित्रसन्निधौ॥
उपलिप्ते शुचौ देशे स्थानं कुर्वीत सैकतम्। १४१३॥
मंडलं चतुरश्रं वा दक्षिणावनतं महत्॥
एकदर्भेण तन्मध्यमुल्लिखेत् त्रिश्च तं त्यजेत्॥१४१४॥
तस्मिन् स्थाने ततो दर्भानेकमूलान् शिवान् बहून्१४१८
दक्षिणाग्रानुदक्पादान् सर्वांस्तांस्तृणुयात्समम्॥
ततश्चरुमुपादाय सपवित्रेण पाणिना।
चतुर्धा विभजेत् पिण्डान् घृताक्तान् भोजनेन वै।
अभ्युदय मधुसर्पिभ्यां तान् वपेत् कुशसञ्चये।१४२७॥
एवं निवेश्य पिडांस्तानलंकुर्याच्च पूर्ववत्।
पक्वान्नेन बलिं तेभ्यः पिण्डेभ्यो दापयेत् बुधः१४७१॥
ततो दत्तबलिभ्यश्च पिण्डेभ्यो मन्त्रपूर्वकम्।
पिण्डपात्रेण तेनैव दद्यादाचमनोदकम्॥
दक्षिणां सर्वभागांश्च प्रतिपिण्डं प्रदापयेत्।
भक्ष्यानपूपानिक्षूंश्च व्यञ्जनान्यशनानि च।१४७२॥
अथवा वैश्यदेवत्यान् ब्राह्मणान् स्वस्ति वाचयेत्१४६८॥
अक्षय्यं वाचयेत् पित्र्यांश्चरमं सतिलोदकम्॥
अथ विप्रान् गृहीतार्थान् संतृप्तानभिवादयेत्।
यथावद्वैश्वदेवत्यान् पितृपूर्वं पुनः पितृन्॥
पूर्वमुत्थापयेत् पित्र्यानृध्यतामिति च ब्रुवन्।
उत्थिताननुगच्छेत्तु तेभ्यः शेषं च संहरेत्। १४६६॥
निर्वर्त्य पितृमेधं तु दीपं प्रच्छाद्य पाणिना।
आचम्य पाणी प्रक्षाल्य ज्ञातीन् शेषांस्तु भोजयेत्१६०३
ततः कर्मणि निर्वृत्ते तान् पिण्डांस्तदनन्तरम्।

ब्राह्मणोऽग्निरजो गौर्वा भक्षयेदप्सु वा क्षिपेत् ।१५०४॥
तेषां वा मध्यमं पिण्डं पुत्रकामादि भक्षयेत् ।
पितृप्रसादात्पुत्रं वा लभते तु महागुणम् ॥ १५०६॥
प्रक्षाल्य हस्तावाचम्य ज्ञातीन् शेषेण भोजयेत् ।
ज्ञातिष्वपि च तृप्तेषु स्वान् भृत्यान् भोजयेत्ततः।१५१५॥
निधाय वा दर्भवटूनासनेषु समाहितः । ,,
प्रैषानुप्रैषसंयुक्तं विधानं प्रतिपादयेत् ॥ १६२६ ॥

पात्राभावे पटं कृत्वा पितृयज्ञविधिम् नरः ।
निर्दिश्याऽन्नमुद्धृत्य यत्र पात्रं ततो गतिः ॥
पात्राभावे क्षिपेदग्नौ गवे दद्यात्तथाप्सु वा ।
न तु प्राप्तस्य लोपोऽस्ति पैतृकस्य विशेषतः ॥
पिण्डपात्रं प्रदातव्यमलाभे द्रव्यविप्रयोः । १५३४॥

श्राद्धेऽहनि तु सम्प्राप्ते भवेन्निरशनेऽपि वा ॥
यदेव तर्पयत्यद्भिराहिताग्निर्दिने दिने ।

पित्र्यं तेनैव प्राप्नोति वार्षिकादिक्रियाफलम् ॥
अनेन विधिना श्राद्धं कुर्यात्संवत्सरं सकृत् । १५३५॥
द्विश्चतुर्वा यथाश्रद्धं मासे मासे दिने दिने ॥
❀अघृतं भोजयन् विप्रं स्वे गृहे सति सर्पिषि ।१५६६॥
परत्र निरयं घोरं गृहस्थः प्रतिपद्यते ॥
❀ मृष्टमन्नं स्वयं भुक्त्वा पश्चात्कदशनं लघु ।
ब्राह्मणं भोजयन् विप्रो निरये चिरमावसेत् ॥
एकोद्दिष्टेषु शेषन्तु ब्राह्मणेभ्यः समुत्सृजेत् ।१५६७॥
ततः कामन्तु भुञ्जीत स्वयं मङ्गलभोजनम् ॥

हेमाद्रौ परिभाषाखण्डे (पु० खं० १)
अरोगः प्रकृतिस्थश्च चिरायुः पुत्रपौत्रवान् ।१०।
अर्थवानर्थभोगी च श्राद्धकामो भवेदिह ।
परत्र च परां पुष्टिं लोकांश्च विपुलान् शुभान् ।
श्राद्धकृत्समवाप्नोति यशश्च विपुलं नरः ।
देवो यदि पिता ज़ातः शुभकर्मानुयोगतः । १५ ।
तस्यान्नममृतं भूत्वा देवत्वेऽप्यनुगच्छति ।
गान्धर्वे भोग्यरूपेण पशुत्वे च तृणं भवेत् ।
श्राद्धान्नं वायुरूपेण नागत्वेऽप्यनुगच्छति ।
पानं भवति यक्षत्वे राक्षसत्वे तथामिषम् ।
दानवत्वे तथा मांसं प्रेतत्वे रुधिरोदकम् ।
मनष्यत्वेऽन्नपानादि नानाभोगरसो भवेत् ।
सर्वत्र पितरः पूज्या देवतानां च देवताः ॥७३॥
शुचयो निर्मलाः शुद्धा दक्षिणां दिशमाश्रिताः ।
प्रेतानुद्दिश्य यत्कर्म क्रियते मानुषैरिह ॥ ५७ ॥
तुष्यन्ते पितरस्तेन न प्रेताः पितरः स्मृताः ।
*एकेनापि हि विप्रेण षट्पिण्डं श्राद्धमाचरेत् । ८५ ।
षडर्घ्यान्दापयेत्तत्र षट्भ्यो दद्यात्तथाऽशनम् ।
पिता भुङ्क्ते द्विजकरे मुखे भुङ्क्ते पितामहः ।
प्रपितामहस्तु तालुस्थः कण्ठे मातामहः स्मृतः ।
प्रमातामहस्तु हृदये वृद्धो नाभौ तु संस्थितः ।
एवमप्याचरेच्छ्राद्धं षड्दैवत्यं महामुने ।
विभक्तं कारयेद्यस्तु पितृहा स प्रजायते ।
द्व्यामुष्यायणका दद्युर्द्वाभ्यां पिण्डोदके पृथक् ।११६

षण्णां देयास्तु षट्पिण्डा एवं कुर्वन्न मुह्यति ।
यत्र तत् क्रियते कर्म पैतृके ब्राह्मणान्प्रति । १३६ ॥
तत्सर्वं तत्र कर्तव्यं वैश्वदेवत्यपूर्वकम् ।
श्राद्धस्य पूजितो देशो गया गङ्गा सरस्वती । १६१ ।
कुरुक्षेत्रं प्रयागश्च नैमिशं पुष्कराणि च ॥
नदीतटेषु तीर्थेषु शैलेषु पुलिनेषु च ।
विविक्तेषु च तुष्यन्ति दत्तेनेह पितामहाः ।
मनुना श्राद्धकल्पोऽयं मानवः समुदाहृतः ।१८६।
बहुपिण्डाष्टका तु स्यादेकपिण्डा तु नेष्यते ।
अर्के तु तस्य कन्यास्थे श्राद्धपक्षः प्रकीर्तितः ।२२४॥
सिनीवालीमतिक्रम्य यदा कन्यां व्रजेद्रविः ।
तदा कालस्य वृद्धत्वादतीतैव पितृक्रियेति ॥
यथा स्नानं च दानं च सूर्यस्य ग्रहणे दिवा । २४७ ।
सोमस्यापि तथा रात्रौ स्नानं दानं विधीयते ।
तृतीया रोहिणीयुक्ता वैशाखस्य तु या सिता ।२५३।
मघाभिः सहिता कृष्णा नभस्ये तु त्रयोदशी ।
युगादयः स्मृता ह्येता दत्तस्याक्षयकारिकाः ।
यान्तिथिं समनुप्राप्य उदयं याति भास्करः ॥२८१॥
सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु ॥
यां तिथिं समनुप्राप्य अस्तं याति दिवाकरः ।
सा तिथिः सकला ज्ञेया स्नानदानतपादिषु ।

अथ तपोविधिं व्याख्यास्यामः ।

तद्यथा व्रतोपवासानि—यमैः शरीरोत्तापनं तप इति । तत्र

ब्रह्मचर्य सत्यवचनं मधुमांसवर्जनं मौनमयाचनमृतुकालाभिग-
मनमित्येवमादीनि व्रतानि ॥३४७॥

*त्रिशुक्तः कृशवृत्तिश्च घृणालुः सकलेन्द्रियः३५०॥
विमुक्तो योनिदोषेभ्यो ब्राह्मणः पात्रमुच्यते ।
मात्रश्च ब्राह्मणश्चैव श्रोत्रियश्च तपः परः ।३५१।
अनूचानस्तथा भ्रूण ऋषिकल्प ऋषिर्मुनिः ॥
इत्येतेऽष्टौ समुद्दिष्टा ब्राह्मणाः प्रथमं श्रुतौ ।
तेषां तपः परः श्रेष्ठो विद्यावृत्तविशेषतः ॥
ब्राह्मणानां कुले जातो जातिमात्रो यदा भवेत् ॥
अनुपेतः क्रियाहीनो मात्र इत्यभिधीयते ।
एकदेशमतिक्रम्य वेदस्याचारवान् द्विजः ॥
स ब्राह्मण इति प्रोक्तो निवृत्तः सत्यवान् घृणी ।
एकां शाखां सकलां वा षड्भिरङ्गैरधीत्य वा ॥
षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित् ।
वेदवेदाङ्गतत्त्वज्ञः शुद्धात्मा पापवर्जितः ॥
शिष्टः श्रोत्रियतां प्राप्तः सोऽनूचान इति स्मृतः।
अनूचानगुणोपेतो यज्ञस्वाध्याययन्त्रितः ।
भ्रूण इत्युच्यते शिष्टैः शेषभोजी जितेन्द्रियः ॥
वैदिकं लौकिकं चैव सर्वं ज्ञानमवाप्य यः ।
आश्रमस्थो वशी नित्यं मुनिकल्प इति स्मृतः ॥
ज्येष्ठे चाप्यनिविष्टे च ज्येष्ठमुत्क्रम्य यः पुनः ।
विन्देत परिवित्तिश्च परिवेत्ता च तावुभौ ॥
अथान्यांश्च प्रवक्ष्यामि ब्राह्मणान् पंक्तिपावनात् ।३६६
समर्थान् हव्यकव्येषु स्वगुणैरभिपूजितान् ।

वेदवेदाङ्गनिष्णाता विशुद्धान्वययोनयः ॥
स्वकर्माद्भुःस्थिता विप्राः स्वपंक्तिं पावयान्ति हि ।
त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडङ्गविद् ।
छन्दोगः सोमयाजी च ब्राह्मणाः पंक्तिपावनाः ।
ज्येष्ठाश्रयनिविष्टश्च शतायुर्ज्येष्ठसामगः ॥
अग्निवित्सोमपाश्चैते ब्राह्मणाः पंक्तिपावनाः ।
ऋग्यजुःसामधर्मज्ञा स्नातकाश्चाग्निहोत्रिणः ॥
ब्रह्मदेवानुसन्ताना विज्ञेयाः पंक्तिपावनाः ।
चतुराश्रमबाह्याय दत्तं भवति निष्फलम् ॥ ४७५ ॥
देवकोशोपजीवी स नाम्ना देवलको भवेत् ॥ ४६३ ॥
अपांक्तेयः स विज्ञेयः स र्वकर्मसु सर्वदा ॥४६६॥
हे० पु० ४
*अर्के नभस्यकन्यास्थे श्राद्धपक्षः प्रकीर्तितः ।
सिनीवालीमतिक्रम्य यदा कन्यां व्रजेद्रविः ॥ ४८ ॥
यां तिथिं समनुप्राप्य उदयं याति भास्करः ।
सा तिथिः सकला ज्ञेया स्नानदानजपादिषु ॥ १५ ॥
यां तिथिं समनुप्राप्य अस्तं याति दिवाकरः ।
*सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु ॥१६॥
दिनार्धसमयेऽतीते भुज्यते नियमेन यत् ।
एकभुक्तमिति प्रोक्तमूनं ग्रासत्रयेण तु ॥ १०८ ॥
नक्षत्रदर्शनान्नक्तं गृहस्थस्य बुधैः स्मृतम् ।
यतेर्निशाष्टमे भागे तस्य रात्रौ निषिध्यते ॥ ११४ ॥
न शंखेन पिबेत्तोयं न खादेत् कूर्मसूकरौ ।
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ॥ १५२ ॥

दशम्यामेकभुक्तं च मांसमैथुनवर्जितम् ।
एकदश्यामुपवसेत् पक्षयोरुभयोरपि ॥ १६३ ॥
एकादश्यां निराहारो भुक्त्वाहमपरेऽहनि ।
भोक्ष्यामि पुण्डरीकाक्ष गतिर्भव ममाच्युत ॥१६६ ॥
गृहीत्वोदम्बरं पात्रं वारिपूर्णमुदङ्मुखः ।
उपवासं तु गृह्णीयात् यद्वा संकल्पयेत् द्विजः ॥१६०॥
यथा स्नानं च दानं च सूर्यस्य ग्रहणं दिवा ।
सोमस्यापि तथा रात्रौ स्नानं दानं विधीयते ॥३८१॥
प्रथमं मातापितृभ्यां गर्भाधानादिभिः संस्कृतो
गर्भाष्टमे वर्षे तूपनयनार्हो भवति ॥ ७७६ ॥
अतः परमष्टाचत्वारिंशद्वार्षिकीं वेदव्रत
चर्यामातिष्ठेत । अशक्तश्चेत् षट्त्रिंशद्वा—
र्षिकीं चतुर्विंशतिवार्षिकीं चेति ॥ ७७८ ॥
वन्ध्या तु वृषली ज्ञेया वृषली च मृतप्रजा ।
अपरा वृषली ज्ञेया कुमारी वा रजस्वला ॥८०७॥इति
वीरमित्रोदये परिभाषाप्रकाशे देवलः—
●शिक्षाकल्पव्याकरणनिरुक्तच्छन्दोज्योतिषाणि षड-
ङ्गानि ॥ ८- ॥
शौचं दानं तपः श्रद्धा गुरुसेवा क्षमा दया ॥ ३३ ॥
विज्ञानं विनयः सत्यमिति धर्मसमुच्चयः ॥
❀व्रतोपवासनियमैः शरीरोत्तापनं तपः ॥ ३४ ॥
प्रत्ययो धर्मकार्येषु सदा श्रद्धेत्युदाहृता ।
नास्ति ह्यश्रद्दधानस्य धर्मकृत्यप्रयोजनम् ॥
विगर्हातिक्रमक्षोभहिंसाबन्धवधात्मनाम् । ३ ।

अन्यमन्युसमुत्थानदोषाणां मर्षणं क्षमा ॥

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥

यौगपद्ये च तीर्थानां विप्रादिक्रमशो व्रजेत् ॥

रक्षणार्थमपुत्राणां ग्रहणक्रमशोऽपि वा । १६२ ।

ऋतुकालेऽभिगमनं भर्त्रा कार्यं प्रयत्नतः ॥
पुंसवादीनि कर्माणि बान्धवैर्वापि कारयेत् ।१६४।

*प्रथमं मातापितृभ्यां गर्भाधानादिभिः
संस्कृतो गर्भाष्टमे तूपनयनार्हो भवति ॥ १६५॥

कर्णरन्ध्रे रवेश्छाया न विशेदग्रजन्मनः ।
तं दृष्टं विलयं यान्ति पुण्यौघाश्च पुरातनाः ।२६३।

तस्मै श्राद्धं न दातव्यं यदि चेदातुरं भवेत् ।

*द्वितीयेन तु यः पित्रा सवर्णायां प्रजायते ।२६७।
अवरोढ इति ज्ञेयः शूद्रधर्मा स जातितः ॥

व्रतहीनास्त्वसंस्कार्याः सवर्णास्वपि ये सुताः ।
उत्पादिताः सवर्णेन व्रात्या इति बहिष्कृताः ॥

यज्ञोपवीतं कुर्वीत सूत्रेण नवतन्तुकम् ।
एकेन ग्रन्थिना तन्तुर्द्विगुणस्त्रिगुणोऽथवा ॥ ३६७ ॥

कार्पासकं समादद्यात् शुचिक्षेत्रे विशोधितम् ।
त्रिवृतं तु तथा कार्यं ब्राह्मण्या सूत्रकं कृतम् ॥४१७॥

ओंकारः प्रथमस्तन्तुर्द्वितीयोऽग्निस्तथैव च ।
तृतीयो भगदेवत्यः चतुर्थः सोमदेवतः ॥४१८॥

पञ्चमः पितृदेवत्यः षष्ठश्चैव प्रजापतिः ।
सप्तमो वसुदेवत्यः धर्मश्चाष्टम एव च ॥

नवमः सर्वदेवत्यः इत्येता नव देवताः ॥
स्तनादूर्ध्वमधो नाभेर्न कर्तव्यं कथञ्चन ।
यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि ॥४२०॥
तृतीयमुत्तरीयार्थे वस्त्रालाभे तदिष्यते ॥ ४२१॥
बहूनि चायुष्कामस्येत्यादि काम्यं प्रचक्षते ॥
ब्रह्मसूत्रेऽपसव्येंऽसे स्थिते यज्ञोपवीतिता ।
प्राचीनावीतिता सव्ये कण्ठस्थे च निवीतिता॥४२५॥
उपध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः ।
मातुलः श्वशुरस्त्राता मातामहपितामहौ ॥ ४७१ ॥
वर्णज्येष्ठः पितृव्यश्च पञ्चैते गुरवः स्मृताः ॥
माता मातामही गुर्वी पितुर्मातुश्च सोदरा ।
श्वश्रूः पितामही ज्येष्ठा धात्री चैव गुरोः स्त्रियः ॥
इत्युक्तो गुरुवर्गोऽयं मातृतः पितृतो द्विधा ।
अनुवर्तनमेतेषां मनोवाक्कायकर्मभिः ।
गुरुं दृष्ट्वा समुत्तिष्ठेदभिवाद्य कृताञ्जलिः ।
नैतैरुपविशेत्सार्धं विवदेन्नार्थकारणात् ॥
उद्दिष्टं साधयेदर्थं प्रतिषिद्धं च वर्जयेत् ।
तत्पूज्यान् पूजयेन्नित्यं व्यसने न परित्यजेत् ॥
क्रोधं वाक्दण्डपारुष्यं उत्सेकं वैकृतान् स्वरान् ।४७२।
नर्महासं विलासं च वर्जयेत् गुरुसन्निधौ ॥
जीवितार्थमपि द्वेषं गुरुभिर्नैव भावयेत् ।
उदितोऽपि गुणैरन्यैर्गुरुद्वेषी पतत्यधः ॥
गुरूणामपि सर्वेषां पूज्याः पञ्च विशेषतः ।
तेषामाद्या स्त्रियः श्रेष्ठास्तेषां माता सुपूजिता ॥

यो भावयति या सूते येन विद्योपदिश्यते ।
ज्येष्ठो भ्राता च भर्ता च पञ्चैते गुरवः स्मृताः ॥
आत्मनः सर्वयत्नेन प्राणत्यागेन वा पुनः ।
पूजितव्या विशेषेण पञ्चैते भूतिमिच्छता ॥
यावत्पिता च माता च द्वावेतौ निर्विकारिणौ ।
तावत्सर्वं परित्यज्य पुत्रः स्यात्तत्परायणः ॥
पिता माता च सुप्रीतौ स्यातां पुत्रगुणैर्यदि ।
स पुत्रः सकलं धर्मं प्राप्नुयान्नात्र संशयः ॥
नास्ति मातृसमं दैवं नास्ति पित्रा समो गुरुः ।
तयोः प्रत्युपकारो हि न कथञ्चन विद्यते ॥
सम्यगाराध्य वक्तारं विसृष्टस्तदनुज्ञया ।
शिष्यो विद्याफलं भुङ्क्ते प्रेत्य चापद्यते दिवम् ॥
यो भ्रातरं पितृसमं ज्येष्ठं मूढोऽवमन्यते ।४७३
तेनैव दोषेण स प्रेत्य निरयं घोरमृच्छति ॥
तस्मात्पितृवदाराध्यो गुरुर्ज्येष्ठो हितार्थिभिः ।
तस्य प्रसादान्मर्त्यो हि प्रेत्य चेह च नन्दति ॥
पुंसा धर्मनिविष्टेन पूज्यो भर्ता हि सर्वदा ।
अपि मातरि लोकेऽस्मिन् उपकाराद्धि गौरवम् ॥
ये नरा भर्तृपिण्डार्थं स्वान् प्राणान् संत्यजन्ति हि ।
तेषामथाक्षयान् लोकान् प्रोवाच भगवान् मनुः ।
यं मातापितरौ क्लेशं सहेते संभवे नृणाम् ।
न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि ॥
योऽहर्निशं प्रियं कुर्यादाचार्यस्य च सर्वदा ।
तेषु हि त्रिषु तुष्टेषु तपः सर्वं समाप्यते ॥

तेषां त्रयाणां शुश्रूषा परमं तप उच्यते।
नैतैरनभ्यनुज्ञातो धर्ममन्यं समाचरेत् ॥
सर्वे तस्याहृता धर्मा यस्यैते त्रय आहृताः।
अनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः ॥
यावत् त्रयस्ते जीवेयुस्तावन्नान्यत्समाचरेत्।
तेषां नित्यन्तु शुश्रूषां कुर्यात् प्रियहिते रतः ॥
तेषामनुपरोधेन पारत्र्यं यद्यदाचरेत्।
तत्तन्निवेदयेत्तेभ्यो मनोवाक्कायकर्मभिः ॥
त्रिष्वेतेष्वितिकृत्यं हि पुरुषस्य समाप्यते।
एष धर्मः परस्तस्मादुपधर्मोऽन्य उच्यते ॥
धर्मार्थं वर्धिताः पुत्रास्तत्तद्गोत्रेण पुत्रवत् ।६८६।
अंशपिण्डविभागित्वं तेषु केवलमीरितम्।
पञ्चमात्सप्तमादूर्ध्वं मातृतः पितृतः क्रमात्।
सपिण्डता निवर्तेत सर्ववर्णेष्वयं विधिः ॥७०३॥
ज्येष्ठायां यद्यनूढायां कन्यायामुह्यतेऽनुजा।
या साऽग्रेदिधिषूः प्रोक्ता पूर्वा तु दिधिषूः स्मृता ७६५॥
शुल्कं प्रदाय कन्यायाः प्रत्यादानं विधानतः।
वित्तहेतुविवाहोऽयमासुरः षष्ठ उच्यते ॥ ८५३॥
विविक्ते स्वयमन्योन्यं स्त्रीपुंसोर्यत्समागमः।
प्रीतिहेतुः स गान्धर्वो विवाहः पञ्चमो मतः ॥ ८५६॥
विक्रमेण प्रसह्य स्यात् कुमारीहरणं पुनः।
वीर्यहेतुर्विवाहः स सप्तमः समुदाहृतः ॥ ८५७॥
सुप्तमत्तोन्मत्तकन्याहरणं व्यसनादपि।
प्रमादहेतुः पैशाचो विवाहोऽष्टम उच्यते ॥ ८५८॥

पूर्वे विवाहाश्चत्वारो धर्म्यास्तोयप्रदानकाः ।
अशुल्का ब्राह्मणार्हाश्च तारयन्ति द्वयोः कुलम्॥८६०॥
गान्धर्वादिविवाहेषु पुनर्वैवाहिको विधिः ।
कर्तव्यश्च त्रिभिर्वर्णैः समयेनाग्निसाक्षिकः ॥८६१॥
एकामुत्क्रम्य कामार्थामन्यां लब्धुं य इच्छति ।
समर्थस्तोषयित्वार्थैः पूर्वोढामपरां हरेत् ॥८७३॥
अधिविन्दन् स्त्रियै दद्यादाधिवेदनिकं समम् ।
न दत्तं स्त्रीधनं यस्यै दत्तेत्वर्धं प्रकीर्तितम् ॥
आकांक्षेताष्ट वर्षाणि भर्तातिप्रसवां स्त्रियम् ।
दश वन्ध्यां च निन्द्यां च द्वादश स्त्रीप्रसूतिनीम् ॥
ततो विन्देत विधिना पुत्रार्थी धर्मतः स्त्रियम् ।
पुत्रलाभात् परं लोके नास्ति हि प्रसवाहितमः ॥

वी० मि० चतुर्थं पुस्तकम्—

वापीकूपनदीगोष्ठचैत्याम्भःपथिभस्मसु । ३३॥
अग्नौ काम्ये श्मशाने च विण्मूत्रं न समाचरेत् ॥
अङ्गारतृणकीटास्थि शर्कराशकलान्विताम् । ५० ॥
वल्मीकोत्खट (?) तोयान्त कुड्योत्खातश्मशानजाम् ।
आहृतामन्यशौचार्थमाददीत न मृत्तिकाम् ॥
धर्मविद्दक्षिणं हस्तमधः शौचे न योजयेत् । ५१
तथैव वामहस्तेन नाभेरूर्ध्वं न शोधयेत् ॥
प्रकृतिस्थितिरेषा स्यात्कारणादुभयक्रिया ।
प्रथमं प्राङ्मुखः स्थित्वा पादौ प्रक्षालयेच्छनैः ॥६३॥
❀उदङ्मुखो वा दैवत्ये पैतृके दक्षिणामुखः ॥
शिखां बध्वा वसित्वे द्वे निर्णिक्ते वाससी शुभे ।

*तूष्णीं भूत्वा समाधाय नोद्गच्छन्न विलोकयन् ॥
न गच्छन्न शयानश्च न हसन् न परान् स्पृशन् ।
न हसन्नैव संजल्पन् नात्मानं चैव वीक्षयन् ॥
केशान्नीवीमधःकायमस्पृशन् धरणीमपि । ६३ ॥
यदि स्पृशति चैतानि भूयः प्रक्षालयेत् करम् ॥
*इत्येवमद्भिराजानु प्रक्षाल्य चरणौ पृथक् । ६४॥
हस्तौ चामणिबन्धाभ्यां पश्चादासीत संयतः ॥
येषु देशेषु ये देवा येषु देशेषु ये द्विजाः । ६६ ॥
येषु देशेषु यत्तोयं याश्च यत्रैव मृत्तिकाः ॥
येषु स्थलेषु यच्छौचं धर्माचारश्च यादृशः ।
तत्र तद्भावमन्येत धर्मस्तत्रैव तादृशः ॥
ततः कृत्वाङ्गुलिस्पर्शं दृग्घ्राणश्रोत्रनाभिषु ।
मूर्धानं चरणौ चाद्भिः संप्रोक्ष्याथ शुचिर्भवेत् । ८०॥
अथाम्बु प्रथमात्तीर्थात् दक्षिणात् त्रिः पिबेत् समम् ।
*अशब्दमनवस्रावमबहिर्जान्वम्बुबुद्बुदम् । ८६॥
द्विस्तथाङ्गुष्ठमूलेन परिमृज्यात् पुनर्मुखम् ॥
नाग्राङ्गुल्या न पृष्ठैर्वा परिमृज्यात्कथञ्चन ।
उच्छिष्टं मानवं स्पृष्ट्वा भोज्यं वापि तथाविधम् ॥१०४॥
तथैव हस्तौ पादौ च प्रक्षाल्याचम्य शुद्ध्यति ॥
यदम्भः शौचनिर्मुक्तं क्षितिं प्राप्य विनश्यति ॥१०५॥
प्रक्षाल्याशुचिलिप्तं च तत्स्पृष्ट्वाचम्य शुद्ध्यति ॥
* मानुषास्थि वपां विष्ठामार्तवं मूत्ररेतसी ।१०७॥
मज्जानं शोणितं वापि परस्य यदि संस्पृश्येत् ॥
*स्नात्वाऽपमृज्य लेपादीनाचम्य शुचितामियात् ।

तान्येव स्त्रानि संस्पृश्य पूतः स्यात्परिमार्जनात् ॥
ऊर्ध्वं नाभेः करौ मुक्त्वा यदङ्गमुपहन्यते ।
तत्र स्नानमधस्तात्तु प्रक्षाल्याचम्य शुद्धयति ॥
*भोजने दन्तलग्नानि निहृत्याचमनं चरेत् । १११॥
दन्तलग्नमसंहार्यं लेपं मन्येत दन्तवत् ॥
न तत्र बहुशः कुर्याद्यत्नमुद्धरणे पुनः ॥१११॥
भवेदाशौचमत्यर्थं तृणवेधाद् व्रणे कृते ॥
ततः शरीरस्रोतोभ्यः मलनिष्यन्दविस्रवात् । ११६॥
अन्नादीनां प्रवेशाच्च स्यादशुद्धिर्विशेषतः ॥
पतिताश्च्यमेध्यानां स्पर्शनाच्चाशुचिर्भवेत् ।
सुप्तोद्वस्त्रविपर्यासात् च्युताद्ध्वपरिश्रमात् ॥
महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम् । १६१॥
तस्यां स्नानं न कुर्वीत नित्यनैमित्तिकादृते ॥
दिवोद्धृतैर्जलैः स्नानं निशि कुर्यान्निमित्ततः । १६४
राहुदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु ॥
स्नानदानादिकं कुर्यात् निशि काम्यव्रतेषु च ।१६६॥
न नदीषु नदीं ब्रूयात् पर्वतेषु च पर्वतम् ॥
नान्यत् प्रशंसेत्तत्रस्थः तीर्थेष्वायतनेषु ॥१६८॥
*श्वपाकं पतितं व्यङ्गमुन्मत्तं शवदाहकम् ।
सूतिकां साविकां नारीं रजसा च परिप्लुताम् ॥२०६॥
देवार्चनपरो विप्रो वित्तार्थी वत्सरत्रयम् ।
स वै देवलको नाम हव्यकव्येषु गर्हितः ॥ २१२॥
*स्वयं धौतेन कर्तव्या क्रियाधर्म्मा विपश्चिता ।
न तु नेजकधौतेन नाहतेन च कुत्रचित् ॥ २४५॥

लोमसंस्थान् तिलान् कृत्वा यः संतर्पयते पितॄन् ।
पितरस्तर्पितास्तेन रुधिरेण मलेन च ॥ ३४१॥
स्नात्वा प्रक्षाल्य पादौ च स्रग्गन्धालंकृतः शुचिः ।
पञ्चयज्ञावशिष्टन्तु भुङ्क्ते यः सोऽमृताशनः ॥४६०॥
उपलिप्ते शुचौ देशे पादौ प्रक्षाल्य वाग्यतः ।
प्राङ्मुखोऽन्नानि भुञ्जीत शुचिः पीठमधिष्ठितः ॥
न भुञ्जीताघृतं नित्यं गृहस्थो भोजने स्वयम् ।
पवित्रमथ वृष्यं च सर्पिराहुर्बलावहम् ॥ ४७७॥
भुक्तोच्छिष्टं समादाय सर्वस्मात्किंचिदाचमन् ।
उच्छिष्टभागधेयेभ्यः सोदकं निर्वपेत् भुवि ॥४८२॥
स्वदासो नापितो गोपः कुम्भकारः कृषीवलः ।
ब्राह्मणैरपि भोज्यान्नाः पञ्चैते शूद्रयोनयः ॥४९३॥
आत्मानं धर्मकृत्यं च पुत्रदारांश्च पीडयेत् ।
लोभाद्यः प्रचिनोत्यर्थान् स कदर्य इति स्मृतः ॥४९७॥
पतितान्नमभोज्यान्नं अपाङ्क्तेयान्नमेव च ।
शूद्रान्नं कुत्सितान्नं च दूषितं परिवर्जयेत् ॥ ५०५॥
श्लेष्मातको वज्रफली कौसुम्भं नालमस्तकान् ।
गृञ्जनं चेति शाकानामभक्ष्याणि प्रचक्षते ॥ ५१३॥
पलाण्डुं लशुनं शुक्तं निर्यासं चेति सर्वशः ।
कुचुन्दं श्वेतवृन्ताकं कूश्माण्डं च न भक्षयेत् ॥
न बीजान्युपभुञ्जीत रोगापत्तिमृते बुधः ।
फलान्येषामनन्तानि बीजानां हि विनाशयेत् ॥५१६॥
नाश्नीयात् पयसा नक्तं भुक्तं चेन्निशि न स्वपेत् ।
न क्षीरमुत्सृजेत् प्रासं पवित्रं हि पयः स्मृतम् ॥

अभोज्यं प्राहुराहारं शुक्तं पर्युषितं सदा।
अन्यत्र मधुसक्तुभ्यां भक्ष्येभ्यः सर्पिषो गुडात्॥५२०॥
अवलीढं च मार्जारध्वांक्षकुक्कुटवायसैः।
भोजने नोपयुञ्जीत तदमेध्यं हि धर्मतः॥
विशुद्धमपि चाहारं दूषितं कृमिजन्तुभिः।
केशलोमनखैर्वापि दूषितं परिवर्जयेत्॥
भक्षयन्नपि मांसानि शेषभोजी न लिप्यते।
औषधार्थमशक्तौ वा नियोगाद्यज्ञकारणात्॥५२८॥
आत्मार्थं स्वादुकामित्वात् जीवघातं न कारयेत्।
कष्टं हि व्यालधर्मत्वाज्जीविहिंसोपजीवनम्॥५३२॥
बलाकाहंसदात्यूह भृङ्गराजकचित्रकाः।
उलूककुररश्येनगृध्रकुक्कुटवायसाः॥ ५४१ ॥
चकोरः कोकिलो रज्जुदालकश्चाषमुद्गकौ।
कङ्कः सावरणो भासः शतपत्रप्लवङ्गमाः॥
उत्क्रोशो बर्हिणः क्रौञ्चश्चक्रवाकः शिलीमुखः।
पारावतकपोतौ च अभक्ष्या पक्षिणः स्मृताः॥
अभक्ष्याः पशुजातीनां गोखरोष्ट्राश्वकुञ्जराः।
सिंहव्याघ्रर्क्षशरभाः सर्पा जांगलकास्तथा॥ ५४३ ॥
आखुमूषिकमार्जारनकुलग्रामसूकराः।
श्वशृगालकरिद्वीपिगोलाङ्गूलकमर्कटाः॥
शम्बुशुक्तिनखशुक्ति शिशुमारप्लवङ्गमाः।
मत्स्याश्च विकृताकारा नैव भक्ष्या जलौकसाम्॥५४७॥
अतीर्थगमनात् पुंसः तीर्थसंगूहनात् स्त्रियः।
उभयोर्धर्मलोपः स्यात् शेषेण तु विशेषतः॥५६०॥

*यः स्वदारान् ऋतुस्नातान् स्वस्थः सन्नोपगच्छति।
भ्रूणहत्यामवाप्नोति गर्भं प्राप्य विनाश्य सः ।५६२।
तीर्थ० प्र०
तीर्थे पुण्यतमे यथावद्देहसंन्यासात्
ब्राह्मणो महापातकान्मुच्यते ।१५।।
अन्नश्राद्धं परान्नं च गन्धमाल्यादिमैथुनम् । ४५ ।
वर्जयेद् गुरुपाते तु यावत्पूर्णो न वत्सरः ।
*न चात्र श्येनगृध्रादीन् पक्षिणः प्रतिषेधयेत् ।
तद्रूपाः पितरस्तत्र समायान्तीति वैदिकम् ।७९।
यत्र स्थाने तु यत्तीर्थं नदी पुण्यतमापि च ।
तां ध्यायेन्मनसा वापि अन्यत्रेच्छापि(?)चिन्तनम् ।६७।
अरण्यं देवतास्थानं तीर्थान्यायतनानि च ।
तस्मात्तेषु वसन् लोकाद्याति लोकं दिवौकसाम् ।इति।
हेमाद्रौ परिभाषाखण्डे (पु० खं० १)
ऊर्ध्वरेतास्तपस्युग्रो नियताशी न संशयम् ॥
शापानुग्रहयोः शक्तः सत्यसन्धो भवेदृषिः ॥
निवृत्तः सर्वतत्त्वज्ञः कामक्रोधविवर्जितः ॥
ध्यानस्थो निष्क्रियो दान्तस्त्रिशुक्तश्च स्मृतो मुनिः॥
एवमन्वयविद्याभ्यां वृत्तेन च समुच्छ्रिताः ॥
त्रिशुक्ता नाम विप्रेन्द्राः पूज्यन्ते सवनादिषु ॥
धर्माधर्मविभागज्ञो निविष्टो वेदशासने ॥३५५॥
क्रियालज्जाक्षमाधीमानार्यो म्लेच्छो विपर्यये ।
कूपमात्रोदकग्रामे विप्रः संवत्सरं वसन् ॥३५६॥
शौचाचारपरिभ्रंशाद् ब्राह्मण्याद्धि प्रमुच्यते ।

ज्येष्ठस्य भार्यां संप्राप्तां सकामां दिधिषूपतिः ।
द्विजोऽग्रे दिधिषूश्चैव यस्य सैव कुटुम्बिनी ।
गूढलिङ्ग्यवकीर्णी स्याद्यश्च भग्नव्रतस्तथा॥३५८॥
अनुपासितसन्ध्या ये नित्यमस्नानभोजनाः ॥३५९॥
नष्टशौचाः पतन्त्येते शूद्रतुल्याश्च धर्मतः ।
द्वितीयस्य पितुर्योऽन्नं भुक्त्वा परिणतो द्विजः॥३३
*अवरोढ इति ज्ञेयः शूद्रधर्म्मा स जातितः ॥
वैश्यापतिः कृष्णपृष्ठः काडपृष्ठो भटो भवेत्॥३६३
*देवार्चनपरो विप्रो वित्तार्थी वत्सरत्रयम् ॥ ३६५॥
असौ देवलको नाम हव्यकव्येषु गर्हितः ।
गोरसानां च विक्रेता गोविक्रेता च वै द्विजः ॥
गुडलवणतैलानां विक्रेता दुष्टविक्रयी ।
निकृष्टोत्कृष्टमध्ये तु यो वर्णेषु अनवग्रहः ॥
आचरत्यपराचारं वर्णसंभेदकस्तु सः ।
एकाकी व्यसनाक्रान्तो धन्य इत्युच्यते बुधैः ।
विप्रं वार्धुषिकं विद्यात्तृणवृद्ध्युपजीविनम् ॥
आत्मानं धर्मकृत्यं च पुत्रदारांश्च पीडयेत् ।३६७
लोभाद्यः प्रचिनोत्यर्थं स तदर्थ इति स्मृतः ॥
भृतकाध्यापको यश्च भृतकाध्यापितश्च यः।३६८।
तावुभौ पतितौ ज्ञेयौ विप्रौ स्वाध्यायविक्रयात् ॥
षण्डो वातजः षण्ढः षण्डः क्लीबो नपुंसकः ॥
कीलकश्चेति षण्डोयं षण्डभेदो विभाषितः ॥
तेषां तु तुल्यवाक् शिष्टः स्त्रीधर्मात् षण्डको भवेत्
पुमान्भूत्वा स्वलिङ्गानि पश्चाच्छिन्द्यात्तथैव च ।

स्त्री च पुंभावमास्थाय पुरुषाचारवद्गुणा ॥
वातजो नाम षण्डः स्यात्स्त्रीषण्डो वापि नामतः।
अस्त्रीलिङ्गोऽपि षण्डस्तु यस्तु स्यात् म्लानमेहनः ॥
स कीलक इति ज्ञेयो यः क्लैब्यादात्मनस्त्रियम्।
अन्येन सह संयोज्य पश्चात्तामेव सेवते ॥ इति।

यत्तु संसर्गिप्रायश्चित्तप्रकरणे याज्ञवल्क्यस्मृतौ-कन्यां समुद्वहेदेषां सोपवासामकिञ्चनाम्—इति पतितावस्थायामुत्पन्नकन्याया विवाह्यत्वमुक्तम्, तदिदमप्यस्माकमेमानुकूलम्; यतः कन्याऽव्यतिरिक्तपतितापत्यस्य पतितस्य वाऽनेनासङ्ग्राह्यत्वं सूच्यते। अन्यथा सर्वेषां सङ्ग्राह्यत्वे कन्यामात्रस्योढव्यत्वमत्र वर्णितं व्यर्थं स्यात्। विवेचितं चैवं मदनरत्नप्रदीपे पूर्वोद्धृत इति तत एव द्रष्टव्यम्। सर्वथा तु न पतितानां कन्याऽव्यतिरिक्तपतितापत्यानां वा संवत्सराधिककालं वत्सरचतुष्टयपर्यन्तं परधर्मेऽवतिष्ठमानानां तत्संसर्गिणां च स्वपूर्वतनजातिप्रवेशः सम्भवतीति तेषां पृथग्जातित्वमेव युक्तम्। यत्तु—इदानीन्तनानां म्लेच्छानामपि पूर्वं क्षत्रित्वमेवासीदित्यादि वर्णितम्, तत्रेदमेवास्माकं वक्तव्यम्—यद्भवतामपि सिद्धान्ते विंशतिसंवत्सरमतिक्रम्य परधर्मं स्वीकुर्वतां प्रायश्चित्तेन शुद्धेरप्रसरात् पितृपितामहप्रपितामहपरम्परया स्वधर्मभ्रष्टानां स्वीकृतपरधर्माणां चैषां न कथमपि स्वपूर्वजातिप्रवेशः सम्भवत्युक्तिकः।

[परम्परात्रयातिक्रमएव व्रात्य संस्कारः]

व्रात्यसंस्कारस्तु परम्परात्रयातिक्रम एव सम्भवति, न तु बहुपरम्परात्यये। यस्य पिता पितामह इत्यनुपनीतौ स्यातामित्यापस्तम्बस्मरणात्। पितृपितामहपदयोरुपलक्षणत्वन्त्वापस्तम्बेनैव स्पष्टं वारितम्—यस्य प्रपितामहादि नानु-

स्मर्यत उपनयनमित्यादिनेति व्यर्थमत्रोपलक्षणत्ववादखण्डनं प्रकारान्तरेण पश्यामः । यत्तूपनयनं पुरुषार्थत्वादापत्काले वृत्त्यादिवद्विपरिणाममर्हतीति विवेचितम्, तत्रेदमेवास्माकं वक्तव्यम्—यत्र दृष्टार्थस्य कर्मणो नियमः पुरुषार्थाय विधीयते, तत्र नियमापूर्वस्यानुषङ्गिकत्वान्नियम्यमानं कर्म दृष्टफलं विपरिवर्तमर्हति, पुरुषार्थान्तरासिद्धिमात्रेण हान्यभावात् । अत एव व्रीहीनवहन्तीत्यादाववघातस्य नियमापूर्वार्थत्वं क्रत्वपूर्वार्थत्वं चोभयमूरीक्रियते । एतेन-प्राङ्मुखोऽन्नानि भुञ्जीतेत्यादि विहितं कर्मापि-व्याख्यातम् । तत्राप्यापदि दिगन्तरस्वीकारो न दोषायेत्यूरीकारसम्भवात् । न हि पुरुषार्थमात्रं विपरिणाममर्हति । अन्यथा दर्शपूर्णमासादेरपि विपरिणामापत्तेर्महाननाश्वासः समापद्येत । अध्ययनस्य तु न केवलार्थज्ञानं फलम्, किन्तु क्रत्वपूर्वोपयोग्यर्थज्ञानमिति न तत्र भाषान्तरासादितमर्थज्ञानं सार्थकं भवति । उपनयनन्तु न क्रत्वर्थं न वा पुरुषार्थम्, आधानाध्ययनवत् । लक्षणद्वयस्यापि तत्राभावात् । यथा हि "आहवनीये जुहोती" ति विध्यपेक्षितेच्छाविषयाग्निभाव्यकभावनाकरणत्वमाधानस्य, यथा च क्रतुविध्यपेक्षितेच्छाविषयार्थज्ञानभाव्यकभावनाकरणत्वमध्ययनस्य, एवं "ब्राह्मणो यजेत" इत्यादिविध्यपेक्षितेच्छाविषयब्राह्मणभाव्यकभावनाकरणत्वेनोपनयनस्यापि न पुरुषार्थत्वम् ।

तत्तच्छास्त्रानपेक्षेच्छाविषयभाव्यकभावनांशत्वेत्यादिना हि शास्त्रान्तरविहितस्य भाव्यत्वेन ग्रहणपूर्वकं यत्र कस्यचन कर्मणः क्रत्वपूर्वानुपस्थितदशायां विधानं पुरुषार्थत्वप्रयोजकमित्येव तात्पर्यम्, तत्र प्रोक्षणादीनां पुरुषार्थत्ववारणार्थं विशेष्यदलमित्याद्येव साम्प्रदायिकं विवरणमित्यतिप्रसक्तमधुनातनानां विवरणमसङ्ग-

तमेव। व्यक्तं च सोमनाथीये चतुर्थद्वितीयाधिकरणेऽध्ययनाधानयोर्न क्रत्वर्थत्वं न वा पुरुषार्थत्वमिति विवेचितमित्युपनयनपुरुषार्थतावादोऽयमत्यन्तमसंगत एव। अस्तु वा तस्य कथमपि पुरुषार्थत्वम्, एवमप्यदृष्टार्थमेवोपनयनप्रोक्षणादीति दृष्टार्थनियमस्थल इवात्र न विपरिणामप्रसङ्गः। एतेन—तस्मादापत्काले पुरुषार्थानां सर्वेषां धर्माणां विपरिवर्तने शास्त्रानुज्ञातेऽत्रापि पितृपितामहादीनामुपलक्षणत्वं स्वीकृत्य स्वधर्मभ्रष्टानां पतितानां व्रात्यानाञ्च पुनः प्रायश्चित्तेन स्वीकरणं न दोषावहमित्यादिशङ्कापि—परास्ता। वस्तुतस्तु पुरुषार्थानामापत्काले विपरिवर्तनमित्यस्य यस्य पिता पितामह इत्यत्र पितृपितामहपदयोरुपलक्षणत्वमित्यस्य च न कोऽपि सम्बन्धः। पुरुषार्थानां ह्यापत्काले परिवर्तनं नाम तत्सजातीयकार्यान्तरकरणमेव। तथाचोपनयनेनान्येन च ब्राह्मण्ये आपद्युपनयनासम्भवे कार्यान्तरं कर्तुं योग्यं नवेति संशयावसर एवोक्तन्यायस्य सञ्चारो युक्तः। न चात्र कर्मविचारः, किन्तु संस्कार्यविचार एवेति न कोऽपि दोषः। सर्वथा तु व्रात्यसंस्कारपद्धत्या वा पतितप्रायश्चित्तपद्धत्या वा कथमपि प्रायश्चित्तानर्हाणां पतितानां कृतप्रायश्चित्तानामपि वा संवत्सराधिकम्लेच्छसंसर्गिणाञ्च न पूर्वतनजातिप्रवेश इति सिद्धम्।

[मतान्तर प्रविष्टानां-स्वमतप्रवेशे मुंज्जे-महोदयसम्पादिता-व्यवस्था]

एतेन—नागपुरनिवासिभिर्डाक्टरमुञ्जेमहोदयैः श्री १००८ परमहंसादिश्रीकुर्तकोटिशराचार्यपादानामाज्ञानुसारेण प्रकाशिता पतितपरावर्तनविषयव्यवस्थापत्रिकापि—व्याख्याता। तद्यथा—

"अनया सहानुषक्ताया अभ्यर्थनायाः प्रकाशनसमयादारभ्य लोके विवादः समजनि। माञ्च वास्तविकीं स्थितिं जिज्ञासमाना

बहवो बहुशोऽन्वयुञ्जत। यत्सत्यमेव किमेषां हिन्दुवराकाणां बलाद्यवनीकृतानां पुनः स्वधर्मे संग्रहणम् धर्मशास्त्रसम्मतं यद्यपि व्यवहारतः सर्वथा हितावहम्।

अत्रोपलब्धिसुशकानां स्मृतिग्रन्थानां वाचनाद्यावन्मया ज्ञातुं शक्यते तावदस्मिन्विषये धर्मशास्त्रस्य प्रातिकूल्यं प्रतिपादयितुं कोऽप्युत्सहिष्यत इति सम्भवनीयं न मया मन्यते। इममेव विषयमुद्दिश्य देवलाभिधानः कश्चन मुनिसत्तमो देवलस्मृतिनामानं स्मृतिग्रन्थं रचयाञ्चकार। साऽसौ स्मृतिः पूनानगरीतः प्रसिद्धिं नीते आनन्दाश्रममुद्रिते च स्मृतिसमुच्चयनामनि ग्रन्थे समाविष्टोपलभ्यते। तत्रास्याः श्लोकसंख्या नवतिर्दृश्यते। अत्र केवलं बलादेव म्लेच्छधर्मं स्वीकारितानां हिन्दूनां शुद्ध्यर्थं स्वस्वजातौ च भोजनविवाहादिव्यवहारस्य पुनः प्रवर्तनार्थं विविधाः प्रायश्चित्तविधयो निर्दिष्टा दृश्यन्ते। कतिपये श्लोका आदर्शभूता अत्रोद्ध्रियन्ते। तद्यथा—

सिन्धुतीरे सुखासीनं देवलं मुनिसत्तमम्।
समेत्य मुनयः सर्वे इदं वचनमब्रुवन्॥ १॥
भगवन्म्लेच्छनीता हि कथं शुद्धिमवाप्नुयुः।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैवानुपूर्वशः॥ २॥

देवल उवाच—प्रायश्चित्तं प्रवक्ष्यामि विस्तरेण महर्षयः।
अपेयं येन सम्पीतमभक्ष्यं चापि भक्षितम्।
म्लेच्छैर्नीतेन विप्रेण अगम्यागमनं कृतम्॥ ७॥
तस्य शुद्धिं प्रवक्ष्यामि यावदेकन्तु वत्सरम्।
चान्द्रायणन्तु विप्रस्य सपराकं प्रकीर्तितम्॥ ८॥
पराकमेकं क्षत्रस्य पादकृच्छ्रेण संयुतम्।

पराकार्धन्तु वैश्यस्य शूद्रस्य दिनपञ्चकम् ॥ ६ ॥
म्लेच्छैर्नीतेन शूद्रैर्वा हारिते दण्डमेखले ।
संस्कारप्रमुखं तस्य सर्वं कार्यं यथाविधि ॥ १२ ॥
तदासौ स्वकुटुम्बानां पङ्क्तिं प्राप्नोति नान्यथा ।
स्वभार्यां च यथान्यायं गच्छन्नेवं विशुद्ध्यति ॥ १४ ॥
अथ संवत्सरादूर्ध्वं म्लेच्छैर्नीतो यदा भवेत् ।
प्रायश्चित्ते तु संचीर्णे गङ्गास्नानेन शुद्ध्यति ॥ १५ ॥
बलाद्दासीकृता ये च म्लेच्छचाण्डालदस्युभिः ।
अशुभं कारिताः कर्म गवादिप्राणिहिंसनम् ॥ १७ ॥
उच्छिष्टमार्जनं चैव तथा तस्यैव भोजनम् ।
खरोष्ट्रविड्वराहाणामामिषस्य च भक्षणम् ॥१८॥
तत्स्त्रीणां च तथा संगं ताभिश्च सह भोजनम् ।
मासोषिते द्विजातौ तु प्राजापत्यं विशोधनम् ॥१६॥
अतः परं प्रवक्ष्यामि प्रायश्चित्तमिदं शुभम् ।
स्त्रीणां म्लेच्छैश्च नीतानां बलात्संवेशने क्वचित् ॥
म्लेच्छान्नं म्लेच्छसंस्पर्शो म्लेच्छेन सह संस्थितिः ।
वत्सरं वत्सरादूर्ध्वं त्रिरात्रेण विशुध्यति ॥४४॥
गृहीता स्त्री बलादेव म्लेच्छैर्गुर्वीकृता यदि ।
गुर्वी न शुद्धिमाप्नोति त्रिरात्रेणेतरा शुचिः ॥४७॥
योषा गर्भं विधत्ते या म्लेच्छात्कामादकामतः ।
ब्राह्मणी क्षत्रिया वैश्या शूद्रा वर्णेतरा च या ॥ ४८ ॥
अभक्ष्यभक्षणं कुर्यात्तस्या शुद्धिः कथम्भवेत् ।
कृच्छ्रं सान्तपनं शुद्धिर्घृतैर्योनेश्च पाचनम् ॥ ४६ ॥
असवर्णेन यो गर्भः स्त्रीणां योनौ निषिच्यते ।

अशुद्धा सा भवेन्नारी यावच्छल्यं न मुञ्चति ॥ ५० ॥
विनिःसृते ततः शल्ये रजसो वापि दर्शने ।
तदा सा शुद्ध्यते नारी विमलं काञ्चनं यथा ॥ ५१ ॥
स गर्भो दीयतेऽन्यस्मै स्वयङ्ग्राह्यो न कर्हिचित् ।
स्वजातौ वर्जयेद्यस्मात्संकरः स्यादतोऽन्यथा ॥ ५२ ॥
गृहीतो यो बलान्म्लेच्छैः पञ्च षट् सप्त वा समाः ।
दशादि विंशतिं यावत्तस्य शुद्धिर्विधीयते ॥ ५३ ॥
प्रायश्चित्तं समाख्यातं यथोक्तं देवलेन तु ।
इतरेषामृषीणाञ्च नान्यथा वाक्यमर्हथ ॥ ७२ ॥ इति ।

एवं प्रसभं यवनीकृतानां पश्चात्प्रायश्चित्तेन पूतानां हिन्दूनां भोजनादौ व्यवहार्यत्वमस्माकं धर्मशास्त्रं न कियदपि विहन्तीति विशदमेव ।

अत्रेदमपि मनसि निधेयं यदेकादिविंशतिमपि यावत्संवत्सराणि तस्यामेवावस्थायामासीनस्य पुरुषस्य प्रायश्चित्तेन शुद्धौ वर्तते न कोऽपि प्रत्यवायः । परन्त्वत्र विंशतिपदेन विंशत्या परिमितान्येव संवत्सराणि ग्राह्याणि, किं वा यथा 'शतपत्र' सहस्ररश्मि, इत्यादिपदेषु शतशब्दः सहस्रशब्दश्च वस्तुतस्तत्तत्संख्यावाचकस्तथापि तत्तत्संख्यातिरिच्यमानानेकसंख्यार्थे प्रयुज्यते, तथाऽत्रापि विंशतिशब्दस्य तत्संख्यातिरिच्यमानानेकसंख्यार्थे ग्रहणं किं विद्वत्सम्मतं भवेन्नवेत्यपि परधर्मीयलोकान् स्वधर्मे सङ्ग्राहिभिरार्येतरधर्मैः सह सञ्जातायां स्पर्धायामभिभवप्रसङ्गप्रतिहरणे सुप्रबुद्धमनसा विचारणीयम् ।

अत्र केवलं बलात्कारस्यैवोल्लेखः, परन्त्वज्ञानलोभमोहच्छलादितोऽपि परधर्मं स्वीकृतानामार्याणां शुद्धिमनुमन्येतास्माकं धर्म-

शस्त्रम् यदि बलादित्यस्य पदस्य व्यापकार्थग्रहणं शास्त्रीयं भवेत्। ननु भवति च शास्त्रीयं यत एकत्रान्यास्मिन् प्रसङ्गे बलादिति पदं व्यापकत्वेन गृहीतं दृश्यते। पारस्करगृह्यसूत्रस्य प्रथमकाण्डान्तर्गताया अष्टमकण्डिकायाः 'अथ विवाहपदार्थक्रमः' इति विषयविवेचने दृश्यते—एवं बौधायन आह—

बलादपहृता कन्या मन्त्रैर्यदि न संस्कृता।
अन्यस्मै विधिवद्देया यथा कन्या तथैव सा॥
बलादिति छलादेरुपलक्षणम्—इति।

आर्यसंस्कृतेर्गौरवे महदभिमानास्पदमिदं यत्प्राचीनधर्मशास्त्रकोराणामृषीणां मुनीनाञ्च सदृशो भाष्यकारा अपि सजीवविवेकबुद्धिनिर्भराः सामाजिकवादान् व्यापिकां सङ्ग्राहिकाञ्च बुद्धिमवलम्ब्य, अर्थाद्राष्ट्रियदृष्ट्यैव समीक्षाञ्चक्रुः। आधुनिकानान्तु शास्त्रिणां विचारपद्धतिः सुतरामनुदारेति सर्वथा शोच्यम्।

अस्या देवलस्मृतेः सार्वजनीनं प्रामाण्यं नाशङ्कनीयम्। यतो याज्ञवल्क्यादिस्मृतेः प्रायश्चित्ताध्यायस्य पञ्चमप्रकरणान्तर्गतस्य २८९ श्लोकस्य मिताक्षरायां 'अथापरिग्रहाभोज्यभोजने प्रायश्चित्तम्' इति विषयस्य विवेचने आपस्तम्बीया इत्याख्याता कतिपये श्लोका उद्धृता दृश्यन्ते ये देवलस्मृतेः १७।१८।१९ श्लोकेभ्यः सर्वथाऽभिन्ना भवन्ति। अपरञ्च त्रयोऽन्येऽपि श्लोकास्तत्र तेनैव क्रमेण वर्तन्ते। त इमे—

चान्द्रायणं त्वाहिताग्नेः पराकस्त्वथवा भवेत्।
चान्द्रायणं पराकञ्च चरेत्संवत्सरोषितः॥
संवत्सरोषितः शूद्रो मासार्धं यावकं पिबेत्
मासमात्रोषितः शूद्रः कृच्छ्रपादेन शुद्ध्यति॥

ऊर्ध्वं संवत्सरात्कल्प्यं प्रायश्चित्तं द्विजोत्तमैः ।
संवत्सरैस्त्रिभिश्चैव तद्भावं स निगच्छति ॥

तथाच यमस्मृतेः पञ्चमाध्यायस्य पञ्चमषष्ठश्लोकौ चेमौ—

बलाद्दासीकृता ये च म्लेच्छचाण्डालदस्युभिः ।
अशुभं कारिताः कर्म गवादिप्राणिहिंसनम् ॥
प्रायश्चित्तञ्च दातव्यं तारतम्येन वा द्विजैः ॥ इति ।

अत्रापि प्रथमश्लोको देवलस्मृतेः १७ श्लोकात्सर्वथाऽभिन्नः । तस्मादसौ देवलस्मृतिरुभाभ्यामापस्तम्बयमस्मृतिभ्यामस्मिन्विषये प्रमाणत्वेन गृह्यते ।

सत्यप्येवमेतान् शास्त्रीयवादान् तज्ज्ञाः शास्त्रिपण्डिता एव सप्रमाणं विश्वसनीयतया च निर्णयन्त्विति सविनयं विज्ञप्तिः ।

नागपूरनगरम् सी.पी. डाक्टर-बा. शि. मुञ्जे
ता० ७-४-१९२२ एल.एम्.एस्. नेत्रवैद्य
नागपूरनगर सी.पी. इति ।

[उक्तव्यवस्था-पर्यालोचनम्] अत्राचिरेणैव मोपलापदाभिधेयमोहम्मदैः स्वमतं प्रापितानां तत्राकृतयोनिसम्बन्धानां संवत्सरमध्ये सहाशनादिमात्रमाचरित्वा परावृत्तिमभिलषतां पश्चात्तप्तानाञ्च प्रायश्चित्तैः शुद्धिरस्माभिरप्यनुमन्यत एव । विंशतिसंवत्सरमध्ये ततोऽनन्तरं वा स्वमतप्रवेशमभिलषतान्तु पूर्वोक्तरीत्या स्वमतप्रवेशः कथमपि न सम्भवति । यथाच देवलस्मृतिः मुद्रापिता सन्दिग्धमेव प्रमाणं तथा पूर्वमेव विवेचितम् । आपस्तम्बस्मृतौ तु विंशतिसंवत्सरं म्लेच्छादिसंसर्गस्य चर्चापि न वर्तते इति आपस्तम्बाद्युल्लेखः पामरप्रतारणार्थ एव न तु वस्तुस्थितिप्रदर्शनार्थः । यत्तु-विंशतिपदस्यासंख्येयसंवत्सरपरत्वम्, तत् सर्वथा बाधितमेव; प्रमा-

णाभावात् । यत्तु तत्राधुनिकानान्तु शास्त्रिणां विचारपद्धतिः सुतरामनुदारेति सर्वथा शोच्यमिति वर्णितम्, तत्र वयं सदुःखमिदं निवेदयामो यच्छास्त्रविचारावसरे शास्त्रिणामनौदार्यं नाम शास्त्रमात्रपारतन्त्र्यमेवेति तदिदं शास्त्रिणां भूषणमेव न तु दूषणमिति उदारवादिनामशास्त्रिणां शास्त्रीयार्थविनिर्णयो धर्मैकपक्षपातिनामनादरणीय इति न कोऽपि दोष इति ।

इममेव सिद्धान्तं उडुपिसंस्कृत कलाशालाप्रधानाध्यापका अपि मन्यन्ते । तद्यथा--

[उक्तार्थे उडुपिकलाशलाध्यक्षाणामाशयः]

यद्यप्यत्र केचित्पतिताः प्रायश्चित्तं नार्हन्त्येव । यथा म्लेच्छस्त्रिय उद्वाह्य स्वस्वपूर्वतनजातिधर्मान् परित्यज्य तद्भोज्यान्येव भुञ्जानास्तदीयानेव धर्मानाचरन्तस्तदीयाहारविकारबीजादेव पुत्रादीनुत्पादयन्तस्तेषां तत्कल्पोक्तप्रायश्चित्तसहस्रेणापि न शुद्धिर्विहिता धर्मशास्त्रेषु । अतस्तानुपादाय हिन्दुजनसंख्याह्रासो न निवर्त्तत एव । ये तु पुनरपेयपानाभोज्यभोजनागम्यागमनापांक्तेयपङ्क्तिभोजनादिना पातित्यमुपगम्य स्वजातिभिस्त्यक्ता अपि अन्यजातिसंसर्गमकृत्वा तद्धर्मानापद्यप्यननुतिष्ठन्तः स्वस्वपूर्वतनजातिविहितधर्मानेव प्रायः समनुवर्तमानाः प्रायश्चित्तेन स्वात्मोद्दिधीर्षव पतितास्ते प्रायश्चित्तेन विशुद्धिं सम्प्राप्ताः स्वस्वपूर्वतनजातिषु विवाहादिगुरुतरसंसर्गमेवार्हन्ति । तादृशान्वा हिन्दुजनेष्वेव परिसंख्याय उक्तसंख्याह्रासपरिहारो निर्विवादं विधेयः । इतरपतितपरिग्रहणन्तु ऐच्छिकं निर्बन्धाधीनम्, न शास्त्रीयव्यवस्थाधीनम् । कृतप्रायश्चित्तानां पतितानां हिन्दुत्वपरिरक्षणेनैव पृथगेव स्थापने तु न कापि क्षतिः, किन्तु महानुत्सव एव । हिन्दुत्वं चतुर्वर्णेतरसाधा-

रणमिति द्वितीयकल्पे तु पतितेभ्योऽपि हिन्दुत्वं नापगतमेवेति तत्र तदापादनायासो निष्फल इति शास्त्रीयव्यवस्थान्वेषणं नात्र-काशमासादयतीति प्रतिभाति—इति ।

[मण्ठेनारायणशास्त्रिम-होदयानामाशयः]

यत्तु श्रीनारायणशास्त्रिमराठेमहोदयैः—बलाद्दूषितानामल्पेनैव प्रायश्चित्तेन शुद्धानां स्वस्वजातौ यथास्थानं ग्रहणमिति नैव चित्रम् । पतितानामपि शुद्धबीजक्षेत्राणां कृतप्रायश्चित्तानां पुनः पूर्वजातौ ग्रहणे न दोषः । इतरेषान्तु यथायथं पृथग्जातौ स्थापनं हिन्दुत्वसम्पादनम् योग्यधर्मानुष्ठानाधिकारश्च सम्पादनीयः, न पुनर्विवाहादिरेव गरीयान् व्यवहारः कर्तव्य इत्याग्रहिलता योग्येति युक्तमुत्पश्याम इति वर्णयन्ति । तत्र यदि तेऽपि संवत्सरमध्य एव अकृतविवाहैकपात्रभोजनादिगुरुतरसंसर्गिणामेव स्वजातिप्रवेशं मन्यन्ते, तर्हि तु नास्माकं तत्र विरोधः । अन्येषां तु पृथक्संस्थैव युक्तेति तु वयं पश्यामः । वाईनगरे यदाऽस्माभिर्गतम्, तदा तैरपि अस्मदीय एव पक्षः स्वीकृत इति तु महदिदमामोदस्थानम् । अत्रापि प्रबन्धे विवाहादिगुरुतरसम्बन्धं न ते योग्यं मन्यन्त इति तु स्पष्टमेव समेषाम् । एतेन पतितोत्पन्ना अपि व्याख्याताः । तत्रापि कन्यामात्रस्य विवक्षणे न विरोधः, न हि पतितस्य शुद्धकन्याविवाहादिना तृतीयादिपर्यायगतस्य न यावत् व्रातसंस्कारयोग्यतंस्वजातिप्रवेश इति सर्वं सुस्थम् । एतेन—शम्भुभट्टशर्मप्रबन्धोऽपि—व्याख्यातः । स यथा—

[शम्भुभट्टसम्मता-व्यवस्था]

इदानीं हिन्दुजनसंख्या क्रमेण ह्रसीयसी भवतीति परमार्थिक एव प्रवादः । यद्यपि न ह्रसीयसी ; तथापि देशकालानुरोधेनान्यसमुदायस्येव हिन्दुजनसमुदायस्य संख्याया उपचयो न जायते । अत्र केरलेषु अतीतैर्दशभिर्वत्सरैर्न-

वशतमानेन ६ । १०० हिन्दूनाम्, एकोनविंशतिशतमानेन महम्मदीयानाम् १६ । १०० । एकोनत्रिंशच्छतमानेन २६ । कैस्तानाञ्च संख्याया उपचय इति निर्धारितं किल मानवसंख्यासंख्यानाधिकृतैः । अत्र च ह्रासे द्वे निमित्ते समामनन्ति केचिद्विचक्षणाः । विहितकर्माननुष्ठाने क्रमेणेतरैः क्रियमाणमुद्वेजनम् पातित्यपरिकल्पनञ्चेत्येकम् । मतान्तरप्रचारकैः स्वस्वसमुदायस्य सम्पोषणाय क्रियमाणं मतपरिवर्तनमपरम् । उचितमेवेदमुभयमपि । नापि सर्वमेवोचितमिति मम संरम्भः, परन्तु यन्न्यायेन प्रवर्तते तदेवोचितमिति । ततस्ततोऽपि प्रधानमन्यदेव किमपि श्रद्धेयमस्ति निदानम् । यन्मतान्तरीयैरिव सम्प्रति हिन्दुमतानुयायिभिः स्वमतप्रचाराय यन्न समुचितः समारम्भः समाद्रियते । तदेवैकमस्मिन् ह्रासे प्रधानम् निदानम् । अथास्य ह्रासस्य परिहारे उपायश्चिन्त्यते । हिन्दुमताभिनिवेशसम्पादनक्षमैः पारमार्थिकतत्त्वोपदेशैरितरजनसमावर्जनमेक उपायः । पतितानामपि समुत्पन्नपश्चात्तापानां समुदायप्रवेशानुमतिरपर उपायः । ध्रुवमाभ्यामुभाभ्यां समुदायजनसंख्याया उपचयः शक्यः कर्तुम् , परन्त्वत्र मतप्रवेशानुमतिरकृतप्रायश्चित्तानामप्युत कृतप्रायश्चित्तानामेवेति विवेचनीयम् । यद्यकृतप्रायश्चित्तानामपि मतप्रवेशोऽनुमन्यते, तर्ह्यव्यवस्था साङ्कर्यञ्च भवति । समाजोल्लङ्घनेन कृतागसो विहितं दण्डनमकृतम् भवति । कृतागा दण्डनीय इति लौकिकश्शास्त्रीयश्च नियमः । यदि तमेनं समयं वयमुल्लङ्घयामस्तर्हि पतिते समयोल्लङ्घनप्रयुक्तं यत्पातित्यं ततोऽवरं वास्माकम् किमप्यागः? सर्वथा लौकिकशास्त्रीयसमयमनुरुद्ध्य प्रायश्चित्तरूपं दण्डनं विधायैव मते प्रवेशोऽनुमन्तव्यः । यद्यन्यथापि

क्रियते तर्हि, लोकनियन्त्रणा दुर्विधाना स्यात्। शेषसंरक्षणाय हि कृतागा राज्ञा दण्ड्यते। तस्मात्पतितानां कृतप्रायश्चित्तानामेव मतप्रवेशानुमतिरुचिता। नन्वकृतप्रायश्चित्तानामपि दृष्टव्यवहाराय हिन्दुत्वव्यपदेशमात्रं स्वीक्रियताम्, को दोषः? अस्तु दोषजिज्ञासा। को गुण इत्येव प्रथतो विचार्यताम्। नहि व्यपदेशमात्रस्वीकारेण चिकीर्षितः संख्याह्रासपरिहाररूपो गुणः सम्पादितो भवति। मानवसंख्यासंख्यानाधिकृतानां संख्यानपट्टिकायां परमुपचयः कृतः स्यात्, न तेनातीवोपयोगः। येनोपयोगः स त्वन्यथैव सम्पादनीयः। तस्मान्न व्यवहारमात्रानुमतिः फलाय कल्पते, किन्तु मतप्रवेशानुमतिरेव चिकीर्षितं गुणमादध्यात्। लौकिकशास्त्रीयोभयमार्गानुरोधेन विचारणायां क्रियमाणायां पतितानामपि प्रायश्चित्तं कृत्वा मतप्रवेशानुमतियुक्तरूपेति माम्प्रतिभाति।

का नामात्र मतप्रवेशानुमतिः। स्वधर्मानुष्ठानयोग्यतास्वीकारमात्रमुत स्वपूर्वतनजातिषु विवाहादिगुरुतरसंसर्गाभ्युपगमः? उभयमपि मतप्रवेशानुमतिरेव। परन्तु स्वधर्मानुष्ठानयोग्यतास्वीकारमात्रेण किं कृतं भवति? पश्चात्तापयुक्तस्य कृतप्रायश्चित्तस्य पतितस्य पश्चात्तापापनोदः परमंशतः कृतो भवति। तदेकवैकल्यप्रयुक्तो जनसंख्याह्रासश्च परिहृतो भवति। नैतत्परमस्माकं परमोद्देशः, किन्तु तन्मूलैः शाखोपशाखं प्रवर्द्धमानैः सन्तानैः संख्याह्रासस्य समुचितः प्रतीकार एव। स च धर्मानुष्ठानयोग्यतास्वीकारमात्रेण न सम्भवति। गुरुतरसंव्यवहाराभावे सन्तानस्याप्यनिर्गलोपचयस्य प्रतिबन्धात्। स्वपूर्वतनजातिषु विवाहादिगुरुतरसंसर्गाभ्युपगम एव चिकीर्षिते हिन्दुजनसंख्याह्रासपरिहारे पर्याप्त उपायो भवति। अत्र केचिदाचक्षीरन्—यदि चिकीर्षितह्रास-

परिहारायैवमभ्युपगच्छेम, तर्हि साङ्कर्यं समापतिष्यति। कृतप्रायश्चित्तानां पतितानां पृथक्तयाऽवस्थापनम् हिन्दुत्वसंरक्षणेन यदि क्रियते, तर्हि का क्षतिरिति।

हानिविचारात्पूर्वं पृथक्तयाऽवस्थापनमित्यस्यार्थमेव निर्धारयामः। तन्निर्धारणाधीनत्वाद्धानिव्यवस्थापनस्य। पृथक्तयाऽवस्थापनं किं पतितस्य यावत्सन्तानानुवृत्ति, किं वा यावज्जीवम्, किं वा जीवत एव तस्य किमपि समयं परिकल्प्य तावत्पर्यन्तमसंव्यवहारेऽपि क्रमिकोत्कर्षसम्पत्त्यनुगुणमवस्थापनम्। आद्ये पक्षे चिकीर्षितः परिहारो गणनावसरे परं कृतो भवति। स च नातीवोपयोगाय। या पुनरेकोद्देशप्रवृत्तिरुपयोगाय कल्पते, सा पृथक्तयाऽवस्थापने दौर्बल्यं भजते। तस्मादयं कल्पो नात्यादरणीयः। नाप्ययं शास्त्रकाराणामभिमतः कल्पः। कुत्रापि यावत्सन्तानानुवृत्तिपातित्यस्याव्यवस्थपनात्, परन्तु कृतेऽपि प्रायश्चित्ते यथापुरं न संव्यवह्रियत इति साम्प्रतिकः समयः। अतश्च यावज्जीवं पृथक्तयैवावस्थापनं करणीयमिति ब्रुवते धर्मशास्त्रनिष्णाताः। यदि कृतेऽपि प्रायश्चित्ते पृथक्तयैव स यावज्जीवमवस्थाप्येत, तर्हि तेन प्रायश्चित्तेन विशिष्य किं कृतं भवति? किं हिन्दुरिति व्यवहारसंरक्षणं परं प्रायश्चित्तस्य फलम्? नहि नहि; स्वधर्मानुष्ठानयोग्यता तस्यानुमन्यत इति चेत्, तदेतदनुष्ठानं यदि परसंव्यवहारसाध्यम्, तर्हि परसंव्यवहारसङ्कोचादेव तदनुमतमप्यनुष्ठातुमशक्यत्वादननुमतप्रायम्। यदि तु स्वयमेव परसाहाय्यं विना यद्यद्देवपूजनादि कर्तुं शक्यते तदनुष्ठीयतां तेनेत्युच्यते, तर्हि पृच्छाम्यकृतप्रायश्चित्तोऽपि स्वयमेव देवपूजनादिकं कर्तुं किं नार्हतीति? कर्तुमर्हत्येव। परन्तु पतितेन तत्करणेऽपि न किमपि फलं लभ्येतेत्यभिमन्यते चेत्, अस्तु

तावता तदनुग्रहः कृतः । किमेतावता समुदायस्य ? किं समुदाया-द् बहिष्करणे कृते तदेकवैकल्यप्रयुक्तं न्यूनत्वं तस्य पुनः समुदाये प्रवेशानुमतौ परिहृतं भवतीति ? ओम् । तदेवेति चेत्तर्हि स एव मार्गः प्रगुणीकृत्य संसेव्यतामित्यस्माकमभिसन्धिः । त्याज्योऽपि त्यक्तोऽपि वा यदि पश्चात्ततोऽभ्युदयमिच्छति, तर्हि स प्रायश्चित्तेन शोधनीयः । न हि शास्त्रादृष्टं तदननुमतं वा प्रायश्चित्तं स्वयं विधेयमिति ममाशयः, परन्तु दृष्टानामनुमतानामेव वा प्रायोगिकतया प्रचारणं करणीयमिति । प्राथमिकशुद्ध्या स्वतन्त्रधर्मकर्मस्वधिकार इत्येव व्यवस्थाप्यताम् । पश्चात्कञ्चन कालं प्रतीक्ष्य तदीयचर्यानुरोधेन संव्यवहार्यतासम्पादनौपयिकी शुद्धिरपि व्यवस्थाप्यताम् । एवं क्रमेणैव स्वपूर्वतनजातिषु गुरुतरसंसर्गोऽपि अनुशिष्यताम् । एवं कृते त्याज्यस्त्यक्तो वा क्रमिकमभ्युदयं कांक्षन् विहितधर्मानुसरणश्रद्धालुरेव भवेत् । उत्कर्षस्य निरोधे क्लृप्ततायां वा आरुरुक्षाया अनुदयादुदासीनो भवति । विमुखश्च धर्मात्सम्पद्यते । तस्मात्पश्चात्तस्य प्रायश्चित्तं कृत्वाऽनुमतप्रवेशस्य यावज्जीवमेकैकावस्था न व्यवस्थापनीया, अपि तु क्रमिकमुत्कर्षं गुणकर्मभ्यां सम्पाद्य विवाहादिगुरुतरसंसर्गं स्वपूर्वजातिषु कर्तुमधिकारोऽनुमन्तव्यः । एवं कृते पतितोऽपि स्वकर्मानुरोधेन विहितप्रायश्चित्तसाहाय्येनोत्कृष्यते । समुदायश्चोत्कृष्टेन संयुज्य परिपोषमियात् । तस्मात्तृतीय एव पक्षः श्रेयान् । पतितस्यापि क्रमिकोत्कर्षोऽनुमत एव शास्त्रकारैः । तथाहि प्रतिलोमजान् पतितानाह देवलः—

तेषां सवर्णजाः श्रेष्ठास्तेभ्योऽन्वगनुलोमजाः ।
अन्तराला बहिर्वर्णाः पतिताः प्रतिलोमजाः ॥ इति ॥

अस्यार्थः सायणेन विवृतः—विजातीयान्मिथुनादुत्पन्ना अन्त-

शलाः। ते च द्विविधाः। अनुलोमजाः प्रतिलोमजाश्च। तत्रानुलोमजाः सवर्णजेभ्यो हीना अपि न वर्णबाह्याः; मातृसमानवर्णत्वात्। प्रतिलोमजास्तु वर्णबाह्यत्वात्पतिताः—इति। याज्ञवल्क्येनापि प्रतिलोमजा असन्त इत्युक्तम्। यथा—असत्सन्तस्तु विज्ञेयाः प्रतिलोमानुलोमजाः। १—६५॥ प्रतिलोमजानामप्येषां क्रमिक उत्कर्षोऽनुमतो याज्ञवल्क्येन नैकस्मिन्नेव जन्मनीत्यन्यदेतत्।

"जात्युत्कर्षो युगे ज्ञेयः सप्तमे पञ्चमेऽपि वा"—इति। (१-९६ या० स्मृ०) सायणेन तु व्याख्यातम्। कूटस्थ स्त्रीपुंसयुगमारभ्य परिगणनायां पञ्चमे षष्ठे सप्तमे वाऽनुलोमेन युग्मे जातिरुत्कृष्यते। तद्यथा—पुमान् विप्रो वधूः शूद्रा। तयोर्युग्मं कूटस्थम् तस्मादुत्पन्ना निषादी। सापि विप्रेणोढा तयोर्युग्मं द्वितीयम्। एवं तदुत्पन्नायां वध्वां विप्रेणोढायां तृतीयादियुग्मपरम्परा भवति। तत्र सप्तमे युग्मे जातमपत्यं ब्राह्मण्योपेतं भवति—इति। मनुनाप्ययमभिप्रायः प्रदर्शितः—

शूद्रायां ब्राह्मणाज्जातः श्रेयसा चेत्प्रजायते।
अश्रेयान् श्रेयसीं जातिं गच्छत्यासप्तमाद्युगात्॥
शूद्रो ब्राह्मणतामेति ब्राह्मणश्चैति शूद्रताम्।
क्षत्रियाज्जातमेवन्तु विद्याद्वैश्यात्तथैव च॥

(१०—६५। इति। एवं धर्मशास्त्रकारैरधमजातीनां क्रमेणोत्कर्षस्य च व्यवस्थापनं कृतम्। अन्येषामपि पतितानां प्रायश्चित्तैः शोधनं शास्त्रविहितं प्रदर्शयितुं प्रथमतः पतिताः प्रदर्श्यन्ते। गौतमेनैते परिगणिताः।

'ब्रह्महसुरापगुरुतल्पगमातापितृसम्बन्धागस्तेननास्तिकनिन्दि-

तकर्माभ्यासिपतितात्याग्यपतितत्यागिनः पतिताः, (१—८१) गौ० सू० । इति । पातित्यञ्च तेनैवैवं परिभाषितम् ।

'द्विजातिकर्मभ्यो हानिः पतनम् । (४—६१ गौ० सू०) इति । एतेषां पातित्यावहानां पातकानां मध्ये प्राथमिकानि त्रीणि गुरूणीति तेष्वपि प्रथममेव गरीय इति च सर्वानुमतमेव । तस्या ब्रह्महत्याया अपि बहूनि प्रायश्चित्तानि विहितानि दृश्यन्ते, किमुतेतरेषाम् । "खड्गैककपालपाणिर्वा द्वादशसंवत्सरान् ब्रह्मचारी भैक्षाय ग्रामं प्रविशेत्कर्माचक्षाणः" ३—१८ गौ० सू० इति । मनुनाप्युक्तम्—

ब्रह्महा द्वादशसमाः कुटीं कृत्वा वने वसेत् ।
भैक्षाश्यात्मविशुद्ध्यर्थं कृत्वा शवशिरोध्वजम्॥११-७२॥

एवमन्येऽपि केचन प्रकाराः प्रदृश्यन्ते ।

"प्रायश्चित्तमग्नौ सक्तिर्ब्रह्मघ्न स्त्रिरवाक् तस्य" गौ० सू० १८-१ । 'लक्ष्यं वा स्याज्जन्ये शस्त्रभृताम् " ८—१८ गौ० सू० । मनुनाप्युक्तम्—लक्ष्यं शस्त्रभृतां वा स्याद्विदुषामिच्छयात्मनः । प्रास्येदात्मानमग्नौ वा समिद्धे त्रिरवाक्शिराः ॥ ११—७३ ॥ अनेन प्रकारेणानेकप्रायश्चित्तविधाने फलन्तु "एनसि गुरुणि गुरूणि लघुनि" इति गौतमोक्तेरनुमीयते तारतम्यव्यवस्थैवेति । अन्ते चैवमाह मनुः—

अतोऽन्यतममास्थाय विधिं विप्रः समाहितः ।
ब्रह्महत्याकृतं पापं व्यपोहत्यात्मवत्तया ११-७६ ॥ इति ।

अनेन प्रकारेण बहूनां पातकानां प्रतिपदप्रायश्चित्तमेव तैरुक्तम् । प्रतिपदानुक्ते निर्णयाय परिषदोऽधिकारो दत्तः । एवमपराधस्य गौरवलाघवविचारेणानेकेषु प्रायश्चित्तेष्वन्यतमं

निर्धारयितुं परिषदेवाधिकरोतीति कण्ठत एवोक्तम् ।

नन्वेतैः प्रायश्चित्तैः पतनं द्विजातिकर्मभ्यो हानि- रिति निरुक्तलक्षणं अपैतु, संव्यवहार्यता तु नैव सिध्येत् इति चेत्, उच्यते— "प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत् । कामतो व्यवहार्यस्तु वचनादिह जायते ॥२२६॥ प्रा०का०या०स्मृ०।—इति। अत्र विज्ञानेश्वरीयम्—प्रायश्चित्तैर्वक्ष्यमाणैरज्ञानाद्यदेनः पापं कृतं तदपैति गच्छति न कामकृतम्, किन्तु तत्र प्रायश्चित्तविधायक- वचनबलादिह लोके व्यवहार्यो जायते—इति। ननु कामकृते प्रायश्चित्तमेव नास्ति। तदुक्तं वसिष्ठेन—अनभिसन्धिकृते पा- पेऽपराधे प्रायश्चित्तम्—इति। अङ्गिरसाप्युक्तम्। अकामतः कृते पापे प्रायश्चित्तं न कामत इति ॥ मनुरप्याह—कामतो ब्राह्मण- वधे निष्कृतिर्न विधीयते ॥ ११-७६ ॥ इति। तस्मात्कामकृते प्रायश्चित्ताभावात्कथं व्यवहार्यत्वं सम्पादयितुं शक्यत इति चेत्, उच्यते--'विहितं यदकामानां कामात्तत् द्विगुणं भवेत् इति कामकृते- ऽपि प्रायश्चित्तदर्शनाद्भवति संव्यवहार्यत्वम्। प्रदर्शितस्याङ्गिरस्स्मृ- तिवाक्यस्य "स्यात्त्वकामकृते यत्तु द्विगुणं बुद्धिपूर्वके" इतीदमुत्त- रार्धम्। अतो विज्ञायतेऽकामकृतस्यैव प्रायश्चित्तमिह प्रदर्शितम्। कामकृतस्य तु प्रायश्चित्तमिदमेव द्विगुणमिति। तर्हि निष्कृतिर्न विधीयते, इति मनुवचनस्य का गतिरिति चेदवलोक्यतां तद्व्या- ख्यानम्। "कामतस्तु ब्राह्मणवधे नेयं निष्कृतिर्नैतत्प्रायश्चित्तम्, किन्त्वितो द्विगुणात्मकमिति प्रायश्चित्तगौरवार्थम्। कामतस्तु कृतं मोहात्प्रायश्चित्तैः पृथग्विधैरिति पूर्वोक्तविरोधात्" इति ॥

अत एव मनुः—

अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः ।

कामकारकृतेऽप्याहुरेके श्रुतिनिदर्शनात् ॥ ११-४५ ॥

इत्यनेन कामकृतेऽपि प्रायश्चित्तं प्रापयति। न चायं कल्पो मनोरनभिमतः, एक इत्युक्तेरिति वाच्यम्; तदुपादानादेव वृद्धसम्मतिप्रदर्शनादयं कल्पो युक्त इति मनोरभिप्राय इति किन्न स्यात्? शास्त्रेषु हि हेयं स्ववचनेनैव निषिध्यते, नत्वेक इत्यादिनिबन्धनेन। संसूच्यतां वा क्वचिदनभिमतिरप्येवं निबन्धनेन। अत्र तु न तथा। अस्योत्तरश्लोकेन—

अकामतः कृतं पापं वेदाभ्यासेन शुध्यति।
कामतस्तु कृतं मोहात्प्रायश्चित्तैः पृथग्विधैः ॥४६-११॥

इति स्वाभिप्रायस्य मनुनैव प्रकाशितत्वात्। किञ्च—

यः कामतो महापापं नरः कुर्यात्कथञ्चन।
न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते ॥ इति

मरणान्तिकप्रायश्चित्तस्य दर्शनान्मनुवचनस्य न प्रायश्चित्तमात्रनिषेधे तात्पर्यम्, किन्त्वकामकृतेऽपराधे प्रायश्चित्तं शुद्धिकरमित्यस्मिन्नर्थे; अन्यथा प्रायश्चित्तविधानस्यासंगत्यापत्तेः। तस्मादस्ति कामकृतेऽपि प्रायश्चित्तम्। अत एव—कामतो व्यवहार्यस्तु वचनादिह जायते—इत्युक्तम्। परन्त्विदमवधेयम्—अज्ञानकृते सर्वत्र प्रायश्चित्तैर्दुरितक्षयः। यत्र पुनर्महापातके व्यवहार्यत्वम्—तैश्चाब्दं समाचरन्—३-२७ गौ० सू०—इत्यनेन निषिद्धम्, तस्मिन् पतनीये कर्मणि कामतः कृते व्यवहार्यत्वमात्रम्, न दुरितक्षय इति। यदि दुरितक्षयो नाभ्युपगम्यते, तर्हि कथमस्य व्यवहार्यत्वमिति चेत्—कामतो व्यवहार्यस्तु वचनादिह जायते—इत्युक्तेः। अत्र युक्तिर्विज्ञानेश्वरेण प्रदर्शिता "न च पापक्षयाभावे व्यवहार्यत्वमनुपपन्नम्। द्वे हि पापस्य शक्ती—नरकोत्पादिका व्य-

वहारनिरोधिका च। तत्रेतरशक्त्यविनाशेऽपि व्यवहारनिरोधिकायाः शक्तेर्विनाशो नानुपपन्नः। तस्मात्पापानपगमेऽपि व्यवहार्यत्वम् नानुपपन्नम्" इति। तस्मात्पतनीयेऽपतनीये वा कर्मणि कामकृतेऽकामकृते वा प्रायश्चित्ते जीवतः संव्यवहार्यत्वमनुमतं शास्त्रेण। इयमत्र शास्त्रीया व्यवस्था। अपतनीये कर्मणि कामकृतेऽकामकृते वा प्रायश्चित्तेन दुरितक्षयो भवति, संव्यवहार्यता तु पूर्वमेव नापेता; यतस्तस्या अपि सम्भव उच्येत, पतनीये तु पुनरकामकृते प्रायश्चित्तेन संव्यवहार्यता दुरितनिवृत्तिश्च जायेते। कामकृते तु मरणान्तिकप्रायश्चित्तस्यैव विधानान्न संव्यवहार्यता; दुरितनिवृत्तिस्तु भवत्येव; वचनबलात्। फलान्तरम् हि मरणपर्यन्तप्रायश्चित्तस्य न सम्भवति। अतस्तत्र दुरितक्षय एव फलत्वेनाभ्युपगन्तव्यः। तदुक्तमापस्तम्बेन—नास्यास्मिँल्लोके प्रत्यासत्तिर्विद्यते कल्मषन्तु निर्हण्यते—इति। तस्मादायातं कृतप्रायश्चित्तस्य जीवतः संव्यवहार्यतायां नास्ति शास्त्रीयविसम्मतिरिति। यदि पुनर्मरणान्तिकप्रायश्चित्तमन्यथयितुमारम्भस्तर्हि तदनुरोधेन संव्यवहार्यतायामपि दृष्टिर्निपातनीया। तदेतदभिसन्धायैवास्माभिः पूर्वमेव पृथक्तयाऽवस्थापने व्यवस्था समाश्रयणीयेति प्रत्यपादि। अकृतप्रायश्चित्तस्य सद्भिः संव्यवहारो निषिद्ध एव।

प्रायश्चित्तीयतां प्राप्य दैवात्पूर्वकृतेन वा।
न संसर्गं व्रजेत्सद्भिः प्रायश्चित्तेऽकृते द्विजः॥११-४७॥इति।

नहि सर्वस्मिन् कर्मणि प्रायश्चित्तीये प्रायश्चित्तेन संव्यवहार्य एवेत्यपि नोक्तमिति तुल्यः समाधिः। प्रायश्चित्तविधानेऽपि यद्यपि केषाञ्चिद् व्यवहार्यतायां विवादस्तर्हि परिषदेव तन्निर्णेतुमर्हति। प्रायश्चित्ताधीन एव संव्यवहार्यतासंव्यवहा-

यतानियम इति ममाभिप्रायः। प्रायश्चित्तं परिषदुक्तमेवेति ध्रुवमनेन शुद्धो भवति तदनुष्ठाता। परिषदुक्तं व्रतं ज्ञेयं शुद्धये पापकर्मणामिति ह्यभिज्ञा आहुः। एतेन च पतितानपि प्रायश्चित्तैः संशोध्य संव्यवहार्यतां संपाद्य स्वस्वपूर्वतनजातिमतयोः क्रमिकगुरुसंसर्ग व्यवस्थापनपूर्वकप्रवेशमभ्युपेत्य क्रमिकोत्कर्षसम्पिपादयिषासमुत्पन्न्यनुगुणं शास्त्रानुमतमेव प्रस्थानं प्रायोगिकतया प्रचार्यावश्यमनुगृह्णीयाद्धर्मज्ञसमयः। एवमेतन्मततत्त्वप्रकाशकैरुपन्यासैः प्रचारप्रवृत्तिरपि कालानुरोधेन पूर्वाधिकं प्रयोगिकतां प्रापयेत्। ध्रुवमेतादृशैरुपायैः साम्प्रतिकहिन्दुजनसंख्याह्रासः शक्यः समुन्मूलयितुमित्यदसीयोऽभिसन्धिः—इति॥

[उक्तमतसमालोचनम्] अत्रापि प्रबन्धे यस्य प्रायश्चित्तं शास्त्रे विहितम्, तस्य प्रायश्चित्तेन शुद्धिः सम्पादनीयेत्येव विवेचितमिति वयं यथाशास्त्रं शुद्धिसम्पादनं सर्वथाऽनुमन्यामह एव। तथाच व्यवहार्यत्वपक्षमूरीकृत्यापि संवत्सरमध्ये कृतप्रायश्चित्तानामेव पतितानां व्यवहार्यत्वं वर्षचतुष्टयमध्ये तु स्वकर्माधिकारमात्रम्, साधारणसहासनादिसंसर्गमात्रे विंशतिवर्षमध्येऽपि देवलस्मृतिप्रामाण्ये कृतप्रायश्चित्तानां शुद्धिरिति व्यवस्थास्वीकारे न कोऽपि विरोधः शम्भुभट्टशर्मणामपि स्यादिति विश्वसिमः।

[पतितकन्यापौत्रादीनां च न पातित्यं सति प्रायश्चित्ते] अत्रावसरे इदमपि सूच्यते—यत् पतितकन्यानां पतितस्याकृतप्रायश्चित्तत्वेऽपि सर्वथा पतितसम्बन्धत्यागे शुद्धैर्विवाहः प्रायश्चित्तं यदि कन्यया बोधायनोक्तप्रकारेणानुष्ठीयते, तर्हि शास्त्रसम्मत एवेति पश्यन्तो वयमिदमेव मन्यामहे—यत्पतितकन्यापरम्परायाः सर्वथाऽदुष्टत्वं तत्पुत्रपरम्परायामपि पौत्रमारभ्य सर्वथा शुद्धिः सम्भव-

तीति। बौधायनधर्मसूत्रेऽपि हि पतितत्पुत्रयोरेव पतितत्वमुक्तम्, न तु पौत्रादेरिति कृतप्रायश्चित्तस्य पौत्रस्य तत्परम्परायाश्च सर्वथा पूर्वजातिप्रवेशः सम्भवतीति पञ्चमादिपरम्परापर्यन्तमपि प्रतीक्षणं न कर्तव्यमिति पञ्चमे सप्तमे वापीति वचनोपन्यासोऽत्रानपेक्षित एव। नहि वयमपि पतितसन्तानं सर्वमपि कृतेऽपि प्रायश्चित्ते पृथक्तयैव स्थापनीयमिति वदामः, येन हिन्दुजनसंख्याह्रासः कृतप्रायश्चित्तानामप्यव्यवहार्यत्वेऽपि न परिहरणीयः। न हीदृशी व्यवस्था शास्त्रसम्मता समाद्रियते चेत् समुदायस्यापि हानिर्भविष्यति। अत्र प्रसङ्गे इदमपि सूच्यते—यत् पौत्रेणापि यदि प्रायश्चित्तं न कृतम्, स्वपित्रादिभिः साकमेवावस्थितम्, तर्हि तु पौत्रस्य तत्परम्परायाश्च न कथमपि स्वपूर्वजातिप्रवेशः सम्भवति। इदमेवाभिप्रेत्यापस्तम्बेनाप्युक्तम्—यस्य प्रपितामहादि नानुस्मर्यत—इत्यादि।

उक्तार्थस्य निष्कर्षः

तदयं निष्कर्षः—यथा पितुः पितामहस्य च व्रात्यत्वेऽपि प्रपितामहस्याव्रात्यत्वे पौत्रस्योपनयनादिनाऽव्रात्यत्वमेवं पितुः पितामहस्य च पतितत्वेऽपि प्रपितामहस्यापतितत्वे पौत्रस्य प्रायश्चित्तादिना प्रपितामहजातिप्राप्तिरिति। इयान् विशेषः—व्रात्यसंस्कारो व्रात्यस्य स्वस्य स्वपुत्रस्य स्वपौत्रस्य च सम्भवति, तेन च सर्वेषां कृतसंस्काराणां स्वस्वजातिप्रवेशः सम्भवति, पतितप्रायश्चित्तेन स्वपूर्वतनजातिप्रवेशस्तु पौत्रस्यैवेति। अनयापि हि व्यवस्थया हिन्दूनां संख्याह्रासपरिहारो भवितुमर्हत्येवेति व्यर्थमत्र पतितत्पुत्रयोरपि स्वजातिप्रवेशकल्पनम्। अन्यथा हि पातित्येऽपि सर्वेषां न भीतिः स्यादित्युक्तव्यवस्थाकल्पनमत्यन्तमपेक्षितमेव। विवाहसम्बन्धस्य स्वपुत्रादेः कृतप्राय-

श्चित्तत्वे तज्जातीयकन्ययाऽकृतप्रायश्चित्तत्वे तज्जातीयकन्ययेति व्यवस्थोरीकर्तव्या। अत्र प्रसङ्गे इदमपि सूच्यते—यत् कियत्परम्परामारभ्य पातित्यमित्यादि निर्णयोऽपि हि परिषदैव हि साक्ष्यादिग्रहणेन सम्पादनीयः, न तु स्वयमेव सर्वैरिति न काऽप्यव्यवस्था भविष्यतीति पश्यामः। यथाच 'कामतो व्यवहार्यस्तु इत्यत्र व्यवहार्यस्त्विति पक्षेऽपि कृतप्रायश्चित्तानामिदानीमव्यवहार्यत्वमेव "संसर्गः शोधितैरपीति वचनानुसारेण सम्भवति, तथा पूर्वमेव विवेचितमिति न कोऽपि विरोध इत्यलमतिविस्तरेणेति दिक्।

अत्रावसरे लवपुरीयप्राच्यविद्यालयप्रधानाध्यापक महामहोपाध्यायश्रीशिवदत्तपण्डितानां प्रबन्धं यथावदत्र सङ्गृह्य तत्समालोचनार्थं प्रयतामहे। तद्यथा—

[म० म० शिवदत्तपण्डितानां व्यवस्था]

अथेदानीन्तनाः केचन जनाः प्रागतीव बलवद्भिर्भारतवर्षीयधर्माध्वविध्वंसनाय कृतावतारैरिव म्लेच्छापसदैरकारणं बलादेव स्वकीयान्नभोजनेन स्वकन्यादिसम्बन्धविधानेन चैवंविधेनान्येनापि सद्यः पातित्यहेतुना स्वैः साकं शयनाशनपानादिव्यवहारप्रवर्तनेनावशतया स्वधर्मात्प्रच्यावितानां तदात्वे तन्निर्देशातिक्रमे सद्य एव सकलस्वान्वयनाशं निश्चित्य कालान्तरसमुचितप्रायश्चित्ताचरणेन गुरुतरदुरितनिष्कृतिसम्भावनया तथाविधायां गरीयस्यामापदि प्राणत्राणमेव परमं धर्मं मन्यमानानां चिरं तेषां बलीयस्तया तेभ्यः स्वात्मानं मोचयितुमवकाशमलब्ध्वा पुत्रपौत्रादिपारम्पर्येण तथैवावस्थितानां तत एव च म्लेच्छीभूतानां विप्रक्षत्रियविट्छूद्राणां कुलेषु प्रसूताः, म्लेच्छा वा स्वां नास्तिकतां विविधरौरवादिनिरयसाधनतया कुतश्चिदपि प्राग्भवीय-

सुकृतलेशपरिपाकोदितेन शिष्टवाक्यादिना दृढमवधार्य भृशमनुशयानाश्चेत् प्रणिपातमात्रपरितुष्टेभ्यो दीनजनानुकम्पया तदुद्धारायैव भगवता विधिना सृष्टेभ्यः स्वप्रार्थनाञ्जलिशताकृष्टेभ्यः शिष्टेभ्यः कथञ्चिदपि साध्वनुष्ठितेन प्रायश्चित्तादिना नरकतरणोपायं स्वोचितनिगमानुमतदेवतासमाराधनाद्युपदेशं च वारं वारं प्रणिपत्य प्रार्थयेरन्, तर्हि ते कथञ्चिदपि नास्तिक्यतो मुक्तिं स्वोचिताचारांश्चोपदेष्टुमर्हा न वा ? अर्हाश्चेत्कीदृशं प्रायश्चित्तं जन्मतः प्रभृत्याश्रितनास्तिक्यदोषमोषकम्, केच तदुचिता आचारा इति विमृश्यते ।

[प्रायश्चित्तेन स्ववर्णोचितधर्मानुष्ठानाधिकारः]

तत्र येषां चातुर्वर्णिकानां प्राप्तस्वोचितसंस्काराणां बलात्स्वेच्छया वा म्लेच्छादिहीनजातिभिः संसर्गो नास्तिक्याद्याश्रयणञ्च तेषां मनुयाज्ञवल्क्याद्युक्तप्रायश्चित्तैस्तत्संसर्गनास्तिक्यजपापविनाशेन पुनः स्वस्ववर्णोचितधर्मप्राप्तिस्तु स्पष्टैव । अयन्तु विशेषः—तेषां संसर्गकालतारतम्यपर्यालोचनया लघुलघीयोगुरुगरीयःप्रायश्चित्तप्राप्तिः । नास्तिक्यस्य तु वेदादिप्रामाण्याविश्वासरूपस्य 'नास्तिक्यं व्रतलोपश्च' इत्युपपातकप्रकरणे पाठेन—

उपपातकशुद्धिः स्यादेवं चान्द्रायणेन वा
पयसा वापि मासेन पराकेणाथवा पुनः ॥

इत्युक्तेषु प्रायश्चित्तेष्वन्यतमेन पापानुरूपेणोपदिष्टेन निष्कृतिः । येषां स्वकृतसंस्काराणामेव तैः संसर्गो नास्तिक्याश्रयणञ्च, तेषामापदाऽप्राप्तसंस्काराणाम्—

इत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः ।
सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः ॥

इति मनूक्त रापद्यपि व्रात्यत्वस्याऽपरिहार्यतया—

अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः
सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः ॥

इति विप्रक्षत्रियविशां क्रमेण षोडश द्वाविंशति चतुर्विंशतिसंवत्सराभ्यन्तरेऽनुपनीतानां व्रात्यतायाः पर्युदासमुखेन व्रात्यस्तोमरूपप्रायश्चित्तापनोद्यत्वोक्तेः, तेन नास्तिक्यप्रायश्चित्तेन च नष्टपापानामस्त्येवोपनयनपूर्वकं स्वस्वधर्मप्राप्तिः ।

[शूद्रविषयेऽव्यवस्था] शूद्राणान्तु सावित्रीप्राप्तेरेवाभावेन तदभावप्रयोज्यत्वस्यैव व्रात्यत्वे प्रागुक्तवचनतो लाभाद् व्रात्यत्वप्रयुक्तप्रायश्चित्ताप्रात्तावप्यव्यवहार्यम्लेच्छादिस्पृष्टान्नभोजनादिमात्रप्रयुक्तप्रायश्चित्तस्य दिनगणनया कल्पितात्रृत्त्या, नास्तिक्यस्य च चातुर्वर्णिकैः सर्वैरपि परिहार्यतया तदाश्रयणप्रयुक्तपापनाशकप्रायश्चित्तस्याचरणेन च स्वोचितधर्मप्राप्तिरुचितैव ।

व्रात्यप्रायश्चित्तव्यवस्था

त्रैवर्णिकानां पञ्चदशवर्षाधिककालं गौणकालादूर्ध्वमापद्यनुपनीतानां कञ्चित्कालमपि वाऽनापद्यनुपनीतानां "पतितसावित्रीक उद्दालकव्रतं चरेत्, द्वौ मासौ यावकेन वर्तयेत्, मासं पयसा, मासमामिक्षयाऽष्टरात्रं घृतेन, षड्रात्रमयाचितेन, त्रिरात्रमब्भक्षोऽहोरात्रमुपवसेत्, अश्वमेधावभृथं गच्छेत्, व्रात्यस्तोमेन वा यजेत्" इति मिताक्षरोद्धृतवसिष्ठवचनेनोद्दालकव्रतव्रात्यस्तोमयोरन्यतरन्मनूक्तं त्रैमासिकञ्च क्रमेण कृतवतामुपनेयता मिताक्षरादौ स्पष्टैव ।

येषान्तु पिता पितृपितामहौ पितृपितामहप्रपितामहाश्चानुपनीताः, सवर्णास्वेव च व्रात्यजासु पुत्रानुत्पादितवन्तस्ते भृज्जकण्टकादिसंज्ञकाः । तदुक्तं मनुना—

व्रात्यात्तु जायते विप्रात्पापात्मा भृज्जकण्टकः ।
आवन्त्यवाटधानौ च पुष्पशेखर एव च ॥
विप्रायां जायते व्रात्यविप्रजो भृज्जकण्टकः ॥

इति । अत्रेयं व्यवस्था—आवन्त्याद्यास्तस्यैव संज्ञा इति मेधातिथिः । अन्ये तु भृज्जकण्टकाद्विप्रायामावन्त्यः, तस्मात्तस्यां वाटधानः, तस्माच्च तस्यां पुष्पशेखरः । एवं व्रात्यक्षत्रियात्क्षत्रियायाम्—झल्लो मल्लश्च राजन्याद्व्रात्याल्लिच्छिविरेव च ।
नटश्च करणश्चैव खशो द्रविड एव च ॥

इति झल्लादयः ।
वैश्यात्तु जायते व्रात्यात्सुधन्वाचार्य एव च
कारूषश्च विजन्मा च मैत्रः सात्वत एव च ॥

इति सुधन्वादयो वैश्यजा एव। इदं च शूद्रकमलाकरे स्पष्टम् । एषाञ्च व्रात्यत्वेऽपि विप्रत्वादिकं न हीयते । विप्रत्वादेर्जातिरूपतया विप्रजातीयपुरुषाद्विप्रजातीयकन्यायामुत्पन्नापत्यमात्रस्य विप्रत्वात् ; तत्र चादुष्टत्वस्याप्रयोजकत्वात् । अतश्च विप्रत्वादेरनपगमात् "अतिक्रान्ते तु सावित्र्याः काल ऋतुं त्रैविद्यकं ब्रह्मचर्यं चरेत्, अथोपनयनम्, ततः संवत्सरमुदकोपस्पर्शनमथाध्याप्यः, यस्य पिता पितामह इत्यनुपनीतौ स्यातां ते ब्रह्महसंस्तुताः तेषां गमनं भोजनं विवाहमिति वर्जयेत् । तेषामिच्छतां प्रायश्चित्तं यथा—प्रथमेऽतिक्रम ऋतुरेवं संवत्सरोऽथोपनयनम्, तत उदकोपस्पर्शनम् । प्रतिपुरुषं संख्याया संवत्सरान् यावन्तोऽनुपनीताः स्युः, सप्तभिः पावमानीभिर्यदन्ति यच्च दूरक इत्येताभिर्यजुःपवित्रेण सामपवित्रेणाङ्गिरसेनेत्यपि वा व्याहृतिभिरेवमथाध्याप्योऽथ यस्य प्रपितामहादीनां नानुस्मर्यत उपनयनं ते श्मशानसंस्तुताः, तेषामभ्यागमं

भोजनं विवाहमिति वर्जयेत्, तेषामिच्छतां प्रायश्चित्तं द्वादशवर्षाणि त्रैविद्यं ब्रह्मचर्यं चरेदथोपनयनम्। तत उदकोपस्पर्शनं पावमान्यादिभिरथ गृहमेधेनाध्यापनम्। ततोऽभिनिवर्तते, तस्य यथा प्रथमेऽतिक्रमे तत ऊर्ध्वं प्रकृतिवत्" इति प्रायश्चित्तमयूखप्रायश्चित्तोद्योतप्रायश्चित्तमुक्तावल्यादिबहुतरप्राचीनमान्यनिबन्धधृतापस्तम्बवचनानुसारिप्रायश्चित्ताचरणेन निर्णीतपातकानामुपनयनपूर्वकस्वस्ववर्णोचितधर्मप्राप्तिरस्त्येव।

शूद्राणान्तु पूर्ववदेव ; तेषां व्रात्यत्वप्रयुक्तस्य पापविशेषस्याभावात्। अतः परञ्च वृद्धप्रपितामहमारभ्य येषां जनकानामुपनयनाभावस्तेषां सवर्णास्वेवोत्पादितापत्यानामपि न प्रायश्चित्तस्य गुरुतरस्याप्याचरणेनोपनयनप्रभृतिवैदिकसंस्कारयोग्यता। आपस्तम्बेन चतुर्थपुरुषादध्येव व्रात्यत्वे प्रायश्चित्ताभिधानात्।

न चापस्तम्बेन "यस्य प्रपितामहादीनां नानुस्मर्यत उपनयनम्" इत्युपक्रम्य प्रायश्चित्ताभिधानात् तत्र चादिग्रहणेन ततः प्राचामप्यनुपनीतत्वे प्रायश्चित्तेन व्रात्यत्वनाशो युक्त एवेति वाच्यम्; उक्तवचनं व्याचक्षाणेन भाष्यकृता हरदत्तेन—प्रपितामहादि प्रपितामहादारभ्य प्रपितामहः पितामहः पिता स्वयञ्च यथाकालमिति ते तथाविधाः समाणवकाः श्मशानतुल्याः—इत्यादि व्याख्याय—यस्य तु प्रपितामहस्य पितुरारभ्य नानुस्मर्यते उपनयनं तत्र प्रायश्चित्तं नोक्तम्—इत्युपसंहारात्, परन्त्वेतेषां सवर्णाजत्वेन प्रागुक्तरीत्या विप्रत्वाद्यनपायाच्छूद्रापेक्षयोत्कृष्टत्वमस्तीति युक्तम्। किञ्चैषामध्ययनाद्योपनयप्राप्त्यभावेऽपि

उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम्
वेदमध्यापयेच्चैनं शौचाचारांश्च शिक्षयेत्॥

इति वचनेन शौचाचारशिक्षणस्याप्युपनयनाङ्गितायाः सिद्धेस्तदङ्गोपनयनप्राप्तिरस्त्येव। तच्च स्वसमीपप्रापणमात्ररूपमिति बोध्यम्। नच—निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः।

तस्य शास्त्रेऽधिकारोऽस्मिन् ज्ञेयो नान्यस्य कस्यचित्॥

इति मनुना समन्त्रकश्मशानान्तविधिमतामेव शास्त्रोक्तानुष्ठानाधिकारो बोधितः। व्रात्यजानां पुनः संकरजातीयप्रकरणमध्ये पाठात्तत्समानधर्मत्वप्रतिपादेन तात्पर्यावगमात्, तेषाञ्च—शूद्राणान्तु सधर्माणः सर्वेऽपध्वंसजाः स्मृताः—इत्यनेन शूद्रधर्मत्वबोधनात्, "स्त्रीशूद्राणाममन्त्रकम्" इति वचनेन तेषां मन्त्राधिकाराभावबोधनात्, कथमुपनयनपूर्वकशौचाचारशिक्षणप्राप्तिरिति वाच्यम्; निषेकादिवाक्ये मन्त्रपदेन नाममन्त्रस्यापि ग्रहणात्।

द्विजानां षोडशैव स्युः शूद्रस्य द्वादशैव हि
पञ्चैव मिश्रजातीनां संस्काराः कुलधर्मतः॥
वेदव्रतोपनयनमहानाम्नी महाव्रतम्
विना द्वादश शूद्राणां संस्कारा नाममन्त्रतः॥

इति शूद्रकमलाकरधृतवचनेन तेषां नाममन्त्राधिकारित्वबोधनात्। अत्र चोपनयनशब्देनाध्ययनाङ्गोपनयनमेव विवक्षितम्; पूर्वोत्तरसाहचर्यात्। अत एव महामहोपाध्यायनागाभट्टकृतनिबन्धे व्रात्यादीनां शौचाचारशिक्षणाङ्गोपनयनप्राप्त्युक्तिः संगच्छते। तत्र निषेकादिवचनेन शास्त्रोक्तसकलधर्माधिकारस्यैव नियमाच्च। विप्रस्याप्यापत्तारतम्येन हीनजातिधर्माश्रयणस्याभिधानात्। अत एव—

देशधर्माञ्जातिधर्मान् कुलधर्मांश्च शाश्वतान्
पाषण्डगणधर्मांश्च शास्त्रेऽस्मिन्नुक्तवान्मनुः॥

इति संगच्छते। अन्यथा पाषण्डानां मन्त्रपूर्वकसंस्काराभावे-

नोपक्रमविरोधः स्पष्ट एव। 'स्त्रीशूद्राणाममन्त्रकम्' इत्यस्य च वैदिकमन्त्ररहितमित्यर्थेन विरोधाभावात् शास्त्रेऽधिकार इत्यनेन शास्त्राध्यापनाधिकारस्य विवक्षणे दोषलेशस्याप्यभावाच्च। अतश्च तेषां प्रपितामहप्राक्कालप्रभृत्यनुपनीतानां व्रात्यत्वानपगमेऽपि शूद्रसमानधर्मतया नास्तिक्यम्लेच्छसंसर्गपरिहारपूर्वकमुचितप्रायश्चित्तेन शूद्राणामस्ति प्रागुक्तद्वादशसंस्कारप्राप्तिः। येषां पुनश्चातुर्वर्णिकत्वनिश्चयोऽपि नास्ति चिरं म्लेच्छादिभिः संसर्गात्,तेषामप्यस्ति पश्चात्तप्यमानानां नास्तिक्यपरिहारपूर्वकमास्तिक्याश्रयणेन भक्तिशास्त्राद्यधिकारोऽहिंसादिसामान्यधर्मप्राप्तिश्च। तथाहि—'आनिन्द्ययोन्यधिक्रियते पारम्पर्यात् सामान्यवत्' इतिभक्तिसूत्रे द्वितीयाध्याये द्वितीयाह्निकेऽष्टसप्ततितमं सूत्रम्। अस्य चार्थो भाष्यकृता स्वप्नेश्वरेणैवं विवृतः—निन्दितचाण्डालादियोनिपर्यन्तं भक्तावधिक्रियते संसारदुःखजिहासाया अविशेषात्। अथ वेदाध्ययनानधिकारात् कथमत्रैवर्णिकानां स इति चेत्तत्राह—पारम्पर्यादिति। चोदनालक्षणोऽर्थो धर्मः, शास्त्रयोनित्वात्, इति न्यायादलौकिकोऽर्थः श्रुत्येकसमधिगम्य इत्यत्र न विप्रतिपद्यामहे, किन्तु स्त्रीशूद्रादीनामितिहासपुराणादिद्वारा चाण्डालादीनाञ्च स्मृत्याचारवदुपदेशपारम्पर्येण ज्ञानमपि श्रुतिमूलमेव भवति। यथा तेषां सामान्याहिंसाधर्मादिज्ञानम्, अन्यथा तदसिद्धिप्रसङ्गादिति॥ अनेन च सूत्रभाष्यसन्दर्भेण स्पष्ट एव मनुष्यमात्रस्य भक्तिशास्त्राधिकारः। एवं प्रत्यभिज्ञाशास्त्रेऽपि-जनस्य इत्युक्त्या-जन्ममरणप्रयुक्तक्लेशजिहासावतः प्राणिमात्रस्य—इत्युक्तेस्तत्राप्यधिकारः। तथा—

शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः।

वृषलत्वं गता लोके ब्राह्मणादर्शनेन च ॥
पौण्ड्रकाश्चौण्ड्रद्रविडा काम्बोजा यवनाः शकाः ।
पारदाः पल्हवाश्चीनाः किराता दरदाः खशाः ॥
मुखबाहूरुपज्जानां या लोके जातयो बहिः ।
म्लेच्छवाचश्चार्यवाचः सर्वे ते दस्यवः स्मृताः ॥

इति मनुना दस्युशब्देन व्यवहृतानां व्रात्यक्षत्रियादीनां धर्मे व्यवस्थापनं कथं स्यादिति राजधर्मेषु पञ्चषष्टितमाध्याये—

यवनाः किराता गान्धाराश्चीनाः शबरबर्बराः ।
शकास्तुषाराः कङ्काश्च पल्हवाश्चान्ध्रमद्रकाः ॥
पौण्ड्राः पुलिन्दा रमठाः काम्बोजाश्चैव सर्वशः ।
ब्रह्मक्षत्रप्रसूताश्च वैश्याः शूद्राश्च मानवाः ॥
कथं धर्मांश्चरिष्यन्ति सर्वे विषयवासिनः ।
मद्विधैश्च कथं स्थाप्याः सर्वे ते दस्युजीविनः ॥
एतदिच्छाम्यहं श्रोतुं भगवंस्तद् ब्रवीहि मे ।
त्वं बन्धुभूतो ह्यस्माकं क्षत्रियाणां सुरेश्वर ॥

इति मान्धातुरिन्द्रं प्रति प्रश्ने—

मातापित्रोर्हि शुश्रूषा कर्तव्या सर्वदस्युभिः ।
आचार्यगुरुशुश्रूषा तथैवाश्रमवासिनाम् ॥
भूमिपानाञ्च शुश्रूषा कर्तव्या सर्वदस्युभिः ।
वेदधर्मक्रियाश्चैव तेषां धर्मो विधीयते ॥
पितृयज्ञास्तथा कूपाः प्रपाश्च शयनानि च ।
दानानि यु यथाकालं द्विजेभ्यो विसृजेत्सदा ॥
अहिंसा सत्यमक्रोधो वृत्तिदायानुपालनम् ।
भरणं पुत्रदाराणां शौचमद्रोह एव च ॥

दक्षिणा सर्वयज्ञानां दातव्या भूतिमिच्छता ।
पाकयज्ञा महार्हाश्च दातव्याः सर्वदस्युभिः ॥
एतान्येवंप्रकाराणि विहितानि पुराऽनघ ।
सर्वलोकस्य कर्माणि कर्तव्यानीह पार्थिव ॥

❀ इतीन्द्रस्योत्तरेण मातापितृशुश्रूषादेर्लिङ्तव्याभ्यां विधानादिमे धर्मा इति स्पष्टमेव । तत्र—

उपनीय तु यः शिष्यं वेदमध्यापयेद् बुधः ।
साङ्गञ्च सरहस्यञ्च तमाचार्यं प्रचक्षते ॥

[कृतप्रायश्चित्तानां केषां चनः राममन्त्रादिमात्राधिकारः]

इति लक्षितस्य वेदाध्यापकस्याचार्यस्यासम्भवेऽपि उपनयनपूर्वकशौचाचारशिक्षणकर्तैवाचार्यपदेनाभिधीयते । एवं गुरुपदेनापि—

निषेकादीनि कर्माणि यः करोति यथाविधि ।
सम्भावयति चान्नेन स विप्रो गुरुरुच्यते ॥

इति पारिभाषिकस्य गुरोरसम्भवेऽपि—

गुशब्दस्त्वन्धकारः स्याद् रुशब्दस्तन्निरोधकः ।
अन्धकारविरोधित्वाद् गुरुरित्यभिधीयते ॥

इति लक्षितो योग्यमन्त्रादिदानेन निरयरूपान्धकारनिवर्तको गुरुरिह गृह्यते । नचैषां कस्मिन्नपि मन्त्रे नाधिकार इति वाच्यम् ; अगस्त्यसंहितायाम्—

शुचिव्रततमाः शूद्रा धार्मिका द्विजसेवकाः ।
स्त्रियः पतिव्रताश्चान्ये प्रतिलोमानुलोमजाः ॥
लोकाश्चाण्डालपर्यन्तं सर्वेऽप्यत्राधिकारिणः ।

इत्यादिना राममन्त्रे मनुष्यमात्रस्याधिकारबोधनात् ।

तथा—श्रुतिर्ब्रह्मा हि षड्वर्णा स्मृतिर्वर्णद्वयात्मकम् ॥

षड्वर्णं ब्राह्मणादीनां त्रयाणां यद् द्विवर्णकम् ॥
तदन्येषां देशिकेन वक्तव्यं तारकं परम् ।

इत्यनेन त्रैवर्णिकानां 'ॐ रामाय नमः' इति षड्वर्णे पूर्ववाक्यैकवाक्यतया तदन्येषां सर्वेषामपि मनुष्याणां रामनाममन्त्राऽधिकारावगमाच्च । एवं ब्रह्मोत्तरखण्डे शिवपञ्चाक्षरं प्रक्रम्य—

महापातकदावाग्निः सोऽयं मन्त्रः षडक्षरः ।
प्रणवेन विना मन्त्रः सोऽयं पञ्चाक्षरो मतः ॥
स्त्रीभिः शूद्रैश्च संकीर्णैर्धार्यस्स मुक्तिकांक्षिभिः ।
नास्य दीक्षा न होमश्च न संस्कारो न तर्पणम् ॥
न कालनियमाश्चात्र जप्यः सर्वैरयं मनुः ।
वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवैः ॥

इत्यनेन शिवपञ्चाक्षरमन्त्रे म्लेच्छादीनामप्यधिकारस्य विस्पष्टमवगतेश्च । 'वेदधर्मक्रिया' इत्यनेन वेदमूलकस्मृत्याद्युक्तशिवविष्ण्वादिभक्तिसमाश्रमणमुच्यते ।

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥

इति भगवद्गीतासु भगवता स्वसमाश्रयणाभिधानात् । अत एव स्कन्दपुराणेऽपि—

विष्णुभक्तिसमायुक्तो मिथ्याचारोऽप्यनाश्रमी ।
पुनाति सकलांल्लोकान् सहस्रांशुरिवोदितः ॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा यदि वेतरः ।
विष्णुभक्तिसमायुक्तो ज्ञेयः सर्वोत्तमोत्तमः ॥
दुराचारोऽपि सर्वाशी कृतघ्नो नास्तिकः पुरा ।

समाश्रयेदादिदेवं श्रद्धया शरणं हि यः ॥
निर्दोषं विद्धि तं जन्तुं प्रभावात्परमात्मनः ।
इति पठ्यते । एवं देवीपुराणे—
वर्णाश्रमविभागेन देवाः स्थाप्यास्तु नान्यथा ।
ब्रह्मा तु ब्राह्मणैः स्थाप्यो गायत्रीसहितः प्रभुः ॥
चतुर्वर्णैस्तथा विष्णुः प्रतिष्ठाप्यः सुखार्थिभिः ।
भैरवोऽपि चतुर्वर्णैरन्त्यजानां तथा मतः ॥
किरातहूणान्ध्रपुलिन्दपुल्कसाः ।
आभीरकङ्का यवनाः खशादयः ॥

इति वचनेनान्त्यजादीनामपि भैरवप्रतिष्ठाधिकारः स्पष्टमुच्यते । भगवद्भक्तेः सर्वमानुषेष्वनुमतत्वादेव च—

येऽन्ये च पापा यदुपाश्रयाश्रयाः ।
शुध्यन्ति तस्मै प्रभविष्णवे नमः ॥

इति भागवते (८ । ४ । १८) सर्वेषां भगवद्भक्तया शुध्यभिधानं सङ्गच्छते । राममन्त्रपञ्चाक्षरमन्त्रयोः सर्वेषामधिकारः प्राङ् निरूपित एव । पितृयज्ञादयश्च नास्तिक्यम्लेच्छसंसर्गपरिहारपूर्वकमुचितप्रायश्चित्तानुष्ठानेन शुद्धानां शूद्रकमलाकरोक्तप्रयोगानुसारिणः प्राप्नुवन्ति; तेषां शूद्रधर्मत्वात् । एवं चोपपादितसन्दर्भेण मूलतो म्लेच्छादीनामपि स्वनास्तिक्यादित्यागपूर्वकराममन्त्राद्यधिकारः सिध्यति, किम्पुनर्बलान्म्लेच्छीकृतानाम् । माभून्नाम चिरकालनास्तिकम्लेच्छसंसर्गादनिश्चीयमानस्वस्वजातिकानां प्रायश्चित्तादिभिः सद्य एव वर्णाश्रमान्तर्गतत्वम् । साक्षात्परम्परया वा मुक्तिसाधनतया सकलसंसारदावदाहशमकं भगवद्भक्त्याश्रयणन्तु कथं निवार्यताम् ? किञ्च—

श्रद्दधानः शुभां विद्यामाददीतावरादपि ।
अन्त्यादपि परं धर्मं स्त्रीरत्नं दुष्कुलादपि ॥

इति वदता मनुना नीचादपि समीचीनधर्मग्रहणमनुमतम् । तेन दण्डापूपिकन्यायेनैव श्रेष्ठात्स्वोचितधर्मप्राप्तिर्नीचानामपि सिद्ध्यति ।

गार्भैर्होमैर्जातकर्मचौलमौञ्जीनिबन्धनैः ।
बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते ॥

इति वचनेनाभक्ष्यभक्षणजनितत्वादिनिषिद्धकालगमनादिवत् प्रायश्चित्ततारतम्येन क्रमायातदोषाणामपि नाशस्योपलक्षणविधया बोधनाच्च । अत एव पातकविशेषेण पतितानामपि पुनः संस्कारविधानमुपपद्यते । तेन पातकेन ब्राह्मणत्वादेर्नाशे हि संस्कारविध्युद्देश्यतावच्छेदकस्याभावेन तद्विधानानुपपत्तिः । किञ्च मलादिभिश्चिरसंसृष्टस्यापि सुवर्णस्य संस्कारसंख्यातारतम्येन शुद्धितारतम्यदर्शनात्पापानामपि प्रायश्चित्ततारतम्येन शुद्धितारतम्यस्य यौक्तिकतयाऽनिर्दिष्टपापानामपि सकलपापत्यागपूर्वकं चातुर्वर्ण्यकत्वाद्यसिद्धावपि शुद्धिसोपानारोहाधिकारो युक्त एव । अत एव—

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
एकरात्रोपवासश्च श्वपाकमपि शोधयेत् ॥

इति हारीतेनोक्तम् । यद्यपि नेदं स्वार्थे तात्पर्यवत्; अपिघटितत्वात्, तथापि शुद्धिः सर्वेषामपि भवत्युचितप्रायश्चित्तैरित्युपलक्षणविधया बोधयत्येव । एतेन—नहि शतशो ध्मायमानोऽपि लोहः सुवर्णं भवति, एवं म्लेच्छीभूतानां न कथमपि प्रायश्चित्तैः पापनाशः—इति प्रत्युक्तम् । सद्यस्तद्भावेऽपि क्रमेण चातुर्वर्ण्यकधर्मयोग्यतासम्भवेनैव प्रकृतार्थसिद्धेः । म्लेच्छीभूतानामपि ब्रा-

ह्मणत्वाद्यनपगमस्याधस्तादुपपादनेन दृष्टान्तदार्ष्टान्तिकयोर्वैषम्याच्च। अत एव भविष्ये रहस्यप्रसङ्गे—

तथा दद्याद्विधानेन द्विजाय मधुसर्पिषी।
तारयत्यखिलान् पूर्वानात्मानं च नराधिप॥
गोभिश्चतसृभिर्युक्तं तथा भूमिसमन्वितम्।
प्रतिग्रहसमर्थाय विदुषे त्वाहिताग्नये॥
दत्त्वाऽजिनन्तु कार्तिक्यां वैशाख्यां वा विशेषतः।
विषुवत्ययने चैव ग्रहणे चन्द्रसूर्ययोः॥
कृच्छ्रात्तु तमसो घोरान्मुच्यते सर्वतोभयात्।
अतीतान् सप्तपुरुषांस्तथा चान्याननागतान्॥
उद्धृत्य स नरो याति ब्रह्मलोकं सनातनम्।

इत्यादिनाऽतीतसकलस्ववंशोयानामात्मनश्च तारणाभिधानं दृश्यते। एवम्—

एकादशगुणान्वापि रुद्रानावर्त्य धर्मवित्॥
महापापैरुपस्पृष्टो मुच्यते नात्र संशयः।
इत्यङ्गिरोवचनम्। एवं तीर्थप्रत्याम्नाये विष्णुपुराणम्—
ज्ञानतोऽज्ञानतो वापि भक्त्याऽभक्त्यापि वा कृतम्।
गङ्गास्नानं सर्वविधं सर्वपापप्रणाशनम्॥
चान्द्रायणसहस्रैस्तु यश्चरेत्कायशोधनम्।
पिबेद्यश्चापि गङ्गाम्भः समौ स्यातां न वा समौ॥
भवन्ति निर्विषाः सर्पा यथा तार्क्ष्यस्य दर्शनात्।
गङ्गाया दर्शनात्तद्वत्सर्वपापैः प्रमुच्यते॥
पुण्यक्षेत्राभिगमनं सर्वपापप्रणाशनम्।
देवताभ्यर्चनं पुंसामशेषाघविनाशनम्॥

इति । भविष्येऽपि—

स्नानमात्रेण गङ्गायाः पापं ब्रह्मवधोद्भवम् ।
दुराधर्षं कथं याति चिन्तयेद्यो वदेदपि ॥
तस्याहं प्रवदे पापं ब्रह्मकोटिवधोद्भवम् ।
स्तुतिवादमिमं मत्वा कुम्भीपाकेषु जायते ॥
आकल्पं नरकं भुक्त्वा ततो जायेत गर्दभः ।

इत्यादिवचनैः श्रीगङ्गातीर्थस्नानादेः सकलपापनाशकता सिद्ध्यति । एवं बृहन्नारदीये सर्वसाधारणप्रायश्चित्ता न प्रोक्तानि ।

प्रायश्चित्तानि यः कुर्यान्नारायणपराङ्मुखः ।
तस्य पापानि नश्यन्ति अन्यथा पतितो भवेत् ॥
यस्तु रागादिनिर्मुक्तो ह्यनुतापसमन्वितः ।
सर्वभूतदयायुक्तो विष्णुस्मरणतत्परः ॥
महापातकयुक्तो वा युक्तो वाऽप्युपपातकैः ।
सर्वैः प्रमुच्यते सद्यो यतो विष्णुरतं मनः ॥

इत्यादिना विष्णुभक्तस्य नरमात्रस्य सकलपापनाशोऽभिहितः । इत्थञ्च बहुत्र प्रायश्चित्तविधायकवचनेषु नर इति सामान्यपदोपादानादुदाहृतवचनैर्म्लेच्छादीनामपि भगवद्भक्त्यधिकारसिद्धेश्च सर्वेषामपि स्वाधिकारस्वयोग्यतानुसारेण वैदिककर्ममार्गोन्मुखत्वं निराबाधं सिद्ध्यति । इत्थञ्च त्रिपुरुषावधिनिश्चितसवर्णोत्पत्तिकानां कामतोऽकामतो वा म्लेच्छैः संसृष्टानां प्रायश्चित्ताचरणेन पुनः स्वस्ववर्णान्तर्गतत्वपूर्वकधर्मप्राप्तिः, तदन्येषामपि व्रात्यतमानां मूलतो म्लेच्छादीनां वा सत्यामिच्छायां नास्तिक्यत्यागेन भक्तिशास्त्रप्रत्यभिज्ञाशास्त्ररामनन्त्राद्युपदेश्यताधिकारः शूद्रकमलाकरोक्तसंस्कारादिप्राप्तिश्च सिद्ध्यतीत्यत्र न कस्यचित्कथावसर इति

सकलश्रुतिस्मृतिपुराणेतिहासपर्यालोचननिर्गलितो विमर्शो निष्पक्षपातधीभिः सुधीभिर्निपुणं विचारणीय इति दिक्।

इत्युपदर्शितव्यवस्थानुसारेण निर्गलितोऽर्थः—

आर्यत्वाविर्भावेच्छायां पूर्वं मनस्तापस्ततः, ततो म्लेच्छत्वाभिमानजिहासा, ततो म्लेच्छत्वापवादाभिमानजिहासा, प्रायश्चित्तचिकीर्षया श्रुतिस्मृतिपुराणवाक्येषु विश्वासपूर्वकं प्रायश्चित्तोपदेष्टृवाक्येऽतीव विश्वासेन प्रायश्चित्तोपदेष्टृणामुपासना, ततश्च तदुपदिष्टानां मनस्तापोपवासगङ्गास्नानपूर्वकं भक्तिशास्त्रप्रदर्शित रामकृष्ण-शिवमन्त्राणां दीक्षया सम्भवत्येव म्लेच्छत्वमजापाकृत्या स्वस्वनिष्ठार्यत्वजात्याविर्भावः" इति।

[उक्तव्यवस्थासमालोचनम्]

अत्र हि म्लेच्छैर्बलात्कारेण स्वमतं प्रवेशितानां स्वीयान्नभोजनेन स्वकन्यासम्बन्धविधानेन चैवंविधेनाऽन्येनापि सद्यःपातित्यहेतुना स्वैः साकं शयनाशनादिव्यवहारप्रवर्तनेनावशतया स्वधर्मात्प्रच्यावितानां तदात्वे तन्निर्देशातिक्रमे सद्य एव सकलस्वान्वयनाशं निश्चित्य प्राणत्राणमेव परमं धर्मं मन्यमानानां तत्र पुत्रपौत्रादिपारम्पर्येण म्लेच्छीभूतानां विप्रक्षत्रियविट्छूद्राणां कुलेषु प्रसूता म्लेच्छा वा स्वां नास्तिकतामवधार्य यदि प्रायश्चित्ताचरणेन नरकतरणोपायं वारं वारं प्रणिपत्य प्रार्थयेरन्, तर्हि ते कथञ्चिदपि नास्तिक्यतो मुक्तिं स्वोचिताचारोपदेशं चार्हा वा न वा? अर्हाश्चेत्कीदृशं प्रायश्चित्तं जन्मतः प्रभृत्याश्रितनास्तिक्यदोषमोषकम्? के च तदुचिता आचारा इति विचारणीयं विषयमुपक्षिप्य विप्रक्षत्रियविट्छूद्राणां मतान्तरं प्रविष्टानामपि स्वीयजातिपरिवृत्तिर्न सञ्जातेति यद्विवेचितम्, तत्रेदमेवास्माकं वक्तव्यम्—यन्मतान्तरं प्रविष्टानां यदि तत्रत्यकन्यासम्ब-

न्धोऽपि सञ्जातस्तर्हि तत्रोत्पन्नानामपत्यानामेकजातीयमातापितृसम्बन्धजत्वाभावात् न कथमपि द्विप्रत्वादिकं भवितुमर्हति। एतेन—तत्पुत्रपौत्रपरम्परापि—व्याख्याता। यदि तु विवाहसम्बन्धो न सञ्जातस्तर्हि तु वयमपि मन्यामहे न तेषां जातिपरिवृत्तिर्वर्तते, परन्त्विदमेवात्र विचारणीयम्—यत् विवाहसम्बन्धेन सद्यः पातित्यहेतुना तत्पुत्रादेर्जातिपरिवृत्तिवत् शयनासनादिलघुतरसंसर्गेणापि बहुकालमभ्यस्तेन तत्पुत्रादेर्जातिपरिवृत्तिर्भवति वा नवेति। अत्र प्रसङ्गे इदमपि सूच्यते—यत् विवाहसम्बन्धाभावेऽपि म्लेच्छादिभिर्बहुकालं संवत्सराधिककालमभ्यस्तेन सहासनादिना पतितानां कथमपि न प्रायश्चित्तमित्येव सर्वैरप्यभ्युपगमनीयम् इति केचन मन्यन्ते। अयमाशयः—बौधायनधर्मसूत्रे हि—अशुचिशुक्रजोत्पन्नानां तेषामिच्छतां प्रायश्चित्तिः—इति तदुत्पन्नानामेव प्रायश्चित्तमभिहितमुपपद्यते। अन्यथा पतितानामपि प्रायश्चित्तं यदि बोधायनसम्मतम्, तर्हि किमिति तदुत्पन्नानामेव प्रायश्चित्ताभिधानं तत्र क्रियते—इति सर्व एव विवेचयन्तु। तथाच पतितानां पश्चात्तप्तानामपि कथमपि स्वस्वपूर्वतनजातिभिर्विवाहादिसम्बन्धो न भवत्येव। अत्रेयमशङ्का भवति—कथमेवं सति—अथ पतिताः समवसाय धर्मांश्चरेयुरितरेतरयाजका इतरेतराध्यापका मिथो विवहमानाः—इति पतितानामपि धर्माचरणं प्रतिपादितमुपपद्यते? यदि न तेषां प्रायश्चित्तम्। अत्र हि पतितपदेन कृतप्रायश्चित्तानामेव ग्रहणमित्यवश्यमूरीकर्तव्यम्; अन्यथा हि तेषां धर्माचरण एवानधिकारात् धर्माचरणमत्र कर्तव्यं प्रतिपादितमसङ्गतं स्यादिति। अत्रेदं समाधानम्—यदत्र हि धर्मपदेन न स्वस्वपूर्वतनजातिधर्मादयो विवक्षन्ते, किन्तु पतित-

धर्मा एव। सन्ति हि पतितानामपि सनातनधर्मश्रद्धालूनां बहवस्तन्त्रशास्त्रसिद्धा धर्माः। व्यक्तञ्चैतच्छिववार्कमणिदीपिकायां "नैकस्मिन्नसंभवात्" इति सूत्रभाष्यविवरणावसरे विवेचितम्। तथाच धर्मविधानान्यथाऽनुपपत्त्या न पतितानां कथमपि प्रायश्चित्तानामनुमानं सम्भवति। तथाच—अथ पतिताः समवसाय धर्माश्चरेयुः—इति वचने यत्कृतप्रायश्चित्तानां पतितानां विवाहादिमात्रमयोग्यमिति, तेषामपि प्रायश्चित्तमिति च वर्णितम्, तदिदं पतितोत्पन्नाभिप्रायेणैव। पतितोत्पन्ना अपि हि पतिता एवेति हि बौधायनधर्मसूत्रे—मिथ्यैतदिति हारीतो दधिधानीसधर्माः स्त्रियः स्युर्यो हि दधिधान्यामप्रयतं पय आतञ्च्य मन्थति न तच्छिष्टा धर्मकार्येषूपयोजयन्ति। एवमशुचिशुक्लं यन्निर्वर्तते न तेन सह सम्प्रयोगो वर्तते—इति वचनेन निरूपितमेव। अत्र हि पतितोत्पन्नानामपि कृतप्रायश्चित्तानां व्यवहारयोग्यता नास्तीत्यवश्यमेवोरीकर्तव्यम्। अत एव—यद्यपि सम्प्रयोगो न विद्यते, तथापि प्रायश्चित्तं तस्यास्तीत्याहेति—अशुचिशुक्लोपपन्नानां तेषामिच्छतां प्रायश्चित्तम्—इति सूत्रं गोविन्दस्वामिभिरवतारितमुपपद्यते। तथा चेदमत्र सिद्धं भवति यत्पतितोत्पन्नानामपि कृतप्रायश्चित्तानां न संव्यवहारयोग्यतेत्येव बोधायनसम्मतो विषय इति। अनेन चेदं सूच्यते यज्जात्यन्तरे विवाहसम्बन्धं विनाऽवस्थितानामपि पतितानां पुत्रा यद्यपि जात्या ब्राह्मणादय एव भवन्ति, एवमपि विवाहसम्बन्धस्तेषामपि तज्जातीयैरेव सम्भवति, न तु सर्वथा म्लेच्छादिसंसर्गरहितब्राह्मणादिजातीयैरिति। तथाचात्रेदमेव विचारणीयम्--यत् शिवदत्तशास्त्रिभिस्तदनुसारिभिः म०म०गिरिधरशर्मप्रभृतिभिश्च यैः मनुयाज्ञवल्क्याद्युक्तप्रायश्चित्तै-

स्तत्संसर्गनास्तिक्यावाश्रयणजपापविनाशेन पुनः स्वस्ववर्णोचितधर्मप्राप्तिस्तु स्यादेवेति वर्णितम्, तत्र तैरपि संवत्सरावधिलघुसंसर्गादिपापस्यैव विनाशेन स्वस्ववर्णाश्रमधर्मावाप्तिरेवाभिमन्यते, उत बहुकालाभ्यस्तानभ्यस्तसाधारण्येन लघुगुरुसाधारण्येन च सर्वविधेन संसर्गेण यत्पापं तस्य पापस्य प्रायश्चित्तैर्विनाशेन स्वस्ववर्णधर्माधिकारावाप्तिरिति। अत्राद्यपक्षे नास्माकमपि विवादः। यतो वयमपि संवत्सरावध्यभ्यस्तेन लघुसंसर्गेण यत्पापं तस्य सर्वात्मना विनाशमेव प्रायश्चित्तेन स्वीकुर्मः। द्वितीयस्तु पक्षो यदि तेषामभिमतस्तर्हि तु वयमिदमेव निवेदयामो यत् पूर्वोक्तरीत्या तेषां पतितानां कथमपि न प्रायश्चित्तं न वा स्वस्ववर्णाश्रमधर्मे वैदिकेऽधिकार इति। यत्तु पुनः—

अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः।
सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः॥

इत्यादिकं वचनं तदिदमपि न पतितसंसर्गादिप्रयुक्तानुपनयनाभिप्रायम्, किन्तु केनचन विघ्नेन यथाकालं यदनुपनयनं स्वतो नास्तिक्याश्रयणेन च यदनुपनयनं तदभिप्रायमेव। तथाच नास्तिक्येन यथाकालं स्वपित्राऽनुपनीतानां व्रात्यतापरिहारार्थं प्रायश्चित्तादिव्यवस्थाऽस्माकमपि सम्मतैव। मतान्तरं प्रविष्टैः पित्रादिभिर्मतान्तरीयकन्यायां उत्पादितानान्तु न व्रात्यत्वम्। तथाहि—म्लेच्छादिकन्यायामुत्पादितानां हि न ब्राह्मणत्वादिकं विद्यत इति नोपनयनाधिकारः। स्वीयकन्यामुत्पादितानान्तु यद्यपि ब्राह्मणत्वमस्ति; तथापि विना प्रायश्चित्तानुष्ठानं तस्य वर्णधर्माधिकारावाप्तिर्नास्तीति यावत्प्रायश्चित्तमुपनयनानधिकारः। तथाच शूद्राणां यथोपनयनानधिकारिणामनुपनयनं न व्रात्यताप्रयोजकमिति श्री·

शिवदत्तशास्त्रिप्रभृतयोऽपि मन्यन्ते, एवं पतितोत्पन्नानां पतितानां वोपनयनाधिकारस्यैवाभावान्नानुपनयननिबन्धनं व्रात्यत्वं वर्तत इति व्रात्यसंस्कारेण तेषां स्वस्ववर्णधर्मावाप्तिव्यवस्थापनमेतेषां शास्त्रिमहोदयानामसङ्गतमेव । एवंच शुद्धिव्यवस्थायां यत्र मतान्तरं प्रविष्टानां पुनः प्रायश्चित्तेन स्वधर्माधिकारो वर्तते वा नवेति विचारो विषयस्तत्र व्रात्यसंस्कारपर्यालोचनं व्रात्यप्रायश्चित्तेन शुद्धिव्यवस्थापनञ्च न सङ्गतमिति पश्यामः । नहि पतितो व्रात्य इति वाऽनर्थान्तरम् । पातित्यं हि म्लेच्छादिसंसर्गनिमित्तम्, नानुपनयननिमित्तम्, व्रात्यत्वन्तु यथाकालमनुपनयननिमित्तम् । विनापि म्लेच्छादि संसर्गं आहारव्यवहारादिनियमविशेषपरिपालनेन परस्परमेव विवाहादिसम्बन्धव्यवस्थास्वीकारेण च बहवः खलु क्षत्रिया वैश्या अन्ये च वर्तन्त इति सर्वविदितमिदम् । तथाच तादृशानेव क्षत्रियादीनुद्दिश्य व्रात्यसंस्कारादि विधयः प्रवृत्ता इति तदवलम्बेन पुत्रपौत्रादिपरम्परया म्लेच्छीभूतानां शुद्धिव्यवस्थापनमिदं पामरप्रतारणमात्रम्, न तु वस्तुस्थितिनिरूपणमिति सुधीरमुद्घोषयामः ।

[आपस्तम्बीयव्रात्यप्रायश्चित्तविधि परीक्षणम् ।]

एतेन—अतिक्रान्ते तु सावित्र्याः काले ऋतुत्रैविधकं ब्रह्मचर्यं चरेत् । अथोपनयनम् । ततः संवत्सरमुदकोपस्पर्शनमथाध्याप्यः । यस्य पिता पितामह इत्यनुपेतौ स्यातां ते ब्रह्महसंस्तुताः । तेषां गमनं भोजनं विवाहमिति वर्जयेत् । तेषामिच्छतां प्रायश्चित्तम् । यथा प्रथमेऽतिक्रमे ऋतुरेवं संवत्सरोऽथोपनयनम् । तत उदकोपस्पर्शनं प्रतिपुरुषं संख्याय संवत्सरान् यावन्तोऽनुपनीताः स्युरित्याद्यापस्तम्बवचनोपक्षेपोऽप्यत्र निष्प्रयोजन इति व्याख्यातम् । यत्तु—अत्र

वचने त्रयाणां पुरुषाणामनुपनयने यद् व्रात्यत्वम्, तस्यैव प्रायश्चित्तेन निर्हार इति स्वमतम्, स्वान्तेवासिमतन्तु द्वादशपुरुषाणां ततोऽधिकानामपि अनुपनयनेऽपि यद् व्रात्यत्वम्, तस्यापि द्वादशवार्षिकप्रायश्चित्तमिति—इत्यादि व्रात्यसंस्कारमीमांसायां श्रीराममिश्रशास्त्रिभिर्विवेचितम्, तत्र वयं पश्यामः—यदुज्वलावृत्तिसहितानामुक्तापस्तम्बसूत्राणां स्वारस्यं द्वादशपरम्परापर्यन्तं व्रात्यसंस्कारयोग्यतायां न भवतीति। अत्र केचित् यस्य प्रपितामहादि नानुस्मर्यत उपनयनं तस्य द्वादशवार्षिकप्रायश्चित्तविधानपरे मूले प्रति पुरुषं संख्याय यावन्तोऽनुपनीता इतीत्यस्यानुषङ्गो य उज्वलावृत्तौ सम्पादितः, तत्पर्यालोचनेन द्वादशपरम्परापर्यन्तं व्रात्यसंस्कारयोग्यता वर्तत इति गम्यत—इति वदन्ति। अन्ये तु—द्वादशवर्षाणीत्युपलक्षणम्, प्रतिपुरुषं संख्याय संवत्सरानिति वचनानुसारेणासंख्यातानामनुपनीतत्वेऽपि तावद्वर्षप्रायश्चित्तेन सर्वधर्माधिकारो भवतीति—मन्यन्ते। अत्रेदमेव प्रष्टव्यं यत्—द्वितीयमतानुसरणे प्रतिपुरुषं संख्यायेत्यनेनैव गतार्थत्वात् यस्य प्रपितामहादि नानुस्मर्यत इति पृथक् सूत्रान्तररचनं सूत्रकाराणां किमर्थमिति? यदि तु प्रपितामहस्यानुपनयनमारभ्य द्वादशवार्षिकप्रायश्चित्तव्यवस्थापनार्थं तत्सूत्रमिति वर्ण्यते, तर्हि प्रतिपुरुषं संख्याय संवत्सरानित्यस्य योजनं कथमत्र सम्पाद्यते? यदि तु प्रपितामहस्यानुपनीतत्वे एकं द्वादशवार्षिकं स्वस्य कालातिक्रमे प्रपितामहस्यानुपनीतत्वे च द्वादशवार्षिकद्वयम्, प्रपितामहस्य पितुरनुपनीतत्वे स्वस्य कालातिक्रमे च द्वादशवार्षिकत्रयमिति रीत्या विवरणमभिप्रेयते, तर्हि प्रपितामहपितुर्वृद्धप्रपितामहस्य पर्यन्तमेवानुपनीतत्वे व्रात्यसंस्कारयोग्यता, न तदनन्तरानुपनीतत्वेऽपि। यतो द्वादशवार्षिकचतु-

ष्ट्यावसरो यदा भवति, तदा न प्रायश्चित्तमिति चतुर्थे नास्ति निष्कृतिरिति वचनानुसारेण पूर्वमेव व्यवस्थापितमिति कथमसंख्याकानाममुपनीतत्वेऽपि व्रात्यसंस्कारौचित्यं भवति ? एतेन—प्रपितामहस्यापि पितुरनुपनीतत्वे प्रायश्चित्तं नोक्तं धर्मज्ञैरूहितव्यम्, एवं ततः पूर्वस्यापीत्युज्ज्वलावृत्तिगतं वाक्यजातमपि—व्याख्यातम्। अनेनापि हि प्रतिपुरुषं संख्याय द्वादशवार्षिकसंख्याव्यवस्थापन एव धर्मज्ञानामधिकारः प्रकाश्यते, न तु नूतनप्रायश्चित्तव्यवस्थापने। एतेन प्रथममतमपि प्रत्युक्तम्। तत्रहि मते प्रपितामहमारभ्यानुपनीतत्वे सर्वत्र द्वादशवार्षिकं यदि विवक्ष्यते, तर्हि प्रपितामहस्य पितुरनुपनीतत्वेऽपि प्रायश्चित्तमुक्तमिति तदनूक्तं धर्मज्ञैरूहनीयत्वं यदुज्ज्वलायामुक्तम्, तद्विरोधः; प्रतिपुरुषं संख्यायेत्यस्यानन्वयात्। प्रतिपुरुषं संख्यायेत्यस्य "यस्य प्रपितामहादीत्यत्रानुषङ्गस्योज्ज्वलाप्रतिपादितस्य विरोधः, द्वादशवार्षिकप्रायश्चित्तविधानान्यथानुपपत्त्या द्वादशपरम्परापर्यन्तविवक्षाऽनौचित्यञ्च भवति। तथा चापस्तम्बसूत्राणां प्रपितामहपर्यन्तमनुपनीतत्व एव व्रात्यसंस्कारयोग्यतायां स्वारस्यम्, न द्वादशपरम्परानुपनीतत्वेऽसंख्यातानुपनीतत्वेऽपि वा। एवञ्च बहुकालपर्यन्तं बहुपरम्परापर्यन्तमनुपनीतत्वेऽपि मलकानोपदव्यपदेश्यानामन्येषाञ्च व्रात्यसंस्कारेण पुनः स्वजातिप्रवेशाधिकारप्रदानं शुद्धिव्यवस्थायामसङ्गतमेव।

अयमत्र सारांशः—

यस्य पिता पितामह इत्यनुपेतौ स्यातामित्यत्रेतिशब्दस्यानुकरणार्थत्वं श्रीराममिश्रशास्त्रिणां मते, यत्र प्रपितामहादेरपि यस्य पितेति वाक्ये न ग्रहणम्, तच्छिष्यमते तु तस्य प्रकाराथत्वम्, यत्र

प्रपितामहादीनां सर्वेषामपि यस्य पितेति वाक्य एव ग्रहणम्, अत्र मते यस्य पितेति वाक्ये एकादशपुरुषाणां ग्रहणम् यस्य प्रपितामहादि नानुस्मर्यत इत्यत्र द्वादशोदिग्रहणमिति विवेकः। अत्रच द्वादशतमस्य प्रपितामहशब्देन ग्रहणं यद्यपि न सम्भवति; तथापि गत्यन्तराभावादुपलक्षणत्वमूरीक्रियते। तथाच प्रतिपुरुषं संख्याय संवत्सरान् यावन्तोऽनुपनीताः स्युरिति वचनेन पुरुषसंख्यया वत्सरप्रायश्चित्तसंख्याविधानान्यथानुपपत्त्या एकादशपर्यन्तं प्रायश्चित्तं यस्य पितेत्यनेन निरूप्य द्वादशादीनामनुपनीतत्वे द्वादशाब्दप्रायश्चित्तविधानमप्युपपद्यते। अत्र यस्य पितेत्यनेनैव—प्रतिपुरुषं संख्याय संवत्सरानिति वाक्यैकवाक्यतता द्वादशतमानुपनीतत्वेपि द्वादशाब्दप्रायश्चित्तमिति सिद्ध्यति; तथापि त्रयोदशादीनामनुपनीतत्वेऽपि न त्रयोदशाब्दादिसंवत्सरप्रायश्चित्तमिति व्यवस्थापनार्थं—यस्य प्रपितामहादीति वाक्यमिति न वैयर्थ्यम्। एवं विवरणे निमित्तमिदमेव—यत् प्रतिपुरुषं संख्यायेति पदद्वयमपि सूत्रकारः प्रयुङ्क्ते; अन्यथा प्रपितामहादेर्यस्य पितेति वाक्येऽग्रहणे यावन्तोऽनुपनीता इत्यनेन गतार्थत्वात् तद्वितथमेव समापद्येत। एतेन—यावन्तोऽनुपनीता इति यावत्पदसार्थक्यमपि—व्याख्यातम्।

यत्तु त्रिपुरुषं पतितसावित्रीकाणामपत्ये संस्कारो नाध्यापनं च, तेषां संस्कारेप्सुर्व्रात्यस्तोमेनेष्ट्वा काममधीयीरन् व्यवहार्या भवन्ति इति कातीयसूत्रम्, तत्रापि त्रिशब्दस्योपलक्षणत्वमेव। अन्यथा त्रिपुरुषमभिव्याप्य पतितसावित्रीकत्व एव प्रायश्चित्तविधाने द्विपुरुषमनुपनीतत्वे न प्रायश्चित्तापत्तिरिति त्रिपदमेकद्विपुरुषाणामिव त्रिचतुःपञ्चपुरुषाणामप्युपलक्षणमिति युक्तमेव। दशपुरुष-

पतितसावित्रीका अपि हि त्रिपुरुषपतितसावित्रीका एव। तथाच त्रिपुरुषं पतितसावित्रीकाणामिति कातीयवचनमपि नोक्तमतविरुद्धम्। यत्तु "प्रपितामहस्य पितरमारभ्य चतुर्णां पतितसावित्रीकाणामपत्ये तु न संस्कारः पूर्वनिषेधादिति श्रीहरिहरभाष्यम्, इदमपि पूर्वोक्तापस्तम्बवचनविरोधादनुपपन्नमेव। वस्तुतस्तु—व्रात्यस्तोमस्य द्वादशवार्षिकप्रायश्चित्तापेक्षया गुरुतरस्य द्वादशवार्षिकप्रायश्चित्तानपनोद्यपापतिर्हरणसामर्थ्यात् बहुपुरुषानुपनीततायामपि व्रात्यसंस्कारबोधने एव कातीयसूत्रतात्पर्यमवश्यमूरीकर्तव्यम्। एतेन— तेषामपत्ये संस्कारो न, अध्यापनं च नेति श्रीगदाधराचार्याणामुक्तकातीयविवरणमपि—परास्तम्। अयं भावः—त्रिपुरुषं पतितसावित्रीकाणां संस्काराध्ययनोपनयनाधिकारो हि कातीयसूत्रे यः प्रतिपादितः, सोऽकृतप्रायश्चित्तविषय एव, तथा चोक्तवचनस्य प्रायश्चित्ताभावबोधने यदि तात्पर्यं स्यात्, तर्हि चतुर्थापत्यादीनां पुनरुपनयनप्रसक्तिरेव न भविता, परन्तु—त्रिपुरुषं पतितसावित्रीकाणामपत्येऽसंस्कारो नाध्यापनं च। तेषां संस्कारेप्सुर्व्रात्यस्तोमेनेष्ट्वा काममधीयीरन् व्यवहार्या भवन्तीति प्रायश्चित्तोपनयनादिकं सर्वमेव प्रतिपादितमस्तीति चतुर्थापत्यादीनां न व्रात्यसंस्कारानर्हतेति सर्व एव समालोचयन्तु। एतावता प्रपञ्चेनापस्तम्बवचनैकवाक्यतामावश्यिकामवलम्ब्य बहुपुरुषपतितसावित्रीकपरत्वमपि कातीयसूत्रस्य व्यवस्थापितम्, वस्तुतस्तु--अनयोरेकवाक्यतैव न संभवति, यदि ह्यकृतप्रायश्चित्तावस्थायां कृतप्रायश्चित्तावस्थायां वोभाभ्यां संस्काराधिकारिताऽध्यापनानधिकारिता च निर्णीयेत, तदैकवाक्यतोद्यमः सफलः स्यात्, इह तु कात्यायनः प्रायश्चित्ताननुष्ठानदशायामनधिकारित्वं संस्काराध्या-

पनयोर्ब्रूते, आपस्तम्बस्तु प्रायश्चित्तानुष्ठानदशायां संस्काराधिकारितामध्यापनानधिकारितां चेति कथमुभयोरेकवाक्यता ? तथाच यस्य प्रपितामहादि नानुस्मर्यते इत्यत्र त्रिपुरुषं नानुस्मर्यत इत्यप्रयोगेण प्रपितामहमारभ्य बहूनामनुपनीतत्वे प्रायश्चित्तविधानपरमेव यस्य प्रपितामहादीति वाक्यमित्यवधेयम्। अत एव उक्तापस्तम्बसूत्रं व्याख्याय प्रवृत्ता—यस्य तु प्रपितामहस्य पितुरारभ्य नानुस्मर्यत उपनयनम्, तत्र प्रायश्चित्तं नोक्तम्, धर्मज्ञैरूहितव्यम्, एवं पूर्वेष्वपीति श्रीहरदत्ताचार्यवृत्तिरप्युपपद्यते। अत्र हि स्पष्टमेव प्रपितामहपित्रादिपूर्वाणामनुपनीतत्वेऽपि प्रायश्चित्तविधानं धर्मज्ञानामावश्यकमिति बोध्यते। यत्तु अत्र केचन—पूर्वेषु इत्यस्य माणवकापेक्षया पूर्वपित्रादिष्वपि प्रत्येकं प्रायश्चित्तकल्पनपरतया व्याचक्षते, तदिदं वाक्यसंदर्भविरुद्धमेव। पूर्वपदं हि अवधिसापेक्षं पूर्वप्रकृतमेवावधितया गृह्णातीति हि उत्सर्गः। अत्र च प्रपितामहपिता प्रकृत इति ततः पूर्वतनानामेव ग्रहणं स्वरसतो गम्यते—इति। एवं वर्णयन्तोऽपि श्रीराममिश्रशास्त्रिणः जात्या म्लेच्छानां म्लेच्छादिसंसर्गिणां पतितानां म्लेच्छाचारवतां वा न व्रात्यसंस्कारयोग्यतां मन्यन्ते, किन्तु स्वजातिधर्मे विद्यमानानां केनापि कारणेन पतितसावित्रीकाणामेव जनानामिति मलकानादिपदव्यपदेश्यानां व्रात्यस्तोमेन शुद्धिमभिदधतः श्रीशिवदत्तपण्डितप्रभृतयोऽपि अत्र निरासयोग्या एव वर्तन्ते। नहीमे शूद्राणां पतितानां म्लेच्छानां वा व्रात्यसंस्कारयोग्यतां मन्यन्ते। तदुक्तम्—म्लेच्छपतितादिव्यावृत्तायाः शूद्रजातिव्यावृत्तायाश्च संस्कारकारणताया आऽङ्गनागोपालबालमानुभाविकतयेति। सर्वथा तु त्रिपुरुषमनुपनीतत्व एव न व्रात्यसंस्कार इति सिद्धम्।

अत एव हि—यस्य प्रपितामहादीत्यादिपदं संप्रयोजनम्, अन्यथा त्रिपुरुषमनुपनीतत्व एव व्रात्यसंस्कारयोग्यतायां—यस्य पिता पितामह" यस्य प्रपितामहश्च इत्यत एव इष्टसिद्धया व्यर्थमेवादिपदं प्रसज्यते। अयमेव चार्थ उक्तापस्तम्बसूत्रस्येति मदनरत्नापरार्कप्रभृतिनिबन्धकारादयोऽपि मन्यन्ते। तत्र मदनरत्नं यथा—यस्य प्रपितामहादेरुपनयनं नास्ति, तथार्वाचामपि पुरुषाणामुपनयनाभावः ते सर्वे श्मशानसंस्तुताः इति। स्पष्टमिदमेतेन—यदिहापस्तम्बसूत्रे प्रपितामहादीत्यत्र न केवलं प्रपितामहमारभ्यावरा प्रपौत्रान्ता एव गृह्यन्ते, किन्तूर्ध्वपुरुषा अपीति। अत्रापरार्को यथाः—यस्य तु प्रपितामहादेरुपनयनं न स्मर्यते, तत्रार्थादेतेषां पुरुषाणामुपनेयत्वम्, ते सर्वे श्मशानवदशुचयः। इति। एवं वदतामपरार्ककृतां प्रपितामहादिपदेन शक्त्या नाधस्तनाः प्रपौत्रान्ताः परिजिघृक्षिताः, किन्तु प्रपितामहपित्रादय एव। अयमभिसन्धिः—प्रपितामहादिपदस्य स्वजनकजनकत्वादिसम्बन्धेन पुरुषविशिष्टपुरुषार्थकतया प्रपितामहादिपदेन प्रपितामहपित्रादीनामेव परिग्रहसंभवो नापरेषां प्रपौत्रादीनाम्। अयमत्र मदनरत्नापरार्कयोर्विशेषः—यत् मदनरत्नकृता—प्रपितामहादिपदेनार्वाचामूर्ध्वतनानां च ग्रहणमपरार्ककृता तूर्ध्वतनानामेव ग्रहणमिति, नत्वेतावताऽपरार्ककृताऽर्वाचां परित्यागो मन्यते, अर्थात्तु तद्ग्रहणं भवतीति तन्मतम्। सत्यपि चास्मिन् विशेषे शब्दतो फलतो विशेषस्तु न मतद्वयेऽपि वर्तते। सर्वथा तु त्रिपुरुषं पतितसावित्रीकाणामेव नोपनेयत्वम्, किन्तूर्ध्वततानां सर्वेषामपि। कातीयसूत्रस्याप्ययमेवाशयः। तत्र त्रिपदप्रयोगप्रयोजनं तु स्वल्पायाससाध्यप्रायश्चित्तसूचनेन भवत्येव। तत्र यद्यपि चतुर्थादिपुत्रस्य प्रायश्चित्तं

न कण्ठत उक्तम्, तथापि तद् गुरुणि गुरु लघुनि लघु इति न्यायेन धर्मज्ञैरेवोहितव्यमिति न काप्यनुपपत्तिः। व्यक्तं चैतत् हरदत्तवृत्तावपि। यत्तु केचनोक्तहरदत्तवृत्तेः प्रायश्चित्ताभावबोधन एव तात्पर्यम्—इति, तदिदं नोपपन्नम्। तथा सति हि प्रपितामहस्य पितरमारभ्यानुपनयने तु न प्रायश्चित्तमित्येव खलु वक्तुं योग्यम्, न तु तत्र प्रायश्चित्तं नोक्तम्, धर्मज्ञैरूहितव्यमेवं पूर्वेष्वपीति। तदिदं सिद्धम्—यत् व्रात्यानां सर्वेषामपि पुनरुपनयनयोग्यता वर्तते इति। अत्र तु परम्परातिक्रम इव वार्धक्यादिकमपि न प्रतिबन्धकमिति जातापत्यानामपि उपनयनादिकं संभवत्येव। अत्रेदं तत्त्वम्—चतुर्विधा हि व्रात्या भवन्ति—निन्दिताः, कनीयांसः, ज्येष्ठा एतत्त्रितयव्यतिरिक्ता हीनाचाराश्चेति। तत्र निन्दिता अनध्याप्यानामध्यापकाः अयाज्ययाजकाः इत्यादयः। तेषां संस्कारस्ताण्ड्यमहाब्राह्मणे उत्कीर्तितः। कनीयांसश्च संस्कृतमातापितृजाः स्वात्मना पतिताः यथोचितकालेऽजातोपवीतादिसंस्कारास्तेषामपि प्रायश्चित्तप्रकारस्तत्र निर्दिष्टः। परे तु वृद्धव्रात्याः अजातोपनयनादिसंस्काराः सन्त एव ये वार्धक्यमुपगतास्तेषां संस्कारप्रकारोऽपि तत्रैवोक्तः—यथा—अथैष शमनीचमेढ्राणां स्तोमो ये ज्येष्ठास्सन्तो व्रात्यां प्रवसेयुस्त एतेन यजेरन् इति। अयमस्यार्थः—शमेन यौवनोपरमेण नीचमनुद्धतं मेढ्रेन्द्रियं येषां ते तथाविधाः-स्थाविर्याद्विनष्टवीर्याः तेषां स्तोमस्तैरनुष्ठेय इति। ततश्च ये ज्येष्ठा वृद्धतमास्सन्तोऽपि व्रात्यास्तेषामपि व्रात्यस्तोमाधिकारित्वं सिद्ध्यति। अत एव—हीना वा एते हीयन्ते ये व्रात्यां प्रवसन्ति, नहि ब्रह्मचर्यं चरन्ति, न कृषिं वाणिज्याम्, षोडशो वा एतत्स्तोम-

स्समाप्तुमर्हतीति जातापत्यानामपि वृद्धव्रात्यानां संस्कारविधिरुपपद्यते ।

अत्र हि हीनपदेनासंस्कृतमातापितृजन्यत्वम् हीयन्ते इत्यनेन च तेषामुत्पादितापत्यत्वम्, प्रवसन्तीत्यनेन चिरं वयोऽतिक्रमेऽपि प्रायश्चित्तेन कालक्षेपयोग्यता, ब्रह्मचर्यं न चरन्ति इत्यादिना च प्राथमिकब्रह्मचर्योल्लङ्घनेन गृहस्थाश्रमस्वीकरणम्, बोध्यत इति न कोऽपि दोषः । तदिदं सिद्धं जातापत्यानामपि वृद्धानां व्रात्यस्तोमाधिकारिता । अस्यां च सत्यामिदं समालोचनीयं समापतितम्, यत्—व्रात्यस्तोमानन्तरं पूर्वपरिणीताः पत्न्यः किं त्याज्या उत पुनर्विवाहेन संस्कार्याः, आहोस्वित्तासामपि कश्चन शास्त्रोपदिष्टः प्रायश्चित्तविशेषः कर्तव्यः इति । अत्रेदं मन्तव्यम् । क्षत्रियवैश्यस्त्रियः पुनर्विवाहेन संस्करणीयाः । व्यक्तं चैतत् शाकुन्तलोपाख्याने-यत् दुष्यन्तस्य क्षत्रियस्य प्रथमं मिथः प्रेमनिबन्धने रहःसम्बन्धे वृत्ते चिरं विलम्ब्यापि पुनर्वैवाहिको विधिरभूत् । युक्तं चैतत्—यतः स्त्रीणामुपनयनस्थाने विवाहं मनुरब्रवीदिति स्त्रीणामपि वृद्धानां व्रात्यस्तोमेन विवाहाख्योपनयनसंस्करणं योग्यम् । अयं भावः—स्त्रीणामपि पृथक् प्रायश्चित्तपूर्वकविवाहान्तरेणैव तेनैव भर्त्रा व्यवहारयोग्यता । अत्र च गतप्रत्यागतादिविषय इव दानवर्जमेव विवाहः कर्तव्य इति तु विशेषः । एतेनापत्यमपि व्याख्यातम्; तस्यापि व्रात्यस्तोमेनैव शुद्धक्षत्रियत्वप्राप्तेः । अत्रायं विशेषोऽनुसन्धेयः—यत् कनीयोज्येष्ठनिन्दितव्रात्यानामेव सर्वेषां संस्कारयोग्यता, न तु हीनाचारव्रात्यानाम् । तेषां हि वृत्त्यन्तरस्वीकरणेन क्रमेण धर्मान्तरस्वीकरणेन प्रथमस्य शूद्रसमत्वे द्वितीयादीनां शूद्रत्वे पञ्चमस्यानिर्हरणीयत्वे च पर्यवसानात् । एतेन—आपस्तम्बका-

त्यायनवचने अपि यथाश्रुतार्थे अपि न विरुद्धे इति व्याख्यातम्। तयोर्हि वयमिदानीमुक्तव्रात्यपरत्वमेव योग्यं मन्यामहे इति केषांचन शंकापि—परास्ता; संकोचे प्रमाणाभावात्। एतेन—"यस्य वेदश्च वेदी च विच्छिद्येते त्रिपुरुषम्। स वै दुर्ब्राह्मणो ज्ञेयः" इति वचनेऽपि त्रिपदमुपलक्षणमेवेति सूचितम्। अन्यथा तत्रापि त्रिपुरुषमात्रविच्छेदस्यैव दौर्ब्राह्मण्यप्रयोजकत्वापत्त्या येषां पञ्चषपरंपरामध्ये वेदवेद्युभयविच्छेद दोषो वर्तते, तेषां प्रायश्चित्ताचरणपूर्वकं ज्योतिष्टोमाद्यधिकारो नास्तीति स्यात्। न चेष्टापत्तिः, यतः सर्वेऽपि याज्ञिकाः इदानीं दशपरंपराविच्छेदेऽपि सोमेन याजयन्त्येव। सर्वथा तु परम्पराविशेषमगृहीत्वा व्रात्यसंस्कारयोग्यता व्यवस्थापनीया, न तु तां गृहीत्वेतीदानींतनानां मराठेजातीयानां कायस्थानां कोमिटीजातीयानां गुर्जरवणिजां चान्येषां च तत्सजातीयानां बहुपरम्परामारभ्याकृतोपनयनानामपि व्रात्यसंस्कारेण पुनः शुद्धस्वजातिप्रवेशनं कर्तव्यमिति प्रतिभातीति।

अत्र वयं पश्यामः—यत् श्रीराममिश्रशास्त्रिणां स्वमतमेवात्र योग्यं स्वीकर्तुम्, न तु समर्थ्यमानमपि तच्छिष्यमतम्। श्रीराममिश्रशास्त्रिणामाशयस्तु संगृह्य तैरुपवर्णितोऽयमेव—यत्—आपस्तम्बीये यस्य प्रपितामहादीति तृतीयपर्याये द्वादशवर्षब्रह्मचर्यप्रायश्चित्तमभिधायोपनयनमुक्तम्, तत उदकोपस्पर्शनानन्तरं गृह्यकर्मानुष्ठानौपयिकमन्त्रमात्राध्यापनमुक्तम्, न तु कृत्स्नवेदाध्यापनम्; कात्यायनेन तु त्रिपुरुषमारभ्यासंस्कृतानामपत्येषु असंस्काराध्यापने उक्ते, आत्मसंश्चिकीर्षायां तु सर्वैनोऽपकर्षकसव्रतव्रात्यस्तोमोऽभिहितः। ततश्च चतुर्थापत्यादौ कात्यायनापस्तम्बयोरुभयोरप्यसंस्कार्यताऽनुपेयता चाभिमता। अयं पुनर्विशेषः—यदापस्तम्बेन

द्वादशवर्षप्रायश्चित्तमुक्तम्, तच्च सर्वैनोऽपकर्षकव्रात्यस्तोमापेक्षया-पकृष्टमिति तदनुष्ठानेन माणवकस्य गृह्यमन्त्रमात्राध्ययनाधिकारसंपत्तिर्न तु कृत्स्नवेदाध्ययनाधिकारावाप्तिः। व्रात्यस्तोमेन तु सर्वाधिकारसिद्धिरिति।

अत्र मते हि—यस्य प्रपितामहादि नानुस्मर्यत इत्यत्र आदि-पदेनार्वाचामेव ग्रहणम्, नोर्ध्वतनानाम्। अत्र पक्षेऽनुकूला निबन्धाः—वीरमित्रोदयः, अपरार्कः, कातीयजयरामभाष्यम्, कातीयहरिहरभाष्यम्, इत्यादयः।

तत्र वीरमित्रोदयो यथाः—यस्य माणवकस्य प्रपितामहमारभ्य त्रयाणां पुरुषाणामुपनयनं नानुस्मर्यते, ते स्मशानसंस्तुताः, तत्र माणवकस्य द्वादशवार्षिक प्रायश्चित्तम्, पूर्वेषां तु पूर्वमेवोक्तम्। अथ गृह्यमन्त्राणामेवोपदेशनं नाध्यापनं कृत्स्नस्य वेदस्य। ततस्तत्कृतविवाहाद्य उत्पद्यते, तस्य द्वौ मासौ व्रतं चारयित्वोपनयनं कार्यम्, तदुत्पन्नस्य तु प्रकृतिवदुपनयनादि सर्वं कार्यम्, न प्रायश्चित्तमिति। अत्र हि प्रपितामहादीत्यत्रादिपदेनार्वाञ्च एव विवक्ष्यन्ते; अन्यथा हि त्रयाणां पुरुषाणामित्यसङ्गतं स्यात्। प्रपितामहादीति हि उपनयनं प्रति विशेषणम्, तथाच प्रपितामहमारभ्येति तदर्थः फलति। अत्र च प्रपितामहानन्तराणामुपनयनसम्बन्धिनां परामर्श एव नास्ति। तथाच वीरमित्रोदयकारसम्मतः पाठोऽत्र प्रपितामहादि नानुस्मर्यत इत्येव, न तु प्रपितामहादेरिति फलितम्। अत्र हि प्रपितामहमारभ्य त्रयः माणवकं विहाय प्रपितामहपितामहपितर एव प्रकृतत्वाद् गृह्यन्ते। ऊर्ध्वतनानां तु त्रयाणामेव नोपस्थितिः, सर्वेषामपीति त्रयाणामिति निर्देशोऽनुपपन्नः स्यात्। एतेन—प्रपितामहादीत्यत्र द्वादशतममारभ्य सर्वेषां ग्रहणमिति श्रीराममिश्रशा-

स्त्रिशिष्याणां मतमपि-परास्तम्; उक्तनिबन्धविरोधात्। अत एव हि—तत्र माणवकस्यैव द्वादशवार्षिकम्, पूर्वेषां तूक्तमिति वाक्यमुपपन्नं भवति; अत्र हि पूर्वपदेन माणवकपूर्वतनाः पितृपितामहप्रपितामहा गृह्यन्त इत्यङ्गीकार एव पूर्वेषां तु प्रायश्चित्तमुक्तमित्युपपन्नं भवति। यतः पितृपितामहप्रपितामहानां माणवकपरित्यागे माणवकपितृपितामहत्वपर्यवसानात्, "यथा प्रथमेऽतिक्रमे ऋतुरेवं संवसरः, प्रतिपुरुषं संख्याय संवत्सरान् यावन्तोऽनुपनीताः स्युरिति" प्रायश्चित्तविध्युक्तिवचनं सङ्गतं भवति, प्रपितामहपूर्वतनपरंपराग्रहणे तु तेषां पूर्वं प्रायश्चित्तं नोक्तमितीदं व्यवस्थापनमसङ्गतं स्यादिति सर्वविदितमिदम्। तथाच प्रपितामहपूर्वतनपरंपरानुपनयने प्रायश्चित्तविधिपरत्वं यस्य प्रपितामहादीत्यत्र प्रपितामहादेरिति पाठोरीकरणेऽपि न युक्तमित्येव वीरमित्रोदयकारमतम्; अन्यथा पितृपितामहयोरुपनीतत्वेऽपि प्रपितामहमारभ्यानुपनीतत्वे द्वादशवार्षिकप्रायश्चित्तानुष्ठानावश्यकतापत्तिः। तथाच प्रपितामहपितामहपितॄणामनुपनीतत्वे द्वादशवार्षिकप्रायश्चित्तविधिपरमापस्तम्बवचनमित्येवात्र विवक्षितम्। तदिदं सिद्धम् यत् परम्पराचतुष्टयानुपनीतत्वे व्रात्यसंस्कारयोग्यतेति सिद्धान्ते एव वीरमित्रोदयोऽनुकूल इति।

अत्र परंपराचतुष्टय एवानुपनीतत्व इत्यवधारणं विवक्ष्यते वा, नवेति विचारे तु सर्वं वाक्यं सावधारणमिति न्यायेन तद्विवक्ष्यते इति केचिन्मन्यन्ते, केचिच्च नेति। तत्र द्वितीयं मतं श्रीराममिश्रशास्त्रिणाम्। वीरमित्रोदयादयो निबन्धास्सर्वेऽप्यत्रोदासीना एव वर्तन्ते। हरिहरभाष्ये तु नावधारणं विवक्षितमिति श्रीराममिश्रशास्त्रिणां मतमेव पोष्यते, यतस्तत्र चतुर्थादीनां तूपनयनमात्रमिति

वर्णनावसरे आदिपदं प्रयुक्तम्, तथाचावधारणपक्षे प्रपौत्रान्तादीनां न व्रात्यसंस्कारः, तदभावपक्षे च तेषामपि व्रात्यसंस्कारः। इयान् विशेषः—यत् श्रीराममिश्रशास्त्रिणः व्रात्यस्तोमेन चतुर्थादीनां सर्वाधिकारं मन्यन्ते, वीरमित्रोदयहरिहरभाष्यादयस्तूपनयनसंस्कारेण गृह्यमन्त्राधिकारमात्रमिति। संस्कृततत्पुत्रादीनां तु सर्वेष्वपि मतेषु शुद्धं ब्राह्मण्यादिकमिति तु समानम्। अत्र विधीनां यावद्वचनमेव प्रवृत्त्या प्रपितामहादीति पाठे, पाठान्तरे च प्रपितामहपित्रादिव्रात्यतायामपि द्वादशवार्षिकमेव यदि विवक्षितम्, तर्हि तत्र प्रतिपुरुषमिति योजनेन द्वादशवार्षिकवृद्धिव्यवस्थापनमुज्ज्वलागतमसंगतं स्यात्, एवं प्रपितामहस्य पितुरनुपनीतत्वे तु प्रायश्चित्तमूहितव्यमिति तद्वचनमप्यसंगतं स्यात्। अतस्तदुपपत्त्यर्थं प्रपितामहादीत्यस्य पदस्योपलक्षणत्वे तात्पर्यमङ्गीक्रियते चेत्, प्रायश्चित्तानामप्युपलक्षणीयता स्यादिति अवधारणपक्षे चतुर्थादिव्रात्यत्वे द्वादशवार्षिकप्रायश्चित्तव्यवस्थाऽसङ्गतैव भवति।

एतेनापरार्कोऽपि व्याख्यातः। स यथाः—यस्य तु प्रपितामहादेरुपनयनं न स्मर्यते, तत्रार्थात्तेषामपि पुरुषाणामनुपनीतत्वम्, ते सर्वे श्मशानवदशुचयः इति। अत्रार्थात्तेषामनुपनीतत्वम्, इत्यत्र तेषांपदेन माणवकपितृपितामहानां विवक्षैव युक्ता; यतस्तेषामिति प्रकृतानां तेषामेव ग्रहणं योग्यम्; अन्यथोर्ध्वतनानां ग्रहणे हि अर्थापत्तिप्रमाणस्यैवासंभवः। प्रपितामहमारभ्योपनयनास्मरणं हि स्वपितृपितामहयोरनुपनीतत्व एव यथोपपद्यते, न तथा प्रपितामहपितामहाद्यनुपनीतत्वे, प्रपितामहपितुरुपनीतत्वेऽपि प्रपितामहस्यानुपनीततादशायां तदस्मरणोपपत्तेः। ततश्चार्थात्तेषामित्यत्र तच्छब्देन प्रपितामहोर्ध्वतनानामेवाग्रहणात्

श्रीराममिश्रशास्त्रिशिष्याणां मतमुक्तवाक्यसंदर्भादिविरुद्धमेव । एतेन-अपरार्कानुगुणत्वं स्वीयसिद्धान्तस्य व्रात्यसंस्कारमीमांसायां यदुपपादितम्, तदिदमपास्तम् । अपरार्कोऽप्ययं चतुर्थादि व्रात्यतायां प्रायश्चित्तव्यवस्थापन उदासीन एव वर्तते ।

एतेन—कातीयजयरामहरिहरभाष्ये अपि—व्याख्याते । तत्र जयरामभाष्यं यथाः—त्रिपुषमिति । एतेषां त्रयाणामपत्ये चतुर्थे पुरुषे कृतप्रायश्चित्ते केवलोपनयनाख्यसंस्कारो नाध्यापनादिः । तेषां त्रिपुरुषं पतितसावित्रीकाणां मध्ये संस्कारेप्सुः व्रात्यस्तोमेनेष्ट्वा काममधीयीतेति । अथ हरिहरभाष्यं यथा—त्रिपुरुषं त्रीन् पुरुषान् यावत्, पतितसावित्रीकाः पितृपुत्रपौत्राः तेषां पुत्रे संस्कारः, न पुनः चतुर्थादीनाम् । तेषां चोपनीतानामपि अध्ययनं न भवति ; निषिद्धस्य पुनरनुज्ञापनं प्रतिप्रसव इति ; उपनयनस्यैव प्रतिप्रसवात्, इति । अत्र प्रथमभाष्ये स्पष्टं चतुर्थस्यैवोपनयनाख्यसंस्कारमात्रं भवतीति बोध्यते, एवं भाष्यान्तरेऽपि । इयान् विशेषः-यत् द्वितीयभाष्ये चतुर्थादीनामप्युपनयनमात्रं वर्तते इति विवेचितम्, प्रथमभाष्ये तु न तत्तथा विवेचितम् । अनेन चेदमेव सूच्यते—व्रात्यस्तोमे कृते चतुर्थस्यैव पञ्चमादेरपि गृह्यकर्ममात्राधिकारः संभवतीति श्रीहरिहराचार्या मन्यन्ते, वीरमित्रोदयकारा अपि अस्य सिद्धान्तस्य न विरोधिनः, यतस्तेऽपि न प्रपितामहमारभ्य त्रयाणामनुपनीतत्व एव प्रायश्चित्तविशेषं मन्यन्ते, न तु प्रपितामहमारभ्यैव पुरुषत्रयम् । तथाच पञ्चमादिपरम्परायामपि अनुपनीतत्वेऽपि व्रात्यसंस्कारयोग्यता वर्तत एव । इयान् विशेषः-यत् उज्वलोक्तरीत्या प्रपितामहापितुरारभ्यानुपनीतत्वेऽपि पुरुषगणनया द्वादशवार्षिकाणां संख्याधिक्यकल्पनं योग्यम् । यथा

प्रपितामहपर्यन्तमनुपनीतत्वे एकं द्वादशवार्षिकम्, प्रपितामहपितृपर्यन्तमनुपनीतत्वे द्वादशवार्षिकद्वितयम्, एवं तदनन्तरतदनन्तरपर्यन्तमनुपनीतत्वे तत्त्रितयचतुष्टयादिकमिति ।

एतेन—मदनरत्नमपि—व्याख्यातम्; तद्यथाः—यस्य प्रपितामहादेरुपनयनं नास्ति, तथार्वाचामपि पुरुषाणामुपनयनाभावः, ते सर्वे श्मशानवदशुचयः इति । अत्र हि नोर्ध्वतनानां न वाऽर्वाचामेव, प्रथमे पितृपितामहयोरुपनीतत्वेऽपि प्रपितामहादेरनुपनीतत्वे प्रायश्चित्तापत्तिः, द्वितीये प्रपितामहपित्रादीनामनुपनीतत्वे प्रायश्चित्तानापत्तिरित्युभयं विवक्षितम् । अत्र प्रायश्चित्ते न साम्यम् । प्रतिपुरुषं संख्याय संवत्सरान् इत्यस्य योजनेन पूर्वोक्तरीत्या निर्वाहसंभवात् इति—कृतप्रायश्चित्तानां चतुर्थादीनामुपनयनमात्रयोग्यतावादे एव तस्यापि तात्पर्यमिति कल्पनं त्वत्रापि योग्यमेव । यत्तु संस्काररत्नमालायाम्—यस्य प्रपितामहादीत्यस्य पाठस्य कृते यस्य पितामहादि नानुस्मर्यते इति पाठस्वीकरणपूर्वकम्—"यस्य माणवकस्य पितामहादि पितामहादारभ्य प्रपितामहः तस्य पिता पितामहप्रपितामहाद्या अनुपनीताः, स्वयं च यथाकालमनुपनीतस्ते तथाविधा माणवका श्मशानसंस्तुताः । अत्र पावमान्यादिभिरित्यनेन—प्रतिपुरुषं सख्याय संवत्सरानिश्येतदपि द्रष्टव्यमिति व्याख्यातमुज्ज्वलाकृता, तथा यस्य पितुरारभ्य नानुस्मर्यते उपनयनं तत्र प्रायश्चित्तं नोक्तम् धर्मज्ञैरूहितव्यमिति व्याख्यातमुज्ज्वलाकृतेति च प्रतिपादितम्, तेन विवक्षितस्सारांशोऽयमेव—यत्—यदि स्वयमनुपनीतस्तर्हि ऋतुः—यदि पितैवानुपनीतः—संवत्सरमेकम्, यदि द्वौ पिता पितामहश्च, ततो द्वे संवत्सरे । अथ स्वयमप्यनुपनीतः, तर्हि त्रीन् संवत्सरान्, अथ पितामह-

मारभ्य त्रयाणामनुपनीतत्वे एक द्वादशवार्षिकादिकम्, पितुरारभ्यानुपनीतत्वेऽपि किंचिदधिकं प्रायश्चित्तमूहितव्यमिति। अत्र च मते पितुरुपनीतत्वेपि पितामहादेरनुपनीतत्वे एक द्वादशवार्षिकादिकम्, पितृपितामहयोरनुपनीतत्वे तु स्वस्योपनेयत्वे संवत्सरम्, पित्रादीनामुपनीतत्वे स्वस्यानुपनीतत्वे तु ऋतुः, पितुरारभ्यानुपनीतत्वे तु प्रायश्चित्तमूहनीयमिति बोधनेनेदमेव विशदीक्रियते—यत् पितामहमारभ्य प्रतिपुरुषं संख्याय द्वादशवार्षिकवृद्धिः कर्तव्या, यथा पितुरुपनीतत्वे पितामहस्यानुपनीतत्वे एकं द्वादशवार्षिकम्, पितामहप्रपितामहयोरनुपनीतत्वे द्वादशवार्षिकद्वयम् पितामहप्रपितामहपितामहप्रपितामहानामनुपनीतत्वे तु द्वादशवार्षिकत्रितयमिति। तथाचेदानीं यदि कश्चन व्रात्यः संस्करणीयः, तर्हि तस्य पितरमारभ्य बहूनामनुपनीतत्वात् प्रायश्चित्तमपरं कल्पनीयम्, कल्पितेऽपि तस्मिन् तत्पुत्रस्य व्रात्यस्य द्वादशवार्षिकत्रयानुष्ठानम्, तत्पुत्रस्य द्वादशवार्षिकद्वयानुष्ठानम्, तत्पुत्रस्य द्वादशवार्षिकस्यैकस्यानुष्ठानम्, तत्पुत्रस्य तु यथाकालमुपनयनेन किमपि प्रायश्चित्तमिति फलति। तत्र च कल्पनीयं प्रायश्चित्तम्, पितामहमारभ्यानुपनीतत्वनिमित्तकद्वादशवार्षिकत्रितयादधिकमष्टाचत्वारिंशद्वर्षप्रायश्चित्तमेव कल्पयितुं योग्यम्, ततोऽधिकं वा। ततश्च यत् केनापि निमित्तेन पित्राद्यनुपनीतत्वे स्वकाले उपनयनम्, यत्र पितृपितामहौ वाऽनुपनीतौ, यत्र पितृपितामहप्रपितामहा वाऽनुपनीताः, तत्र विनैव क्लेशं व्रात्यसंस्कारो भवितुमर्हति, यत्र तु पितृपितामहावुपनीतौ प्रपितामहोऽनुपनीतः, तथा पितोपनीतः पितामहादयोऽनुपनीतास्तत्रातिक्लेशसाध्यो व्रात्यसंस्कार इति स्थिते पितरमारभ्य वृद्धप्रपितामहपर्यन्तमनुपनीतत्वे व्रात्यसंस्कारोऽसंभवदुक्तिक

इति किमु वक्तव्यमिति संस्काररत्नमालाशयोऽवगम्यते । अत्र यद्यपि आदिपदेनोर्ध्वतनानां ग्रहणम्, एवमपि प्रपितामहमारभ्य त्रयाणामनुपनीतत्वे चतुर्थस्यैकं द्वादशवार्षिकम्, माणवकस्य चतुर्थस्याप्यनुपनीतत्वे स्वस्य कालातिक्रमे द्वादशवार्षिकद्वितयम्, पञ्चमस्यानुपनीतत्वे तत्त्रितयमित्यर्थतो न भेदः ।

तदिदं सिद्धं यत् सर्वेऽपि निबन्धकाराः पितरमारभ्य वृद्धप्रपितामहपर्यन्तमनुपनीतत्वे द्वादशवार्षिकवृद्धिमेवाभिप्रयन्तीति । अत्र यदि श्रीराममिश्रशास्त्रिणोऽपि द्वादशवार्षिकवृद्ध्या व्रात्यान् संस्करणीयान् मन्यन्ते, तर्हि नास्माकं तैस्साकं मतभेदोऽत्र वर्तते । इदमेवात्र तैरपि समालोचनीयम्—कियत्पर्यन्तं द्वादशवार्षिकवृद्धिः सम्पादयितुं शक्यत इति । अत्रेदमेव वयं पश्यामः—यच्चतुर्थे नास्ति निष्कृतिरिति वचनात् चतुर्गुणद्वादशवार्षिकप्रायश्चित्तिन्यूनप्रायश्चित्तपर्यन्तमेव सो सम्पादयितुं शक्यते । व्यक्तं चैतत् उपरिष्टान्निरूपयिष्यते बहुतरनिबन्धसमालोचनपूर्वकम् । तथाच पितामहादीति संस्काररत्नमालाहृतपाठे वृद्धप्रपितामहपर्यन्तमेवानुपनीतत्वे संस्कारयोग्यता, प्रपितामहादीति पाठे तु वृद्धप्रपितामहपितृपर्यन्तमनुपनीतत्वे सा । तथाच—चतुर्थस्य पञ्चमस्य वा माणवकस्य व्रात्यसंस्कारयोग्यतेत्येव सर्वनिबन्धसमाहृतः पक्षः । अत्र प्रपितामहादीत्यत्रादिपदेनार्वाचां ग्रहणमुतोर्ध्वतनानामुतोभयेषामिति विचारे मदनरत्नपक्ष एव सर्वेषामपि तात्पर्यमिति व्रात्यसंस्कारमीमांसाकारैरपि स्वीकृतमिति, यस्य पितेत्यस्यैकादशपरम्परापर्यन्तम्, यस्य प्रपितामहादीत्यस्य तदनन्तरसर्वपर्यन्तं च प्रवृत्तिरितिमतमसंभवदुक्तिकमेव । अस्मिन् मते न केवलं पुर्वोक्तनिबन्धादिविरोधः, प्रपितामहपदस्य चतुर्थपरस्य द्वादशतमपरत्वे लक्षणादोषो-

ऽपि । गुरुणि गुरु लघुनि लघु इति न्यायो हि न चतुर्थाद्यनुपनीत-
तायां द्वादशवार्षिक प्रायश्चित्तविधानेऽपि नात्र बाध्यते । यदि हि
शास्त्रे कुत्रापि पञ्चमाद्यनुपनीतत्वेऽपि द्वादशवार्षिकन्यूनप्रायश्चि-
त्तविधिरुपलभ्येत, तर्हि खलु चतुर्थाद्यनुपनीततायां चतुर्वर्षादि-
प्रायश्चित्तविधिकल्पनात् द्वादशवार्षिकप्रायश्चित्तस्य द्वादशतमा-
नुपनीतपुरुषविषयत्वं कल्पनीयम् । न चैतदस्ति । एतेन—प्रति-
पुरुषं संख्याय संवत्सारान् इत्यत्र संख्यायपदसार्थक्यमपि—व्या-
ख्यातम् । तद्धि पदं पुरुषसंख्यया संवत्सरप्रायश्चित्तसंख्याविधना-
र्थं प्रयुक्तमिति उभयसम्मतमिदम् । अत्र मतद्वयेऽपि यावन्तो
ऽनुपनीताः स्युः तावतः संवत्सरानित्यनेन सिद्धस्यैवार्थस्योपपाद-
नात् स्वरूपकथनमेव प्रतिपुरुषं संख्यायेति । इयान् विशेषः—श्री-
राममिश्रशास्त्रिशिष्यमते—प्रतिपुरुषमिति यस्य पितेति वाक्ये
शब्दतोऽनिर्दिष्टपुरुषाणामपि ग्रहणम्; मतान्तरे तु तद्वाक्ये शब्द-
तो निर्दिष्टनामेव त्रयाणां ग्रहणमिति । तत्र प्रथममते यत्रैकाद-
शपुरुषपर्यन्तस्य यस्य पितेति वाक्ये ग्रहणम्, तत्रापि प्रतिपुरुषमि-
त्यस्य नासंकोचेन प्रवृत्तिरिति समानमेव । एवं च सर्वत्वमाधि-
कारिकमिति न्यायेन प्रकृतानामेव त्रयाणामेकादशानां वा संख्य-
या संवत्सरसंख्याव्यवस्थापनस्य युक्तत्वात् यस्य पितेति वाक्ये
च एकादशानामप्रकृतत्वात् कथं प्रतिपुरुषं संख्यायेत्यस्य शास्त्रि-
महोदयशिष्यमते स्वारस्यम् ? एतेन—यावतः पदमपि—व्याख्या-
तम्; तस्यापि एकस्य द्वयोः त्रयाणां वाऽनुपनीतत्वे इत्यर्थबोधन एव
तात्पर्यात् । न चात्र गुरुणि गुरु लघुनि लघु इति न्याय एकान्त-
तः शास्त्रिमहाशयशिष्याणामपि संमतम् । अन्यथा त्रयोदशाद्यनुप-
नीतत्वे त्रयोदाशवत्सरादिप्रायश्चित्तविधानापत्त्या त्रयोदशाद्यनु-

पनीतत्वेऽपि द्वादशवार्षिकप्रायश्चित्तव्यवस्थानमनुपपन्नमेव स्यात्। तथाच यस्य प्रपितामहादीतिवाक्येऽपि त्रिपुरुषपतितसावित्रीका एव विवक्ष्यन्त इत्येवाभ्युपगमनीयम्। अत एव-हि-त्रिपुरुषं पतितसावित्रीकाणामपत्येऽसंस्कारो नाध्यापनं च। तेषां संस्कारेप्सुर्व्रात्यस्तोमेनेष्ट्वा काममधीयीरन्, व्यावहार्या भवन्तीति कातीयं सूत्रमुपपद्यते। अत्र त्रयाणां पुरुषाणां व्रात्यस्तोमेनाध्ययनादिसर्वव्यवहारयोग्यत्वम्, चतुर्थस्य तु संस्कारमात्रम्, नाध्यापनादिकमिति प्रतीयते। यत्तु व्रात्यसंस्कारमीमांसायां द्वादशवार्षिकप्रायश्चित्तेनोपनयनसंस्कारमात्रम्, व्रात्यस्तोमेन तु सर्वाधिकारसिद्धिरिति वर्णितम्, तत्र कातीयसूत्रे चतुर्थस्यापि व्रात्यस्तोमस्याविधानात् द्वादशवार्षिकव्रात्यस्तोमयोर्भिन्नविषयत्वान्नोपपन्नम्।

अत्र सर्वत्र मते सर्वेषां व्रात्यानामकृतप्रायश्चित्तानां शूद्रसमत्वे मन्त्रपूर्वककर्मानधिकारे च न विवादः। अत्रानुसन्धेयानि स्मृतिवचनानीमान्येव। तानि यथा—

मनुः—अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः।
सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः॥
न ह्यस्मिन् युज्यते कर्म किञ्चिदामौञ्जीबन्धनात्।
नाभिव्याहारयेद् ब्रह्म स्वधानिनयनादृते॥
शूद्रेण हि समस्तस्माद्यावद् वेदे न जायते।
शूद्राणां तु सधर्माणः सर्वेऽपध्वंसजाः स्मृताः॥
नैतैरपूतैर्विधिवदापद्यपि हि कर्हिचित्।
ब्राह्मान् यौनांश्च सम्बन्धानाचरेद् ब्राह्मणैः सह॥

याज्ञवल्क्यः—अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः।

सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः ॥

शङ्खः—नातिवर्तेत सावित्रीं अत ऊर्ध्वं निवर्तते ।

विज्ञातव्यास्त्रयोऽप्येते तथाकालमसंस्कृताः ॥

सावित्रीपतिता व्रात्याः सर्वधर्मबहिष्कृताः ।

यमः—सावित्रीपतिता व्रात्याः परिहार्याः प्रयत्नतः ॥

आश्वलायनः—

अत ऊर्ध्वं पतन्त्येते द्विजत्वं प्राप्नुयुर्यदि ।

मन्त्रकर्मपरिभ्रष्टा यास्यन्ति व्रात्यतामिह ॥

नैनानुपनयेन्नाध्यापयेन्नैभिर्व्यवहरेयुरिति ।

मन्त्रयोन्यर्थसम्बन्धस्तैर्न कार्यः कथञ्चन ।

शिष्टेन धर्मनिष्ठेन शुभकर्म प्रयत्नतः ॥

वसिष्ठः—न ह्यस्य विद्यते कर्म किञ्चिदामौञ्जीबन्धनात् ।

वृत्त्या शूद्रसमस्तावद्यावद्वेदे न जायते ॥

बोधायनः—नास्य कर्माणि यच्छन्ति किञ्चिदामौञ्जीबन्धनात् ।

वृत्त्या शूद्रसमो ह्येष यावद्वेदे न जायते ॥ इति ॥

कृतप्रायश्चित्तानां तु त्रयाणां पुरुषाणां कृतप्रायश्चित्तचतुर्थोत्पन्नपञ्चमादीनां च सर्वाधिकारसिद्धिः, चतुर्थस्य परं संस्कारमात्रमिति केचित् । अन्ये तु सर्वेषां व्यवहार्यत्वमिति । अत्र प्रथमते आपस्तम्बसूत्रं कातीयसूत्रं च प्रमाणम्, इतरत्र तु प्रमाणं मृग्यम् । यत्तु पञ्चमादीनामपि उपनयनमात्रम्, नाध्यापनादिकमिति हरिहरभाष्यम्, तदिदं कृतप्रायश्चित्तोत्पन्नपञ्चमादिविषयमिति केचित् । अन्ये तु कृतप्रायश्चित्तचतुर्थपञ्चमादिविषयमिति । तत्र च व्यवस्था पूर्वोद्धृतप्रमाणानुसारिणी पण्डितैः सुविज्ञेयैवेत्येतावन्मात्रमत्रोपवर्ण्यते—यत् येषु प्रायश्चित्तविधिर्वर्तते, तेषु

केषांचन सर्वाधिकारसिद्धिः केषांचनोपनयनादिमात्रमिति। अधिकं वीरमित्रोदयादवगन्तव्यम्।

अत्र च शंका समुन्मिषति—यत् भिन्नभिन्नप्रायश्चित्तबोधकानामधो निर्दिश्यमानानां वचनानां कथमविरोधः, किं तत्र विकल्पः; उत व्यवस्थाविशेषः कोऽपीति। तानीमान्यत्रानुसन्धेयानि वाक्यानि—

यमः—सावित्री पतिता यस्य दश वर्षाणि पञ्च च।
सशिखं वपनं कृत्वा तत्र कुर्यात्समाहितम्॥
„ एकविंशतिरात्रं च पिबेत् प्रसृतियावकम्।
हविष्यं भोजयेच्चैव ब्राह्मणान् सप्त पञ्च वा॥
ततो यावकशुद्धस्य तस्योपनयनं स्मृतम्॥ इति॥

मनुः—येषां द्विजानां सावित्री नानूच्येत यथाविधि।
ताँश्चारयित्वा त्रीन् कृच्छ्रान् यथाविध्युपनाययेत्॥

आपस्तंबः—अतिक्रान्ते सावित्र्याः काले ऋतुं त्रैविद्यकम् ब्रह्मचर्यं चरेदथोपनयनम्; ततः संवत्सरमुदकोपस्पर्शनमथाध्याप्यः।

वसिष्ठः-पतितसावित्रीक औद्दालकं व्रतं चरेत्, द्वौ मासौ यावकेन वर्तयेत् मासं पयसाऽर्धमासमामिक्षयाऽष्टरात्रं घृतेन त्रिरात्रमभक्तोऽहोरात्रमुपवासश्च। एवमश्वमेधावभृतं वा गच्छेत्, व्रात्यस्तोमेन वा यजेतेति।

इदमत्र समाधानम्—सर्वेषां वचनानां गुरुणि गुरु लघुनि लघु इति न्यायेन व्यवस्था संभवत्येव। यथा यमवचनं षोडशाब्दे उपनयनविषयम्। एकविंशतिरात्रं चेति सप्तदशवर्षोपनयनविषयम्, एवमपराण्यप्यष्टादशोनविंशतिविंशत्येकविंशतिद्वाविंश-

तित्रयोविंशतिचतुर्विंशत्यादिवर्षोपनयनपराणि । अधिकं चात्रानुसन्धेयं वीरमित्रोदये व्यक्तम् । तथाचात्र न कोऽपि विरोधः ।

एतेन —त्रिपुरुषं पतितसावित्रीकाणामित्यत्र त्रिपदमप्युपलक्षणमिति शंकापि परास्ता । सत्यं द्वादशवार्षिकप्रायश्चित्तापेक्षया गुरुतरो व्रात्यस्तोमः, नहि तावता विना वचनं बहुपुरुषानुपनीततायामपि तत्प्रवृत्तिकल्पनं युक्तम् ; अन्यथा व्रात्यस्तोमस्य माणवकमात्रस्य कालातिक्रमे त्रयोविंशादिवयस्युपनयनेऽनुष्ठेयत्वानापत्त्योक्तवीरमित्रोदयविरोध आपद्येत । नहि वयमपि गुरुणि गुरु लघूनि लघु इति न्यायं न स्वीकुर्मः, किन्तु यत्र वचनेन विषयविशेषो निर्धारितस्तत्र तं नोरीकुर्मः । अत्र तु व्यवस्थाया वाचनिकत्वान्न विरोधः । व्रात्यस्तोमस्य गुरुतरस्यापि त्रयाणामेव कातीयवचनने विधानात् चतुर्थापत्यस्य तदादेर्वा न संस्कारो न वाऽध्यापनं न वा व्यवहार्यत्वमित्येव कातीयसूत्राशयः । अत एव कर्काचार्यैरत्र अपत्ये संस्कार इति अकारप्रश्लेषः कृत उपपद्यत इति केचित् । एतेन—तेषामपत्ये संस्कारो न अध्यापनं च नेति गदाधर वृत्तिरपि—व्याख्याता । अत्र च पक्षे आपस्तम्बवचनेन यस्य प्रपितामहादि नानुस्मर्यते इत्याकारकेण विरोधः प्रतीयते, यतः चतुर्थापत्यस्यापि तत्र प्रायश्चित्तं विहितम्, तथापि संस्काररत्नमालाहृतपाठेन तु यस्य पितामहादि नानुस्मर्यते इत्याकारकेण न विरोधः । यतस्तत्र पितुरारभ्यानुपनीतत्वे पूर्वोक्तरीत्या न प्रायश्चित्तादिकल्पनावसरः । वस्तुतस्तु—यस्य प्रपितामहादि नानुस्मर्यत इति पाठेऽपि चतुर्थस्यैव प्रायश्चित्तम्, न तु चतुर्थोत्पन्नस्य । तत्रापि संस्कारमात्रमेव, न वेदाध्ययनमिति खल्वापस्तम्बसूत्रेण विज्ञायते । अत एव—तेषामिच्छतां प्रायश्चित्तं द्वादशवर्षाणि

त्रैविद्यकं ब्रह्मचर्यं चरेदथोपनयनम्। तत उदकोपस्पर्शनमित्यादि विवेचनानन्तरम्—अथ गृहमेधोपदेशनमिति गृह्यमन्त्रोपदेशमात्र एवाधिकारः, न त्वाध्यापन इति—"नाध्यापनमित्यनेन प्रतिपादितमुपपद्यते। तथाच चतुर्थस्योपनयने गृह्यमन्त्रमात्राधिकारः चतुर्थोत्पन्नस्य तूपनयनमात्रम्, न गृह्यमन्त्रोपदेशनेऽप्यधिकारः, तदपत्यस्य तूपनयनाधिकारोऽपि न, इत्येवापस्तम्बाचार्यानमतः पन्था इति चतुर्थापत्यस्योपनयनमात्रं नाध्यापनमिति कातीयसिद्धान्ते न कोऽपि विरोधः। इदं—त्रिपुरुषं पतितसावित्रीकाणामपत्ये संस्कारो नाध्यापनञ्चचेत्यत्र संस्कार इति च्छेदानुसारि विवरणम्। इदमेव विवरणम् हरिहरसंमतम्। तदुक्तम्— तद्भाष्ये— ये पित्रादयस्त्रयः पतितसावित्रीकाः तेषामपत्ये संस्कारः उपनयनं भवति, न पुनश्चतुर्थादीनाम्; तेषामुपनीतानामपि अध्यापनं न भवति; उपनयनस्यैव प्रतिप्रसवादिति। अयमेव च पक्षो जयराममभाष्यसंमतोऽपि। सर्वथा तु श्रीहरहरादिभाष्यानुसरणे आपस्तम्बकात्यायनसूत्रयोरविरोधेनैकवाक्यतायाः संभवात्, चतुर्थापत्यादेरसंस्कार्यतायामव्यवहार्यतायामेव च तात्पर्यस्योरीकरणीयत्वात् परम्पराचतुष्टयातिक्रमे व्रात्यसंस्कारयोग्यता नास्तीति सिद्धम्। एतेन—प्रपितामहस्य पितुरारभ्यानुपनीतत्वे तु प्रायश्चित्तं नोक्तम्, धर्मज्ञै रूहितव्यमित्युज्ज्वलावृत्तिरपि—व्याख्याता। अनया हि वृत्त्येदमेव विवक्ष्यते—यत् चतुर्थापत्यस्य द्वादशवार्षिकद्व्यादिप्रायश्चित्तकल्पनम् कर्तुं योग्यम्, परं तु गृह्यमन्त्रोपदेशादिकं व्यवहारो वा न कर्तव्य इति। एवंचोज्ज्वलाकाराणामपि चतुर्थापत्यस्योपनयनमात्रबोधने, उपनयनस्याप्यभावबोधन एव वा तात्पर्यान्न कोऽपि विरोधः।

एतेन—आपस्तम्बकात्यायनवचनयोरेकवाक्यतैव न संभवति; भिन्नविषयत्वात्, कात्यायनो हि प्रायश्चित्ताननुष्ठानदशाया-मनधिकारं संस्काराध्ययनयोर्ब्रूते, आपस्तम्बस्तु प्रायश्चित्तानुष्ठा-नदशायां संस्काराधिकारितामुपयनानधिकारितां चेति व्रात्यसंस्का-रमीमांसोक्तिरपि—परास्ता । तथाच यस्य प्रपितामहादि नानु-स्मर्यते, यस्य त्रिपुरुषं नानुस्मर्यत इति चानर्थान्तरमेवेति प्रपिता-महमारभ्य बहुपुरुषानुपनीततोदशायामपि व्रात्यसंस्कारयोग्यता-व्यवस्थापनं व्रात्यसंस्कारमीमांसागतमनुपपन्नमेव । अन्यथा जात्या म्लेच्छानामपि कथं वा व्रात्यसंस्कारयोग्यतापत्तिः खण्डि-ता श्रीराममिश्रशास्त्रिभिरेव। जात्या म्लेच्छानां तु न व्रात्यसंस्कार-योग्यतेति तेषां मतमिति पूर्वमेव निरूपितम् । अत एव व्रात्यसं-स्कारेण म० म० शिवदत्तशर्मणां मलकानाशुद्धिव्यवस्था म०म० श्रीगिरिधरशर्मप्रभृतिभिरप्यनुमोदिता न सावसरा सञ्जाता । नहि म्लेच्छजातिरिति काचन जातिरस्ति, उपनयनादिसंस्कारायोग्याऽ-व्यवहार्यजातिविशेषा एव कालेन म्लेच्छतां यवनतां वा प्राप्ताः । ततश्च तेषां परं न व्रात्यसंस्कारायोग्यतेति सिद्धान्त इव चतुर्थाप-त्यादीनां संस्कारायोग्यतासिद्धान्तोऽप्यकामैरप्यभ्युपगमनीय एव । यथाहि आऽङ्गनागोपालबालं म्लेच्छशूद्रादिसंस्कारस्यानानुभाविक-त्वम्, एवं चतुर्थव्रात्यापत्यादीनामपि तत् समानमेव । अन्यथा हि संशयस्यैवानवसरादप्रसक्तप्रतिषेधाद्यापत्तिः । एतेन—यस्य प्रपि-तामहादीत्यादिपदमपि—व्याख्यातम् । आदिपदं ह्यत्र वृद्धप्रपिता-महमारभ्यानुपनीतत्वेऽपि शूद्रसाधारणहरिहरभाष्योक्तोपनयनमा-त्राधिकारः, अनन्तरं तु द्वादशवार्षिकावृत्तौ तस्याप्यभाव इत्यादि-बोधनेन सार्थकमेव। अत्रापरमपि कल्पनीयं सूत्रकारो मन्यते इति

ज्ञायते—यत् प्रपितामहपर्यन्तमनुपनीतत्वे प्रपौत्रस्य गृह्यमन्त्रमात्त्रोपदेशनम्, तत्पुत्रस्य तु यथा सर्वत्रेदाध्ययनादिकम्, एवं वृद्धप्रपितामहपर्यन्तमनुपनीतत्वे प्रपौपुत्रस्य गृह्यकर्ममात्राधिकारः, तत्पुत्रस्य सर्ववेदाध्ययनादिकमिति। अनेन चेदमपि सूच्यते—द्वादशवार्षिकप्रायश्चित्तेन गृह्यकर्ममात्राधिकारः, तदधिकेनोपनयनमात्रम्, तदधिके तु तस्याप्यभाव इति। एतादृशे चातिगभीरे विषये धर्मतत्त्वमर्मज्ञाः पण्डितप्रवरा एव प्रमाणम्। तदिदं सिद्धम्—यत् न व्रात्यानां बहुपरम्परातिक्रमेऽपि संस्कारयोग्यतेति।

अथ वृद्धानामपि व्रात्यसंस्कारयोग्यता भवति वा न वेति विचारे त्वस्माकमिदमेव प्रतिभाति—यत् ब्राह्मणानां सर्वास्वप्यवस्थासु व्रात्यसंस्कारयोग्यता भवति, न तथा क्षत्रियादीनामपि। अत्रानुसन्धेयानि वीरमित्रोदयवाक्यानीमान्येव। तानि यथा—एवं क्षत्रियवैश्ययोरपि द्वाविंशाच्चतुर्विंशादूर्ध्वं यथोक्तक्रमेणैवैतानि प्रायश्चित्तानि पादहान्या कल्पनीयानि। अत ऊर्ध्वं आतृतीयकालसमासेर्व्रात्यस्तोम एव दक्षिणाधिक्यपक्षाश्रयणेन योजनीयः। तृतीयकालादूर्ध्वं गौणतमोऽपि कालो नास्तीति क्षत्रियवैश्ययोः पातित्यमेव, न ब्राह्मणस्य, न ब्राह्मणः पतनमृच्छतीति गौतमेन ब्राह्मणपक्षे तन्निषेधात्।

जातापत्यानां संस्कृतानां पत्न्यपि संस्करणीयैवेति पक्ष एवास्माभिरपि शास्त्रमस्त्रपक्षपातिभिरूरीक्रियत इति नात्र मतभेदलेशोऽपि। एतेन—यस्य वेदश्च वेदी च विच्छिद्येते त्रिपुरुषम्। स वै दुर्ब्राह्मणो ज्ञेय इति वाक्यमपि व्याख्यातम्। द्वौ ब्राह्मण्ये हि निमित्तं त्रिपुरुषं वेदवेद्युभयविच्छित्तिः, तत्र च हविरार्त्यधिकरणन्याये द्वित्वमिव त्रिपुरुषसम्बन्धोऽप्यविवक्षित एव। तथा-

चैकपुरुषविच्छेद इव बहुपुरुषविच्छेदोऽपि तत् निमित्तमेवेति न काप्यनुपपत्तिः। प्रकृतस्थले तु त्रिपुरुषं पतितसावित्रीकापत्ये संस्कायतानिषेधबोधनात् संस्कारविधिवाक्ये एतदतिरिक्तस्योपादेयत्वमेव विवक्षयते इति चमसाध्वर्यून् वृणीते, स्वाध्यायोऽध्येतव्य इत्यादाविवोद्देश्यविशेषणस्यापि विवक्षा वर्तते इति त्रिपुरुषमात्रपतितसावित्रीकाणामेव विवक्षेति न कोऽपि दोषः। अन्यथा त्रिपदस्योपलक्षणत्वेऽपि यथा पञ्चमादिपुरुषापत्यस्यासंस्कार्यत्वमेवं प्रथमापत्यस्यापि तदापत्त्या महाननाश्वासः स्यात्। अकृतप्रायश्चित्तावस्थायामसंस्कार्यत्वविवक्षणं तु नात्र संभवति; अत उर्ध्वं पतितसावित्रीका भवन्ति नैनानुपनयेयुर्नाध्यापयेयुर्नचैभिर्व्यवहरेयुरित्यनेन कृतार्थत्वात्पुनरुपादानमत्र निष्फलं स्यात्। तथा च त्रिपुरुषं पतितसावित्रीकाणां (त्रयाणां पतितसावित्रीकाणामिति यावत्) प्रायश्चित्ताभाव बोधन एव—"त्रिपुरुषं पतितसावित्रीकाणामपत्यऽसंस्कार इति सूत्रस्य तात्पर्यमूरीकर्तव्यम्। यथा चैवं सत्येव सर्वेषामेकवाक्यता, तथोपपादितमधस्तात्। तथाच व्रात्यानां पतितोपनीतबहुपरम्पराणां कथंचन तान्त्रिकदीक्षाधिकार एव संभवति,न तु बाह्यकर्माधिकारो नवा वेदाध्ययनाद्यधिकार इत्येव युक्तम्। इदं सर्वमभिप्रेत्यैव श्रीनागोजिभट्टैः स्वीये व्रात्यताप्रायश्चित्तनिर्णये उक्तम्—

अथाऽनेकपुरुषपतितसावित्रीकविषये आपस्तम्बेन निषिद्धस्योपनयनस्य प्रतिप्रसवं वदन् कियत्पर्यन्तं संस्कार्यतेत्याकांक्षायां नियममाह—त्रिपुरुषं पतितसावित्रीकाणामपत्ये संस्कारो नाध्यापनञ्च'। त्रिपुरुषमिति "संख्या वंश्येन" इत्यव्ययीभावः। पतितसावित्रीकाणां वंश्यानां त्रयाणां पुरुषाणां यदपत्यञ्चतुर्थं तत्र संस्कार

उपनयनं भवति, अध्यापनन्तु नेति तदर्थः। चस्त्वर्थे। तदधिकपतितसावित्रीकस्य तु न। तदाह हरिहरः—प्रपितामहस्य पितरमारभ्य चतुर्णां पतितसावित्रीकाणामपत्ये तु न संस्कारः; पूर्वनिषेधात्' इति। 'यस्य प्रपितामहादि' इति प्रक्रम्य उपनयनं नाध्याप्य इत्यापस्तम्बोक्तेरप्ययमेवार्थ उचितः। यत्तु कात्यायनसूत्रव्याख्यात्रा गदाधरेण—तेषामपत्ये संस्कारो नाध्यापनञ्च न' इत्येवमेतत् सूत्रं व्याख्यातम्। हरिहरस्तु मृग्य इति चोक्तम्, तदनेन परास्तम्, पूर्वनिषेधेनैव सिद्धेश्च, तस्य च बहुदोषश्रवणाद् बहुपुरुष पतितसावित्रीकविषयत्वेऽपि संस्काराभावेऽध्यापनाप्रसक्त्या नाध्यापनमित्यस्य वैयर्थ्यापत्तेश्च।

न च चतुरादिपुरुषपर्यन्तं पतितसावित्रीकाणामपत्ये त्रिपुरुषं पतितसावित्रीकाणामपत्यत्वमप्यस्तीति वाच्यम् व्यापकसंख्याव्यवहारविषये व्याप्यसंख्याव्यवहाराभावात्। अत एव न हि त्रिपुत्रो द्विपुत्रव्यपदेशत्वं लभत इति 'अ इ उण्' सूत्रे भाष्ये उक्तम्। अन्यथाऽत्र बहुपुरुषमित्येव वदेत्। एवञ्चैतदेकवाक्यतया 'यस्य प्रपितामहादि' इत्यापस्तम्बस्मृतिरपि त्रिपुरुषं पतितसावित्रीकविषयैव। किञ्च यद्वंशे नोपनयनं स्मर्यत इत्येव सिद्धे यस्य प्रपितामहादीति विशिष्योक्तिर्निष्फला। अत एव धर्मशास्त्रैस्तु विहितमिति वाक्ये हरदत्तेन तु नाऽरुचिर्बोधिता। तद्बीजन्तूक्तमेव, स्मृत्योरेकमूलकल्पनालाघवानुरोधेनैकार्थ्ये सम्भवति भिन्नार्थत्वमन्याय्यमिति सर्वधर्मशास्त्रनिबन्धकृतां सिद्धान्तात्।

अभ्युपेत्याऽपि ब्रूमः—पूर्वे इत्यत्र 'कपिञ्जलाधिकरण' न्यायेन त्रयाणामेव ग्रहणापत्तौ सप्तमस्योपनयनलाभेऽपि तदूर्ध्वस्याष्टमादेरुपनयने मानाभावः। किञ्चायं प्रायश्चित्तविधिर्येषां वंश उपनयनं

स्मर्यते तद्विषये एव, न तु तदस्मरणे। यस्य प्रपितामहादीत्येतद्विषये पावमान्यादिभिः स्नानमित्यर्थके प्रतिपुरुषं संख्याय संवत्सरानित्येतदत्रापि द्रष्टव्यमिति हरदत्तोक्तेः। तदस्मरणे तद्गणनाया असम्भवात्। किञ्च—

जात्युत्कर्षो युगे ज्ञेयः सप्तमे पञ्चमेऽपि वा।
व्यत्यये कर्मणां साम्यं पूर्ववच्चाधरोत्तरम्॥

इति याज्ञवल्क्यस्मृतिविरोधान्न पञ्चमादीनामुपयनम्। तथा हि सा स्मृतिरित्थं विज्ञानेश्वरेण व्याख्याता। जातयो मूर्द्धावसिक्ताद्यास्तासामुत्कर्षो ब्राह्मणत्वादिजातिप्राप्तिः। युगे जन्मनि पञ्चमे, अपिशब्दात् षष्ठे बोद्धव्यः। व्यवस्थितश्चायं विकल्पः। व्यवस्था चेत्थम्—ब्राह्मणेन शूद्रायामुत्पादिता निषादी, सा ब्राह्मणेनोढा दुहितरं काञ्चिज्जनयति। सापि ब्राह्मणेनोढाऽन्यामित्यनेन प्रकारेण षष्ठी सप्तमं ब्रह्मणं जनयति। एवं ब्राह्मणेन वैश्यायामुत्पादिता षष्ठी साऽप्यनेन प्रकारेण पञ्चमी षष्ठं ब्राह्मणं जनयति। ब्राह्मणेन क्षत्रियायामुत्पादिता मूर्द्धावसिक्ता साप्यनेन प्रकारेण चतुर्थी पञ्चमं ब्राह्मणं जनयति। एवं शूद्रायां क्षत्रियजोग्रा क्षत्रियेणोढा क्रमेण पञ्चमं क्षत्रियं जनयति। वैश्यायां क्षत्रियजा माहिष्या क्षत्रियोढा क्रमेण पञ्चमं क्षत्रियं जनयति। तथा करणी वश्योढा पञ्चमं वैश्यमित्याद्यूह्यम्। तथा कर्मणां वृत्त्यर्थानां व्यत्यये विपर्यासे सप्तमषष्ठपञ्चमेषु तत्साम्यम्। तथा हि ब्राह्मणो मुख्यया वृत्याऽजीवन् क्षात्रेण कर्मणा जीवेदित्यनुकल्पः। तेनाऽप्यजीवन् वैश्यवृत्या तथाप्यजीवन् शूद्रवृत्या। एवं क्षत्रियस्य वैश्यशूद्रवृत्ती अनुकल्पः। वैश्यस्य शूद्रवृत्तिरिति। एवं कर्मणां विपर्यये सति यद्यापद्विमोक्षेऽपि तां वृत्तिं न त्यजति,

तदा सप्तमादिजन्मनि साम्यं यस्य हीनवर्णस्य कर्मणा जीवति तत्समानजातिः। तद्यथा ब्राह्मणः शूद्रवृत्त्या जीवन् यदि पुत्रमुत्पादयति, सोऽपि तथैव वृत्त्या जीवन् पुत्रान्तरमित्येवं परम्परायां सप्तमं शूद्रमेव जनयति। वैश्यवृत्त्या जीवन् षष्ठे वैश्यम्। क्षत्रियवृत्त्या जीवन् पञ्चमे क्षत्रियम्। क्षत्रियोऽपि शूद्रवृत्त्या जीवन् षष्ठे शूद्रम्। वैश्यवृत्त्या जीवन् पञ्चमे वैश्यम्, शूद्रवृत्त्या जीवन् तामपरित्यजन् पुत्रपरम्परया तदत्यागे पञ्चमं शूद्रं जनयति। पूर्ववच्चाधरोत्तरमपि वर्णसङ्करा अनुलोमाः प्रतिलोमाश्च दर्शिताः। तत्र मूर्द्धावसिक्तायां क्षत्रियवैश्यशूद्रैरुत्पादिता अम्बष्ठायां वैश्यशूद्राभ्यां निषाद्यां शूद्रेणोत्पादिता अधराः प्रतिलोमजा इत्यर्थः। एवं मूर्द्धावसिक्ताम्बष्ठीनिषादीषु ब्राह्मणोत्पादिता माहिष्योग्र्योर्ब्राह्मणक्षत्रियाभ्यां करण्यां ब्राह्मणक्षत्रियवैश्यैरुत्पादिता उत्तरेऽनुलोमजा इत्यर्थः।

वैश्याशूद्र्योस्तु राजन्यान्माहिष्योग्रौ सुतौ स्मृतौ।

वैश्यात्तु उपनयाभावादेव ब्राह्मणादिवृत्तिहीनतया शूद्रवृत्त्यैव जीवनञ्चेति दोषाधिक्याद्स्य पञ्चमे शूद्रताप्राप्त्योपनयनप्राप्त्यभावात्। एवमेवंविधस्य क्षत्रियस्य तुर्ये एव शूद्रता, न हि शूद्रस्य प्रायश्चित्तसहस्रैरप्युपनयनार्हता भवति। न हि शूद्रवृत्त्या जीवतो ब्राह्मणस्यापि सप्तममपत्यमुपनयनार्हमिति कस्यापि सम्मतम्। 'कर्मणां व्यत्यये साम्यम्' इत्यस्य तज्जातिधर्मप्राप्त्यर्थातिदेशरूपत्वात्। एतन्मूलकमेव कात्यायनेन ब्राह्मणविषये चतुर्थस्यैवोपनयनमुक्तम्, न पञ्चमादीनाम्। एवञ्च तुल्यन्यायात् क्षत्रियस्य तादृशस्य तृतीयस्यैवोपनयनञ्च चतुर्थादेः, वैश्यस्य द्वितीयस्यैव न तृतीयादेः। वस्तुतः क्षत्रियवैश्ययोः प्रथमव्रात्यपुत्रयोरपि नोपनय-

नर्हतेति प्रागुक्तम् । एतन्मूलकमेव हरदत्तेनापि पञ्चमादेः प्रायश्चित्तं नोक्तमित्युक्तम्, तदनर्हत्वादिति तदाशयः । एवं जातापत्यानां पितृपितामहप्रपितामहादीनामपि नोपनयनम्, 'यस्य प्रपितामहादि' इत्यापस्तम्बोक्तेः, 'पतितसावित्रीकाणामपत्य' इति कात्यायनोक्तेश्च । किञ्चोपनयनं संस्कार आश्रमप्राप्तिद्वारं यथाधानं संस्कारो यज्ञद्वारम् । एवञ्च प्रागेव गृहस्थाश्रमप्राप्तौ तदनुष्ठानवैफल्यं तत्प्राप्त्याश्रमाभावादिति दिक् । 'त्रिपुरुषं पतितसावित्रीकाणामपत्ये संस्कारो नाऽध्यापनञ्च' इति सूत्रान्तरम् । 'तेषां संस्कारेप्सुर्व्रात्यस्तोमेनेष्ट्वा काममधीयीरन् व्यवहार्या भवन्ति, इति सूत्रम् । तदित्थं व्याचक्षते केचित्—स चतुर्थस्य संस्कारः कथं कर्तव्यस्तत्राह—तेषां संस्कारेप्सुर्व्रात्यस्तोमेनेष्ट्वा संस्कारं कुर्यादिति शेषः । संस्कार उपनयनम्, तेषां पतितसावित्रीकाणां वंश्यानां त्रयाणां पुरुषाणां यान्यपत्यानि तेषां मध्ये यः संस्कारेप्सुः संस्कारं प्राप्तुकामः स व्रात्यस्तोमेनेष्ट्वा गुरुणाऽऽत्मानं संस्कुर्यादित्यर्थः ।

ननु व्रात्यस्तोमैर्यक्ष्यमाणः पृथगग्नीनाधाय यज्ञोपकरणानि चेष्ट्वा 'य एतेषामध्ययने नाभिक्रान्ततमः स्यादभिजनेन तदभावेऽति भोगलाभेन तस्य गार्हपत्ये दीक्षेरन् भक्षांश्चाऽनुभक्षयेयुः' इति छन्दोगगृह्ये उक्तत्वेनोपनयनात्प्राक् कथन्तत्राधिकारः ? इष्ट्वा सम्पाद्य अभिक्रान्ततमोऽतिशयेन उत्कृष्ट इति यावत्, भोगो धनम् अत्यन्तं क्रूरकर्मा यस्तेषां स वा गृहपतिः' इति कात्यायनसूत्रे उक्ते व्रात्यस्तोमाथमेवाऽऽधानेन पृथगग्नीनुत्पाद्य विद्यया धनेन कुलेन क्रूरकर्मणा चासम्पन्नस्य गृहपतेरग्निषु त्रयाणां त्रयाणां स्वाग्नीन् निचाय्यङ्कृत्वा व्रात्यस्तोमदीक्षाङ्कुर्युः, इतरे च व्रात्यास्तु गृहपतेर्भक्षमनु सोमादि भक्षयेयुरिति तदर्थः । मानवेऽपि

सूत्रे अग्नीनाधाय गृहपतेरग्निषु संयुज्य यजेरन्निति। पूर्वोक्ताः पतितसावित्रीकाः व्रात्याः। अन्येऽपि द्विजातिकर्महीना विहिताकर्तारो निषिद्धकर्तारः क्रूरकर्माणो व्रात्याः। (१) एतद्धि ताण्डिब्राह्मणे स्पष्टम्। अयञ्च गणयज्ञो गणत्रयस्त्रिंशताम्। 'त्रयस्त्रिंशद्देवान्प्राध्नर्यन्' इति ताण्डिश्रुतेः (?)। 'तेषां ते प्रत्येकं त्रयस्त्रिंशतं त्रयस्त्रिंशतं गा दक्षिणा दद्याः ऋत्विग्भ्यः'(?) इति ताण्ड्सूत्रम्। 'तान् व्रात्यानन्ये ब्राह्मणा ऋत्विजो भूत्वा याजयेयुः' इति देवयाज्ञिकः। 'इमा गावो व्रात्येभ्यो देयाः येऽस्मा एतद्ददति तस्मिन्नेव मृजान्नवन्तीति साधारण्योक्तेः'(?) इति ताण्डिब्राह्मणभाष्यम्। एवञ्चान्ये व्रात्या एव तत्र ऋत्विज इति लभ्यते। तत्कथमस्मिन्ननुपनीतानामधिकार इति चेन्न; वचनादेव तेषामप्यधिकारात्। तथाच कात्यायनगृह्यकारिकाकृत्—

अथार्थस्यानधीतस्य स्यादाधानं तदर्थवत्।

इति। इदमनुपेतस्याप्युपलक्षणम्। तदुपयोग्यध्ययनमपि तेषां भवति; त्रिवर्षस्य पित्रादिक्रियोपयोगिमन्त्राध्ययनवत्। निषादस्य च अवकीर्णिनो गर्दभेज्यो(?)लौकिके वैतानिकेषु सर्वमित्यधिकारे कात्यायनोक्तेरिति देवयाज्ञिकः। कर्कस्तु तेषां लौकिके शावे(?) च व्रात्यस्तोमाद्वा अपत्नीकस्यानधीतवेदस्याकृताधानस्यावकीर्णी पशुश्च तद्वदिति षाष्ठन्यायेन वचनादधिकारो लौकिकाग्नौ च स इति वृद्धशङ्करभट्टाश्च। कात्यायनस्मृतावकीर्णिनो गर्दभेज्येति। अनाहिताग्निकर्तृककर्मोपलक्षणमिति तदाशयः। युक्तञ्चैतत् स्मृतेर्न्यायसिद्धार्थत्वलाभात्। ते च व्रात्यस्तोमाश्चत्वारस्तेषामितिकर्तव्यतास्तदधिकारिणश्च कात्यायनसूत्रछन्दोगसूत्रताण्डिब्राह्मणेषु स्पष्टाः। संस्कृतानामपि तेषां पूर्वं निषिद्धमध्ययनं पुनराह—'काममधीयीरन्

व्यवहार्य्या भवन्ति' इति । वचनादिति । व्रात्यस्तोमेनेत्यनुवर्तते तेनैव पुनरिष्ट्वा कामं वेदमधीयीरन्नित्यर्थः । व्रात्यस्तोमेन पतिता अपि व्यवहार्या भवन्ति, अध्यापनादियोग्या भवन्तीति । वचनात् श्रुतेरित्यर्थः । 'एतेन पाप्मनो विनिर्मुच्यते इति व्रात्यस्तोमं प्रक्रम्य ताण्डिब्राह्मणोक्तेः 'व्रात्यस्तोमेन यजेत पुनस्सवनमायाति' इति बौधायनगौतमादिधृतश्रुतेश्च । तत ऊर्ध्वं भुञ्जीतापि चैतान् कामं याजयेत्' इति छान्दोगसूत्राच्चेति वदन्ति; तदयुक्तम्; याज्ञवल्क्येन प्रथमेऽतिक्रमे एव तदुक्तेः । अत एव विज्ञानेश्वरेण याज्ञवल्क्यमन्वादिवचांस्युदाहृत्य पित्रादीनामनुपेतत्वे त्वापस्तम्ब आहेत्युक्तम् । तस्मादापस्तम्बोक्तप्रायश्चित्तेनोपनयनसंस्कारः, अध्ययनाधिकार एव तु व्रात्यस्तोमेन । सूत्रार्थस्त्वेवं तेषां पतितसावित्रीकापत्यानां मध्ये ये संस्कारेप्सवो वेदाध्ययनजसंस्कारप्राप्तिकामा इति । जातावेकवचनम् । व्रात्यस्तोमेनेष्ट्वा काममधीयीरन् इत्यर्थः । शिष्टः प्राग्वदिति । इतरे तु सावित्रीपतितसंज्ञकत्वं व्रात्यसंज्ञकत्वञ्च षोडशाद्यूर्ध्वमनाचरिताऽऽपस्तम्बोक्तव्रतानां जातोपनयनानामेव ।

अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः ।

सावित्रीपतिता व्रात्याः—

इति याज्ञवल्क्यवाक्ये अत ऊर्ध्वमापस्तम्बोक्तप्रायश्चित्तानुष्ठानं विना संस्कृता अपि ते व्रात्यस्तोमानुष्ठानं विना सावित्रीपतितसंज्ञा व्रात्यसंज्ञाश्च । अत एव सर्वधर्मबहिष्कृता इत्यर्थः । सावित्रीपतिता इत्यस्य स्वकालात्पतिता सावित्री येषामित्यर्थः । आहिताग्न्यादित्वात्परनिपातः पतितशब्दस्य । अत्रैवार्थे पतितसावित्रीका इत्यपि साधु । अत एव मनुवाक्ये—

अत ऊर्ध्वं पतन्त्येते यथाकालमसंस्कृताः।
सावित्रीपतिता व्रात्या सर्वकर्मविगर्हिताः॥

इत्यत्र यथाकालमित्युक्तिः। तेनाऽयथाकालं संस्कृता इति लभ्यते। अत एव कथमप्युपनेत्रभावेन कालातिपातकृतव्रात्यतायां निबन्धोदाहृते मनुविष्णुवाक्ये—

येषां द्विजानां गायत्री नानूच्येत यथाविधि।
तांश्चारयित्वा त्रीन्कृच्छ्रान् यथाविध्युपनाययेत्॥

इत्यस्मिन् उभयत्रापि यथाविधीत्युक्तम्। तत्र विधिश्च शास्त्रोक्त-कालिकत्वरूपः पूर्वार्द्धे। तेनाकाले उक्तेरयमर्थलाभः। उत्तरार्द्धे यथा-विधीत्यस्य पूर्वतनोपनयनस्याऽशास्त्रीयत्वात् पुनर्मुख्योपनयनवि-ध्युक्तप्रकारेणेत्यर्थः। अत एव 'यस्य पिता पितामह इत्यनुपेतौ' इति सूत्रे इत्यनुपेतावित्युक्तमितिः प्रकारे, उक्तकालिकत्वेन प्रकारे-णानुपनीतावित्यर्थः। तेनाकाले षोडशाद्यूर्ध्वप्रकृतप्रायश्चित्तावुपेतौ इत्यर्थलाभः। अत्र सूत्रेऽतिक्रान्ते सावित्र्या ते ब्रह्महसंज्ञका इत्यर्थः। अत एव 'यस्य प्रपितामहादि' इति सूत्रे स्वयञ्च यथाकाल-मनुपेत इत्युज्वलायां व्याख्यातम्। युक्तञ्चैतत्, अन्यथा त्रैवर्णि-कस्य त्रयाणामाश्रमाणां क्रमिकत्वेन वेदाध्ययनफलकब्रह्मचर्याश्रम-स्योपनयनं विनाऽसम्भवेन तत्संस्कारं विना ब्राह्मणत्वाब्राह्मणत्वा-द्यनभिव्यक्त्या विवाहसम्भवेन पुत्राद्युत्पत्तेरेवासंभवात्। यस्यां कस्याञ्चित्पुत्राद्युत्पत्तौ तु तत्र त्रैवर्णिकत्वसन्देह एव। अत एवो-पनयनान्तरं ब्रह्मचर्यं सर्वेषां समानमित्यापस्तम्बः। 'सर्वेषां गृहस्थ-वानप्रस्थयतीनाम्; तं विना कस्याप्याश्रमस्याप्रवृत्तेः' इति हरदत्तः। बोधायनोऽपि—

नास्य कर्माणि कुर्वन्ति किञ्चिदामौञ्जिबन्धनात्।

वृत्त्या शूद्रसमो ह्येष यावद्वेदैर्न जायते ॥

इति । अत एव—

वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा ।
अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् ॥

इति याज्ञवल्क्येन ब्रह्मचर्याश्रमानन्तरमेव विवाह उक्तः । ब्रह्मचर्याश्रमपरिग्रहश्च उपनयनं विना नेति ततः प्राग्विवाहाप्रसक्तिः । अविप्लुतब्रह्मचर्यः अस्खलितब्रह्मचर्यः । तत्स्खलने तु तत्स्खलननिमित्तप्रायश्चित्तपूर्वमेव विवाहः । मनुरपि—

गुरुणानुमतः स्नात्वा समावृत्तो यथाविधि ।
उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्विताम् ॥

तथा—

ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः ।
एते गृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः ॥
सर्वेऽपि क्रमशस्त्वेते यथाशास्त्रं निषेविताः ।
यथोक्तकारिणं विप्रं नयन्ति परमां गतिम् ॥

इति । गृहस्थप्रभवत्वं तदुपजीवित्वम् । अश्वस्तनवृत्त्यादेर्गृहस्थस्यापि गृहस्थोपजीवित्वाच्चतुर्णान्तद्विशेषणम् । नच गार्हस्थ्यमाचार्यकुलं मौनं वानप्रस्थमिति गार्हस्थ्योत्तरं ब्रह्मचर्याश्रमोक्तेर्विरोधः, तस्योद्देश्यमात्रे तात्पर्येण क्रमे तात्पर्याभावात् । अत एव तदग्रे तेषु सर्वेषु यथोपदेशमव्यग्रो वर्तमानः क्षेमं गच्छतीत्युक्तम् । तत्र यथोपदेशमित्यस्य मन्वाद्युक्तक्रमोपदेशमनतिक्रम्येत्यर्थः । तथा च दक्षः—

त्रयाणामानुलोम्यं स्यात्प्रातिलोम्यं न विद्यते ।
प्रातिलोम्येन यो याति न तस्मात्पापकृन्नरः ॥

इति प्राह । त्रयाणामिति ब्रह्मचर्योत्तरेषाङ्ग्रहणम् । ब्रह्मचर्यस्य तु सर्वेषां समानत्वेनेत्यावश्यकत्वान्न ग्रहणम् । यद्वा त्रयाणां ब्रह्मचारिगृहस्थवानप्रस्थानामानुलोम्यं क्रम एव न लगतु, पूर्वपूर्वानुष्टानं विनोत्तरोत्तरानुष्ठानात्, तदाह—'प्रातिलोम्यन्न विद्यते' इति। चतुर्थस्य संन्यासस्य तु न नियमः । यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वेति जाबालश्रुतेरित्यर्थः । कात्यायनवाक्येऽपि पातितसावित्रीकाणामपत्ये संस्कार उपनयनं भवति आपस्तम्बोक्तं प्रायश्चित्तपूर्वकम्, नाध्यापनन्तु इत्यर्थः; एकद्विपुरुषपतितसावित्रीकविषये तदीयस्यैवाऽनुष्ठेयत्वात् । तेषां मध्ये यः कश्चिन्माणवको वेदाध्यायनकृतसंस्कारं प्राप्तुमिच्छुर्भवति । जातावेकवचनम् । 'ते व्रात्यस्तोमेनेष्ट्वा काममधीयीरन्, व्रात्यस्तोमयष्टारो व्यवहार्य्या भवन्ति' इति ।वचनात् श्रुतेरित्यर्थः । यस्य तूपनयनमेव नास्ति तस्य कदाचिदुपनीतत्वभ्रमेण विवाहेऽपि तदपत्ये न प्रायश्चित्तप्रवृत्तिर्नापि संस्कारः; त्रैवर्णिकत्वहानेः, असंस्कृतमातापितृजत्वात् । किञ्च 'व्यत्यये कर्मणां साम्यम्' इति सकलब्राह्मणसंस्कारवतां वृत्तिमात्रेण रामस्य शूद्रतोक्ता,तेन न्यायेनासंस्कृतजन्यस्य द्वितीयस्यैव शूद्रवृत्तियुक्ताः अत एव मनुना व्रात्योत्पन्नस्य प्रतिलोमसङ्करेषु कथनं विना प्रायश्चित्तम् । अतिक्रान्ते काले उपनयनवतां सर्वधर्मबहिष्कृता इति स्मृत्या सकलद्विजातिकर्महान्या शूद्रवृत्तेरेव प्राप्त्या च पञ्चमस्य शूद्रतैव । एतन्मूलकमेव कात्यायनापस्तम्बाभ्यां चतुर्थस्यैवोपनयनमुक्तं न पञ्चमादीनामित्याहुः । एवञ्चेदृशविप्राणामप्युपनयनाभावस्सिद्धः । अत एव "ऐन्द्राग्नं पुनरुत्सृष्टमालभेत य आतृतीयात् पुरुषात् सोमं न पिबति" आश्विनं धूम्रललाममालभेत यो दुर्ब्राह्मणः सोमं

पिपासेत्' इति श्रुतिश्चतुर्थपुरुषस्यैव प्रायश्चित्तेन सोमपानमाह— पञ्चमादेरधिकप्रायश्चित्तानुक्तेः। गोभिलोऽपि—

सोमेन यक्ष्यमाणस्य यस्य पित्रादयस्त्रयः।
नेजिरे सोमयागेन स स्याद्विच्छिन्नसोमकः॥
आलभेत स ऐन्द्राग्नमशीर्णावयवं पशुम्।
यस्य वेदश्च वेदी च विच्छेद्येते त्रिपूरुषम्॥
स वै दुर्ब्राह्मणो नाम यश्चैव वृषलीपतिः।
आलभेताश्विनं धूम्रललामं स त्वजं पशुम्॥

इति। अत्र दुर्ब्राह्मण इति ब्राह्मणपदोपादानादीदृशान्यवर्णस्य सोमाभाव एवेति बोधितम्। कार्ष्णाजिनिः—

अनाहिताग्नौ पित्रादौ यक्ष्यमाणः सुतो यदि।
स हि व्रात्येन पशुना यजेन्निष्काममेव तु॥

इति। तत्र पित्रादावित्यस्य पितृपितामहप्रपितामहेष्वित्यर्थः। अधिकृतस्यानाहिताग्नित्वे गोवधोक्तव्रतचतुष्टयं वत्सरादूर्ध्वमापदि शक्त्यपेक्षया योजनीयम्, यदि मानवं त्रैमासिकमिति मिताक्षरा। वत्सरादर्वाक्तु कार्ष्णाजिनिः—

काले त्वाधाय कर्माणि कुर्याद्विप्रो विधानतः।
तदकुर्वंस्त्रिरात्रेण मासि मासि विशुद्ध्यति॥

तथा—

कृतदारो गृहे ज्येष्ठो यो नादध्यादुपासनम्।
चान्द्रायणञ्चरेद्वर्षं प्रतिमासमहोपि च॥

इति। द्विपुरुषं सोमपीथिनोप्यैन्द्राग्न एवोक्तः कात्यायनेन। 'ऐन्द्राग्नमपुनरुत्सृष्टमालभ्य द्विपुरुषाः सोमपीथिनः' इति। द्विपुरुषाः सोमपीथिनो यजमानस्य तमालभ्य सोमो भवतीत्यर्थस्तथाशा-

खान्तरे श्रवणात् इति व्याख्यातारः ; यस्य पिता पितामहो वा सोमपीथी स ऐन्द्राग्नमिति शाखान्तरे पाठात्।

एतेन—चौखाम्बाप्रकाशितव्रात्यप्रायश्चित्तनिर्णयोऽपि—व्याख्यातः। स यथा—

अथ कलौ क्षत्रियपदव्यवहार्याणां दशविंशतिपुरुषपर्य्यन्तं स्मर्यमाणोपनयनाभावानां तदग्रेऽप्यस्मर्यमाणोपनयनानां संस्कारो न वेति सन्देहे निर्णयाय व्रात्यताप्रायश्चित्तनिर्णयः क्रियते।

तत्राऽऽपस्तम्बः—'आषोडशात् ब्राह्मणस्य नात्यय आद्वाविंशात्क्षत्रियस्या च चतुर्विंशाद्वैश्यस्य'। आङभिविधौ। अत्ययोऽतिक्रमः, प्रकरणादुपनयनस्येति गम्यते। इदं चाष्टवर्षत्वादावपि ब्रह्मचर्यव्रतासमर्थान्प्रत्यनुकल्पविधानम्। यथा व्रतेषु समर्थः स्यात्तावत्कालं प्रतिक्षा। पूर्वमेव सामर्थ्ये सति अष्टवर्षाद्यतिक्रमे वक्ष्यमाणं प्रायश्चित्तं कात्यायनोक्तं वा 'कालातिक्रमे नियतवत्' इति। षोडशाद्यूर्ध्वमपि किञ्चित्कालमसमर्थानां पश्चात्सामर्थ्ये प्रायश्चित्तं भवत्येव। तदाह—'अतिक्रान्ते सावित्र्याः काले ऋतुं त्रैविद्यकं ब्रह्मचर्यं चरेत्'। त्रैविद्यकं वेदत्रयसम्बन्धि। अग्निसेवाऽध्ययनगुरुशुश्रूषातिरिक्तं सर्वं ब्रह्मचारिधर्मं कुर्यात्। तत्र ऋतुमिति कालविधानम्, तेन ऋत्वारम्भे प्रायश्चित्तारम्भः। एवञ्च प्रतिवेदमृतुमिति ऋतुत्रयं तत्। 'अथोपनयनं' ततः संवत्सरमुदकोपस्पर्शनम्'। उपनयनादारभ्य संवत्सरपर्यन्तं त्रिषवणं स्नानं पात्रमान्यादिभिः; अशक्तस्य यथाशक्ति। 'अथाध्याप्य'इति। अत्रैव वसिष्ठोक्तमुद्दालकव्रतं शङ्खोक्तं गोदानसहितं चान्द्रायणं द्रष्टव्यम्। एतयोः सपादनवधेनवः। एवं यममन्वाद्युक्तमपि। अत्रैव विषये शक्यशक्तिकालाधिक्यन्यूनत्वालस्यदेशविप्लवोपनेत्रभावादिपर्यालो-

चनीयानि, तानि च मिताक्षरादौ स्पष्टानि । अथ यस्य पिता पितामह इत्यनुपेतौ स्यातां ते ब्रह्महसंस्तुताः' । यस्य माणवकस्य जातावेकवचनम् । ते माणवकाः ब्रह्महण इत्येवं संस्तुताः कथिताः, तेन ब्रह्महसमीप इव तत्समीपेऽध्ययननिषेधः । 'तेषामभ्यागमनं भोजनं विवाहमिति वर्जयेत्' । अभ्यागमनं प्रत्युत्थानादि, स्वरसाम्यार्थं तत्समोपगमनं च । भोजनमुद्यतमपि त्याज्यं तस्याऽस्याज्यताया उक्तत्वेऽपि । विवाहश्च तादृशकन्याया अपि पुंसश्च वर्ज्यः । 'तेषामिच्छतां प्रायश्चित्तम्' । तेषां माणवकानाम् । इच्छतामित्यनेन बलात्कारो नेति सूचयति । यथा प्रथमेऽतिक्रमे ऋतुरेवं संवत्सरः' । प्रतिवेदं प्रतिपुरुषं च संवत्सर इत्यर्थः । एवं चैकैकस्य त्र्यब्दं वेदत्रयार्थं ब्रह्मचर्यं, पितर्येवानुपनीतेऽब्दद्वयम्, पितामहेऽपि तादृशे त्वब्दत्रयम् ॥

'अथोपनयनं' यत उदकोपस्पर्शनं प्रतिपुरुषं सङ्ख्याय संवत्सरान्यावन्तोऽनुपेताः स्युः' । यदि पितैवाऽनुपेतस्ततः संवत्सरमेकम् । अथ पितामहोऽपि ततो द्वौ । अथ स्वयमपि संवत्सरानिति । एतद् व्रतविषयेऽपि योज्यम् । तत्र स्नाने मन्त्रा'यदन्तियच्च दूरके' इत्यादि सप्त पावमान्यः।'येन देवाः पवित्रेण' इति यजुःपवित्रम् । "कया नश्चित्र" इति सामपवित्रम् । 'हंसः शुचिषदि' त्याङ्गिरसमिति । व्याहृतय एव ताः । अथाध्याप्यः । अत्र यस्येत्युक्तेर्माणवकस्यैव प्रायश्चित्तपूर्वमुपनयनादि न पित्रादेरिति बोध्यम् ॥

अथ यस्य प्रपितामहादि नानुस्मर्यत उपनयनं ते श्मशानसंस्तुतास्तेषामभ्यागमनं भोजनं विवाहमिति च वर्जयेत्तेषामिच्छतां प्रायश्चित्तं द्वादशवर्षाणि त्रैविद्यकं ब्रह्मचर्यं चरेदथोपनयनं तत उदकोपस्पर्शनं पावमान्यादिभिरथ गृहमेधोपदेशनं नाध्यापनम्—

इति। एतच्चेत्थं व्याख्यातमुज्ज्वलायां हरदत्तेन—प्रपितामहादि प्रपितामहादारभ्य प्रपितामहः पितामहः पिता स्वयं च यथाकालमनुपेतास्ते श्मशानसदृशा इति तत्सन्निधौ नाध्ययनम्। अत्रापि प्रतिपुरुषं सङ्ख्याय संवत्सरानिति द्रष्टव्यमिति। गृहमेधो गार्हस्थ्यम्। कृत्स्नस्य वेदस्य नाध्यापनं गृह्यमन्त्राणां तु भवतीति। अनेन चैकैकस्य प्रतिवेदं द्वादशाब्दमिति षट्त्रिंशदब्दमिति द्रष्टव्यम्। 'ततो यो निवर्तते तस्य संस्कारो यथा प्रथमेऽतिक्रमे त्रैविद्यकं ब्रह्मचर्यं चरेत्'। अथाध्याप्य इत्यर्थः। 'तत ऊर्ध्वं प्रकृतिवत्' यथाप्राप्तमुपनयनं कार्यमित्यर्थः। एवमेवैषा स्मृतिः पराशरीये माधवेन व्याख्याता। यत्तु 'यस्य प्रपितामहादी'ति सूत्रे प्रपितामहादीनामिति पाठकल्पनं तत्त्वसङ्गतमेव; हरदत्तमाधवादिविरोधात्, अध्येतृसम्प्रदायविरोधाच्च। यत्तु केनचित् ग्रन्थकृता तदनुसारिणाऽन्येन च ग्रन्थकृता प्रपितामहादारभ्य विनिगमनाविरहेण पूर्वे अर्वाञ्चश्चेति पूर्वे उत्तरे चेति व्याख्यातम्। अत एवोज्ज्वलायां हरदत्तेनोक्तं—'यस्य प्रपितामहस्य पितुरारभ्य नाऽनुस्मर्यत उपनयनं तत्र प्रायश्चित्तं नोक्तमित्युक्त्वा धर्मज्ञैर्विहितमेवं पूर्वेषु इति'। तस्यार्थः-धर्मज्ञैस्तच्छास्त्रनिबन्धकारैरुक्तरीत्या स्मृतिं व्याख्याय तत्रापि प्रायश्चितं विहितमिति, तत्तुच्छम्, कात्यायनस्मृतिविरोधात्। तथा हि तेन-'आषोडशाद् ब्राह्मणस्योऽनतीतः कालो भवति, आद्वाविंशाद्राजन्यस्याचतुर्विंशाद्वैश्यस्य, अत ऊर्ध्वं पतितसावित्रीका भवन्ति, नैनानुपनयेयुर्नाध्यापयेयुर्न चैभिर्व्यवहरेयुः' इति। अत ऊर्ध्वमित्यस्य मन्वादिविहितप्रायश्चित्तपूर्वकमुपनयनाभाव इति शेषः। पतितसाबित्रिका इत्यस्य ते तदपत्यपरम्परा च, तथाऽनुपेता इति शेषः। तादृशेषु सर्वकर्मनिषेधो नैना

नित्यादिनोक्तः । तत्रोपनयननिषेधकालाभावप्राप्तोपनयनाभाव-स्यैवानुवादः, अष्टवर्षादिकालाभावेन तत्राप्राप्तेः। 'अष्टवर्षं ब्राह्मणमुपनयीत' इति श्रुतिवाक्यमिति सुदर्शनकृते आपस्तम्बगृह्य-भाष्ये स्पष्टम्। कैश्चिदतिक्रान्तनिषेधैरुपनयनोद्वावपि न तदुत्त-राः क्रियाः कार्या इत्यर्थः, नैनानित्यादिना बहुदोषश्रवणात्। अने-कपुरुषाणां पतितसावित्रीकविषयो निषेधः सर्वथा त्याज्यत्वबोधना-योपनयननिषेधेन सिद्धेऽप्यन्यकथनम्(?), 'तेषामभ्यागमनं विवाहं वर्जये'दित्यापस्तम्बोक्ताविव। अयमेव कात्यायनस्मृतौ व्यवहा-रपदार्थः। तत आह 'कालातिक्रमे नियतवत्'। गर्भाधानाद्युपन-यनान्तकर्मणां कालातिक्रमे, नियतवत् नित्यवत् नित्येषु यद्विहितं तद्वदनादिष्टं प्रायश्चित्तं महाव्याहृतिहोमाख्यं सर्वप्रायश्चित्तरूपं कृत्वा गर्भाधानाद्युपनयनान्तानि कार्याणि। इदं चाऽष्टवर्षादि-रूपमुख्योपनयनकालातिक्रमे बोध्यमत्यल्पत्वात्। षोडशादिरूप-गौणकालस्याऽप्यत्यये तु—'अतिक्रान्ते सावित्र्याः काले' इत्यादि-नापस्तम्बाद्युक्त द्रष्टव्यम्॥

अथाऽनेकपुरुषपतितसावित्रीकविषये प्रतिप्रसवमाह—'त्रिपु-रुषं पतितसावित्रीकाणामपत्ये संस्कारो नाध्यापनं च'। एषामप-त्ये चतुर्थे। प्रपितामहमारभ्य चतुर्णां पतितसावित्रीकत्वे तदपत्ये तु न संस्कारः पूर्वनिषेधादिति हरिहरः। 'यस्य प्रपितामहादी'ति सूत्रे 'उपनयनं नाध्याप्य' इत्यापस्तम्बोक्त्याऽस्याऽयमेवार्थ उचि-तः। यत्तु कात्यायनसूत्रव्याख्यात्रा गदाधरेण तेषामपत्ये संस्कारो नाध्यापनं च नेत्येतत्सूत्रं व्याख्यातम्, हरिहरस्तु मृग्य इत्युक्तं च, तदेतेन परास्तम्, अन्यथा पूर्वनिषेधेनैव सिद्धेस्तद्वैयर्थ्यापत्तेः। स च बहुदोषश्रवणादापस्तम्बैकवाक्यतया बहुपुरुषं यावत् पतित-

सावित्रीकविषयक एव, स नाऽऽद्यातिक्रमविषय इत्युक्तम् । एवं चैतदेकवाक्यतया, यस्य प्रपितामहादीत्यापस्तम्बस्मृतिरपि त्रिपुरुषं पतितसावित्रीकविषयैव । अत एव धर्मशास्त्रैस्तु विहितेऽत्र वाक्ये हरदत्तेन तुनाऽरुचिर्बोधिता । तद्बीजं तूक्तमेव । स्मृत्योरेकमूलकल्पनालाघवानुरोधेनैकार्थत्वे सम्भवति भिन्नार्थत्वमन्याय्यमिति सर्वशास्त्रनिबन्धकृतां सिद्धान्तात् । अभ्युपेत्यापि ब्रूमः-पूर्वेषु इत्यत्र 'कपिञ्जलाधिकरण'न्यायेन त्रयाणामेव ग्रहणापत्तौ सप्तमस्योपनयनलाभे तदूर्ध्वस्याऽष्टमादेरुपनयने मानाभावः । किं चाऽयं प्रायश्चित्तविधिर्येषां वंशे उपनयनं स्मर्यते, तद्विषय एव, न तु तदस्मरणे । 'यस्य प्रपितामहादी'ति सूत्रस्थे 'पावमन्यादिभिः स्नान' मिति प्रतीके 'प्रतिपुरुषं सङ्ख्याय संवत्सरा नित्येत दत्रापि द्रष्टव्यमिति हरदत्तोक्तेः , तदस्मरणे तद्गणनासम्भवादिति दिक् ॥

स च चतुर्थस्य संस्कारः कथं कर्तव्यस्तत्राह कात्यायनः— 'तेषां संस्कारेप्सुर्व्रात्यस्तोमेनेष्ट्वा' । संस्कारं कुर्यादिति शेषः । तेषां त्रिपुरुषं यावत् पतितसावित्रीकाणां यान्यपत्यानि तेषां मध्ये यः संस्कारेप्सुः संस्कारं प्राप्तुकामः स व्रात्यस्तोमेनोपनेतृद्वारा इष्ट्वा गुरुद्वाराऽऽत्मानं संस्कुर्यादित्यर्थः । तेषां निषिद्धमप्यध्ययनं पुनराह—'काममधीयीरन् व्यवहार्या भवन्तीति वचना' दिति । व्रात्यस्तोमेनेष्ट्वाऽधीयीरन् वेदमिति शेषः । व्रात्यस्तोमेन पतिता अपि व्यवहार्या भवन्ति अध्ययनादिकर्मयोग्या भवन्ति इति वचनात् श्रुतेरित्यर्थः । तथा च गौतमीये—'यथैतदयाज्ययाजनम्, अभक्ष्यभक्षणम्,अवन्द्यवन्दनम्,शिष्टस्याऽक्रिया, प्रतिषिद्धसेवन' मिति पापान्युक्त्वा प्रायश्चित्तं कुर्यात् , 'न कुर्यादिति मीमांसते' न कुर्या-

दित्याहुः; न हि कर्म चीयते, कुर्यादित्यपरे, पुनः स्तोमेनेष्ट्वा सवनमायान्तीति विज्ञायते। 'व्रात्यस्तोमैश्चेष्ट्वा तरति सर्व पाप्मान' मिति पूर्वसूत्रे नाध्यापनं चेत्युक्तेरापस्तम्बसूत्रेऽपि 'यस्य प्रपितामहादी' ति उपक्रम्य 'उपनयनं नाध्यापन' मित्यापस्तम्बोक्तेश्च संस्कारमात्रेणाऽध्ययनस्याऽप्युक्तत्वात्। व्रात्यस्तोमेनेष्ट्वेत्यनुवृत्त्या वाक्यभेदेन व्याख्यातः। ईदृशे विषये व्रात्यस्तोमापस्तम्बोक्तप्रायश्चित्तयोर्विकल्पो बोध्यः। अत्रत्यं हरिहरभाष्यमपि पोषपूरणायैव व्याख्येयम्। एवं च तादृशक्षत्रियाणामुपनयनाभावः सिद्धः—इति।

यत्तु जयसिंहसंपादिते व्रात्यशुद्धिसंग्रहे—'अषोडशाद्वर्षात् ब्राह्मणस्य नातीतः कालो भवत्याद्वाविंशाद्राजन्यस्याचतुर्विंशाद्वैश्यस्यात ऊर्ध्वं पतितसावित्रीका भवन्ति। नैनानुपनयेयुर्नाध्यापयेयुर्न याजयेयुर्न चैभिर्व्यवहरेयुः। कालातिक्रमे नियतवत्त्रिपुरुषं पतितसावित्रीकाणामपत्येऽसंस्कारो नाध्यापनञ्च। तेषां संस्कारेप्सुर्व्रात्यस्तोमेनेष्ट्वा काममधीयीरन् व्यवहार्या भवन्तीति वचनात्' इति पारस्करसूत्रम्॥

अथापस्तम्बधर्मसूत्रम्—'आषोडशाद् ब्राह्मणस्यानत्यय आद्वाविंशात्क्षत्रियस्याचतुर्विंशाद्वैश्यस्य यथा व्रतेषु समर्थः स्यात्तानि वक्ष्यामः'। अतिक्रान्ते सावित्र्याः काले ऋतुं त्रैविद्यकं ब्रह्मचर्यं चरेत्। अथोपनयनम्। ततः संवत्सरमुदकोपस्पर्शनम्। अथाध्याप्यः। अथ यस्य पिता-पितामह इत्यनुपेतौ स्याताम्, ते ब्रह्महसंस्तुताः, तेषामभ्यागमनम्भोजनं विवाहमिति वर्जयेत्। तेषामिच्छतां प्रायश्चित्तम्। यथा प्रथमेऽतिक्रमे ऋतुरेवं वत्सरः। अथोपनयनम्, तत उदकोपस्पर्शनं प्रतिपुरुषं संख्याय संवत्सरान् यावन्तोऽ-

नुपेताः स्युः सप्तभिः पावमानीभिः 'यदन्ति यच्च दूरके' इत्येताभिर्यजुः पवित्रेण सामपवित्रेणाङ्गिरसेनेति । अपि वा व्याहृतिभिः । अथाध्याप्यः । अथ यस्य प्रपितामहादीनां नाऽनुस्मर्यत उपनयनं ते श्मशानसंस्तुताः । तेषामभ्यागमनम्भोजनं विवाहमिति च वर्जयेत् । तेषामिच्छताम्प्रायश्चित्तं द्वादशवर्षाणि त्रैविद्यकं ब्रह्मचर्यञ्चरेत् । अथोपनयनम् । तत उदकोपस्पर्शनं पावमान्यादिभिः । अथ गृहमेधोपदेशनं नाध्यापनम्, ततो यो निवर्त्यते तस्य संस्कारो यथा प्रथमेऽतिक्रमे । तत ऊर्ध्वं प्रकृतिवदिति ॥

याज्ञवल्क्ये प्रथमेऽध्याये ब्रह्मचर्यप्रकरणे—

आषोडशादाद्वाविंशाच्चतुर्विंशाच्च वत्सरात्।
ब्रह्मक्षत्रविशाङ्काल औपनायनिकः स्मृतः ॥
अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः ।
सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः ॥इति ।

मनौ द्वितीयाध्याये—

अषोडशाद् ब्राह्मणस्य सावित्री नातिवर्तते ।
आद्वाविंशात् क्षत्रबन्धोराचतुर्विंशतेर्विशः ॥
अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः ।
सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः ॥
नैतैरपूतैर्विधिवदापद्यपि हि कर्हिचित् ।
ब्राह्मान् यौनांश्च सम्बन्धानाचरेद् ब्राह्मणः सह ॥इति ॥

यमः—

सावित्री पतिता यस्य दश वर्षाणि पञ्च च ।
सशिखं वपनङ्कृत्वा व्रतं कुर्यात्समाहितः ॥
एकविंशतिरात्रञ्च पिबेत्प्रसृतियावकम् ।

हविषा भोजयेच्चैव ब्राह्मणान् सप्त पञ्च च ॥
ततो यावकशुद्धस्य तस्योपनयनं स्मृतम् । इति ।

वसिष्ठः—'पतितसावित्रीक उद्दालकव्रतञ्चरेत् । द्वौ मासौ यावकेन वर्तयेत्, मासं पयसा, पक्षमामिक्षया, अष्टरात्रं घृतेन, षड्रात्रमयाचितेन, त्रिरात्रमब्भक्षोऽहोरात्रमुपवसेत् । अश्वमेधावभृथङ्गच्छेत्, व्रात्यस्तोमेन वा यजेद्वा यजेत्' इति ॥

मनावेकादशे—

येषां द्विजानां सावित्री नानूच्येत यथाविधि ।
तांश्चारयित्वा त्रीन्कृच्छ्रान्यथाविध्युपनाययेत् ॥ इति ॥

अत्राषोडशादित्याङ् यदि मर्यादायान्तर्हि षोडशमारभ्य पतितसावित्रीकत्वम्; यद्यभिविधौ, तर्हि सप्तदशमारभ्य तत्संपद्यते । तत्र यमवचने 'दश वर्षाणि पञ्च च' इति निर्देशात्—आषोडशादित्यादौ मर्यादैवाङोच्यते, नाभिविधिरिति केचित् । परे तु यमवचनमिदन्न पतितसावित्रीकप्रायश्चित्तपरं येनाऽऽषोडशादित्यादावाङ् मर्यादायां स्यात्, किन्तु यथाकालमुपनीतस्य तदूर्ध्वङ्गृहितामापन्नस्यानापन्नस्य वा दैवान्मानुषाद्वाऽपराधात् पञ्चदशवर्षपर्यन्तं सावित्री पतिता यस्य, सन्ध्यावन्दनादित्यागो यस्य तस्येदं यावकव्रतं पुनरुपनयनञ्च, अत्र पतितसावित्रीक इति समासादरात् । 'अष्टवर्षं ब्राह्मणमुपनयीत, एकादशे राजन्यम्, द्वादशे वैश्यम्' इति निर्देशात्, मुख्यकालाद्द्विगुणकालपर्यन्तङ्गौणकालत्वनिरूपणात्, तत्राऽवध्याङ एव प्रतीतेर्मर्यादार्थकत्वाप्रतीतेश्च । तथा च षोडशादिवर्षोर्ध्वं पतितसावित्रीकत्वं भवतीत्यर्थः । नैनानिति निन्दार्थवादः । कालातिक्रम इत्यादि प्रायश्चित्तपरम् । कालातिक्रमे सञ्जातोपनयनसंस्कारस्य गृहिणोऽगृहिणो वा सन्ध्यावन्द-

नादीनां बहुकालमतिक्रमे सति नियतवत्स्मृतिषु नियमितं प्रायश्चित्तमिव प्रकृतेऽपि प्रायश्चित्तम्। तत्र यमवचनं पञ्चदशवर्षपर्यन्तं सावित्र्या उपनयनोत्तरप्रवृत्ताया लोपे यावकव्रतोपनयनपरम्, तथैवेहापि पतितसावित्रीकस्य बालकस्योपनयनं यावकव्रतपूर्वकं विज्ञेयम्। एवं पितुरप्यनुपनयने त्रिगुणं यावकव्रतङ्कार्यम्। पितामहस्याप्यनुपनयने षड्गुणं यावकव्रतङ्कार्यम्। केवलयावकव्रतस्य बालकगतस्यैकतु ब्रह्मचर्यसमत्वात्। तस्य चैकब्रह्मचर्यस्य 'यस्य पिता पितामह इत्यनुपेतौ स्याताम्' इत्युपक्रम्य 'यथा प्रथमे ऋतुरेवं वत्सरः' इति एकतुंव्रतस्य षाड्गुण्यविधानेन यावकव्रतस्यापि षाड्गुण्यौचित्यात्। एवञ्च कालातिक्रम इति सूत्रं बालकस्यैकस्य तस्य पितुश्च द्वयोस्तयोः पितामहस्य च त्रयाणां पतितसावित्रीकत्वप्रायश्चित्तपरम्। यद्यप्याऽऽषोडशादित्युपक्रम्याऽत ऊर्ध्वमित्यनेन बालस्यैव पतितसावित्रीकत्वमित्युक्त्वा कालातिक्रम इति सूत्रं पठितं बालकस्यैव पतितसावित्रीकत्वप्रायश्चित्तपरं भवितुमर्हति; तथापि त्रिपुरुषं पतितसावित्रीकाणामिति त्रिपुरुषपतितसाधारणत्वेनैव नेतुमुचितमिति दिक्॥

अपरे तु कालातिक्रमे नियतवन्नियते नित्ये कालातिक्रमे व्याहृतिहोमः प्रसिद्धस्तद्वत्तेन तुल्यं व्याहृतिहोमात्मकं प्रायश्चित्तम्भवति। तच्च प्रायश्चित्तमेकतु ब्रह्मचर्योद्दालकव्रतसाम्यसम्पत्तये उद्दालकव्रतप्रत्याम्नायत्वेन चतुर्दशप्राजापत्यनिर्णयात्। तथैव सहस्रव्याहृतितिलहोमस्यैकप्राजापत्यतुल्यत्वाच्चतुर्दशसहस्रव्याहृतिहोमः कालातिक्रमे बालकस्य प्रायश्चित्तरूप इति पितृपितामहयोरपि पतितसावित्रीकत्वे चतुर्दशषड्गुणाश्चतुरशीतिसहस्रव्याहृतिहोमाः प्रायश्चित्तरूपा बालकपित्रोरुभयोरेव पतितसा-

वित्रीकत्वे द्विचत्वारिंशत्सहस्रव्याहृतिहोमा भवेयुः प्रायश्चित्तरूपा इति विवेचयाम्बभूवुः ॥

याज्ञवल्क्ये—

उपपातकशुद्धिः स्यादेवं चान्द्रायणेन वा ।
पयसा वापि मासेन पराकेणाऽथवा पुनः ॥

मनौ—

एतदेव व्रतङ्कुर्युरुपपातकिनो द्विजाः ।
अवकीर्णिवर्जं शुद्ध्यर्थं चान्द्रायणमथापि वा ॥

एवम्, गोवधप्रायश्चित्तेनेत्यर्थः । पतितसावित्रीकताया उपपातकरूपत्वेन स्मर्तृभिः परिगणनादुपपातकशोधकानि यानि कर्माणि प्रसिद्धानि, तानि सर्वाण्यपि यथायोगं सङ्गृहीतान्येव । कालातिक्रमे योग्यतयोपपातके कालातिक्रमोपलक्षिते व्रात्यत्वे नियतवन्नियतेनोपपातकनिवृत्तिनियतेन प्रायश्चित्तेन तुल्यं प्रायश्चित्तं विधेयमिति बहुविधवैकल्पिकप्रायश्चित्तपरिग्रहाय 'कालातिक्रमे नियतवत्' इति सामान्यात्मना सूत्रं रचितमिति दिक् ॥

अथ कालातिक्रमे नियतवदिति पुरुषत्रयपर्यन्तमपि वृद्धिक्रमेण पतितसावित्रीकत्वे प्रायश्चित्तपरम्, तत्प्रायश्चित्तं वृद्धिमत् त्रिपुरुषादूर्ध्वं पतितसावित्रीकत्वे भवेदपि, परन्तु तेन प्रायश्चित्तेनोपनयनसंस्कारेऽपि नैवाध्यापनमधिकप्रायश्चित्तं विना, किन्तु व्रात्यस्तोमेनेष्ट्वा—त्रिपुरुषाणां त्रयाणां पुत्रस्य च चतुर्णां मध्ये कोऽपि जनः व्रात्यस्तोमेनेष्ट्वा संस्कारेप्सुरुपनयनसंस्कारेप्सुर्भवेत् । व्रात्यस्तोमं विना नियतवदिति । प्रायश्चित्तेन वद्धितेन संस्कारेऽप्सुरधिकप्रायश्चित्तं विना नाध्यापनेच्छुर्भवेदिति यावत् । तत्र प्रमाणमाह—'काममधीयीरन् व्यवहार्या भवन्तीति वचनात्' इति । का-

ममधीरयीरन्नित्यर्थपरं ताण्ड्यब्राह्मणवचनात् । ताण्ड्यब्राह्मणे ईदृग्वचनाभावेनैतदर्थस्य तत्रार्थसिद्धत्वेनैतदर्थपरवचनादित्येव व्याख्यातुमुचितत्वात् । 'तैरिष्ट्वा त्रैविद्यावृत्तिं समातिष्ठेयुः, तेषां तत ऊर्ध्वं भुञ्जीत याजयेच्चैनान्' इति छन्दोगसूत्रात् । व्रात्यस्तोमेनेष्ट्वा व्रात्यभावाद्विरमेयुर्व्यवहार्या भवन्ति' इति कात्यायनसूत्रात् । एवंच व्रात्यस्तोमोऽतिविशिष्टत्वात्प्रबलैनोनिबर्हको भवति । प्रबलपातकनिवर्तकस्य क्षुद्रपातकनिवर्तकत्वं साहजिकमिति याज्ञवल्क्येन प्रथमादिव्रात्यतायामपि निवर्तकत्वेन व्रात्यस्तोमो निबद्धो 'व्रात्यस्तोमादृते क्रतो'रिति । व्रात्यस्तोमं विना सर्वधर्मबहिष्कृताः सावित्रीपतिता व्रात्याः । व्रात्यस्तोमे कृते सति सर्वधर्माधिकारिणो निष्पापाः शुद्धा इति तदाशयात् । अत्र त्रिपुरुषं पतितसावित्रीकापत्यत्वं व्रात्यस्तोमे निमित्तम्, तत्र त्रिपुरुषाधिकपतितसवित्रीकत्वेऽपि सहस्रे शतमितिवत् त्रिपुरुषपतितसावित्रीकापत्यत्वं भवेदेवेति चतुरादीनां पतितसावित्रीकत्वेऽपि व्रात्यस्तोमानुष्ठानं भवतीति 'ऐन्द्राग्नं पुनरुत्सृष्टमालभेत य आतृतीयात्सोमं न पिबेत्' इति वाक्यविचारावसरे निरूपयिष्यामः—इति पारस्करसूत्रयोजना—इति ।

अथाऽऽपस्तम्बसूत्रयोजना—वर्णविभागेन विहितमुख्यकालात् "अष्टवर्षं ब्राह्मणमुपनयीतैकादशे राजन्यं द्वादशे वैश्यम्" इत्येवंलक्षणादूर्ध्वं मुख्यकालसमसङ्ख्याकं गौणकालं मनसि निधायाह—आषोडशादिति । यथेति । वक्ष्यमाणव्रतसामर्थ्यसम्पत्तिपर्य्यन्तमेव गौणोऽपि कालः प्रतीक्ष्यो नाऽधिकः । गौणकालेऽपि सामर्थ्योत्तरकालो नातिक्रमणीयः । अतिक्रमणे तु तदुचितं प्रायश्चित्तमपि विधेयमिति भावः । गौणकालस्य सर्वस्यापि उल्लङ्घने प्रायश्चित्तं किञ्चिद्दर्शयति—अतिक्रान्त इति । त्र्यवयवां विद्यामधीयत इति

त्रैविद्यास्तेषामिदं त्रैविद्यकम्। वेदत्रयग्रहणोचितं ब्रह्मचर्यं वेदाध्ययनवर्जं गुरुसेवादिलक्षणम् तत्तद्वेदगतं तत्तन्मन्त्रग्रहणकाले यो यो धर्मो विशिष्योक्तो भोजनसमिदाद्याहरणविशेषादि च तत्तदुक्तं ऋग्यजुःसामगुरुत्रयस्य कालविभागेन यथायोगं सेवनेन संवलितं निखिलमपि चरेदित्यर्थः। अथेति। ऋतुकालव्यापिब्रह्मचर्यानन्तरं यथापूर्वमुपनयनं कार्यम्। तत इति। उपनयनानन्तरं त्रिषवणस्नानमुचितं नियतमन्त्रत इति भावः। अथेति। संवत्सरस्नानेनाधिकारसिद्धौ सत्यामध्याप्योऽध्यापनार्हो भवति। अत्र तावता ग्रन्थेन बालकस्यैकस्यैव पतितसावित्रीकत्वे प्रायश्चित्तरूपैकर्तु ब्रह्मचर्यपूर्वकमुपनयनं संवत्सरस्नानपूर्वकाध्यापनार्हत्वं च निरूपितम्॥

सम्प्रति बालकतत्पितृपितामहानां पतितसावित्रीकत्वे त्रैविद्यब्रह्मचर्यलक्षणप्रायश्चित्तम्, तत उपनयनम्, ततः स्नानभेदेनाऽध्ययनार्हतां च दर्शयति—अथ यस्येति। अथाऽस्मिन्विषये प्रायश्चित्तादि निरूप्यते—'यस्य पिता पितामह इत्यनुपेतौ स्याताम्' इति। अत्र पितृपितामहयोरनुपनीतत्वानुवादपूर्वकं त्रयाणां ते 'ब्रह्महसंस्तुता' इति निन्दाबोधनादुपनयनविधानपूर्वकमध्याप्यता; अथाध्याप्य इति निर्देशात्। यस्येति पदमनुपनीतबालकपरम्। बहुवचनञ्च 'ते ब्रह्महसंस्तुतास्तेषामभ्यागमनम्' इति निन्द्यबहुत्वात्सङ्गतमिति। भेदनिर्देशाकरणं संवत्सरमात्रमेव साधारण्येन ब्रह्मचर्ये गमितं सङ्गतं भवति।

वस्तुतस्तु बालकस्य पितुः पितामहस्य च संवत्सरं त्रैविद्यकं ब्रह्मचर्यं समानमेव; त्रयाणामपि पतितसावित्रीकत्वात्। तत्रैवं विभजनीयम्—पितामहव्रात्यतानिमित्तमेकर्तु ब्रह्मचर्यम्, पितृव्रात्यता-

निमित्तं द्व्यृतु ब्रह्मचर्यं, बालकव्रात्यतानिमित्तं त्र्यृतु ब्रह्मचर्यमुत्तरोत्तरं व्रात्यताभिवृद्धेः । एवं च बालकस्य संवत्सरब्रह्मचर्यमपेक्षितम् । पितामहस्य पुनः स्वार्थमेकर्तु ब्रह्मचर्यं व्रात्यतादशायां व्रात्यपुत्रोत्पादनात् व्रात्यतायाः पुनरतिवृद्धेः त्र्यृतु ब्रह्मचर्यञ्चापेक्षितमिति संवत्सरब्रह्मचर्यमपेक्षितम् । पितुरनुपनयन एवम् । पितुः पुनः स्वपितुर्व्रात्यतानिमित्तमेकर्तु ब्रह्मचर्यं, स्वार्थं द्व्यृतु ब्रह्मचर्यं, पुत्रार्थं त्र्यृतु ब्रह्मचर्यं व्रात्यतादशायां स्वस्योत्पत्तेः स्वपुत्रोत्पत्तेश्चोत्तरोत्तरं व्रात्यताप्राबल्यात् । एवञ्च बालकस्यैवैकस्याऽनुपनयनेन व्रात्यतायामेकर्तु ब्रह्मचर्यम्, पितुश्चाऽनुपनयनेन व्रात्यतायां द्व्यृतु ब्रह्मचर्यं, पितामहस्याऽनुपनयनेन व्रात्यतायां त्र्यृतु ब्रह्मचर्यमपेक्षितमिति विभजनीयम् । अत्र पिता पितामहश्चानुपेतौ स्यातामिति वक्तव्ये सति 'पिता पितामह इतीतेरधिकस्य कथनमितेः प्रकारपरत्वेनान्येषामपि परिग्रहाय । एवञ्च यस्येति यत्पदार्थो यथाऽनुपनीत इति सिध्यति । एवं प्रपितामहादीनामप्युपनयनं सूचितं भवति । अत्रानुपेताविति द्विवचनान्निरुच्यमानमिदं प्रायश्चित्तं संवत्सरब्रह्मचर्यादिलक्षणं न प्रपितामहादीनां भवति, किन्त्वन्यदेवेति सूचितम् । तच्चैकर्तु ब्रह्मचर्यस्यैकोत्तराभिवृद्धिक्रमसूचनात्प्रपितामहावलम्बने ऋतुचतुष्टयब्रह्मचर्यं संवत्सरादूर्ध्वमधिकमपेक्षितम् । प्रपितामहादन्यपुरुषपरिग्रहे पञ्चर्तु ब्रह्मचर्यमधिकमपेक्षितम् । एवञ्च वत्सरद्वयादूर्ध्वं त्र्यृतु ब्रह्मचर्यमधिकं सञ्जातम् । एवमग्रे पुरुषवृध्या एकर्तु ब्रह्मचर्यवृद्धिर्द्वादशवर्षपर्यन्तं नेयेति सूचितं भवति । एवञ्चैकादशपुरुषे एकादशाब्दा जायन्ते, तदूर्ध्वं द्वादशाब्दसङ्ख्या वचनादेवेति दिक् इति ॥

'ते ब्रह्महसंस्तुतास्तेषामभ्यागमनं तेषामिच्छताम् इति निर्दे-

शात् । त्रयोऽपि जीवन्तः प्रायश्चित्तार्हा इति सूच्यते । इच्छता-मिति निर्देशादनिच्छतः प्रायश्चित्तं बलान्न करणीयम् । अनि-च्छुना कृतेऽपि प्रायश्चित्ते तन्मर्यादां न पालयेत्, शुद्धमर्यादां जह्यादेवाऽतोऽरुचिर्दृढा जाता चेत्तर्हि प्रायश्चित्तं करणीयमिति भावः । तथा चेच्छा चेत् त्रयाणामपि पृथक् पृथक् प्रायश्चित्तं भवति, यदि ते जीवन्तः स्युः । यदि तेषु कश्चिद्विवङ्गतः स्यात्तर्हि स तावदनिच्छत्पुरुषसमो नेयः। ते इति । ते बालकपितृपिता-महाः ब्रह्महत्वेन निन्दिताः, तेषामेतत्सम्बन्धिभोजनाभ्यागमन-विवाहान् वर्जयेत् । इतिपदं प्रकारपरम् । अन्यदपि निरुक्तसमं वर्जयेत् । अथ त्रयाणामिच्छतां प्रायश्चित्तस्वरूपमाह—अथेति । अत्र प्रथमेऽतिक्रम इति निर्देशात् द्वितीयतृतीयाद्यतिक्रमा अपि ज्ञापिताः । तत्र बालकस्यैकस्य कालातिक्रमः प्रथमः । पितुः कालातिक्रमो द्वितीयः । स च द्विविधः—पितुः कालाति-क्रमः बालकस्य पितुश्च द्वयोरपि कालातिक्रम इति । द्विविधोऽप्ययं द्विविधः—पिता जीवन्नजीवन्निति । पितृपितामहयोः कालातिक्र-मस्तृतीयः । सोऽपि द्विविधः—बालकेन सह कालातिक्रमो बालकं विना चेति । पितृपितामहयोर्जीवनं पितुरेव जीवनं पितामहस्यैव जीवनञ्चेति सोऽपि द्विविधः । सकलपक्षेपीदं प्रायश्चित्तं साधा-रणमुक्तम् । प्रथमातिक्रमे क्रतुरिव द्वितीयतृतीयातिक्रमयोर्वत्सरम्: —इति ।

अयमाशयः-बालकपितृपितामहानामतिक्रमे त्रयाणामिच्छतां त्रिभिरपि प्रत्येकं वत्सरं त्रैविद्यकं ब्रह्मचर्यं विधेयम् । यदि बा-लकस्य कालो नातिक्रान्तः स्यात्तर्ह्यपि पितृपितामहाभ्यां सह बा-लेनैकत्र नवत्सरब्रह्मचर्यं कर्तव्यम् । यदि पितृपितामहयोः कश्चि-

द्वनिच्छन् मृतो वा द्वावपि मृतौ, तर्ह्यपि यो य उपनयनेच्छुस्स संवत्सरब्रह्मचर्यं कुर्यात्। उपनयनवान् स तावदुचितलोकादिभाग्भवति, इतरस्तु न तथा भवतीति विवेक इति दिक्॥

एवञ्च त्रयाणामपि पुरुषाणां नियमेनानुष्ठानाभावात् कदाचिदेकस्य कदाचित् द्वयोः कदाचित् त्रयाणाञ्चाऽनुष्ठानदर्शनात्सकलपक्षसाधारण्येन अपरपरपदाद्विवचनादिनिर्देशमन्तरात् (?) यथा प्रथमेऽतिक्रमे ऋतुरेवं वत्सरः॥

अथोपनयनम्। एकस्य द्वयोस्त्रयाणां वा उदकोपस्पर्शनमप्येकादीनां यथायोगं वक्ष्यमाणवत्सरपर्यन्तमिति सूत्रं रचितम्। अत्रोदकोपस्पर्शनस्योपनयनोत्तरभाविनोऽध्ययनाङ्गतया संस्काररूपत्वेन बालकपितृपितामहानां बालकमात्रस्य सपितृकस्य वोपनयने उदकोपस्पर्शनं वत्सरमात्रमेव प्रथमपर्यायवदित्याशङ्क्य मध्यमपर्यायेऽस्मिन्वत्सरभेदं स्नानमन्त्रभेदञ्च दर्शयति—प्रतिपुरुषमिति। यावन्तोऽनुपेतास्तावद्वर्षपर्यन्तमुदकोपस्पर्शनं सप्तभिरित्याम्नातमन्त्रैरित्यर्थः। नेदं प्रतीतिसूत्रं प्रतिपुरुषं संवत्सरन्यायेन ब्रह्मचर्यविधिपरं, तथा सति यथा प्रथम इति सूत्रसन्दृष्टमेव पठितं स्यात्, न तथा पठितम्, किन्तूदकोपस्पर्शनस्नानमन्त्रान्तराले पठितम्। तेनोदकोपस्पर्शन एवेदं सूत्रमन्वियात्, न पूर्वत्र। यद्यन्वियात्तथा सति यथा प्रथमेऽतिक्रमे ऋतुरेवं प्रतिपुरुषं सङ्ख्याय संवत्सरान्यावन्तोऽनुपेताः स्युरिति सूत्रघटनं कृतं स्यात्। न तथा कृतम्, प्रत्युताऽधिकं वत्सर इति पदमुपादायैव सूत्रं रचितमुपलभ्यते। अतो निरुक्तयोजनमेव समुचितम्। एवञ्च यथा प्रथम इति वचनं बालकपितृपितामहानां मध्ये य उपनयनेच्छुस्तस्य वर्षमात्रब्रह्मचर्यविधानपरमिति विवेचनीयम्। आङ्गिरसेनेतीतिपदं मन्त्रा-

न्तरसङ्ग्रहार्थम् । अनेन प्रथमे पर्याये उदकोपस्पर्शने न मन्त्रा नियताः, साधारणस्नानमन्त्रा एव तत्र भवेयुः । विशिष्य कथनान्मध्येऽन्त्ये च मन्त्रा नियता अपि भवन्ति । अपि वेति व्याहृतयो विकल्पेन स्नानमन्त्राः । अथेति । अथाध्याप्य इत्येकवचनात् त्रयाणां मध्ये य इच्छन्नमृतो भवन् सन् उक्तब्रह्मचर्यवानुपनेयो भवति, पश्चात् स्नाने जाते अध्याप्य इत्यर्थः । अत्र त्रयाणां सम्भूयैवाधिकारो नेतरथेति शङ्का अध्याप्य इत्येकवचनेन परिहृता वेदितव्या । केचित्तु पितृपितामहौ प्रायश्चित्तोत्तरमुपनयनेऽपि स्नाने वृत्तेऽपि नाध्याप्यौ, बालक एवाध्याप्य इत्येकवचनेन द्योत्यत इति प्राहुः । तत्र बालकपितृपितामहेषूत्तरोत्तरमल्पैनस्त्वात्समैनस्त्वाद्वा बालकस्याऽतिपावित्र्येणाऽध्यापनार्हता, नेतरयोरित्यस्य नियुक्तिकत्वादिति दिक् ॥

अथ पूर्वं पितामह इतीतिपदेन प्रपितामहादीनामुपनयनं सूचितम् । तत्र प्रपितामहादावनुपनयनानुस्मरणे पितामहोत्तरमेव प्रायश्चित्तम् । बालकः पितामह इति । संवत्सरत्रये स्पष्टे । एकं द्वौ त्रीन्वा वत्सरानिति विवेचनेनैवं सम्भवति;प्रतिपुरुषं सङ्ख्याय संवत्सरान्यावन्तोऽनुपेताः स्युरित्यनिर्द्धारितत्वेन निर्देशात् । प्रपितामहादिषु ज्ञातानुपनयस्थले सोपनयनं पुरुषं निर्णीय तदर्वाक् प्रतिपुरुषं संवत्सरस्नानमधिकं भवेत् । ब्रह्मचर्यमपि प्रपितामहादौ यत्पुरुषे उपनयनं स्मृतं तदधस्तनपुरुषमारभ्य बालकपर्यन्तमेकोत्तरतु विवृद्धिक्रमेण यावत्पुरुषं विधेयम् । प्रपितामहादि नाऽनुस्मर्यत इत्युपलक्षणम् । पित्रादिः प्रपितामहादिर्वा नानुस्मर्यत इति । तथा चोपनयनावधौ विज्ञाते पूर्वोक्तं प्रायश्चित्तम् । अज्ञाते द्वादशवर्षप्रायश्चित्तमिति प्रायश्चित्तविशेषं निन्दाविशेषकथनपूर्वकं

दर्शयति—अथेति। 'यस्य पिता पितामह इत्यनुपेतौ' इत्यत्र पूर्वस्योपनीतत्वेऽग्रेतनानुपनयनानुवादनैरर्थक्यात् अग्रिमानुपनयनानुवादसामर्थ्यात्पूर्वानुपनयनसिद्धेस्तथैव सर्वेषामपि 'ते ब्रह्महसंस्तुतास्तेषामभ्यागमनम्' इत्यनुपनयनप्रयुक्तनिन्दावादस्य साधारण्येन प्रत्ययात्, प्रकृते यस्य प्रपितामहादीति निर्देशाच्च प्रपितामहादीनामनुपनयनं सिद्ध्यति; पूर्वेषामुपनयनकथनात्सर्वेषां बालकपितृपितामहादीनामनुपनयन एवाग्रेतनानुपनयनोक्तिसार्थक्यात्, उत्तरत्र 'ते श्मशानसंस्तुतास्तेषामभ्यागमनम्' इति बालकादीनामनुपनीतत्वेन निन्दादर्शनात्, प्रपितामहादि नानुस्मर्यत उपनयनमिति चाऽनुस्मरणाभावनिर्देशेन प्रपितामहादीनामजीवित्वसूचनात्, ते इति तत्पदेन प्रपितामहादीनामेव ग्रहणायोगेन बालकादीनामप्यवश्यसङ्ग्राह्यत्वात्। एवञ्चात्र पूर्वं यस्य पिता पितामह इति क्रमादरणात् यथा प्रथमेऽतिक्रम इति बालकातिक्रमस्य प्रथमत्वनिर्देशेन पित्रतिक्रमस्य द्वितीयत्वम्, पितामहादिक्रमस्य तृतीयत्वमिति सूचनात् प्रपितामहादीत्यादिपदमग्रेतनानेव गृह्णाति; योग्यत्वात्, न पूर्वतनान्; तेषां प्रकारान्तरेणैव निरुक्तादिशाऽनुपनयनलाभसम्भवेन पुनरादिपदेन (?) ग्रहणे प्रयोजनाभावात्। एवञ्च यस्य बालकस्य पितृपितामहसहितस्य प्रपितामहादि उपनयनं नानुस्मर्यते, ते बालकादयः श्मशानत्वेन निन्दिता इत्यर्थः। पूर्वमनुपेताविति प्रत्यक्षीभूतत्वेन निर्देशात् नानुस्मर्यत इति परम्परया स्मरणाभावनिर्देशात्प्रपितामहादयः प्रायेण मृता यथायोगमिति पितृपितामहौ प्रायेण जीवन्ताविति सूचितं भवति। प्रपितामहस्य जीवत इच्छा चेत्प्रायश्चित्तं भवति। तत्र बालकस्यैवाऽनुपनयनेऽल्पं प्रायश्चित्तम्। अग्रिमाग्रिमपुरुषा-

नुपनयने तु प्रायश्चित्तं गुरु भवतीत्यर्थः। तेषामिति जीवतामिच्छतां वंशजपुरुषाणां मध्ये यस्य यस्योपनयनमपेक्षितं तेन तेन द्वादशवर्षं ब्रह्मचर्यं कर्तव्यमित्यर्थः। तदनूपनयनं तत उदकोपस्पर्शनं पावमान्यादिभिर्मन्त्रैरित्यर्थः। अत्र बालकादिषु बहुषु जनेषु पूर्वं पितामहान्तं सङ्ख्यानिश्चयात्प्रतिपुरुषमिति सूत्रं प्रवर्तितम्; संवत्सरसङ्ख्यानिर्णयेनोदकोपस्पर्शनसम्भवात्, प्रपितामहादीत्यादौ पुरुषसङ्ख्यानैयत्याभावात् उदकोपस्पर्शने प्रतिपुरुषमिति सङ्ख्या न निबद्धा, किन्तु प्रायेण सर्वैनसो निवृत्तये द्वादशवर्षं ब्रह्मचर्यं विहितम्। तदनन्तरमुपनयनमुक्त्वा उदकोपस्पर्शनं पावमान्यादिभिरिति स्नानं सामान्यतो विहितम्। तच्च उदकोपस्पर्शनं सकृदनुष्ठान एव कालानादेशात्पर्यवस्यति; तावतैव शास्त्रार्थस्याऽदृष्टावहस्य सिद्धेः। सकृत्स्नाने जाते सिद्धमधिकारं दर्शयति—अथ गृहमेधोपदेशनं साङ्गानानुष्ठानगृह्यशास्त्रोपदेशनं भवति। सकृत्स्नानेन स्मार्तकर्माधिकारः सूचितः। यथा गृह्यधर्मेऽधिकारस्तथा श्रौतेऽप्यधिकारोऽस्तिवत्याशङ्क्याह-नाध्यापनं श्रुत्यध्यापनन्तु न भवति। तेन सकृत्स्नाने न श्रौतार्थानुष्ठानाधिकारसिद्धिरिति सिद्ध्यति।

अयं भावः—प्रथमे पर्याये संवत्सरमुदकोपस्पर्शनमिति, द्वितीये पर्याये प्रतिपुरुषं सङ्ख्याय संवत्सरानिति स्पष्टं स्नानकालनिर्देशात्, तृतीये पर्याये तत उदकोपस्पर्शनं पावमान्यादिभिरिति मन्त्रवत्कालस्य विशिष्यानिर्देशात्, द्वादशवर्षं ब्रह्मचर्यं कर्तुमुपनयने जाते आलस्यादिना बहुकालमुदकोपस्पर्शनाकरणेऽपि पावमान्यादिभिः सकृदुदकोपस्पर्शनन्तु कर्तव्यमेव। द्वादशवर्षब्रह्मचर्यानुष्ठानस्याऽधिकारसम्पादकत्वेनोपनयनद्वारा फलपर्यन्तानुधावनावश्यंभावेनाऽधिकारसम्पादनस्य कर्मानुष्ठाने पर्यवसानौ-

न्वित्येन आलस्यादिना बहुकालमुदकोपस्पर्शनाकरणेऽपि बहुकालं ब्रह्मचर्यकरणेन प्रायेण विनष्टसर्वैनस्त्वात् स्मार्तकर्माधिकारसम्पत्तये सकृत्स्नानं पावमान्यादिभिः कार्यमिति हृदयेनोक्तम्—तत उदकोपस्पर्शनमिति। इदञ्च कालनिर्देशाभावात्सकृदनुष्ठान एव पर्यवस्यति 'सर्वौषधस्य पूरयित्वोलूखलमवहन्ती' तिवत्। अथ गृहमेधोपदेशनमित्यनेनालस्यादिना बहुकालमुदकोपस्पर्शाभावेऽपि स्मार्तधर्मानुष्ठानन्तु भवेदेव, श्रौतधर्मानुष्ठानाभावेऽपि। एवञ्चैतावता द्वादशवर्षब्रह्मचर्यानुष्ठानं सफलमेव संपन्नं भवति। द्वादशवर्षब्रह्मचर्यानुष्ठातरि स्मार्तकर्मानुष्ठानमात्रेणोपरते सति स्मार्तकर्मानुष्ठानकाले सञ्जातपुत्रस्य तु पितुः प्रायश्चित्तेन द्वादशवर्षलक्षणब्रह्मचर्येणोपनयनद्वारा स्मार्ताधिकारात् एतस्यापि तावत्येवाधिकारो न श्रौते कर्मण्यपि। पितुःपितामहस्य वा पूर्वपुरुषाणां सोमपानाभावेन सोमानधिकारे ऐन्द्राग्नकरणेन सोमपीथित्वभावे तत्पुत्रस्य विनैन्द्राग्नं सोमाधिकारवत् प्रकृतेऽपि द्वादशवर्षब्रह्मचर्यवतः स्मार्तानुष्ठातुः पुत्रस्य पूर्णोदकोपस्पर्शे सत्येवाध्ययनेऽधिकारो नान्यथेत्याह—'ततो यो निवर्तते तस्य संस्कारो यथा प्रथमेऽतिक्रमे' इति। अत्र प्रथमातिक्रमे तावत् अतिक्रान्ते सावित्र्याः काले ऋतुं त्रैविकं ब्रह्मचर्यञ्चरेत्। अथोपनयनम्, ततः संवत्सरमुदकोपस्पर्शनम्, अथाध्याप्य इत्याम्नातम्। तत्र पुरुषस्य उपनीतस्मार्तकर्मठपुत्रत्वात् ऋतुं त्रैविद्यकं ब्रह्मचर्यमित्यस्याकरणेऽप्युपनयनं भवेदेव, पितुरैन्द्राग्नेन सोमपीथित्वे पुत्रस्यैन्द्राग्नानपेक्षणात्। वेदाध्ययनेऽपि अत्रैवालस्यादिना पूर्वेणोदकोपस्पर्शनाकरणेनाधिकारासम्पादनात्। परिशेषात् तस्य संस्कारो यथा प्रथमेऽतिक्रमे इति कथनं वेदाध्यापनाधिकारसम्पादकसंवत्सरोदकोपस्पर्श एव पर्यवस्यति। एवं

तृतीयपर्याये आलस्यादिनोदकोपस्पर्शनाभाववत् प्रथमद्वितीयपर्याययोरपि आलस्यादिना शास्त्रोदितकालमभिव्याप्योदकोपस्पर्शनाभावे सकृदेवोदकस्पर्शे सति गृहमेधीयोपदेशनं भवति। श्रुत्यध्ययनन्तु न भवेदेव। स्मार्तकर्मानुष्ठान एव तस्याधिकारो भवति। तत्कर्मानुष्ठानसमये सञ्जातपुत्रस्य श्रौतपरिग्रहमन्तरा पितर्युपरते सति तत्पुत्रस्य तु प्रकृतिवदुपनीतस्य संवत्सरोदकस्पर्शादेव तृतीयपर्याय इव वेदाध्ययनाधिकारः। एवं प्रथमद्वितीयपर्याययोरिव बहुकालं तृतीयेऽपि पर्याये उदकोपस्पर्शे सति तत्पुत्रपर्यन्तानुधानमन्तरैव स्मृतिवच्छ्रुतेरप्यध्ययनमनुष्ठानोपयोगो भवति। पितुः तत्र द्वादशवर्षाणीत्युपनयनात्पूर्वं ब्रह्मचर्यबहुकालग्रहणात्तेनैवैनसः प्रायेण निवृत्तेरुत्तरत्र यथा प्रथमेऽतिक्रम इति संवत्सरमात्रोदकोपस्पर्शनपरिग्रहात्तत्समान्यात्तृतीयेऽपि पर्याये प्रथमवदेवोदकस्पर्शनमिति विविच्यते। एवञ्चाऽर्थात्संवत्सरपरिमितमुदकोपस्पर्शनं द्वादशवर्षब्रह्मचर्यकर्तुरालस्यं विनाऽध्ययनाधिकारसम्पादने पर्यवस्यति। उपक्रमे संवत्सरारम्भात् प्रान्तेपि (?) संवत्सरोक्तेस्तत्स्थानसन्निकर्षेण तृतीयपर्यायेपि वत्सरस्यैवोचितत्वात्। एवञ्च पर्यायत्रयेऽपि आलस्यादिनैकस्नानोत्तरं कालान्तरे शास्त्रन्यायसिद्धं स्नानं विधेयमितीच्छायां प्रथमस्नानमात्रेण स्मार्तकर्माधिकारसिद्धिः। सम्पूर्णे स्नाने जाते तु वेदाध्ययनात् श्रौतकर्माधिकारसिद्धिरिति सिद्धम्।

अथायमत्र निष्कर्षः—प्रथमपर्याये च समुद्दिष्टब्रह्मचर्यानुष्ठानानन्तरम् पुरुषसंख्यानिर्णयेन तावत्संवत्सरपर्यन्तं स्नाने सति अध्ययनं वेदस्यानुष्ठानपर्यवसायि भवति। शास्त्रोक्तपूर्णस्नानाभावे तु स्नानमात्रे जाते स्मार्तेऽधिकारः। कालान्तरे सम्पूर्ण

स्नाने जाते वेदाध्ययनादि न भवेत्। पूर्णस्नानाभावे स्मार्तकर्मा-नुष्ठानकाले जातपुत्रस्य तु पित्रा यावत्कृतं तावदुपनयनादि-कालानतिक्रमे प्रकृतिवदेव । पितुर्वेदाध्ययनाधिकाराय यत्परिमाणं स्नानं शास्त्रेणादिष्टं तत्प्रमाणस्नाने कृते त्वध्ययनेऽ-धिकारो नो चेन्नाधिकारः। एवं तृतीये पर्यायेऽपि द्वादशवर्षब्रह्म-चर्येण प्रायः सर्वैनसां निवृत्तेरुपनयने वृत्ते प्रथमपर्यायवत्संवत्सरो-दकोपस्पर्शे अध्ययने वेदस्यानुष्ठाने चाधिकारः। वार्षिकस्नाना-पूर्तौ स्नानमात्रे जाते पूर्ववदेव स्मार्तमात्रेऽधिकारः। कालान्तरे स्नाने पूर्णे तु अध्ययनेऽपि वेदस्याधिकारः । अपूर्णस्नानसमये स्मार्तकर्मानुष्ठानकाले जातपुत्रस्य तु पितृवत्स्मार्तकर्मान्ताधिकारो लोकवदेव। वेदाध्ययनकर्मानुष्ठानाधिकारस्तु संवत्सरस्नाने पूर्णे एव भवेदिति। तत इति। अध्ययनाङ्गस्नानवत्पुरुषादूर्ध्वं प्रकृति-वत्सामान्यद्विजवदिति भावः। अथ यस्य प्रपितामहादि नानुस्म-र्येत इति तृतीये पर्याये उदकोपस्पर्शनपदं स्मार्ताङ्गभूतसकृदुदको-पस्पर्शनपरतयाऽध्ययनाधिकारसम्पादकप्रायश्चित्तभूतमुदकोपस्पर्श-नान्तरं न्यायतो न सङ्गृह्णाति, येन सकृदुदकोपस्पर्शनेऽङ्गमिति स्मार्तकर्मण्येवाधिकारः। प्रायश्चित्तभूतस्नानपूर्तौ तु श्रुत्यध्ययने-ऽप्यधिकार इति सिद्ध्येत्, किन्तूदकोपस्पर्शनपदं प्रायश्चित्तभूत-सम्पूर्णस्नानपरमेव। एवञ्च प्रथमद्वितीयपर्यायवत् स्नानोत्तरमेव वेदाध्ययनाधिकारस्तृतीये पर्याये भवत्विति शङ्का तावत् 'अथ गृह-मेधोपदेशनं नाध्यापनम्' इति सूत्रेण वारिता भवति । तथाच द्वादशवर्षं त्रैविद्यकब्रह्मचर्ये वृत्तेऽपि उदकोपस्पर्शने पूर्णे जातेऽपि चतुर्थादेर्न वेदाधिकारः, किन्तु स्मार्त एवाधिकारः। ततो यः पुत्रो भवति प्रायश्चित्तोत्तरं तस्य प्रथमपर्यायवदेकतब्रह्मचर्ये संवत्सर-

स्नाने उपनयनवेदाध्ययनाधिकारसाधनभूते 'ततो यो निर्वर्तेत' इत्यादिनोच्यते इति योज्यतामिति चेत्—अत्रोच्यते। अत्र प्रथमद्वितीयपर्याययोर्यस्योपनयनं ब्रह्मचर्येणाम्नातं तस्यैव नियतकालस्नानेनाऽध्ययनार्हता गदिता, न तु दैवान्मानुषाद्वा अपराधात्तु स्नाने सम्पूर्णे तावदवृत्ते सति तं तत्पुत्रं वाऽवलम्ब्य किञ्चिदुदितम्। तृतीये पर्याये तु स्नाने तावत्सकृदादिपदं समुचितमपि नैव समाम्नातम्। पूर्वपर्यायद्वयानाम्नातमपि स्मृत्यध्ययनमाम्नाय वेदाध्ययननिषेधोऽभिहितः। तदनन्तरञ्च द्वादशवर्षं त्रैविद्यकब्रह्मचर्यकर्तृपुत्रमादाय प्रथमपर्यायधर्मातिदेशः कृतः। एवञ्च तत्र दैवाद्यपराधादुपनयनोत्तरं स्नानपूर्तावेव पुत्रे जाते संस्कृते चोपरते सति तत्पुत्रस्य कर्तव्यांशाकथनान्न्यूनता स्यात्। उपनयनतोऽप्युपनयनान्तरं कर्तव्यपदार्थानामनाम्नानात् स्नानपूर्तिपर्यन्तं स्मार्तकर्मानुष्ठानं प्रसज्येत। एवञ्च जातमप्युपनयनं स्नानपूर्तौ कर्माप्रयोजकत्वादनर्थकमेव स्यात्। एवमत्रोपनयनमात्रस्यैव कथनात्तत्पूर्वतनकर्मादिकमप्यकर्तव्यमेव भवेत्। उपनयनोत्तरं विवाहादिक्रियाऽपि नाऽऽवर्तनीया भवेत्। इष्टापत्तौ त्रैवर्णिकोचितविवाहाद्यभावात्स्नानपूर्त्याऽध्ययनाधिकारेऽपि स्मृत्युक्तविवाहादेस्त्रैवर्णिकसम्बन्धिनोऽसम्पत्तेरध्ययनोत्तरमपि ज्योतिष्टोमाद्यधिकारो न स्यात्। इष्टापत्तौ च विशिष्टलोकहेतुभूतकर्मपरिग्रहबुद्ध्या प्रायश्चित्तविधानमनर्थकं स्यात्। तस्मादुपनयननिर्देशसामर्थ्यात्तदन्तन्यायेन जातकर्मादिसंस्कारा अभ्युपेता इत्येष्टव्यं भवति। एवमुपनयनोत्तरकर्माण्यपि तदादिन्यायेन यथायोगमनुष्ठेयानीत्यभ्युपेतमित्याश्रयणीयम्। इतरथा तत्र सर्वकर्मबहिष्कृत इति व्रात्यताविशेषेण सकलस्मार्तश्रौतकर्मानधिकारकथनात्प्रायश्चित्तेनोपनय-

नविधानेऽपि यावद्वचनं वाचनिकमिति केवलोपनयनमेव भवेत्, न तदादितदन्तन्यायाभ्यां जातकर्मविवाहाद्यनुष्ठानं स्यात्। व्रात्येतरस्थले उपनयने वृत्ते वेदाध्ययनाद्यधिकारवत् तदादितदन्तन्यायतोऽध्ययनजातकर्माद्यधिकारबुद्धेरुदकोपस्पर्शनं प्रायश्चित्तभूतं विनाऽध्ययनाद्यनधिकार इति सूचनेन प्रतिरोधात्, सर्वकर्मणामप्युपनयने कथितेऽपि तदादितदन्तन्यायतः परिग्रहबुद्धेः प्रतिरोधात्, उदकोपस्पर्शनं, ततोऽध्याप्य इत्यध्ययनपदस्य श्रौतस्मार्तोभयग्रन्थाध्ययनपरत्वस्यासङ्कुचितार्थग्रहे न सङ्कुचितग्रहणमुचितमिति न्यायानुगृहीतत्वात्। विहितकर्मसामान्याधिकारबुद्धिप्रतिरोधात्स्मार्तधर्मसामान्यमात्रपरिग्रहाय तदादितदन्तन्यायमवतारयितुमिहाऽऽपस्तम्बेन सूत्रकृता प्रमाणमवश्यमुपक्षेपणीयं भवति। तत्र 'तत उदकोपस्पर्शनं पावमान्यादिभिः' इति वचसोऽपि प्रायश्चित्तरूपपूर्णस्नानपरत्वे तदादिन्यायप्रतिरोधः। प्रथमद्वितीयपर्यायसमान एव चेत्युपनयनोत्तरसमये प्रायश्चित्तारम्भात्पूर्वञ्च स्मार्तधर्मस्याप्यप्रवृत्तिरेव स्यात्। दैवाद्यपराधादुपनयनोत्तरं प्रायश्चित्तस्नानानारम्भे सति स्मार्तधर्मेऽप्यनधिकारेण कृतमपि तावदुपनयनमनर्थमेव भवेत्। अतस्तृतीये पर्याये तत उदकोपस्शनमिति वचो न प्रायश्चित्तरूपपूर्णस्नानपरं सत् तदादिन्यायप्रतिरोधकं विवक्षितम्, किन्तु तदादिन्यायेनोपनयनाव्यवधानेन श्रौतस्मार्तधर्मप्रवृत्तौ सकृत्स्नानं धर्मारम्भाङ्गत्वेन विधीयते। तत्र श्रौतस्मार्तद्वयस्यापि तदादिन्यायात्प्रवृत्तौ सत्यां स्मार्ते धर्म एव तदादिन्यायो न तु श्रौते धर्मे इति हृदयेनोक्तम्—ततो गृहमेधोपदेशनं नाध्यापनमिति ॥

अयञ्चात्र विवेकः—प्रथमद्वितीयपर्याययोस्ततः संवत्सरमुदकोप-

स्पर्शनम्, ततोऽध्याप्य इत्यादौ श्रुतिगृहमेधीयावध्याप्यावित्येवार्थः स्यात्, विशेषग्राहकमानाभावात्, तेन श्रौतस्मार्तसाधारण्येन तदादिन्यायाप्रवृत्तिः सूचिता भवेत्। तृतीयपर्याये उदकोपस्पर्शनस्याकृत्ते सति तदादिन्यायेन श्रौतस्मार्तधर्मप्रवृत्तौ 'अथ गृहमेधोपदेशनम्' इति वचसा स्मार्तधर्मानुग्रहे सत्यर्थात् श्रौतधर्मनिवृत्तिसम्भवेन पुनरपि नाध्यापनमिति विशदकथनम्— इह सर्वत्रोऽध्यापनपदं वेदाध्यापनपरमिति विभागसूचनाय। एवञ्च प्रथमद्वितीयपर्याययोरध्यापनपदं वेदाध्यापनपरमिति नियमयति। एवञ्च पूर्वपर्याययोस्तदादिन्यायेनोपनयनोत्तरमेव गृहमेधीयधर्मस्य प्रवृत्तिरस्ति न श्रौतस्येति गमितं भवति। एवञ्च प्रथमद्वितीयपर्याययोः सकृत्स्नानभूतांगे सत्येव स्मार्तधर्मप्रवृत्तिः। प्रायश्चित्तरूपसंवत्सरादिस्नानोत्तरं श्रौतधर्मप्रवृत्तिरिति सूचनायैव तृतीये पर्वणि 'तत उदकोपस्पर्शनं पावमान्यादिभिरथ गृहमेधोपदेशनं नाध्यापनम्' इति विरूपं वाक्यं विरचितम्। 'ततो यो निवर्तते' इति कथनमपि प्रथमद्वितीयपर्याययोरपि प्रायश्चित्तस्नानापूर्तावेवोपनीतपरमेतत्। कर्मठावस्थपुरुषपुत्रस्य तृतीयपर्यायगतपुत्रवत्पित्रनुष्ठितप्रायश्चित्तमेव कर्तव्यमिति गमयति। एवं तृतीये पर्याये पित्रा समादरणीयं संवत्सरस्नानं पुत्रवाक्य एव पठितं न पितृवाक्ये, पठिते सति तु पूर्वपर्याययोरिव प्रायश्चित्ते न श्रौतेष्वधिकारसम्पत्तेः पूर्वपर्यायवत्केवलगृहमेधीयोपदेशनं 'अथ गृहमेधोपदेशनम्' इति कर्तुमशक्यमेव स्यात्। तदर्थं संवत्सरोदकोपस्पर्शनं पितृवाक्ये पठितुमुचितमपि पुत्रवाक्य एवातिदेशेनोक्तम्। यदि तु 'तत उदकोपस्पर्शनं पावमान्यादिभिः' इति वाक्यं पूर्वपर्याययोरिवाऽभ्यस्यमानं प्रायश्चित्तरूपवत्सरादिस्नानपरं भवति, एवञ्च स्नाने प्रायश्चित्ते पूर्णे सत्यपि

स्तातुः श्रुतावनधिकार एव केवलगृहमेधीय एवाधिकार इत्याग्रहः, स्तर्हि 'त्रिपुरुषं पतितसावित्रीकाणामपत्ये' इति पारस्करसूत्रे स्मर्यमाणास्मर्यमाणोपनयनसाधारण्येन चतुर्थादिपुरुषेषु व्रात्यस्तोमेन प्रायश्चित्तं विधाय 'काममधीयीरन्' इति वेदाध्ययनादिकथनमसंगतमेव भवेत्। भवन्मते प्रायश्चित्ते कृतेऽपि प्रपितामहाद्यस्मर्यमाणानुपनयनस्थले वेदाध्ययनानधिकारनिर्णयात्। एवं वसिष्ठोक्तोद्दालकव्रताश्वमेधावभृथव्रात्यस्तोमानां पितृपितामहादिलक्षणानुपादानात् स्मर्यमाणास्मर्यमाणोपनयनावधिकसकलपुरुषसाधारण्येन प्रयश्चित्तत्वेन सिद्धत्वात् तथैव याज्ञवल्क्यस्मृतावपि व्रात्यस्तोमस्य निखिलपुरुषसाधारण्येन प्रायश्चित्तत्वसिद्धेः आपस्तम्बसूत्रे चतुर्थादिस्थले सर्वथा वेदाध्ययनाधिकारसूचनमसङ्गतमेव भवति।

अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः।
सावित्रीपतिता व्रात्या व्रात्यास्तोमादृते क्रतोः॥

इत्यत्र व्रात्यस्तोमे सति श्रौतस्मार्तसकलकर्माधिकारसूचनात् व्रात्यस्तोमादिप्रायश्चित्तेनाऽकामैरपि भवद्भिः श्रौतेऽधिकार एष्टव्यो भवेत्। एवञ्चाऽऽपस्तम्बसूत्रेऽतिगुरुतरद्वादशवर्षत्रैविद्यकं ब्रह्मचर्यं निर्दिश्यमानं श्रुत्यध्ययनानधिकारे निरर्थकमेव स्यात्। अन्यैस्तृतीये पर्याये एवङ्गुरुभूतप्रायश्चित्ताम्नानात्स्मृत्यन्तरानुरोधेनाऽऽपस्तम्बसूत्रे विसंष्ठुलतापरिहाराय चतुर्थादिपुरुषस्थले श्रौताधिकारः पूर्वोक्तरीत्या स्वीकर्तव्य एव। अन्यैर्व्रात्यस्तोमेन व्रात्यतानिर्हरणेन वेदाध्ययनाधिकारकथनात्स्मृत्यन्तराविरोधेनैवाऽपरस्मृतिनियोजनस्य सति सम्भवे कर्तुमुचितत्वात्, 'तत उदकोपस्पर्शनं पावमान्यादिभिः' इत्यस्याभ्यासपरकालनिर्देशमन्तरा

प्रायश्चित्तत्वनिर्णायकमानाभावात् प्रायश्चित्तपरतया नेतुमशक्यत्वाच्च। आपस्तम्बेनाऽपि उपनयनात्पूर्वमेव गुरुतरद्वादशवर्षब्रह्मचर्याम्नानात् उपनयनोत्तरं वेदाधिकृतये क्षुद्रमेव संवत्सरस्नानमभिमतं भवति। अत एव पितुः संवत्सरस्नानाभावे पुत्रेण तावद्वेदाध्ययनाधिकृतये संवत्सरस्नानं कर्तव्यमिति हृदयेन 'ततो यो निवर्तते इत्यादिवाक्यं प्रवर्तितं सङ्गतं भवति॥

वस्तुतस्तु यत्तावत् यस्य प्रपितामहादि नानुस्मर्यते' इति तृतीयपर्याये उदकोपस्पर्शनलक्षणप्रायश्चित्तेऽपि श्रौताध्ययनन्न भवतीत्येतदर्थकं नाध्यापनमित्येतदापस्तम्बसूत्रमित्युक्तम् तत्तावत् व्रात्यस्तोमाद्यसमर्थपरं विज्ञेयम्। पारस्करेण 'त्रिपुरुषं पतितसावित्रीकाणामपत्ये चतुर्थरूपे संस्कारो नाध्यापनञ्च इत्यभिधाय तेषां संस्कारेप्सुर्व्रात्यस्तोमेनेष्ट्वा काममधीयीरन् व्यवहार्या भवन्ति' इति कथितम्। तत्रेष्ट्वा संस्कारेप्सुर्भवेदित्यन्वयः। एवञ्च चतुर्थप्रभृतिषु प्रायश्चित्तान्तरकरणे व्रात्यस्तोमाद्यकरणे स्मार्तकर्मानुष्ठानमात्रम्, कृते तु व्रात्यस्तोमादौ सर्वपातकनिवृत्तौ भवत्येव श्रौताध्ययनम्। अत एव याज्ञवल्क्येनापि—

अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः।

सावित्रीपतिता व्रात्या—इत्यभिधाय—व्रात्यस्तोमादृते क्रतोः। इत्यनेन व्रात्यस्तोमे कृते श्रौतस्मार्तसर्वधर्माधिकार इति स्पष्टीकृतम्। एवं च वसिष्ठेनापि 'व्रात्यस्तोमेन वा यजेत' इति अश्वमेधावभृथस्नानविकल्पितत्वेन सर्वव्रात्यतानिवर्तकत्वेन सर्वश्रौतस्मार्ताधिकारो निबद्धः, तस्मान्नाध्यापनमिति सकलस्मृतिवचनानुरोधेन व्रात्यस्तोमाद्यसमर्थपरमिति विज्ञेयम्। 'त्रिपुरुषं पतितसावित्रीकाणामपत्ये इत्यत्राऽपत्यपदं चतुर्थपरमात्रमिति न भ्रमितव्यम्

व्यम् । न पतन्त्यनेनेति व्युत्पत्त्या चतुर्थप्रभृतीनामपि तद्वाचक- मिति विवेचनीयम् । 'त्रिपुरुषं पतितसावित्रीकाणामपत्ये इत्यनेन चतुर्थादौ व्रात्यस्तोमाभावे नाध्यापनमित्युक्तम् पारस्करेण । तद्विषय एवाऽऽपस्तम्बेन कृतोदकस्पर्शस्यापि नाध्यापनमित्यध्या- पनाभावो निरुक्तः । स चैकविषये(?)व्रात्यस्तोमकरणाभ्यामेवाध्ययने इति समर्थनीयः; अविरोधेन सम्भवत्यर्थे विरोधस्याऽनुचि- तत्वात् । तस्मात्सकलस्मृतिवचनानुरोधेन नाध्यापनमिति वचनं व्रात्यस्तोमाद्यसमर्थविषयमिति सम्यगिदमवदातमित्यापस्तम्ब- वचनयोजना ॥

अथ याज्ञवल्क्यवचनयोजना । आषोडशादिति । आङभि- विधावित्याद्यर्थः पारस्करसूत्रवदेव योजनीयः, अत ऊर्ध्वमुपनय- नाभावात् । षोडशवर्षादूर्ध्वं सर्वधर्मबहिष्कृताः स्मार्तश्रौतधर्मब- हिष्कृताः सन्तः सावित्रीपतिता व्रात्याः व्रात्यशब्दार्हाः व्रात्यस्तो माहृते पतन्ति स्वोचितस्थानादधः पतन्ति, व्रात्यस्तोमे सति तु अव्रात्या अपतितसावित्रीकाः श्रौतस्मार्तधर्माधिकारिणो न पतन्ती त्यर्थः । अत्राऽऽपस्तम्बाद्युक्तप्रायश्चित्तानां क्षुद्रत्वात्तत्रोपनयनाधि- कारकरमेकं वेदाध्ययनाधिकारपरमन्यदिति विभागः समाहृतः। व्रात्यस्तोमस्तु सर्वोत्तरत्वान्निरवशेषं सर्वैनोनिहन्तृत्वत् । व्रात्यस्तोमे- नैकेनैवोपनयनस्मार्तश्रौतकर्माधिकारसिद्धेर्याज्ञवल्क्येन व्रात्यस्तोम एवैको निरुक्तः प्रायश्चित्तत्वेन। अत एव वसिष्ठवचने उद्दालकव्र- तादश्वमेधावभृथस्नानमधिकफलम् , ब्रह्महत्यादिमहापातकनिवर्त- कस्य क्षुद्रोपपातकनिवर्तकत्वे सन्देहाभावादिति पठित्वा ततोऽप्य- श्वमेधावभृथस्नानादतिप्रशस्तो व्रात्यस्तोम इति पश्चात्पाठो व्रात्योमस्याऽऽहृतः सङ्गतो भवति । अत एव च पारस्करसूत्रे

आषोडशादित्यादिना पतितसावित्रीकत्वं निरुच्य पतितसावित्री-कताया उपपातकरूपत्वात् 'कालातिक्रमे नियतवत्' इति उपपात-कनियतं यद्यत्प्रायश्चित्तं तत्तत् प्रायश्चित्तं विधेयमिति सामान्य-प्रायश्चित्तमापस्तम्बसम्मतं विधाय 'त्रिपुरुषं पतितसावित्रीकाणा-मपत्ये इत्यादिना कालातिक्रम इत्युपपातकप्रायश्चित्तेन न विस्पष्टा शुद्धिरिति नोपनयनादिसंस्काराध्ययनादिर्भवितुमर्हतीति तेषां संस्कारेप्सुर्व्रात्यस्तोमेनेष्ट्वा इति बालकपितृपितामहादीनां व्रात्यस्तोमोत्तरमुपनयनाध्ययनादिसकलसंस्कारार्हतेति मनसि निधाय व्रात्यस्तोममतिविशिष्टं याज्ञवल्क्यवचनादेवादाय बलवत्त-रदोषेऽपि बहुजनव्रात्यतालक्षणे प्रायश्चित्तरूपस्यैकद्वित्र्यादिव्रात्य-तानिवर्तकता (?) सहजसिद्धेति त्रिपुरुषमिति कथं सङ्गतं भवति॥

अथ मनुवचनयोजना। आषोडशादित्यादि। अत्राङ्कादि-विवेचनं पारस्करसूत्रवदेव। 'नैतैरपूतैर्विधिवत्' इति मनौ विशि-ष्य पतितसावित्रीकत्वनिवृत्तये याज्ञवल्क्यादिवत् प्रायश्चित्तं नाऽ-ऽम्नातम्, परन्तूपपातकत्वादस्योपपातकसामान्यप्रायश्चित्तं चान्द्रा-यणपराकादिकं याज्ञवल्क्योक्तव्रात्यस्तोमोद्दालकव्रतादि च पतित-सावित्रीकत्वदोषनिबर्हणायाऽभिप्रेतमिति नैतैरित्यादिना सूच्यते।

येषां द्विजानां सावित्री नानूच्येत यथाविधि।
तांश्चरयित्वा त्रीन्कृच्छ्रान्यथाविध्युपनाययेत्॥

इति मनुवचनं न पतितसावित्रीकत्वदोषपरिहारपरम्, किन्तु अविध्युपनयने घनगर्जनादिना विध्युल्लङ्घनेनोपनयने कृच्छ्रत्र-यानुष्ठापनेन पुनरुपनयनपरम्, इतरथा पतितसावित्रीकप्राय-श्चित्तत्वे षोडशवर्षादिमध्ये उपनयनाभावात् कृच्छ्रत्रयानन्तरं यथाविधि षोडशवर्षमध्ये एवोपनययेदित्यर्थासङ्गतेः। अतीते

षोडशे पुनः षोडशवर्षमध्यत्वसम्पादनायोगात् षोडशवार्षिकताया गतायाः पुनरागमनायोगात्। घनगर्जनादौ जाते उपनयने पुनर्घनगर्जनादिरहिते काले उपनयनं विधेयमिति तु सङ्गतं भवति। स्वाध्यायस्य घनगर्जनादिरहितकालस्याभ्यां (?)वर्तमानतया तत्प्रतीक्षणासम्भवात्। षोडशवार्षिकत्वे जातेऽष्टवर्षत्वादेः सम्पादनानर्हत्वादिति यावकव्रतपरं यमवचनमुपनयनोत्तरं दैवान्मानुषाद्वापराधात् पञ्चदशवर्षपर्यन्तं नित्यसन्ध्यावन्दनविलोपे उपपातकत्वात्तत्प्रायश्चित्तपरम्। तदपि प्रायश्चित्तं 'कालातिक्रमे' इति सूत्रेणोपपातकसामान्यप्रायश्चित्तेन सह सङ्गृहीतं भवति। वसिष्ठवचने तूद्दालकव्रताश्वमेधावभृथस्नानव्रात्यस्तोमा विकल्पेन पतितसावित्रीकत्वप्रायश्चित्तभूता इति केचित्। उद्दालकव्रतेन सहाऽश्वमेधावभृथस्नानव्रात्यस्तोमान्यतरः समुच्चित इत्यपरे। अश्वमेधस्नानव्रात्यस्तोमयोरतिविशिष्टत्वात्स्वतन्त्रावेव, न तावुद्दालकव्रतसमुच्चयापेक्षिणौ; याज्ञवल्क्येन केवलव्रात्यस्तोमस्य परिग्रहादित्यन्ये।

अत्रायं सङ्ग्रहः—याज्ञवल्क्यवचनेन व्रात्यस्तोमतः सर्वकर्मार्हतासूचनादुपनयनमध्ययनञ्च भवति। अत्र प्रथमपर्वणि आपस्तम्बोक्तं ऋतुं त्रैविद्यकं ब्रह्मचर्यं यमोक्तं यावकव्रतं वसिष्ठोक्तमुद्दालकव्रतमुपपातकप्रायश्चित्तचान्द्रायणादिकञ्च याज्ञवल्क्योक्तव्रात्यस्तोमेन वैकल्पिकमुपनयनाधिकारसम्पादकम्। वेदाध्ययनाधिकारसम्पादकं पुनरापस्तम्बोक्तं संवत्सरोदकोपस्पर्शनम्। वसिष्ठोक्ताश्वमेधावभृथस्नानव्रात्यस्तोमान्यतरच्च वैकल्पिकम्। अथ द्वितीये पर्याये ऋतुं त्रैविद्यकं ब्रह्मचर्यं यमोक्तयावकव्रतं वसिष्ठोक्तोद्दालकव्रतञ्चेत्येतानि वैकल्पिकानि षड्गुणितानि पितृपितामहानुपनयने उपनयनाधिकारकरप्रायश्चित्तानि। तत्र यथा 'प्रथमेऽ-

तिक्रमे ऋतुरेवं वत्सर' इत्यापस्तम्बवचने 'यस्य प्रपितामह' इत्युपक्रमात् 'तेषां प्रायश्चित्तम्' इति निर्देशात् त्रिभिरपि संवत्सरब्रह्मचर्यं कर्तव्यम्। तत्राऽयं विभागः—पितामहव्रात्यतानिमित्तमेकर्तु ब्रह्मचर्यमुत्तरोत्तरं व्रात्यताभिवृद्धेर्बालकस्य वत्सरब्रह्मचर्यमपेक्षितम्। पितामहस्य पुनः स्वार्थमेकर्तु ब्रह्मचर्यं व्रात्यतादशायां व्रात्यपुत्रोत्पादनात् व्रात्यताऽभिवृद्धेरिति द्व्यृतु ब्रह्मचर्यं व्रात्यपुत्राद् व्रात्यपुत्रजननाद् व्रात्यतायाः पुनरतिवृद्धेः त्र्यृतु ब्रह्मचर्यञ्चापेक्षितमिति संवत्सरब्रह्मचर्यमपेक्षितम्। पितुः पुनः स्वपितुर्व्रात्यतानिमित्तमेकर्तु ब्रह्मचर्यं स्वार्थं द्व्यृतु ब्रह्मचर्यं पुत्रार्थं त्र्यृतु ब्रह्मचर्यं व्रात्यतादशायां स्वस्योत्पत्तेः स्वपुत्रोत्पत्तेश्चत्तरोत्तरं व्रात्यताप्राबल्यात्। तथाच स्वस्यैव बालकस्याऽनुपनयने एकर्तु ब्रह्मचर्यं, पितुश्चानुपनयने त्र्यृतु ब्रह्मचर्यमिति विभजनीयम्। एवञ्च त्रयाणामपि बालकपितृपितामहानां व्रात्यतासु यावाकादीनां षाड्गुण्यानि कथितानि। तत्र ऋतुब्रह्मचर्यवदेव स्वस्य बालस्य पितुश्च व्रात्यतायां त्रिगुणमेवानुष्ठेयमिति सिद्धम्। वेदाध्ययनाधिकारसम्पादकं पुनरापस्तम्बोक्तपुरुषसङ्ख्याप्रमितवत्सरोदकोपस्पर्शनं वसिष्ठोक्ताश्वमेधावभृथस्नानं तदुक्तव्रात्यस्तोमो वा। अथ तृतीये पर्याये उपनयनाधिकारसम्पादकद्वादशवर्षत्रैविद्यकं ब्रह्मचर्यमापस्तम्बोक्तम्, यमोक्तद्विसप्ततियावकव्रतानि, वसिष्ठोक्तद्विसप्तत्युद्दालकव्रतानि याज्ञवल्क्योक्तव्रात्यस्तोमो वा। द्वादशवर्षब्रह्मचर्यव्रतादिनाऽतिक्लेशादालस्यादिना सकृदेवैकस्मिन् दिने पावमान्यादिभिः स्नानं करोति चेत्तर्हि तद्दिनमारभ्यैव स्मार्तधर्मपरिग्रहाधिकारः। कालातिक्रमे बहुकालरूपे यावक प्रत्याम्नायचतुर्दशप्राजापत्यानि ग्राह्याणि। अल्पकाले सति उद्दा-

सकृद्व्रतप्रत्याम्नायसपाददशप्राजापत्यानि, एकन्तु ब्रह्मचर्यप्रत्याम्नायप्राजापत्यानि, कालातिक्रमाल्पत्वबाहुल्याभ्यां सपाददश चतुर्दश वा भवन्ति। अयञ्च विभागो बालक एव। पितृपितामहव्रात्यतायां चतुर्दशप्राजापत्यान्येव भवेयुः, कालदैर्ध्यनैयत्यादित्यनुसन्धेयम्। पूर्वं महत्तरव्रतानुष्ठानादेनसां निवृत्तेरल्पमात्रे एनसि सति तत्रालस्यादिना सकृदेव स्नानात्स्मार्तधर्मपरिग्रहेण कालयापने कालान्तरे सम्पूर्णोदकस्पर्शादध्ययनं सम्पादनीयमितीच्छायां सत्यां सम्पूर्णोदकस्पर्शमन्तराऽस्मिन्दिवङ्गते सति स्मार्तानुष्ठानकाले जातपुत्रस्य संस्कारो 'यथा प्रथमेऽतिक्रमे' इति निर्देशात् पितुरुपनयनपर्यन्तमनुष्ठानेन पुत्रस्याप्युपनयनपर्यन्ताधिकारादुपनयने जाते पश्चादध्यापनाय पित्रा सम्पूर्णोदकस्पर्शाकरणात् पुत्रस्य संवत्सरपर्यन्तोदकोपस्पर्शेऽध्ययनेऽधिकारः। तत्पुत्रादूर्ध्वन्तु प्रसिद्धद्विजपुत्रादीनां यथा तथैव कर्तव्यं स्वाभाविमेव। एवञ्च पितुरपि पूर्वमुपनयनात् द्वादशवर्षव्रतेनैव सर्वैनसां विलयात् स्वल्पैनस्त्वात्प्रथमपर्याये यत्संवत्सरोदकोपस्पर्शनं तावतैवाध्ययनाधिकार इति गमितम्। तत्रालस्यादिना कालान्तरे उदकोपस्पर्शनं विधेयमितीच्छायामेव मरणे तत्पुत्रे संवत्सरोदकोपस्पर्शनेनाऽध्ययनाधिकारे पितुः सुतरां संवत्सरोपस्पर्शनेनाऽधिकारौचित्यात्। एवं तृतीये पर्याये न स्नाने गौरवं किन्तु प्रथमपर्यायवदेव स्नानं ब्रह्मचर्यादावेवाऽतिगौरवपरिग्रहात्। एवञ्च संवत्सरस्नानं तत्समकल्पमश्वमेधावभृथस्नानं व्रात्यस्तोमो वैकोऽध्ययनाधिकारहेतुरिति विवेचनीयम्। तत्र संवत्सरोदकोपस्पर्शे त्रिषवणमुदकोपस्पर्शनिर्देशात् दिनचतुष्टयेनैकं प्राजापत्यम्, द्वादशस्नानेनैकप्राजापत्यस्मरणात्। तथा च संवत्सरस्नानस्य नवतिप्राजापत्यानि भवन्ति।

यमोक्तयावकव्रतप्रत्याम्नायानि चतुर्दश प्राजापत्यानि । उद्दालकव्रतप्रत्याम्नायानि सपाददशप्राजापत्यानि । संवत्सरस्नानस्थानेऽश्वमेधावभृथव्रात्यस्तोमयोर्वसिष्ठेन निर्देशात् त्रयं समबलमेव ॥

अथ 'त्रिपुरुषं पतितसावित्रीकाणामपत्ये' इत्यत्र पतितसावित्रीकाणां चतुराद्याधिक्येऽपि व्रात्यस्तोमनिमित्तमस्ति 'ऐन्द्राग्नस्थल इव' इत्युक्तम्, तत्कथमिति चेदित्थम् । तथा हि—ऐन्द्राग्नम्पुनरुत्सृष्टमालभेत य आतृतीयात्पुरुषात्सोमं न पिबेत्' इति सोमपानाभाव ऐन्द्राग्नप्रयोजक उक्तः । एवम्—'आश्विनं धूम्रललाममालभेत यो दुर्ब्राह्मणः सोमं पिपासेत्' इति दौर्ब्राह्मण्यसमेता सोमपिपासा आश्विनप्रयोजिकोक्ता । एवम्—

यस्य वेदश्च वेदी च विच्छिद्येते त्रिपूरुषम् ।
स वै दुर्ब्राह्मणो नाम न सोमं पातुमर्हति ॥

'यश्चैव वृषलीपतिः', 'सर्वकर्मबहिष्कृत' इति पाठभेदः । तत्रानया स्मृत्या दौर्ब्राह्मण्यं समाम्नातम् । अत्रैन्द्राग्नाश्विनप्रयोजके स्मार्तञ्चेत्येतानि दौर्ब्राह्मण्यानि त्रीणि किं विजातीयानि ? किं वा सर्वमेकविधमेव दौर्ब्राह्मण्यमाहोस्वित् नानापि दौर्ब्राह्मण्यानि द्वैरात्रनयेन ऐन्द्राग्नप्रयोजकतयाऽऽश्विनप्रयोजकतया च श्रुतिभ्यां परिगृहीतानि । स्मृतिस्तु श्रुतिद्वयानुमतदौर्ब्राह्मण्यद्वयप्रकाशिकेति विषये प्रमाणभेदादिह त्रीणि दौर्ब्राह्मण्यानीति कश्चित्, तन्न; त्रिभिरपि प्रमाणैर्न त्रिविधं दौर्ब्राह्मण्यं प्रतिपाद्यते, किन्तु श्रुतिभ्यां द्वे दौर्ब्राह्मण्ये प्रतिपाद्येते । स्मृतिस्तु द्विविधदौर्ब्राह्मण्यानुवादिका, न तु तृतीयं दौर्ब्राह्मण्यं प्रतिपादयति ; तद्दौर्ब्राह्मण्ये निमित्ते नैमित्तिकस्यापरस्याऽकथनात् । तत्र स्मृतावैन्द्राग्नो वेदीसबन्धविच्छेदनिमित्तकः । वेदीविच्छेदश्च सोमविच्छेदलक्षण एव । 'ऐन्द्राग्नं पुन-

रुत्सृष्टम्' इति मूलभूतश्रुत्या सोमपानाभावस्य निमित्तत्वेन स्पष्टं प्रत्यायनात्। आश्विनस्तु पशुर्दौर्ब्राह्मण्यनिमित्तकः। यस्य वेद-श्चेति स्मृत्या वेदविच्छेदस्य दौर्ब्राह्मण्यसम्पादकतया प्रत्यायनात्त-दौर्ब्राह्मण्यस्य 'आश्विने अश्विनम्' इत्यादिश्रुत्या निमित्तप्रत्ययात्। अथ यस्य वेदश्चेति स्मृत्या वेदवेदीविच्छेदस्य दौर्ब्राह्मण्यहेतुत्वेन प्रत्यायनात् सोमविच्छेदस्य च वेदविच्छेदान्तर्गतत्वादाश्विनमित्या-दिश्रुतिविहिताश्विनेनैव वेदवेदीविच्छेदजनितदोषसामान्यनि-वृत्तेराश्विने कृते नैन्द्राग्नः कर्तव्य इति चेत्, निमित्तभेदादुभावपि समुच्चितावैन्द्राग्नाश्विनावित्युपदेश इति केचित्'।

अत्रायमाशयो माधवाचार्योल्लिखितः—'पुनरुत्सृष्टे पशौ वि-च्छिन्नो वा एतस्य सोमपीथो यो ब्राह्मणः सन्नातृतीयात्पुरुषात्सोमं न पिबति' इति निर्देशेन सोमपानविच्छेदप्रयुक्तदौर्ब्राह्मण्येन क्रत्व-नधिकार इत्यैन्द्राग्नेन क्रत्वधिकारः सिद्ध्यति। आश्विने तु 'यो दुर्ब्राह्मणः सोमं पिपासेत्' इति निर्देशात् सोमपानश्रद्धालुत्वे सति दुर्ब्राह्मणोऽधिक्रियते। एवञ्च ब्रह्मवर्चसप्रतिबन्धकीभूतदौर्ब्राह्मण्या-पनुत्तये आश्विनः पशुः, क्रत्वधिकारप्रतिबन्धकीभूतदौर्ब्राह्मण्यहर-णायैन्द्राग्नः पशुरिति सिद्धं भवति। तत्राश्विनवाक्ये 'यद्-धूम्रो भवति धूम्रिमाणमेवास्मादपहन्ति, ललामो भवति मुखत एवास्मिन् तेजो दधाति इति वचसि पशोर्धूम्रवर्णेन दौर्ब्राह्मण्य-लक्षणां धूम्रिमाणं मालिन्यमस्माद्यजमानादपहन्ति। ललामशब्दे तु एतस्मिन् यजमाने मुखत एव मुख्यमेव ब्रह्मवर्चसलक्षणं तेजो दधातीत्यर्थके ब्रह्मवर्चसफलस्य स्पष्टत्वात् ब्रह्मवर्चसप्रतिबन्धकीभू-तदौर्ब्राह्मण्यसामान्यमाश्विनेन निवर्त्यते। अत्रैन्द्राग्नाश्विननिवर्त्यं दौर्ब्राह्मण्यद्वयं यस्य वेदश्चेति स्मृत्या निरूपितम्। अत्र वेदवि-

दकथनादेव वेदिविच्छेदस्याऽप्यर्थसिद्धत्वाद्वेदपूर्वकत्वाद्वेदेः पुनरपि वेदिविच्छेदकथनमर्थभेदसूचनायैव भवति। तत्र वेदस्याध्ययनद्वारा ब्रह्मवर्चससम्पादकत्वं मन्त्ररूपपदार्थविधया अर्थज्ञानद्वारा च कर्मोपयोगित्वञ्चेति द्वे रूपे भवतः। तत्र कर्मोपयुक्तरूपद्वारा वेदेर्निर्वर्तकत्वं, रूपान्तरेण ब्रह्मवर्चसहेतुत्वम्। तत्र वेदविच्छेदकथनं ब्रह्मवर्चसप्रतिबन्धभूतदौर्ब्राह्मण्यपरम्। वेदिविच्छेदकथनन्तु क्रत्वधिकारनिमित्तभूतदौर्ब्राह्मण्यज्ञापकम्। एवं वेदी चेति चकारेणैवोक्तसमुच्चयसम्भवाद्वेदश्चेति चकारोऽनतिप्रयोजनः सन्ननुक्तसमुच्चयपरः। एवञ्च 'यथामानोयथाचार' (?) इति श्रुतिगमिताचारस्य शीलादिलक्षणस्य समुचितस्य विच्छेदो वेदविच्छेदसमो ब्रात्यस्तोमनिवर्त्यव्रात्यतारूपस्ताण्डिब्राह्मणेन परिगृहीत इह संगृहीतो भवति। अत्र 'आश्विनं धूम्रललाममालभेत यो दुर्ब्राह्मणः सोमं पिपासेत्' इत्यत्र पिबेदित्यनुक्त्वा पिपासेदिति सनो निर्देशात् प्राथमिकक्रतुप्रयोगेच्छैव परिगृहीता भवति, न तु तदुत्तरक्रतुप्रयोगेच्छापि। 'अश्विनौ वै देवानामसोमपावास्तां तौ पश्चात्सोमपीथं प्राप्नुतामश्विनावेतस्य देवता' इति वाक्यशेषे प्रथमसोमपानस्यैव प्रत्यायनेन तद्देवताकथजनस्यापि तादृक्त्वौचित्यात्। अत्र वेदाद्विविच्छेदमूलकदौर्ब्राह्मण्यनिबर्हणाधीयमानब्रह्मवर्चसफलाय प्राथमिकसोमप्रयोगमाश्रित्याश्विनो विधीयते। तत्र 'सप्तदशारत्निर्वाजपेयस्य यूपः' इत्यत्र साक्षाद्वाजपेये साप्तदश्यान्वयायोगेऽपि तदङ्गपशुद्वारा यथाऽन्वयस्तथा साक्षात्सोमस्य पश्वाश्रत्वाभावेऽपि सोमाङ्गभूताग्नीषोमीयतन्त्रद्वाराऽऽश्रयत्वङ्घटते। ननु सवनीयपशुतन्त्रमेव कुतो नाश्रयः, अग्नीषोमीयपर्यन्तानुधावने को हेतुरिति चेत्, सत्यम्, पिपासेदिति स्पष्टमिच्छाकालिकसोमाङ्गाश्रयणस्य

सूचनात् । सवनीयपशुकाले ऋत्विक्कर्तृकसोमयागस्य शास्त्रयजमानानुमतिपूर्वकस्य प्रवृत्तत्वेन पिपासेदित्यस्य सोमप्रवृत्तीच्छानियतेच्छाकत्वाभावात्सवनीयपशोराश्रयत्वं प्रमाणाननुरूपमेवेत्यग्नीषोमीयस्यैवाश्रयत्वं प्रमाणानुगुणत्वात्परिग्राह्यम्। तथाचाऽऽश्विनपशुवचनं गुणफलविधिर्गोदोहनेन पशुकामस्येति वचनवदिति सिद्धं भवति। ऐन्द्राग्नस्तृतीयपुरुषपर्यन्तसोमविच्छेदसम्भूतदोषोपशमनद्वारा सोमाधिकारसम्पादकत्वादाधानोत्तरं सोमात्पूर्वं यथायोगं कर्तव्यो भवति। आश्विनः पुनरग्नीषोमीयकाल एव; प्रथमसोमाश्रयकत्वात्। एवञ्च प्रथमसोमात्पूर्वंभाविब्रह्मवर्चसाभावनिदानीभूतदौर्ब्राह्मण्यं प्रथमसोमाश्रितेनाश्विनेन निवर्त्यते। तथाचाश्विनः काम्यो गोदोहनवत्, न तु क्रत्वनधिकारहेतुदौर्ब्राह्मण्यनिवर्तकः। ऐन्द्राग्न एव तादृग्दौर्ब्राह्मण्यनिवर्तनद्वाराऽधिकारसम्पादकः। अत एव कात्यायनेन क्रत्वनधिकारव्यावर्तनद्वाराऽधिकारसम्पादनपर ऐन्द्राग्न एव सूत्रितो न त्वाश्विनः। यदि वाऽऽश्विनोऽप्यैन्द्राग्नवदधिकारे हेतुः स्यात्समुच्चित्य, तर्हि 'सर्वशाखाप्रत्यय' न्यायेन क्रत्वधिकारप्रतिपत्तये ऐन्द्राग्नवदाश्विनोऽपि सूत्रितः स्यात्, न तथा; तस्मादाश्विनो ब्रह्मवर्चसप्रतिबन्धकीभूतदोषनिर्हरणपरत्वेन भिन्नफल एव। अत एव कात्यायनिनः केवलैन्द्राग्नानुष्ठानेनैव क्रतुं सगुणं मन्वते। एवञ्च कात्यायनिनामितरेषां वा ब्रह्मवर्चसप्रतिबन्धकीभूतदोषनिर्हरणकामनायां प्रथमसोमप्रयोगे सति पशुराश्विनः कर्तव्यः। ऐन्द्राग्नेनैव प्रथमप्रयोगे सति तु ब्रह्मवर्चसप्रतिबन्धकीभूतो दोषस्तदवस्थ एव भवेत्। प्रथमसोमोत्तरं ब्रह्मवर्चसप्रतिबन्धकदोषनिर्हरणकामनायां तु ताण्ड्यब्राह्मणाद्युक्तव्रात्यस्तोमादय एवाऽनुष्ठेयाः। तत्र व्रात्यता

नानाविधा। तृतीयपुरुषपर्यन्तवेदाचारादिविच्छेदस्ताण्ड्युपात्तश्रुति। तत्रानुपनयनादिप्रयुक्तव्रात्यतादिनिवृत्तावपि तत्तत्प्रमाणप्रवर्तनं समर्थमिति विवेकः।

त्रिकाण्डमण्डनास्तु पश्चात् बहूनिह सञ्चिचिक्षुः—

> एकस्य सोमविच्छेदे केचिदैन्द्राग्नमब्रुवन्।
> त्रयाणां सततं लुप्ते सोमे त्वैन्द्राग्नमाश्विनम्॥
> पिता पितामहो वापि सोमं यस्य न पीतवान्।
> दुर्ब्राह्मणं तमाचष्टे कङ्कः शाखान्तरश्रुतेः॥ इति।

गोपालास्तु—

> सोमेन यद्यमाणस्य यस्य पित्रादयस्त्रयः।
> नेजिरे सोमयागेन स स्याद्विच्छिन्नसोमपः॥
> आलभेत स ऐन्द्राग्नमवशीर्णावयवं पशुम्।
> पुनरुत्सृष्टवाच्यो हि बाह्योत्सृष्टः पुनर्वहन्॥
> छागेऽपि संभवत्येतद्ध इत्येव हिमाचले।
> स्वकण्ठेन भरद्वाजः सुस्पष्टमिदमब्रवीत्॥
> विच्छिन्नसोमपीथो वा दुर्ब्राह्मण इतीरितः। इति।

अत्र 'य आतृतीयात्पुरुषात्सोमं न पिबेत्' इत्यत्र यष्टुः पुरुषात्तृतीयः पितामहः। आङ् मर्यादायाम्। एवञ्च पितुः सोमपानाभावे ऐन्द्राग्नः। अयमर्थ एकस्येति प्रथमकल्पेन गृहीतः। यदि चाऽभिव्याप्तौ, तर्हि पितृपितामहयोः सोमपाने ऐन्द्राग्नः। अयमर्थः पितेत्यादितृतीयकल्पेन गृहीतः। यदि च यष्टारमपहाय पितरमारभ्य त्रिपुरुषपरिग्रहस्तर्हि प्रपितामहपर्यन्तं सोमापाने ऐन्द्राग्नः। अयमर्थस्त्रयाणां पित्रादयस्त्रय इत्येताभ्यां परिगृहीतः। तत्र 'विच्छिन्नसोमपीथो वा दुर्ब्राह्मण इतीरित' इति पक्षेण दौर्ब्राह्म-

ण्यहराऽऽश्विनस्यैन्द्राग्नेनाऽसोमपबाहुल्यात्समुच्चितः । अयमर्थ-त्रयाणामिति मध्यकल्पेन सङ्गृहीतः । तत्र कर्कपक्ष एव साधुः, यष्टुरेव तृतीयावधित्वौचित्यात् । यस्य पिता न सोमं पिबेदिति स्पष्टमनुक्त्वा आतृतीयादिति गुरुतरनिर्देशेनाऽऽङोऽभिव्याप्तिपर-त्वौचित्यात् । असोमपबाहुल्यात् दौर्ब्राह्मण्येनाश्विन इत्यप्यसङ्गतम्; कात्यायनसूत्रविरोधात् । तत्राऽसोमपत्वदोषपरिहारायाश्विनाश्विबन्धनात् (?)। अत एव दौर्ब्राह्मण्येनाऽसोमपत्वप्रयुक्तम्; किन्तु वेदाचारविहीनत्वप्रयुक्तम् ब्रह्मवर्चसाभावबीजभूतकलुषं विलक्षण-मिति विवेकः ॥

केचित्तु—

सावित्रीमात्रसारोऽपि नाऽसौ दुर्ब्राह्मणो भवेत् ।

इति स्मृतेरतिक्रान्ते सावित्र्याः काले 'यस्य पिता पितामह इत्यनुपेतौ स्याताम्' इति आपस्तम्बवचनात्,

आषोडशाद्द्वाविंशाच्चतुर्विंशाच्च वत्सरात् ।
ब्रह्मक्षत्रविशां काल औपनायनिकः परः ॥
अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः ।

इति याज्ञवल्क्यवचनात्,

आषोडशाद् ब्राह्मणस्य सावित्री नातिवर्तते ।
आद्वाविंशात्क्षत्रबन्धोराचतुर्विंशतेर्विशः ॥
अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः ।
सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः ।

इति मनुवचनतः, 'अत ऊर्ध्वं पतितसावित्रीका भवन्ति' इति पारस्करवचनात्, मानान्तैरश्च ज्ञापितदौर्ब्राह्मण्यनिवृत्तयेऽपि आ-

श्विनः पशुः। ऐन्द्राग्नस्तु सोमविच्छेदप्रयुक्तकृत्वनधिकारपरिहारा-येत्याहुः॥

तदेतदतिपेशलम्, 'सावित्रीमात्रसारोऽपीति' स्मृति 'नासौ दुर्ब्राह्मणो भवे' दिति पातित्याभावमेव ब्रूते, न तु ब्रह्मवर्चसप्रतिबन्धकीभूतदौर्ब्राह्मण्याभावम्; 'यस्य वेदश्च वेदीचे' ति स्मृतिरन्यथाऽनर्थिकैव भवेत्। एवं यो दुर्ब्राह्मणः सोमं पिपासेत्' इति वाक्ये सोमं पिपासेदित्यंशोऽनर्थकः स्यात्; 'आश्विनं धूम्रललाममालभेत यो दुर्ब्राह्मण' इत्येतावतैवात्राभिमतार्थलाभसम्भवात्। अतः प्रागुक्तरीत्यैवाश्विनविनियोगः समुचित इति दिक्॥

अथ 'य आ तृतीयात्पुरुषात्सोमं न पिबेत्' इत्यत्र तृतीयम्पुरुषं मर्यादीकृत्याऽभिव्याप्तीकृत्य वा सोमपानाभावस्यैन्द्राग्नंनिमित्तत्वात् पुरुषत्रयादूर्ध्वमपि सोमपानाभावे कथमैन्द्राग्नानुष्ठानम्? निमित्तालाभादिति चेत्, सत्यम्, सहस्रे शतसङ्ख्यावद् बहुपुरुषाणां ब्रह्मसृष्टिमारभ्य प्रवृत्तानां सोमपानाभावे सति तत्र त्रिपुरुषसोमपानाभावोपि सिद्ध इति निमित्तसत्त्वादैन्द्राग्नो भवेदेव। न च त्रिपुरुषोऽर्ध्वमधिकपुरुषसोमपानाभावे एनसो बाहुल्यादेकेनैन्द्राग्नेन तदेनसः कथं विलय इति वाच्यम्; सोमपानाभावबाहुल्यप्रयुक्तैनसां बहुत्वेऽपि सर्वैनसां सन्निधाने जायमानैन्द्रग्नादृष्टवशतो नाशसम्भवात्, अतिक्षुद्राग्निकिरणस्पर्शमात्रेण तूलराशेरल्पस्य महतो वा नाशे भेदाभावात्। एवं त्रिपुरुषमित्यादि पारस्करसूत्रमपि योजनीयम्। कालातिक्रमे नियतवदिति सूत्रं बालकस्यैकस्य पितुश्च द्वयोः पितामहस्य च त्रयाणां पतितसावित्रीकत्वप्रायश्चित्तपरम्। यद्यप्याषोडशादित्युपक्रम्याऽत ऊर्ध्वमित्यनेन बालकस्यैव पतितसावित्रीकत्वमित्युक्त्वा कालातिक्रम इति सूत्रं पठितं बालकस्यैव पतित-

सावित्रीकत्वप्रायश्चित्तपरं भवितुमर्हति; तथापि त्रिपुरुषं पातितसावित्रीकाणामिति त्रिपुरुषपतितसावित्रीकापत्यप्रायश्चित्तविधानेन प्रथमप्रायश्चित्तस्य पुरुषत्रयसाधारणत्वौचित्याम्। अथ कालातिक्रमे नियतवदिति पुरुषत्रयपर्यन्तपतितसावित्रीकप्रायश्चित्तं त्रिपुरुषपर्यन्तं भवेदेव। त्रिपुरुषादूर्ध्वं पतितसावित्रीकत्वे तु नानेन प्रायश्चित्तेन शुद्धिः, तेन नोपनयनसंस्कारो न वाऽध्यापनं किन्तु व्रात्यस्तोमेनेत्याह त्रिपुरुषमिति। संस्कारो नाऽध्यापनञ्च नेत्यन्वयः। तेषां चतुर्णां मध्ये जनः कोपि व्रात्यस्तोमेनेष्ट्वा संस्कारेषुभवेत्। व्रात्यस्तोमं विनोपनयनेच्छा न कार्येत्यर्थः। तत्र प्रमाणमाह काममिति। 'काममधीयीरन् व्यवहार्या भवन्ति' इति वचनात्। ताण्डब्राह्मणवचनतात्पर्यादिति भावः। ताण्डब्राह्मणे ईदृशवचनाभावेन वचनादित्यनेन वचनतात्पर्यादिति लक्षणादिति विवेचनीयम्। अत्राऽनेकपतितसावित्रीकाणां त्रिपुरुषं पतितसावित्रीकोपि भवतीत्यैन्द्राग्नपशुन्यायेन सर्वैनसां व्रात्यस्तोमेन नाशः सम्भवति। विस्फुलिङ्गसम्पर्कतस्तूलराशेरल्पस्य महतो वा नाशदर्शनेन व्रात्यस्तोमाग्निना सर्वव्रात्यतातूलानां युगपदेव विलयनात्। एवञ्चोपनयनाध्ययनाद्यधिकारः सम्भवति, सर्वस्मादपि प्रायश्चित्ताद् व्रात्यस्तोमस्य बलवत्तमत्वात्, एतत्तुल्यप्रायश्चित्तस्याऽपरस्यालीकत्वात्। अत एव याज्ञवल्क्येन प्रथमपर्वण्यपि व्रात्यस्तोमः प्रायश्चित्तमिति गमितम् इति—वर्णितम्, तदिदं पूर्वतनैरेव समालोचनैस्समालोचितप्रायमिति प्रकृतेऽवसरे विस्तरभयाद्विशेषतः समालोचने न प्रवर्तामहे।

अथ प्रसङ्गात् कलौ क्षत्रियादेः सत्त्वमुतासत्त्वमिति विषयमधिकृत्य किञ्चिदिव विचारयामः। तत्र श्रीनागोजिभट्टा एवं वर्णयन्ति

व्रात्यप्रायश्चित्तनिर्णये स्वीये। तद्यथा—कलौ क्षत्रियसादृश्येन तथ व्यवहारेऽपि मुख्यक्षत्रियादयो न सन्त्येव।

[कलौ क्षत्रियादिसत्वे नागोजिभट्टमतम्]

तथाच अर्जुनपौत्रपरीक्षिद्राज्यकाले मैत्रेयं प्रति पराशरेणोपदिष्टे विष्णुपुराणे चतुर्थेंऽशे सूर्यचन्द्रवंश्यानां तत्तत्क्षत्रियाणां वंशसन्ततिमुक्त्वा परीक्षिद्राज्योत्तरं क्षेमकान्तान् चन्द्रवंश्यान् उक्त्वोक्तम्—

ब्रह्मक्षत्रस्य यो योनिर्वंशो देवर्षिसत्कृतः।
क्षेमकं प्राप्य राजानं स संस्थां प्रप्यते कलौ॥

इति। मात्स्येऽप्येवम्—'संस्थास्यति स वै कलौ इति। तत्र तुर्यपादेः—भागवतेऽपि नवमे—

ब्रह्मक्षत्रस्य वंशोऽयं प्रोक्तो देवर्षिसत्कृतः।
क्षेमकं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ॥

इति। वंश इत्युक्त्या राज्यहीनोऽपि वक्ष्यमाणबार्हद्रथवंशातिरिक्त एतद्वंशो नास्तीति सूचितम्। ततो भाविन इक्ष्वाकून् सुमित्रान्तानुक्त्वोक्तम्—

इक्ष्वाकूणामयं वंशः सुमित्रान्तो भविष्यति।
यतस्तं प्राप्य राजानं स संस्थां प्राप्स्यते कलौ॥

इति। स इक्ष्वाकुवंशः। अन्येषां सूर्यवंश्यानां वंशसमाप्तिः पूर्वमुक्तैव। नवमे भागवतेऽपि—'सुमित्रो नाम निष्ठान्तः' इत्युक्तम्। निष्ठा वंशस्थितिस्तस्या अन्त इति तदर्थः। 'इक्ष्वाकूणामयं वंशः इति च पूर्ववदेव। तत्र 'संस्थां प्राप्स्यति वै कलौ इति चतुर्थचरणपाठः। तत्र रिपुञ्जयान्ता भाविनो मागधा बार्हद्रथा उक्ताः। तत्र जरासन्धादिरिपुञ्जयान्तं सहस्रवर्षपर्यन्तं राज्यमुक्तम्। रिपुञ्जयमुक्त्वा—

बार्हद्रथाश्च भूपाला भाव्याः साहस्रवत्सरम् ॥

इति नवमे भागवतेऽपि। तत्र जरासन्धमारभ्याऽयुतायुः पर्यन्तं पञ्चशतं वर्षाणि परीक्षित्कालिकायुतायुतो रिपुञ्जयान्तं पञ्चशतं वर्षाणीतिव्यवस्थातो नाऽग्रिमग्रन्थविरोधः। ततो रिपुञ्जयमपुत्रं हत्वा तदमात्येन स्वपुत्रस्य प्रद्योतस्य राज्यं दत्तम्, तद्वंशे चाऽष्टत्रिंशदुत्तरमब्दशतं राज्यमुक्त्वा ततः शिशुनागवंशे महानन्द्यन्तं द्विषष्ट्याधिकवर्षशतत्रयं राज्यमुक्तम्। द्वादशे भागवतेऽपि—

शिशुनागा दशैवैते षष्ट्युत्तरशतत्रयम्।
समा भोक्ष्यन्ति पृथिवीं कुरुश्रेष्ठ कलौ नृपाः ॥

इति। तद्रूपान्तरत्वान्न विरुद्धम्। ततो महानन्दिसुतः शूद्रागर्भोद्भवोऽतिलुब्धो महापद्मो नन्दः परशुराम इवाऽपरोऽखिलक्षत्रान्तकरो भविता। ततः प्रभृति शूद्रा भूमिपाला भविष्यन्ति। स चैकच्छत्रामनुल्लङ्घितशासनो महापद्मः पृथिवीं भोक्ष्यतीत्युक्तम्। अत्र परशुरामोपमया स्त्रीबालावधि निर्दयं हन्तृत्वं सूचितम्। महापद्म इत्यस्य तावत्सङ्ख्यं धनम्, तावत्सैन्य इति चाऽर्थः। परशुरामेणेव कतिपयानामहननमपि स्यादत आह—अखिलक्षत्रान्तकारीति। तेन क्षत्रियसामान्याभावः सूचितः। तदेवोक्तम्—'भूमिपालाः इति। नन्दस्योग्रत्वेऽपि अनुलोमसङ्कराणां मातृजातीयत्वाच्छूद्रा इत्युक्तम्। तत्तद्देशीयक्षत्रियान् हत्वा तत्सन्तानभूता उग्रास्तत्तद्राज्ये स्थापिता इति तात्पर्यम्। भागवते द्वादशे—

महानन्दिसुतो राजन्! शूद्रागर्भोद्भवो बली।
महापद्मपतिः कश्चिन्नन्दः क्षत्रविनाशकृत् ॥
ततो नृपा भविष्यन्ति शूद्रप्रायास्त्वधार्मिकाः।

इति नन्दादीनामुग्रत्वात् शूद्रप्राया इत्युक्तम्। एतेन राज्या-

धिकारिणो मागधा एवाऽनेन नाशिता न तु देशान्तरस्थाः । शूद्राज्योक्तिरपि मगधदेशविषयैवेति निरस्तम्; सामान्यप्रवृत्तवाक्यस्य सङ्कोचे मानाभावात्, वक्ष्यमाणवाक्यविरोधाच्च; मागधरिपुञ्जयकाल एव सर्वक्षत्रियवंशशाखानाशाच्च । एतच्चाऽग्रे स्फुटं भविष्यति । ततो नन्दपुत्राणाञ्च शतवर्षपर्यन्तं राज्यमुक्तम् । ततश्च कौटिल्यप्रधानत्वात् कौटिल्यः—वात्स्यायनविष्णुगुप्तादिपर्यायः—चाणक्यो नन्दपुत्रानुच्छिद्य नन्दस्य कनीयस्यां भार्यायां मुरासंज्ञायां जातं चन्द्रगुप्तं राज्येऽभिषेक्ष्यति । मौर्याणां सप्तत्रिंशदधिकं वर्षशतं राज्यम् । ततोऽन्त्यं मौर्यं तत्सेनापतिः शुङ्गजातीयः पुष्पमित्रं हत्वा राज्यं करिष्यति । तद्वंशे द्वादशाधिकं वर्षशतं राज्यम् । ततोऽन्त्यं शुङ्गं देवभूतिमपुत्रं तदमात्यः कण्वजातीयो वसुदेवनामा ब्राह्मणो हत्वा स्वयं करिष्यति । तद्वंशे शतत्रयं पञ्चचत्वारिंशच्च वर्षाणि राज्यम् । ततस्तद्भृत्य आन्ध्रजातिः शिप्रकनामाऽन्त्यं कण्वं सुशर्माणं हत्वा स्वयं राज्यं करिष्यति । तद्वंशे षट्पञ्चाशदधिकचतुरब्दशतं राज्यम् । ततः सप्ताऽऽभीराः, दश गर्दभिल्लाः, षोडश कङ्का इति । भागवते—अष्टौ यवनाः, चतुर्दश तुषाराः, चतुर्दश पुक्कसा इति । भागवते—त्रयोदश गुरुण्डाः, एकादश मौना नवनवत्यधिकत्रयोदशवर्षशतानि राज्यं करिष्यन्ति । तेषु छिन्नेषु कैलिकिला यवना भूपतयो भविष्यन्ति । तेषां षडधिकवर्षशतं राज्यमिति । भागवते—'मूर्धाभिषिक्तस्तेषां विन्ध्यशक्तिः'—इत्युक्तम् । मूर्धाभिषिक्तो मुख्यः । मूर्धसिक्त इति पाठे तादृशक्षत्रियश्रेष्ठमुख्य इत्यर्थः । ततः पुरञ्जयादयो नव षड्वर्षाऽधिकं वर्षशतं राज्यं करिष्यन्ति । तत्पुत्रास्त्रयोदश वाह्लीकास्ततः पुष्पमित्रादयस्त्रयः, ततस्त्रयोदश मेकलाः, सत्यकोशला निषधा

नव, ततो मागधो विश्वस्फूर्जिसंज्ञोऽन्यान् वर्णान् करिष्यति। कैवर्तपटुपुलिन्दसंज्ञान् म्लेच्छप्रायान् ब्राह्मणान् राज्ये स्थापयिष्यति। 'उत्साद्याऽखिलक्षत्रजातिम्' इत्युक्तम्। क्षत्रजातिमित्यस्य क्षत्रजातिमुग्रादिरूपामित्यर्थः। एतेन तावत्पर्यन्तमुग्रादिजातिस्थितिः। अग्रे साऽपि नास्तीति सूचितम्। अतो नैतद्बलान्नन्दोत्तरं क्षत्रियसत्तासिद्धिरिति बोध्यम्। भागवतेऽपि—

मागधानान्तु भविता विश्वस्फूर्जिः पुरञ्जयः।
करिष्यत्यपरान्वर्णान् पुलिन्दपटुमद्रकान्॥
प्रजाश्चाऽब्रह्मभूयिष्ठाः स्थापयिष्यति दुर्मतिः।
वीर्यवान् क्षत्रमुत्साद्य पद्मावत्यां स वै पुरि॥
गङ्गाद्वारादाप्रयागं गुप्तां भोक्ष्यति मेदिनीम्।

इति। अत्र क्षत्रपदं तज्जन्यत्वादुग्रपरम्। मागधानामित्यस्य मगधदेशीयानां सङ्कीर्णराज्ञामित्यर्थः। ततोऽन्ते व्रात्यद्विजाऽऽभीरशूद्रान्ताः समकालं पृथ्वीं भोक्ष्यन्ति। ततोऽनुदिनमल्पह्रासाद्धर्मस्य व्यवच्छेदादर्थस्य च सङ्क्षयो भविष्यति। ततश्च धनमेवाऽभिजनहेतुः, रुचिरेव दाम्पत्ये हेतुः, आढ्यतैव साधुत्वे हेतुः, इत्येवमनेकदोषोत्तरे भूमण्डले सर्ववर्णेषु यो बलवान् स भूपतिर्भविष्यतीत्युक्तं 'सर्ववर्णेषु' इति। अस्याऽवशिष्टेषु ब्राह्मणवैश्यशूद्रेष्वित्यर्थः। तेऽपि कलावतिव्रात्यतया शूद्रत्वेनैव पूर्वं गणिता इति न विरोधः। 'अक्षत्रियाश्च राजानः' इति वक्ष्यमाणहरिवंशात्। एतेनैतद्बलात् क्षत्रियसत्तासाधनमपास्तम्। यदि तु—

कलौ न क्षत्रियाः सन्ति कलौ नो वैश्यजातयः।
ब्राह्मणाश्चैव शूद्राश्च कलौ वर्णद्वयं स्मृतम्॥

इत्युक्तेः—

नाधीयन्ते तदाग्नयः न यजन्ते द्विजातयः ।
उत्सीदन्ति तदा चैव वैश्यैस्सार्द्धन्तु क्षत्रियाः ॥

इति मत्स्योक्तेश्च वैश्यस्याऽप्यभावः,तदा सर्वपदं बहुपदञ्च व्यक्तिविषयं बोध्यम् ।

ब्रह्मविट्क्षत्रशूद्राणां यो बली भविता नृपः ।

इति भागवते । तत्तद्वृत्त्या ब्राह्मणेष्वेव विट्क्षत्रव्यवहारो द्रष्टव्यः । एवमेव 'शूद्रप्रायेषु वर्णेषु' इत्यपि व्याख्येयम् । येऽपि तत्तद्वृत्त्या तत्तद्वर्णेन व्यवह्रियमाणास्तेऽप्याचारतः शूद्रतुल्या एवेत्यर्थः । तथा त्रेतायां ब्राह्मणोत्तराः प्रजाः; द्वापरे ब्रह्मक्षत्रोत्तरा इत्युक्त्वा कलौ शूद्रदाशोत्तरा इत्युक्तं द्वादशे भागवते । एवं क्रमेण कलियुगे क्षयमायाति, सर्वधर्मेषु विप्लवङ्गतेषु, भगवतो वासुदेवस्यांऽशः शम्भलग्रामप्रधानविष्णुयशसो गृहे कल्किरूपोऽवतीर्य सकलदस्युम्लेच्छदुष्टाचरणचेतसामशेषाणां क्षयं करिष्यति, स्वधर्मेषु चाऽखिलं जगत् स्थापयिष्यति । अनन्तरं प्रचेतसाऽर्धकलेरवसाने प्रबुद्धानां तेषां जनपदानाममलस्फटिकविशुद्धा मतयो भविष्यन्ति । प्रबुद्धानामित्यनेन सत्त्वगुणोद्रेको दर्शितः । तेषाञ्च बीजभूतानामशेषमनुष्याणां परिणतानामपि तत्कालकृतानामपत्यप्रसूतिर्भविष्यति, तेन कालेन कृतानामाहितशक्तीनामित्यर्थः । तानि च तदपत्यानि कृतयुगधर्मानुसारीणि भविष्यन्तीत्युक्तम् । भागवते—

दिव्याब्दानां सहस्रान्ते चतुर्थे तु पुनः कृते ।
भविष्यति, यदा नृणां मन आत्मप्रकाशकम् ॥

इति । चतुर्थे तु कलावतीते सति यदा नृणां मन आत्मप्रकाशकं भविष्यति, तदा कृतं भविष्यतीति तदर्थः ।

यदा चन्द्रश्च सूर्यश्च तथा तिष्यबृहस्पती ।
एकराशौ समेष्यन्ति, भविष्यति ततः कृतम् ॥

प्रतिद्वादशाब्दं कर्कस्थे गुरावेषां त्रयाणां पुष्येण योगादावृत्तिप्रसङ्गादेकराशाविति । अनागतः क्षत्रियवंशः कियत्कालं स्थास्यतीत्यपेक्षायां दार्ढ्यार्थोक्तमेवाह—

यावत्परीक्षितो राज्यं यावन्नन्दाभिषेचनम् ।
एतद्वर्षसहस्रन्तु कलौ पञ्चदशोत्तरम् ॥

तावत्पर्यन्तमेव शुद्धक्षत्रियवंशः स्थास्यति । अनन्तरं नन्देन सर्वक्षत्रियनाशादित्यर्थ इति रत्नगर्भः । 'परीक्षितो जन्म' इति पाठे पञ्चदशेत्यस्य पञ्चावृत्ता दशेत्यर्थः । उग्रादिरूपक्षत्रवंशस्याऽग्रेऽप्यवस्थानाच्छुद्ध इत्युक्तम् ।

अथ कलिकाललक्षणमाह—

सप्तर्षीणाञ्च यौ पूर्वौ दृश्येते उदितौ दिवि ।
तयोस्तु मध्यनक्षत्रं दृश्यते यत्समं निशि ॥
तेनैव ऋषयो युक्तास्तिष्ठन्त्यब्दशतं नृणाम् ।

प्रागग्रशकटाकारतारासप्तकसप्तर्षिमण्डलस्य पूर्वभागे इष्वाकारेऽग्रमध्यमूलेषु क्रमेण मरीचिसभार्यवसिष्ठाङ्गिरसः, पश्चाद्भागे खट्वाकारे ताराचतुष्के ईशानादिविदिक्षु चतसृषु क्रमेणाऽत्रिपुलस्त्यपुलहक्रतवः, तेषां यौ पूर्वावुदितौ पुलहक्रतू दृश्येते दिवि, तयोर्मध्ये च समं दक्षिणोत्तरे रेखायां समदेशावस्थितं यदश्विन्यादिष्वन्यतमर्क्षं दृश्यते निशि, तेन तथैव युक्ताः सप्तर्षयो नृणामब्दशतं तिष्ठन्ति ।

यदैव भगवद्विष्णोरंशो यातो दिवं द्विजः ।
वसुदेवकुलोद्भूतस्तदैव कलिरागतः ॥

यावत्स पादपद्माभ्यां पस्पर्शे मां वसुन्धराम् ।
तावत्पृथ्वीपरिष्वङ्गे समर्थो नाऽभवत् कलिः ॥
गते सनातनस्यांऽशे विष्णोस्तत्र भुवो दिवम् ।
तत्याज तनु राज्ये यो धर्मपुत्रो युधिष्ठिरः ॥
विपरीतानि दृष्ट्वा च निमित्तानि स पाण्डवः ।
याते कृष्णे चकाराऽथ सोऽभिषेकं परीक्षितः ॥
प्रयास्यन्ति यदा चैव पूर्वाषाढां महर्षयः ।
तदा नन्दात् प्रभृत्येष कलिर्वृद्धिं गमिष्यति ॥

अथ कलिप्रवृत्तिमाह—

ते तु पारीक्षिते काले मघास्वासन् द्विजोत्तमाः ।
तदा प्रवृत्तश्च कलिर्द्वादशाब्दशताधिकः ॥

इति दैवमानेन सन्ध्यासन्ध्यांशाभ्यां सह स द्वादशाब्दशतात्मकः कलिः पूर्वसन्ध्यारूपेण प्रवृत्तोऽपि सन्ध्यारूपमतिक्रम्य स्वेन रूपेण प्रवृत्तः प्रकर्षेण वृत्त इत्यर्थ इति रत्नगर्भादयः । भागवतटिप्पणे श्रीधरोऽप्येवमेतद्वदति—

यस्मिन्कृष्णो दिवं यातस्तस्मिन्नेव तदाऽहनि ।
प्रतिपन्नं कलियुगं तस्य संख्या निबोध मे ॥
त्रीणि लक्षाणि वर्षाणां द्विजमानुषसंख्यया ।
षष्टिं चैव सहस्राणि भविष्यत्येष वै कलिः ॥

इति स्वपुराणकथनकालादेतावान् भविष्यति मुख्यः कलिरित्यर्थः । सन्ध्यांशश्चोत्तरसन्ध्यारूपस्तदुत्तरभावीति बोध्यम् । किञ्च—

तदा नन्दात्प्रभृत्येष कलिर्वृद्धिङ्गमिष्यति ।

इत्युक्तम् । नन्दात्प्रभृति भूलोके क्षत्रियाणामभावान्न्यायदण्डाभावेन कलेर्वृद्धिरिति भावः । अत एव 'नन्दान्तं क्षत्रियकुलम्'

इति सकलजनप्रसिद्धिः । अत्र नाशकवाच्यन्तशब्देन बहुव्रीहिः । मोक्षधर्मेषु नारायणीये—

द्वापरस्य कलेश्चैव सन्धौ पार्यवसानिके ।
प्रादुर्भावः कंसहेतोर्मथुरायां भविष्यति ॥

इत्युक्तं भगवता । पार्यवसानिके समाप्तिकल्पे इत्यर्थः । एवञ्च

द्वापरान्ते हरेर्जन्म यदुवंशे भविष्यति ।

इति ब्राह्मवाक्ये द्वापरधर्माणां केषाञ्चिदनुवृत्तेः कलिसन्ध्यापि तत्त्वेन गृहीतेति बोध्यम् । तत्रैव मुचकुन्दप्रस्तावे—

ततः कलियुगं ज्ञात्वा प्राप्तप्रायं ततो नृपः ।
नरनारायणस्थानं प्रययौ गन्धमादनम् ॥

इत्युक्तेः,

यस्मिन् दिने हरिर्यातो दिवं सन्त्यज्य मेदिनीम् ।
तस्मिन्दिनेऽवतीर्णोऽयं कालकायः कलिः किल ॥

इत्युक्तेश्च । भागवते एकादशे—

मया निष्पादिते ह्यत्र देवकार्यमशेषतः ।
यदर्थमवतीर्णोऽहमंशेन ब्रह्मणाऽर्थितः ॥
न वस्तव्यं त्वया चेह मया त्यक्ते महीतले ।—इति ।

हरिवंशे मुचुकुन्दजागरे तत्प्रश्ने कृष्णवाक्यम्—

त्रेतायुगे प्रसुप्तोऽसि विदितो मेऽसि जागरात् ।
इदं कलियुगं विद्धि किमन्यत्करवाणि ते ॥
महीतले जनोऽधर्मरुचिः सद्यो भविष्यति ।
कलौ युगे—

इत्युद्धवं प्रति भगवदुक्तेश्च । एतेनेदानीं कलेः सन्ध्यैवास्तीति मन्दोक्तिः परास्ता । गदापर्वणि भारते—अधर्मेण दुर्योधनवधं

दृष्ट्वा क्रुद्धं बलदेवं प्रति 'प्राप्तं कलियुगं विद्धि' इति कृष्णवचनाच्च ।

आसन्नं विप्रकृष्टं वा यतः कालं न विद्महे ।
तस्मात् द्वापरसंविद्धं युगान्तं स्पृहयाम्यहम् ॥
प्राप्ता वयन्तु तत्कालमनया धर्मतृष्णया ।
आदद्यां परमं धर्मसुखमल्पेन कर्मणा ॥

इति हरिवंशे जनमेजयोक्तेश्च । कालं मोक्षस्य द्वापरेण समधर्माणां संविद्धमधर्माधिक्याद् दूषितम्, युगान्तं कलिम्, अतोऽस्माभिः कलौ जन्म प्रार्थितमित्यर्थः । अल्पेन कर्मणा अनायाससाध्येन भगवन्नामकीर्तनेन ।

यत्तु—महापद्माख्यनन्देन क्षत्रियाणां नाशेऽपि पुनः प्रवृत्तिमाह—

देवापिः पौरवो राजा मरुश्चेक्ष्वाकुसम्भवः ।
महायोगबलोपेतौ कलापग्रामसंश्रयौ ॥
कृते युग इहागत्य क्षत्रप्रवर्तकौ हि तौ ।
भविष्यतो मनोर्वंशे बीजभूतौ व्यवस्थितौ ॥
एतेन क्रमयोगेन मनुपुत्रैर्वसुन्धरा ।
कृतत्रेतादिसंज्ञानि युगानि त्रीणि भुज्यते ॥
कलौ तु बीजभूतास्ते केचित्तिष्ठन्ति भूतले ।
यथैव देवापिमरू साम्प्रतं समवस्थितौ ॥

प्रघट्टकान्तरेऽपि—ततो मरुः पुत्रोऽभूत्, योऽसौ योगमास्थायाऽद्यापि कलापग्रामाश्रितस्तिष्ठति । आगामियुगे सूर्यवंशक्षत्रप्रवर्तयिता भविष्यतीति क्षत्रस्य क्षत्रियवंशस्य प्रवर्तकौ भविष्यतः । यतो मनोर्वंशे सोमसूर्यवंशरूपे बीजभूतौ व्यवस्थितावित्यर्थः ।

कलेः सन्ध्यायामेव क्षत्रियसत्त्वात् त्रीणि युगानि भुज्यते इत्युक्तमिति रत्नगर्भः,

तत्र सन्ध्याशब्देन कलिप्रारम्भ उच्यते—यथा सूर्योदयोत्तरमपि सूर्यास्तात्पूर्वमपि किञ्चित्कालं सन्ध्याऽव्यवहारस्तद्वत्कलिप्रवेशानन्तरमपि सहस्रवर्षपर्यन्तं सन्ध्याऽव्यवहार इति तदाशयः। वैश्यानामप्यभावे तु एतावेव तेषां प्रवर्त्तकौ बोध्यौ; शुद्धवैश्यानामपि क्षत्रियावस्थायां सह वासात्। अत्र क्षत्रपदञ्च ब्राह्मणावरजद्विजोपलक्षणम्। भागवतेऽपि—

देवापिर्योगमास्थाय कलापग्राममाश्रितः।
सोमवंशं कलौ नष्टं कृतादौ स्थापयिष्यति॥

तथा मरुमुपक्रम्य—

योऽसावास्ते योगसिद्धः कलापग्रामवासिभिः।
कलेरन्ते सूर्यवंशं नष्टं भावयिता पुनः॥

इति नवमे। द्वादशेऽपि—

देवापिः शन्तनोर्भ्राता मरुश्चेक्ष्वाकुनन्दनः।
कलापग्राम आसाते महायोगबलान्वितौ॥
ताविहैत्य कलेरन्ते वासुदेवानुशिक्षितौ।
वर्णाश्रमयुतं धर्मं पूर्ववत् प्रथयिष्यतः॥

इति। कलापग्रामे योगिनामावासत्वेन प्रसिद्ध इति श्रीधरः।
एवञ्च—

अचन्द्रार्कग्रहा भूमिर्भवेदपि कदाचन।
अपौरवा न तु मही भविष्यति कदाचन॥

इति यथात्युक्तश्लोकस्य भविष्ये हरिवंशे सत्त्वेनेदानीं क्षत्रियसत्तासाधनं परास्तम्; देवापेः सत्त्वेन तदनुपपत्त्यभावात्। कलौ

देवापिमरुवदन्यत्राऽपि कलौ बीजभूतानां स्थितिमाह—

कलौ तु बीजभूतास्ते केचित्तिष्ठन्ति भूतले ।
यथैव देवापिमरू साम्प्रतं समवस्थितौ ॥

इति रत्नगर्भादयः । ये तु यथैव देवापिमरू समवस्थितौ, तथा साम्प्रतं कलौ बीजभूता अन्येऽपि केचित्तिष्ठन्ति—इतीमं श्लोकं व्याख्याय एतद्बलेन सम्प्रति क्षत्रियसत्तां वदन्ति, ते एतेन परास्ताः; व्याख्यानग्रन्थविरोधात् । किञ्चैवं सति ब्राह्मणादीनामिव तेषामपि सत्त्वगुणोद्रेकेन तत्रत्यानां कृतयुगानुसारिमतित्वोपपत्तौ देवापिमर्वोरिहागत्य क्षत्रप्रवर्तकत्वोक्तेर्वैयर्थ्यात्, ब्राह्मणानामिव तेषामपि स्वधर्मप्रवृत्तिसम्भवाच्चेति दिक् । मात्स्येपि—

येषु संस्थास्यते क्षत्रमुत्पत्स्यन्ते नृपाश्च ये ।
तान् वद—

इति ऋषीणां प्रश्ने—

येषु संस्थास्यते तत्र ऐलेक्ष्वाकुकुलं शुभम् ।
तान् सर्वान् कीर्तयिष्यामि भविष्ये कथितान् नृप ॥
तेभ्योऽपरे तु ये त्वन्ये उत्पत्स्यन्ते नृपाः पुनः ।
उग्राः पारशवाः शूद्रास्तथाऽन्ये ये बहिश्चराः ॥
आन्ध्राः शकाः पुलिन्दाश्च कलिङ्गा यवनास्तथा ।
कैवर्ताभीरशबरा ये चाऽन्ये म्लेच्छसम्भवाः ॥
पर्यायतः प्रवक्ष्यामि नामतश्चैव तान्नृपान् ।

इत्युपक्रमे क्षेमकान्तमैलं वंशमुक्त्वा—

ब्रह्मक्षत्रस्य यो योनिर्वंशो देवर्षिसत्कृतः ।
क्षेमकं प्राप्य राजानं स संस्थां प्राप्स्यते कलौ ॥

इत्युक्तम् । तत्र पारशवा विक्रमादयः । ततोऽन्ते—

पूरोवंशस्त्वया सूत ! भविष्यति निवेदितः ।
सूर्यवंशे तथा ये तु भविष्यास्तान् वदस्व नः ॥
तथैव यादवे वंशे राजानः कीर्तिवर्द्धनाः ।
वसन्ति जातयो याश्च राज्यं प्राप्स्यन्ति सुव्रत ॥

इति ऋषीणां प्रश्ने ततः सुमित्रान्तं सूर्यवंशमुक्त्वा—

इक्ष्वाकूणामयं वंशः सुमित्रान्तो भविष्यति ।
सुमित्रं प्राप्य राजानं स संस्थां प्राप्स्यते कलौ ॥

इत्युक्त्वा—

प्रतिबाहुरभूद्यस्मात्सुबाहुस्तस्य चात्मजः ।
सुबाहोः शान्तसेनस्तु शतसेनस्तु तत्सुतः ॥
शतसेनाद्य यदोवंशः संस्थां प्राप्स्यति वै कलौ ।

इत्युक्त्वा इतरसर्वक्षत्रियवंशशाखासमाप्त्याशयेन—

अत ऊर्ध्वं प्रवक्ष्यामि मागधा ये बृहद्रथाः—

इत्यादिना रिपुञ्जयान्तास्ते उक्ताः । श्रीधरस्वाम्यपि द्वादशे सर्वसोमवंशशाखापेक्षया यादववंश एवैकश्चिरस्थायीत्याह । ततो महानन्द्यन्तं क्षत्रबन्धून् शैशुनागानुक्त्वा तत्समकालं चतुर्विंशत्यैक्ष्वाकान् सप्तविंशतिपाञ्चालान् चतुर्विंशतिकौशेयान् अष्टाविंशतिहैहयान् द्वात्रिंशत्कलिङ्गान् पञ्चविंशत्यश्मकान् षट्त्रिंशत्कुरून् अष्टाविंशतिमैथिलान् त्रयोविंशतिशूरसेनान् विंशतिवीतिहोत्रान् क्षत्रबन्धूनेव नृपानुक्त्वा—

महानन्दिसुतश्चाऽपि शूद्रायां कलिवर्द्धनः ।
उत्पत्स्यते महापद्मः सर्वक्षत्रान्तको नृपः ॥
ततः प्रभृति राजानो भविष्याः शूद्रयोनयः ।
सर्वक्षत्रमथोत्साद्य भाविनाऽर्थेन चोदितः ॥

एकराट् स महापद्म एकच्छत्रो भविष्यति ।

तत्सन्ततौ राज्यं वर्षशतम्, ततो मौर्याणां सप्तत्रिंशदधिकं शतम्, ततः शुङ्गानां द्वादशाधिकं वर्षशतं, ततः काण्वायनानां पञ्चचत्वारिंशदधिकत्रिशतवर्षाणि राज्यम्, तत आन्ध्राणां षष्ट्युत्तरं चतुःशतम्, ततः सप्ताभीराः, सप्त गर्दभिल्लाः, अष्ट दश च शका यवनास्तुषाराश्चतुर्दश, त्रयोदश मुण्डाः, ततः कैलिङ्काला यवना इत्याद्युक्तम् ।

राजानः शूद्रभूयिष्ठाः पाषण्डानां प्रवृत्तये ।

इति चाऽन्यत्रोक्तम् । क्वचिद् ब्राह्मणानां राज्यदर्शनाद् भूयिष्ठा इत्युक्तम् ।

महापद्माभिषेकात्तु यावज्जन्म परीक्षितः ।
एकवर्षसहस्रन्तु ज्ञेयं पञ्चाशदुत्तरम् ॥

परीक्षिद्राज्यात्तु पञ्चदशोत्तरं सहस्रम्, पञ्चत्रिंशेऽतीते हि तस्य राज्यप्राप्तिरिति स्पष्टं पुराणविदाम् ।

यस्मिन्कृष्णो दिवं यातस्तस्मिन्नेव तदाऽहनि ।
प्रतिपन्नं कलियुगं प्रमाणं तस्य मे शृणु ॥
त्रीणि शतसहस्रन्तु वर्षाणां तत् स्मृतं बुधैः ।
षष्टिवर्षसहस्राणि सङ्ख्यातं मानुषेण तु ॥
दिव्यं वर्षसहस्रन्तु तदा सन्ध्या प्रवर्तते ।
निःशेषे तु तदा तस्मिन् कृतं वै प्रतिपत्स्यते ॥
देवापिः पौरवो राजा ऐक्ष्वाकुश्चापि वै मरुः ।
महायोगबलोपेतौ कालपग्राममाश्रितौ ॥
एतौ क्षत्रप्रणेतारौ नवविंशे चतुर्युगे ।
सुवर्चा मरुपुत्रस्तु ऐक्ष्वाकाद्यो भविष्यति ॥

नवविंशे युगेऽसौ वै वंशस्यादिर्भविष्यति ।
देवापिपुत्रः सत्यस्तु ऐडानां भविता नृपः ॥
क्षत्रप्रवर्तकावेतौ भविष्यौ च चतुर्युगे ।

अत्र पुत्र इत्युपलक्षणम् । एकैका कन्याऽपि तयोर्बोध्या । भागवते नवमे जरासन्धपुत्रवंशे रिपुञ्जयान्तान् भाविनो राज्ञ उक्त्वा द्वादशे—

स्वधामाऽनुगते कृष्णे यदुवंशविभूषणे ।
कस्य वंशो भवेत्पृथ्व्यामेतदाचक्ष्व मे मुने ॥

इति राज्ञः प्रश्नः । स्ववंशस्य क्षेमके संस्थाया नवमे उक्तत्वात्—अयं प्रश्नः । तत्र सोमवंशशाखापेक्षया चिरस्थायी मागधवंश एवेत्याशयेन शुकस्योत्तरम्—

योऽन्त्यः पुरञ्जयो नाम भविष्यो बार्हद्रथः ।
तस्याऽमात्यस्तु शुनकः—

इत्यादिना रिपुञ्जय एव पुरञ्जयः । तेन च पञ्चशतवर्षोत्तरमेव कलौ सङ्करादिदुष्टाः क्षत्रिया इत्युक्तं स्पष्टमेव । यत्तु वनपर्वणि भारते कलिधर्ममुपक्रम्य—

परस्परवधोद्युक्ता मूर्खाः पण्डितमानिनः ।
भविष्यन्ति युगस्यान्ते क्षत्रिया लोककण्टकाः ॥
क्षत्रियाश्चाऽपि वैश्याश्च विकर्मस्था नराधिप ।
अल्पायुषः स्वल्पबलाः स्वल्पवीर्यपराक्रमाः ॥
ब्राह्मणाः क्षत्रियाः वैश्याः सङ्कीर्यन्तः परस्परम् ।
शूद्रतुल्या भविष्यन्ति तपःसत्यविवर्जिताः ॥

इत्युक्तम् । तत्र रिपुञ्जयहननोत्तरं तदमात्यादिषु महानन्द्यन्तं पञ्चशतं वर्षाणि क्षत्रियाणां राज्यसत्त्वात्तेषाञ्च विकर्मस्थतायाः

स्पष्टत्वात्तेषां मात्स्ये क्षत्रबन्धुत्वेन विशेषणाच्च न तद्विरोधः। तत्रैव—

अन्त्या मध्या भविष्यन्ति मध्याश्चाऽन्त्या न संशयः।
ब्राह्मणाः क्षत्रिया वैश्या न शिष्यन्ति जनाधिप॥
एकवर्णस्तदा लोको भविष्यति युगक्षये।

इत्युक्तः। युगक्षये कलावन्त्याः शूद्राः मध्याः क्षत्रियाः वैश्याः शूद्रास्तत्सदृशाः स्वधर्मं सर्वथा त्यक्त्वा तिष्ठन्तीत्यर्थः। तत्र क्षत्रियवैश्यनाशो मात्स्यवैष्णवयोः स्पष्टमेवोक्तः सर्वथोच्छेदरूपः। ब्राह्मणनाशस्तु स्वधर्महान्येति बोध्यम्। विप्राणामपि शूद्राचारत्वादेकवर्ण इत्युक्तम्। यथा सत्ययुगे सर्वेषां धर्मनिष्ठत्वादेकवर्णत्वं मात्स्यादिषूक्तम्। किञ्च—

द्वापरे व्याकुलो धर्मः प्रणश्यति कलौ पुनः।
वर्णानां द्वापरे ध्वंसः सङ्कीर्यन्ते तथाश्रमाः॥
नैका श्रुतिः स्मृतिश्चैव निश्चयो नाऽधिगम्यते।
द्वापरे सन्निवृत्तास्तु वेदा नश्यन्ति वै कलौ॥
ब्राह्मणैः कल्पसूत्रैश्च भाष्यैर्वेदैस्तथैव च।
व्याकुलो द्वापरेऽप्यर्थः क्रियते भिन्नदर्शनैः॥
पूर्वस्वभावास्सन्ध्यासु अवतिष्ठन्ति पादतः।

इति मात्स्येन द्वापरेऽपि केषाञ्चिदेव स्वधर्मेऽवस्थितिबोधनेन सम्प्रति कलौ स्वधर्मेऽवस्थितिं लोकानां वदन्तो भ्रान्ताः एवेत्यलम्॥

नारदीयेऽपि—

भविष्यन्ति कलौ प्राप्ते राजानो ह्यन्त्यजातयः॥

इत्युक्तम्—इति॥

उक्तग्रन्थसमालोचनम् ।

अस्मिन् हि ग्रन्थे कानिचन सामान्यवचनानि-कलौ क्षत्रियादिनिषेधकानि—

कलौ न क्षत्रियाः सन्ति कलौ ना वैश्यजातयः ।
ब्राह्मणाश्चैव शूद्राश्च कलौ वर्णाद्वयं स्मृतम् ॥
न क्षत्राणि नियोक्ष्यन्ति विक्रमस्था द्विजातयः ।
चोरप्रायाश्च राजानो युगान्ते पर्युपस्थिते ॥
म्लेच्छप्रायक्षत्रहन्त्रे नमस्ते कल्किरूपिणे ।
भविष्यन्ति कलौ प्राप्ते राजानोऽप्यन्त्यजातयः ।
अन्त्या मध्या भविष्यन्ति मध्याश्चान्त्या न संशयम् ॥
ब्राह्मणा क्षत्रिया वैश्या न शिष्यन्ति जनाधिप ।
एकवर्णास्तदा लोको भविष्यति युगक्षये ॥

इत्यादीनि संगृहीतानि, येषु कानिचन कलौ क्षत्रियाद्यसत्त्वं विद्यमानम्, कानिचन कलौ तदभावम्, भाविनं कानिचन ब्राह्मणजातेरप्यभावं च गमयन्ति । एतेषां च वचनानां यथावदेव तात्पर्ये ऊरीक्रियमाणे क्षेमकपर्यन्तानां बहूनामेव क्षत्रियाणां प्रमाणान्तरसिद्धं क्षत्रियत्वं बाधितं स्यादिति शास्त्रान्तराविरोधेनैवार्थो वर्णनीयः । अत्र विरुद्धानि प्रमाणानि—

ब्रह्मक्षत्रस्य यो योनिर्वंशो देवर्षिसत्कृतः ।
क्षेमकं प्राप्य राजानं स संस्थां प्राप्स्यते कलौ ॥
(मत्स्य भागवत०)

इक्ष्वाकूणामयं वंशः सुमित्रान्तो भविष्यति ।
यतस्तं प्राप्य राजानं स संस्थां प्राप्स्यते कलौ ॥
बार्हद्रथाश्च भूपालाः भव्याः साहस्रवत्सरम् ।
शिशुनागा दशैवैते षष्ट्युत्तरवतत्रयम् ॥

समा भोद्यन्ति पृथवीं कुरुश्रेष्ठ कलौ नृपाः ॥
महानन्दिसुतो राजन् शूद्रागाभोद्भवो बली ।
महापद्मपतिः कश्चिन्नन्दः क्षत्रविनाशकृत् ॥
ततो नृपा भविष्यन्ति शूद्रप्रायास्त्वधार्मिकाः ।
मागधनां तु भविता विश्वस्फूर्तिः पुरञ्जयः ।
करिष्यत्यधरान् वर्णान् पुलिन्दपटुमद्रकान् ।
प्रजाश्चाब्रह्मभूयिष्ठाः स्थापयिष्यति दुर्मतिः ॥
वीर्यवान् क्षत्रमुत्साद्य पद्मवत्यां स वै भुवि ।
गङ्गाद्वारादाप्रयागं गुप्तां भोद्यति मेदिनीम् ॥
देवापिः शन्तनोर्भ्राता मरुश्चेक्ष्वाकुवंशजः ।
महायोगबलोपेतौ कलापग्रामसंश्रयौ ॥
कृते युगे इहागत्य क्षत्रप्रवर्तकौ हि तौ ।
भविष्यतो मनोर्वंशे बीजभूतौ व्यवस्थितौ ॥
कलौ तु बीजभूतास्ते क्वचित्तिष्ठन्ति भूतले ।
यथैव देवापिमरू साम्प्रतं समस्थितौ ॥
देवापिर्योगमास्थाय कलापग्राममाश्रितः ।
सोमवंशं कलौ नष्टं कृतादौ स्थापयिष्यति ॥
प्रतिबाहुरभूद्राजन् सुबाहुस्तस्य चात्मजः ।
सुबाहोः शान्तसेनस्तु शतसेनस्तु तत्सुतः ॥
शतसेनात् यदोर्वंशः संस्थां प्राप्स्यति वै कलौ ।

इत्यादीनि, येषु कानिचन क्षेमकान्तं क्षत्रियसत्त्वम्, कानिचन रिपुञ्जयान्तं क्षत्रियसत्त्वम्, कानिचन शतसेनान्तं क्षत्रियसत्त्वम्, कानिचन सुमित्रान्तं क्षत्रियसत्त्वम्, कानिचन पुरञ्जया-

न्तं क्षत्रियसत्त्वं च गमयन्ति। तथाच सामान्यवचनानां सर्वेषां यथाश्रुतार्थत्वं कथमपि न योग्यम्।

अन्यथा हि न केवलं क्षेमकान्तस्य क्षत्रियत्वं स्यात्, किन्तु—"ब्राह्मणाः क्षत्रिया वैश्या न शिष्यन्ति जनाधिप" इति वचनानुसारेण ब्राह्मणानामप्यभावप्रसङ्गः। तथाच क्षेमकादिपर्यन्तं क्षत्रियादिबाहुल्यपरतयैव उक्तवचनानां तात्पर्यम्, एवं कलौ कृताद्यपेक्षया क्षत्रियाद्यल्पतापरतायां सामान्यवचनानां तात्पर्यमिति चोरीकर्तव्यम्। एवं च कलिवर्ज्यानामपि संन्यासादीनामिव "यावद्वर्णविभागस्तु यावद्वेदः प्रवर्तते। संन्यासं चाग्निहोत्रं च तावत्कुर्यात्कलौ युगे" इति वचनानुसारेण चतुःशताधिकचतुःसहस्रतमे वर्षेऽतीतेपि क्षत्रियादीनां सत्त्वमपीदानीमङ्गीकरणीयमेव। एवं वर्णयतामस्माकमयमेवाशयः—

यत् यदि कुत्रचन देशे ब्राह्मणा इव क्षत्रियादयोऽपि वैदिकधर्माधिकारिणो यथाकालमुपनयनादिकर्म समाद्रियमाणाश्च वर्तन्ते, तेषां क्षत्रियादीनामपि सत्त्वं कलौ ब्राह्मणानामिव स्वीकर्तव्यमेवेति। ये तु पुनर्विच्छिन्नोपनयनादिसंस्काराः क्षत्रियत्वमात्मनोऽभिमन्यमानाः व्रात्यक्षत्रियादिपुत्राः, न तेषामपि तावता वैदिकक्षत्रियधर्माधिकारः संभवति। व्रात्या हीदानीं वर्तमानाः सर्व एव यदि क्षत्रियाणां क्षत्रियायां व्रात्यब्राह्मणानां ब्राह्मणीषु चोत्पन्ना भवेयुः, तर्हि कथंचन क्षत्रियत्वमन्ततो गत्वा स्वीकर्तुं शक्येत, परन्तु—

"क्षत्रियाश्चापि वैश्याश्च विकर्मस्था नराधिप।
अल्पायुषः स्वल्पबलाः स्वल्पवीर्यपराक्रमाः॥
ब्राह्मणाः क्षत्रिया वैश्याः संकीर्यन्तः परस्परम्।

शूद्रतुल्या भविष्यन्ति तपःसत्यविवर्जिताः ॥

इति वचनेनेदं ज्ञायते, यत् परस्परसङ्करसम्भावनया सङ्करजातित्वमेवेदानीमसंजातोपनयनादिसंस्काराणां क्षत्रियम्मन्यानामिति। एतदेवाभिप्रेत्य—

तेभ्योऽपरे तु ये त्वन्ये उत्पत्स्यन्ते नृपाः पुनः।
उग्राः पारशवाः शूद्राः तथाऽन्ये ये बहिश्चराः॥
आन्ध्राः शकाः पुलिन्दाश्च कलिङ्गा यवनास्तथा।
कैवर्ताभीरशबराः ये चान्ये म्लेच्छसंभवाः॥

इति उग्रत्वादिकमेव क्षेमकानन्तरं प्रतिपादितम्। एतावत्तु अस्माभिरपि स्वीकर्तुं शक्यते—यत् बहुतरपरम्परापर्यन्तं विच्छिन्नोपनयनादिसम्प्रदायानामिदानींकथमपिस्वपितरं मातरं वा क्षत्रियजातिं जानतां न मातापित्रन्यतरजातिमात्रज्ञानेन क्षत्रियत्वं स्वीकर्तुं शक्यते। येषां तु परम्परायां मातापितृपरम्परा सर्वापि क्षत्रियजातिरेवेति निर्णीयते, तत्र परमस्माभिरपि तेषां व्रात्यक्षत्रियत्वन्तु स्वीक्रियते। तेन च जातितस्तेऽन्यापेक्षयोत्कृष्टा इत्यत्र तु न विशयलेशोऽपि। यत्त्वत्र विचारणीयमपरं समापतितम्—यत् व्रात्यसंस्कारेण तेषां शुद्धक्षत्रियजातिप्रवेशो भवितुमर्हति वा न वेति, तदिदं अनुपदमेव विवेचितम्। एतावत्त्वत्र निष्कृष्यते—यत् कलौ क्षत्रियादयोऽपि अविच्छिन्नोपनयनादिसंस्कारा अपि वर्तन्त इति। अयमत्र निष्कर्षः—

[कलौ क्षत्रियादिसत्वे प्रमाणानि]

"कलौ पराशराः स्मृताः" इति वचनेन कलिकालोपयुक्तपराशरस्मृतिपर्यालोचने क्षत्रियादिसत्त्वमेव सिध्यति, ततश्च कलौ चातुर्वर्ण्यमस्त्येव। नहि पराशरस्मृतेः सामान्यतःप्रवृत्ताया कलौ क्षेमकान्तपरत्वमिति कल्पनायां

कापि विनिगमना समस्ति । अत एवाधोनिर्दिश्यमानानि पराशरवचनान्युपपद्यन्ते । तानि यथा—

यजेत वाश्वमेधेन राजा तु पृथिवीपतिः ।१८। ५० ।
अतः परं गृहस्थस्य कर्माचारं कलौ युगे ।
कर्मसाधारणं शक्त्या चातुर्वर्ण्याश्रमागतम् ॥
तं प्रवक्ष्याम्यहं पूर्वं पराशरवचो यथा ॥८ । १ ॥
सर्वे धर्माः कृते जाताः सर्वे नष्टाः कलौ युगे ।
चातुर्वर्ण्यसमाचारं किञ्चित्साधारणं वद ॥ १ । १६ ॥
चातुर्णामपि वर्णानां कर्तव्यं धर्मकोविदैः ।
ब्रूहि धर्मस्वरूपज्ञ सूक्ष्मं स्थूलं च विस्तरात् ॥
शृणु पुत्र प्रवक्ष्यामि शृण्वन्तु मुनयस्तथा ।
युगे युगे च धर्मास्ते तत्र तत्र च ये द्विजाः ॥
तेषां निन्दा न कर्तव्या युगरूपा हि ते द्विजाः ॥
अहमद्यैव तत्सर्वमनुस्मृत्य ब्रवीमि वः ।
चातुर्वर्ण्यसमाचारं शृण्वन्तु मुनिपुङ्गवाः ॥
क्षत्रियश्चापि वैश्यश्च क्रियावन्तौ शुचिव्रतौ ।
तद्गृहेषु द्विजैर्भोज्यं हव्यकव्येषु नित्यशः ॥ ११-१२
राज्ञश्च सूतकं नास्ति यस्य चेच्छति पार्थिवः ॥
अमेध्यरेतो गोमांसं चण्डालान्नमथापि वा ।
यदि भुक्तं तु विप्रेण कृच्छ्रं चान्द्रायणं चरेत् ॥

इति । एषु हि वचनेषु चातुर्वर्ण्यस्य विशेषतः क्षत्रियादेश्च कलावुल्लेखो हि कलौ क्षत्रियाद्यसत्त्वेऽनुपपन्नः स्यात् । क्षत्रियवैश्ययोः स्वरूपेणाभाव इति (परा० मा० ११) माधवोक्तिस्तु कलौ क्षत्रियवैश्ययोर्विरलयाशयैव, अन्यथा हि तदुक्तरीत्या ब्राह्म-

णानां तेन न्यायेन शूद्राणां चाभावप्रसङ्गः। यदि तु मुख्यब्राह्मणाभावेऽपि ब्रह्मशूद्रयोः सत्त्वम्, तथा तादृशक्षत्रियाद्यभावेऽपि क्षत्रियवैश्ययोरपि सत्त्वमुपपन्नमेव। इयान् विशेषः—यदिदानीं क्षत्रियवैश्यानां उपनयनादिसंस्कारस्य बहुषु स्थलेष्वदर्शनात्, ब्राह्मणेषु तु सर्वत्रोपनयनादिसंस्कारस्य दर्शनात्, क्षत्रिया वैश्या वा सन्तोऽपि शूद्रत्वेनैव व्यपदिश्यन्ते। तदुक्तं महाभारते—"वृषलत्वं गता लोके ब्राह्मणादर्शनेन तु" इति। यथा हि ब्राह्मणानां उपनयनार्थं नेतरवर्णापेक्षा, न तथा वर्णान्तरस्य। तथाच ब्राह्मणादर्शनेन केचन क्षत्रिया वृषलाः सञ्जाता इत्येवात्र विवक्ष्यते। तावता कथं सर्वेषां क्षत्रियाणां वृषलत्वकल्पनं समुचितं भवति? यत्तु किञ्च केचनेदानीं पर्यनुयुञ्जते—कथमिदानीं ब्राह्मणानां दर्शनेन ते क्षत्रियाः कर्तुं न शक्यन्ते—इति, अत्रेदमेवोत्तरम्—यदिदानीं कायस्थानां अन्येषां बहूनामेव क्षत्रियत्वमात्मनः कल्पयतामुपलम्भात्, सर्वैरपि क्षत्रियत्वस्यैव काङ्क्षणाच्चाव्यवस्थाऽत्र संपद्येतेति नात्र नूतना व्यवस्था संभवति। एतावत्तु अस्माभिरपि स्वीकर्तुं शक्यते—सर्व एवेमे व्रात्यक्षत्रिया व्रात्यवैश्या वा स्वपूर्वतनानां केषाञ्चनोपनयनादिसंस्कारस्मरणे भवितुमर्हन्तीति। व्रात्यसंस्कारस्तु वयं पश्यामः—वृद्धप्रपितामहपर्यन्तमेवानुपनीतत्व एव योग्यः, नतु परम्परासततकं तदधिकं वा यावदनुपनीतत्वेऽपि। व्रात्यक्षत्रियाणां चैतेषां यदि कुत्रचन शुद्धक्षत्रिया उपलभ्यन्ते, तर्हि "तैः साकं भोजनं विवाहमिति वर्जयेदि" त्यापस्तम्बवचनात् न परस्परं भोजनादियोग्यता, किन्तु परस्परमेव सा भवति। तदुक्तम्—अथ पतिताः समवसाय धर्मांश्चरेयुः, इतरेतरयाजका इतरेतराध्यापका मिथो विवहमानाः—इति बौधायनाचार्यादिना। अत्र तान्त्रिकधर्माधिकारस्तत्तद्दीक्षाप्र-

हणपूर्वकं ब्रात्यक्षत्रियाणामपि वर्तत एवेति व्यर्थ एवायं वैदिक-धर्मग्रहणेऽनधिकृत आग्रहः। सर्वथा तु कलावाद्यन्तयोः स्थिति-रिति वचनं बहुलयाभिप्रायमेव। एतेन—

देवापिर्योगमास्थाय कलापग्राममास्थितः
सोमवंशं कलौ नष्टं कृतादौ स्थापयिष्यति॥

(श्रीमद्भागवते ६ स्कन्धे)

एतेषां नामलिङ्गानां पुरुषाणां महात्मनाम्।
कथामात्रावशिष्टानां कीर्तिरेव स्थिता भुवि॥
देवापिः शन्तनोर्भ्राता मरुश्चेक्ष्वाकुवंशजः॥
कृते युगे इहागत्य क्षत्रप्रवर्तकौ हि तौ।
महानन्दिश्च शूद्रागर्भोद्भवौ महापद्मनन्दौ॥
नन्दः परशुराम इवाखिलक्षत्रियान्तकारी भविष्यति॥
यावत्परीक्षितो जन्म यावन्नन्दाभिषेचनम्।
एतद्वर्षसहस्रन्तु ज्ञेयं पञ्चाशदुत्तरम्॥

(विष्णुपु०) इत्यादिवचनैर्निर्विशङ्कैव क्षत्रियाद्युच्छित्तिरिति शङ्कापि—परास्ता; परशुरामस्य सकलक्षत्रियान्तकारित्वप्रसिद्धौ वैराग्येण तपोनिष्ठतायामपि सत्यां यदि कुशलवादिक्षत्रियाणामपि सत्वात् श्रीदशरथवंशोच्छोदकत्वं नास्तीति कल्प्यते, तर्हि "नन्दान्तं क्षत्रियकुलम्" इत्यादीनामपि चक्रवर्तिनः क्षत्रियस्य नन्दतः परमवस्थानाभावबोधन एव तात्पर्यमिति कल्पनान्न कोपि दोषः। युक्तं चैतत्। अत एव हि—

एतेन क्रमयोगेन मनुवृत्तैर्वसुन्धरा।
कृतत्रेताद्वापराणि युगानि त्रीणि भुज्यते॥
कलौ तु बीजभूतास्तु केचित् तिष्ठन्ति भूतले।

तथैव देवापिमरू साम्प्रतं समवस्थितौ ॥

इति विष्णुपुराणवचनम् ॥

ब्रह्मक्षत्रविशः शूद्रा बीजार्थे य इह स्थिताः ।
कृते युगे हि तैः सार्धं निर्विशेषा भवन्निति ॥

इति मत्स्यपुराणवचनं च सङ्गच्छेते । एतदत्राभिप्रेत्य विष्णुपुराणव्याख्यायामत्रैव—"क्षत्रियाणामल्पत्वादन्ते तदुच्छेदनाच्च त्रीणि युगानि भुज्यन्ते" इति श्रीधराचार्येण, कृतत्रेतेति युगत्रयभुक्तिवचनं कलेरल्पक्षत्रियत्वादित्यन्यैश्च निरूपितम् । तथा च—प्रच्छन्नरूपाः स्वकर्मभ्रष्टाः क्षत्रिया वैश्याश्च कलावपि सन्त्येवेति कमलाकरभट्टसिद्धान्त एव समुचितः । एवंच नन्दात्परमेव विक्रमादित्यभोजराजादिक्षत्रियाणां बहूनामाविर्भावोऽप्युपपद्यते इति कलौ क्षत्रियादिनिषेधोऽसंभवदुक्तिक एव । वैश्याभावे तु न किमपि प्रमाणमस्ति । पूर्वोदाहृतानि वचनानि सत्यं क्षत्रियाभावपरतया संभाव्यन्ते, वैश्याभावे तु न कथमपि प्रमाणानि । एतेन—कलावाद्यन्तयोः स्थितिरिति वाक्यमपि—परास्तम् ; चिन्त्यमूलत्वादिति श्रीचिन्तामणिराववैद्यमहोदया मन्यन्ते । परे त्वङ्गीकृत्याप्येतद्वचनं अस्य कलिकालान्तिमांशविषयत्वात् यावद्वेदप्रवृत्ति क्षत्रियादिसत्त्वमपि न दोषायेति मन्यन्ते । सर्वथा तु कलौ क्षत्रियाद्यसत्त्ववादोऽयं चिन्त्यमूल एवेति प्रतिभाति । अन्यथा कलिधर्मप्रतिपादकपराशरस्मृत्यादौ पूर्वोक्तरीत्या क्षत्रियाणामपि परामर्शः कथमवोपपद्यत इति सर्व एव विजानन्तु । सत्यपि च क्षत्रियादिसत्त्वे व्रात्यसंस्कारेण शुद्धक्षत्रियतां तु न सर्व एवार्हन्तीति त्वन्यदेतत् । सत्यं स्ववंशमूलपुरुषाणामेवायं अश्रद्धादोषः, तथापि तदुत्पन्नत्वात् , तदीयानेकपरम्परातिक्रमाच्च श्रद्धावलम्बी-

दानीन्तनानां तान्त्रिकदीक्षादिग्रहणेन पृथक् संस्थैव युक्ता। तत्र तद्दीक्षिताः सर्वधर्मबहिष्कृतान्यापेक्षयोत्कृष्टा इति तु वयं प्रतीमः। अत्र सर्वतन्त्रस्वतन्त्राः पण्डितवरा एव प्रमाणं शरणं च भवन्ति। अत्र प्रसङ्गे श्रीराममिश्रशास्त्रिणां मतसंग्रहणमपि योग्यं पश्यामः।

[उक्तार्थव्रात्यसंस्कारमीमांसा।]

तथा हि—व्रात्यसंस्कारमीमांसायां श्रीराममिश्रशास्त्रिणः—तदेवं व्यवस्थापिये त्रिपुरुषोर्ध्वपतितसावित्रीकाणामपि ब्रह्मक्षत्रियविशां संस्कर्यत्वे सांप्रतं निष्क्षत्रवैश्यमिदं सकलं जगदाचक्षते। तत्रादौ नन्दानन्तरमाकृतयुगाद्यं कलिकाल एतद्ब्रह्माण्डावच्छेदेन देवापिमरुतत्परिणेयपत्नीव्यतिरिक्तागौणवैश्यसत्तावान्ने वेति प्रत्येकं विप्रतिपत्तिः।

अथवा नन्दानन्तरमाकृतयुगाद्यं काल एतद्ब्रह्मावच्छेनेन देवापिमरुतत्परिणेयक्षत्रियवैश्यकन्यातिरिक्तब्राह्मणभिन्नागौणद्विजसत्तावान्नवेत्येकैव विप्रतिपत्तिः। तत्र विधिकोटिश्चातुर्वर्ण्यरक्षणविचक्षणस्य, निषेधकोटिः प्रतिपक्षस्य। विप्रतिपत्तिवाक्यस्थपदव्यावृत्तिस्तु विस्तरभयादुपेक्ष्यते। तत्र कलिकाले यथा कालमहिम्ना यमनियमदानव्रततपश्चर्याध्ययनादिना क्षामा अपि, दम्भाहङ्कारजिघांसाऽसूयाऽसहिष्णुत्वादिशीलशालिनोपि, कुलक्रमागता विशुद्धप्रसूतयः ब्राह्मणाः सुलभाः,सुलभाश्च केचिदपि शास्त्र परायणा धर्मभीरवो लोकाहिते रता विरताश्चयथासम्भवं पापकर्मभ्यो विप्रकुलालङ्करणायिताः, येषां सद्भावेनेयं भारतभूर्विध्रियते, तथा सन्तिकेऽपि क्षत्रिया वैश्याश्चापि जन्मना विशुद्धवंशजाः कर्मणा च समयानुरूपमनुरूपाः। तत्र प्रमाणं तु कलिधर्मनिरूपणैदम्पर्येण प्रवृत्ता पाराशरस्मृतिः। तथाहि एकादशेऽध्याये प्रायश्चित्तनिरूपणावसरे—

अमेध्यरेतो गोमांसं चाण्डालान्नमथापि वा ।
यदि भुक्तं तु विप्रेण कृच्छ्रं चान्द्रायणं चरेत्॥१॥
तथैव क्षत्रियो वैश्यस्तदर्धं तु समाचरेत् ॥ २ ॥

तत्रैवाध्याये पुनः—

शूद्रोप्यभोज्यं भुक्तवान्नं पञ्चगव्येन शुध्यति ।
क्षत्रियो वापि वैश्यश्च प्राजापत्येन शुध्यति'॥७॥

इति । तत्रैवाध्याये—

क्षत्रियो वापि वैश्यो वा क्रियावन्तौ शुचिव्रतौ ।
तद्गृ षु द्विजैर्भोज्यं हव्यकव्येषु नित्यशः ॥१३॥

ते । पुनश्च तत्रैव—

अज्ञा द्भुञ्जते विप्राः सूतके मृतकेऽपि वा ।
प्रायश्चित्तं कथं तेषां वर्णे वर्णे विनिर्दिशेत् १५

इति प्रश्ने:—

गायत्र्यष्टसहस्रेण शुद्धः स्याच्छूद्रसूतके ।
वैश्यः पञ्चसहस्रेण त्रिसहस्रेण क्षत्रिये ॥ १६ ॥
ब्राह्मणस्य सदा भुंक्ते प्राणायामेन शुध्यति ।
अथवा वामदेव्येन साम्ना चैकेन शुध्यति ॥१७॥
शुष्कान्नं गोरसं स्नेहं शूद्रवेश्मन आगतम् ।
पक्वं विप्रगृहे पूतं भोज्यं तन्मनुरब्रवीत् ॥ १८ ॥
आपत्काले तु विप्रेण भुक्तं शूद्रगृहे यदि ।
मनस्तापेन शुद्ध्येत्तु द्रुपदां वा शतं जपेत् ॥१९॥
दासनापितगोपालकुलमित्रार्द्धसीरिणः ।
एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत् ॥२०

पुनरप्यत्राध्याये—

भाण्डस्थितमभोज्येषु जलं दधि घृतं पयः ।
अकामस्तु यो भुंक्ते प्रायश्चित्तं कथं भवेत् २४
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वाप्युपसर्पति ।
ब्रह्मकूर्चोपवासेन यथा वर्णस्य निष्कृतिः ॥२५॥
शूद्राणां नोपवासः स्याच्छूद्रो दानेन शुध्यति ।
ब्रह्मकूर्चमहोरात्रं श्वपाकमपि शोधयेत् २६ इति ।
तत्रैव स्मृतौ पुनर्द्वादशाध्याये:—
अज्ञानात्प्राश्य विण्मूत्रं सुरां वा पिबते यदि ।
पुनः संस्कारमर्हन्ति त्रयो वर्णाः द्विजातयः २५
अजिनं मेखला दण्डो भैक्षचर्याव्रतानि च ।
निवर्तन्ते द्विजातीनां पुनस्संकारकर्मणि ॥ ३ ॥
स्त्रीशूद्रस्य तु शुध्यर्थं प्रजापत्यं विधीयते ।
पञ्चगव्यं ततः कृत्वा स्नात्वा पीत्वा विशुध्यति

इत्येवमादिवचनजातं संस्फुटं क्षत्रियवैश्यसत्तां कलावपि प्रत्याययति। कथमन्यथा तेषां कलावसत्त्वे पार्थक्येन क्षत्रियवैश्यानामाचारप्रायश्चित्ताशौचादिनिरूपणं साक्षात्कृतपदार्थसार्थसारस्य महर्षेः पराशरस्य संगच्छताम्। न चात्र क्षत्रियवैश्यपदेन क्षत्रियवैश्याचारा ब्राह्मणा एव गृह्यन्त इत्यन्तमुदक्षरं शङ्कनीयम् ; तथा सति कलौ चार्वण्यानङ्गीकारेण ब्राह्मणशूद्रयोर्द्वयोरेव सर्ववर्णविश्रान्त्या पराशरद्वितीयाध्याये:—

'अतः परं गृहस्थस्य धर्माचारं कलौ युगे ।
धर्मं साधारणं शक्यं चातुर्वर्ण्याश्रमागतम् ॥ १ ॥
सम्प्रवक्ष्याम्यहं भूयः पराशर्यप्रचोदितः ।"

इत्येवं चातुर्वर्ण्यधर्मनिरूपणप्रतिज्ञाया असंगतत्वापत्तेः ।

एवं—

चातुर्वर्ण्यसमाचारं शृणुध्वं मुनिपुङ्गवाः ।
पराशरमतं पुण्यं पवित्रं पापनाशनम् ॥ १ ॥

इति प्रथमाध्याये पञ्चत्रिंशत्तमश्लोकोऽप्युपरुद्ध्येत कलौ चातुर्वर्ण्यस्य ब्राह्मणवैश्ययोरेव विश्रान्तिकल्पनायाम् । न हि ब्राह्मणा एव क्षत्रियवैश्याचारा इति चातुर्वर्ण्यवचनकदर्थनं युज्यते; अन्यथा तु ब्राह्मणा एव केचिच्छूद्राचारा इति कृतं ते शूद्रकल्पनयाऽपीत्येकवर्णशेष एव कृतः स्यादिति न किञ्चिदेतत् । किंच युगान्तरोक्तस्वस्वधर्मानुष्ठानाशक्ता ब्रह्मक्षत्रविशः कलावल्पप्रायश्चित्तसुकराचाराद्युपदेशेन भगवता पराशरेणानुगृह्यन्ते इह स्मृतौ, नतु क्षत्रियवैश्याचाराः परित्यक्तस्वधर्माणो ब्राह्मणा एवाधमाः सन्तः पुनरुपादिश्यन्तेऽधमयितुं क्षत्रियवैश्याद्याचारजातम्, किन्तु शुचिव्रताः सोमसूर्यवंशजाः क्षत्रियाः गर्गादिकुलप्रभवा विशुद्धा वैश्याश्च बोध्यन्ते कलिकालानुष्ठेयस्वाचारजातम् । अत एव तु—"क्षत्रियो वाऽपि वैश्यो वा क्रियावन्तौ शुचिव्रतौ । तद्गृहेषु द्विजैर्भोज्यं हव्यकव्येषु नित्यशः ।" इतीहैव पराशरः स्पष्टं शुच्याचारक्षत्रियवैश्यगृहे ब्राह्मणानां हव्यकव्येषु भोजनमनुमन्यते, त्वदुक्तरीत्या अधमा ब्राह्मणा एव क्षत्रियवैश्या इति "क्रियावन्तौ शुचिव्रतौ" इति ऋषेरभिधानमत्यन्तमुपमर्दितं स्यात्, भवेच्चात्यन्तोपमर्दो द्वादशाध्यायीयस्य "अज्ञानात्प्राश्य विण्मूत्रं सुरां वा पिबते यदि । पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः" ॥२॥ इति वचनस्य । न ह्येकस्यैव ब्राह्मणवर्णस्य मध्यमोत्तमाधमभावमादाय 'त्रयो वर्णा द्विजातयः' इति वर्णत्रैविध्याभिधानं घटेतेत्यलमेतेनासदावेशेनेति शम् ॥

यदपि पराशरस्मृतिस्थक्षत्रियवैश्याचारप्रायश्चित्तादिबोधकवचनजातं न साम्प्रतिकघोरकलिकालार्थम्, किन्तु श्रीकृष्णस्य भगवतः सनातनस्य चरणस्पर्शवैधूर्यमुपगतायां भुवि प्रादुर्भूतस्वदुर्महिम्नोऽप्यनालम्बितकठोरभावस्य परीक्षिद्राज्यकालमारभ्य कलेर्यावन्न किंचिदुत्तरसहस्रवार्षिको भोगः, तावत्कालं सुमित्रक्षेमकरिपुञ्जयाद्युत्पत्तिपर्यन्तमेव विशुद्धक्षत्रियादिवंशप्रचार इति तत्पर्यन्तमेव क्षत्रियादिप्रायश्चित्तनिर्णायकतया पराशरस्मृतेः सार्थक्ये नेदानीं ततः क्षत्रियवैश्यसत्तावगतिरिति, तदेतदनालोचितस्मृतिपुराणशास्त्राणां दुर्भणितमेव। असति बलवत्तरे प्रमाणे सामान्यप्रवृत्तायाः पराशरस्मृतेः परीक्षिद्राज्यकालमारभ्य क्षेमकादिकालपर्यन्तमेव प्रवृत्तौ मानाभावात्, ब्राह्मणशूद्रयोराचारप्रायश्चित्तादिनिर्णयार्थमधुनापि तत्प्रामाण्याङ्गीकारे क्षत्रियवैश्ययोर्विषये तदप्रामाण्ये मानाभावाच्च। किंच पारीक्षितेन जनमेजयेन अश्वमेधसमये आध्वर्यवमात्राधिकारिणो वाजसनेयका ब्रह्मत्वादिसर्वकर्मसु वृताः, तेन चासन्तुष्टो वैशम्पायनः शशाप राजानं जनमेजयम्, यथोक्तं मात्स्ये पञ्चाशत्तमेऽध्याये—

> जनमेजयः परीक्षितः पुत्रः परमधार्मिकः।
> ब्रह्माणं कल्पयामास स वै वाजसनेयकम्॥ ६४॥
> स वैशम्पायनेनैव शप्तः किल महर्षिणा।
> न स्थास्यतीह दुर्बुद्धे तवैतद्वचनं भुवि॥ ७॥
> यावत्स्थास्यसि त्वं लोके तावदेव प्रपत्स्यति।
> क्षत्रस्य विजयं ज्ञात्वा ततः प्रभृति सर्वशः॥ ८॥
> अभिगम्य स्थिताश्चैव नृपं च जनमेजयम्।
> ततः प्रभृति शापेन क्षत्रियस्य तु याजिनः॥ ९॥

उत्सन्ना याजिनो यज्ञे ततः प्रभृति सर्वशः ।
क्षत्रस्य याजिनः केचित् शापात्तस्य महात्मनः ॥ १०॥
पौर्णमासेन हविषा इष्ट्वा तस्मिन्प्रजापतिम् ।
स वैशम्पायनेनैव प्रविशन्वारितस्ततः ॥ ११ ॥
परीक्षितः सुतः सो वै पौरवो जनमेजयः ।
द्विरश्वमेधमाहृत्य महावाजसनेयकः ॥ १२ ॥
प्रवर्तयित्वा तं सर्वमृषिं वाजसनेयकम् ।
विवादे ब्राह्मणैस्सार्द्धमभिशप्तो वनं ययौ ॥१३॥

इति । स्पष्टमिदमेतेन यज्जनमेजयादिसमयपर्यन्तमश्वमेधादिमहायज्ञाहृतिः प्रावर्तत, प्रावर्तत च कलिनिषिद्धोऽपि वानप्रस्थाश्रम इति न तत्पर्यन्तं कलिवर्ज्यप्रकरणोक्तहेयोपादेयधर्मानुष्ठानप्रवृत्तिरासीत् । जनमेजयेन, तत्पुत्रेण शतानीकेन, तत्पुत्रेणाधिसोमकृष्णेन चासकृदेवाश्वमेधादियज्ञाहृतेरनुष्ठीयमानत्वात् । अश्वमेधादेश्च प्रबले कलौ निषेधात्, किं तु क्षमकानन्तरकाले एव यज्ञनिषेधः । तं चाधिकृत्य कालं पराशरमाधवीये पुराणवचनम्—

"ब्राह्मणादिषु शूद्रस्य पचनादिक्रियापि च ।
भृग्वग्निपतनाद्यैश्च वृद्धादिमरणं तथा"

इति । ततश्च महाकलिप्रवृत्त्यनन्तरं यदि ब्राह्मणाः शूद्राश्चेति वर्णद्वयमेव, न तु क्षत्रिया वैश्याश्च, तदा 'ब्राह्मणादिषु' इत्यादिशब्देन किमुपादेयं स्यात्? न ह्मीह ब्राह्मणव्यक्तिबहुत्वेनादिशब्दसार्थक्यसंभावना; आदिशब्दस्यैवंविधस्थले ब्राह्मणत्वेतरवर्णत्वसाधाद्व्याप्यधर्मावच्छिन्नबोधकत्वस्याजानिकसंकेतसिद्धतया तस्याऽतथाभावस्य सुरगुरुणाप्यन्यथाकर्तुमशक्यत्वात् । तदिहादिपदं

वर्तमानकाले क्षत्रियवैश्यवर्णसत्तां बोधयतीति शास्त्रतत्त्वार्थविदः।

अथ स्मृतीनां पुराणापेक्षया बलवत्तरतया वचनप्रामाण्य-निरूपणावसरे मीमांसादिशास्त्रेषु व्यवस्थापितत्वेऽपि "यत्परः शब्दः स शब्दार्थः" इति न्यायेन वंशानुचरितलौकिकाख्यानगोत्रादिपरम्परानिरूपणे पुराणानां स्मृत्यपेक्षयापि प्रामाण्यं रक्षणीयमिति कथं पाराशर्याः स्मृतेः कलौ क्षत्रियवैश्याद्यभावबोधकबहुतरपुराणवाक्यविसंवादिन्यास्तत्र विषये प्रामाण्यमवकल्पेत ? पाराशर्याः कलिप्राबल्यात्पूर्वमलब्धपदे कलौ क्षत्रियवैश्याचारबोधकतयापि निर्वाहेण तस्याः सांप्रतं प्रबलकलौ क्षत्रियादिसत्त्वासाधकत्वमित्यकिञ्चिदिदम्; निरुक्तादिपदोपादानवैयर्थ्यशङ्कायाश्च बलवत्तरबहुतरविरोधिप्रमाणसंप्लवेऽन्यथयितुमप्यशक्यत्वेनासाधकत्वाच्चेति चेत्, अत्र ब्रूमः—किं तदस्ति प्रमाणम्? यत्कलौ क्षत्रियाभावसाधकम्? यदि अभिमन्युपुत्रस्य अर्जुनपौत्रस्य महाभागवतपरीक्षितो राज्यकाले मैत्रेयं प्रति पराशरेणोपदिष्टे विष्णुपुराणे तात्कालिकं सोमवंश्यं परीक्षितमारभ्य तस्मिन्वंशे भविष्यतोऽनमित्रान्तानभिधाय "तस्माच्च क्षेमकः। तत्रायं श्लोकः, ब्रह्मक्षत्रस्य यो योनिर्वंशो देवर्षिसत्कृतः। क्षेमकं प्राप्य राजानं स संस्थां प्राप्स्यते कलौ"इत्युक्तम्, तदेव सोमवंशसमाप्तौ प्रमाणमिति भ्राम्यसि, तर्हि अपरिचितलोकयात्रोऽनभिलक्षितपदपदार्थसम्बन्धो यथाश्रुतप्रतिपत्तासि। न ह्यत्र वंशनाशोऽभिधित्सितः, किन्तु ब्रह्मक्षत्रपदयोर्भावप्रधाननिर्देशत्वेन ब्राह्मणत्वक्षत्रियत्वबोधकतया सदाचाराध्ययनादिनिबन्धनब्राह्मणत्वस्य धर्मानुष्ठानप्रजापालनादिनिबन्धनक्षत्रियत्वस्य च योनिर्नामनिर्वाहको यः सोमवंशः सोऽयं निर्वाहकतासम्बन्धेन निरुक्तब्राह्मणत्वक्षत्रियत्वरूपधर्मावच्छिन्नः क्षे-

मकं प्राप्य क्षेमकोत्पत्त्यनन्तरं क्षेमके राज्यं प्रशासत्येव विनाशमुपैष्यतीत्ययमर्थो बुबोधयिषितः, स हि "सविशेषणे हि विधिनिषेधौ विशेषणमुपसंक्रामतः सति विशेष्ये बाधे" इति न्यायेन पूर्वोक्तब्राह्मणत्वक्षत्रियत्वनिर्वाहकतादृशगुणविनाश एव पर्यवस्यति। न हि वंशशिरोधरे क्षेमके पारीक्षितवंश्येषु क्षेमकभिन्नेषु इतरेषु च म्रियमाणेषु विशेष्यभूतस्य वंशस्य नाशः प्रामाणिकः। यतः परीक्षितमारभ्य क्षेमकपर्यन्तमष्टाविंशतिसंख्यकाः पुरुषा अभूवन्। विष्णुपुराणाद्युक्तरीत्या। तत्र चैकस्य एक एवाभूत्पुत्र इति न शक्यं कल्पयितुम्। परीक्षित एव चत्वारोऽभूवन्पुत्राः जनमेजयश्रुतसेनोग्रसेनभीमसेनाः। ततश्चैतावत्सु महापुरुषेषु बहुभार्येषु राजपुत्रेषु क्षेमकसमये एकमात्रः स एवावशेष इति पुनरत्यन्तमश्रद्धेयैव कुकल्पनेति न तथार्थकदर्थनं युक्तम्। न चान्तरालिकेषु पारीक्षितवंश्येषु परीक्षितमपहायापरेषां नानेकेभिहिताः पुत्राः, किंत्वेकैक एवेति क्षेमकमात्रावशेषवंशकल्पना क्षेमकसमये न दुःसंभवेति शङ्कनीयम्; वंशनिरूपणावसरे आदिभूतस्य सुप्रसिद्धकूटस्थपुरुषस्यैव शाखा उद्दिश्यन्ते, न पुनरान्तरालिक्यः सर्वाः शाखाः प्रशाखाश्च, अखिलीकृत्य वंशस्य निरूपयितुमशक्यत्वात्। अत एव भगवान् पराशरः 'एष तूद्देशतो वंशस्तवोक्तो भूभुजां मया। निखिलो गदितुं शक्यो नैव जन्मशतैरपि' इति आह पुराणरत्ने। पुनश्च स एव 'बहुत्वान्नामधेयानां परिसंख्या कुले कुले। पुनरुक्तबहुत्वाच्च न मया परिकीर्तिता" इत्यवोचत्। तस्मात्क्षेमकसमये परीक्षिद्वंशप्रभवानामन्येषामपि सत्त्वात् क्षेमकान्तो वंशः पारीक्षित इत्यस्य परीक्षद्वंशकीर्तिस्थितिः क्षेमकेणावसानमेष्यतीत्यर्थः। यथा चन्द्रं प्राप्य तमांसि लीयन्ते इत्यादौ चन्द्रोदये सति तमोविलयो विवक्षितः, यथा

वा उपरागं प्राप्य नद्यो गङ्गासमाः सर्वाः, इत्यादौ चन्द्राद्युपरागसमये नद्यः पवित्रा इत्ययमर्थः, तथैवेहापि क्षेमकसमये चन्द्रवंशसमाप्तिरभिहिता विशेषणीभूतगुणनाशाभिप्रायेत्येव युक्तम्। न हि स्वर्गो ध्वस्त इत्यादौ स्वर्गध्वंस विवक्षया तादृशप्रयोगोऽनुपपन्नः, नापि ईषत्सहासं मुखमित्यादौ विधित्सितमीषत्त्वं सहासपदार्थतावच्छेदकहासानन्वयि, यश्च विशेषणांशेऽन्वयबीजभूतो बाधः, सोऽत्रापि समानः, प्रत्युत क्षेमके स्वयं ध्रियमाणे चन्द्रवंशस्य महाप्रतानस्वरूपे बार्हद्रथवंशे चन्द्रवंशनाशाभिधानमत्यन्तबाधितमिति तस्य विशेषणांशान्वयो युक्त एव, युक्तश्चैवं ब्रह्मक्षत्रस्य यो योनिः इत्यस्य देवर्षिसत्कृत इत्यस्य च विशेषणस्यान्वयः; तद्रूपावाच्छिन्नस्यैव नाशाभिधानात्। एवं च "यः सः" इति यत्तदोरुपादानमपि नाश्यतावच्छेदकीभूतरूपसमर्पकतया सार्थकम, यथा यज्जीर्णं गृहं तद् गृहं नष्टमित्यादौ, यथा वा ध्रियमाणायामपि द्वारावत्यां भवति व्यवहारः, येयं यदुकुलकाशिता बलदेवकृष्णदेवाभिराक्षिता द्वारावती सेयं नष्टेति। एवं च देवार्षिसत्कृतत्वप्रयोजकीभूतब्रह्मक्षत्रसंरक्षणक्षमोयं वंशः क्षेमके राज्यं प्रशासति तस्याल्पवीर्यतया अधर्मप्रवणतया च नष्ट इति युक्तं विशेषणनाशाभिधित्सया तथाभिधानमिति। मात्स्येऽपि 'अत्रानुवंशश्लोकोयं गीतो विप्रैःपुरातनैः। ब्रह्मक्षत्रस्य यो योनिर्वंशो देवर्षिसत्कृतः। क्षेमकं प्राप्य राजानं संस्थस्यति स वै कला" विति। तस्यापि विष्णुपुराणश्लोकोक्तदिशार्थोऽवगन्तव्यः। ईषत्क्षेमः क्षेमकं तदस्य विद्यते प्रशासनकाले इत्यार्शआद्यचा राज्ञः क्षेमकेति संज्ञेति निगूढम्। अत एव हरिवंशे भविष्ये "न क्षत्राणि नियोक्ष्यन्ति विक्रमैस्था द्विजातयः। चोरप्रायाश्च राजानो युगान्ते समुपस्थिते" इति स्पष्टमेव ब्राह्मणेषु

स्वयं दुर्मार्गस्थितेषु क्षत्रियाणामुन्मार्गगामित्वमुक्तम्। अथवा क्षत्राणि--क्षत्रिया लोकान्धर्मे न विनियोक्ष्यन्ति। तस्मादेव हेतोर्द्विजातयो ब्राह्मणा विकर्मस्थाः स्वतन्त्रा नष्टाचाराश्च। तत एव च चोरप्राया राजानः। एतत्तत्त्वं चाग्रे निरूपयिष्याम इति मादृशामयमसंकीर्णोऽर्थाभिलापः। राजर्षिसत्कृत इति पाठपक्षे तु राजर्षिभिर्ययातिपुरुप्रभृतिभिर्जन्मना सत्कृतः पावित इत्ययमर्थो विवक्षितः। शेषं पूर्ववत्। केचित्तु अत्रत्यस्य ब्रह्मक्षत्रस्येति पदस्य अस्मिन्वंशे पूर्वं केषांचिज्जन्मान्तरोपार्जितसुकृतसहस्राणां राजर्षीणां तपोमहात्म्यर्षिवरदानादिना ब्राह्मणत्वप्राप्तिप्रसिद्धिमनुरुन्धानाः क्षत्रियभूतानां ब्राह्मणानामित्यर्थमाचक्षते, सोऽयस्मभ्यं नाभिरोचतेऽर्थः तथा सति क्षत्रब्रह्मणोर्योनिरिति पाठधारणस्यैवोचितत्वादिति सुसूक्ष्ममीक्षन्तां विपश्चितः स्वयमेवेति शम्। एतेन विष्णुपुराणे चतुर्थेंऽशे द्वाविंशाध्याये इक्ष्वाकुवंश्यान् भविष्यतः पार्थिवान् सुरथान्तानभिधाय"ततश्च सुमित्रोऽन्त्य इत्येते चेक्ष्वाकवो बृहद्बलान्वयाः। अत्रानुवंशश्लोकः--इक्ष्वाकूणामयं वंशस्सुमित्रान्तो भविष्यति। यतस्तं प्राप्य राजानं स संस्थां प्राप्स्यते कलौ। इत्युक्तम्। ततश्च सूर्यवंशोऽपि सुमित्रेण क्षयमुपगत इति परास्तम्; पूर्वोक्तरीत्या अस्याप्यनुवंशश्लोकस्य व्याख्येयतया तस्य सूर्यवंशनाशे प्रामाण्यविरहात्। मरुव्यतिरिक्तानामनमित्रप्रभृतिभूपानां घोरे कलावपि स्थितेरुक्तत्वेन निरुक्तवचनस्य मरुव्यतिरिक्तसूर्यवंशीयक्षत्रिसामान्याभावबोधकताया असम्भवाच्च। तथा हि वंशानुचरिते मात्स्ये द्वादशाध्याये "तस्यानरण्यः पुत्रोऽभून्निध्नस्तस्य सुतोऽभवत्। निध्नपुत्रावुभौ जातावनामित्ररघूत्तमौ। अनमित्रो वनरागाद् भविता स कले नृपः" इति। एवं कल्किपराणे चतुर्था-

ध्याये विशाखयूपरुचिराश्वप्रभृतिक्षत्रियाणां कलावन्ते, सत्त्वमुच्यते इत्यत्यन्तमप्रामाणिकम् ; निरुक्तवचनस्य कलौ क्षत्रियसामान्याभावासाधकत्वात् । अत एव चतुर्थांशे विष्णुपुराणे वंशाध्याये—

"देवापिः पौरवो राजा मनुश्चेक्ष्वाकुवंशजः ।
महायोगबलोपेतौ कलापग्राममाश्रितौ" ॥ ४५ ॥
कृते युगे इहागत्य क्षत्रप्रवर्तकौ हि तौ ।
भविष्यतो मनोर्वंशे बीजभूतौ व्यवस्थितौ ॥ ४६ ॥
एतेन क्रमयोगेन मनुपुत्रैर्वसुन्धरा ।
कृतत्रेतादिसंज्ञानि युगानि त्रीणि भुज्यते ॥ ४७ ॥
कलौ तु बीजभूतास्ते केचित्तिष्ठन्ति भूतले ।
यथैव देवापिमरू सांप्रतं समवस्थितौ ॥ ४८ ॥

इति स्पष्टमेव मनुपुत्राणां युगत्रितयं भूमिभोगवतां कलौ तु दस्युखशाद्युपद्रुतानां मरुदेवाप्यतिरिक्तानां भविष्यद्वंशबीजभूतानामवस्थानमुच्यते "केचित्तिष्ठन्ति भूतले" इत्यनेन । अत्र हि मरुदेवाप्योरिवापरेषां बीजभूतानां न स्थानविशेषनियमः, अत एव स्थानसामान्यबुबोधयिषया भूतले इत्युक्तम् । एवं च भूतले तत्र तत्र केचन शुद्धाः क्षत्रियाः कलौ खशाद्युपद्रुता वंशबीजभूता न तु बहव इत्यर्थो लभ्यते । अत एव तेषां शुद्धिप्रदर्शनार्थं वंशनिदानबोधनार्थं च "यथैव देवापिमरू सांप्रतं समवस्थितौ" इत्युक्तम् । पूर्वत्र मरुदेवाप्योः स्थानान्तरत्वात् "कृते युगे इहागत्य क्षत्रप्रवर्तकौ हि तौ" इत्युक्तम्, अत्र तु क्षत्रियवंशबीजभूतानां जनावासस्थानस्थितत्वाद् भूतले इत्युक्तमित्यप्यवधेयम् । केचित्तु कल्किपुराणमत्स्यपुराणोक्तविशाखयूपचित्राश्वयोरनमित्रस्य च तात्पर्येण "कलौ तु बीजभूतास्ते केचित्तिष्ठन्ती" त्युक्तमिति, तदा आधुनिकक्षत्रि-

यपदव्यवहार्याणां विष्णुपुराणोक्तकेचित्पदेन न सत्त्वसिद्धिसंभवः। अत एव च केचित्तिष्ठन्तीति वर्तमाननिर्देशोऽपि संगच्छते। अन्यथा तु विष्णुपुराणोपदेशकाले भविष्यतः सोमसूर्यवंश्यानभिधाय तेषां चरमान् दुर्बलान् राज्ञश्चाभिधाय तदपेक्षयापि भविष्यतामाधुनिकानां कलेरन्ते कृतयुगादिसंततिसंपादकानां भविष्यतां राजन्यानां निर्देष्टुमिष्टत्वे केचित्स्थास्यन्ति भूतले इत्येवोक्तं स्यात्, विशाखयूपादिनां तु देवापिमरुवद्विष्णुपुराणोपदेशकालेऽपि विद्यमानत्वाद्वर्तमानत्वोपदेशो युक्त एवेति वदन्ति, तदेतदपि पुराणार्थानवबोधनिबन्धनमेव। अत्र हि पुराणे पूर्वप्रघट्टके कलेर्बलं तत्काले लोकानां दुर्दशां च निरूप्य "अनन्तरं चाशेषकलेरवसाने प्रबुद्धानां तेषामेव जनपदानाममलस्फटिकविशुद्धा मतयो भविष्यन्ति ॥२७॥ तेषां च बीजभूतानामशेषमनुष्याणां परिणतनामपि तत्कालकृतानामपत्यप्रसूतिर्भविष्यति ॥ २८ ॥ तानि च तदपत्यानि युगधर्मानुसारीणि भविष्यन्ति "इति" ॥२ ॥ इत्युक्तम्, ततश्च स्फुटमेव कलेरवसाने समुत्पन्नानां स्वत एव कालमहिम्ना विशुद्धा मतयस्तदपत्यानां च कृतयुगानुसारिमतिमत्त्वं केवलं ब्राह्मणानां शूद्राणां च न तु क्षत्रियाणां वैश्यानां चेति न शक्यं वक्तुम्; "तेषामेव जनपदानाममलस्फटिकविशुद्धा मतयः" इत्युक्त्या तात्कालिकानामेव यावतामेव मनुष्याणां वर्णाश्रमवयोदेशाद्यनपेक्षतात्कालिकमनुष्यत्वनिबन्धनविशुद्धमतिमत्त्वस्याभिधानात्। अत एवैतादृशार्थं बुबोधयिषया "जनपदानाम्" इत्युक्तम्, न केवलं तत्कालप्रसूतानामपि तु पूर्वोत्पन्नानामपि तत्कालसतां विशुद्धा मतयः इत्यर्थबोधनाय "तेषामेव"। अत्रैवकारस्याप्यर्थतया कलिशेषकालसमुद्भूततया पूर्वमयथामतीनामपि इत्ययं तेषामेवेत्यस्यार्थः।

एतदर्थदर्ध्यायैवात्र द्वितीयप्रघट्टके 'तेषां च बीजभूतानामशेषमनुष्याणां परिणतानामपि" इत्याम्रेडितम्। न च तदानीं मरुदेवापिव्यतिरिक्तक्षत्रियबीजसत्त्वे उत्पत्स्यमानसृष्टिसंपादनार्थं मरुदेवाप्योः क्षत्रियवंशशेषत्वाभिधानं तयोः कलापग्रामनिवासोक्तिः क्षत्रवंशहेतुत्वाभिधानं च कथं संगच्छतामिति वाच्यम्; नहि तयोर्भविष्यद्वंशहेतुत्वाभिधानेऽपरेषामभावः सिद्ध्यति। अनमित्रविशाखयूपादिक्षत्रियाणां कलिशेषे सत्ताया भविष्यद्वंशहेतुतायाः पृथिव्यां तत्र तत्रान्यक्षत्रियसत्तायाश्च मत्स्यपुराणविष्णुपुराणोक्ताया आस्तिकमात्रेणापलपितुमशक्यत्वात्, अन्यथा तु अत्रिदेवलासिताश्वत्थामकृपरामव्यासादीनामपि कलिशेषे विशुद्धब्राह्मणानां सत्त्वात् ततः कलौ ब्राह्मणवंशच्छेदोऽपि भवतामङ्गीकृतः स्यादित्यत्यन्तमनिष्टं भवतोऽपि। तदलं देवाप्यादीनां भविष्यद्वंशहेतुत्वाभिधाने कलौ क्षत्रियसामान्याभावप्रसाधनरूपया निजहस्तसाधितया विपर्ययेति शम्।

यदपि क्षेमकरिपुञ्जयसुमित्रादिप्रसिद्धक्षत्रियराजवंशेषु राज्यनाशानन्तरमवशिष्टा राज्यशासनहीना अपि तद्वंश्याः क्षत्रिया महानन्दिक्षत्रियसुतेन शूद्रागर्भोद्भवेन बलिना अतिलोभवता नन्देन मगधराज्यसिंहासनस्थेनातिभीषणासंख्यसैन्येन स्वयमप्यतिभीषणेन अपरिच्छेद्यसम्पत्तिमता आबालवृद्धातुरं सर्वे क्षत्रियाः क्षयमनायिषतेति सांप्रतमक्षत्रमिदं जगदिति प्रलपन्ति, साधु तदेषां पूर्वाङ्गीकृताशेषक्षत्रनाशानामप्यशेषक्षत्रनाशाय पुनः क्षत्रसत्त्वाङ्गीकरणम्. [illegible]

[illegible] ततकृत्वा हताशेषावशेषकुलक्षत्रस्य क्षत्रनाशाकृपणपाणेः पणीकृताखिलक्षत्रनाशस्य भार्गवस्य विष्णोरंशावतारस्याकुण्ठकुठारधारस्य क्रोधाग्निं सोढवतः

क्षत्रियान् शूद्रीगर्भोद्भवः कथमशेषेण प्रणाशयेदिति नाभिजानन्ति मतिमन्दाः, न चायं वाचनिकोऽर्थः। तथाहि विष्णुपुराणम्—"ततो महानन्दिसुतः शूद्रागर्भोद्भवोऽतिलुब्धो महापापो नंदः परशुराम इवापरोऽखिलक्षत्रान्तकारी भविता; ततः प्रभृति शूद्रा भूमिपाला भविष्यन्ति, स चैकच्छत्रामनुल्लङ्घितशासनो महापद्मः पृथिवीं भोक्ष्यती" ति। अत्र हि परशुरामदृष्टांतदानेन दार्ष्टान्तिके नन्दे भवितव्यं न्यूनतया। अत एवात्यन्तसाम्यसंकीर्तनाय इवपदमुपादायापि 'अपरः परशुरामः' इत्युक्तम्, यथा अयं राजा अपरः कर्ण इवेत्यादौ। अतिलुब्ध इत्यनेन च क्षत्रियाणां कालक्रमेण नैर्बल्यमुपयातानां पूर्वसंचितं धनमवशिष्टा पृथिवी चापहृतेत्यर्थो दर्शितः। न हि क्रोधान्धस्य लोभसंदर्शनं युज्यते इति लोभमात्रमूलघातकत्वप्रदर्शनेन निधनक्षत्रियाणां प्राणं ततः सिद्ध्यति, हन्तुर्नीचता च। यो हि क्रोधान्धः कंचन हन्ति, तदपेक्षया लोभेन हन्तारं लोकवेदयोरत्यन्तं जुगुप्सन्ते जनाः। ततश्च नन्दोऽतिजघन्यः क्षत्रहन्तेत्यपि ततः सिद्ध्यति। ततः प्रभृति शूद्रा भूमिपाला इत्यनेनातिलुब्धतया सर्वा भूरनेनापहृतेति शूद्रकुले गता भूरिति सिध्यति। तदेवं वस्तुस्थितौ त्रिःसप्तकृत्वो नाशेऽपि येऽवशिष्टाः पुनर्भूमेः सार्वभौमपदं चोपगतास्त एव क्षत्रियाः शूद्रापुत्रेण नन्देन निश्शेषतामुपयापिताः, सर्वत्रापि राज्यसिंहासनेषु नन्देन स्वकुलसमुद्भूता शूद्रा एव व्यवास्थापिषतेति च नागेशमपहायापरोऽविकलकरणः प्राचीनेतिहासार्थतत्त्ववेत्ता गृहीतवाक्यार्थपदमर्यादः कथं संभावयेदपि। न हि चन्द्रः प्रदीपवत्प्रकाशते सूर्यो वा खद्योतवत्तमांसि विलीनयतीति प्रामाणिका व्यवहारन्ति। ततश्च सकृदेव क्षपिताखिलक्षत्रगणो नन्दस्त्रिःसप्तकृत्वोऽप्यपारितक्षत्रक्षयेण जामदग्न्ये-

न कथमुपमीयेत ? यदि च तादृशोपमानविरहादेव जामदग्न्येनोपमापितो नन्दः, यथा "आकाशवत्सर्वगतश्च नित्य" इत्यादि श्रुत्या हीनेनाप्याकाशेन ब्रह्मोपमीयते, आकाशस्य हि सर्वगतत्वं नित्यत्वं चापेक्षिकमपि नैयायिकमारभ्यापामरबुद्ध्यारूढामिति तथोच्यते, एवं परशुरामस्याप्यखिलक्षत्रान्तकत्वमापेक्षिकमपि सर्वजनप्रसिद्धतया लोकबुद्धिसंग्रहाय दृष्टन्तीक्रियत इत्युच्यते, तदा ब्रह्मणः सजातीयविजातीयस्वगतभेदशून्यतया तत्र दृष्टान्तालाभेऽपि अत्रान्तकप्रलयपयोधिप्रभृति दृष्टान्तावष्टम्भसंभवे किमिति हीनोमासंश्रयणमिति ब्रूमहे। यदि तु प्रलयकालान्तकादीनां न केवलं क्षत्रियनाशकत्वम्, किन्तु साधारण्येन सर्वजगदन्तहेतुत्वमिति क्षत्रियमात्रनाशकत्वलक्षणदृष्टान्तसाद्गुण्यसम्पादनाय जामदग्न्य एव दृष्टान्तीकृत इत्युच्यते, दृष्टान्तदृष्टापेक्षिकधर्माणामेव दृष्टान्ते संग्राह्यताया लोकवेदोभयप्रसिद्धिसिद्धतया प्रकृतेऽन्तकादीनां सर्व जगन्नाशकत्वेऽपि क्षत्रियनाशकत्वे दृष्टान्तीकर्तुं शक्यतया तदुपेक्षायां मानाभावात्। दृष्टान्तदृष्टसर्वधर्मास्तु अनुरुन्धतो दृष्टान्त एव दुर्लभ इति सर्ववादिसिद्धान्तः। तदिह बहुतरक्षत्रकुलक्षयहेतुः शूद्रापुत्रो लुब्धः क्षुद्रो बलदृसनन्द इत्येव विष्णुपुराणमत्स्यपुराणश्रीमद्भागवतादिप्रामाणिकग्रन्थाभिप्रेतोऽर्थ इति न पाणिविहितम्, नन्दान्ताः क्षत्रियाः, नन्दान्तं क्षत्रियकुलम्, इत्यादेर्लौकिकाभोणकस्याप्ययमेवार्थः। अत्रान्तपदं नाशार्थकम्, ततश्च नन्देन अन्तो नाशो येषां तादृशाः क्षत्रियाः इत्यर्थः। "अन्तः स्वरूपे निकटे नाशनिश्चययोरपि" इत्यभियुक्तोक्तेरन्तशब्दस्य नाशार्थकत्वान्नाशस्य च प्रतियोगितानिरूपकाभावावगाहितयैव प्रतीत्युपपत्तौ तदीयप्रतियोगितायाः सामान्यधर्मावच्छेद्यत्वे मानाभावात्। एतेन

क्षत्रियक्षयप्रतीतेः तत्तद्व्यक्तित्वेतरधर्मानवच्छिन्नतत्तत्क्षत्रियव्यक्तिनिष्ठप्रतियोगितानिरूपकाभावकूटावगाहित्वाङ्गीकारे यावत्क्षत्रनाशः फलेदित्यपि कुकल्पना, निरुक्तरीत्या पुराणात्तरस्वरसलब्धार्थनिरूपणे तादृशप्रतियोगितानिरूपकाभावे मानाभावात्। यदपि भूमेर्भारावताराय गृहीतमनुजविग्रहेण हरिणैव महाभारतयुद्धे क्षत्रियाः क्षयमनायिषतेति केषां चिदेव शिष्टानां निःशेषतया वधो नन्देन शूद्रापुत्रेण न दुःसंभव इत्यभिधानम्, तदपि मन्दानामेव। किं कदाप्यनीदृगिदं जगदिति ते विभावयन्ति ? सर्वदा हि लोकोऽयं बालवृद्धतरुणैः स्त्रीभिश्च परिपूर्णः, भारतयुद्धसमयेऽपि आसन्नेव बालाः शिशवोऽतिशिशवोऽथ क्षत्रियस्त्रियो गृहीतगर्भाः, कठिनगर्भाः अतिकठोरगर्भाः, आसन्नप्रसवाश्चेति तैरेवायं लोकः पूर्यते स्म । भारतयुद्धसमये यद्यपि—कुरुपाण्डवकुलयोरेकमात्रो गर्भस्थतन्तुर्महाभागः परीक्षिदासीत् , यथोक्तं श्रीमद्भागवते " द्रोणयस्त्रविप्लुष्टमिदं मदंगं सन्तानबीजं कुरुपाण्डवानाम्। जुगोप कुक्षिं गत आत्तचक्रो मातुश्च मे यः शरणं गतायाः" इति परिक्षीणे कुरुकुले समुद्भूत इति नाम्नापि परिक्षिदिति पुराणाचार्यः पराशरः ; तथापि देशान्तरादागतानां कुलान्तरक्षत्रियाणां चासन्नेव संतानतन्तव इति तैरयं लोकः पुनः पूरितः। पूर्वं हि बहुदारपरिग्रहाः समुत्पादितापत्यतनया बहुवीर्या क्षत्रिया इति स्मरन्ति पुराणाचार्याः-परीक्षित्कालाच्चैकसहस्रवर्षानन्तरं शूद्रासंभवो नन्दः समुत्पेदे। तावता चैकसहस्रवर्षकालेन पुनरयं लोकः क्षत्रियकुलेन पूरितः। यथोक्तं विष्णुपुराणे चतुर्थांशे चतुर्विंशाध्याये "यावत्परिक्षितो जन्म यावन्नन्दाभिषेचनम्। एतद्वर्षसहस्रन्तु ज्ञेयं पञ्चदशोत्तरम् इति। किं च निखिल-

पुराणप्रणयनकालानन्तरम् नन्दोत्तरकालिनंचन्द्रगुप्तादिपर्यन्तं भारतवर्षीय वृत्तान्तमुपक्रम्य प्रवृत्तासु गुणाढ्यप्रणीतासु बृहत्कथासु स्पष्टमेव तत्र तत्र क्षत्रीयवंशकथा उपलक्ष्यन्ते। किंचातिसुप्रसिद्धेऽपि च विक्रमभोजसाहङ्कश्रीहर्षादीनां धारोज्जयनीकान्यकुब्जकाश्मीरेश्वराणां क्षत्रियत्वे यदि विवादः, तर्हि कुकर्मशतासादितशूद्रपिण्डपरिपुष्टमहान्धगर्तोदरकुहराणां भवतामेव ब्राह्मणत्वमविवादपदमित्यतिचित्रम्। किं च निजवर्णोचितशावसूतकाद्याचारवतां स्वस्ववर्णोचितदायशास्त्रोक्तदायव्यवहारवतां सर्वथापि शूद्रविसदृशाचाराणां क्षत्रियवैश्यानां चेच्छूद्रत्वम्, तर्हि अन्तिमः पुनरेव ते सतिलोऽञ्जलिर्वितीर्येत साम्प्रतिकाचारव्यवहारनिर्णायक धर्मशास्त्रीययावन्निबन्धेभ्यः। सर्वे हि निबन्धाश्चातुर्वर्ण्यमादाय व्यवहारं दर्शयन्ति। तदलमेतेन नागेशकुकल्पनपङ्किलकुपथानुसरणसंनाहेन। तस्मात् क्षत्रियाभावसाधकवचनविरहात्तत्साधकनिरुक्तनिर्वक्ष्यमाणप्रमाणसत्वाच्च निःक्षत्रं निर्वैश्यं चेदमाधुनिकं जगदित्याचक्षाणा भ्रान्ता एवेति सिद्धम्।

यदपि चक्षुषी पिधायैव "कलावब्राह्मणत्वे सति शस्त्रग्रहणप्रजापालनमात्रेण क्षत्रियसादृश्येन क्षत्रियपदव्यवहार्याणां दशविंशतिपुरुषपर्यन्तमस्मर्यमाणोपनयनानां तद्ग्रहेऽपि तादृशानामुपनयनसंस्कारो भवति न वेति संदेहे निर्णयः क्रियते" इति नागेशः। अत्रायं संशयो वादिविप्रतिपत्त्याहितो वक्तव्यः। तत्र निरुक्तविशेषणावच्छिन्नाः संस्कार्या न वेति विप्रतिपत्तौ निषेधकोटिः क्षत्रियादिद्रुहां विधिकोटिश्चातुर्वर्ण्यव्यवस्थापकानाम्। अत्राब्राह्मणत्वे सतीत्येतदनुपादाने तादृशब्राह्मणानां कलावपि "न ब्राह्मणः पतनमृच्छति इति गोमतस्मृतिबलेन स्वेनापि क्षत्रियादि-

दृष्टा संस्कार्यतायाः स्वीकरणीयतया बाधः स्यादिति तदुपपत्तये अब्राह्मणत्वे सतीत्येतदुपात्तम्, परमते तु सिद्धसाधनवारणाय तदुपादेयमेव। क्षत्रियपदव्यवहार्याणामित्येतदनुपादाने तादृशविशेषणावच्छिन्नानां शूद्राणां संस्कार्यतायाश्चातुर्वर्ण्यव्यवस्थापकेनानङ्गीकरणीयतया बाधो भवेदिति तद्वारणाय क्षत्रियपदव्यवहार्याणामिति। नागेशपक्षे तु तत्प्रयोजनम् सिद्धसाधनवारणमेव; इतरथा तु तादृशरूपावच्छिन्नानां शूद्राणां संस्कार्यतायाः केनाप्यनभ्युपेततया तेषामसंस्कार्यत्वप्रसाधने सिद्धसाधनमेव भवेदिति। कलौ इत्यनुक्तौ तु पक्षाप्रसिद्धिः। कृतत्रेतादियुगेषु स्वाभाविकनिजोचिताचारप्रवृत्तिमतामेव पुंसां सत्त्वेन तदानीं निरुक्तविशेषणावच्छिन्नपुरुषविरहेण पक्षाप्रसिद्धेरावश्यकत्वादिति कलावित्युक्तम्। सममिदं प्रयोजनं विधिनिषेधकोट्योः। दशविंशतिपुरुषपर्यन्तमित्यनुक्तौ द्वित्रपुरुषपतितसावित्रीकाणां संस्कार्यतायाः कलावपि केनचिदेकदेशिनाङ्गीकृतत्वाद् बाधः स्यादिति तदुपादानमावश्यकं नागेशमते। विधिकोटिमतां तदुपादानप्रयोजनं सिद्धसाधनवारणमेवेति। उक्तदिशा स्वयमेव विक्रमन्तां युक्त्यरण्यानीकेसारिणस्तार्किकाः।

अत्रैवमभिदध्महे—शस्त्रग्रहणप्रजापालनमात्रेण क्षत्रियसादृश्येनेत्यत्र मात्रपदेन क्षत्रियपत्न्यामौरसाः क्षत्रियसमुत्पादिताः पुत्रा व्यावर्तनीयास्ते किं तदभावसाधकप्रमाणोपलम्भान्निराचिकीर्षिताः? उत तत्साधकप्रमाणविरहान्न सन्तीति निषिषेधयिषिताः? आहोस्वित् तेजोविक्रमगाम्भीर्यौदार्यवदान्यकाकृत्रिमब्रह्मण्यशौर्यादयः क्षत्रियेषु न विद्यन्ते इति साम्प्रतिकाः क्षत्रियाः शस्त्रग्रहणप्रजापालनमात्रेण क्षत्रियव्यपदेशभाज

इत्युच्यते ? तत्र न प्रथमः, तदभावसाधकप्रमाणविरहात्। क्षत्रियाभावसाधकतयोपन्यस्यमानानां प्रमाणाभासानामर्थान्तरपराणामर्थस्य पूर्वमेवावोदितत्वात्। नापि द्वितीयः कल्पः, पूर्वोक्तानां पराशरस्मृत्यादीनां माधवधृतपुराणवचनानां च कलौ क्षत्रियवैश्यसत्त्वप्रमापकत्वात्। नन्दोत्पत्तिपूर्वकालीनकलिसमयमानपरत्वन्तु न तादृशवचनानाम्, सामान्यतः प्रवृत्तमाणस्यासति बाधके, विशेषे पर्यवसानकल्पनायोगात्। अत एव तु बृहन्नारदीये "युगधर्माः समाख्यातास्त्वया संक्षेपतो मुने। कलिं विस्तरतो ब्रूहि त्वं हि सर्वविदां वरः॥ ब्राह्मणाः क्षत्रियाः वैश्याः शूद्राश्च मुनिसत्तमाः। किमाहराः किमाचारा भविष्यन्ति कलौ युगे" इति ऋषीणां प्रश्ने "शृणुध्वं ऋषयः सर्वे नारदेन महात्मना। सनत्कुमारेमुनये कथितं तद्वदामि वः। सर्वे धर्मा विनश्यन्ति कृष्णे कृष्णत्वमागते। तस्मात्कलिर्महाघोरः सर्वपापस्य साधकः। ब्राह्मणाः क्षत्रियाः वैश्याः शूद्रा धर्मपराङ्मुखाः। व्याजलोभरताः सर्वे दम्भाचारपरायणाः। असूयानिरताश्चैव वृथाहङ्कारदूषिताः। सर्वे संक्षिप्यते सत्यं नरैः पण्डितगर्वितैः। अहमेवाधिक इति सर्व एव वदन्ति वै। अधर्मलोलुपाः सर्वे तथा वैतण्डिका नराः। अतः स्वल्पायुषः सर्वे भविष्यन्ति कलौ युगे। अल्पायुष्ट्वान् मनुष्याणां न विद्याग्रहणं द्विजाः। विद्याग्रहणशून्यत्वादधर्मो वर्धते पुनः। व्युत्क्रमेण प्रजाः सर्वाः क्षीयन्ते पापतत्पराः। ब्राह्मणाद्यास्तथा वर्णाः संकीर्यन्ते परस्परम्। कामक्रोधपरा मूढा वृथा सन्तापपीडिताः। बद्धवैरा भविष्यन्ति परस्परवधेप्सवः। ब्राह्मणाः क्षत्रिया वैश्याः सर्वधर्मपराङ्मुखाः। शूद्रतुल्या भविष्यन्ति तपःसत्यविवर्जिताः"। इति स्पष्टमेव सूतेन घोरं कलिमुद्दिश्य तदातनाचार-

व्यवहारनिरूपणावसरे ब्राह्मणशूद्रयोरिव क्षत्रियवैश्ययोरपि वर्णयोः सत्ता बोध्यते, न ह्येतेषां बृहन्नारदीयपुराणवचनानां कथंचिदपि नन्दोत्पत्तिपूर्वकालीनक्षत्रियवैश्यानां दुराचारबोधकतासंभवः, वादिनापि नन्दोत्पत्तेः पूर्वं क्षत्रियाणां वैश्यानां च शुद्धवंशप्रचारस्य आपेक्षिकसदाचारत्वस्य च स्वयमङ्गीकृतत्वेन—

ब्राह्मणाः क्षत्रिया वैश्याः सर्वधर्मपराङ्मुखाः ।
शूद्रतुल्या भविष्यन्ति तपःसत्यविवर्जिताः" ॥

इत्येतस्य सर्वथाऽसंगतत्वापत्तेः । अत एव तु बृहन्नारदीये प्रकरणे कलिप्रथमपादेऽपि विनिन्दन्ति हरिं नराः । युगान्ते तु हरेर्नाम नैव कश्चित्स्मरिष्यति ॥

कुहकैश्च जनैस्तत्र हेतुवादविशारदाः ।
पाखण्डिनो भविष्यन्ति चतुराश्रमनिन्दकाः ॥
न च द्विजातिशुश्रूषां न स्वधर्मप्रवर्तनम् ।
करिष्यन्ति तदा शूद्राः प्रव्रज्यालिङ्गिनो द्विजाः ॥
कषायपरिवीताश्च जटिला भस्मधूलिताः ।
शूद्रा धर्मान् प्रवक्ष्यन्ति कूटबुद्धिविशारदाः ॥
अशौचा वक्रमतयः परपाकान्नभोजिनः ।
भविष्यन्ति दुरात्मानः शूद्राः प्रव्राजितास्तथा ॥
उत्कोचजीविनस्तत्र महापापरतास्तथा ।
भविष्यन्त्यथ पाषण्डाः कापाला भिक्षवोऽधमाः ॥
एते चान्ये च बहवः पाखण्डा विप्रसत्तमाः ।
ब्राह्मणाः क्षत्रिया वैश्या भविष्यन्ति कलौ युगे ॥
गीतवाद्यपरा विप्रा वेदवादपराङ्मुखाः ।
भविष्यन्ति कलौ प्राप्ते शूद्रमार्गप्रवर्तिनः ॥

अल्पद्रव्या दरिद्राश्च वृथाहङ्कारदूषिताः ।
प्रतिग्रहपरा नित्यं नरा दुर्मार्गशालिनः ॥
आत्मस्तुतिपराः सर्वे परनिन्दापरास्तथा ।
विश्वासहीनाः पुरुषा वेददेवद्विजादिषु ॥
असंस्कृतोक्तिवक्तारो बह्वद्वेषपरास्तथा ।
परमायुश्च भविता तदा वर्षाणि षोडश"॥

इत्युक्तम्, निरुक्तैतद्धर्मविशिष्टाश्च नाभूवन्नन्दोत्पत्तेः पूर्वमिति तु नापरोक्षम्, पौराणिका हि तं समयमार्षमाहुः । क्वनु पुनरार्षसमये तादृशां क्षत्रियवैश्यानां ब्राह्मणानां शूद्राणामेव वोच्छृङ्खलानामत्यल्पायुषां संभव इत्यगत्या ब्राह्मणानामिव अधुना क्षत्रियवैश्यानामपि सिद्धिरवर्जनीया । न च पूर्वोक्तबृहन्नारदीयपराशरस्मृतिपुराणादिवाक्येषु क्षत्रियवैश्यपदेन प्रजापालका वाणिज्यकारकाश्च गृह्यन्त इति न ततो जातिक्षत्रियादिसिद्धिरिति वाच्यम्; एकप्रकरणैकवाक्यस्थक्षत्रियवैश्यशूद्रपदेषु द्वयोर्मुख्यार्थत्वमपरयोस्तु क्षत्रियवैश्यपदयोर्गौणार्थत्वमिति विनिगन्तुमशक्यतया अपक्षपातिना यथार्थविचारशीलेन तथा शङ्कितुमप्ययुक्तत्वात् । तस्मात्क्षत्रियादिसाधकप्रमाणविरहान्नाधुना क्षत्रिया वैश्याश्चेति रिक्तं वचः । एतत्तत्वं स्वावसरे पुनर्निपुणतरमुपपादयिष्यामः । नापि तृतीयः कल्पोऽवकल्पते; यथा धनिकेषु सर्वक्षत्रियेषु तेजोविक्रमगाम्भीर्यादयो न विद्यन्ते क्षत्रियगुणाः, तथा ब्राह्मणेष्वपि सर्वेषु तपःसत्याध्ययनगुर्वनसरणानुसूयकत्वादयो न विद्यन्ते ब्राह्मणगुणाः, तथाप्येके केचिदुपलभ्यन्ते यदि ब्राह्मणगुणसंपन्ना ब्राह्मणास्तर्हि संसारे क्षत्रियगुणसम्पन्नाः क्षत्रिया अपि तत्र तत्र नात्यन्तदुर्लभाः, ये कलावपि बलात्परिपालयन्ति क्षत्रधर्मम्, अनुस-

रन्ति च निजधर्मसंरक्षणक्षमान् ब्राह्मणान्वेदतत्त्वार्थविदः, न हि सर्वो जनः सर्वथा कृतयुगेऽपि कृतसर्वनिजधर्मकृत्य एव आसीत्, किं पुनः सर्वधर्मविप्रतीपे बलिनि कलौ सर्वधर्मानुष्ठानक्षमास्त्रैवर्णिकास्तेऽपि पुनः सुलभा इति केनापि कोविदेन कदापि सम्भावयितुमपि पार्यते। जनो हि सर्वोऽधुना निसर्गदुष्प्रवृत्तिर्निजाश्रमवर्णपराङ्मुखवृत्तिरिति न केषामप्यननुभूतचरम्। अत एव तु भगवान् पराशरः "युगे युगे च ये धर्मास्तेषु तेषु च ये द्विजाः। तेषां निन्दा न कर्तव्या युगरूपा हि ते द्विजा" इति विस्पष्टमवोचत्। न केवलं युगधर्मानुसारिणस्त्रैवर्णिकाः, परं चेतनाचेतनात्मकसर्वं जगदिति आरण्यके पर्वणि भगवान् व्यासः "भूमिर्नद्यो नगाश्चैते सिद्धा देवर्षयस्तथा। कालं समनुवर्तन्ते तथा भावा युगे युगे" इति। तस्माद्यथा समयानुसारिणो ब्राह्मणास्तथापरेऽपि त्रैवर्णिकाः सन्त्येवाधुनेति "शस्त्रग्रहणप्रजापालनमात्रेण क्षत्रियसादृश्येने-त्यादि अनभिज्ञानामाहोपुरुषिकानिबन्धनमेवाभिधानमिति सर्वं चतुरस्रम्।

यदपि "ततो महानन्दिसुतः शूद्रागर्भोद्भवोऽतिलुब्धो महापद्मो नन्दः परशुराम इवाखिलक्षत्रान्तकरो भविता। ततः प्रभृति शूद्रा भूमिपाला भविष्यन्ति। स चैकच्छत्रामनुल्लङ्घितशासनो महापद्मः पृथिवीं भोक्ष्यतीत्युक्तम्। अत्र परशुरामोपमया क्षीणक्षावधिनिर्दयहन्तृत्वं सूचितं महापद्म इत्यस्य तावत्संख्यधनस्तावत्सैन्य इति चार्थः। परशुरामेणेव कतिपयानामहननमपि स्यादत आह—"अखिलक्षत्रान्तकारी" ति। तेन क्षत्रियसामान्याभावः सूचितस्तदेवोक्तं "शूद्रा भूमिपाला" इति। नन्दस्योग्रत्वेप्यनुलोमसंकराणां मातृजातीयत्वाच्छूद्रा इत्युक्तम्। तत्तद्देशीयक्षत्रियान् हत्वा

तत्संतानभूता उग्रास्तत्तद्राज्ये स्थापिता इति तात्पर्यम्। भागवते द्वादशे "महानन्दिसुतो राजन् शूद्रागर्भोद्भवो बली। महापद्मपतिः कश्चिन्नन्दः क्षत्रविनाशकृत्। ततो नृपा भविष्यन्ति शूद्रप्रायास्त्वधार्मिका इति नन्दादीनामुग्रत्वात् शूद्रप्राया इत्युक्तम्। एतेन—राज्याधिकारिणो मागधा एवानेन नाशिताः, न तु देशान्तरस्थाः, शूद्रराज्योक्तिरपि मगधदेशविषयैवेति—निरस्तम्, सामान्यप्रवृत्तवाक्यस्य संकोचे मानाभावात्, वक्ष्यमाणवाक्यविरोधाच्च। मागधरिपुञ्जयकाल एव सर्वक्षत्रियवंशशाखानाशाच्च। एतच्चाग्रे स्फुटं भविष्यति" इति नागेशः, प्राक्तदेतन्निरूपितार्थमपि पुनर्विचार्यते। अत्र परशुरामोपमया स्त्रीबालावधि निर्दयहन्तृत्वं सूचितमिति यदुक्तं साधु तत्, परं तु अतिलुब्ध इति विशेषणदानमहिम्ना लोभमूलक्षत्रियहननकर्तृत्वं प्रतीयते इति राज्यलोभवता नन्देन मगधदेशीयप्राचीनवंशभूपाः अशेषेणाघानिषतेत्येव सिद्ध्यति। अत एवैतन्मूलतया "ततः प्रभृति शूद्रा भूमिपाला भविष्यन्तीत्युक्त्यैव अक्षत्रिया मेदिनीति सिद्ध्यति। न हि क्षत्रियेषु ध्रियमाणेषु शूद्रा भूमिं भोक्तुमलमिति वाच्यम्; तात्पर्यविषयीभूतार्थनिर्देशमुखेन हि प्रेक्षावन्तो वक्तुमुपक्रमन्ते इति सर्वबुद्धिमतां समयः। ततश्च सर्वपृथिव्यवच्छेदेन अक्षत्रियत्वस्य बुबोधयिषितत्वे ततः प्रभृति अक्षत्रिया मेदिनी इत्येवोक्तं स्यात्, न तु "शूद्रा भूमिपालाः" इति। नन्दसमयानन्तरं क्षत्रियाणामतिनिर्बलतया तेषु विद्यमानेष्वपि इतरेषां बलवतां शूद्रादीनां भूमिभोगित्वं नासंभवग्रस्तम्। अत एव तत्र तत्र पुराणेतिहासादिषु अक्षत्रियाश्च राजानः 'शूद्रबहुलास्तु राजानः" इत्येवोच्येत, न तु क्षत्रियसामान्याभावोऽपि, अखिलक्षत्रान्तकारित्वं तु पूर्वोक्तबाधकसद्भावात् आपेक्षिकाखिलक्षत्रान्तका-

रित्वपर्यवसायीत्यसकृन्निरूपितम्। परशुरामदृष्टान्तदानोक्तिरपि इवापरपदघटिता आपेक्षिकाखिलक्षहन्तृत्वेनैवोपपद्यत इति न पाणिच्छन्नम्। एतेन "तत्तद्देशीयक्षत्रियान्हत्वा तत्सन्तानभूता उग्रास्तत्तद्राज्ये स्थापिता इति तात्पर्यमिति" नागेशस्याभिधानं स्वतात्पर्यनिबन्धनमेव, न तु पुराणार्षितात्पर्यमनुरुध्य। इह प्रकरणे देशान्तरनामानुक्तथा देशान्तरीणसर्वक्षत्रिया आसन्नेव ये शूद्रागर्भसंभवाः पुत्रास्ते एव नन्देन क्षत्रियापुत्रानुत्साद्य राजसिंहासने स्थापिताः सर्वदेशेषु इत्यर्थस्य पुराणाक्षरैरलभ्यतया निजदुर्भावनासमुद्भावितत्वात्। न हि नन्द आषशक्तिरिति श्रूयते क्वापि पुराणे, नापि वर्तमानसामयिकदेशान्तरीणहूणादीनामिव विचित्रशिल्पकलाकुशल इति स्मर्यते, यतोऽभिभवेदखिलं क्षत्रकुलमिति तस्य साम्राज्यश्रुतिरपि मगधदेशविषयैव। अथवा भवेदनेकदेशविषया, न पुनरशेषभारतवर्षविषया "अनुल्लङ्घितशासन एकच्छत्रां महीमित्यादिपौराणिकी प्रसिद्धिरपि तस्यातिबलित्वे प्रमाणम्, न तु मेदिन्या अक्षत्रियत्वे। अथवा नन्दकाले क्षत्रियाणां निर्बलत्वं शूद्राणां चातिबलत्वं प्रमाण्यते निरुक्तैतद्वचनेन। अत एव "त्रेतायां ब्राह्मणोत्तराः प्रजा द्वापरे ब्रह्मक्षत्रोत्तराः कलौ शूद्रदासोत्तराः" इति पुराणेषु प्रसिद्धिः। न ह्यत्र त्रेतायां ब्राह्मणा एवासन्निति विवक्ष्यते, चातुर्वर्ण्यस्य तदानीं सर्वैरपि शिष्टैः स्थितेरङ्गीकृतत्वात्, किन्तु तत्तत्काले तेषां तेषां बलाबलाभ्यामेव ब्राह्मणाद्युत्तरत्वम्, तथा प्रकृते कलौ शूद्राद्युत्तरत्वं क्षत्रियादीनामप्राधान्यबोधनफलम्, न त्वत्यन्तासत्त्वबोधनपरमिति व्यक्तमेतत् इत्युपरम्यते विस्तरात्। यद्यपि "ततः पुरंजयादग्गो नवषड्वर्षाधिकं वर्षशतं राज्यं करिष्यन्ति, तत्पुत्रास्त्रयोदश वाह्लिकास्ततः पुष्पमित्रादयस्त्रयः

ततस्त्रयोदशमेकलाः सप्त कौशला निषधा नव ततो मागधो विश्वस्फूर्जिसंज्ञोऽन्यान् वर्णान् करिष्यति कैवर्तपटुपुलिन्दसंज्ञान् म्लेच्छप्रायान्ब्राह्मणान् राज्ये स्थापयिष्यत्युत्साद्याखिलक्षत्रजातिमित्युक्तम्। क्षत्रजातिमित्यस्य क्षत्रजातिमुग्रादिरूपामित्यर्थः। एतेन तावत्पर्यन्तमुग्रादिजातिस्थितिः, अग्रे सापि नास्तीति सूचितम् अतो नैतद्बलान्नन्दोत्तरं क्षत्रियसत्तासिद्धिरिति नागेशः, तदिदं मीमांस्यते किमत्र क्षत्रजातिमित्यस्य क्षत्रजातिमुग्रादिरूपामित्यर्थकथनं क्षत्रपदस्योग्रत्वावच्छिन्ने रूढतया, अथवा क्षत्रात् जातिर्जन्म यस्येति व्युत्पत्त्या योगेनैव क्षत्रजातिशब्दस्य उग्रार्थकतया। तत्र नाद्यः, अभियुक्तैः क्षत्रशब्दस्य उग्रेऽव्यवहृतत्वेन रूढिकल्पनायाः सुदूरपाहतत्वात्। नापि द्वितीयः कल्पः, लक्षणादिसमाश्रयणादोषदूषितबहुव्रीह्यादिकल्पनापेक्षया कर्मधारयपक्षे लाघवेन क्षत्रजातिशब्दस्य क्षत्रियत्वजात्यवच्छिन्नार्थकतया उग्रार्थकताकल्पनस्यात्यन्तनिर्युक्तिकत्वत्। अत एव "राजपुरोहितौ सायुज्यकामौ यजेयाताम्" इत्यत्र मीमांसकैः षष्ठीतत्पुरुषादिकमुपेक्ष्य द्वन्द्व आश्रितः, एवं च प्रकृतेऽपि लक्षणानाश्रयणात्कर्मधारय एव वक्तव्य इति कथं क्षत्रजातिशब्दस्य उग्रार्थकत्वोक्तिर्नागेशस्येत्यपक्षपातिन एव साक्षिणः। यदपि च स एव "भागवतेऽपि मागधानां विश्वस्फूर्जिः परञ्जयः। करिष्यत्यपरान् वर्णान् पुलिन्दपटुमुद्रकात्। प्रजाश्चाब्रह्मभूयिष्ठाः स्थापयिष्यति दुर्मतिः। वीर्यवान् क्षत्रमुत्साद्य पद्मावत्यां स वै पुरि। गङ्गाद्वारादाप्रयागं गुप्तां भोक्ष्यति मेदिनीमित्यत्र क्षत्रपदं तज्जन्यत्वादुग्रपरं मागधान्तमित्यस्य मगधदेशीयानां संकीर्णराज्ञामित्यर्थः—इति। तदिदमतिनिस्सारम्, असंप्रतिपन्नस्थले लक्षणामुपकल्प्य वचनकदर्थनाया

अयुक्तत्वात् । यथाकथञ्चिल्लक्षणादिकमुपक्षिप्य ब्रह्मसूत्राणामपि नायिकाभेदनिरूपणपरत्वेन व्याख्याने सर्वलौकिकवैदिकव्यवहारोपलपवप्रसङ्गात् ।

मागधानामित्यस्य मगधदेशीयानां संकीर्णराज्ञामिति विन्यसनं तु करतलकलितपातञ्जलस्य नागेशस्यैव शोभते, नेतरस्य । अत्र हि संकीर्णराजानामिति वक्तव्यम्, न तु यथोपन्यासम् । किं च मागधानामित्यस्य मगधदेशीयसंकीर्णराजपरत्वोक्तिः सर्वथापि द्वेषनिबन्धना; अधुनातिनिर्बलेषु क्षत्रियेषु सत्स्वपि तत्तद्देशनिवासाधिष्ठातृत्वादिनिबन्धनस्य बघेला बुन्देला इत्यादिव्यवहारस्य शूद्रव्यावृत्तस्य क्षत्रियेष्वेष्वेव प्रसिद्धत्वात् । न हि परासितक्षत्रकुला अपि असंख्यधनसमृद्धा क्षत्रियेतरनृपाः औज्जयना ग्वालियरा एन्दोरा इति वा ख्यायन्ते तज्जातिनाम्ना वा तदधिकृतादेशाः सैंधिया होलकरा भौंसला इत्युच्यन्ते वा । तस्माद् दुरुक्तमिदमिति पुष्कलम् । यच्च "ततश्च धनमेवाभिजनहेतुः, रुचिरेव दाम्पत्यहेतुराढ्यतैव साधुत्वे हेतुरित्येवमनेकदोषोत्तरे भूमण्डले सर्ववर्णेषु यो बलवान्स भूपतिर्भविष्यतीत्युक्तम् । सर्ववर्णेष्वित्यस्यावशिष्टेषु ब्राह्मणवैश्यशूद्रेष्वित्यर्थः, तेऽपि कलौ अतिव्रात्यतया शूद्रत्वेनैव पूर्वं गणिता इति न विरोधः ; अक्षत्रियाश्च राजान इति वक्ष्यमाणहरिवंशात्, एतेनैतद्बलात् क्षत्रियसत्तासाधनमपास्तम्" इति, तदिदमनवधानदुर्जल्पितमेव ; सर्ववर्णेष्वित्यस्य अवशिष्टेषु ब्राह्मणवैश्यशूद्रेषु इत्यर्थकल्पनायां प्रमाणविरहेण तथोक्तेरयुक्तत्वात् । निरुक्तहरिवंशस्य तु स्पष्टमेव क्षत्रियेषु साम्राज्यशक्तिशून्यत्वतात्पर्यकत्वात्, वैश्यानामप्यभावस्य कलौ भवताऽनुमतत्वेन तथोक्तेः स्वाभिमतार्थविप्रतीपत्वाच्च, हठाद्वैश्यानामप्यत्यन्ताभावभङ्गीकारे स-

वर्णेषु इत्यभिधानमुपरुद्ध्येत । न हि क्षत्रियवैश्ययोरभावाङ्गीकारे ब्राह्मणशूद्रमात्रतात्पर्येण सर्वपदं संगच्छते, नापि ब्राह्मणशूद्रवर्णव्यक्तिबहुत्वतात्पर्येण सर्वपदसंगमनसंभवः;तथार्थाभिधित्सायां सर्वब्राह्मणशूद्रेषु इत्यस्यैवाभिधानस्य युक्तत्वात् । इतरथा शूद्रवर्णव्यक्तिबहुत्वतात्पर्येण प्रयुक्तस्य सर्वे वर्णा नोपनेतव्या इत्यस्यापि व्यवहारस्य स्वारसिकत्वप्रसङ्गः । किंच योऽयं कलौ वैश्यानामत्यान्तभावोऽभिधीयते भवता, स किंप्रयोज्य इत्यपि विवेचनीयम् । तत्र यथा भवता क्षत्रक्षयहेतुर्नन्दोऽभिधीयते, तथा आहोपुरुषिकामप्यवलम्ब्य वैश्यक्षयहेतुर्निर्देष्टुं न शक्यः, न च द्वित्राण्येवासन् वैश्यकुलानि, येषां नाश आकस्मिकोऽप्युत्प्रेक्ष्येत, नन्दादीनां वैश्यजातीयत्वस्य तज्जातीयानां सङ्ख्यासमृद्धेश्च कलेरादौ पुराणेभ्य एव सिद्धत्वात् । यदि तु कलौ न क्षत्रियाः सन्ति कलौ नो वैश्यजातयः । ब्राह्मणाश्चैव शूद्राश्च कलौ वर्णद्वयं स्मृतम्" इत्युक्तेः । नाधीयन्ते यदाग्नयः न यजन्ते द्विजातयः । उत्सीदन्ति तदा चैव वैश्यैः सार्धं तु क्षत्रियाः । इति मत्स्यपुराणोक्तेश्च वाचनिक एव वैश्याभावोऽभिधीयते , तदा पूर्वं वचनमेव सो° पुराणेषु अष्टादशस्वपि पुराणेषु नोपलभामहे, द्वितीयं तु वचनं मात्स्ये उपलभ्यमानं सदपि न त्वदभिमतार्थसाधकम्, तस्य अग्नीनामनाधाने द्विजातीनां ब्राह्मणानां यागादिरूपे स्वकर्मणि अप्रवृत्तौ च सवैश्यानां क्षत्रियाणां मर्यादाव्यवस्थापकानामुत्सादः अलब्धपदत्वमेव हेतुरित्यर्थबोधकत्वात् । अत एव तत्र तत्र ब्रह्मविट्क्षत्रशूद्राणां यो बली भविता नृपः" इति श्रीभागवते बलनिबन्धननृपत्वाभिधानेन वर्णधर्मव्यवस्थोच्छेद एव कलावभिधीते, न तु वर्णानामत्यन्तासत्त्वमित्यकिंचिदिदम् । अस्तु च भवत्पुस्तकोपलब्धमपि कलौ न क्षत्रि-

याः सन्तीति पूर्वोक्तं वचनमपि प्रामाणिकम्; तथापि न तेऽर्थसिद्धिः; स्वस्ववर्णोचिताचाराः क्षत्रिया वैश्याश्च न वर्तन्त इत्यर्थकतो-यास्त्वयाऽप्यवश्यं वक्तव्यत्वात्, इतरथा ब्राह्मणाभावबोधकवचनानां यथाश्रुतार्थाङ्गीकारे चातुर्वर्ण्यमात्रमेवोपहतं भवेदित्यन्तमनिष्टं प्र-सज्येत । न चैवमर्थकथने "ब्राह्मणाश्चैव शूद्राश्च कलौ वर्णद्वयं स्मृ-तमित्युत्तरार्धमुपरुद्ध्येत । ब्राह्मणशूद्रवर्णयोरपि कलावयथाचार-तया तयोरप्यभावस्यैव त्वदुक्तरीत्या वक्तव्यत्वादिति वाच्यम्; क्ष-त्रियवैश्यापेक्षया ब्राह्मणशूद्रयोः स्वस्ववर्णोचिताचारस्याधिकस्यो-पलम्भेन तदभिप्रायकतया पौराणिकयाः काचित्कया आद्यन्तवर्णा-स्थित्युक्तेर्युक्तत्वात् । क्षत्रियाणां हि प्रजापालनलक्षणः शीर्षण्यो धर्मस्तैस्त्यक्तो यवनैः संरक्षितो वैश्यानां तु कृषिगोरक्षादिलक्षणः प्राय एव धर्मोऽग्राहि शूद्रैरिति तादृगुणसंपादकस्वस्वगुणाभाव-प्रयोज्यविशिष्टाभावतात्पर्येण पुराणेषु तथाभिधानं युक्तमेव । न चैतावता विशेष्यभूतयोः क्षत्रियवैश्ययोरप्यभावः सिध्यति । पुराणेषु तत्रत्क्षत्रियवंशनाशोक्तिस्तु तत्तद्वंशशिरोधरक्षात्रधर्मसंर-क्षणक्षमपुरुषाभावनिबन्धनेति तु स्वावसरे सुष्ठूपपादितमेव । एवं च स्वरूपतः क्षत्रियवंशस्येव वैश्यवंशस्यासत्त्वाङ्गीकारे अग्रिम-कृतयुगे चातुर्वर्ण्यसत्त्वमपि दुर्निर्वहम्; त्वदुक्तरीत्या तु क्षत्रिय-वंशबीजभूतयोर्देवापिमर्वोः सत्त्वेन तत्सृष्टिसंभवेऽपि वैश्यानाम-ग्रिमसृष्टावत्यन्तोच्छेद एव स्यात् । न च तदानीं भगवत्संकल्प सम्भवा एव वैश्याः; सांकल्पिकसृष्टेरादियुगे एवाङ्गीकारेण मध्ये तथाऽकल्पनात् । किंचैवं क्षत्रियाणामपि भगवत्संकल्पसम्भव-त्वाङ्गीकारे तन्मूलपुरुषकल्पनाक्लेशोऽप्यपार्थक एव । न च वैश्या-नामपि भाविसृष्टौ वंशप्रवर्तकः कश्चन पुरुषोऽवतिष्ठते इति

कल्प्यम्; एतादृशोच्छृङ्खलकल्पनापेक्षया वंश्यवंशसद्भावकल्पनाया एव शुक्तत्वात्। किं च क्षत्रियवंशादिभूतयोर्देवापिमर्वोरपि सत्यसुवर्चो नामानौ श्रूयेते पुत्राविति देवापिमर्वोर्भार्यासद्भावः कल्पनीयः। न च पुत्रावेवानूढौ सन्तौ सर्जनायालमिति तत्पत्न्यावपि कल्प्ये। न च ते अपि पत्न्यौ सन्निहितसम्बन्धे धर्म्ये भवत इति तत्पत्नीपितरावपि विभिन्नकुलसम्भवौ कल्पनीयौ इत्यनवस्थितैच्छिकनिर्गलकपोलकल्पनापेक्षया वंशसत्त्वकल्पनैव साधीयसीति नम्रीभूयार्थयामहे। एतच्च पूर्वमप्यस्माभिर्निरूपितमिति तत्र तत्रावधेयम्। यत्तु ब्रह्मविट्क्षत्रशूद्राणामिति भागवतश्लोकस्थक्षत्रादिपदं न जातिक्षत्रादिपरम्, किन्तु क्षत्रवृत्त्यादिवृत्या जीवत्सु ब्राह्मणेष्वेव क्षत्रवैश्यादिव्यवहारपरमिति, तदतीव दुर्भणितम्। अत्र हि यो बली भविता नृपः इति कथनेन बलरूपलौकिककारणप्रयोज्यमेव नृपत्वम्, न तु सनातनमर्यादाप्राप्त क्षत्रजातीयत्वनिबन्धनं नृपत्वमित्ययमर्थो बोध्यते। ततश्च क्षत्रवृत्या जीवत्सु ब्राह्मणेष्वेव लौकिकनृपत्वसामग्रीसमवलम्बनेन ब्राह्मणवैश्यशूद्रवृत्त्या जीवत्सु ब्राह्मणेषु च लौकिकसामग्र्या नृपत्वप्रयोजिकाया असम्भवेन तेषां राजपदप्राप्तिप्रयोजककारणवैधुर्ये "ब्रह्मविट्क्षत्रशूद्राणां यो बली भविता नृपः" इत्यभिधानमसङ्गतमेव व्यासस्य प्रसज्येत, तस्मात् ब्रह्मक्षत्रादिपरमेव वक्तव्यम्, भवति चैवमर्थानुग्रहः। कलौ क्षत्रादिसमुद्भवानामपि बलहीनत्वात् शूद्राणामपि च राज्यार्जनरक्षणाद्यौपयिकबलशाक्तित्वेन यो बली स एव नृपो न तु चिरमर्यादाप्राप्त क्षत्रजातीयत्वनिबन्धनं नृपत्वमित्यक्षरस्वारस्यात्। भवदुक्तरीत्या शस्त्रग्रहणप्रजापालनचारा ब्राह्मणा एव क्षत्रियाः कृषिगोरक्षावाणिज्याचाराश्च त एव ब्राह्मणा वैश्या इति बलनिव-

न्धनराज्योक्तिश्चतुर्णामुपरुध्येतेति स्फुटमेव। यदि तु क्षत्रियादिपदेन व्यवह्रियमाणाः क्षत्रियादिपदेनोच्यन्ते इत्युच्यते, तर्हि ओमिति ब्रूमः, बलवत्तरबाधकोपन्यासं विना क्षत्रियादिपदव्यवहारस्याधुनिकस्य क्षत्रियेतरेषु वक्तुमशक्यत्वात्, इतरथा ब्राह्मणशूद्रादिव्यवहारस्याप्याधुनिकस्य शक्तिभ्रममूलकस्य परेणोद्भाव्यत्वात् क्षत्रियवैश्यविरहप्रमापकवचनाभासानामिव ब्राह्मणाभावबोधकवचनाभासानामपि पुराणेषु परेण दर्शयितुं शक्यत्वात्। यदि तेषां विशिष्टविशुद्धब्राह्मणाभावबोधकतया निर्वाहः, तर्हि न कश्चिद्विशेषोऽन्यत्र दुरभिनिवेशादित्यस्मत्पक्ष एव किं न सन्तुष्यसि। यदि तु क्षत्रियादिसत्त्वं नन्दस्याशेषक्षत्रकुलक्षयहेतुताया जामदग्न्यसदृश्याः पुराणेषु प्रसिद्ध्या विवादपदं न तथा ब्राह्मणादिसत्त्वं कस्यापि विवादास्पदमिति ब्राह्मणाभावबोधकवचसां कथञ्चिदपि निर्वाहः, क्षत्रियाभावबोधकानां तु वचसां बलेनापि तादृशार्थबोधनायैव यतनीयमस्माकमेव तत्र महाविप्रतिपत्तेरित्युच्यते, तर्हि अनादिपापवासनादूषिताशेषशेमुषीकाणां केषांचिद्वेदविमुखानां वेदे वेदपुरुषे च विप्रतिपत्तेः क्षणभङ्गुरेऽप्यमुष्मिन् यमयातनापात्रशतसाधने देहे चाविप्रतिपत्तेः परे एव विजयेरन्निति विप्रतिपत्तिरकिञ्चिकरीत्येवावाभ्यां वक्तव्यमिति शाम्यतु भवान्। पौराणिकानि क्षत्रकुलक्षयबोधकवाक्यानि तु पूर्वमेव सुनिपुणं व्याख्यातानि। न हि तत्र नन्दे परशुरामापेक्षयाऽतिशयो बुबोधयिषितः; तादृशार्थबोधकपदविरहात्। यद्यखिलक्षत्रान्तकारित्वेनैवातिशये भ्राम्यसि, तर्हि प्रकृते परशुराम इवाखिलक्षत्रान्तकारी भविता नन्दः। अत्र वाक्ये नन्दपरशुरामयोः सादृश्यं न भवनमात्रेण सर्वभुवनसाधारणेन अनतिशायकेन विश्वविश्रान्तधर्मेण, किन्त्वखिलक्षत्रक्षयहेतुत्वे-

नैवेति न कश्चिदतिशयो नन्दे, प्रत्युतोपमेयस्योपमानमपेक्ष्य हीन-गुणतया नातिशयः कथमपि । तस्मादशेषब्राह्मणनायकस्य विष्णोरंशावतारस्य भगवतो भार्गवस्यापि वीर्यमतीत्य भुवनं बिभ्रतश्चातुर्वर्ण्यरक्षणदीक्षाः क्षत्रियाः कलावपि बलान्निजधर्मरक्षणादीक्षा वैश्याश्च सन्त्येवेति सद्भिरनुमतो वैदिकः पन्थाः—इति ।

एतेन—व्रात्यशुद्धिसंग्रहोऽपि श्रीजयसिंहकारितो—व्याख्यातः । स यथाः—अथाऽयं व्रात्यताप्रायश्चित्तविचारो विफलत्वादसङ्गतः; कलौ चातुर्वर्ण्यविभागाभावेन प्रायश्चित्तकारयितॄणां व्रात्यस्तोमादिक्रतुप्रवर्तकानामृत्विजामुपनेतॄणां द्विजानां ब्राह्मणादीनामभावेन प्रायश्चित्तानुष्ठानाप्रवृत्तेः,

सौराष्ट्रावन्त्यभीराश्च शूद्रा अर्बुदमालवाः ।
व्रात्या द्विजा भविष्यन्ति शूद्रप्राया जनाधिपाः ॥
सिन्धोस्तटं चन्द्रभागां कौन्तीं काश्मीरमण्डलम् ।
भोक्ष्यन्ति शूद्रा व्रात्याद्या म्लेच्छाश्चाऽब्रह्मवर्चसः ॥

इत्यादिवचनेन द्विजसामान्यविप्लवप्रत्ययात्,

ब्रह्मक्षत्रस्य यो योनिर्वंशो राजर्षिसत्कृतः ।
क्षेमकं प्राप्य राजानं स संस्थां प्राप्स्यते कलौ ॥
इक्ष्वाकूणामयं वंशः सुमित्रान्तो भविष्यति ।
यतस्तं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ।

इति चन्द्रसूर्यवंशविलयनिर्देशात्,

अग्निहोत्रं च संन्यासं तावदेव समाचरेत् ।
यावद्वर्णविभागोऽस्ति यावद्वेदः प्रवर्तते ॥

इति कलिमध्ये वर्णविलयसूचनात्, एवं "योऽयं पुरञ्जयनामा बार्हद्रथोऽन्त्यस्तस्य सुनिको नामाऽमात्यो भविष्यति, स चैनं

स्वामिनं हत्वा स्वपुत्रं प्रद्योत नामानमभिषेक्ष्यतीत्यादिना प्रद्योतपालकविशाखयूपजनकनन्दिवर्द्धनशिशुनागकाकार्णवोमधर्मक्षत्त्रोजोबिन्दुसाराऽजातशत्रुदमकोदपाश्र्वनन्दिवर्द्धनमहानन्दिपर्यन्तं परम्परां निरुच्य महानन्दिसुतश्च शूद्रागर्भोद्भवोऽतिलुब्धो महापद्मः परशुराम इवाऽखिलक्षत्रान्तकारी भविष्यति ; ततः प्रभृति च शूद्रा भूमिपाला भविष्यन्तीति मागधवंशनिरासपूर्वकं क्रमेण शूद्राणामेवाग्रे भूपालत्वनिर्देशाच्च । एवञ्च नन्दोत्तरं त्रैवर्णिकसामान्यस्य शशशृङ्गकल्पत्वात् राजन्या एव न सन्तीति—चेत्, अत्रोच्यते, कलौ कदापि न सर्वथा चातुर्वर्ण्यविलयः। केचन पुनस्त्रैवर्णिका व्रात्या भवेयुस्तत्रापि कलेरन्ते बहुशो व्रात्या आदौ परिमितो मध्ये च मध्यमविधा एव, न तु सर्वथा ब्राह्मणादीनामभाव एव कल्प्यते ॥

शम्भलग्राममुख्यस्य ब्राह्मणस्य महात्मनः ।
भवने विष्णुयशसः कल्किः प्रादुर्भविष्यति ॥

वासुदेवस्यांशः शम्भलग्रामब्राह्मणप्राधानविष्णुयशसो गृहेषु अष्टगुणर्द्धिसमन्वितः कल्किरूपधरो जगत्यत्राऽवतीर्य सकलम्लेच्छदस्युदुष्टाचरणवतामशेषाणामविच्छिन्नशक्तिमहात्म्यः क्षयं करिष्यति, स्वधर्मे चाऽशेषमेव संस्थापयिष्यतीति ब्राह्मणस्थितिप्रदर्शनात् ;

एवं प्रजाभिर्दुष्टाभिराकीर्णे क्षितिमण्डले ।
ब्रह्मविट्क्षत्रशूद्राणां यो बली भविता नृपः ॥

इति कलिमध्येऽन्त्ये च ब्राह्मणादिवर्णसद्भावकारेण बलवतो भूपालकत्वकथनेन सर्वथा चातुर्वर्ण्यविलयायोगात् ,

एतेन क्रमयोगेन मनुपुत्रै वसुन्धरा ।

कृतत्रेतादसंज्ञानि युगानि त्रीणि भुज्यते ॥
कलौ तु बीजभूतास्तु केचित्तिष्ठन्ति वै मुने ।
यथैव देवापिमरू साम्प्रतं समवस्थितौ ॥

इति देवापिमरुवदेव केचनाऽन्येऽपि बीजभूताः सार्वभौमत्वर-हिताः राजवंशप्रवर्तका भवेयुरिति निरूपणात् ॥

देवापिः पौरवो राजा मरुश्चेक्ष्वाकुवंशजः ।
महायोगबलोपेतौ कलापग्रामसंस्थितौ ॥
कृते युग इहागत्य क्षत्रप्रावर्तकौ हि तौ ।
भविष्यतो मनोर्वंशे बीजभूतौ महाबलौ ॥
देवापिः शन्तनोर्भ्राता मरुश्चेक्ष्वाकुवंशजः ।
कलापग्राम आसाते महायोगबलान्वितौ ॥
ताविहैत्य कलेरन्ते वासुदेवानुशिक्षितौ ।
वर्णाश्रमयुतं सर्वं पूर्ववत्प्रथयिष्यतः ॥

इति धर्मप्रवर्तकत्वकथनेपि क्षत्रान्तरप्रावर्तनाकथनात् ॥

एष तूद्देशतो वंशस्तवोक्तो भूभुजां मया ।
निखिलो गदितुन्नैव शक्यो जन्मशतैरपि ॥

इति सूर्यसोमवंशबाहुल्यनिर्देशेन सार्वभौमवंशयोरिक्ष्वाकु-वंशैकदेशभूतबृहद्बलवंशैकदेशस्य सुमित्रान्तस्य सोमवंशैकदेशभू-तपरीक्षिद्वंशैकदेशस्य क्षेमकशिरस्कस्य विलयकथनेऽपि वंशान्तराणां विलयाकथनात्, मागधवंशेऽपि बार्हद्रथवंशैकदेशजरासन्धवंशैक-देशस्य पुरञ्जयान्तस्य सुनिकामात्यकृतराज्यापहारस्य पुरञ्जयव-धपूर्वकस्य च निर्देशेऽपि तद्वंशसामान्यविलयानिर्देशात्, नन्दात्-प्रभृति शूद्रा भूमिपाला भविष्यन्तीति मगधदेशावलम्बेन सार्वभौ-मविभेदानामेव शूद्रादिभेदेन निर्देशेन क्षत्रसामान्यस्य पृथिव्या-

मसत्त्वाप्रतिपादनात् , महापद्मः परशुराम इव सकलक्षत्रान्तकारी भविष्यतीति वचसोऽपि राज्याभिषिक्तक्षत्त्रान्तपरत्वेन क्षत्रजातिसामान्याभावपरत्वस्य परशुरामदृष्टान्तेन ब्रह्मविट्क्षत्रेत्यादिनिरुक्तवचनादिना च वक्तुमशक्यत्वात्, यवनादीनामपि ततः शकाः षोडश भूपतयो भवितार इत्यादिना सार्वभौमत्वायोगात् , ब्रह्मविट्क्षत्रेत्यादिवचनेन खण्डितभूपतित्वेन क्षत्रादीनामपि विनिर्देशात् , अनन्तरञ्चाशेषकलेरवसाने निशावसान इव प्रबुद्धानां तेषामेव जनपदानाममलस्फटिकशुद्धा मतयो भविष्यन्ति ; अनन्तरं तेषामेव बीजभूतानामशेषमनुष्याणां परिणतानामपि तत्कालकृतानामपत्यप्रसूतिर्भविष्यति; तानि च तदपत्यानि कृतयुगधर्मानुसारीण्येव भविष्यन्ति ॥

अथ तेषां भविष्यन्ति मनांसि विशदानि वै।
वासुदेवाङ्गरागातिपुण्यगन्धानिलस्पृशाम् ॥
पौरजानपदानां वै हतेष्वखिलदस्युषु ।
तेषां प्रजानिसर्गश्च स्थविष्ठः संभविष्यति ॥

इति कल्पान्तस्थपौरजानपदजनानामेव कृतयुगगतब्राह्मणादिसकलवर्णबीजभूतत्वेन निर्देशेन कलौ सर्वथा चातुर्वर्ण्यं नेति वक्तुमशक्यत्वात् ,

अचन्द्रार्कग्रहा भूमिर्भवेदपि न संशयः ।
अपौरवा न तु मही भविष्यति कदाचन ॥

इति स्पष्टमेव सर्वदा पौरवाणां भूमाववस्थानकथनाच्च । एवञ्च कलौ क्षत्रसत्त्वं नियतमेव । एवञ्च चातुर्वर्ण्याभावनिरूपणं कलावसङ्गतमेव ॥

ननु—

देवापिः पौरवो राजा मरुश्चेक्ष्वाकुवंशजः ।
कृते युग इहागत्य क्षत्रधर्मप्रवर्तकौ ॥

इति निर्देशेनाऽचन्द्रार्कग्रहेति वाक्यं देवापिपरमेव भवतु, न तु तदतिरिक्तक्षत्रसामान्यपरमिति—चेत्, अत्रोच्यते। हरिवंशे षडशीतितमेऽध्याये—

जनमेजयस्य के पुत्राः पठ्यन्ते लोमहर्षण ।
कस्मिन् प्रतिष्ठितो वंशः पाण्डवानां महात्मनाम् ॥

इति शौनकीये जनमेजयस्य शतानीकादिक्षेमकान्ता परम्परा नश्यत्येवाथवाऽन्ते तथा न नश्यति कलौ सर्वदा तिष्ठत्येवेत्येवंरूपपरम्परापरे प्रश्ने सौतेरुत्तरम्—

पारीक्षितस्य काश्यां तु द्वौ पुत्रौ सम्बभूवतुः ।
चन्द्रापीडश्च नृपतिः सूर्यापीडश्च मोक्षवित् ॥
चन्द्रापीडस्य पुत्राणां शतमुत्तमधन्विनाम् ।
जानमेजयमित्येवं क्षात्रं भुवि परिश्रुतम् ॥
तेषां ज्येष्ठस्तु राजाऽस्मीत्यूचे वारणसाह्वये ।
सत्यकर्णो महाबाहुर्यज्वा विपुलदक्षिणः ॥
सत्यकर्णस्य दायादः श्वेतकर्णः प्रतापवान् ।
अपुत्रः स तु धर्मात्मा प्रविवेश तपोवनम् ॥
तस्माद्वनगताद् गर्भं यादवी प्रत्यपद्यत ।
सुचारुदुहिता सुभ्रूर्मालिनी भ्रातृमालिनी ॥
सम्भवजन्मनि गर्भस्य श्वेतकर्णः प्रजेश्वरः ।
अन्वगच्छद् गतं पूर्वैर्महाप्रस्थानमच्युतम् ॥
सा दृष्ट्वा सम्प्रयातं तं मालिनी पृष्ठतोऽन्वयात् ।
पथि सा सुषुवे सुभ्रूर्वने राजीवलोचनम् ॥

कुमारं सम्परित्यज्य भर्तारं साऽन्वगच्छत ।
पतिव्रता महाभागा द्रौपदीव पुरा पतीन् ॥
सुकुमारः कुमारोऽसौ गिरिकुञ्जे रुरोद ह ।
पुष्ट्यर्थं तस्य मेघास्तु प्रादुरासन् महात्मनः ॥
अविष्टायास्तु पुत्रौ द्वौ पैप्पल्यादिश्च कौशिकः ।
दृष्ट्वा कृपान्वितौ गृह्य तं प्रक्षालयतां जले ॥
निघृष्टौ तस्य तौ पार्श्वौ शिलाया रुधिरस्रवौ ।
अजश्यामौ तु पार्श्वौ तावुभावपि समाहितौ ॥
तथैव च समारूढावजपार्श्वस्ततोऽभवत् ।
ततोऽजपार्श्व इति तौ चक्राते नाम तस्य ह ॥
स तु वेमकशालायां द्विजाभ्यां परिवर्द्धितः ।
वेमकस्य तु भार्या तमुद्वहत् पुत्रकारणात् ॥
वेमक्याः स तु पुत्रोऽभूत् ब्राह्मणौ सचिवौ च तौ ।
तेषां पुत्राश्च पौत्राश्च युगपत्तुल्यजीविनः ॥
स एव पौरवो वंशः पाण्डवानां प्रतिष्ठितः ।
श्लोकोऽपि चात्र गीतोऽयं नाहुषेण ययातिना ॥
जरासङ्क्रमणे पूर्वं भृशं प्रीतेन धीमता ।
अचन्द्रार्कग्रहा भूमिर्भवेदपि न संशयः ॥
अपौरवा न तु मही भविष्यति कदाचन ।

इति जनमेजयस्य प्रपौत्रश्वेतकर्णपुत्रमजपार्श्वं परिगृह्य तत्सन्तानस्थैर्यपरत्वेनाऽचन्द्रार्कग्रहा भूमिरिति श्लोकप्रवर्तनेन केवलदेवापिमादायैव पर्यवसानायोगात् । अतोऽन्येपि बहवो राजानो बीजभूताः कलावादौ मध्येऽन्त्ये च सन्त्येव । अपि च राज्याभिषिक्तयोर्द्वयोरेव क्षेमकसुमित्रयोर्वंशविलयकथनेन राज्यानभिषि-

क्तानां तत्परम्पराश्रवानां क्षत्रियाणां वंशविनाशकथनेन च यथा-योगं तेषां कलावपि सन्तत्यनुवर्तनं वर्धत एव। न हि पाण्ड्यादि-निखिलराजवंशानां निरन्वयो विनाशः कुत्राऽप्याम्नातः—इति

यत्तु व्रात्यानां शुद्धिव्यवस्थायां शूद्रापेक्षयोत्कृष्टत्वं वर्तत इति निरूपितम्, तदिदं निष्प्रयोजनमेव। नहि वयं शूद्रापेक्षयोत्कृष्टैरपि व्रात्यैः सह भोजनादिकं व्यवहारजातं शास्त्रीयं मन्यामहे। निषिद्धं हि स्पष्टतरमेवापस्तम्बेन—तेषां गमनं भोजनं विवाहमिति वर्जयेदिति। तथाच शूद्रापेक्षया साध्यमानस्योत्कर्षस्य प्रयोजनं किमपि न वयम्पश्यामः।

[शुद्धिव्यवस्था समालोचनम्]

यत्तु—शुद्धिव्यवस्थायां व्रात्यानामध्ययनाङ्गोपनयनानधिकारिणामपि शौचाचारशिक्षणाङ्गोपनयमस्त्येव। तच्च स्वसमीपप्रापणमात्रमेव। गागाभट्टेनापि व्रात्यानां शौचाचारशिक्षणाङ्गमुपनयनं प्रतिपादितमेव—इत्यादि वर्णितम्, तदप्यस्माकमपि सम्मतमेव। उक्तं हि पूर्वमस्माभिः शिवार्कमणिदीपिकासिद्धान्तानुसारेण पतितानामपि तान्त्रिकधर्माधिकारस्तदीयदीक्षाग्रहणपूर्वकमस्त्येवेति। नहि वयं श्रद्धालूनां पश्चात्तप्तानाञ्च पतितानां तान्त्रिकधर्माधिकारोऽपि नास्तीति वदामः, किन्तु वैदिकधर्माधिकारो नास्तीति। परन्तु—इदमात्रावश्यमुपगन्तव्यम्—यत्तान्त्रिकधर्माधिकारिभिरप्येतैः सह भोजनादिकं वैदिकधर्माधिकारिणां न योग्यमिति।

अत्रायमाशयः—प्रपितामहपर्यन्तमनुपनीतानां सवर्णासूत्पादितानां ब्रह्मक्षत्रविशां आहारादिव्यवहारशुद्धानां व्रात्यस्तोमादिभिः सर्वात्मना शुद्धिः स्वस्वपूर्वतनैरतिपरिशुद्धैरपि व्यवहारयोग्यता वर्तते। पतितोत्पन्नानान्तु प्रायश्चित्तानन्तरमपि न स्वस्वपूर्व-

तनशुद्धजातिभिर्विवाहादिगुरुतरसम्बन्धयोग्यतेति। एतेन—प्रपितामहमारभ्यानुपनीता व्रात्या अपि—व्याख्याताः, तेषां प्रायश्चित्ताभावेन पतितानामिव कथमपि न शुद्धजातीयैः सह सम्बन्धयोग्यतेत्येवोरीकर्तव्यत्वात्। तथा च भक्तिशास्त्रे व्रात्यानां पतितानां पतितोत्पन्नानां चण्डालादीनां वा सर्वेषामधिकारस्थापनादिकं सर्वे शिवदत्तशास्त्रिप्रभृतीनां यदि तेषां परलोकहितैषणया, तर्हि तु वयमप्यत्र सहयोगिन एव। यदि तु समाजसङ्घटनार्थं सामाजिकेषु कार्येषु म्लेच्छादीनामपि सहयोगसम्पादनार्थम्, तर्हि तु वयम्पश्यामः—सामाजिकेषु कार्येषु विवाहादिषु कृतप्रायश्चित्तानामपि पतितानां पूर्वोक्तरीत्या न सहयोगयोग्यता वर्तत इति प्रायश्चित्तव्यवस्थापनमिदं वितथमेवेति पश्यामः। अत्र प्रसङ्गे इदमेव पूर्वं बहुधा निरूपितमेव पुनरपि सूच्यते—यत् विधिनिषेधशास्त्राणां सर्वेषां न समुदाये वाक्यपरिसमाप्तिरिति न्यायेन प्रवृत्तिः, किन्तु प्रत्येकं वाक्यपरिसमाप्तिरिति न्यायेनेति सामाजिककार्यपदेन तत्तद्व्यक्तिमात्रपर्यवसायिफलसाधनकार्यजातमेव विवक्ष्यते, न तु बहुव्यक्तिपर्यवसायिफलोदर्ककार्यजातमिति समाजव्यवस्थापर्यालोचनसभादिषु पतितानामन्येषां सर्वेषां सहयोगो नास्माकमप्यसम्मतः, परन्तु तादृशसभानिष्पत्त्यनन्तरं स्वगृहं प्रति यदा समागम्यते, तदा प्रायश्चित्तमवश्यं कर्तव्यमिति। अस्मिंश्चावसरेऽवश्यमिदं सूचनीयं समापतितम्—यथावच्छक्ति पुनः पुनः पतितसंसर्गो यथा न स्यात्तथा प्रयत्नः कर्तव्यः। 'संवत्सरेण पतति पतितेन सहाचरन्, इति हि पातित्यं प्रति संवत्सरावधि तत्संसर्ग एव निमित्तमिति प्रतिपादितमिति यदा कदाचिदुपस्थिततत्तदापद्विशेष—पर्यालोचनार्थं तत्तद्धर्माकाङ्क्षार्थं च सर्वेषामेकत्र मेलनं न पाति-

त्यप्रयोजकमिति तत् स्नानादिमात्रेण शुद्धिरुपपद्यत इति । संवत्सराधिककालं पतितसंसर्गादिना तु पातित्यमेव संसर्गिणामपि भवतीति पतितसंसर्गिसंसर्गोऽपि महते दोषाय स्यादिति तु बहुशोऽन्यत् निरूपितमेव । यथा च कृतप्रायश्चित्तानामपि न स्वभावशुद्धैः साकं व्यवहारयोग्यता, तथापि पूर्वं बहुधा निरूपितमेव ।

[कामतोऽव्यवहार्यस्तु इत्यस्य वाचस्पत्यसम्मतं विवरणम्]

अत्र च विषयेऽस्माकं पूर्वपक्षिणाञ्च मुख्यतयावलम्बभूतं वचनम्—

प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत् ।
कामतोऽव्यवहार्यस्तु वचनादिह जायते ॥ इति ॥

अयं हि श्लोको वाचस्पत्ये एवं व्याख्यातः । तद्यथा—कामत इति अज्ञानकृतपापप्रायश्चित्तेन कामकृतपापापगमो न भवति, किन्तु व्यवहार्यतामात्रं भवति । ननु सति पापे कथं व्यवहार्यतामात्रम् ? अत्राह—वचनादिति । अयमभिप्रायः—अर्धप्रायश्चित्तानुष्ठानेनार्धपापक्षयात् सम्भाषणस्पर्शनदर्शनादिलघुव्यवहारो न दुष्टः, न तु एकभोजनपरिणयनादिव्यवहारोऽपि ; वचनादेव । अथवा—अकारप्रश्लेषाद्यथोक्तेन प्रायश्चित्तेन कामतोऽपि पापक्षयो भवत्येव , किन्त्वव्यवहार्यः पापाभावेऽपि वचनात् ।

अत एव मनुः—

बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः
शरणागतहन्तॄंश्च स्त्रीहन्तॄंश्च न संवसेत् ॥ इति

याज्ञवल्क्यः—

शरणागतबालस्त्रीहिंसकान् संवसेन्न तु ।
चीर्णव्रतानपि सदा कृतघ्नसहितानिमान् ॥ इति

कृतनिर्णेजनांश्चैव न जुगुप्सेत कर्हिचित्—इति मनुवचनन्तु अज्ञानकृते महापापे बोद्धव्यमिति। भवदेवस्तु—सर्वत्र मृतः शुद्धिमवाप्नुयादिति दर्शनादत्राव्यवहार्यतावचनं निन्दार्थमित्याह। जिनकस्तु—पापकर्मणा हि द्वयं जन्यते शरीरगतमप्रायत्यमात्मगतश्च पापम्। तच्च स्पर्शादौ वैदिककर्मणि चानर्हत्वलक्षणम्। तेनात्र कामनाकृते केवलशरीरदोषः प्रायश्चित्तेनापनीयते। जन्मान्तरकृतदुरितस्येवात्मनः शरीरान्तरस्य व्यवहाराधिकारित्वम्। आत्मगतन्तु पापं भोगादेव क्षीयते—इति, तन्न; कामकारकृतेऽप्याहुरेके श्रुतिनिदर्शनात्—इति मनुवचनादुक्तश्रुतिविरोधाच्चेति।

[उक्तवाचस्पत्यसमालोचनम्]

अत्र प्रथमद्वितीयमतयोर्यत्र व्यवहार्यः—अव्यवहार्य इति वा पदच्छेदस्तत्र वस्तुगत्या फलतो न विशेषः। यतो व्यवहार्यपदेनापि लघुव्यवहारार्हत्वमेव प्रतिपाद्यते। एतेन—तृतीयमतमपि—व्याख्यातम्। तत्रापि हि मरणानन्तरमेव शुद्धिरभिमन्यते, न ततः पूर्वमिति फलतोऽविशेषात्। चतुर्थमते तु—जन्मान्तरे नरकोपभोगः, इह जन्मन्यामरणं व्यवहारानर्हतेति यत्र सिद्धान्तस्तत्र कामकारकृते प्रायश्चित्ताभावोऽभिमन्यते इति सुमन्त्वादिवचनविरुद्धमिति वाचस्पत्याशयः सर्वविदित एव। तथाच कामकारकृतपापे प्रायश्चित्तेन नरकोत्पादकशक्तिमात्रविनाश इति एकं मतम्। अपरन्तु मतम् आमरणं शक्तिद्वयस्याप्यविनाशः। मरणानन्तरं कृतप्रायश्चित्तानां प्रेतकर्मसंस्कारयोग्यतादिकं भवतीति सिद्धम्। अस्मिन् प्रसङ्गेऽव्यवहार्यपदप्रकरणगतवाचस्पत्याशयसङ्कलनमप्यत्यन्तमुपयुक्तं स्यादिति तदपि कर्तुं प्रयतामहे। तद्यथा—अव्यवहार्य इति शयनासनभोजनादौ एकत्रावस्थानायोग्ये पतितादौ; 'कामतोऽव्यवहार्यस्तु वचनादिह

जायते' इति स्मृतेः। अव्यवहार्यास्तु पातित्यहेतुकर्मकारिणः स्मृतावुक्ताः। तेषां संसर्गविशेषोऽपि निषिद्धः। यथा—

आजनं योनिसम्बन्धं स्वाध्यायं सहभोजनम्।
कृत्वा सद्यः पतन्त्येते पतितेन न संशयः॥

देवलः—शरणागतबालस्त्रीहिंसकान् संवसेन्न तु
चीर्णव्रतानपि सदा बालघ्नसहितानपि॥ (या० व०)

स्त्रीघातकस्याऽव्यवहार्यत्वञ्च हीनवर्णोपभुक्ताऽयतिरिक्तविषयम्। "हीनवर्णोपभुक्ता या त्यज्या वध्यापि वा भवेत्" इति बृ० स्मृतौ तस्या वध्यत्वोक्तेः। अत्र कृतप्रायश्चित्तानामपि अव्यवहार्यत्वोक्तेरकृतप्रायश्चित्तानां सुतरां तथात्वम्। तच्च शङ्कापूर्वं रघुनन्दनेन समर्थितम्। तद्यथा—पापाभावे कथमव्यवहार्यतेति चेत्, याज्ञवल्क्यस्मृतौ वचनादिह जायते' इत्युक्तेस्तथात्वम्। तथाच 'किमिव वचनं न कुर्यान्नास्ति वचनस्यातिभारः' इति। तथाहि—पापस्य द्वे शक्ती नरकोत्पादिका व्यवहारनिरोधिका च। तत्रैकतरशक्तिविनाशेऽपि व्यवहारनिरोधिका शक्तिरस्त्येवेति। यथोक्तमापस्तम्बेन—नास्यास्मिंल्लोके प्रत्यासत्तिर्विद्यते, कल्मषन्तु विहन्यते इति। प्रत्यासत्तिर्भोजनादौ सान्निध्यम्। मिताक्षरायान्तु कामतो व्यवहार्य इत्येव पाठः। तथैव तेन व्याख्यातञ्च।

प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत्
कामतो व्यवहार्यस्तु वचनादिह जायते॥ (या०स्मृ०)

इति। प्रायश्चित्तैर्वक्ष्यमाणैरज्ञानाद्यदेनः कृतम्, तदपैति अपगच्छति, न कामतः कृतम्, किन्तु तत्र प्रायश्चित्तविधायकवचनबलादिह लोके व्यवहार्यो जायत इति। समर्थितश्चायमर्थ आशङ्कापूर्वकं तत्रैव। यथा—ननु कामकृते प्रायश्चित्ताभावात्कथं व्यवहा-

र्यत्वम् ? तदभावश्च 'अनभिसन्धिकृते पापे प्रायश्चित्तमिति' वसिष्ठवचनात्, "इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजम्। कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते" इति मनुवचनाच्चावगम्यते। नैतत्; यः कामतो महापापं नरः कुर्यात्कथञ्चन। न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते— इति। विहितं यदकामानां कामात्तत् द्विगुणं भवेदिति च कामकृतेऽपि प्रायश्चित्तदर्शनात्। यत्तु वसिष्ठवचनम्, तस्याप्यकामकृते पापे प्रायश्चित्तं शुद्धिकरमित्यभिप्रायः, न तु कामकृते प्रायश्चित्ताभाव इति। यत्तु मनुवचनम् 'इयं विशुद्धिरुदिता' इत्यादि, तदपीयमिति सर्वनाम्ना द्वादशवार्षिकव्रतचर्याया एव कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते—इति प्रतिषेधकम्, न पुनः प्रायश्चित्तमात्रस्य; मरणान्तिकादेः प्रायश्चित्तस्य दर्शनात्। ननु यदि कामकृतेऽपि प्रायश्चित्तमस्ति, तर्हि पापक्षयोऽपि कस्मान्न भवति ? उच्यते। उभयत्र प्रायश्चित्ताविशेषः शास्त्रतोऽवगम्यते। अज्ञानकृते सर्वत्र पापक्षयः। यत्र महापातकादौ व्यवहार्यत्वं निषिद्धम्, तस्मिन् कर्मणि कामतः कृते व्यवहार्यत्वमात्रं न पापक्षय इति। न च पापक्षयाभावे व्यवहार्यत्वमनुपपन्नम्। द्वे हि पापस्य शक्ती नरकोत्पादिका व्यवहारनिरोधिका च। तत्र कतरशक्त्यविनाशेऽपि व्यवहारनिरोधिकायाः शक्तेर्विनाशो नानुपपन्नः। तस्मात्पापानपगमेऽपि व्यवहार्यत्वं नानुपपन्नम्। यत्तु मनुवचनम्—

अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः।
कामकारकृतेऽप्याहुरेके श्रुतिनिदर्शनात्॥ इति,

तदपि कामकारकृतेऽपि प्रायश्चित्तप्राप्त्यर्थम्, न तु पाप-

त्वयप्रतिपादनपरम् । अपतनीये पुनः कामकृतेऽपि प्रायश्चित्ते न पापक्षयो भवत्येव ।

अकामतः कृतं पापं वेदाभ्यासेन शुध्यति ।

कामतस्तु कृते मोहात् प्रायश्चित्तैः पृथग्विधैः ॥ इति,

मनुस्मरणात् । पतनीयेऽपि कर्मणि कामकृते मरणान्तिक-प्रायश्चित्ते कल्मषक्षयो भवत्येव ; फलान्तराभावात् । "नास्या-स्मिंल्लोके प्रत्यासत्तिर्वर्तते, कल्मषन्तु निर्हण्यते" इत्यापस्तम्ब स्मरणात् ॥ इति ॥

अत्रेदमेव सिद्धं भवति—यत् यत्र यत्र प्रायश्चित्तविधिमात्रम्, न संव्यवहार्यत्वस्यापि निषेधस्तत्र प्रायश्चित्तविधिबलेनैव व्यवहा-र्यत्वमात्रमूरीक्रियते, यत्र तु न प्रायश्चित्तविधिः, केवलं दोषमात्र मुपवर्णितम्, तत्र, यत्र वा संव्यवहार्यत्वं कृतेऽपि प्रायश्चित्ते नि-षिध्यते, तत्रासंव्यवहार्यत्वसिद्धान्त एव युक्त इति । तथा ब्रह्महा-इत्यादौ यत्र प्रायश्चित्तस्य विधिस्तत्र कामकृते प्रायश्चित्ते न व्य-वहार्यतामात्रसिद्धिः । बालघ्नादीनां तु कृतप्रायश्चित्तानामपि किमिव वचनं न कुर्यान्नास्ति वचनस्यातिभार इति न्यायेनासंव्य-व्यवहार्यत्वमिति फलितम् । संवत्सरमभिव्याप्य चण्डालादिसं-स्पृष्टानां म्लेच्छादिसंसृष्टानां वा न प्रायश्चित्तविधिः कुत्रापि वर्तते । अत ऊर्ध्वन्तु तत्समः इति हि सम्वत्सरमभिव्याप्य पतितादिसं-सर्गेण पतितत्वमेव भवतीति हि पूर्वमेव व्यवस्थापितम् । तथाच पतितानां तत्समानां वा कथमपि प्रायश्चित्तविशेषविधिबलेन न व्य-वहार्यत्वसिद्धिरिति मिताक्षरासिद्धान्तानुसारेणापि संवत्सरमभि-व्याप्य म्लेच्छसंसृष्टानां म्लेच्छीभूतानाञ्च कथमपि प्रायश्चित्तेन व्यवहारयोग्यता न सिध्येदित्येवाङ्गीकर्तव्यम् । मिताक्षराकारा अपि

हि वचनविशेषेणैव खलु व्यवहार्यत्वमव्यवहार्यत्वं वा मन्यन्ते। न च म्लेच्छीभूतानां पुनः स्वमतप्रवेशाधिकारसम्पादकप्रायश्चित्तविधानं किमपि कुत्रापि वर्तते। यथा च श्रीशिवदत्तशास्त्रिमहोदयानां शुद्धिव्यवस्था न प्रकृतोपयुक्ता, म्लेच्छीभूतानामव्रात्यत्वात्तथा पूर्वमेव विवेचितम्। तथाच मिताक्षरासिद्धान्तानुसारेणापि म्लेच्छीभूतानां पुनर्वर्णाश्रमधर्माधिकारः कथमपि न सम्भवतीत्येव फलति। उपपादितं हि पूर्वं मद्रनरत्नप्रदीपानुसारेण पतिततदपत्यानामपि पतितकन्यातिरिक्तानां न व्यवहारयोग्यता कृतप्रायश्चित्तानामपीत्येव याज्ञवल्क्यमतमिति।

इदमेवाभिप्रेत्योचुः—

[उक्तार्थे प्रायश्चित्तमुक्तावलीमतम्] प्रायश्चित्तमुक्तावल्यां दिनकरभट्टाः—स एव —प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत्। कामतो व्यवहार्यस्तु वचनादिह जायते॥ अत्रेदमभिधित्सितम्। पापस्य व्यवहारोधिका नरकजनिका चेति द्वे शक्ती। तत्राज्ञानकृतपापस्य प्रायश्चित्तैः शक्तिद्वयमपि नश्यति। ज्ञानकृतस्य व्यवहारविरोधिकैव, न तु नरकजनिकापि; व्यवहारविरोधश्च न सर्वपापेषु, किन्तु गौतमोक्तेष्वेव। ब्रह्महसुरापगुरुतल्पगमातापितृयोनिसम्बन्धागःस्तेननास्तिकनिंदितकर्माभ्यासिपतितत्याग्यपतितत्यागिनः पतिताः पातकसंयोजकाश्चेति पापेषु भवति यथारीति। बुध्या सुवर्णापहारो ज्ञानकृतं कामतःसुवर्णबुद्धिरेव(?)हृतस्य सुवर्णस्य कामतः पापम्। आचार्यस्तु याज्ञवल्क्यवचनेऽकारश्लेषेण कामकृतपापेषु व्यवहारनिरोधिका शक्तिर्नापैति, नरकजनिका त्वपैतीत्याहुः॥ इति॥

[मल्काना शुद्धिपरीक्षणम्] यत्तु पुनः संस्कारसमित्या महामहोपाध्याय श्रीयुक्तान्नदाचरणतर्कचूडामणि—श्रीयुक्त-

शशिभूषणस्मृतितीर्थ—महामहोपाध्याय पं० श्रीगिरिधरशर्मप्रभृतीनां पण्डितानां द्वारेण मलकानाव्यपदेश्यानां पुनः संस्कारव्यवस्था प्रदत्ता, या हि शुद्धिव्यवस्थापुस्तकस्यैवान्तिमे भागे प्रकाशिता, तत्रास्माकमिदमेव वक्तव्यम्-यन्मल्कानाव्यपदेश्यानां यदि तत्समित्युक्तरीत्या हिन्दुत्वमेव वस्तुगत्या वर्तते, तर्हि तु पुनः संस्कारस्यावसर एव नास्ति। वयन्तु मन्यामहे तेषां वस्तुगत्या केषाञ्चन मोहम्मदधर्माणामप्यलम्बमानानां न हिन्दुत्वम्, न वा पुनः संस्कारोऽपि समुचित इति। हरिनामसङ्कीर्तनाधिकारमात्रं हि तत्तद्दीक्षायां सत्यां सर्वेषामपि भविष्यतीति पुनः संस्कारेण वर्णाश्रमधर्माधिकारव्यवस्थापनमिदमत्यन्तमसङ्गतमेव। नहि हरिनामसंकीर्तनाधिकारो वर्णधर्मः। व्यवस्थापितं चेदं शुद्धिव्यवस्थायामेव, यत्—लोकाश्चण्डालपर्यन्तं सर्वेऽप्यत्राधिकारिणः—इति वर्णेतराणामपि हरिनामसंकीर्तनाधिकार इति। तथाच यदीयं समितिः पुनः संस्कारेण हरिनामसंकीर्तनाधिकारमात्रमेतेषां पतितानामभिलषति, तर्हि तु नास्माकमपि विवादः। इदमेवात्रास्माकं विप्रतिपन्नं यत्—श्रीगिरिधरशर्मप्रभृतिभिरेतेषां संस्कृतानां शुद्धैः पूर्वतनैः साकं विवाहयोग्यतापि मन्यते, तदिदं केवलं न योग्यमिति। सर्वथा तु माधवीयविमर्शनावसरोक्तरीत्या बहुकालं म्लेच्छादिसंसर्गिणां पतितानां प्रायश्चित्तेन शुद्धानामपि अव्यवहार्यत्वपक्ष एव समुचितः। व्यक्तं चायमव्यवहार्यत्वपक्षः प्रायश्चित्तमयूखेऽप्युपपादितः। तद्यथा—

यत्तु याज्ञवल्क्यवाक्ये प्रायश्चित्तैरित्यादावज्ञानपदम्, तदप्यकामपरम्। अत एव तत्प्रतियोगिरूपं कामतः पदं सङ्गच्छते। एवं वाक्यान्तरीयाणि बुद्धिज्ञानाभिसन्धिपदानि कामपराणि। अ-

बुद्ध्यज्ञानानभिसन्धिपदानि चाकामपराणि। तेन बलात्कारिते पापे सत्यपि ज्ञाने न द्विगुणं प्रायश्चित्तम्; तत्प्रयोजककामाभावात्। अत्राकामकृतपापस्य व्यवहारनिरोधिका नरकजनिका चेति शक्तिद्वयमपि नश्यति प्रायश्चित्तेन। कामकृतस्य तु व्यवहारनिरोधिकैव नश्यति, न तु नरकानुकूलेति विज्ञानेश्वरादयो निबन्धकाराः। एतच्च येनाहत्य व्यवहारो निषिद्धस्तत्परम्। तथाचाह गौतमः—ब्रह्महसुरापगुरुतल्पगमातापितृयोनिसम्बन्धागस्तेननास्तिकनिन्दितकर्माभ्यासिपतितात्याग्यपतितत्यागिनः पतिताः पातकसंयोजकश्च—इति। एतेष्वेव व्यवहारो निषिद्धो नान्यत्र। 'एनस्विभिरनिर्णिक्तैर्नार्थं कश्चित् समाचरेत्' इति मानवीयमेनस्विपदमपि ब्रह्महादिपरमेव। इतरपापेषु नरकानुकूलताऽपैत्येव सर्वरहस्यपापेषु ब्रह्महत्यादिषु। प्रकाशेषु मरणान्तिकप्रायश्चित्ते चैवम्। शङ्कराचार्यास्तु 'कामतोऽव्यवहार्यस्तु' इत्यकारप्रश्लेषेणेदं याज्ञवल्क्यवचो 'बहिस्तूभयथापि स्मृतेराचाराच्चेति' सूत्रे "कृतप्रायश्चित्तमप्यारूढपतितादिकं स्पृष्ट्वा चान्द्रायणं कुर्यात्" इति वाक्यार्थमाहुः। तत्सूत्रे वाचस्पतिमिश्रास्तु बालघ्नादिपरमित्याहुः। बालघ्नांश्चेत्यादिस्मृतेः। न सम्पिबेन्न व्यवहरेदिति। तेनाचार्यमतेऽवकीर्णिनैष्ठिकादिभिर्बालघ्नादिभिश्च कृते प्रायश्चित्ते नरकानुकूला शक्तिर्नाश्यते द्विगुणप्रायश्चित्तेन। तदाहाङ्गिराः—विहितं यदकामानां कामात्तत् द्विगुणं भवेत्। इति। महापापे तु कामकृते मरणमेव। तथाच स एव—यः कामतो महापापं नरः कुर्यात्कथञ्चन। न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते—इति।

तथा—प्राणान्तिकन्तु यत्प्रोक्तं प्रायश्चित्तं मनीषिभिः।
तत्कामकारविषयं विज्ञेयं नात्र संशयः इति॥

व्यासः—कामतो ब्राह्मणवधे निष्कृतिर्नास्ति जीविनः।
यस्तु सर्वं परित्यज्य यावज्जीवं चरेद् व्रतम्॥
स विशुद्धश्चरेल्लोकान् विप्रः शुद्ध्येन्न संशयः—इति।

[मिताक्षरापरीक्षणम्] वस्तुतस्तु विज्ञानेश्वरस्यापि न 'कामतो व्यवहार्यस्तु इत्यत्र व्यवहार्य इति पदविभाग एव निर्भरः, किन्तु यथा वचनं व्यवहार्यत्वस्य अव्यवहार्यत्वस्य वा व्यवस्थापन एव निर्भर इति। अन्यथा हि कथं मयूखे—एतच्च यत्राहत्य व्यवहारो निषिद्धस्तत्परम्—इति निरूपितमुपपद्यते। नचेदं शङ्करभगवत्पादादीनामप्यसम्मतम्। तेऽपि हि यत्र प्रायश्चित्ताभाववचनं यत्र वा व्यवहारनिषेधः प्रायश्चित्तानन्तरमपि, तत्रैव खल्वव्यवहार्यत्वं मन्यन्ते। यथा च बहुकालं म्लेच्छादिसंसर्गेऽभ्यस्ते न प्रायश्चित्तमित्यत्रैव 'अत ऊर्ध्वन्तु तत्समः' इति वाक्यस्य तात्पर्यम्, तथा पूर्वमेव विवेचितम्। तथाच व्यवहार्य इति अव्यवहार्य इति वा पदच्छेदे वस्तुगत्या न फलभेदो वर्तत इति न निबन्धकाराणामत्र मतभेदो वर्तते कोऽपि। न हि यत्र स्पष्टं प्रायश्चित्तानन्तरमपि व्यवहारनिषेधकं वचनान्तरं समस्ति, तत्र विज्ञानेश्वरोऽपि व्यवहार्यत्वमभिमन्यत इति कल्पनं सम्भवति। व्यवस्थापितं हि विज्ञानेश्वरेणापि—शरणागतबालस्त्रीति श्लोकविवरणावसरे किमिव वचनं न कुर्यादिति न्यायेन कृतप्रायश्चित्तानामपि बालघ्नादीनामसंव्यवहार्यत्वमिति।

एतेन—कृतप्रायश्चित्तः समुद्रयाय्यपि—व्याख्यातः। 'द्विजस्याब्धौ तु नौयातुः शोधितस्यापि सङ्ग्रहः' इति वचनवशेन बालघ्नादीनामिवास्यापि कृतप्रायश्चित्तस्याप्यव्यवहार्यत्वस्यैव सिद्धेः। अत्र हि सङ्ग्रहपदेन व्यवहार एव विवक्ष्यते; तस्यैव

प्रसक्तत्वात् । एतेन—समुद्रयानमिति ग्रंथे मैसूरसंस्थानपण्डितैर्न-रहरिशास्त्रिभिः 'संग्रहणं नामास्मत्कर्तृकहव्यकव्यादिषु तत्सङ्ग्र-हणम्, न तु तत्कर्तृकहव्यकव्यादिष्वस्मत्सङ्ग्रहणम् । अत एव—समुद्रयायी बन्दी च—इति समुद्रयायिनः श्राद्धनिमन्त्रणानर्हत्व-प्रतिपादनमुपपद्यते ; अन्यथा तद्वचनवैयर्थ्यात् ?—इति वर्णितम्, तत्रेदमेवास्माकं वक्तव्यम्—यत्पुरुषार्थानृतवदननिषेधे सत्यपि दर्शपूर्णमासप्रकरणे नानृतं वदेदिति निषेधान्तरं क्रत्वर्थतया यथा सार्थकम्—दर्शपूर्णमासकालेऽनृतवदने न केवलं नरकम्, किंतु दर्शपूर्णमासफलस्याप्यसिद्धिरिति फलविशेषसत्त्वात्, तथ श्राद्धे निमन्त्रणेन न केवलं स्वतन्त्रानर्थफलमात्रम् , किन्तु श्राद्धफला-सिद्धिरपीत्येवमर्थबोधनेन समुद्रयायी बन्दी चेति पृथक् निषेधस्य सार्थक्येन नोक्तनिषेधवैयर्थ्यानुपपत्त्या सङ्ग्रहपदेन श्राद्धानर्हत्वमात्र-व्यवस्थापनमुपपद्यत इति । तथाच कृतप्रायश्चित्तानां पतितानां समुद्रयायिप्रभृतीनां वा स्वकर्ममात्राधिकारेऽपि नरसङ्ग्रहः सर्वथाऽ-युक्त एव ।

[कृतप्रायश्चित्तसमुद्रायायिकर्तृकश्राद्ध निमन्त्रणोपपरीक्षणम् ।]

यत्तु समुद्रयानमिति ग्रन्थे श्रीनरहरिशास्त्रिभिः—"सन्ध्यास्नानमिति पराशरोक्तवचनघटककर्म-स्वधिकारो युष्मदभिमतरीत्याऽभ्युपगन्तव्य एव, तथा सति तद-न्तर्गतपितृयज्ञरूपमातापितृसांवत्सरीकश्राद्धमप्यनेन कर्तव्यमेव, अन्यथा वक्ष्यमाणदोषापत्तेः । तथाच मरीचिः—पण्डिता ज्ञानिनो मूर्खाः स्त्रियोऽथ ब्रह्मचारिणः । प्रेताहं समतिक्रम्य चाण्डालः को-टिजन्मसु—इति । एतेन—ब्राह्मणसामान्यधर्मबोधकसन्ध्यास्ना-नमिति पराशरवचनघटकपितृयज्ञमनुष्ययज्ञाद्यनुष्ठानासम्भवेय-जनं याजनमित्यादिमुखधर्मस्यासम्भवः कैमुतिकन्यायसिद्धः ।

एवञ्च नित्यकर्माधिकारस्याङ्गीकारे तत्सङ्ग्रहोऽप्यङ्गीकृतप्राय एव। नित्यकर्मानुष्ठानयोग्यताया अप्यनङ्गीकारे भवदभिमतरीत्या तज्ज्ञापकत्वेनाभिमतरीत्या चरितार्थानां प्रायश्चित्तबोधकवचनानां प्रायश्चित्तानुष्ठाने पापाभावप्रतिपादकानां वचनानां च सार्थक्यं साधयितुमशक्यमेव"—इति वर्णितम्, तत्राप्यस्माकमिदमेव वक्तव्यम्—यत्—अथ पतिताः समवसाय धर्मांश्चरेयुरितरेतरयाजका इतरेतराध्यापका मिथो विवहमानाश्च—इति बौधायनधर्मसूत्रानुसारेण तेषां कृतप्रायश्चित्तानां यजनयाजनानुष्ठानस्य परस्परसाहाय्येन सम्पादयितुं शक्यत्वेन तदर्थमन्यैः स्वभावशुद्धैः सङ्ग्रहस्याकलनीयत्वान्न कोऽपि विरोधः समापततीति।। यत्तु पुनस्तत्रैव ग्रन्थे—कामतो व्यवहार्यस्तु इति वचनपर्यालोचनेन कृतप्रायश्चित्तानामपि कामकृतमहापातकानां व्यवहार्यत्वमवश्यमूरीकर्तव्यमिति विवेचितम् तत्र वक्तव्यमनुपदमेव सर्वं विवेचितमिति नात्र पिष्टपेषणार्थं प्रवर्तामहे ।

[कृतप्रायश्चित्तसमुयायि विषये दुर्वृत्तधिक्कृतिमतम्।] अस्मिन् प्रसङ्गे दुर्वृत्तधिक्कृतौ कृतप्रायश्चित्तस्य समुद्रयायिनो व्यवहार्यत्वं मुनाऽव्यवहार्यत्वमित्रेत्तिविकल्प्य यदुपपादितं तस्यापि सङ्ग्रहः समुचित इति तमपि यथावसरं सम्पादयामः। तद्यथा—

"एवं स्थिते उक्तप्रकारेण कृतप्रायश्चित्तस्यापि समुद्रयायिनः संसर्गयोग्यताऽस्ति न वेति विप्रतिपत्तिः। अत्र केचित्—

एनस्विभिरनिर्णिक्तैर्नार्थं कञ्चित्समाचरेत्।
कृतनिर्णेजनांश्चैव न जुगुप्सेत कर्हिचित्॥

इति मनुनाऽकृतप्रायश्चित्तपापिसंसर्गस्यैव निषेधात्, कृतप्रायश्चित्तस्य संसर्गयोग्यताऽऽख्यापनाच्चास्त्येव तस्य संसर्गयो-

ग्यता । "प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत् । कामतो व्यवहार्यस्तु वचनादिह जायते । इति याज्ञवल्क्येन बुद्धिपूर्वकपापे प्रायश्चित्तानुष्ठानस्य व्यवहार्यत्वमेव फलमित्यभिधानाच्च । इदं हि वचनमित्थं व्याख्यातं विज्ञानेश्वरेण—प्रायश्चित्तैर्वक्ष्यमाणै रज्ञानाद्यदेनः कृतं तदपैति गच्छति, न कामतः कृतम्, किन्तु तत्र प्रायश्चित्तविधायकवचनबलादिह लोके व्यवहार्यो जायते—इति । अतः कृतप्रायश्चित्तस्यास्यापि संसर्गयोग्यताऽस्तीति । अत एव माधवीये—तदेवमैहिकव्यवहाराय परलोकाय वा कामकृतानां महापातकानामुपपातकानां चास्त्येव प्रायश्चित्तमिति सिद्धम्—इत्याचक्षते ' इति, तन्न; उत्सर्गापवादन्यायेन सामान्यतः पापमात्रविषयकतया प्रवृत्तयोरुक्तमनुयाज्ञवल्क्यवचनयोः समुद्रयानरूपपापविशेषविषयकेण—द्विजस्याब्धौ तु नौयातुः शोधितस्यापि सङ्ग्रहः—इति कलिवर्ज्यप्रकरणपठितेन कृतप्रायश्चित्तस्यापि संसर्गनिषेधकेन सङ्कोचस्यावश्यकत्वात् । आहवनीये जुहोतीत्यस्य पदे जुहोतीत्यनेनेवोक्तमनुयाज्ञवल्क्यवचनयोरेव 'बालघ्नांश्च कृतघ्नांश्च शरणागतबालस्त्रीहिंसकान्' इति तदीयवचनाभ्यांसङ्कोचवत् । अत्र ह्युक्तं मनुवचनमित्थमवतार्य व्याख्यातं कुल्लूकभट्टेन—अस्यापवादमाह—बालघ्नानिति । याज्ञवल्क्यवचनं च विज्ञानेश्वरेण तथा—जुगुप्सेरन्न चाप्येनमित्यस्यापवादमाह—शरणागतेति—इति । एवञ्चोक्तमाधवीयवाक्यमपि दर्शितापवादवचनविषयमेवेति सर्वैरप्यङ्गीकरणीयम्; अन्यथा तादृशवचनविरोधप्रसङ्गात् । अतः समुद्रयायिनः कृतप्रायश्चित्तस्यापि संसर्गयोग्यता नास्त्येवेति । अत्र शोधितस्यापीत्यपिशब्दो विरोधद्योतकोऽन्यत्र शोधितस्य संग्रहावश्यकत्वेऽपि इह वचनबलात्स नेति गमयति ।

अपि शब्दबलादस्यार्थवादत्वन्तु न शङ्क्यम्, विध्यन्तरसन्निधिविरहात्। किञ्चात्रापिशब्दवशात् शोधितस्यापि संग्रहो न, किमुताशोधितस्येत्येवमशोधितसंग्रहनिषेधस्यार्थवादः स्यादित्येवार्थवादत्वावादिभिर्वक्तव्यम्। तच्च न युक्तम्, तस्य सर्वयुगसाधारण्येन न कलिवर्ज्ये पाठसम्भवः। अत्र तु 'द्विजस्याब्धौ तु' इत्यनेन कलावपि समुद्रयानस्य प्रायश्चित्तसद्भावज्ञापनात्, 'तस्य वै निष्कृति र्नास्ति प्रायश्चित्तशतैरपि' इत्यस्य प्रायश्चित्ताभावप्रतिपादकत्वाङ्गीकारेऽपि न प्रायश्चित्तसामान्याभावप्रतिपाद कत्वसम्भवः, किन्तु संसर्गयोग्यतापादकप्रायश्चित्ताभावपरत्वमेव वाच्यमित्यतोऽपि समुद्रयानस्य प्रायश्चित्तसामान्याभाववादो नोपपन्नः। किञ्च प्रागुक्तदेवलवचने 'समुद्रयातुः स्वीकारः' इत्योक्तपाठस्यैव शुद्धताया वक्ष्यमाणतया समुद्रयाने प्रायश्चित्ताभावशङ्काया एव नावकाश इति बोध्यम्॥

यत्तु—द्विजस्याब्धौ तु नौयातुरित्यादिवचने संग्रहशब्दः 'समुद्रयायी बन्दी च' इत्यादिवचनैकवाक्यतया श्राद्धे निमन्त्रणीयत्वेन संग्रहपरः, न तु सहासनभोजनादिरूपसंसर्गपरः, संसर्गदोषः स्तेनाद्यैरिति कलौ संसर्गदोषस्यैव निषेधादिति केचिद्वदन्ति, तन्न; आसनाच्छयनाद्यानादिति पराशरवचनेन कलावपि संसर्गदोषसद्भावप्रतीतेः। महापातकिसंसर्गस्य महापातकितापादकत्वं हि कलौ नास्ति। पातकि संसर्गस्य पापमात्रापादकत्वन्तु कलावप्यस्त्येव। उक्तं हि—माधवीये उक्तवचनावतारिकायाम्—तादृशसंसर्गदोषस्य पातित्यापादकत्वाभावेऽपि पापमात्रापादकत्वमस्तीत्याह—आसनादिति—इति। संसर्गदोष इति कलिवर्ज्यपाठस्तु महापातकिसंसर्गस्य महापातकत्वं नास्तीत्येवम्परः।

न तु सर्वथा संसर्गदोषाभावपरः। 'सवर्णान्याङ्गनादुष्टैः संसर्गश्शोधितैरपि' इति कलिवर्ज्य एत्र पाठस्य विरुद्धत्वापत्तेः, आसनादिष्युक्तपराशरवचनविरोधापत्तेश्च। स्पष्टमिदं निर्णयसिन्धौ कलिवर्ज्यप्रकरणे। तत्र हि—संसर्गदोषः—तत्संसर्गी च पञ्चमः—इत्युक्तम्। किञ्चिदुपरि च—पतितसंसर्गे दोषसत्त्वे पातित्यं नेत्यर्थः। अन्यथा संसर्गः शोधितैरपीति विरोधापत्तेरित्युक्तम्। एवञ्चैवंविधग्रन्थपूर्वोत्तरसन्दर्भाद्यपरिशीलननिबन्धन एव कलौ सर्वथा संसर्गदोषो नास्तीति केषाञ्चिद्भ्रमः। इत्थञ्च द्विजस्येत्यादिवचने संग्रहशब्दस्यासङ्कोचात् सहासनशयनभोजनादिरूपसर्वविधसंसर्गबोधकत्वमावश्यकम्, शब्दशक्त्यसङ्कोचस्य स्वतः प्राप्तत्वात्। ननु छागपशुन्यायेनोक्तसंग्रहशब्दस्य सामान्यरूपस्य 'समुद्रयायी बन्दी' चेत्यादिमनुवचनोक्तनिमन्त्रणरूपसंग्रहविशेषपरत्वमेवावश्यकम्, यथा—अग्नीषोमीयं पशुमालभेतेति विधिगतपशुशब्दस्य 'छागस्य वपाया मेदसः' इति मन्त्रवर्णगतछागसमर्पितविशेषपर्यवसानं तद्वदिति चेन्न; सामान्यशब्दस्य विशेषाकांक्षयाऽस्पष्टत्वे एवोक्तन्यायप्रवृत्तेः; निषेधस्य निवृत्तिमात्रफलतया विशेषाकांक्षाविरहेण स्पष्टतया तत्रोक्तन्यायप्रवृत्त्यसम्भवात्। "सामान्यविधिरस्पष्टः संह्रियेत विशेषतः। स्पष्टस्य तु विधेर्नान्यैरुपसंहारकल्पना" इति हि न्यायविदः। अन्यथा हि, 'न हिंस्यात्' इति निषेधस्य 'न ब्राह्मणं हन्यात्' इत्यनेनोपसंहारे ब्राह्मणेतरहिंसाया अदोषत्वप्रसक्तिः। अत एव निर्णयसिन्धौ—गोत्रान्मातुः सपिण्डाच्च विवाहो गोवधस्तथा। नराश्वमेधौ मद्यञ्च कलौ वर्ज्यं द्विजातिभिः—इति वचने सामान्येन मद्यनिषेधस्य 'सौत्रामण्यामपि सुराग्रहस्य च संग्रहः' इति वचनेनोपसंहारमाशङ्क्योक्तरीत्यैव समाहितम्। हेमाद्रौ चेदमन्यत्र—

सम्यङ् निरूपितम् । अग्नीषोमीयं पशुमालभेतेत्यत्र पशुशब्दस्य तु विशेषपर्यवसानमन्तरेणानुष्ठानासम्भवात् विशेषाकांक्षायामनुष्ठानार्थप्रकाशनार्थमन्त्रवर्णगतछागशब्दसमर्पितविशेषे पर्यवसानमिति वैषम्यम् । निर्गुणश्रुतेर्हि निषेधरूपत्वेऽपि सगुणश्रुतिविरोधेन गुणसामान्याभावपरत्वासम्भवात् निषेध्यगुणविशेषाकांक्षायां हेयगुणनिषेधश्रुत्योपसंहारो युक्तः । न ह्येवं प्रकृते कलावपि समुद्रयायिसंसर्गविशेषदोषपरत्वबोधकं वाक्यान्तरमस्ति, येनोक्तसामान्यनिषेधस्य विशेषाकांक्षया छागपशुन्यायप्रवृत्तिः स्यात् । अतः सिद्धं द्विजस्येत्यादिवचनगतसङ्ग्रहपदस्य न विशेषे पर्यवसानमिति । किञ्च भवदुदाहृतमनुवचन एव 'एतान् विगर्हिताचारानपाङ्क्तेयान् द्विजाधमान्' इति समुद्रयायिनः सहभोजनानर्हतापि प्रतिपाद्यते । अपि चात्र सङ्ग्रहशब्दस्य निमन्त्रणीयत्वमेव यद्यर्थः स्यात्, तदा तादृशसंसर्गस्य कलिवर्ज्यत्वोक्त्या युगान्तरे ग्राह्यता सिद्ध्येत् । ततश्च सर्वदा वर्ज्यत्वप्रतिपादकोक्तमनुवचनविरोधापत्तिः । नहि मनुवचनमपि कलिमात्रविषयमिति वाच्यम्; असंकोचेन सर्वयुगविषयत्वावश्यम्भावात् । 'कृते तु मानवा धर्मा' इति पराशरवचनेन तस्य कृतयुगविषयताया दुस्त्यजत्वाच्च । तत्सिद्धं समुद्रयायिनः सर्वविधोऽपि संसर्गो हेय इति । अत्र विज्ञानेश्वरीये—संसर्गश्च स्वनिबन्धनकर्मभेदादनेकधा भिद्यते । यथाह बृहस्पतिः—एकशय्यासनं पङ्क्तिभाण्डपक्वान्नमिश्रणम् । याजनाध्यापने योनिस्तथा च सहभोजनम् । नवधाः सङ्करः प्रोक्तो न कर्तव्योऽधमैः सह—इति । देवलोऽपि—संलापस्पर्शनिश्वाससहयानाशनात् । याजनाध्यापनाद्यौनात्पापं संक्रामते नृणाम् । इति । इत्यादिकास्वर्थेन संसर्गस्वरूपमभिहितमवगन्तव्यम् । एवं समुद्रयायिसंसर्गस्य

त्याज्यत्वे सिद्धे तादृशसंसर्गं कुर्वतां विशिष्य प्रायश्चित्तानभिधाना-त्—यत्रोक्तं यत्र वा नोक्तमिह पातकनाशनम्। प्रजापत्येन कृच्छ्रेण शोधयेन्नात्र संशयः। इत्याद्युक्तं कृच्छ्रादिकं संसर्गतारतम्यानुगुण्येन प्रायश्चित्तं बोध्यम्। अत्रायं विवेकः—बोधायनाद्युक्तं त्रैवार्षिकप्रा-यश्चित्तमकृतप्रायश्चित्तसमुद्रयायिसंसर्गे, अनादिष्टप्रायश्चित्तन्तु कृतप्रायश्चित्तसमुद्रयायिसंसर्ग इति। यथा च कलौ पतति कर्म-णेत्यस्य पतितसंसर्गस्य पातित्यानापादकत्वमात्र एव तात्पर्यम्, तथा पूर्वं बहुधा निरूपितम्। कर्तृत्यागो हि नाम तत्सम्भाषणादिपरि-त्याग इति माधवीयेऽपि व्यक्तम्। यत्त्वयं बहिष्कार ऊर्ध्वरेतोविषय इति माधवीयेऽष्टमाध्यायप्राथमिकवचनव्याख्यावसरे निरूपितम्, तदिदं नोपपातकिबहिष्कारसामान्यस्योर्ध्वरेतोविषयत्वपरम्, तादृ-शार्थस्य वचनस्वारस्यविरुद्धतया केनापि तत्प्रतिपादनासम्भवात्। तथाहि—अयं बहिष्कार इत्यत्रेदं शब्देन 'बहिस्तूभयथापि स्मृते-राचाराच्चेति' सूत्रोक्तो बहिष्कार एवोच्यते; तस्यैवाव्यवहितपूर्वो-क्तत्वात्, न तूपपातकिबहिष्कारसामान्यम्; तस्य व्यवहितत्वात्। एवञ्च कृतप्रायश्चित्तोपपातकव्यवहार्यतावचनानां सर्वेषामूर्ध्वरे-तोविषयत्वव्यवस्थापनमपि नावसरतीति सिद्धम्। कृतप्रायश्चि-त्तस्यापि तस्य संसर्गयोग्यताविरहेऽपि नरकनिवृत्त्यादिरूपामुष्मि-कप्रयोजनसत्त्वेन संसर्गरूपैहिकप्रयोजनविरहेऽपि प्रायश्चित्तसार्थ-क्यं सम्भवत्येव, आस्तिकानां तस्यैव मुख्यप्रयोजनत्वात्। पतनी-यप्रायश्चित्तानुष्ठानस्य प्रयोजनत्रितयं विवक्षितम्—इह संव्यव-हारः, द्विजातिकर्मार्हता, नरकनिवृत्तिश्च। तत्र क्वचित्संव्यवहार निषेधेऽपि इतरप्रयोजनद्वितयं निष्प्रत्यूहमेव। अन्यथा हि प्राय-श्चित्तविधिवैफल्यमेव स्यादिति। एवमेव हि शरणागतहन्त्रादि-

विषये प्रायश्चित्तसाफल्यं सर्वैरपि निर्वाह्यम् । एवं प्रायश्चित्तानुष्ठानेन "द्विजातिकर्मभ्यो हानिः पतनम्" इति गौतमोक्तद्विजात्यावश्यकनित्यनैमित्तिककर्मानर्हत्वलक्षणपातित्यनिवृत्त्या तत्प्रयुक्तं व्यवधानादिविध्यप्रवृत्तिरूपमैहिकफलमपि प्रायश्चित्तानुष्ठानस्याहितं । उक्तं हि पराशरेण—युगं युगद्वयं चैव त्रियुगञ्च चतुर्युगम् । चण्डालसूतिकोदक्यापतितानामधःक्रमादिति । अत्राधः क्रमाद्विपरीतक्रमादित्यर्थः । तथा माधवीये कात्यायनवचनम् चण्डालसूतिकोदक्यावाक्यं श्रुत्वा द्विजोत्तमः । भुञ्जीत ग्रासमात्रन्तु दिनमेकमभोजनम्—इति । एवं स्मृतिरत्नाकरे स्मृत्यन्तरवचनम्—चण्डालं पतितं श्वानमुदक्यां सूतिकां तथा । दृष्ट्वा भुक्त्यन्तरे स्नात्वा मानस्तोकेत्यृचं जपेत्—इति । द्विजातिकर्माधिकारोऽपि प्रायश्चित्तानुष्ठानस्य फलमित्युक्तं माधवीये ।

अत्र यद्यपि समुद्रयायिन एव कृतप्रायश्चित्तस्य व्यवहारयोग्यताऽस्ति वा न वेति विचार्यते । एवमपि कामतो व्यवहार्यस्तु—इति वचने व्यवहार्य इति पदच्छेदेऽपि अव्यवहार्यत्ववचनविशेषात् पूर्वोक्तरीत्या यत्राव्यवहार्यत्वं प्रायश्चित्तवचनाभावश्च तत्र कृतप्रायश्चित्तस्याप्यसंव्यवहार्यत्वमिति सिद्धान्तमपि गमयतीति नैतत्संदर्भस्य प्रकृतानानुगुण्यम् । इयान् विशेषः—यत् समुद्रयायिविषये कृतप्रायश्चित्तस्याप्यव्यवहार्यत्वमुक्तम्, पतितानान्तु वस्तुतस्तु न व्यवहारापादकप्रायश्चित्तश्रवणमिति । यथा च पतितानामपि न सम्प्रयोगः कृतप्रायश्चित्तानामपि, तथा बौधायनधर्मसूत्रव्याख्यानोपष्टम्भेन पूर्वमेव विवेचितमिति न कोऽपि विशेषः ।

[कृतप्रायश्चित्तस्य समुद्रयायिनो लघुव्यवहार्यत्वम्]

अत्र प्रसङ्गे इदमपि सूच्यते यत् दुर्वृत्तधिक्कृतिकारैः संव्यवहारसिद्धावपि पारलौकिकप्रयोजनस्य गुरुत्वस्यासम्भवोऽपि दूषणायैव भव-

तीति पतितसंसर्गो न युक्त इति यद्विविच्यते ; तदिदमपि कृतप्रायश्चित्तैरपि पतितैर्यौनादिसम्बन्धो न युक्त इत्यभिप्रायमेव। यौनादिसम्बन्धो हि न केवलमैहिकप्रयोजनो भोजनादिवत्, किन्त्वामुष्मिकप्रयोजनकोऽपीति तु सर्वसम्मतमिदम्। तथाच व्यवहार्यत्वपदेनापि संलापसहासनाशनयानादिलघुतरसंसर्गयोग्यतैव विवक्ष्यते, न तु गुरुतरविवाहयजनयाजनादिसम्बन्धोऽपि। विवेचितम् चैतत् शूलपाणिनापि प्रायश्चित्तविवेके। अकृतप्रायश्चित्तपतितसंसर्गेण ह्यकृतप्रायश्चित्तस्य न केवलमैहिकव्यवहारप्रतिबन्धमात्रम्, किन्तु नरकसम्बन्धोऽपि भवतीत्यवश्यमुपगन्तव्यम् ; संकोचे प्रमाणाभावात्। तथाच कृतप्रायश्चित्तानामैहिकव्यवहारयोग्यानामपि नरकसम्बन्धस्य नियतत्वे तत्संसर्गिणामपि नरकसम्बन्धोऽवश्यं भवेदेव। तथाच नरकसम्बन्धवारणार्थमवश्यमेव कृतप्रायश्चित्तपतितादिसंसर्गोऽपि वर्जनीय एव। तत्रेमं विवेकं वयमत्र पश्यामः—यदैहिकव्यवहारेणाकृतप्रायश्चित्तपतितसंसर्गिणामैहिकव्यवहारप्रतिबन्धः, विवाहादिव्यवहारेणामुष्मिकदुःखविशेषप्राप्तिरिति। अयमत्र निष्कर्षः—सहासनादिभिः शरीरमात्राशुद्धिः, विवाहादिना त्वात्मनोऽप्यशुद्धिः। तद्यदि प्रायश्चित्तमनुष्ठीयते, तर्हि शरीराशुद्धिमात्रनिरासेन सहाशनादिलघुतरव्यवहारयोग्यतामात्रं लभते, न तु विवाहादिगुरुतरव्यवहारयोग्यताम्। व्यवहारपदस्यापि सामान्यतः क्रयविक्रयादिसम्बन्ध एवेत्यर्थ इति म० म० शिवकुमारपण्डितमहोदयैः कालीघट्टसभायामुपपादितन्तु यदि पर्यालोच्यते, तदा तु न कोऽपि विरोधः।

समुद्रयानविषये चापरेऽपि विषया यदि संग्रहणीया तर्हि, वयं पश्यामः—सत्तरणतरणिसंग्रहणेनैव पर्याप्तमिति। तद्यथा:—

[पण्डितरत्न-क-र-ङ्काचार्याणां मतम्]

तत्र विप्रतिपत्तिः। किमुदाहृतानि समुद्रयाननिषेधपराणि वचनानि कृत्स्नमेव द्विजानां समुद्रयानं गोचयन्ति, अहोस्वित् विशेषणविशेषितमेव समुद्रयानमिति ? किं तावत् युक्तम् ? कृत्स्नमेवेति। कुतः विशेषाश्रुतेः। न खल्वेतेषु वचनेषु क्वापि समुद्रयानमिसत्थंभूतमिति केनचिद्विशेषणेन विशेष्यमाणं शृणुमः। अश्रूयमाणोपि च विशेषः स्वमनीषिकयैवेष्यमाणस्सर्वेष्वेव विधिषु निषेधेषु च दुर्वारमनवस्थादौस्थ्यमुन्मेषयेत्। अथ चेन्मनुषे अश्रुतमपि विशेषं तर्कमवष्टभ्योन्नेष्यामः। तदाहुः—

"आर्षं धर्मोपदेशञ्च वेदशास्त्रविरोधिना।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ॥ इति ॥
"धर्मे प्रमीयमाणे तु वेदेन करणात्मना।
इतिकर्तव्यताभागं मीमांसा पूरयिष्यति ॥ इति च ॥

तथाहि—अस्ति तावद्देवलवचनम्—

मासं कारागृहे वासो नौभिर्यात्रा दिनत्रयम्।
म्लेच्छावासे तथा पक्षं यो वसेत् स तु पातकी ॥" इति॥

तत्र च दिनत्रयमित्यत्यन्तसंयोगविहितद्वितीययावगते दिनत्रयव्यापकनौकरणयाने मन्त्रादिवचनेषु निषिद्धतयोपात्तस्य समुद्रयानस्य पर्यवसानं न्याय्यम्; षष्ठान्तिमन्यायात्। तत्र हि 'पशुमालभेत इति विधिगतपशुशब्दस्य 'छागस्य वपायाः' इति मन्त्रवर्णावगते छागरूपे विशेषे पर्यवसानं राद्धान्तितम्। अत एव समुद्रयायीत्यस्य समुद्रे नावा द्वीपान्तरगन्ता इति कुल्लूकभट्टादीनां व्याख्यानं सङ्गच्छते; विशेषपर्यवसानं विना याने नौकरणकत्वालाभादिति, नैतद्युक्तम्; पशुत्वछागत्वयोरिव समुद्रयानत्वदिनत्रयव्यापकनौयानत्वयोः व्याप्यव्यापकभावापरपर्यायसामान्यविशेषभा-

वाभावेन षष्ठान्तिमन्यायाप्रसरात्। किञ्च सामान्यशब्दस्य विशेषाकांक्षया अस्पष्टत्व एवोक्तन्यायप्रवृत्तिः। विधिगतशब्दस्य च विशेषपर्यवसानमन्तरेणानुष्ठानासम्भवात् युक्तम् विशेषे पर्यवसानम्। निषेधस्य च निवृत्तिमात्रफलकतयाऽनुष्ठानाय विशेषाकांक्षाविरहेण स्पष्टतया न तत्रोक्तन्यायप्रवृत्तिसम्भवः। तदुक्तं न्यायविद्भिः—
"सामान्यविधिरस्पष्टः संह्रियेत विशेषतः। स्पष्टस्य तु विधेर्नैवमुपसंहार इष्यते॥ इति। स्पष्टं चेदं हेमाद्रिनिर्णयसिन्ध्वादिषु। निर्गुणश्रुतेः निषेधरूपत्वेऽपि सगुणश्रुतिविरोधेन गुणसामान्याभावस्यासम्भवात्। निषेध्यगुणविशेकांक्षायां हेयगुणनिषेधश्रुत्या उपसंहारव्यवस्थापनं वयन्तनिष्णातानां युक्तमेवेत्यन्यत्र विस्तरः॥
एतेन उक्तधर्मयोः व्याप्यव्यापकभावाभावेन छागन्यायप्रवृत्तावपि चतुर्धाकरणन्यायप्रवृत्त्यसम्भवात् 'आग्नेयं चतुर्धा करोति, पुरोडाशं चतुर्धा करोति" इत्यनयोः परस्परोपसंहारवत् समुद्रयाननिषेधवचनानां दिनत्रयनौयाननिषेधवचसश्च परस्परमुपसंहार आवश्यक इति न कृत्स्नस्य निषेधगोचरतेति परास्तम्; सामान्यविधिरस्पष्टः इत्यादौ ह्युक्तरीत्या निषेधस्थले चतुर्धाकरणन्यायाप्रवृत्तेः। किञ्च विकल्पापत्त्यादिरूपस्य तन्न्यायप्रवृत्तिनिमित्तस्य अभावादपि न तन्न्याप्रवृत्तिसम्भवः। तदुक्तं चतुर्धाकरणाधिकरणे कौस्तुभे—
"एतादृशोपसंहारे च बीजं विकल्पानापत्तिः, शक्यतावच्छेदकानवच्छिन्नपदार्थलक्षणापत्तिश्च, अन्यथा हि उपसंहारानङ्गीकारे शाखान्तरीयत्वेपि विकल्पापत्तिः। आग्नेयपदस्यैव पुरोडाशमात्रपरत्वेन लक्षणया उपसंहाराङ्गीकारे तु आग्नेयपदेन शक्यतावच्छेदकानवच्छिन्नाग्निषोमीयादिलक्षणापत्तिः" इत्यादिना। अत एव 'द्विजस्याब्धौ' इति वचने संग्रहशब्दः "समुद्रयायी बन्दी च"

इत्यारभ्य "एतान् विगर्हिताचारान् अपाङ्क्तेयान् द्विजाधमान्। द्विजातिप्रवरो विद्वान् उभयत्र विवर्जयेत्॥" इति मनुनोपसंहारात् निमन्त्रणीयत्वेन सङ्ग्रहपरः। 'संसर्गदोष स्तेनाद्यैः' इति कलौ संसर्गदोषस्यैव निषेधात्, छाग पशुन्यायाच्च इत्यपि—परास्तम्; 'आसनाच्छयनाद्यानात्' इति पराशरवचनेन कलावपि संसर्गदोषसद्भावप्रत्यायनात्, अवतारितं चैतन्माधवीये, "तादृशसंसर्गस्य पातित्यापादकत्वाभावेपि पापमात्रापादकत्वमस्तीत्याह—आसनादिति" इति। उक्तकलिवर्ज्यवचनं तु महापातकिसंसर्गस्य महापातकित्वापादकत्वं नेत्यर्थपरम्, अतो न विरोधः। एवं कालविशेषानिर्देशेन "कृते तु मानवा धर्माः" इति वचनेन च युगान्तरसाधारणतयामनुवचनस्य कलिवर्ज्यप्रकरणवचनेनोपसंहारकल्पनमत्यन्तमुपपन्नमिति सुधियो विदांकुर्वन्तु। तदेवं सामान्यतः समुद्रयाननिषेधे सिद्धे यत्तत्र तत्र प्राचीनानामर्वाचीनानां च समुद्रयानलिङ्गमुपलभ्यते तद्धर्मव्यतिक्रमरूपताश्रयणेनैव समाधेयम्। स्मरति च भगवानापस्तम्बः "दृष्टो धर्मव्यतिक्रमस्साहसं च पूर्वेषाम्" इति।

इति प्राप्तेऽभिधीयते—न युक्तं कृत्स्नमेव समुद्रयानं निषेधगोचर इति वक्तुम्। कुतः? श्रौतलिङ्गादिविरोधात्, तथाहि ऋग्वेदे तावदाश्विने सूक्ते उपादेयचरितानामेव समुद्रयानादिकमित्थमाम्नायते। "तुग्रो ह भुज्युमश्विनोदमेधे रयिन्न कश्चिन्ममृवां अवाहः। तमूहथुः नौभिरात्मन्वतीभिः। अन्तरिक्षप्रुद्भिरपोदकाभिः। तिस्रः क्षपाः त्रिरहातिव्रजद्भिः। नासत्या भुज्युमूहथुः पतङ्गैः। समुद्रस्य धन्वन्नार्द्रस्य पारे। त्रिभी रथैश्शतपद्भिष्षडश्वैः। अनारम्भणे तदवीरयेथामनास्थाने अग्रभणे समुद्रे यदश्विना। ऊहथुर्भुज्युमस्तं शतारित्रां नावमातस्थिवांसम्॥" इति॥ एतस्य च

भ्युचरस्य इत्थं सायणभाष्यम्।"तुग्रो नामाश्विनोः प्रियः कश्चिद्राज-र्षिः स च द्वीपान्तरवर्तिभिः शत्रुभिरत्यन्तमुपद्रुतः तज्जयाय स्वपुत्रं भुज्युं सेनया सह नावा प्राहैषोत्। सा च नौमध्येसमुद्रमतिदूरं गता, वायुवशेन भिन्नाऽऽसीत्। तदानीं स भुज्युः शीघ्रमश्विनौ तुष्टाव। तौ च स्तुतौ सेनया सहितमात्मीयासु नौष्वारोप्य पितु-स्तुग्रस्य समीपं त्रिभिरहोरात्रैः प्रापयामासतुः। अयमर्थः इदमादि-तृचेन प्रतिपाद्यते, हिशब्दः प्रसिद्धौ। तुग्रः खलु पूर्वं शत्रुभिः पीडितस्सन् तज्जयार्थमुदमेघे उदकैर्मिह्यते सिच्यते इत्युदमेघ-स्समुद्रः। तस्मिन् भुज्युं एनत्संज्ञं इमं पुत्रमवाहनावा गन्तुं पर्यत्या-चीत्। तत्र दृष्टान्तःममृवान् म्रियमाणःसन् धनलोभी कश्चित् मनुष्यः रयिं न यथा धनं परित्यजति तद्वत्। हे अश्विनौ तं च भुज्युं मध्ये समुद्रं निमग्नंनौभिः पितृसमीपं ऊहथुः युवां प्रापितवन्तौ कीदृशीभिः आत्मन्वतीभिः आत्मीयाभिर्युवयोस्स्वभूताभिरित्यर्थः। यद्वा धृतिरात्मा धारणवतीभिरित्यर्थः। अन्तरिक्षप्रुद्भिः अतिस्व-च्छत्वात् अन्तरिक्षे जलस्योपरिष्टादेव गन्त्रीभिरपोदकाभिस्सुश्लिष्ट-त्वात् अपगतोदकाभिरप्रविष्टोदकाभिरित्यर्थः॥ हे नासत्या नासत्यौ सेनया सहोदके निमग्नं भुज्युं तिस्रः क्षपाः त्रिसंख्याकारात्रीस्त्रिरहा त्रिवारमावृत्तान्यहानि चातिव्रजद्भिः अतिक्रम्य गच्छद्भिरेताव-न्तं कालमभ्यावर्तमानं पतंगैः पतद्भिः त्रिभिस्त्रिसंख्याकै रथैरूहथुः युवामूढवन्तौ। क्वेति चेदुच्यते। समुद्रस्याम्बुराशेर्मध्ये धन्वन्धन्व-नि जलवर्जितप्रदेशे आर्द्रस्य उदकेनार्द्रीभूतस्य समुद्रस्य पारे तीर-देशे च। कथं भूतैः रथैः?शतपद्भिः शतसंख्याकैश्चक्रलक्षणैः पादैरु-पेतैष्षडश्वैः षड्भिरश्वैर्युक्तैः॥२॥ हे अश्विना अश्विनौ अनारम्भणे आलम्बनरहिते समुद्रे तत्कर्म अवीरयेथां विक्रान्तं कृतवन्तौ युवाम्।

अनारम्भणमेव स्पष्टीकरोति । अनास्थाने आस्थीयतेऽस्मिन्निति आस्थानो भूप्रदेशः, तद्रहिते स्थातुमशक्ये जल इत्यर्थः । अग्रभणे अग्रहणे हस्तेन ग्राह्यं शाखादिकमपि यत्र नास्ति तस्मिन्नित्यर्थः । किं पुनस्तत्कर्म ? भुज्युं समुद्रे मग्नं शतारित्रां बहुरित्रां यैः काष्ठैः पार्श्वतो बद्धैः जलालोडने सति नौःशीघ्रं गच्छति, तान्यरित्राणि ईदृशीं नावं आतस्थिवांसं आस्थितवन्तं आरूढवन्तं कृत्वा आस्तं गृहनामैतत् । पितुस्तुग्रस्य गृहं प्रति यदूहथुः तत्प्रापणमन्यैर्दुशकं यु वां समुद्रमध्ये कृतवन्तावित्यर्थः ॥२ ॥ इति । यद्यपि 'तुग्रोह' इत्यादिऋग्द्वितयं तैत्तरीयारण्यकेऽप्याम्नायते । तत्र च ईदृशेतिहासानुसारेण भट्टभास्करमिश्रेण माधवाचार्येण वा न व्याख्यायि ; तथापि प्रकृतस्य तृचस्य साम्प्रदायिकमुक्तेतिहासपरत्वं नानुपपन्नम् ॥

यदाहुरत्र केचित् । अश्विनीकुमारतदभिध्यातृभुज्य्वादिमाहात्म्याभ्युच्चयैकप्रतिपादनपरतया अश्विपरतया अर्थवादरूपत्वात् एतस्य तृचस्य स्वार्थतात्पर्यमिति । तदसत्; तात्पर्यभावेऽपि तृचस्यास्य नस्तोत्ररूपत्वानुपपत्तेः । प्रगीतमंत्रसाध्यगुणिनिष्ठगुणाधानं स्तोत्रपदार्थः । किंच ऋचामासां मंत्रकोटिप्रविष्टतया अर्थवादत्वं नोपपद्यते । अर्थवादो हि ब्राह्मणकोटिनिविष्टः "ब्राह्मणशेषोऽर्थवादः" इत्यापस्तम्बपरिभाषणात् । ब्राह्मणं च मन्त्रातिरिक्तं "तच्चोदकेषु मंत्राख्या । शेषे ब्राह्मणशब्दः" इति जैमिनिनासूत्रणात् । अस्तुवा कथंचिदर्थवादत्वम् । नैतावतैव स्वार्थे इतिहासे तात्पर्याभावो वक्तुं युक्तः । अर्थवादेष्वपि अवयवार्थानतिक्रमेणैव अजहत्स्वार्थलक्षणया प्राशस्त्यपरत्वमिति वार्तिककारसिद्धान्तात् । अत एव "स आत्मनोवपामदखिदत्" ॥

इत्यत्रापि परमेश्वर एव सर्गादौ स्वमहिम्ना पशुरूपमन्यदेकं स्वीकृत्य वपोत्कर्तनेन कर्म प्रायुङ्क्तेति तदर्थपरत्वमुररीकृतम्, एवं जात्य-

धिकरण सारूप्याधिकरण मंत्राधिकरण यववराहाधिकरणातद्व्यपदे- शाधिकरणप्रभृतिषु बहुष्वधिकरणेषु अर्थवादानां मंत्राणां च सदर्थ- परतामाश्रित्यैव मीमांसकैस्सिद्धान्ताः प्रवर्तिताः। माधवस्मृतिच- न्द्रिकाकारादिभिर्निबन्धनकारैरपि मन्त्रार्थवादादिलिङ्गाश्रयणेनैव विधिनिषेधशास्त्राणां विषया व्यवस्थापिताः इत्यग्रे व्यक्तीकरिष्यते। किं बहुना ? उक्तस्यैव तृचस्य आख्याधिकारूपत्वं कराठरवेणैव स्फुटीकृतं राणके राणकोज्जीविन्यां च "शेषे ब्राह्मणशब्दः" इत्य- स्मिन्नधिकरणे—इति, सर्वथा अयुक्तमिदमुदाहृतस्य तृचस्य न स्वार्थे तात्पर्यमिति। तथा वसिष्ठस्यार्षे वारुणे सूक्तेपीत्थमाम्ना- यते। "आयद्रुहाव वरुणश्च नावं प्रयत्समुद्रमीरयाव मध्यं। अधि यदपांस्नुभिश्चराव प्रप्रेंखजिं खयावहै शुभेकम्।

वसिष्ठं ह वरुणो नाव्याधादृषिं चकार स्वपामहोभिः। स्तोतारं- विप्रस्सुदिनत्वे अह्नां यान्नुद्यावोततसन्यादुहनः॥"

अत्रेत्थंभाष्यम्—"यत् यदा वरुणे प्रसन्ने सति अहं वरुणश्च उभौ नावं द्रुममयीं तरणसाधनभूतां आरुहाव, उभावारूढौ बभू- विव, तां च नावं यत् यदा समुद्रमध्यं समुद्रस्य प्रति प्रेरयावः प्रक- र्षेण गमयाव। यद्यदा अपामुदकानां अध्युपरि स्नुभिः स्वर्गस्त्रीभिः अन्याभिरपि नौभिश्चराव वर्तावहै तदानीं शुभे, शोभार्थं प्रेंखे नौ- रूपायां दोलायामेव प्रेंखावहै निम्नोन्नतैस्तरंगैरितश्चेतश्च संक्रीडावहै। कमितिपूरकः। यद्वा क्रियाविशेषणं कं सुखं यथा भवति तथेत्यर्थः॥

एवं वसिष्ठेनात्मोक्ते यद्वरुणेन कृतं तद्दर्शयति—वसिष्ठंह व- सिष्ठं खलु वरुणो नावि स्वकीयायामाधात् आरोहयत्। तथा तमृ- षिमपोभी रध्वर्यौः संशोभनकर्माणं चकार वरुणः कृतवान्, अपि च

विप्रो मेधावी वरुणोन्हां दिवसानां मध्ये सुदिनत्वे यत्फलत्वेन शोभनदिनत्वं तत्र स्तोतारमवस्थापयत् इति शेषः। किं कुर्वन् ? यत् यतो गच्छतो द्यावो दिवसान् यात् यातीरुषासः उषसोपालक्षिता रात्रिश्च सूक्षिप्रं ततसन् सूर्यात्मना विस्तारयन्निति। इत्थमेव च इतिहासेषु पुराणेषु च स्मर्यते। समुद्रयानाविनाभूतं समुद्रमध्यगतद्वीपविजयादिकं तत्र त्रेतायुगप्रभवानां रघुमहाराजादीनां अशेषमहीमण्डलगोचरो विजयस्संप्रतिपन्नतर एव सर्वेषाम्। द्वापरे च धार्मिकाग्रेसराणां अर्जुनभीमसेनादिपाण्डुनन्दनानाम्। उक्तं च राजसूयपर्वणि। "ताम्रलिप्तं च राजानं खर्वटाधिपतिं तथा। सिंहानामधिपंचैव ये च सागरवासिनः।

सर्वान् म्लेच्छगणांश्चैव विजिग्ये भरतर्षभः।
एवं बहुविधान् देशान् विजिग्ये पवनात्मजः॥
वसु तेभ्य उपादाय लौहित्यमगमद् बली।
स सर्वान् म्लेच्छनृपतीन् सागरानूपवासिनः॥
करमाहारयामास रत्नानि विविधानि च।
दिशं धनपतेरिष्टामजयत्पाकशासनिः॥
भीमसेनस्तदा प्राचीं सहदेवस्तु दक्षिणाम्।
प्रतीचीं नकुलो राजा दिशं व्यजयतास्त्रवित्॥
स तेन सहितो राजन् सव्यसाची परंतपः।
विजिग्ये शाकलं द्वीपं प्रतिविंध्यं च पार्थिवम्॥
शाकलद्वीपवासाश्च सप्तद्वीपेषु ये नृपाः।
अर्जुनस्य च सैन्यैस्तैः विग्रहस्तुमुलोऽभवत्॥
स किरातैश्च चीनैश्च वृतःप्राग्ज्योतिषोऽभवत्।
अन्यैश्च बहुभिर्योधैस्सागरानूपवासिभिः।

वशे चक्रे महातेजा दंडकांश्च महाबलः।
सागरद्वीपवासांश्च नृपतीन्म्लेच्छयोनिजान् ॥
निषादान् पुरुषादांश्च कर्णप्रावरणानपि।
ये च कालमुखा नाम नरराक्षसयोनयः।
कृत्स्नं कोलगिरिं चैव सुरभीपट्टणं तथा ॥
द्वीपं ताम्राह्वयं चैव पर्वतं रोमकं तथा।
रामठान् हारहूणांश्च प्रतीच्याश्चैव ये नृपाः।
तान् सर्वान् स वशे चक्रे शासनादेव पाण्डवः ॥
ततस्सागरकुक्षिस्थान् म्लेच्छान् परमदारुणान्।
पल्लुवान् पर्वरांश्चैव किरातान्यावनान् शकान्" इति ॥

यत्तु "राजा राजसूयेन स्वाराज्यकामो यजेत" इति विधिविहितमहाफलराजसूयाध्वरनिष्पत्तिनान्तरीयकतया पाण्डवकृतसिन्धुयानस्य न निषेधविषयतासम्भव इति,

तदपि न सत्; विहितक्रियानिष्पत्तिनान्तरीयकतामात्रेण निषेधगोचरत्वापहारासम्भवात्। अभ्युपगम्यते हि निषिद्धैरेव सोमविक्रयशामित्रादिभिः ज्योतिष्टोमपश्वादिसिद्धिः। अङ्गीक्रियते च सांख्यैः नित्ययाऽपि चोदनया साक्षादेव विषयीकृतस्य पश्वालम्भादेः 'न हिंस्यात्' इत्यादिनिषेधविषयता। तदेवं सति काम्यचोदनागोचरनिष्पत्तिनांतरीयकतामात्रेण निषेधविषत्वापहारासंभवः किंपुनर्न्यायसिद्ध इति ॥

एवं कलियुगोदितस्यापि शाकनृपतेः श्रीमतो विक्रमादित्यस्य सिन्धुयानमितिहासतः प्रतीमः। यथोक्तं ज्योतिर्विदाभरणे—

"यस्याष्टादशयोजनानि कटके पादातिकोटित्रयम्।
वाहानामयुतायुतं च नवतेस्त्रिघ्नाकृतिर्हस्तिनाम् ॥

नौकालक्षचतुष्टयं विजयिनो यस्य प्रमाणेऽभवत्।
सोयं विक्रमभूपतिर्विजयते नानाधरित्रीधरः॥
यो रूपदेशाधिपतिं शकेश्वरं जित्वा गृहीत्वोज्जयिनीसमाहवे।
आनीय संभ्राम्य मुमोच यस्त्वहो स विक्रमार्कस्समसह्यविक्रमः॥

तथावत्सराजामात्यो बाभ्रव्यो यौगंधरायणोनावा समुद्रयानमतनोत्। श्रीमन्नामा सिंहलद्वीपवासमकरोत्, इत्यतिरोहितं रत्नावल्यादिविदाम्। मिहिरकुलराजोपि सिंहलद्वीपं जगामेति निरूपितं राजतरङ्गिण्याम्। 'भगवांश्च वासुदेवः' सहैव चातुर्वर्ण्येन अर्णवमध्यं द्वारकानगरमध्युवासेति पुराणेषूपदिश्यते। अधुनापि च भूयांसस्त्रैवर्णिकाः द्वारकायात्रां सेतुयात्रां चानुतिष्ठन्तः प्रत्यक्षमनुभूयन्ते विप्रतिपन्नाः। यत्तु यात्राविधिनैव तदौपयिकसमुद्रयानस्य निषेधाविषयत्वकल्पनं तत्प्रागेव निरस्तम्; निषिद्धैरपि विहितनिष्पादनस्य प्रदर्शितत्वात्। यद्यपि निषेधशास्त्रं रागप्राप्तप्रतियोगिनमादायैव चरितार्थं विध्यन्यथानुपपत्तिसिद्धमर्थं न गोचरयेत्। तथापि भुज्युवसिष्ठादिकृतं रागप्राप्तमेवेति तस्य तद्गोचरता दुर्निवारैव। तस्मादुपदर्शितलिङ्गादिभिर्बहुभिर्विरोधप्रसंगात् न कृत्स्नं समुद्रयानं निषेधगोचर इति साधीयः। अथ "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्" इत्यस्मिन्नधिकरणे लिङ्गापेक्षया निरपेक्षस्वरूपायाः श्रुतेः प्राबल्यस्य व्यवस्थापनात्, दुर्बललिङ्गविरोधो न दोषायेति चेत्, मैवम्; लिङ्गस्यापि वैदिकस्य स्मृत्यनुमेयश्रुत्यपेक्षया प्राबल्यस्य न्यायवित्संमतत्वात्। तदुक्तं भट्टपादैः श्रुतिलिङ्गाधिकरण एव—

"यत्र पुनश्श्रुतिरानुमानिकी लिंगं च प्रत्यक्षम्, तत्र कथम्? यथा स्मृतिवैदिकलिङ्गविरोधे तत्र स्मृतेःमूलान्तरमपि सम्भाव्यते, न तु

लिङ्गस्येति तदेव बलवदित्यनुसर्तव्यम् । दुर्बलस्य प्रमाणस्य बलवानाश्रयो यदा । तदा विपरीतत्वं शिष्टाकोपे यथोदितम् । अत्यन्तबलवन्तोपि पौरजानपदा जनाः । दुर्बलैरपि बाध्यन्ते पुरुषैः पार्थिवाश्रितैः ॥ इति ॥

राणके चायमर्थो निपुणतरमुपपादितस्तत एवावगन्तव्यः । अत एव—

मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च ।
समानप्रवरां चैव द्विजश्चान्द्रायणं चरेत् ॥ इति ॥

शातातपादिवचने मातुलस्येत्यस्य गान्धर्वविवाहेन उढोया मातृतद्भ्रातृपरतया सङ्कोचः श्रौतलिङ्गमाश्रित्यैव कल्पितः । सा च श्रुतिः तद्भाष्यं चेत्थम् । आयाहीन्द्रपथिभिरीलितेभिर्यज्ञमिमन्नोभागधेयं जुषस्व तृप्तां जहुर्मातुलस्येव योषाभागस्ते पैतृष्वसेयो वपामिव । इन्द्र पथिभिरीलितेभिःस्तुतैः सह नास्माकं इमं यज्ञमायाहि । आगत्यास्माभिर्दीयमानं भागधेयं जुषस्व तृप्तामाज्यादिना संस्कृतां वपां त्वामुद्दिश्य जहुःत्यक्तवन्तः । अत्र दृष्टान्तद्वयम् । यथा मातुलस्य योषा दुहिता दौहित्रभागः भागिनेयः भागिनेयेन परिणेतुं योग्येत्यर्थः यथा च पैतृष्वसेयी पौत्रस्य भागः तथा आयस्ते भागो वपाख्यः । इति । तथा अनंतदेवेनापि संस्कारकौस्तुभे ऐतरेयब्राह्मणगतविश्वामित्रशुनश्शेफेतिहासमालम्ब्य उपनीतदत्तनिषेधवचनानामन्यपरत्वं न्यरूपि ।

तथैव चेदृशा बलवत्सिद्धान्ता न्यायवित्सम्मता विस्तरभयान्नेह प्रपंच्यन्ते ॥ नन्वेवं सति "प्रजापति वै स्वां दुहितरमभ्यध्यायत्" इति श्रौतलिंगेन निषेधान्तराणां संकोचप्रसंग इति चेत्, मैवम्; तच्छ्रुतेरन्यार्थपरतायाः वार्तिक एवशिष्टाकोपनये प्रदर्शितत्वात् ।

यथाश्रुतार्थोपगमेऽपि प्रजापतेर्मनुष्याधिकारशास्त्राविषयतया विरोधपरिहारस्य तत्रैव वार्तिके पुराणेष्वपि च दर्शनाच्च। तत्र हि तेन लिंगेन संकोचः तान्त्रिकाणां संमतः, यत्र लिंगावगम्येऽर्थे प्रातस्विकरूपेण प्रतिनियतधर्मत्वमधर्मत्वमेव वा शब्दतोऽर्थतोवानावगम्यते। अत एव द्रौपदीविवाहादिलिङ्गेन नैकपतिकत्वादिस्मृतिसंकोचः; तद्विवाहे प्रतिनियतधर्मतायाः महाभारत एव व्यक्तत्वात्। तथा धर्मराजकृतानृतवदनलिङ्गेन नानृतवदननिषेधस्य संकोचः। अनृतवदनजनितैनोनिबर्हणाय प्रायश्चित्तानुष्ठानस्य धर्मराजकृतस्य महाभारत एव प्रतिपादिततयाऽधर्मत्वावगमात्॥ तस्मादिह श्रौतलिङ्गादिविरोधपरिहाराय समुद्रयाने निषिध्यमाने कश्चन विशेष एष्टव्यः। येन भुज्युवसिष्ठपांडवविक्रमादित्यादयो धर्मपथप्रवर्तका न प्रत्यवेयुः। स चायं विशेषः ताच्छील्यं वा आभीक्ष्ण्यं वा मानववचनगतसमुद्रयायिपदे विद्यमानेन णिनिप्रत्ययेन शब्दमर्यादयैव लभ्यते इति न तत्कल्पनाप्रयुक्तमपि गौरवम्। तथाहि— प्रकृते णिनिप्रत्ययप्रापकमनुशासनद्वयमेव दृश्यते। तत्रैकं "सुप्यजातौ णिनिस्ताच्छील्ये" इति। अजातौ सुप्युपपदे ताच्छील्येऽर्थे णिनिस्स्यादिति तदर्थः। यत्तु क्षीरादिभेदभिन्नव्यक्तिवाचिनस्समुद्रस्य जातिशब्दतया न तस्मिन्नुपपदे ताच्छील्ये णिनिप्रत्ययसम्भव इति, तन्न; समुद्रशब्दस्य अनेकव्यक्तिवाचित्वेऽपि शाब्दिकाभिमतजातिवाचित्वासंभवात्, क्षीरत्वादिना संकरेण समुद्रत्वस्य जातित्वासंभवाच्च। अस्ति हि क्षीरत्वं विहाय समुद्रत्वं लवणसमुद्रादौ समुद्रत्वं विहाय क्षीरत्वं गव्यक्षीरादौ, उभयोस्समावेशश्च क्षीरसमुद्रे इति; अन्यथा साधुत्व ब्रह्मत्वयोरपि जातिरूपतासंभवेन 'साधुकारिण्युपसंख्यानम्' 'ब्रह्मणि वदः' इत्यनयो-

वार्तिकयोः अताच्छील्यार्थमारम्भ इत्युक्तिः शाब्दिकानां विरुध्येत ॥

यदपि करणे यज इत्यपवादकाधिकारादानन्तर्यात्तदन्तर्वर्तियज-धातोरुपादानस्य धात्वन्तरोपलक्षकत्वे तत एव प्रकृते णिनिप्रत्ययविधाने सति सूत्रस्यास्य ताच्छील्यार्थतया तद्गोचरप्रत्ययव्यवस्थानभेदस्याग्रहणार्हत्वादिति,

तदप्यसत्; करणे यज इत्यत्र यजधातोः धात्वन्तरोपलक्षकतायाः भाष्याद्यनारूढतयाऽश्रद्धेयत्वात्। अभ्युपगमेपि अधिकरणतया समुद्रस्य तद्वाचिन्युपपदे तेन णिनेरसम्भव एव। करणे इत्यस्यापि कारकान्तरोपलक्षकत्वमिति 'तु ब्रह्मणिवदः' इत्यादिवार्तिकानारम्भप्रसंगपराहतमिति दिक् ॥

द्वितीयं च बहुलमाभीक्ष्ण्ये-इति धातोराभीक्ष्ण्येऽर्थे णिनिर्भवति बहुलमिति च तदर्थः। न च बहुलग्रहणात् अर्थविशेषाविवक्षायामपि णिनिस्संभवतीति वाच्यम्; संभवेऽपि उपदर्शितश्रौतलिङ्गादिविरोधपरिहारायैव उपदर्शितार्थविवक्षाया आवश्यकत्वात्, बाहुलकाश्रयणस्य अगतितयाऽसंभवाच्च।

इतश्च समुद्रयायि पदे णिनिस्ताच्छील्ये इत्यवधारयामः। समुद्रयायी बन्दी चेति बन्दिपदेन साहचर्यात्। तद्धि वदिअभिवादनस्तुत्योः इत्यस्मात् 'नंदिग्रहिपचादिभ्यो ल्युणिन्यचः,इतिसूत्रेण ग्रह्यादितया णिनिप्रत्यये निष्पन्नम्। सच णिनिः 'आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु इत्युक्तेस्ताच्छील्यवाची; अन्यथा कर्तृमात्रे णिनिप्रत्यये सर्वः एव प्राय स्तोतार इति प्रत्ययेयुः। अत एव 'समुद्रयानं ब्राह्मणस्यापहरणम्, इति बोधायनसूत्रे बहुलेवापरत्वेन विज्ञानेश्वरव्याख्यातेन शूद्रसेवापदेनापि साहचर्यं युज्यते। अत एव च—

अथोत्तरत ऊर्णाविक्रयः शीधुपानमुभयतोदद्भिर्व्यवहार आयुधी

यकं समुद्रयानं इत्यस्मिन्नपि बोधायनसूत्रे वृत्तिवाचिना आयुधीयकपदेनापि साहचर्यमुपपन्नम्। अथ अगारदाही इत्यादावपि ताच्छील्याद्यन्यतरविवक्षाया आवश्यकत्वेन सकृत्कृतस्य अगारदाहादेः अदोषत्वं स्यादिति चेत्, स्यादेव, यदि सकृत्कृतस्यापि अगारदाहस्य दोषताबोधकं स्फुटतरं प्रमाणमुपलभ्येत। शब्दशक्तिलभ्यार्थस्य विना प्रमाणं परिगणनासम्भवात्। तदेवं लिङ्गविरोधपरिहाराय णिनिप्रत्ययार्थत्रिवक्षणं प्रामाणिकमध्न्यवार्तिककारादिसंप्रदायसिद्धमिति नात्रासांप्रदायिकत्वमपि शङ्कनीयम्। तथा च वार्तिके शिष्टाकोपाधिकरणे—"यत्तु वासुदेवार्जुनयोः उभौ मध्वासवक्षीबौ इति मद्यपानलिङ्गं स्मृतिविरुद्धमुपन्यस्तम्, तत्रान्नविकारसुरामात्रस्य त्रैवर्णिकानां प्रतिषेधः।

सुरा वै मलमन्नानां पाप्मा च मलमुच्यते।
तस्माद् ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत्॥ इति॥

मधुसीध्वोस्तु क्षत्रियवैश्ययोः नैव प्रतिषेधः; केवलब्राह्मणविषयत्वात्। 'मद्यं नित्यं ब्राह्मणो वर्जयेत्' इति वचनात्। यदप्येतत्—गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा। यथैवैका तथा सर्वा न पेया ब्रह्मवादिभिः—इति, एतदपि ब्रह्मवादिशब्दस्य तच्छील तद्धर्म तत्साधुकारित्वनिमित्तत्वात् प्रवचनाश्रयणेन ब्रूञ्वदत्योरेकार्थत्वात् 'प्रब्रूयाद्ब्राह्मणस्त्वेषाम्' इति नियमात्, यस्यैव प्रवचनं स एव तच्छीलः तद्धर्मा तत्साधुकारी वा भवति। तस्माद् ब्राह्मणा एव ब्रह्मवादिन इति। तदिदं कौस्तुभे खण्डदेवेनापि स्फुटं निरूपितमिति तत एव बोध्यम्।

इयांस्तु विशेषः—अर्थविशेषविवक्षायामपि तत्र णिनिप्रत्ययविधायके ब्रह्मणि वदः इति वार्तिके जागरूकेऽपि स्मार्तस्य लिङ्गस्य

विरोधं परिहर्तुमेव ताच्छील्यार्थकणिनिस्वीकरणं भट्टपादानाम्।
प्रकृते तु उपदर्शितार्थाविवक्षायां णिनिप्रत्ययविधायकस्यासत्त्वादपि श्रौतानां स्मार्तानां साम्प्रदायिकानामपि च लिङ्गानां विरोधे परिहर्तुं चापीति। तदित्थं कर्णधारादिवृत्तिमाश्रितेन द्विजेनानुष्ठीयमानं वृत्तिरूपतान्नमेव समुद्रयानं निषेधविषयः, न कृत्स्नमेवेति-सिद्धम्। अत एव स्मृत्यर्थसारे समुद्रतारणस्य पातकमध्ये परिगणनमपि युज्यते। न खलु अन्यत्र कुत्रचित् समुद्रतारणस्य ताद्रूप्येण निषेधकं वचनमुपलभ्यते। अत एव च समुद्रयायीत्यस्य समुद्रे नावा द्वीपान्तरं गन्तेति कुल्लूकभट्टादीनां व्याख्यानमपि सङ्गच्छते; णिनिप्रत्ययार्थाभिप्रायकत्वात्तद्व्याख्यायाः। अथैवंसति रघोः विजयार्थप्रसक्तसमुद्रयाननिषेधपरस्य मल्लिनाथवचसः का गतिरिति चेत्, अधोगतिरेव। अस्ति हि भूयोनुग्रहन्यायस्तान्त्रिकाणाम्, अस्ति च लौकिकानामाभाणकः। त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्। ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् इति। तदेवं सिद्धे कलिवर्ज्यप्रकरणगते "द्विजस्याब्धौ तु नौयातुः शोधितस्यापि संग्रहः" इत्यत्रापि नौयानं वृत्तिरूपमेव विवक्षितम्। यादृशस्य प्रायश्चित्तं प्रसक्तं तन्मूलकसंग्रहश्च, तथा तादृशस्यैवात्र संग्रहनिषेधपरे वचने ग्रहणौचित्यात्। प्रसक्तं हि प्रतिषिध्यत इति न्यायात्।

किंचेहापिनौयातृशब्दगततृन्प्रत्ययेन ताच्छील्यं शब्दमर्यादयैव लभ्यत इति नास्ति किंचित्कल्पनीयम्। नच तृन्नन्तत्वे नौयातृशब्दसमासानुपपत्तिः; नावः करणतया 'साधनं कृता' इत्यनेन समासे बाधकविरहात्। यत्तु ताच्छीलिका रूढिशब्दा एव रूढिशब्दप्रकारास्ताच्छीलिकाः। नच रूढिशब्दा गतिभिर्वि-

शेष्यन्ते इति आढ्यसुभगेतिसूत्रभाष्यात्। न च समुद्रयायिशब्दो नौयातृशब्दो वा नाविके रूढः; कोशादावदर्शनात्, इति। तन्न; प्रकारग्रहणं सादृश्यार्थम्। रूढिशब्दानां न केषामपि गतिसम्बन्धो भवति। ताच्छीलिकानां तु भवति केषांचित्, न सर्वेषामिति प्रतिपादयति। तत्रत्यकैय्यटविरोधे सर्वेषामेव ताच्छीलिकानां रूढिशब्दत्वोपगमासंभवात्। किंच नौयातृशब्दस्य उक्तार्थत्व एव धर्मतत्त्वोधृतम्—अब्ध्याजीवी न संग्राह्यो निष्कृत्याऽपि कलौ युगे—इति वचनमपि अनेनैककंठ्यमश्नुते॥ अपि च व्यवहारमयूखकारोऽपि ताच्छील्यार्थमेवाङ्गीकृत्य उक्तवचनव्याख्यानमभिप्रैति। यथोक्तम्—

पितृद्विट्पतितःषण्डो यश्च स्यादपयात्रितः। औरसा अपि नैतेशं लभेरन् क्षेत्रजास्ततः॥ अपयात्रितः राजद्रोहाद्यपराधेन बंधुभिर्घटस्फोटादिना बहिष्कृत इति मदनः। व्यवसायार्थं समुद्रमध्ये द्वीपान्तरंगन्ता इति युक्तम्। 'द्विजस्याब्धौ तु नौयातुः शोधितस्यापि संग्रहः' इति तस्य कलौ संसर्गनिषेधात्, राजद्रोहादौ घटस्फोटबहिष्कारयोरविधानाच्च इति। अत्र व्यवसायार्थम् इत्यंशः तृन्प्रत्ययेनैव लभ्यः, नान्यथेति स्फुटमेव॥ तदेवमत्र निर्णयः—

ताच्छील्यरूपमापन्नं यानमेव निषिध्यते।
मनुबोधायनादीनां वचनेष्विति गृह्यताम्॥ १॥ अस्मिन्नर्थे साधकश्च मानवः प्रत्ययो णिनिः। अन्यथा श्रुतिलिंगादिबाधश्च बहुधोद्भवेत्॥ ईदृक् समुद्रयानं तु यः करोति कलौ द्विजः। प्रायश्चित्ते कृतेऽप्येष नैव संसर्गमर्हति। द्विजस्येत्यादिवचनमित्थंकथयति स्फुटम्। प्राचीनानां व्याकृतेश्च न्यायाच्चेति सतां मतम्॥

न खल्वेतावता स्वैराचारादिभिराधुनिकैस्समुद्रयानावसरे क्रिय॰

माणानि अस्पृश्यस्पर्शाभक्ष्यभक्षणादीनि निषिद्धकरणानि संध्यादि लोपरूपाणि कृत्याकरणानि च शास्त्रीयतया शास्त्रेणानुमन्यन्त इति भ्रमितव्यम्; तेषु तेषु निषेधविषयताया दुर्निवारत्वात् । न खलु वसिष्ठपाण्डवविक्रमादित्यादयः तथाविधनिषिद्धकरणादिकं कुर्वन्त एव समुद्रयानमकार्षुः—इति कुत्रचन दृष्टं श्रुतं वा ॥ कल्पनायां च तथैव कल्पयितुं शक्यमुचितं च । यथेतरैश्शास्त्रैर्विरोधो न प्रसरेत् । न चात्रानुपपन्नं नाम किंचिदस्ति, येनान्यथैव कल्प्येत । ये तु पुनः विहिताकरणं निषिद्धकरणं च सर्वथैवोज्झन्ति दैवायत्तयोस्संभवे चानुतप्यन्ति, अथ च जातानुतापाः तन्निमित्तानि प्रायश्चित्तानि मुख्यान्यनुकल्पानि वा यथास्वीकारमनुतिष्ठन्ति । अथवा मिलितानां सर्वेषामेव दुरितानां अपनोदकमेव विज्ञानेश्वरादिप्रदर्शितं षडब्दकृच्छ्ररूपं प्रायश्चित्तं साशीतिशत प्राजापत्यपर्यवसितं साशीतिशतगोदानादिप्रत्याम्नायनिर्वर्त्यमनुतिष्ठन्ति,अनुष्ठितप्रायश्चित्ताश्च न पुनरीदृशेषु दुरितेषु प्रसजन्ति, त एव "जुगुप्सेरन् न चाप्येनं संवसेयुश्च सर्वशः" इति वचनानुसारिभिः श्रोत्रियैरनुग्राह्या इति धर्मशास्त्ररहस्यविदां पन्थाः—इति ॥

[उक्तप्रबन्धसमालोचनम्] अदसीयस्सारांशो ह्यत्र संगृहीतोऽयमेव—

ताच्छील्यरूपमापन्नं यानमेव निषिध्यते ।
मनुबोधायनादीनां वचनेष्विति गृह्यताम् ॥
अस्मिन्नर्थे साधकश्च मानवः प्रत्ययो णिनिः ।
अन्यथा श्रुतिलिङ्गादिबाधश्च बहुधोद्भवेत् ॥
ईदृक्समुद्रयानं तु यः करोति कलौ द्विजः ।
प्रायश्चित्ते कृतेऽप्येष नैव संसर्गमर्हति ॥
द्विजस्येत्यादिवचनमित्थं कथयति स्फुटम् ।

प्राचीनानां व्याकृतेश्च न्यायाच्चेति सन्तां मतम् ॥इति।

अत्रेदमेवालोचनीयम्—ताच्छील्यरूपापन्नत्वं नाम समुद्रयानस्य अभ्यस्यमानत्वमेव। अभ्यासश्चैकं दिनं संपूर्णमनुष्ठीयमानत्वेऽपि संपद्यते। तदुक्तं मिताक्षरायाम्—कथं पुनरत्राभ्यासावगमः? उच्यते; यत्करोत्येकरात्रेणेति अत्यन्तसंयोगवाचिन्यास्तृतीयाया निर्देशात्। एकरात्रेणात्यन्तसंयोगो गमनस्याभ्यासं विनाऽनुपपन्न इति गमनाभ्यासोऽवगम्यते। अत एव—एकरात्रात् बहुकालाभ्यासविषयं प्रागुक्तं द्वादशवर्षादिगुरुतल्पव्रतातिदेशिकं मरणान्तिकं चेति। अत्र यद्यपि न समुद्रयानं प्रक्रान्तम्, एवमपि एकरात्रानुष्ठानमभ्यास इति तु प्रकृतोपयुक्तमेव। तदत्रेदमेव निष्कर्षणीयम्—यत् कियद्दिनमनुष्ठानं पातित्यप्रयोजकमिति? तदत्र 'मासं कारागृहे वासो नौभिर्यानं दिनत्रयम्। म्लेच्छावासस्तथापक्षं यो वर्तेत, स पातकी' ति वचनात् दिनत्रयमभ्यस्यमानमत्यन्तमेव पातकित्वप्रयोजकमिति गम्यते। एतेन वसिष्ठादिसमुद्रगमनमपि व्याख्यातम्। तथाच दिनत्रयव्यापकसमुद्रयानपरमेव—"द्विजस्याब्धौ तु" इत्यादिवचनमित्यवचनसिद्धमेव। नहि दिनत्रव्यापकसमुद्रयानं समुद्रयानसामान्य विशेषो न भवतीति छागपशुन्यायोत्रसंभवत्येव। एतेन—तुग्रो ह भुज्युमश्विनोदमेधे रयिं न कश्चित् ममृवां अवाहः। तमूहथुर्नौभिरात्मन्वतीभिः। अन्तरिक्षप्रुद्भिरपोदकाभिः। तिस्रः क्षपास्त्रिरहा व्रजद्भिरिति" इत्यादिमन्त्रलिङ्गमपि व्याख्यातम्। अनेनापि हि त्रिरात्रमेव समुद्रयानं प्रकाश्यते। तथाचोक्तमन्त्रलिङ्गानुसारेणापि त्रिरात्राधिकमभ्यसनं पातित्यप्रयोजकमित्यङ्गीकारे न दोषः। यत्तु—'मासं कारागृहे वासः, इति दिनत्रयं समुद्रयानस्य पातित्यप्रयोजकत्वं वर्णितम्, तत्र काय-

कृच्छ्रानुष्ठानप्रयोजकं नित्यकर्मलोपाद्यसमवहितमेव विवक्ष्यते इति कायकृच्छ्राणां यावत्संख्याकानामावृत्त्या चतुर्विंशतिवर्षप्रायश्चित्तम्, तावत्तत्प्रयोजकसमुद्रयानस्य केवलस्यापि अव्यवहार्यत्वप्रयोजकत्वं कृतेऽपि प्रायश्चित्ते इति केचित् मन्यन्ते। एतन्मतरीत्या तु अभक्ष्यभक्षणादिकं म्लेच्छावासादिकं विना च दिनत्रयं समुद्रयानेनाव्यवहार्यत्वमिति भवति। तत्तरणितरणिकारा अपि कामतः विहितकर्मत्यागादिस्वेच्छया शास्त्राविश्वासेन च नौयायिनामसंव्यवहार्यत्वमेव मन्यन्ते। अयं भावः—दैवायत्तयोर्विहिताकरणनिषिद्धकरणयोर्जातानुतापानां प्रायश्चित्तेन व्यवहारव्यवस्थापनं युक्तम्। तथाच यदि एकदिनार्थं दिनद्वयार्थं वा समुद्रयाने प्रसक्तेऽकस्माद्वाताहननादिना बहुकालपर्यन्तमभ्यासे कर्तव्ये, निषिद्धभक्षणादौ च कर्तव्ये समापतिते सत्यं प्रायश्चित्तेन यौनादिसम्बन्धव्यवस्थानं योग्यम्, नहि तावता, पितृकर्मादिकमप्यपरिगणय्य बहुकालाभ्यासं भाविनमपि कर्तव्यतया विनिश्चित्य द्वीपान्तरं प्रति गच्छतामपि संव्यवहार्यता व्यवस्थापयितुं शक्यते। यत्तु पाण्डवादीनां समुद्रयानादिकं पुराणेतिहासादितोऽवगम्यते, तत्र कियद्दिनमभ्यास इत्यत्र विहितकर्मादिकं तैर्न कृतमित्यत्र प्रमाणाभावान्नोक्तसिद्धान्तविरोधि। एतेन—अब्धाजीवी न संग्राह्यः इति वचनमपि—व्याख्यातम्। अनेन हि जीवनार्थमेकरात्रं समुद्रयानमपि निषिद्धमित्येव गम्यते। एवंच—"समुद्रसंयानम् इत्यत्र समुपसर्गबलेन बोधायनेन जीवनार्थं समुद्रयानमेव विवक्षितमिति पक्षोपि व्याख्यातः। अस्मिन्नपि पक्षे यदि—मासं कारागृहे वासो नौभिर्यानं दिनत्रयमित्यनेनैकवाक्यता नोरीक्रियते, भिन्नविषयत्वात्, तर्हि तु न विप्रतिपत्तिलेशोऽपि। यदितूपसंहारादि-

नैकवाक्यता स्वीक्रियते, तर्हि तु अस्त्येव विचारणीयम् किंचित्। उपसंहारन्यायो हि सामान्यविशेषयोरेवास्पष्टयोः, न तु विशेषयोः स्पष्टयोः। इदानीं तु प्रायेण सर्वेऽपि स्वस्व जीविकाविशेषार्थं वैयक्तिकप्रतिष्ठाविशेषार्थमेव द्वीपान्तरं वाच्छन्ति। नहि तादृशी कापि राजाज्ञाऽद्ययावत्संजाता,—विना द्वीपान्तरगमनं दण्डो भविष्यतीति। तथा च द्विजानामेव समुद्रयायिनां कृतप्रायश्चित्तानामव्यवहार्य्यत्वनिषेधात्, व्रात्यानां स्वकर्मभ्रष्टानां एवं सच्छूद्राणां च बहूनां भारतवर्षे विद्यमानत्वात्, तेषामेव द्वीपान्तरगमनेन कृतप्रायश्चित्तानां स्वसमाजे व्यवहारस्सर्वोऽपि यथावदेव भवितुमर्हति, न ब्राह्मणानामविच्छिन्नोपनयनादिसंप्रदायानामित्येव प्रतिभाति। अधिकचात्र निर्णयं धर्मतत्त्वमर्मज्ञानां पण्डितप्रवराणामेवाधीनम्। अत्र विषये — 'श्रीशृङ्गगिरिपीठप्रकाशितोऽब्धियाननिर्णयः, एवमन्ये च बहवः प्रबन्धाः संस्कृत चन्द्रिकादिषु प्रकाशिता वर्तन्त इति विस्तरभयादत्रैवायं विषयः समाप्यते।

सर्वथा तु 'कामतो व्यवहार्यस्तु' इत्यत्र व्यवहार्य इति पदविभागेऽपि न पतितानां संव्यवहारसिद्धिर्भवति। यत्तु—

> एनस्विभिरनिर्णिक्तै नार्थं कञ्चित्समाचरेत्।
> कृतनिर्णेजनांश्चैव न जुगुप्सेत कर्हिचित्॥ इति॥

मन्वादिवचनम्, तत्रापि कृतप्रायश्चित्तानां न जुगुप्सनीयत्वम्, अकृतप्रायश्चित्तानान्तु सर्वविधव्यवहारायोग्यत्वञ्च यदुपवर्णितम्, तदिदं कृतप्रायश्चित्तानां सहासनादिलघुतरव्यवहारयोगमेव गमयति। सहासनादीनामपि परित्यागेन खलु जुगुप्सा गम्यते, न तु विवाहाद्यकरणेन।

[विवाहेऽन्तरविभागयोग्यतापरीक्षम्]

अस्माकं भारतीयानां हि ब्राह्मणेषु वैश्येषु शूद्रेषु च बहवो विभागा इदानीमपि वर्तन्ते यत्र परस्परं सहासनादिसम्बन्धे सत्यपि विवाहाद्यकरणेऽपि जुगुप्सा क्रियमाणाऽनुभूयते । कुमारिलपादा हि—न स्वस्त्रीणां क्वचिद्व्यभिचारदर्शनात्सर्वत्रैव कल्पना युक्ता । लोकविरुद्धानुमानासम्भवात् । विशिष्टेन हि प्रयत्नेन महाकुलीनाः परिरक्षन्त्यात्मानमनेनैव हेतुना । राजभिर्ब्राह्मणैश्च स्वपितृपितामहादिपरम्परास्मरणार्थं समूहलेख्यानि प्रवर्तितानि तथा च प्रतिकुलं गुणदोषस्मरणात्तदनुकूलात्स्वपितृपितामहादिपरम्परासु यत्र विवाहसम्बन्धो वर्तते, तत्रैव विवाहसम्बन्धकरणं योग्यमिति सूचयन्ति । अत्र प्रसंगे ब्राह्मणेष्वेव विभागविशेषाणामपि इदानीमनुभूयमानानां प्रामाणिकत्वमवश्यं निरूपणीयमिति तदर्थं बालभट्टीस्थानि कानिचन वाक्यानि संगृह्णीमः । तद्यथा—

"किञ्च चरणव्यूहारव्यपरिशिष्टभाष्ये स्पष्टं वेदशाखयो विभाग उक्तः । तथाहि—इतरदेशेषु वेदशाखयोर्विभाग उच्यते । तथा च महार्णवे—

पृथिव्या मध्यरेखा या नर्मदा परिकीर्तिता ।
दक्षिणोत्तरयोर्भागे शाखा वेदश्च उच्यते ॥
नर्मदा दक्षिणे भागे आपस्तम्ब्याश्वलायनी ।
राणायनी पिप्पलादी यज्ञकन्याविभागिनः ॥
माध्यन्दिनी शांख्यायनी कौथुमी शौनकी तथा ।
नर्मदोत्तरभागे च यज्ञकन्याविभागिनः ॥
तुङ्गा कृष्णा तथा गोदा सह्याद्रिशिखरावधि ।
आ आन्ध्रदेशपर्यन्तं बह्वृचस्याश्वलायनी ॥

उत्तरे गुर्जरे देशे वेदो बह्वृक् प्रकीर्तितः ।
कौषीतकी ब्राह्मणञ्च शाखा शांखायनी स्थिता ॥
आन्ध्रदिदक्षिणाग्नेयी गोदासागर आवधि ।
यजुर्वेदस्तैत्तिरीया आपस्तम्बी प्रकीर्तिता ॥
सह्याद्रिपर्वतारम्भा दिशा नैर्ऋत्यसागरात् ।
हिरण्यकेशीशाखा च पर्शुरामस्य सन्निधौ ॥
मयूरपर्वताच्चैव यावद्गुर्जरदेशतः ।
व्याप्ता वायव्यदेशात्तु मैत्रायणी प्रतिष्ठिता ॥
अङ्गवङ्गकलिङ्गाश्च कानीनो गुर्जरस्तथा ।
वाजसनेयी शाखा च माध्यन्दिनी प्रतिष्ठिता ॥
ऋषिणा याज्ञवल्क्येन सर्वदेशेषु विस्तृता ।
वाजसनेयी वेदस्य प्रथमा कण्वसंज्ञिका ॥ इति ॥

तथा च यद्देशवासित्वेन येषां यथाऽनुष्ठानमुक्तम्, तेषां देशान्तरगमनेऽपि तथैवानुष्ठानम् । अन्यथा रण्डत्वप्रयुक्तप्रायश्चित्तापत्तिः । न चैषां निर्मूलत्वमिति वाच्यम् ; महार्णवस्योपलभ्यमानत्वात् । संवाद्याचारस्य तथैवोपलभ्यमानत्वाच्चेति दिक् । इति ॥

अत्र हि नर्मदोत्तरभागे ये वर्तन्ते, ये च नर्मदादक्षिणभागे वर्तन्ते, तेषां विवाहादिसम्बन्धो न युक्त इति स्पष्टं विवेचयित्वा नर्मदादक्षिणभागेऽपि तैत्तिरीयशाखावलम्बिनामाश्वलायनशाखावलम्बिनाञ्च पृथक्करणेन तेषामपि विवाहादिसम्बन्धायोगः प्रतिपाद्यमानो विरुद्धतत्तच्छाखावलम्बिनां परस्परं विवाहायोगं गमयति । अत्र चापस्तम्बशाखीयानामाश्वलायनशाखीयैर्न विरोधः । उभयोरपि भिन्नवेदस्थत्वात् । एतेन—सामगा अपि—व्याख्याताः ।

प्रतिवेदं हि बह्वीनां शाखानामवस्थानाद्येषां यच्छाखीयत्वं परम्परावगतम्, सा शाखा यत्र वेदे वर्तते, तत्रैव भवति, तर्हि तेषां परस्परविवाहायोगोऽविवादसिद्ध एव । एवञ्च दक्षिणात्येष्वान्ध्राणां केषाञ्चन वाजसनेयिनां द्राविडैरापस्तम्बशाखीयैर्विवाहो न योग्य इति सिद्धम् । उत्तरदेशीयानां बह्वृचानां दक्षिणदेशीयानां बह्वृचानां च परस्परविवाहस्तु स्पष्टमेव वचनेनैव निषिद्धः । आपस्तम्बीयानामेवान्ध्राणां द्राविडानां महाराष्ट्रीयाणाञ्च परस्परविवाहस्तु नायोग्यः । यतः स सम्प्रदायो बहोः कालादारभ्य प्रचलति । ये तु पुनः द्राविडेष्वान्ध्रेषु गुर्जरेषु वंगीयेषु कानीनेष्वन्येषु च बहवो विभागाः, यत्र परस्परं विवाहसम्बन्ध इदानीमपि नास्ति न योग्य इति च बहूनां वाद इदानीं वर्तते ; ते तु विवाहांगतया कुलपरीक्षा या कर्तव्या वर्तते ; तदर्थं कल्पिताः पूर्वतनैरिति पश्यामः । न ह्यादित आरभ्य कुलपरीक्षा सर्वैरपि कर्तुं शक्यत इति यत्र परस्परं विवाहो बहोः कालादारभ्य प्रवृत्त आसीत्, तेषां नामविशेषादिना व्यवस्था कृतेति मन्तव्यम् । कुमारिलपादा हि स्त्रीणां व्यभिचारशङ्का मा भूदिति समूहलेख्यं प्रवर्तितमिति तन्त्रवार्तिके वदन्ति । स्त्रीणां हि व्यभिचारबुद्धौ स्वपतेर्विवाहयोग्यकुलीनत्वमप्येकं निमित्तम् । अतः समुचितं यत्र स्वपितृमातृवंशयोरन्यतरस्य सम्बन्धोऽनादिकालमारभ्य प्रचलितः, तत्कुलमेव विवाहार्थं ग्रहणीयमिति । ग्रामादिभेदेन द्राविडादीनां विभागोऽपि (वडम, बृहच्चरण, अष्टसहस्रम्) इत्यादिर्योग्य एव । अतो यावच्छक्ति यत्र पूर्वतनानां सम्बन्धः कथाचन परम्परया बहोः—कालादारभ्य प्रचलति तत्कुलमेव विवाहार्थं स्वीकर्तव्यमिति विभागान्तरीयाणां स्वीये विभागे कन्याया वरस्य वाऽला-

भेऽपि विभागान्तरीयकन्यादिस्वीकारार्थं प्रवृत्तिरनुचितैवेति सिद्धम्। अतिप्रयत्नेनापि स्वीये विभागे वरालाभवादास्तु साहसमात्रनिबन्धनो वैतण्डिकाश्चेति वयं सुधीरं वदामः।

[विवाहेऽवान्तरविभागायोगमतम्] अत्र केचिन्मन्यन्ते—यत् ब्राह्मणादीनामवान्तरविभागेषु मिथो यौनसम्बन्धो न शास्त्रविरुद्धः। यतः सर्वेऽपि ब्राह्मणादय एकस्य कस्यचनर्षेश्चन्द्रादेर्वा वंशजाताः, महर्षिषु च सर्वेषु न कश्चिदुच्चनीचभावः। तत् येष्ववान्तरविभागेषु जलपानभोजनादिविभागः प्रचलति, तेषु यौनः सम्बन्धो योग्यः-शास्त्राविरुद्धश्च। अयं भावः—"यज्ञकन्याविभागिनः" इति वचनानुसारेण यज्ञादौ येषां सहसम्बन्धो योग्यस्तेषां यौनसम्बन्धेऽपि सहयोगो योग्य इत्यूरीकर्तव्यम् इति।

[उक्तमतसमालोचनम्] तत्र केषाञ्चन यज्ञसम्बन्धमात्रम्; केषाञ्चन यज्ञयौनोभयसम्बन्ध इति कल्पने वैरूप्यकल्पनापेक्षया हि सर्वेषां सर्वसम्बन्धकरणं योग्यमिति यद्येषामाशयस्तर्हीदं विचारणीयम् कथं क्षत्रियाणामपि ब्राह्मणैर्यौनसम्बन्धो न भवतीति। अतोऽत्रावश्यमिदमूरीकर्तव्यम्—यत् कन्यासम्बन्धो यज्ञसम्बन्धश्च साधारणतया न कल्पयितुं युज्यते। किन्तु अवान्तरविभागमादायैव। तथा च यथा श्राद्धादौ अवर्णीयानां न यौनसम्बन्धयोग्यता, एवमवान्तरविभागेष्वपि न सर्वथा तद्योग्यता। अत एव विवाहाङ्गं कुलपरीक्षणमुपपद्यते। नहि ब्राह्मण्यादिपरीक्षणं कुलपरीक्षणं नाम। अवान्तरविभागो ह्ययं विवाह एव सर्वत्र परिपाल्यते, नान्यत्र। तत्र सगोत्रायाः सपिण्डाया दोषान्तरदूषितायाश्च यथा ब्राह्मणत्वादिसाम्येऽपि न विवाहयोग्यता, एवमवान्तरविभागविशेषबहिर्भूताया अपि न तद्योग्यता। अस्य चावान्तरविभागपरिपालनस्य

कुलपरीक्षायां विशेषेण उपयोगः । इममुपयोगमभिप्रेत्यैव कुमारिलपादा अपि स्त्रीरक्षणार्थं समूहलेख्यं प्रवर्तितमिति विवेचयन्ति ।

[अवान्तरजातिविभागस्य संघटनोपायत्वम्]

विवाहेऽवान्तरविभागपरिपालनस्यादृष्टं फलं भवतु वा मा वा । दृष्टं तु फलं समाजसंघटनं वर्तत एव । समाजसंघटनं हि समाजावयवानां नियन्त्रणं विना न संभवति । तच्च बहूनामवान्तरविभागानां प्रतिसमाजं कल्पनेन तत्र समाजान्तरीयैः साकं विवाहभोजनादिसम्बन्धायोग्यताऽव्यवस्थापनेन चैव भवति, नान्यथा । इदानीं हि बहवः समाजान्तरेणापि यौनसम्बन्धादिकरणेन न केवलं स्वीयसमाजोल्लंघनेन स्वीयं समाजमेव विघटयन्ति, किन्तु समाजान्तरमपीत्यवान्तरविभागपरिपालनं हि नितरामेव योग्यम् । वानरा अपि हि ग्रामान्तरीयवानरैः साकं न यौनसम्बन्धं कुर्वन्ति । प्रत्यक्षमिदं तिरुपतिप्रभृतिषु देशेषु । तत्र गोपुरान्तरवर्तिभिर्वानरैर्गोपुरान्तरवर्तिनो वानरा व्यवहारमपि न कुर्वते । तथा च समाजसंघटनं यथाभिलषितम्, तर्हि अन्ततो गत्वा विवाहमात्रेऽवान्तरविभागपरिपालनमेव योग्यम् । इदानीं हि समाजान्तरबहिष्कृतस्य समाजान्तरेणावलम्बदानात् विवाहादिसम्बन्धकरणेन सर्वेऽपि प्रायेण स्वपितरमपि तृणाय मन्यन्त इति विवाहेऽवान्तरविभागपरिपालने दृष्टं प्रयोजनमेकं वर्तत एव । दृश्यतां सर्वैरपि माहेश्वरजातिषु तज्जातीयस्यैकस्य वैश्यत्वेन समाजकोलवारजातिसम्बन्धकरणेन कीदृशं शैथिल्यं सञ्जातम् । अत्र समाजान्तरीयैरवलम्बो यदि न दत्तः स्यात्, वयं पश्यामः—तर्हि पुनरपि समाजिकदण्डपरवशतां प्राप्य समाजशैथिल्यनिदानतां न कथमपि धनिकोऽपि शक्तोऽपि प्रबलोऽपि वा स प्राप्स्यति । तथा च विवाहेऽवान्तरविभागपरि-

स्यागेन बहूनि द्वाराणि संकराय प्रवर्तितानि भवेयुः। इदानीमेकर्षिवंश्यत्वेन ब्राह्मणानामन्तरम्, द्विजत्वेन त्रैवर्णिकानां ततो वर्णत्वेन ब्रह्मक्षत्रविट्शूद्राणाम्, अथ मानवत्वेन सर्वजातीनाम्, अथो स्त्रीत्वेन पुरुषत्वेन च सर्वेषां यौनसम्बन्ध इति कल्पनेन हि सर्वः स्वतन्त्रो भवितेति समाजशैथिल्यमपरिहरणीयां दशामेवाप्नुयादिति विवाहेऽवान्तरविभागपरिपालनमत्यावश्यकमेव।

[अवान्तरविभागस्य शास्त्राविरुद्धत्वम्] अत्रान्यथाकरणे शास्त्रविरोधो वर्तते वा न वेति विचारे त्वस्माकमिदमेव वक्तव्यम्—यदनादिसिद्धाचाराख्यशास्त्रविरोधो वर्तत इति सर्वविदितमिदम्। अन्यथाहि विचारविषयतैव न स्यात्। ततश्च—

शिलापुण्ड्रं च सूत्रं च समयाचारमेव च।
पूर्वैराचरितं कुर्यादन्यथा पतितो भवेत्॥

इति स्मरणेन—

देशजातिकुलाचारधर्माः सम्यक् प्रकीर्तिताः।
तथैव ते पालनीया धर्मः प्रक्षुभ्यतेऽन्यथा॥

इति वचनानुसारेण चावान्तरविभागपरिपालनं यौनसम्बन्धेऽत्यन्तमेवोचितम्। अधिकं चात्र वक्तव्यं पूर्वमेव विवेचितम्।

अत्रेयं विचारत्रयी—यत्तु केचिदेकपङ्क्तिभोजनवतां मिथः कन्यासम्बन्धो योग्य इति वाचाटाः, किमत्र न्याय्यम्? एकपङ्क्तिभोजनेन मिथःकन्या सम्बन्धः, उत कन्यासम्बन्धाभावात् पङ्क्तिविच्छेदः? पश्यतु भवान्, एकपङ्क्तिभोजनवत्सु पशुपक्ष्यादिषु किं मिथः शरीरसम्बन्धः? अहो यत्पशुभिरपि समानजातिः प्रार्थ्यते, मनुष्यैरपि विस्मर्यते। तस्मादिदमत्र न्याय्यम्—कन्यासम्बन्धाभावात् पङ्क्तिविच्छेद इति। "यथा कन्या तथा हविः" इति

वचनं चात्रानुकूलम्। मिथः पङ्क्तिव्यवहारे जातिविस्मरणप्रसङ्गात्, जातिविस्मृतौ मिथःकन्यासम्बन्धप्रसङ्गात् अश्वतरादिवद्वैरूप्यप्रसङ्गात् सन्ततिविच्छेदापत्तिप्रसङ्गात् संकरजातेरन्यस्या एवाङ्गीकारप्रसङ्गात्। तस्मात्प्राचीनं व्यवहारं समूलं संस्मृत्य स्थापयतु भवान् येन बुद्धेः साफल्यं स्यात्। किं नास्ति त्वन्निकटे तादृशस्तर्को येन प्राचीनव्यवहारः समञ्जसो दृश्येत। येन भवत्पूर्वजा नन्देयुः। एतत्सर्वेऽपि जानन्ति—यदन्तरङ्गजनलोषणं बहिरङ्गजनपोषणं नवीनजनशिक्षणं प्राचीनपथवर्तनं पथ्यमिति। नवीनमार्गः पारं गमिष्यतीति न निश्चयः। यतः परोक्ष उत्तरो देशोऽनन्तः। अतो नवीनेनापि बुद्धिमता प्राचीनः पन्था रक्ष्यो यथाबलम्, तत्रैव लाघवात्। इति।

[सहासनादिवर्जनस्य जुगुप्सानिदानत्वम्] तथा च विवाहासम्बन्धो न जुगुप्सानिदानम्। किन्तु सहासनादिवर्जनमेवेति 'न जुगुप्सेत कर्हिचित्' इत्यनेनापि वचनेन विवाहादिगुरुतरसम्बन्धयोग्यता न गम्यते। व्यक्तश्चैतन्मिताक्षरायाम्—

चरितव्रत आयाते निनयेरन्नवं घटम्।
जुगुप्सेरन्न चाप्येनं संवसेयुश्च सर्वशः ॥ २९ ६ ॥

इति श्लोके प्रायश्चित्तप्रकरण उपपादितम्। तद्यथाः—'तत एनं कृतप्रायश्चित्तम् ते नैव कुत्सयेयुः। तथा सर्वकार्येषु क्रयविक्रयादिषु तेन सह संव्यवहरेयुः' इति। अत्र हि स्पष्टमेव संव्यवहारपदेन क्रयविक्रयादिलघुतरसम्बन्ध एव विवक्षित इति सर्वविदितमिदम्। तथा चैनस्विभिरितिवचनानुसारेणापि कृतप्रायश्चित्तानां सर्वथा व्यवहार्यत्वं न साधयितुं शक्यत इति सिद्धम्। अथ यथावसरमुक्तश्लोकव्याख्यावसरे कुल्लूकभट्टादिभिः किं वा निरूपित-

मिति समालोचनमरचयामः। तत्र कुल्लूकभट्टः—पापकारिभिरकृतप्रायश्चित्तैः सह दानप्रतिग्रहादिकमर्थं कश्चित् नानुतिष्ठेत्। कृतप्रायश्चित्तान् नैव कदाचिदपि पूर्वकृतपापत्वेन निन्देत्। किन्तु पूर्ववद्व्यवहारेत्—इति। मेधातिथिः—एनस्विनः प्रकृतत्वात्पातकिनः। तैरनिर्णिक्तैरशुद्धैरकृतप्रायश्चित्तैनार्थं कञ्चित् ऋणादानक्रयविक्रययाजनाद्युक्तम्। निर्णेजनं पापापनोदनं तस्मिन् कृते नैनान् जुगुप्सेत कृतप्रायश्चित्तान्न कुत्सयेत्—इति। अत्र कुल्लूकभट्टे पूर्ववद्व्यवहरेदित्यनेनैकगृहनिवासादियोग एव विवक्षयते, न तु विवाहादियोगोऽपि। अत एवानन्तरश्लोकस्य बालघ्नांश्चेत्यस्यावतरणावसरेऽस्यापवादमाहेति वर्णितमुपपद्यते। अत्र हि श्लोके संवासः; संवत्सरं स्वसमीपे वासनम्, संवासः सङ्गतिस्तद्गृहनिवासः, तैः सह पानादिकरणम्, इति सर्वज्ञनारायणमेधातिथिराघवानन्दैर्विवृतम्। कुल्लूकभट्टेन तु संसर्गमात्रमिति विवृतम्। तथाच स्वसमीपे वाऽऽसनादिलघुतरसंसर्गाभ्यनुज्ञान एव पूर्वतनश्लोकतात्पर्यमूरीकर्तव्यम्। अन्यथा दानप्रतिग्रहादिमात्रार्हत्वप्रतिपादने तदपवादत्वमुत्तरश्लोकस्य वर्णितमसङ्गतं स्यात्। यत्तु कुल्लूकभट्टेन पूर्वतनश्लोके दानप्रतिग्रहादिकमिति विवृतम्, तत् पापसामान्याभिप्रायेण। तदयं निष्कर्षः—यत् पातित्यानापादकं पातित्योपादकञ्चेति पापं द्विविधम्। तत्राद्येन दानप्रतिग्रहादिमात्रानधिकारः। द्वितीये तु सम्भाषणादीनामपि अनधिकार इति विवेकः। तत्र कुल्लूकभट्टैः—एनस्विभिरित्युक्त्या पापसामान्यमेनःपदेन विवक्षित्वा दानप्रतिग्रहानधिकार इति विवृतम्। सर्वज्ञनारायणमेधातिथिराघवानन्दादिभिस्तु यैः सहासनादिकमपि निषिध्यते, तैः कृतप्रायश्चित्तानां सहासनादिमात्रं विवक्षयते, न तु

धर्मकार्यसहयोगित्वमपीति बहूनामेतदभिमतम्। ये तु केचन पतितोद्धारमीमांसावलम्बेन पतितानां कृतप्रायश्चित्तानां पुनः सर्वात्मना व्यवहारयोग्यतामभिमन्यन्ते, तेऽपि पूर्वोक्तेन प्रकारेण दत्तोत्तरा इत्यत्र तु न विशयलेशोऽपि। एवमपि बहूनां प्रियपाठकानां सन्तोषार्थं श्रीमदप्पशास्त्रिमहोदयानां संस्कृतचन्द्रिकागतं पतितोद्धारमीमांसाखण्डनप्रकरणमपि संग्रहीतुमभिलषन्तोऽपि वयं ग्रन्थविस्तरभयात् शास्त्रिमहोदयानामप्यव्यवहार्यत्वपक्ष एव सम्मत इत्येतावन्मात्रसूचनाय तदाशयबोधकानि कानिचन वाक्यान्येव सङ्गृह्णीमः। तद्यथाः—

"ननु विद्यत एव कामकृतेऽपि पातके प्रायश्चित्तम्
"अकामतः कृते पापे प्रायश्चित्तं न विद्यते।
कामकारकृतेऽप्येके प्राहुस्तच्छ्रुतिदर्शनात्"॥

[संस्कृतचन्द्रिका संग्रहः।]

इति मनूक्तेः। "अकामकृतपापानां ब्रुवन्ति ब्राह्मणा व्रतम्। कामकारकृतेऽप्येके द्विजानां वृषलस्य च" इति जाबालिवचनाच्च। श्रुतिश्च—इन्द्रो यतीन् शालावृकेभ्यः प्रायच्छत्। तमश्लीला वागभ्यवदत्। स प्रजापतिमुपाधावत्। तस्मा इन्द्रायोपहव्यं प्रायच्छत्। इति। अश्लीला निष्ठुरा। अत्र इन्द्राय बुद्धिपूर्वकं श्वभ्यो यतीन् खादयितुं दत्तवते प्रजापतिरुपहव्याख्यं कर्म प्रायश्चित्तं दत्तवानित्युक्तम्। अतश्च प्रतीयते कामकृतेऽपि पातके प्रायश्चित्तमिति। भगवतश्चेन्द्रस्याव्यवहार्यतायाः कुत्राप्यदृष्टत्वाच्च व्यवहार्यत्वमपि प्रकृतपातकिनो दुर्वारमिति चेदत्र ब्रूमः। न किल वयं कामकृतेऽपि पातके आत्यन्तिकं प्रायश्चित्ताभावं ब्रूमः, स्वीकुर्मो हि कियन्तं कालं प्रायश्चित्तार्हत्वमप्येतस्य। व्यवहार्यतामात्रन्तु प्रतिषेधामः। न चै-

वं शक्रस्यापि कामकृतपातकविशिष्टस्याऽव्यवहार्यत्वमावश्यकम्। तच्च न दृष्टमिति व्यवहार्यत्वमप्यवश्यमभ्युपगन्तव्यमिति वाच्यम्। अशेषपुण्यराशेः श्रीमहेन्द्रदेवस्य देवत्वादेव प्रायश्चित्तमन्तरापि व्यवहार्यतासिद्धेः। न हि प्रचण्डकरमण्डलस्य तमोविनिहत्यै प्रदीपिकासाहाय्यापेक्षा। लोकशिक्षार्थन्तु प्रायश्चित्ताचरणम्। मानुषाणान्तु कामकृतेऽपि प्रायश्चित्तसत्त्वं तदपि कियन्तमेव कालमिति शास्त्रानुसारी राद्धान्तः। अत एव—प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत्। कामतोऽव्यवहार्यस्तु वचनादिह जायते—इति याज्ञवल्क्यवचने कामत इत्यतः परमकारप्रश्लेषात्कृतेऽपि प्रायश्चित्ते न व्यवहार्यः कामकृतपातकीति शूलपाणिप्रभृतयः प्राहुः। न च निर्मूलमेवेदमिति वाच्यम्; 'नास्यास्मिंल्लोके प्रत्यासत्तिर्विद्यते कल्मषन्तु विहन्यते' इत्यापस्तम्बस्मरणात्। अस्य कामकृतपातकविशिष्टस्य कल्मषं विहन्यते। लोके प्रत्यासत्तिर्व्यवहार्यता तु न विद्यत इत्यर्थः। ये तु याज्ञवल्क्यवचनेऽकारप्रश्लेषमननुमन्यमाना व्यवहार्यतामपि कामकृतपातकिनां प्राहुस्तेषामपि मते स्पर्शनदर्शनादिलघुव्यवहारार्हत्वमिति बोध्यम्। अत एव 'प्रायश्चित्तैरपैत्येनः' इति याज्ञवल्क्यपद्ये शूलपाणिः—ननु सति पापे कथं व्यवहार्यता। अत्राह वचनादिति। अयमभिप्रायः—अर्धप्रायश्चित्तानुष्ठानेनार्धपापक्षयात्सम्भाषणदर्शनस्पर्शनादिव्यवहारो न दुष्टः। न तु भोजनपरिणयनादिव्यवहारोऽपि; वचनादेव। अकारप्रश्लेषपक्षमेव तु भूयांसोऽनुमन्यन्ते। यथा रघुनन्दनभट्टाचार्याः—ज्ञाने तत्तुल्यतया द्विगुणव्रताचरणेऽपि न व्यवहार्यः। 'प्रायश्चित्तैरपैत्येनः' इति याज्ञवल्क्यवचनात्। पापाभावे कथमव्यवहार्य इत्याह वचनादेवेति। तथा चोक्तं—कि-

मिव हि वचनं न कुर्यान्नास्ति वचनस्यातिभारः—इति। पापस्य द्वे शक्ती नरकोत्पादिका व्यवहारनिरोधिका चेति। तत्रैकतरशक्तिविनाशे व्यवहारनिरोधिका शक्तिरस्तीति भावः। तथा च मिताक्षरायामापस्तम्बः—नास्यास्मिंल्लोके प्रत्यासत्तिर्विद्यते कल्मषन्तु विहन्यते—इति। प्रायश्चित्तकदम्बे श्रीगोपालन्यायपञ्चाननो अपि—म्लेच्छश्च—गोमांसखादको यस्तु विरुद्धं बहु भाषते सर्वाचारविहीनश्च म्लेच्छ इत्यभिधीयते—इति बौधायनोक्तः। तत्र यवनदेशोद्भवा यवना इति। अज्ञानादिति। ज्ञाने तु तत्त्व्यतया द्विगुणव्रताचरणेऽपि न व्यवहार्यः। 'कामतोऽव्यवहार्यस्तु वचनादिह जायते' इति याज्ञवल्क्यात्। पापाभावे कथमव्यवहार्यत्वमित्यत आह वचनादिति। पापस्य द्वे शक्ती नरकोत्पादिका व्यवहारनिरोधिका च। तत्र प्रायश्चित्तेन नरकोत्पादिकायाः शक्तेर्विरहेऽपि व्यवहारनिरोधिका शक्तिरस्त्येवेति भाव इत्याहुः। श्रीशूलपाणिचरणा अप्यन्तत इदमेव सिद्धान्तयामासुः। एवञ्च कृतप्रायश्चित्तोऽपि प्रकृतः पातकी न व्यवहार्य इत्यनिच्छताप्यवश्यं स्वीकरणीयं मीमांसकम्मन्यैरित्यहो भक्षितेऽपि लशुने न प्रशान्तो व्याधिः। नन्वेवं 'कृतनिर्णेजनांश्चैव न जुगुप्सेत कर्हिचित्' इति मनुटीकायां यदुक्तं कुल्लूकेन—कृतप्रायश्चित्तान्नैव कदाचित्पूर्वकृतपापत्वेन निन्देत्, किन्तु पूर्ववद्व्यवहरेदिति, तस्य का गतिरितिचेत्तदुक्तव्यवहारपदस्य स्पर्शनादिलघुव्यवहारपरत्वमेवेति ब्रूमः। नन्वेवं "बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः। शरणागतहन्तॄंश्च स्त्रीहन्तॄंश्च न संवसेत्" इति मनोः परिगणनं न संगच्छेत। कामतः कृते पातके सर्वेषामपि कृतप्रायश्चित्तानामव्यवहार्यत्वात्। अत्रोच्यते—न हि लघुपातकानां प्रायश्चित्ताचरणतः प-

रिच्चये तत्कतृ णामव्यवहार्यत्वम्। अत एव च बालघ्नादीनामपि न तथात्वं प्राप्नोतीतिचरितार्थ एव बालघ्नानित्यपूर्वो विधिरिति। प्रकृतपातकिनो गुरुतरपापविशिष्टत्वं तथा प्रागेव निरणैष्म। ब्रह्मघ्नादीनां संव्यवहार्यत्वे श्रीमदप्ययदीक्षिता एव प्रमाणमिति तु प्रलापमात्रम्। अनाप्तजनवदनविहारिणामिह वृत्ते यत्त इत्यादिसदृशानां निर्मूलप्रायाणां वचसां प्रामाण्यानङ्गीकारात्।

यत्तु यवनीपरिणेतुर्जगन्नाथस्य श्रीगङ्गास्नानतः पूतत्वमिति, तदेतन्न मीमांसकम्मन्यस्य मतसाधनायालम्। ऐतिह्ये ह्येतस्मिन् गङ्गाप्रसादतः स्वर्गारोहणमेवोपवर्ण्यते जगन्नाथस्य न तु लोके संव्यवहार्यत्वमिति। एतच्चारव्यायिकाया अस्याः प्रमाणयाङ्गीकारपक्षानुसारेणोक्तम्। वस्तुतस्तु गगनकुसुमायमानैवेयं किंवदन्तीति पण्डितवराः श्रीजगन्नाथाः' इतिशीर्षके प्रबन्धे सप्रमाणमेव प्रतिपादितमस्माभिरिति दिक्" इति॥

एतेन—असवर्णाविवाहोऽपि—व्याख्यातः। विवाह्यकन्यानिरूपणप्रस्तावे हि मन्वादय एवं वदन्ति, यत्—

[असवर्णाविवाहपरीक्षा] गुरुणाऽनुमतः स्नात्वा समावृत्तो यथाविधि।
उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्विताम्॥
असपिण्डा च या मातुरसगोत्रा च या पितुः।
सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने॥ २॥

इति। अत्र "दारकर्मणि मैथुने" इति पदाभ्यां धर्मप्रजोभयसंपत्तियोग्यपत्नीत्वे सवर्णादिरूपाया एवाधिकारः, न त्वन्यस्या इति सूच्यते॥ अत एव—

सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्मणि।
कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोऽवराः॥

इति कामार्थत्वमेवासवर्णानां निरूपितम्। अत्र चाग्रे प्रशस्ताया एव विवाहः कर्तव्य इत्यपि गम्यते। एवं च पर्युदस्यमानानामपरासां सर्वासामपि कामार्थविवाहमात्रयोग्यतेति स्पष्टमवगम्यते। अत्र पर्युदस्यमानानां यासां सर्वदृष्ट्या दुष्टत्वम्, तासां संस्कारमात्रेण काममात्राधिकारः, यथा नक्षत्रनामन्यादीनाम्। सपिण्डत्वादिकन्तु न सर्वदृष्ट्या कन्यादोषः? किन्तु केषाञ्चन दृष्ट्येति तेषां धर्माधिकारोऽपि वर्तत इति विवेकः। तत्र कामार्थविवाहोऽपि कलावसवर्णाविषये निषिद्धः। युगान्तरेऽपि शूद्राविवाहो ब्रह्मक्षत्रविशां न योग्य इति तु याज्ञवल्क्याचार्यो मन्यते। तद्यथा—

यदुच्यते द्विजातीनां शूद्राद्दारोपसंग्रहः।
नैतन्मम मतं यस्मात्तत्रायं जायते स्वयम्॥

इति। अत्रेयं बालक्रीडा—

"श्रोत्रियाणां महाकुलादिति शूद्राविवाहो न प्राप्नोति। इष्यते च कैश्चित्। तत्राचार्यः स्वमतमुपन्यस्यति स्म।

यदुच्यते द्विजातीनां शूद्रा दारोपसंग्रहः।
न तन्मम मतं यस्मात्तत्रायं जायते स्वयम्॥

'कृष्णवर्णीया रामा रमणायैवोपेयत"

इति ब्राह्मणवादः। न च विदुषां कामार्थे प्रवृत्तिर्युक्ता। अतः शूद्राविवाहो न कर्तव्य इत्येतदेव स्पष्टीकरोति हेतुना— यस्मात्तत्रायं जायते स्वयमिति। तथा बह्वृचाः पठन्ति—

पतिर्जायां प्रविशति गर्भो भूत्वा स मातरम्।
तस्यां पुनर्नवो भूत्वा दशमे मासि जायते॥

इति। अतो नैतन्ममाभिप्रेतम्"॥

इदमेवाभिप्रेत्योक्तं कलिवर्ज्यप्रकरणे—

कन्यानामसवर्णानां विवाहश्च द्विजातिभिः ॥ इति।

[उपसंहारः] एवं बहुस्मृतिपर्यालोचनया पतितसंसर्गिणो दोषाभावकथनं पातित्याभावपरम्। तस्मात्संसर्गिणः कलियुगेऽपि पापमेवेति सुष्ठूक्तम्॥

तदत्र विस्तरभयादुपरमन्तो वयमिदमेव सूचयामः—यत् अस्पृश्यतायां हि सजातीयानां मध्ये अशौचादिकं गमकम्, भिन्नजातीयानान्तु भिन्नजातीयत्वं संकरत्वम्। तत्र भिन्नजातीयत्वे संलापनिश्वाससहासनादिकं न विरुद्धम्, सहभोजनादिकं परं विरुद्धम्, संकरजातित्वेऽपि अनुलोमसंकराणां परस्परं शूद्रैस्तैश्च सहासनादिकं न विरुद्धम्, किन्तु एकासनादिकं विरुद्धम्, प्रतिलोमसंकराणां तु परस्परमेकासनादिकं विरुद्धम्, सहासनादिकं तु न विरुद्धम्। भिन्नजातीयानान्तु सहासनादिकमपि तैः सह विरुद्धम्। तत्र दानीमस्माकमालोचनीया अन्त्यजाः प्रतिलोमसंकरजातय एव, यैः साकं सहासनादिकमपि न बहोः कालादारभ्य प्रचलति। तत्र प्रतिलोमसंकराः चातुर्वर्ण्यप्रकाशे विवेचिता एव। एतेषां चोत्पत्तिप्रकारादिकं सर्वं चातुर्वर्ण्यप्रकाश एव विवेचितमस्ति। इदानीं तु अस्माकमत्रेदमेव निरूपणीयम्—यदेतेषामन्त्यजानां स्पर्शः शास्त्रनिषिद्धो वा न वा? यदि निषिद्धः तर्हि कथं वा तैर्व्यवहारः कर्तव्य इति च। अत्र व्यवहारो हि शास्त्रनिषिद्धेऽपि स्पर्शे चण्डालैः ऋणदानादानादिरूपो न योग्य इति मनुनैव विवेचितमस्ति। यथायोगं धर्माविरोधेन परम्परया तैर्व्यवहारस्तु योग्य एव। यदि तु समीपे तेन सम्भाषणमपि कार्यवशेन सम्पादनीयम्, एवमपि वयं स्नानादिकं प्रायश्चित्तमेव

कर्तव्यं मन्यामहे। तदयं विशेषः प्राचीननवीनमतयोः—यत् प्राचीनाः स्पर्शास्पर्शे स्नानं कर्तव्यमिति वदन्ति, न तु स्पर्शमपि कर्तव्यमिति। नवीनास्तु स्पर्शं कर्तव्यमिति तथा स्नानादिकं न कर्तव्यमिति च मन्यते। एवं पूर्वोक्तप्रकारेण पतितानां तत्पुत्राणाञ्च कृतप्रायश्चित्तानामपि न स्वपूर्वतनजातिप्रवेशयोग्यता। पतितकन्यातत्प्रपौत्रयोस्तु कृतप्रायश्चित्तयोः वृद्धप्रपितामहजातिप्रवेशयोग्यता। तत्रापि किञ्चिदूनसंवत्सरमध्ये कृतप्रायश्चित्तानां पतितानामपि स्वपूर्वजातिप्रवेशयोग्यता। वत्सरचतुष्टयमध्य एव कृतप्रायश्चित्तानां पतितानां स्वधर्माधिकारमात्रमपि, तदधिकसंवत्सरं यावन्म्लेच्छादिसंसर्गिणान्तु न स्वधर्माधिकारोऽपि। केवलसहासनादिमात्रे कृते विंशतिसंवत्सरमध्येऽपि स्वजातिप्रवेशयोग्यता। यदि देवलस्मृतिरपि मद्रापिता प्रमाणम्। तदनन्तरन्तु सहवासमात्रेऽपि प्रायश्चित्तानधिकारः। सम्वत्सरादूर्ध्वं कृतप्रायश्चित्तानां विवाहादिगुरुतरसंसर्गस्य स्वजातीयैः साकमेवौचित्यमित्याद्येव पूर्वोक्तं शास्त्रतात्पर्यविषय इति न केवलं संघटनं हिन्दुसंख्याधिक्यं सर्वञ्चाभीप्सितम् पूर्वोक्तव्यवस्थोरीकरणे सिध्यति, किन्तु हिन्दुधर्मगौरवमपि रक्षितं स्यादिति प्रतिभात्यस्माकम्। इतः परन्तु शास्त्रतत्त्वज्ञाः पण्डितशिरोमणय एव प्रमाणमिति प्रकृतमिमं लेखमत्रैव समापयाम—इति शम्॥

इति श्रीसन्तोजीमहाराजादिचाल्यमानसनातन-
धर्मोज्जीविनीसभाङ्गभूतग्रन्थप्रणयनसमिति-
सम्पादिते सनातनधर्मप्रदीपे शुद्धि-
प्रकाशः समाप्तः॥

॥ श्रीः ॥

॥ श्रीमहागणपतये नमः ॥

॥ श्रीविट्ठलेशाय नमः ॥

॥ श्रीगुरुभ्यो नमः ॥

सनातनधर्मप्रदीपः

(४) विवाहप्रकाशः ।

मातामहमहाशैलं महस्तदपितामहम् ।
कारणं जगतां वन्दे कण्ठादुपरि वारणम् ॥

[उपोद्घातः] यत्किलेदानीं समाजसंस्कारप्रियाणामत्यन्तमावश्यकं प्रतिभाति स किल विधवानामुद्वाहः । सुप्रथितञ्च सुविदितञ्चैतदिदानीं सर्वेषां यद्ग्रन्थिज्वरादिभिर्नानाविधैरामयैर्नामशेषत्वमुपयाति नारीणां सौभाग्यमिति । कः पुनरत्राभ्युपायो येन सौभाग्यमेतदेतासामविच्छिन्नं स्यादित्येतद्विचिन्तयद्भिश्चामीभिः समाजसंस्कारप्रणयिभिर्महीयसा प्रयासेनानुसंहितोऽयमभ्युपाय इति यत्सत्यं धन्यवादार्हा एवैते सनातनधर्मीयाणां तनया इति नात्र सन्देहः ? अनेन च प्रयासेन प्रकाममेव नन्देयुर्दिव्यमीषां मातर इत्यत्रापि नास्ति संशयावसरः ? किमधिकं यदि समनुभूय वैधव्यं प्राप्ता दिवमेतास्तदा नूनं वञ्चितमेव मन्येरन् कालेनात्मानम् । किन्तु ये किलाभिमन्यन्ते सनातनं धर्मं येषां वा विद्यते तत्र विश्वासो येषां च प्रमाणमयं येषां वा मते विद्यते किमपि दुरितमिति त एते सुदूरादेव परिहरेयुर्मतमेतदेतेषामिति नात्र सन्देहः ।

यानि चात्र प्रदर्श्यन्ते प्रमाणान्येतैर्याश्च प्रकाश्यन्ते युक्तयो न किल तत्र सारलेशोऽपीत्युपेक्षणीया एव विद्वद्भिः। अत एव च नात्र किमपि केनाप्यावश्यकं वक्तुम्। तथापि येषां नास्ति प्रगाढः परिचयो धर्मशास्त्रप्रबन्धेषु, तेषां किल मतिः समाकर्णामीभिः समुपन्यस्तान् प्रमाणाभासानवश्यं स्वधर्माद्विचलेदिति सम्भाव्यतेऽस्माभिः। अत एव चैतानमीषां प्रमाणाभासांश्च युक्तीश्चेदानीं परीक्षणचक्रमारोपयितुमिच्छामः।

[पूर्वपक्षोपन्यासः] तत्र तावद्यदेतेषां कल्पद्रुमायमाणं वचनं तदेतत् 'नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ। पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते" इति। एतच्च वचनं पराशरस्येव नारदादीनामपि स्मृतिषूपलभ्यते। वचनं चैतद्यथाश्रुतमेव व्याचक्षते च पूर्वापरसङ्गतिमस्योपेक्षन्ते च समाजसंस्कारप्रिया नव्याः। साधयन्ति चैते वचनत एतस्मान्मृते भर्तरि स्त्रीणां पुनरुद्वाहम्। यानि हि पत्यन्तरकरणे निदानानि तत्रास्य मृतत्वमपि सङ्गृहीतमेवेति। सम्यगेव समभ्यस्यतां वचनमेतदुपर्युपरिदर्शिभिर्नातिसमभ्यस्तसंस्कृतैश्छात्रैरिति समुपनिवेशितं संस्कृतपुस्तक आत्मीये विदुषा श्रीमता रामकृष्णगोपालभाण्डारकरमहाशयेन। तदेतदुचितमनुचितं वेति छात्राणां राजकीयचर्चायामनधिकारं ब्रुवाणैः स्वयमेव तावद्विचिन्त्यतां नव्यैः। वयन्तु नैतदमीषामनुकूलं वचनमित्येवेदानीं समर्थयितुमिच्छामः।

[पूर्वपक्षखण्डनपूर्वक-विधवाविवाहाशास्त्रीयत्वम्] तत्र तावन्न कचिदप्युपनिबद्धः केनापि सूत्रकृता विधवोद्वाहविधिः। आश्वलायनादयो हि सूत्रकृतो 'मृते भर्तरि ब्रह्मचर्यं तदन्वारोहणं वा'

इति सूत्रयामासुः। ततश्च मृते भर्तरि साध्वीनां द्वयी गति ब्रह्मचर्यं वा तदनुगमनं वेति। प्रशंसितञ्च ब्रह्मचर्यं श्रीमता मनुना—

मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता।
स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः॥ इति॥

सहगमनमपि श्रीमता मनुनेव व्यासादिभिरपि विधीयते—मृतं भर्तारमादाय ब्राह्मणी वह्निमाविशेत्—इति। यथा पुनर्मृते भर्तरि ब्रह्मचर्यं तदन्वारोहणं वेत्यनुशिष्यते, नैवं मृते भर्तरि पत्यन्तकरणं विधीयते क्वापि। प्रत्युत सविशेषमेवैतन्निषिद्ध्यते—न तु नामापि गृह्णीयात्पत्यौ प्रेते परस्य तु—इत्यादिना मन्वादिभिः। न केवलमेतावत् किन्तु विवाहविधौ नास्त्येव क्वापि विधवायाः पुनरुद्वाहवचनमिति प्रतिज्ञायते मनुना—न विवाहविधावुक्तं विधवावेदनं पुनः—इति। न केवलं स्मृतिष्वेव निषिद्धो विधवोद्वाहः, किन्तु साक्षाच्छ्रुतावेव प्रतिषिद्धोऽयम्। यथा—यदेकस्मिन् यूपे द्वे रशने परिव्ययति, तस्मादेको द्वे जाये विन्दते। यन्नैकां रशनां द्वयोर्यूपयोः परिव्ययति, तस्मान्नैका द्वौ पती विन्दते (तै० सं० प्र० ५ कां० ६ अ० ४)—इति हि श्रूयते। याजुषी चेयं श्रुतिः। ऋचापि प्रतिषिद्ध एव पुनरुद्वाहः। 'तस्मादेकस्य बह्व्यो जाया भवन्ति नैकस्यै बहवः सहपतयः' इति।

[ऋग्गतसहपदवि-वेचनम्]

यत्त्वत्र सहेति युगपदित्यर्थ इति व्याचक्षते केचिदर्वाचीनास्तत्प्रामादिकमेव, याजुषश्रुतिविरोधापत्तेः। तत्र हि यूपरशनादृष्टान्तस्वारस्येन स्त्रीणां पुरुषान्तरसम्बन्धयोग्यतापि नास्तीति गम्यते। अयम्भावः—अत्र सहेत्यस्य युगपदित्यर्थग्रहणेन किंवा सिषाधयिषितम्? यदि कालान्तरे स्त्रीणां पुरुषान्तरसम्बन्धो न दोषायेति? किम्भवन्तः कुत्रापि श्रुतवन्तो

रशनायास्तस्या एव कालान्तरे यूपान्तरसम्बन्धयोग्यता वर्तत इति। नहीदं सम्भवति। तथाच प्रकृतदृष्टान्तस्वारस्यं रशनानां एकयूपसम्बन्धवत् स्त्रीणामप्येकपुरुषसम्बन्धयोग्यतैव वर्तते इत्यभिप्रायमेव समुचितं भवति। वस्तुतस्तु रशनानामपि बहुपशुके यागे न युगपदेकयूपसम्बन्धः, किन्तु क्रमेणैवेति सहेति युगपदिति वा विवक्षणमप्रमाणिकमेव। अनेन हि दृष्टान्तेनेदमेव सूच्यते—यत्प्रथमरशनासम्बन्धकाल एव रसनान्तरसम्बन्धवत् प्रथमस्त्रीसम्बन्धकाल एव पुरुषस्यापि स्त्र्यन्तरसम्बन्धयोग्यतापि। स्त्र्यन्तरसम्बन्धश्च साक्षाद्वाऽग्निद्वारा वेत्यन्यदेतत्। अत एव द्वितीयस्त्रीविवाहोऽपि स्त्रियाः प्रथमाया अनुमतावेव भवतीत्येव शास्त्रसिद्धान्तः। तथैवेदानीमाचारोऽपि वर्तते। अत एव विना सहपदं याजुषश्रुतिप्रवृत्तिरुपपद्यते। अत्र याजुषश्रुतौ दृष्टान्तस्य विश्यमानत्वात्प्राबल्यमूरीकर्तव्यम्। तथाच यत्र द्वितीयस्य पत्युर्निषेधस्तत्र तृतीयादीनां विधिनैव सङ्गच्छत इति सर्वथा प्रतिषिद्ध एव श्रुतिषु पुनरुद्वाह इत्यनिच्छतापि स्वीकरणीयं भवति। एवञ्च श्रुत्यनुगतः स्मृतिषु च प्रतिपादितो विधवानां पुनरुद्वाहनिषेधः। कण्ठतश्चायं प्रतिषेधो न पुनरानुमानिको निर्दिष्टोऽस्माभिः। अस्ति चानुमानिको निषेधः। तथाहि श्रूयते—मह्यं त्वादुर्गार्हपत्याय देवाः—इति। सर्वञ्च वाक्यं सावधारणं भवति। ततश्च देवास्त्वां मह्यमेवादुरित्यर्थो निष्पद्यते। अतश्च प्रतीयते नास्ति श्रुतिषु विधवोद्वाहाभ्यनुज्ञानमिति। अवधारणं ह्येतदन्यस्मै प्रदानं प्रतिषेधतीति

[श्रुत्यन्तरेणापि विधवाहस्य अशास्त्रीयता] अस्ति च श्रुत्यन्तरं येन विधवोद्वाहस्य प्रतिषेध एव प्रतीयते। तथाहि 'सोमो ददद्गन्धर्वाय गन्धर्वो ददग्नये। रयिञ्चपुत्रांश्चादादग्निर्मह्यमथो इमाम्"

इति । एतच्च देवा अदुरिति पूर्वोक्तश्रुतिश्रुतवचनविवरणमेव । अन्यच्च श्रूयते—सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः । तृतीयो अग्निष्टे पति स्तुरीयस्ते मनुष्यजः—इति । अत्र मनुष्यजस्य तुरीयत्वप्रतिपादनात् पञ्चमादिः पतिरर्थान्मानुषो द्वितीयादिः पतिर्नास्त्येवेति प्रतीयते । अन्यथा हि तुरीय इति वैयर्थ्यमापद्येत । तदेवं सर्वथा प्रतिषिद्ध एव श्रुतिषु पुनरुद्वाहो विधवानामिति सिद्धम् । अत एव च—नष्टे मृते प्रव्रजिते—इत्यादीनां पराशरादिवचनानां विधवाव्यूढोद्वाहविषयत्वमिति केषाञ्चिद्वचनमेकान्तत एवान्याय्यम् । वचनानामेषामूढापुनरुद्वाहविषयत्वे त्याज्यतापातात् । तद्धि त्याज्यमेव स्मृतिवचनं यच्छ्रुतिविरुद्धं भवति । श्रुतिस्मृतिविरोधे तु श्रुतिरेव बलीयसी”—इति स्मरणात् । जैमिनिरप्याचार्यो ‘विरोधे त्वनपेक्ष्यं स्यादसति ह्यनुमानम्” इति सूत्रेण श्रुतिविरुद्धत्वे स्मृतिवचनानामनपेक्षणीयत्वमेवाह । अतश्च यथैतच्छ्रुत्यविरोधेनैव संगमयितुं शक्येत,तथैव योजनीयमित्यापतितम् । अस्ति च वचनोऽस्य श्रुत्यविरोधेनैव सङ्गतिसम्भवः । तथाहि—‘नैका द्वौ पती विन्दते’इत्यादिषु श्रुतिवचनेषु नार्याः पत्यन्तरकरणं निषिध्यते । मुख्यञ्च पतित्वं तदा भवति यदा सप्तपदोपरिक्रमणं निष्पद्यते ; न तु ततः प्राक् । तदाहुः—नोदकेन न वा वाचा कन्यायाः पतिरुच्यते । पाणिग्रहणसंस्कारात् पतित्वं सप्तमे पदे—इति । मनुरपि सप्तपदीपरिक्रमणमेव भार्यात्वं निष्पादयतीत्याह—पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम् । तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे—इति । इत्थं वाचा प्रदत्तायामपि सप्तपदीपरिक्रमणात्प्राक्भार्यात्वानिष्पत्तेस्तां पुनरन्यस्मै दद्याद्यदि पतिर्म्रियते इत्युक्तं स्मृतिषु—अद्भिर्वाचा च दत्तायां म्रियेतादौ वरो यदि । नच

मन्त्रोपनीता स्यात्कुमारी पितुरेव सा—इति। आदौ सप्तपदीपरिक्रमणात्प्रागित्यर्थः। पितुरेवेति षष्ठ्या तस्याः प्रदानादिषु पितुरधिकार इति द्योत्यते। अतश्च वाग्दानोत्तरं सप्तपदीपरिक्रमणातः प्राक्पतिमरणे तददर्शने तस्य क्लीबत्वादिज्ञाने वा नार्याः पत्यन्तरणं विधीयते पराशरेण 'नष्टे मृते' इत्यादिनेत्येतदेव कल्पनं न्याय्यम्, न पुनः सप्तपदीपरिक्रमणोत्तरम्। प्रोक्तपूर्वश्रुत्यादिवचनविरोधापातादिति द्रष्टव्यम्। अद्भिर्वाचा च दत्तायामिति प्रभृतिवचनानुरोधेन 'नष्टे मृते' इत्यादि वचने विद्यमानं पतिपदं गौणपतिपरमेवेति प्रकल्प्यते। गौणश्च पतिर्यस्मै वाचा प्रदीयते कन्या स एव। वाचापि हि प्रदत्तायां कन्यायां प्राहुरयमेवमेतस्याः पतिरिति। पताविति पदमपि गौणपतिवाचकत्वे आत्मनः प्रमाणम्। पतिः समास एवेति हि समास एव पतिशब्दस्य घिरिति संज्ञा प्रोच्यते वैयाकरणैः। ततश्च समास एव पताविति रूपं स्यान्नान्यथा। घित्वमन्तरा तथाविधरूपानिष्पत्तेः। घित्वाभावे पुनः पत्याविति रूपमेव स्यात्। तेनात्र पराशरवचने गौणएव पति शब्दः कल्प्यते। पतिरिव पतिसदृशः, वाचा निर्वृत्तप्रदान इत्यर्थः। पतिः समास एवेत्यनुशासनञ्च मुख्य एव पतिशब्दे प्रवर्तते। गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्यय इति न्यायात्। अतश्च वाग्दानोत्तरं सप्तपदीपरिक्रमणात्प्रागेव वरे नष्टे मृते प्रव्रजिते क्लीबे पतितेऽपि वा कन्याया अन्यस्मै प्रदानं न्याय्यमिति संसिद्धम्। ततः परं पुनः श्रुतिविरोधान्निषिद्धमेवेति द्रष्टव्यम्। यत्तूक्तं माधवेन नष्टे मृते इत्यादिना पराशरेण विहितः पुनरुद्वाहो युगान्तरविषय इति। तन्न; पराशरस्मृतेः कलिविषयत्वेन युगान्तरीयोद्वाहस्य तत्रोपनिबन्धनेन प्र.ोजनाभावात्। अत एव पराशरस्मृतिं

व्याचक्षणा नन्दपण्डिता विद्वन्मनोहरायां प्राहुः—वाग्दानानन्तरं पाणिग्रहणात्प्राक् पतावुत्पत्स्यमानपतित्ववति पूर्वस्मिन् वरे नष्टे दूरदेशगमने वापरिज्ञातवृत्तान्ते, मृते लोकान्तरं गते, प्रव्रजिते क्लीबे वा सति एवंविधासु पञ्चस्वापत्तिषु नारीणां कन्यानामन्यः पतिर्विधीयत इत्यर्थ—इति। एतेन—नष्टे मृते इत्यनेन वचनेनाक्रमोढायाः पुनरुद्वाहं प्रकल्पयन्तः— परास्ताः।

[प्रकारान्तरेणशङ्का-समाधाने] अत्रेयं स्वत एव शङ्का समुद्भवति—यद्यदि वाचा दत्ताया एव पुनरुद्वाहो न तूढायास्तदा—स तु यद्यन्यजातीयः क्लीबः पतित एव वा। विकर्मस्थः सगोत्रो वा दासो दीर्घामयोऽपि वा। ऊढापि देया सान्यस्मै सहाभरणभूषिता इत्यादि वचनेषु यदूढाया अपि प्रदानं प्रसङ्गविशेषेऽभ्यनुज्ञायते, तस्य का गतिरिति। तत्रोच्यते—ऊढापीत्यत्रापिः सम्भावनार्थकः। स च कैमुतिकन्यायेन वाग्दत्ताया एव प्रदानं द्रढयति। न पुनरूढायाः पुनरुद्वाहम्। स्वार्थे तात्पर्याभावात्। यथा अपि गिरिं शिरसा भिन्द्यात्। अत्रापिना न शिरसा गिरिभेदनं प्रोच्यते, किन्तु शिरसो दार्ढ्यातिशय एव। यथा "वाऽनुत्तमो रसो ह्येष प्रमीतमपि चेतयेत्" इत्यत्रापिना। न हि प्रमीतस्य (मृतस्य) प्रत्युज्जीवनं प्रोच्यते, किन्तु जीवतोऽवश्यमारोग्यापादनमेव। एवमूढापीत्यत्राप्यपिशब्दो द्रष्टव्यः। धर्मशास्त्रे कैमुतिकन्यायो नाश्रीयते इति स्वाग्रहमात्रम्; गौरीतृतीयादिनिर्णयेषु तदङ्गीकारस्यानेकशो दृश्यमानत्वात्। यदि च ऊढापि देयेत्यत्र न कैमुतिकन्यायाङ्गीकारस्तदा सगोत्रेणोढाया अपि पुनरन्यस्मै प्रदानं प्राप्नुयात्। न चैतद्युक्तम्; 'भोगतस्तां परित्यज्य पालयेज्जननीमिव" इत्युक्तेः। तदेवमूढापीत्यनेन वाग्दत्तायाः पतिमरणाद्यापत्सु सप्तपदीपरिक्रम-

णात् प्राक् पुनरन्यस्मै प्रदाने न दोष इत्येव प्रतिपाद्यते, न तु सप्तपदीपरिक्रमणोत्तरम्। सप्तपदीपरिक्रमणोत्तरं हि विवाहस्य प्रतिष्ठिततया कन्यात्वच्युतेः पुनर्विवाहो निषिद्ध इत्यन्यत्राप्युक्तम्। 'पाणिग्रहणसंस्काराः कन्यास्वेव प्रतिष्ठिताः। नाकन्यासु क्वचिन्नृणां लुप्तधर्मक्रिया हि ताः, इति।

[दानेनापि तद्दशा स्त्रीयता] किञ्च दानञ्चात्मनः स्वत्वं निवर्त्यान्यदीयस्वत्वस्यापादनम्। यथा ब्राह्मणाय दत्ता दक्षिणेत्यादौ दक्षिणाभूते द्रव्ये यत्प्रागासीद्दातुः स्वत्वं तन्निराकृत्य तेन ब्राह्मणस्य स्वत्वमापादितमित्यर्थः। एवञ्च दत्तायां दक्षिणायां ब्राह्मणस्वत्वस्योत्पत्तौ तत्प्रदाने पुनर्न दातुरधिकारः। एवं कन्यादानेऽपि कन्यानिष्ठं यत्पितुः स्वत्वं तस्य विवाहपूर्वतनेन प्रदानविधिना निवृत्तिः पतिस्वत्वस्य चोत्पत्तिर्भवति। ततश्च दत्तायाः कन्यायाः पुनः प्रदाने न पितुरधिकारः इति द्रष्टव्यम्। न च मृते पत्यौ भार्यागतं तदीयं स्वत्वं निवर्तते। यदि हि निवर्तेत, तदा विधवाधर्माणां तिलाञ्जलिप्रदानापत्तिः। भार्यात्वमेव ह्येतेषामाचरणे हेतुः। स्वत्वस्य च निवृत्त्या भार्यात्वनिवृत्तिरर्थादेवायाता। ततश्च तत्प्रयुक्तधर्माणां मृते भर्तरि वैयर्थ्यं दुष्परिहरमेवेति जानीयुरेव विद्वांसः। अत एव च 'सकृत् प्रदीयते कन्या' इति भारतम्, 'सकृत्कन्या प्रदीयते' इति मनुः, 'दत्ता कन्या न दीयते, इति क्रत्वादयश्च सङ्गच्छन्ते।

["नष्टेमृते" इतिवचनस्य नियोगपरत्वम्] नारदस्मृतौ तु नष्टे मृते इत्यादिवचनं नियोगपरमेवेति स्फुटीभवति। उपक्रमोपसंहाराभ्यां तत्र तस्य नियोगपरतयैवावगम्यमानत्वात्। नियोगश्च वंशक्षयापत्तौ श्वशुरादिभिर्नियुक्तायाः स्त्रियो देवरादिभ्यः पुत्रोत्पादनम्।

स च युगान्तरविषयः। 'देवराच्च सुतोत्पत्तिः कलौ पञ्च विवर्जयेत्, इत्यादिनिषेधस्य परःशतेषु विद्यमानत्वात्।

तदेवं नष्टे मृत इत्यादिवचनस्य सप्तपदीपरिक्रमणातः प्रागेव प्रवृत्तिर्न तु तदुत्तरमिति निर्विशङ्कमेव स्फुटीभवति। तत एव च 'विद्यत एव धर्मशास्त्रे विधवोद्वाहविधि' रिति वचनं प्रतारणमात्रमेव बोद्धव्यमिति केचित्।

["नष्टेमृते" इति वचनस्य परिवेदनविषयत्वम्]

अन्ये तु—नष्टे मृते प्रव्रजिते इति वचनं परिवेदनप्रकरणे पराशराचार्यैरुपनिबद्धम्। इयमत्र प्रकरणशुद्धिः क्रियते। तद्यथा—

परिवित्तिः परिवेत्ता च यया च परिविद्यते।
सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः॥
द्वौ कृच्छ्रौ परिवित्तेस्तु कन्यायाः कृच्छ्र एव च।
कृच्छ्रातिकृच्छ्रे दातुस्तु होता चान्द्रायणं चरेत्॥
कुब्जवामनषण्डेषु गद्गदेषु जडेषु च।
जात्यन्धे बधिरे मूके न दोषः परिविन्दतः॥
पितृव्यपुत्रः सापत्नः परनारीसुतस्तथा।
दाराग्निहोत्रसंयोगे न दोषः परिवेदने॥
ज्येष्ठो भ्राता यदा तिष्ठेदाधानं नैव कारयेत्।
अनुज्ञातस्तु कुर्वीत शङ्खस्य वचनं तथा॥
नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते॥ इति॥

अत्र यदि 'परिविन्दानः कृच्छ्रातिकृच्छ्रौ चरित्वा तस्मै दत्त्वा पुनर्विशेत ताञ्चैवोपयच्छतेति' वसिष्ठवचनोक्तरीत्या तस्मै ज्येष्ठाय तामूढां कन्यां निवेद्य तदनुज्ञातः पुनस्तामेवोद्वहेत् परिवेत्तुरेव

विवाहः पुनः परिविद्यमानया साकं यः शास्त्रसम्मतः, तस्मिन् परिवेतृरूपस्य पत्युः पुनर्विवाहात्पूर्वं नष्टत्वमृतत्वादौ पत्यन्तरविधानमिति विवक्ष्यते, तर्हि—

यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ।
तामनेन विधानेन निजो विन्देत देवरः ॥ इति ॥

मनुवचनानुसारेण वाग्दत्ताया अपि तस्याः परिवित्तिरूपेण देवरेण विवाहस्यैव युगान्तरसिद्धस्य निषेधेन यः कश्चिदन्यो विधीयते पतिरित्यर्थो भवति। अत्र परिवित्तिविवाहोऽपि पुनर्विवाहे वाग्दानानन्तरकालिकत्वाभिप्राय एवेति न दोषः। तत्र च युगान्तरे पुनर्विवाहोऽसौ वाग्दानानन्तरं देवरमात्राधिकारिकः, नत्वन्याधिकारिकः। कलौ तु देवराच्च सुतोत्पत्तिरिति देवराधिकारिकोक्तपुनर्विवाहस्य निषेधात् अन्याधिकारिकत्वमुपपद्यत एव। एवञ्च देवराच्च सुतोत्पत्तिरिति कलिवर्ज्यप्रकरणगतवाक्यस्येयं पराशरस्मृतिरेव मूलमित्यपि सिद्धं भवति।

[उक्तार्थे कृष्णभट्टसम्मतिः] अयञ्चाशयो निर्णयसिन्धुव्याख्यायां कृष्णभट्ट्यामपि व्यक्तः। तत्र ह्येवमुक्तम्—देवराच्च सुतोत्पत्तिरिति च वाग्दानोत्तरं मृते पत्यौ देवरपरम्।

यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः।
तामनेन विधानेन निजो विन्देत देवरः ॥

अनेन विधानेन—घृताभ्यङ्गादिवन्नियोगविधानेन।

यथाविध्यभिगम्यैनां शुक्लवस्त्रां शुचिव्रताम्।
मिथो भजेताप्रसवात् सकृत्सकृदृतावृतौ ॥

इति मनुना, अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया।
सपिण्डो वा सगोत्रो वा घृताभ्यक्त ऋतावियात् ॥

इति याज्ञवल्क्येन च तदनुज्ञानात्। न तु विवाहानन्तरं विधवायाम्। नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभिः— इति मनुना विवाहानन्तरविधवानियोजननिषेधात्। नचैवं भारते कथं सत्यवत्या कनिष्ठभ्रातृजायायां विधवायां व्यासो नियुक्त इति वाच्यम्; तत्र धनेनोपतोष्य कश्चन ब्राह्मणो नियोज्य इति भीष्मानुज्ञया सत्यवत्यास्तथाकरणेन निषेधगतान्यपदस्य ब्राह्मणेतरान्यपरत्वात्। अन्यथा ब्रह्मक्षत्रियदेवक्षत्रियभेदो न स्यात्। महाप्रभावतया दोषकल्पनाविरहेणान्यपदस्य यथाश्रुतार्थकत्वाद्वा। देवराच्चेति चकारादनुज्ञातसपिण्डसगोत्रयोरपि परिग्रहः।

[कलिविषयत्वेऽपि देवरातिरिक्तस्यैवदाने नष्टे मृते इत्यस्य तात्पर्यम्]

ननु पराशरेण कलावनुष्ठेयान् धर्मान् वक्ष्यामीति प्रतिज्ञाय नष्टे मृते इति वचनात् वाग्दत्तायाः कलौ पत्यन्तरमस्तीति कथं वाग्दत्तापहारः कलिवर्ज्य इति चेत्, वाग्दानानन्तरं तन्मरणे पराशरवचनात्तस्या वरान्तरेण विवाहः कार्यः।

कन्यायां शुल्कदत्तायां म्रियेत यदि शुल्कदः।
देवराय प्रदातव्या यदि कन्याऽनुमन्यते॥

इत्युक्तवाक्ये कन्याया अननुमतौ पुरुषान्तरदानलाभात्।

इयांस्तु विशेषः—यत् युगान्तरे कन्यानुमतौ देवराय दातव्या कलौ तु कन्यानुमतावपि देवराय सा न देया; नियोगसाम्यात्, देवराच्च सुतोत्पत्तिरिति सामान्यतो निषेधात्— इति। तथा च परिवेदनाद्यक्रमप्राप्ते विवाहे पूर्वतनस्य वरस्य नाशादौ परिवित्तेर्विवाहनिषेधपरमेवेदं प्रकरणमिति प्रकरणशुद्धिरपि सम्यगेव वर्तते। माधवाचार्याणामप्ययमेवाशयः। इमानि हि तदीयान्येतच्छ्लोकप्रकरणगतानि वाक्यानि। तद्यथा—

"परिदेवनपर्याधानयोरिव स्त्रीणां पुनरुद्वाहस्यापि प्रसंगात् क्वचिदभ्यनुज्ञां दर्शयति—नष्टे मृत इति। अयञ्च पुनरुद्वाहो युगान्तरविषयः। तथा चादित्यपुराणम्—ऊढायाः पुनरुद्वाहं ज्येष्ठांशं गोवधं तथा। कलौ पञ्च न कुर्वीत भ्रातृजायां कमण्डलुम्। इति॥ अत्रोढाशब्देन विधिवदूढा ग्राह्या। अन्यत्रैव पुनरुद्वाहस्याप्यङ्गीकृतत्वात्—इति। अयम्भावः—परिवेदनं पर्याधानञ्च पुंसां प्रायश्चित्तपूर्वकं यथाऽभ्यनुज्ञातम्। एवं स्त्रीणां पुनरुद्वाहोऽपि परिवेदनाङ्गभूतः क्वचिदवस्थायां देवरं विहायान्यकर्तृकोऽपि भवतीत्यवतरणिकया विवक्षितम्। तथा च देवरान्यकर्तृकोऽयं विवाहो न युगान्तरविषयः; युगान्तरे देवरकर्तृकस्यैव विवाहस्य मन्वादिना विधानात्। यत्त्वत्र मुद्रितपुस्तकेषु 'अयञ्च पुनरुद्वाहो युगान्तरविषयः, इतिपाठो दृश्यते। तत्रात्र विधीयमानस्य देवरान्यकर्तृकस्य पुनर्विवाहस्य युगान्तविषयत्वाभावाद्युगान्तराविषय इत्येव योजनीयम्। तथा सति हि कलावनुष्ठेयान् धर्मान् वक्ष्यामीति पराशरप्रतिज्ञाप्यनुल्लङ्घिता माधवाचार्यैर्भवति। यथा चात्र कलिनिषिद्धस्यैव युगान्तरधर्मस्य पुनर्विवाहस्य पराशरेण प्रतिपादनं न सम्भवति, तथा चतुर्विंशतिमतसंग्रहे व्यक्तम्। तदुक्तं 'न च कलिनिषिद्धस्यापि युगान्तरीयधर्मस्यैव नष्टे मृते इत्यादि पराशरवाक्यं प्रतिपादकमस्त्विति प्रतिज्ञाय तद्ग्रन्थप्रणयनात्'—इति। तथा चास्य पुनर्विवाहस्य युगान्तरविषयत्वप्रतिपादनं न माधवाचार्यसम्मतम्। माधवाचार्या अपि हि नष्टे मृते इति श्लोकस्य परिवेदनाद्यक्रमप्राप्ते विवाहे देवरान्यकर्तृकत्वबाधकत्वमेवाभिप्रयन्ति। तदुक्तम् प्रायश्चित्ताध्यायस्योपसंहारावसरे 'नष्टे मृते इति पुनर्विवाहविधिः परिवेदनाद्यक्रमप्राप्तविवाहविषयत्वेनान्यथासिद्ध' इति। तथा

चोक्तोपसंहारवाक्यानुसारेण परिवेदनाद्यक्रमविवाह एव यद्यत्र विवक्ष्यते, तर्हि तदङ्गभूतपुनर्विवाहोऽन्यकर्तृकः कथं युगान्तरविषय इति भवेत्। न हि युगान्तरेऽपि कन्यानुमतौ देवरान्यकर्तृक विवाहो वैधः, न वा ऊढायाः पुनरुद्वाहमित्यादित्यपुराणं देवरान्य कर्तृकविवाहपरमेव। अत एव हि देवराच्च सुतोत्पत्तिरिति वचनान्तरैकवाक्यता भवति। ननु कथं न देवरान्यकर्तृकविवाहोऽपि युगान्तरविषय इत्यत आह—तथाचेति (माधवीये) तथा चोक्तादित्यपुराणे देवरकर्तृकपुनर्विवाहस्यैव कलौ निषेधात् युगान्तरविषयत्वम्, नान्यकर्तृकस्येति न दोषः। यद्यपि—प्रतिगृह्य तु यः कन्यां नरो देशान्तरं व्रजेत्। त्रीन् ऋतून् समतिक्रम्य कन्याऽन्यं वरयेद्वरम्॥

प्रदाय शुल्कं कन्याया गच्छेद्यः स्त्रीधनं तथा।
धार्या सा वर्षमेकन्तु देयान्यस्मै विधानतः॥ नारदः॥
स तु यद्यन्य जातीयः पतितः क्लीब एव वा॥
विकर्मस्थः सगोत्रो वा दासो दीर्घामयोऽपिवा॥
ऊढापि देया सान्यस्मै सहाभरणभूषिता॥ कात्यायनः)

इत्यादिवचनैर्वाग्दत्ताया युगान्तरेऽप्यन्यकर्तृको विवाहो विहितो वर्तते। तथापि नेमानि वचनानि कन्याया देवरकर्तृकविवाहानुमतावपि अन्यकर्तृकविवाहबोधकानि, किन्तु तदननुमतावेव तत्पराणि। अत एव—

कन्यायां शुल्कदत्तायां म्रियेत यदि शुल्कदः।
देवराय प्रदातव्या यदि कन्याऽनुमन्यते॥ इति—

कन्यानुमत्यां देवरायैव देयत्वव्यवस्थापनमुपपद्यते। तथाच कन्यानुमतावपि देवरकर्तृकत्वनिषेधार्थमिदं वचनमित्येव युक्त-

मिति तदानीमन्यकर्तृकविवाहस्य युगान्तरेऽप्यप्राप्तत्वात् 'अयं च पुनरुद्वाहो युगान्तरविषयः, इति पाठोऽसङ्गत एव। अन्यथोढायाः पुनरुद्वाहः कलौ निषिद्ध एव पराशरेण व्यवस्थापितः स्यादिति सर्वसम्मतकलिधर्मनिरूपणं न पराशराचार्यैः कृतं स्यादिति प्रतिज्ञाविरोध आपद्येत। यथा च 'कलौ पाराशराः स्मृताः' इति वचनस्य व्रतविशेषमात्रविषयत्वं तथा माधवाचार्यैरुपक्रम एव व्यवस्थापितमिति स्मृत्यन्तरादित्यपुराणादिप्राप्तपुनर्विवाहाधर्मत्वं न पराशरस्मृत्या बाधयितुं शक्यम्। तथा च कन्यानुमतावपि अन्यस्मा एव कन्यापरिवेदनेऽन्यत्र वा दानं भवतीत्येवमाशया एव माधवाचार्याः। एवं सति हि पतिरन्यो न विद्यते इति पाठान्तरमप्युपपन्नं भवति। अत्र ह्यन्यपदेन देवर एवेति विवक्षितमिति नार्थभेदः। तथाचायं पुनरुद्वाह इत्यनेनात्र पक्षे निषिध्यमानपुनर्विवाह इत्यर्थः। कुत्र निषेध इति शङ्कायां च तथाचेति ग्रन्थ इत्यादि सर्वमुपपन्नम्। अत्रोढापदेन च सप्तपदीपूर्वतनसंस्कारसंस्कृताया विवक्षणमित्यङ्गीकारेऽपि न क्षतिः। तस्याअपि देवरमात्रोद्देश्यकदेयतानिषेधेनोक्तवाक्ययोजनसम्भवात्। तथा च माधवाचार्याणामपि कृष्णम्भट्टीसमादृतपक्ष एव तात्पर्यमित्येव गम्यते। एवं सति हि नन्दपण्डितानां विद्वन्मनोहरापि पराशरस्मृतिव्याख्याऽविरुद्धा भवति। एतान्यत्र तदीयानि वाक्यानि सर्वेषाम्पुरत उपस्थाप्यन्ते। तद्यथाः—नन्वस्तु परिवेदने कन्याया ज्येष्ठसमर्पणानन्तरं पुनस्तेनैव विवाहः, वाग्दानानन्तरमनिष्पन्ने विवाहे तु वरवैगुण्ये ज्ञाते कथमित्यत आह—

नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते॥ इति॥

वाग्दानानन्तरं पाणिग्रहात् प्राक् पत्यौ उत्पत्स्यमानपतित्वे पूर्वस्मिन् वरे नष्टे नारीणां कन्यानामन्यः पतिर्विधीयते । नन्वस्तु वाग्दत्तायां नष्टे पत्यौ पत्यन्तरविधानम्, मृते तु तन्नोपपद्यते । 'यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः तामनेन विधानेन निजो विन्देत देवरः' इति मानवे देवरेण तदुद्वहनस्मरणात् । नचैतावतापि समीहितसिद्धिः; देवराच्च सुतोत्पत्तिरिति कलौ तन्निषेधात् । न च निषेधस्य विवाहानन्तरविधवाविषयत्वमस्तु । तस्य—नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभिः—इत्यनेन मनुनैव पूर्वं साधारणतया निषिद्धत्वेन कलौ विशिष्य तन्निषेधानुपपत्तेः । तस्माद्वाग्दानानन्तरं मृते पत्यौ पत्यन्तरविधानमनुपपन्नमिति चेत्सत्यम् , तादृशविवाहस्य वाचनिकत्वेन देवरस्य पतित्वानुपपत्तेर्विशेषनिषेधाच्च । इति । एतैरपि वाक्यैः स्पष्टमिदमेवावगम्यते यद्वाग्दानानन्तरं देवरकर्तृकविवाहनिषेध एवोक्तवाक्यस्य तात्पर्यमिति । अयमत्र निष्कर्षः—युगान्तरे वाग्दानानन्तरं देवरकर्तृकत्वमन्यकर्तृकत्वञ्च । तत्र च कन्यानुमत्यननुमती निमित्ते । कलौ त्वन्यमात्रकर्तृकत्वमिति पराशरस्मृतिरियं न कथमपि विवाहानन्तरविधवाविषया । गत्यन्तराभावे खलु तथा वक्तव्यम् । पूर्वोक्तरीत्या गत्यन्तरे च सति किमर्थं तत्कल्पनम् । यदा तु मृते इत्यस्य विद्वन्मनोहरोक्तरीत्या दीर्घामये इत्यर्थो विवक्ष्यते, तदा तु न कापि हानिः । अन्यथा मरणानन्तरमिव देशान्तरगमनानन्तरमपि पत्यन्तरविधानापत्तिरिति दीर्घामयानां पतीनां जीवनकाल एव पुनर्विवाहकल्पनापत्तिः । नचेष्टापत्तिः । पत्युर्दीर्घामयत्व इव दासत्वेऽपि—

विकर्मस्थः सगोत्रो वा दासो दीर्घामयोऽपि वा ।
ऊढापि देया सान्यस्मै सहाभरणभूषिता ॥

इति पुनर्दानविधानात् सर्वेषामपीदानीन्तनानां प्रायेण दासत्वात् सर्वासामपि पुनर्विवाह आपद्येत। अत्र द्यूढापदेन वाग्दत्तैवावश्यं ग्रहीतव्या। अन्यथा हि पुनर्दानविधिरत्यन्तमेवासङ्गतः स्यात्। किञ्च नष्टे मृते इति वाक्यस्य विवाहानन्तरपतिनाशादिविषयत्वे धार्या सा वर्षमेकन्तु देयाऽन्यस्मै विधानतः—इति केनचन निमित्तेन देशान्तरं गत्वा स्ववृत्तान्तो यैर्वत्सरं यावन्न निवेदितस्तदीया भार्याः सर्वा अप्यन्यस्मै देया इति विवक्षणीयम्। तथाच पत्युःप्रोषितस्याविदितवृत्तान्तस्य द्वादशवर्षपर्यन्तं प्रतीक्षणं संस्कारादिकरणार्थं कर्तव्यमित्यादिसिद्धान्ता व्याकुप्येरन्। तथाच नष्टे मृते इति वाक्यं न कथमपि पुनर्विवाहस्य विधवानामूढानां प्रोषितभर्तृकाणां वा साधकम्। एवं व्याख्यानेन हि उत्तरश्लोकयोरपि समन्वयोऽतिस्वरसो भवति। ताविमावुत्तरश्लोकौ—

मृते भर्तरि या नारी ब्रह्मचर्यव्रते स्थिता।
सा मृता लभते स्वर्गं यथा ते ब्रह्मचारिणः॥
तिस्रः कोट्योऽर्धकोटी च यानि लोमानि मानुषे।
तावत्कालं वसेत्स्वर्गे भर्तारं याऽनुगच्छति॥

इति। अत्र श्लोकद्वय एव मृतभर्तृकाया ब्रह्मचर्यानुगमनाभ्यामेव फलविशेषाम्नानम्, न तु पूर्वस्मिन् श्लोके प्रत्यन्तरविधानेन फलविशेषोऽपि। तथा च मृतभर्तृकायाः कर्तव्यद्वयमेव फलवचनतात्पर्येणावगम्यते, न तु कर्तव्यत्रयमपि, पूर्वत्र फलाश्रवणात्। अन्यथा देशान्तरगमनेऽपि मृतत्व इव ब्रह्मचर्यव्रतं न स्यात् इति प्रोषितभर्तृकाया अब्रह्मचर्यमपि न दोषाय स्यात्। अस्मन्मते तु वाग्दत्ताया ब्रह्मचर्यव्रतभङ्गस्यैवाप्रौढाया असम्भवान्न कोऽपि दोषः। यथा चतुर्मतीविवाहो न शास्त्रीयस्तथाऽवसरान्तरे निरू-

पयिष्यामः । यदि त्वत्र सूत्रे भर्तरीति नष्टत्वादीनामुपलक्षणमिति मन्यते, तर्हि तु मृते भर्तरीति व्यर्थमापद्येत । प्रकरणेनैव लाभात् । तथाच पूर्ववाक्यस्य नष्टत्वादिनिमित्तकपत्यन्तरविधानपरत्वमुत्तरवाक्यद्वयस्य मृतभर्तृकत्वनिमित्तकसफलब्रह्मचर्यादिविधिपरत्वमित्यङ्गीकर्तव्यमिति पूर्वत्र पतिशब्दस्योत्तरत्र भर्तृशब्दस्येति शब्दप्रयोगसार्थक्यार्थमपि वाग्दानानन्तरपतिविषयत्वं पूर्ववाक्यस्योत्तरत्र मुख्यपतिविषयकत्वमित्येवाङ्गीकृते संभवति । एवञ्च जीवानन्दविद्यासागरमहोदयैः श्लोकत्रयेण कर्तव्यत्रयं बोधितमिति विवाहानन्तरविधवाया विवाहोऽपि पराशरस्मृतिसम्मत इति यव्द्यवस्थापितं तदिदं स्मृत्यक्षराननुगुणमिति मन्तव्यम् । इदमेवाभिप्रेत्य विद्वन्मनोहरायाम्—नन्वस्तु वाग्दानानन्तरं विवाहात् प्राक् पूर्वपतिनाशे पत्यन्तरविधानम्, विवाहानन्तरं तु तन्नाशे कथं कार्यमित्यत आह—मृते इति—इत्युक्तश्लोकावतरणं कृतम् । यत्तु माधवीये—पुनरुद्वाहमकृत्वा ब्रह्मचर्यव्रतानुष्ठाने श्रेयोतिशयं दर्शयति मृते भर्तरि—इति । मृतग्रहणं नष्टादीनामुपलक्षणमिति वर्णितम् । तस्य विवाहानन्तरं पत्युर्देशान्तरगमनाभिप्रायत्वमेव युक्तम् । अन्यथा भर्तरीतिपदान्तरप्रयोगवैयर्थ्यात् । एतेन—अन्यत्रेव पुनरुद्वाहस्यात्राप्यङ्गीकृतत्वादिति पूर्वतनश्लोकोपसंहारोऽपि व्याख्यातः । तस्यापि वाग्दानोत्तरविवाहपरत्वात् । नह्येकोऽपि निबन्धकारः प्राचीनो विवाहानन्तरं विधवायाः पुनरुद्वाहं साधयति । प्रत्युत सर्व एव मन्वादिव्याख्यानेषु तत्तत्स्मृतिषु च बहुशो निन्दन्तीति विवाहानन्तरविधवापुनरुद्वाहो न प्रामाणिकः । एतञ्च माधवीयवाक्ये युगान्तरविषय इति पाठं कल्पयित्वैव सङ्गच्छत इति ।

['युगान्तरविषयः' इति माधवीयपाठस्य पर्यालोचनम्]

माधवीयवाक्यस्य युगान्तरविषयः इत्येवमाकरस्वमादाय केचित्पुनरुद्वाहोऽयं युगान्तरविषयः, तथा चादित्यपुराणमिति यथाश्रुतरीत्यैव योजयन्ति। एतेषां मतन्तु न समीचीनमिति जीवानन्दविद्यासागरमहोदया वर्णयन्ति। अयमेषामाशयः—पराशराचार्यो हि कलियुगधर्मानेव वक्ष्यामीति प्रतिज्ञाय स्वग्रन्थं प्रवर्तयामास। तथाच पराशरोक्तस्यापि युगान्तरविषयत्वे तदीयप्रतिज्ञाविरोधोऽपरिहरणीय आपद्येत। न च कलिनिषिद्धस्यैव युगान्तरीयधर्मस्य कलिधर्मत्वमपि स्थापयितुं उक्तपराशरवाक्यमिति कल्पनं सम्भवति। तथा सति युगान्तरसाधारणकलिधर्मव्यवस्थापनमनेन वाक्येन क्रियत इत्येव समापद्यते। न च युगान्तरीयधर्मस्यापि कलिधर्मत्वमपि विवाहादेरिव सम्भवति। तथा च कलावनुष्ठेयान् धर्मान् वक्ष्यामीति प्रतिज्ञाया अपि न विरोधः। यत्तु चतुर्विंशतिमतसङ्ग्रहगतम्—न च कलिनिषिद्धस्यापि युगान्तरीयधर्मस्यैव नष्टे मृते इत्यादिपराशरवाक्यं प्रतिपादकमिति वाच्यम्; कलावनुष्ठेयान् धर्मान् वक्ष्यामीति प्रतिज्ञाय तद्ग्रन्थप्रणयनात्—इति वाक्यम्, तस्य हि कलिनिषेध्यप्रतियोगिसमर्पणपरत्वमस्य वाक्यस्य नेत्येवाशयः। न त्वादित्यपुराणादिप्राप्तविवाहनिषेधप्रतिप्रसवाभावेऽपि तथा च पञ्चस्वापत्सु नोक्तनिषेधप्रवृत्तिरित्येव माधवाचार्याशय इति सिद्ध्यति। उक्तं ह्येतद्विद्यासागरमहोदयैरेव—यदादित्यपुराणादिगतानां निषेधानां सामान्यतः प्रवृत्तानामापद्विशेषं निमित्तीकृत्य विवाहविधिपरेण वाक्येन नष्टे मृते इत्यनेन न हिंस्यादित्यस्याग्निषोमीयं पशुमालभेतेति वाक्येनेवावस्थाविशेषे बाध इति। तथा च 'तथोचादित्यपुराणम्' इति माधवाचार्यवाक्यन्तु

पुराणवचनस्य सामान्यविषयत्वबोधनार्थमेव प्रवृत्तमिति एतेषां मतरीत्या योजनं सम्भवति। अत्रेदमेवास्माकं वक्तव्यम् यत्— सामान्यविशेषन्यायस्य नात्र प्रवृत्तिः सम्भवति। स हि न्यायः विशेषविषयातिरिक्तविषये सामान्यशास्त्रसावकाशत्व एव सम्भवति, नान्यथा। तत्र च—

नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते॥
स तु यद्यन्यजातीयः पतितः क्लीब एव वा।
विकर्मस्थः सगोत्रो वा दासो दीर्घामयोऽपि वा॥

ऊढापि देया सान्यस्मै सहाभरणभूषणा॥ इत्यादि— विशेषवचनातिरिक्तविषये 'उढायाः पुनरुद्वाहमिति' निषेधस्य कलौ प्रवृत्तिरिति खलु भवतां मतं भवति। तत्र च युगान्तरे सर्वलक्षणलक्षितोक्तदोषलवशून्यस्य पत्युर्जीवनकालेऽपि ऊढायाः प्राप्तं विवाहं निषेधति कलिवर्ज्यप्रकरणगतं वाक्यमिति यदि भवतां मतम्, तर्हि युगान्तरे विनाप्यापदमूढाविवाहविधिः कोऽपि भवद्भिः प्रदर्शनीयः॥ यत्तु जीवानन्दविद्यासागरैः—

अद्यप्रभृति मर्यादा मया लोके प्रतिष्ठिता।
एक एव पतिर्नार्या यावज्जीवं परायणम्॥
मृते जीवति वा तस्मिन् नापरं प्राप्नुयान्नरम्।
अभिगम्य परं नारी पतिष्यति न संशयः॥ इतिमहाभारतवचनानुसारेण दीर्घतमोमहर्षिकाले जीवतोऽपि पत्युर्भार्यायाः पत्यन्तरस्वीकरणं सम्प्रदाय आसीदित्यनुमीयते इति वर्णितम्। तत्र वयमिदमेव सूचयामः यन्महाभारतगतविद्यासागरसङ्गृहीतवचनेषु 'अहं त्वा भरणं कृत्वा जात्यन्धं ससुतं सुतम्' इति वचनेन

दीर्घतमसो जात्यन्धत्ववर्णनेन नापदाद्यवस्थाविशेषराहित्यं तस्य वर्तत इति गम्यत इति जात्यन्धत्वादिदीर्घामयविशिष्टानां पतीनां जीवनकाले पत्यन्तरविधानसम्प्रदायकल्पनमेव सम्भवतीति न युगान्तरे कथमपि विनाऽप्यापदमूढाविवाहस्य विधेयता समर्थयितुं शक्यते। अत्र हि प्रकरणे दीर्घतमसि महर्षौ तत्पत्न्यां वैराग्यनिमित्तं जात्यन्धत्वं तत्प्रयुक्ततद्भरणाशक्तिर्वेति स्पष्टमेव वर्णितम्। तथा च जात्यन्धत्वादिकं पत्युरुपरि पत्न्या वैराग्यकारणं भवतीति भक्तिविशेषस्तत्रासम्भावित इति जात्यन्धानां भार्याणां युगान्तरे मन्त्रसंस्कारतः पूर्वमन्यस्मै दानाभ्यनुज्ञानं यदासीत्, तस्यैव निषेधो दीर्घतमसा कृत इत्यवगम्यते इत्युक्तं प्रकरणमपि 'उद्वायाः पुनरुद्वाहम्' इति कलिवर्ज्यप्रकरणगतवाक्यमूलमित्येव सिद्ध्यति। यत्तु—

> या पत्या वा परित्यक्ता विधवा वा स्वयेच्छया।
> उत्पादयेत् पुनर्भूत्वा स पौनर्भव उच्यते॥
> सा चेदक्षतयोनिः स्याद्गतप्रत्यागतापि वा।
> पौनर्भवेण भर्त्रा सा पुनः संस्कारमर्हति॥

इति मनुनोक्तम्। तत्र हि व्यवस्था वीरमित्रोदये एवमुक्ता। सा यथा—तत्र चाक्षतयोन्याः पुनर्विवाहे पौनर्भवेण भर्त्रेत्यन्वयकरणात् गतप्रत्यागतसंस्कारे च कौमारेण भर्त्रेत्यन्वयात् द्वितीयस्यैव पत्युःपौनर्भवत्वम्, न प्रथमस्येति सिध्यति। तेन च पौनर्भवश्काणश्चेति श्राद्धे, तथा पौनर्भवे द्विजे इति दाने च 'परपूर्वापतिस्स्वर्थे' त्यादिना प्रतिषेधोऽपि द्वितीयस्य पत्युस्तदुत्पन्नानां पुत्राणाञ्चेति सर्वनिबन्धसम्मतम्। न क्वापि प्रथमस्य पत्युः पौनर्भवत्वेन तदपत्यानां वा निषेधो गम्यते—इति। अनया च व्यवस्थ-

येदमवगम्यते यत्पुनः संस्कारे विधवायास्तत्पतेस्तस्याः पुत्राणां च पृथक्संस्थैव, न धार्मिकदानव्यवहारादिसम्बन्धयोग्यतेति। तथा च नोक्तं वचनं विधवाविवाहसाधुत्वव्यवस्थापरम्, किन्तु तदसाधुत्वव्यवस्थापनपरमेव। एतेन—मृते भर्तरि या नारी त्यक्तवत्यथ तं स्वयम्। सवर्णाज्जायते ? भर्तुः पौनर्भवं सुतम्॥ यदि सा बाल-विधवा बलात्यक्ताऽथवा क्वचित्। तदा भूयस्तु संस्कार्या गृहीता येन केनचित्—इति ब्रह्मपुराणवचनमपि व्याख्यातम्। तथाच युगान्तरेऽपि धर्म्यो विधवाविवाहो नासीदनापदि वरस्य कन्याया वाऽदुष्टत्वे इति सिद्धम्। तदुक्तं वीरमित्रोदये:—मृतभर्तृका यदि बालविधवाऽक्षतयोनिः, तथा त्यक्तभर्तृका, भर्त्रापि बलान्निर्भर्त्स्य त्यक्ता तदैव संस्कार्या नान्यथा। तेन च क्षतयोन्या भर्त्राऽपरित्यक्तायाश्च व्यावृत्तिः। तत्र गर्भस्य कुण्डगोलकत्वपरिहारायाह—भर्तुः पौनर्भवमिति। इति। अत्र च पुनर्भूविवाहोऽप्यक्षतयोनित्व एव, न क्षतयोनित्वादाविति विवेचनेन हि अधर्मस्याप्यस्य विवाहस्याभ्यनुज्ञानमक्षतयोनित्व एव, न क्षतयोनित्वादाविति विवेचितम्। युगान्तरे विनापदं ऊढाविवाहोऽसिद्ध एवेति कथमूढायाः पुनरुद्वाहमिति वचनं सामान्यवचनतामर्हति। तथा चोढायाः पुनरुद्वाहमिति कलिवर्ज्यप्रकरणगतवाक्याविरोधेनैव नष्टे मृते प्रव्रजिते इत्यस्योपपत्तिर्वर्णनीयेति युगान्तरमात्रविषयत्वं माधवाचार्योपवर्णितमुपपन्नमेव। माधवाचार्यो हि प्रायश्चित्ताध्यायोपसंहारे स्पष्टमेव पराशरोक्तानामपि केषाञ्चित् कलावनुष्ठानमपि योग्यमेव, यत्रान्यथासिद्धप्रतिप्रसवविध्युन्नयनरूपदृष्टानुपपत्तिर्न मूलमिति वर्णनपूर्वकं नष्टे मृते इति पुनरुद्वाहविधिः परिवेदनाद्यक्रमविवाहविषयत्वेनान्यथासिद्ध इति वर्णनेन

नष्टे मृते इत्यत्रापि उक्तदृष्टान्तानुपपत्त्यभावमननुष्ठानञ्च विवेचयन्ति। तथा च कलिनिषिद्धस्यैवात्र विवक्षणेऽपि न दोष इति पूर्वोक्त चतुर्विंशतिमतसंग्रहमवलम्ब्य कृतस्य दूषणस्य नात्रावसरः। इदमेवाभिप्रेत्य वीरमित्रोदयकाराः—ऊढायाः पुनरुद्वाहमिति स्वपरकर्तृकसर्वविवाहपरत्वं वर्णयन्ति। युक्तञ्चैतत्—पराशराचार्यो हि कलौ धर्मान् वक्ष्यामीति प्रतिजानन्नेव 'युगे युगे तु सामर्थ्यं शेषं मुनिविभाषितम्' इति वदन् ऋष्यन्तरैः कलिधर्मत्वेनोक्तानामपि सङ्ग्रहणमावश्यकं प्रतिपादयतीति कलिवर्ज्यप्रकरणान्तरबाधनं न पराशराचार्यसम्मतम्। यथा चैवं सत्यपि नष्टे मृते इत्यस्योपयोगस्तथा पूर्वमेव सूचितम्। एवञ्च नष्टे मृते इति वाक्यं देवरादिमात्रकर्तृकविवाहनिषेधार्थमेव प्रवृत्तमिति वाग्दत्ताविषयकत्वमेवोक्तवचनस्य। एतदेवाभिप्रेत्य वीरमित्रोदये:—

पराशरः—नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते॥

वसिष्ठबोधायनौ—बलादपहृता कन्या मन्त्रैर्यदि न संस्कृता।
अन्यस्मै विधिवद्देया यथा कन्या तथैव सा॥

याज्ञवल्क्योऽपि—दत्तामपि हरेत् पूर्वाच्छ्रेयांश्चेद्वर आव्रजेत्। इति। एतच्च वाग्दत्ताविषयम्। तथा च मन्त्रसंस्काराभाव एव पुनः कन्याया दानम्, नान्यथा। संस्कृतायान्तु न कस्यापि दानाधिकारः। तथाच—

अद्भिर्वाचा च दत्तायां म्रियेतादौ वरो यदि।
न च मन्त्रोपनीता स्यात्कुमारी पितुरेव सा॥
वरयित्वा तु यः कश्चित् प्रणश्यन् पुरुषो यदा।
ऋत्वागमांस्त्रीनतीत्य कन्याऽन्यं वरयेद्वरम्—

इत्यादिवचनान्यपि व्याख्यातानि । अत्र प्रकरण एवोढापि देया साऽन्यस्मै सप्रावरणाभूषितेति वाक्यस्यापि वाग्दत्तापरत्वं वीरमित्रोदयेऽप्युक्तम् । तथाच नष्टे मृते इति वचनानुसारेण विवाहानन्तरविधवाविवाहव्यवस्थापनं विद्यासागरमहोदयानामप्रामाणिकमेव ।

[उक्तार्थचतुर्विंशतिमतसङ्ग्रहः] तदत्रावसरे नष्टे मृते इति श्लोकश्चतुर्विंशतिमतसङ्ग्रहे यथा व्याख्यातस्तस्यापि सङ्ग्रहणमुचितम्पश्यामः । तद्यथा—दुष्टे तु पूर्ववरे वाग्दत्तापि वरान्तराय देया । तथाच पराशरः—नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ । पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥

अस्यार्थः—वाग्दानानन्तरं पाणिग्रहणात् प्राक् पतौ सम्भावितोत्पत्तिकपतित्वे पूर्वस्मिन् वरे नष्टे सति लक्षणया दूरदेशगमनेनापरिज्ञातवृत्तान्ते सति । तथाच नारदः—परिगृह्य तु यः कन्यां नरो देशान्तरं व्रजेत् । त्रीनृतून् समतिक्रम्य कन्याऽन्यं वरयेद्वरम्॥ स्त्रीपुंसयोस्तु सम्बन्धाद्वरणं प्राग्विधीयते । वरणाद्ग्रहणं पाणेः संस्कारोऽपि विचक्षणैः । तयोरनियतं प्रोक्तं वरणं दोषदर्शनात् ॥ इति । परिगृह्यवाचा दत्तां स्वीकृत्य । त्रीनृतूनिति । इदञ्च कन्याया अधार्यत्वे बोध्यम् । धार्यत्वे तु 'प्रदाय शुल्कं कन्याया गच्छेद्यः स्त्रीधनं तथा । धार्या सा वर्षमेकन्तु देयान्यस्मै विधानतः' इति नारदेनैव वर्षं प्रतीक्षाया अभिधानात् । स्त्रीपुंसयोरित्यादेरयमर्थः—स्त्रीपुंसयोः संसर्गात् प्राक् त्रितयं क्रियते । वरणम्, पाणिग्रहणम्, सप्तपदीप्रक्रमश्चेति । तत्र वरणं नाम वरस्य सम्प्रदानत्वाय कन्याया दात्रा प्रार्थनम् । तदेव च वाग्दानम् । एवं स्थिते तयोः पाणिग्रहणसप्तपद्प्रक्रमणयोः पूर्वभावि यद्वरणं तद्-

नियतम् । अनियामकमित्यर्थः । तयोरेव भार्यात्वोत्पादकत्वादिति भावः । तथा च मनुः—

पाणिग्रहणमन्त्रास्तु नियतं दारलक्षणम् ।
तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे ॥ इति ।

दोषदर्शनादिति वाक्यशेषस्यायमर्थः । वरणस्यानियामकत्वमपि पूर्ववरस्य दोषे सत्येव । यदि त्वन्यस्मै दत्तायां पूर्ववरोऽप्यायाति, तदाऽनूढां तां लभते । ऊढायान्तु स्वदत्तं द्रव्यमेव लभते । न तु कन्याम् । तदाह कात्यायनः—अनेकेभ्योऽपि दत्तायामनूढायान्तु तत्र वै । पुनरागतस्तु सर्वेषां लभते तदिमां सुताम् ॥ अथागच्छेत वोढायां दत्तं पूर्ववरो हरेत् । तदेवं नष्टे इति व्याख्यातम् । एवं मृतेऽपि । तथाच वसिष्ठः—अद्भिर्वाचा च दत्तायां म्रियेतादौ वरो यदि । न च मन्त्रोपनीतास्यात्कुमारी पितुरेव सेति ॥ मन्त्रोपनयनं पाणिग्रहणादिकं विना वाचा दानमित्राद्भिरपि दानं न भार्यात्वोत्पादकमित्यर्थः । अत एव यमः—नोदकेन न वा वाचा कन्यायाः पतिरुच्यते । पाणिग्रहणसंस्कारात्पतित्वं सप्तमे पदे—इति । तथा प्रव्रजिते—कृतसंन्यासे । क्लीबे चेति । चकारादन्यजातीयादेर्ग्रहणम् । तथा च कात्यायनः—न तु यद्यन्यजातीयः पतितः क्लीब एव च । विकर्मस्थः सगोत्रो वा दासो दीर्घामयोऽपिवा । ऊढापि देया सान्यस्मै सहाभरणभूषितेति ॥ अत्रोढापीत्यपिशब्दः कैमुतिकन्यायेन वाग्दत्ताया एवान्यस्मै दानमाचष्टे, न तूढायाः । अन्यथा सगोत्रोढाया अपि पुनर्विवाहप्रसक्तौ मातृवत्पालयेदिति शास्त्रं विरुध्येत । यत्तु—यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः । तामनेन विधानेन निजो विन्देत देवरः—इति मनुनोक्तम् । यच्च—अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया । स-

पिण्डो वा सगोत्रो वा घृताभ्यक्त ऋतावियात् ॥ आगर्भसम्भवाद्ग-च्छेत् अन्यथा पतितो भवेत्—इति याज्ञवल्क्योक्तम् । तद्देवराच्च सुतोत्पत्तिरिति कलिनिषिद्धेषु प्रागेव गणितम् । यदपि—उद्वाहितापि सा कन्या न चेत्सम्प्राप्तमैथुना । पुनः संस्कारमर्हेत यथा कन्या तथैवसेति नारदेनोक्तम् । तदपि कलौ निषिद्धम्—ऊढायाः पुनरुद्वाहमिति ॥ न च कलिनिषिद्धस्यापि युगान्तरीयधर्मस्यैव नष्टे मृते इति पराशरवाक्यं प्रतिपादकमस्त्विति वाच्यम् ; कलावनुष्ठेयान् धर्मानेव वक्ष्यामीति प्रतिज्ञाय तद्ग्रन्थप्रणयनादिति दिक्—इति ।

[उक्तसंग्रहतात्पर्येणविद्यासागरमतखण्डनम्] अनेन हि चतुर्विंशतिमतसङ्ग्रहविवरणेन स्पष्टमिदं ज्ञायते—यत् नष्टे मृते इति वाक्यं वाग्दत्ताविषयमेवेति । अत्र हि नारदवाक्यव्याख्यानावसरे धार्यत्व एव प्रतीक्षणम्, नाधार्यत्व इति विवरणेन स्पष्टमिदं सूच्यते यत् यत्र कुत्रापि पत्यन्तरविधानमष्टवर्षानन्तरं यदि श्रुतम्, तर्हि तत्रापि धार्यत्व एव प्रतीक्षणं नाधार्यत्व इति ।

एतेन—अष्टौ वर्षाण्युदीक्षेत ब्राह्मणी प्रोषितं पतिम् ।
अप्रसूता तु चत्वारि परतोऽन्यं समाश्रयेत्—इति ॥

वचनमपि—व्याख्यातम् । अस्यापि वचनस्य—द्विवर्षात्प्राग्विवाहश्चेत्कन्यकामरणं यदि । खननं नैव कर्तव्यं मन्त्रसंस्कारमाचरेत्—इतिवचनेनाभ्यनुज्ञातत्वादतिबाल्यविवाहस्य तत्र वाग्दानानन्तरं देशान्तरगमनेऽष्टवर्षपर्यन्तं प्रतीक्षणप्रतिपादन एव तात्पर्यम् । अप्रसूता तु चत्वारि परतोऽन्यं समाश्रयेदिति वचनन्तु युगान्तरविषयमिति प्रकृतचतुर्विंशतिसंग्रह एव सूचितम् । उक्तं हि तत्र—यत्तु—उद्वाहितापि सा कन्या न चेत्सम्प्राप्तमैथुना ।

पुनः संस्कारमर्हति यथा कन्या तथैव सा—इति नारदोक्तम्, तदपि कलौ निषिद्धम्—इति। तथाच यस्या नारदस्मृतेः कलिवर्ज्य-प्रकरणविषयत्वयोग्यत्वं प्रकृतग्रन्थे विवेचितम्, कथं तस्याः स्मृत्या अनुसारेण नष्टे मृते इत्यस्या अन्यथानयनं विद्यासागरमहोदया-नामुपपद्यते ? एवं चोक्तेन प्रकारेण नष्टे मृते इत्यस्य वाग्दत्ता-विषयत्वमेव भट्टोजिदीक्षितानां मतमिति स्थिते भट्टोजीदीक्षितस्या-पि नष्टे मृते इत्यस्य कलिकाले विधवाविवाहयोग्यतायामेवाशय इति विद्यासागरमहोदयानां विवरणमप्रमाणिकमेव। अत्र हि स्पष्टमेव नष्टे मृते इत्यस्य युगान्तरीयोढाविवाहपरत्वं नास्ति, किन्तु कलियोग्यवाग्दत्ताविवाहपरत्वमेवेति विविच्यत इति बालि-शस्यापीदं नाविदितम्। तथा च नष्टे मृते इति वाक्यस्य कलि-कालेऽनिषिद्धविवाहपरत्वमित्येव भट्टोजीदीक्षिताशय इति वाग्द-त्ताविवाहस्य कलावनिषेधात् युगान्तरसाधारणवाग्दत्ताविवाहपरत्व-मुक्तपराशरस्मृतेरित्येव भट्टोजीदीक्षितानामपि मतम्। तथाच-अयञ्च पुनर्विवाहो युगान्तरविषय—इति माधवाचार्यवाक्यं चतु-र्विंशतिमतसंग्रहानुसार्येव, न तद्विरोधीति, विद्यासागरमहोदयैः अयं च पुनर्विवाहो युगान्तरविषयः इत्येतत्खण्डनार्थं उक्तचतुर्विंश-तिमतसंग्रहवाक्यावलम्बनं यत्कृतम्, तदिदं पूर्वोत्तरसन्दर्भविरुद्ध-मिति न कोऽपि विरोधः।

[उक्तविवेचन-तात्पर्यम्]

अयमत्र निष्कर्षः—युगान्तरेऽसम्प्राप्तमैथुनाया पुनर्विवाहोऽप्यभ्यनुज्ञात आसीत्। एवं वाग्दत्तायाः कन्यायाः स्वानुमतौ देवरेण विवाह्यत्वमन्यथाऽन्येन विवाह्यत्वम् यस्मै वाचा दत्ता तस्य नष्टत्वादावित्यासीत्। कलौ तूद्वाहानन्तरमसम्प्राप्तमैथुनाया अपि न विवाहः, न वा स्वा-

नुमतावपि देवरेण विवाह्यत्वम्, किन्त्वन्यविवाह्यत्वमेवेत्येव चतुर्विंशतिमतम्। तत्र च यदि नष्टे मृते इतिश्लोकगतस्य पतिरन्य इत्यन्यपदस्य देवरान्यपरत्वम्, पतिशब्दस्य च गौणपतिपरत्वम्; तदा कन्यानुमतावपि वाग्दत्ताया एव कन्यायाः देवरान्यविवाह्यत्वमेवेति नियमः। तथा च यदाऽयञ्च पुनरुद्वाहो युगान्तरविषय इति माधवाचार्यवाक्यस्य योजनम्। तदा 'तथाचादित्य पुराणे' त्यस्य सन्दर्भस्य मुख्यपतिविवक्षोऽसम्भवपरतायामुपष्टम्भकत्वेन योजनं भवति। यदि त्वन्यपदेन देवरस्य ग्रहणम्, पतिशब्देन च मुख्यपतेर्ग्रहणम्, तदा तु युगान्तरविषय इत्येव पाठः। अत्र च पूर्वोक्तप्रकारेणास्य पुनर्विवाहस्यान्यथासिद्धत्वात्कलिधर्मत्वे पराशराचार्याणां तात्पर्यमिति मन्तव्यम्। तथा च शेषं मुनिविभाषितमितिवचनोक्तरीत्या कलिवर्ज्यप्रकरणस्यापि पराशरस्मृतौ गुणोपसंहारन्यायेनानुकर्षणस्य युक्तत्वादेतद्विषये आदित्यपुराणानुसारिण्येव व्यवस्था युक्तेति बोधनार्थं 'तथाचादित्यपुराणे' मित्यादिमाधवग्रन्थसन्दर्भप्रवृत्तिरिति सर्वेषामपि निबन्धनकाराणां विवाहानन्तरं विधवाविवाहायोग्यतायामैकमत्यमिति सिद्धम्। एवं सति हि "देवरान्न सुतोत्पत्तिः, ऊढायाः पुनरुद्वाहः, इति वचनद्वयस्यापि भिन्नविषयत्वेऽपि न कापि क्षतिरित्यपि सिध्यति। न हि माधवाचार्योक्तं सर्वमपि प्रामाणिकमेवेति दुराग्रहोऽस्माकमपि, किंतु यत्प्रमाणाविरुद्धं तदेव सर्वत्रापि प्रामाणिकमिति। तथा च माधवाचार्यसिद्धान्तानां कुत्र कुत्र चान्यत्र विषये बहुभिराचार्यैं निरासः कृतः इति यत् विद्यासागरमहोदयैः सोदाहरणं प्रदर्शितम्, तदिदमत्रानवसरमेव। यथा चायं पुनरुद्वाहो युगान्तरविषय इति पाठस्यापि न कलिधर्मान् प्रवक्ष्यामीति प्रतिज्ञा-

विरोधः, न वा पूर्वोक्तचतुर्विंशतिग्रन्थस्यापि तन्निरासे तात्पर्यम्, तथा पूर्वमेव विवेचितम्। एतेन—कलौ पाराशराः स्मृताः—इत्यपि व्याख्यातम्। नहि पराशरोक्तमेव कलिधर्म इति; कलिवर्ज्यप्रकरणस्यादित्यपुराणादिगतस्य बाधो विवक्षित इति वाऽत्र सिद्धान्त इति—कलौ पाराशराः स्मृताः—इति सिद्धान्तेऽपि विद्यासागरसम्मते नास्माकमनैकमत्यम्। यत्तु मन्वादिस्मृतिषु पौनर्भवस्यापि पुत्रकोटौ सङ्कलनम्, न तत्प्रकृतसिद्धान्तविरुद्धम्। नहि वयमपि पौनर्भवपुत्रस्य पौनर्भवत्वं वारयामः। इदमेवास्माकं मतम्, यत्पौनर्भवो न दानादिधर्मव्यवहारयोग्य इति। व्यक्तं चैतद्वीरमित्रोदयमनुसृत्य पूर्वं विवेचितम्। तथा च नष्टे मृते इत्यस्य पराशरवचनस्यापि 'न विवाहविधावुक्तं विधवावेदनं पुनः', इत्यादिमन्वादिसिद्धान्तबाधे न तात्पर्यमिति स्मृत्यन्तरैकवाक्यतयैवात्र सिद्धान्तो युक्त इत्येव माधवाचार्याणां नन्दपण्डितादीनाञ्चाशय इति सर्वेषां निबन्धनकाराणां कलावूढाविवाहासाधुतव्यवस्थापनं कथमपि नान्यथ्यम्।

[विधवाहस्यदानपूर्वकत्वविवेचनम्] अत्रेदमालोचनीयम्—यत्पुनर्विवाहोऽयं विधवानामभिप्रेतो दानपूर्वको वोत तदपूर्वको वेति। अत्र केचिन्मन्यन्ते न पुनर्विवाहे दानमपेक्षितमिति। तेषामयमाशयः—पुनर्विवाहो हि द्वेधा भवितुमर्हति। एकः स्वपूर्वजायया, अपरो नवीनकन्यया। तत्र प्रथमे प्रमाणं यथाः—त्यक्त्वा भर्तृगृहं गच्छेद्यदि दोषं विना पुनः। भर्त्रा सा संस्कर्तव्या च प्रायश्चित्तादिभिः क्रमात्—इति ब्रह्मपुराणवचनम्। 'जीवन्यदि समागच्छेत् घृतकुम्भे नियोज्य तम्। उद्धृत्य स्नापयित्वास्य जातकर्मादि कारयेत्। द्वादशाहं व्रतं च स्यात्त्रिरात्रमथवाऽस्य तु।

स्नात्वोद्वहेत तां भार्यामन्यां वा तदभावतः, इतिवृद्धमनुवचनम्। 'यद्यागच्छेत् पुमान् जीवन् पैतृमेधिकसंस्कृतः। घृतकुम्भे स्नापयित्वा तमुत्थाप्य शुभे क्षणे॥ संस्कृतं जातकर्माद्यैरुपनीतं विधानतः। द्वादशाहं त्रिरात्रं वा विहितोपोषणाव्रतम्। गिरावागत्य पूर्वां वा तदभावे परां स्त्रियम्। उढवन्तं च संस्कुर्याच्चरुणाऽऽयुष्मतेन च—इति कालादर्शवचनम्। विवाहमपि कुर्वीत भार्यया पूर्वया सहेति शौनकवचनञ्च। अन्यश्च पुनर्विवाहः पूर्वजायावियोगानन्तरं पुंसो नूतनभार्यया सह। पतिमरणानन्तरं स्त्रिया विवाहस्तु विवादास्पद इति न तस्यापि विभागः सिद्धवत्कृत्य सम्पादितः। तत्र पूर्वजायया साकं पुनर्विवाहे यो विधिः, स एव विधिः पतिमरणानन्तरविधवाविवाहेऽपि सम्पादनीय इत्यवश्यमूरीकर्तव्यम्। तत्र च पुनर्विवाहे न दानं न वा वरणम्। तदुक्तं स्मृत्यन्तरे वैद्यनाथदीक्षितोद्धृते—

न दानं नैव वरणं न प्रतिग्रहणन्तथा।
त्रिरात्रञ्च व्रतं न स्यात्पुनरुद्वाहकर्मणि। इति॥

तथा चात्र पुनर्विवाहे यथा न दानमपेक्षितम्, एवं विवाहानन्तरविधवाविवाहेऽपि न दानमपेक्षितमिति। अस्मिन् पक्षे इदमेव प्रष्टव्यम्—किं विवाहस्य कन्यादानप्रतिग्रहनियतपूर्वकत्वमपेक्षितं वा न वेति ? यदि नापेक्षितं तर्हि कन्यादानस्य नित्यत्वं शास्त्रावगतं बाध्येत। गतप्रत्यागतपुनःसंस्कारे तु दानप्रतिग्रहावेकाधिकारिकौ पूर्वमेव सञ्जाताविति नोक्तनियमविरोधः। अत्र कन्यादानवरणयोर्बाधे खल्वर्थलोप एव निमित्तम्। यतः स्वं प्रत्येव स्वयमेव दाने स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वापादनरूपदानस्वरूपमेव न सेत्स्यति। अकृतेऽपि दाने स्वयं प्रतिगृहीताया एवं स्व-

स्वभूताया एव संस्कार इति न किमपि छिन्नम् । विवाहानन्तरविधवाविवाहे तु नूतनस्य वरस्य वरणं दानञ्च विना कथं कन्यायां स्वत्वसिद्धिरिति पुनर्विवाहसंस्कारः कथं वोपपद्येत ? दानं हि अद्भिर्वाचा च दानेनैव सत्यं भवति । न तु केवलवाग्दानेन । अतो वाग्दत्ताया वरदोषे वरान्तराय दानं यथा न दुष्टम् , नैवमद्भिरपि दत्तायाः पुनर्दानं न दुष्टं भवति । इदञ्च कन्यादानं विवाहसंकारार्थं सत् विवाहाङ्गमिति केचन मन्यन्ते । केचन स्वतन्त्रमिति । मतद्वयेऽपि कन्यादानस्य विवाहस्य चोपकार्योपकारकभावे न विवादः । तथा चाध्ययनसम्पादितस्यार्थज्ञानस्य यथा क्रत्वधिकारितावच्छेदकत्वं अध्ययनसम्पादितार्थज्ञानवत एव क्रत्वधिकारव्यवस्थापनेन स्वीक्रियते, एवमत्रापि प्रतिग्रहपूर्वकस्वायत्तीकृतकन्याविशिष्टत्वमेव विवाहाधिकारितावच्छेदकमिति दानं विना प्रतिग्रहासम्भवात् यत्र संस्कार्यकन्याया न स्वायत्तता तत्र विवाहयोग्यता नास्तीत्यवश्यमेवाङ्गीकर्तव्यमिति अद्भिर्वाचा च दत्तायाः कन्यायाः पुनर्दानाधिकारः पित्रादीनां बाधित एव ।

[दानं विवाहानङ्गमिति पक्षेऽपि विधवोद्वाहस्याशास्त्रीयता]

अत्र कन्यादानमनङ्गमिति पक्षेऽद्भिर्दानानन्तरं पुनर्दानं वचनविशेषं विना न सम्भवति । तथा च:—

अद्भिर्वाचा च दत्तायां म्रियेतादौ वरो यदि ।
न च मन्त्रोपनीता स्यात्कुमारी पितुरेव सा ॥

इतिवसिष्ठवचनानुसारेणाद्भिर्दत्ताया अपि मन्त्रसंस्काराभावे पुनर्वरान्तराय कन्यादानाधिकारः पितुर्यथा बोध्यते, नैवं विवाहानन्तरविधवादानेऽपि पितुरधिकारो वर्तते । वचनविशेषस्य कस्याप्यसम्भवान्न कन्यादानपूर्वकविवाहसंस्कारयोग्यता विवाहा-

नन्तरविधवायाः सम्भवति। यथा चोढापि देया साऽन्यस्मै इत्यत्रोढापदं दत्तापरमेव, तथा चतुर्विंशतिमतसंग्रहाद्यनुसारेण पूर्वमेव विवेचितम्। यत्तु—कन्यान्यं वरयेद्वरमिति, तत्र स्वयं वरणं प्रतिपाद्यते, तत् कन्या यमिच्छेत्तस्मै सा पित्राद्यन्यतमेन देयेत्येतत्परमेव। एतेन—"ऊढापि देया साऽन्यस्मै" इत्यादिशास्त्रप्रामाण्येन विवाहानन्तरं विधवापि पितुरेव स्वमिति विद्यासागरमहोदयोक्तमपास्तम्। यदा तु कन्यादानं विवाहाङ्गं तदा मन्त्रसंस्कारे सत्येव कन्यादानमद्भिर्दानरूपं सम्पन्नमिति मन्त्रसंस्कारात् पूर्वं दानस्यैवानिष्पन्नत्वात् पितुरेवाधिकार इति यथा भवति, न तथा विवाहानन्तरं सम्भवतीति न कोऽपि दोषः।

[प्रतिग्रहस्य विवाहाङ्गत्वव्यवस्थापनम्]

कन्याप्रतिग्रहो विवाहाङ्गमित्येव समुचितं मतम्। दाने हि अंशद्वयं वर्तते। एककर्तृकस्त्यागः, अपरकर्तृकः प्रतिग्रहश्च। तत्रांशद्वयस्य फलभेदस्तु प्रसिद्धतर एव। यतो येन दानेन दातुः फलविशेषः, तदीयेनैव प्रतिग्रहेण प्रतिग्रहीतुः प्रायश्चित्तीयतापीति। तथा च त्यागांशेनैकविंशतिकुलोद्धारफलकत्वेन स्वातन्त्र्येऽपि अन्यांशेन विवाहाङ्गत्वे न कोऽपि विरोध इति विना मन्त्रसंस्कारं प्रतिग्रहांशस्यासिद्धत्वे कन्यास्वत्वाधिकारः पितुर्यथा भवति, न तथा प्रतिग्रहानन्तरमपि। यथा च प्रतिग्रहानन्तरं भार्याया दाने भर्तुरपि नाधिकारस्तथा सर्वस्वदक्षिणायां न पुत्रभार्यादेरपि देयत्वमिति निरूपणेन पूर्वमीमांसायां षष्ठाध्याये विवेचितम्। तथा च विवाहानन्तरं विधवायाः वरान्तरोद्देशेन देयत्वासम्भवे कथं तस्या विवाहयोग्यतेति सर्व एव विजानन्तु। यावता च देयत्वमेव न सम्भवति विधवायास्तावतेदमपि सिद्धं भवति यत् 'नष्टे मृते प्रव्रजिते' इति वचनं

वाग्दत्ताविषयमेव, न तु विवाहानन्तरविधवाविषयमिमि। यदि तु—दत्ताक्षताया: कन्याया: पुनर्दानं परस्य च—इति बृहन्नारदीयवचनं पर्यालोच्यते, तदा दानस्य विवाहाङ्गत्वेऽपि न दानसंभव इति स्पष्टमेव गम्यते।

[विवाहेन स्वत्वोत्पत्तौ पतिमरणेन तदनाशेच विधवोद्वाहशंकासमाध्युपष्ठंभः।]

यथा च विवाहेन भार्यायां स्वत्वमुत्पद्यते, तस्य च पतिमरणानन्तरं न विनाशस्तथा विधवोद्वाहशङ्कासमाधौ स्पष्टं विवेचितम्। तद्यथा:—

"यथाहि—स्वत्वान्तरमिव विवाहप्रयोज्यं स्वत्वं पतिनिष्ठेन क्लीबत्वादिना दोषेण न विनश्यति। न वा नोत्पद्यते। क्लीबत्वपातित्ययोर्दायनिमित्तकस्वत्वातिरिक्तस्वत्वनाशकत्वे तथाविधस्वत्वोत्पत्ति—प्रतिबन्धकत्वे च मानाभावात्। लोके क्रयप्रतिग्रहादिभिः क्लीबपतितयोरपि स्वत्वोत्पत्तिदर्शनात्। न चैवं सति क्लीबाय वाग्दत्ताया अन्यस्मै दानमसङ्गतं स्यादिति वाच्यम्; न हि तत्रान्यस्मै दानं क्लीबादिस्वत्वोत्पत्त्यभावात्, किन्तु दात्रनुशयजन्यप्रतिग्रहीतृस्वत्वनाशात्। यथा क्रीतानुशयादौ। अनुशयेन स्वत्वनाशे च प्रतिग्रहीतृदोषज्ञानं सहकारोति नादुष्टाय दानस्थलीयानुशयात् स्वत्वनाशः। अत एवदुष्टाय प्रतिश्रुत्यादान इवादुष्टाय बुद्धिपूर्वं दाने दण्डविधानं नास्ति। दुष्टाय दाने सप्तपद्युत्तरन्तु न दात्रनुशयः। तत्र देवानां दातृत्वात्। तेषां च सर्वज्ञतयाऽनुशयासम्भवात्। देवकर्तृकदानभावनमात्रस्य स्वत्वप्रयोजकत्वाङ्गीकारेऽपि च स्वस्वत्वनिवर्तकस्यानुशयासम्भवात्। एवं प्रव्रज्ययापि न विवाहप्रयोज्यं स्वत्वं नश्यति, किन्तु स्वत्वप्रयुक्तानि स्पर्शनभाषणादीनि निवर्तन्ते। अत एव प्रव्रजितविशेषस्य पुत्रा-

द्यन्नग्रहणे दोष उक्तः । अत एव च प्रव्रजितत्वमात्रेण तत्पत्न्याः सौभाग्यचिन्हत्यागाभावः । मरणोत्तरमेव तत्त्यागस्तदौर्ध्वदेहिकाद्याचरणाधिकारश्च युज्यते । नष्टविषये तु स्वत्वनाशप्रयोजकसामग्र्यभावात् स्वत्वनाशाभावः प्रसिद्ध एव । मरणमपि विवाहप्रयोज्यस्वत्वातिरिक्तस्वत्वनाशं प्रत्येव प्रयोजकम् । पिण्डदानप्रयोजकानां पितृपुत्रभावादिसम्बन्धानां मरणाविनाश्यत्वदर्शनेन पतिपत्नीभावस्यापि तथाविधस्य मरणाविनाश्यत्वकल्पनौचित्यात् । एतदर्थोपष्टम्भकानि मुनिवचनानि च वक्ष्यमाणव्यवस्थायामनुसन्धेयानि" इति ॥

[उक्तार्थदोषाभासनिरासोपष्टम्भः]

अत्रैव दोषाभासनिरासनात्मकं तिलकमपि उपयुक्तत्वात् संगृह्णीमः । तद्यथाः—

"समाधास्यमानविधवोद्वाहशङ्कायाः पूर्वं परिणेतृदोषप्रयोज्यस्वत्वनाशतदनुत्पत्तिप्राणिततया प्रथमं तत्परीक्षा प्रस्तूयते । वक्ष्यमाणेत्यादिना । मानाभावादिति । यत्तु 'नष्टे मृते' "स तु यद्यन्यजातीयः" इत्यद्यनेकवचनैर्दोषाणां दानपदार्थतावच्छेदकस्वत्वरूपफलानुत्पादकत्वम्, उत्पन्नतादृशस्वत्वनाशकत्वं च बोध्यते । अन्यथा पत्यन्तरविधानस्यानुपपत्तेरिति कश्चिद्वदति । तदशुद्धम्, तेषां वचनानां विवाहान्तरविधायकत्वस्याद्ययावदसिद्ध्या वैधविवाहान्तरस्यैवासिद्धेः । वर्ज्यत्वेन परिगणनमपि दुष्टवरसम्प्रदानक दानस्य संततिद्वारा स्वपुरुषसन्तारणरूपदानफलाजनकत्वमेव बोधयति, न पुनः स्वस्वत्वनिवृत्तिपरस्वत्वोत्पत्तिरूपफलाजननम् । यथा सर्वस्वं चान्वये सतीति । अन्यथा दानरूपप्रतिषेधस्यैवाभावेन तस्य प्रतिषेधकत्वानुपपत्तेः । न ब्राह्मणं हन्यादिति हि हिंसाया नरकसाधनतां बोधयति, न खलु हन्त्यर्थतावच्छेदकप्राणवि-

योगरूफत्वानुत्पत्तिमिति। स्वत्वोत्पत्तिदर्शनादिति। यत्तु (१) वैवाहिकं स्वत्वं सोपधिकम्। तदुपधिविगमे स्वत एव विनश्येत्। उपधिश्च धर्म्यप्रजोत्पादनयोग्यता। क्लीबादीनां धर्म्यप्रजोत्पादनयोग्यता विरहेण च क्लैब्यपातित्यादिदोषोत्पत्तावुचित एव तत्स्वत्वनाशः। अतो नात्र क्रयादिनिमित्तकस्वत्वेन तौल्यम्। सोपधिकत्वादेव विवाहकाले दोषसत्त्वे युक्ताऽनुत्पत्तिरेव स्वत्वस्येत्यभिधायात्रोपोद्बलकतया (२) राजदत्तद्रव्यस्य प्रतिग्रहीतृतद्वंशजानां नाशे दातुरेव राज्ञः स्वत्वमित्यभिधाय (३) तथा कन्यादानं न स्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पत्तिरूपदानलक्षणाक्रान्तम्। तथा सति पितृस्वत्वस्य सर्वथैव निवृत्त्या 'कुलशीलविहीनाय" "वरश्चेत्कुलशीलाभ्यां" इत्यादि वशिष्ठशातातपाभ्यां उढकन्याया हरणसमाच्छेदने न सङ्गच्छेयाताम्। (४) अत एव कन्यादानवाक्ये न ममेति प्रयोगाभावः (५) परिवेदनस्थले पुनर्दानम् (६) दौहित्रस्यानपत्यमातामहकर्थाधिकारः (७) पुत्रिकाधर्मः (८) विधवायोः कन्यायाः पराशरबोधितः पितृगृहे वासश्च सङ्गच्छन्ते। पितृस्वत्वनाशे तु तदसङ्गतिरिति चाभिधाय (९) अदुष्टपत्यन्तरस्वत्वाभावविशिष्टाया अदुष्टस्वसम्प्रदानकदानस्य स्वस्वत्वं प्रति कारणत्वं व्यवस्थापितम्। इत्थञ्च विवाहकालिकानां क्लैब्यादिदोषाणां स्वत्वानुत्पादकत्वमेव। विवाहोत्तरोत्पन्नदोषतज्ज्ञानपूर्वकद्वितीयविवाहयोरुत्पन्नपूर्वपतिस्वत्वनाशकत्वम्, अदुष्टपुरुषस्वत्वस्य पुरुषान्तरस्वत्वोत्पत्तिं प्रति प्रतिबन्धकत्वमिति निष्कर्षं प्रापितञ्च। (१०) किञ्च समवायातिरिक्तसम्बन्धमात्रस्यानित्यतया स्वत्वस्याप्यनित्यत्वेन दोषज्ञानपूर्वकान्यविवाहजन्यस्वत्वोत्पत्त्यव्यवहितपूर्वक्षणे तन्नाश एवो-

चितः। (११) अपरञ्च भवदभिमताविनाशिस्वत्वप्रयोजकतावच्छेदकं यदि विवाहत्वं तर्हि भीष्मेन बलादाहृतासु तिसृषु कन्यासु राक्षसविवाहेनोत्पन्नस्य स्वत्वस्य त्यागेनैकस्यां कथं नाशः? यदि ब्राह्मविवाहत्वं तर्हि कथं दुष्यन्तस्य शकुन्तलायां गान्धर्वविवाहेन स्वत्वमिति प्रलपति। तदशुद्धम्। (११) वैवाहिकस्वत्वे सोपधिकत्वस्य कथमपि वक्तुमशक्यत्वात्। दानस्थलेउपधिर्हि न केवलं यदिच्छाधोना दानेच्छा सोऽपि तु यस्य दानेच्छाकारणीभूतेच्छाविषयस्याभिसन्धीयमानस्य सम्प्रदानं स्वस्वत्वोत्पत्तिस्थितिप्रयोजकत्वं दात्रिच्छादिवशादङ्गीकुर्यात्सः। उपपादनीयं चेदमुपरिष्टात्। न हि विवाहे, वरो यद्यहं धर्म्यप्रजोत्पादनयोग्यताविशिष्टो न भवामि भविष्यामि वा तर्हि नेयं ममेत्यङ्गीकुरुते। येन क्लैब्याभावादेरुपधित्वं स्यात्। किञ्च तस्योपधित्वे वन्ध्यायां प्रजोत्पादनस्य कर्तुमशक्यतया तद्योग्यतायाः कस्मिन्नपि पुरुषे वक्तुमशक्यतया सा कस्यापि पत्नी न स्यात्। अतश्च न सोपधिकत्वमस्येति तुल्यमेवेदं क्रयादिनिमित्तकेन स्वत्वेन। वस्तुतो विवाहस्य क्रयलब्धविजितेष्वेवान्तर्भावाद्गान्धर्वेऽपि दानस्यावश्यकताया वक्ष्यमाणत्वाद्वित्तागमेषु पृथग् विवाहस्यापरिगणनाच्च न क्रयादिनिमित्तकस्वत्वेन तुल्यं वैवाहिकं स्वत्वमपि तु क्रयादिनिमित्तकमेव। (२) राजदत्तद्रव्ये प्रतिग्रहीतृतद्वंशजानां नाशे यद्राज्ञः स्वत्वम्, तन्न प्रतिग्रहीतृतद्वंशजान्यतरस्थितिरूपोपधिविगमात्, किन्तु 'सर्वस्यादायिकं राजा हरेत्' इति नारदवचनेन राज्ञोऽपि दायहरत्वबोधनाद्दायादत्वप्रयुक्तमेव। तदप्यब्राह्मणधन एव। "अहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः। इतरेषान्तु वर्णानां सर्वाभावे हरेन्नृपः" इति मनुवचनात्। ब्राह्मणेतरस्यापि प्रतिग्रहलब्धमस्तीत्युपपादयि-

ष्यते। यदि च राज्ञा प्रतिग्रहीतृतद्वंशजान्यतरस्थितिरूपेणोपधिना दत्तं राज्ञ एवेत्युच्यते, तर्ह्यन्येनाप्येवमुपधिना दत्तमन्यस्यैवेति नात्र निरुपधिके वैवाहिके तद्दृष्टान्तभूतं भवितुमर्हति। यदि च निरुपधिकमपि राजदत्तत्वमात्रेण राज्ञ इति वैयात्यादुच्यते, तर्हि निरुपधिकमप्यन्येन दत्तमन्य एव गृह्णीयान्न तु राज्ञस्तत्राधिकारः स्यादिति महान् शास्त्रव्यवहारविरोधः। (३) कन्यादानमपि दानलक्षणाक्रान्तमेव। हरणसमाच्छेदने यथा सङ्गच्छेते तथा मूल एव स्पष्टम्। कन्यादानवाक्ये न ममेति प्रयोगाभावस्तु न सर्वसम्मतः। अत एव प्रयोगरत्ने स केषाञ्चिन्मतत्वेनोपन्यस्तः। सर्वेष्वेव च दानेषु नैकान्तिको न ममेति प्रयोगो येन केषाञ्चिदनुमतोपि तदभावो दानान्तरेभ्यः कन्यादाने वैलक्षण्यमादधीत। ददातिनैव त्यागस्याभिधानान्न ममेत्युक्तौ पौनरुक्त्यापत्त्या तन्न प्रयोक्तव्यमिति हि केषाञ्चिदभिप्रायः (५) परिवेदनस्थले पुनर्दानन्तु प्रत्युत पितुः स्वत्वनिवृत्तौ लिङ्गम्। "परिविविदानः कृच्छ्रातिकृच्छ्रौ चरित्वा तां तस्मै दत्त्वा पुनर्निवेशेत्" इति वसिष्ठेन परिवित्तेर्दातृत्वस्य बोधनात् पितुः स्वत्वनिवृत्तिमन्तरा तस्य दातृत्वायोगात्। (६) रिक्थाधिकारे स्वत्वस्य क उपयोगो येन दुहितृद्वारकं दौहित्रे स्वत्वमाक्षिप्यते। एवं हि सति गुरोर्बन्धूनां राज्ञश्चापि रिक्थाधिकारात्तेष्वपि स्वत्वं भवादृशः परमाक्षिपेत्। (७) पुत्रिकारूपे पुत्रे तु नैव स्वत्वस्योपयोगः। नहि पुत्रत्वं स्वत्वव्याप्यं येन तदाक्षिपेत्; गर्भदासादौ पुत्रत्वनिरूपकस्वत्वादर्शनात्। पुत्रिकायाः पुत्रे तु "अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति' दात्रभिसन्धीयमानं पुत्रग्रहणमङ्गीकृत्यैव सम्प्रदानेन कन्याया प्रतिग्रहाद्युक्तमेव तत्पुत्रे मातामहस्वत्वम्। परन्तु तत्र कन्यायां

दातृस्वत्वं नैवास्ति प्रमाणाभावात्। (८) विधवायाः पितृगृहे वासं विदधतः पराशरस्यायमाशयो यत्तत्रत्यानां पितामात्रादीनां विश्वसनीयतयाऽन्येषाञ्च तथाऽनिश्चयाद्व्यभिचारसम्भावनया ब्रह्मचर्यपरिरक्षणं निष्टङ्कं यथा भवेदिति। नैतावता पितुः स्वत्वमुत्प्रेक्ष्यम्। नहि यो यस्य स्वं स एव तस्य गृहे वसतीति नियमः। न हि पथिकब्राह्मणस्य कुलालगृहे वासस्य विहितत्वेऽपि कुलालस्य तस्मिन् स्वत्वम् भवादृशान्महापिण्डतादृते कश्चिदुत्प्रेक्षेत। (९) "नष्टे मृते" इत्यादेर्विवाहान्तरविधायकत्वस्य सिद्धौ दोषाणां स्वत्वानुत्पादकत्वादि कल्पयितुं शक्यम्। तदेव वक्ष्यमाणरीत्या न सिध्यतीति सर्वमिदं मनोराज्यविजृम्भणमेव। प्रत्युत "यद्यर्थिता तु दारैः स्यात्क्लीबादीनां कथञ्चन। तेषामुत्पन्नतन्तूनां अपत्यं दायमर्हति" इति क्लीबादीनामपि दारपरिग्रहेण तदपत्यानां दायहरत्वं वदता मनुना क्लैब्यादीनां स्वत्वनाशकत्वतदुत्पत्तिप्रतिबन्धकत्वयोरभाव एव स्पष्टं बोध्यते। किञ्च दुष्टेन परिणीतायां दुष्टस्वत्वानुपगमेऽपि "कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता। पुनर्भूः प्रथमा प्रोक्ता" इति नारदप्रदर्शितपुनर्भूत्वं दुरुद्धरमेव। अधिकन्तु कन्यात्वनिर्वचनादवसेयम्। (१०) क्व वयं स्वत्वस्य नित्यतां वदामो यत्रायं तदनित्यत्वोपपादनाय महान् फटाटोपः। दोषाविनाश्यत्वं परं वदामः। तत्र किमनित्यत्वोपवर्णनेन। अस्तु वाऽनित्यं स्वत्वम्। तावतापि भवदभिमतक्षणविशेष एव तन्नाशः किमित्युचितः। समवायातिरिक्ता अपि गगनभेदादीनां प्रतियोग्यनुयोगिभावादयः सम्बन्धाः किं न नित्याः, यत्कूपमण्डूकेन समवायस्यैव नित्यत्वं ज्ञायते इति न किञ्चिदेतत्। (११) कुत्र विधवोद्वाहशङ्कासमाधौ स्वत्वस्याविनाशित्वस्याभिमतत्वे लिङ्गम्,

यत्रायं व्यर्थः प्रलापः। भीष्मेण बलादपहृतायामम्बाख्यायां कन्यायां भीष्मस्वत्वावरुद्धत्वेनैव परपूर्वात्वप्रयुक्तस्त्यागः शाल्वेन कृत इति कस्मान्न भवान् सम्भावयति, स्वत्वनाशञ्च केन निश्चिनोति ॥ इति।

अङ्गीकारेऽपीति। अयमभ्युपगमवादः। वस्तुतो "देवदत्तां पतिर्भार्यां विन्दते नेच्छयात्मनः" इतिप्रभृतिवचनस्वारस्याद्देवकर्तृकं दानमेव स्वत्वापादकं न तद्भावनेति बोध्यम्।

स्वस्वत्वनिवर्तकस्यानुशयासम्भवादिति। स्वं भावयिता वरः। तस्यैव सोमो ददिदत्यादिमन्त्रपाठकर्तृत्वेन भावयितृत्वात्। तस्य च स्वत्वनाशकोऽनुशयो न सम्भवति। पित्रादेरनुशयसम्भवेऽपि न भावयितृत्वम्। कथञ्चिद्भावयितुस्तत्सम्भवेऽपि दानादिजन्यस्वत्वनाशकत्वस्यैवानुशये प्रमाणप्रमितत्वेन भावनाजन्यस्वत्वनाशकत्वे मानाभावादिति भावः। यत्तु स्वानुशयस्य स्वकर्तृकदानजन्यस्वत्वनिवर्तकत्ववद्देवकर्तृकदानजन्यस्वत्वनाशकत्वमप्यवश्यं वाच्यम्। अन्यथा तद्दानोत्तरं कुत्रापि वरे दोषनिश्चये देवानां सर्वज्ञत्वभङ्गापत्तिः। वस्तुतस्तु विवाहस्य प्राशस्त्यसम्पादनार्थं देवकर्तृकदानभावनामात्रम्। दानन्तु पितुरेव। अतस्तदनुशयस्यैव स्वत्वनाशकत्वमिति। तदशुद्धम्; अदात्रनुशयस्य स्वत्वनाशकत्वे मानाभावात्। तस्या जन्मान्तरकृतपापविपाकोद्देशेन बुद्धिपूर्वमेव दुष्टाय देवैर्दत्तेत्येवमपि सम्भावयितुं शक्यत्वेन सर्वज्ञत्वभङ्गप्रसङ्गलेशस्याप्यप्रसङ्गात्। प्रदर्शितदेवदत्तामितिवचनेन प्रदर्शयिष्यमाणप्रमाणैश्च देवकर्तृकदानस्यैव विवाहघटकत्वलाभात्। पितुरनुशयस्य तन्नाशकत्वाभ्युपगमेऽपि "पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम्" इति सप्तपदीप्रक्रमप्राक्कालिकानुशयस्यैव तन्नाशक-

त्वौचित्यात्। "दशैकपञ्चसप्ताहमासत्र्यहार्धमासिकम्। बीजायोब्राह्मरत्नस्त्रीदासपुंसां परीक्षणम्" इत्यादिना क्रीतानुशये कालविशेषावच्छिन्नस्यैव तस्य स्वत्वनाशकताया दृष्टत्वेनात्रापि तथैवौचित्याच्चेति।

एवं प्रव्रज्ययापीति। ननु सर्वत्यागमन्तरा प्रव्रज्यैव न सम्भवतीति कथं प्रव्रज्यया विवाहप्रयोज्यस्वत्वानिवृत्तिरिति चेन्न; सर्वविधबन्धमूलरागत्यागस्यैवप्रव्रज्याप्रयोजकत्वस्य श्रुत्यादिसिद्धत्वेन स्वत्वनिवर्तकत्यागस्य तद्धेतुत्वे मानाभावात्, रागत्यागेनैव सर्वविधोद्वेगापगमेन फलाभावाच्च। अत एव भगवता गीतायां "काम्यानां कर्मणा" मित्यादिना संन्यासतत्त्वविषयकाण्येकदेशिमतान्युक्त्वा "निश्चयं शृणु मे तत्र त्यागे भरतसत्तम। त्यागो हि पुरुषव्याघ्र त्रिविधः सम्प्रकीर्तितः॥ यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत्। यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्। एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च। कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्" इति स्वमतप्रदर्शनावसरे रागहेतोः सङ्गस्यैव त्याज्यत्वमुक्तम्। बृहदारण्यकेऽपि "एवमेवैतमात्मानं विदित्वा ब्राह्मणः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थाय" इत्यनेनैषणात्याग एव प्रव्रज्याहेतुत्वेन स्पष्टमुक्तः। योऽपि बाष्कलादिभिः "कुटुम्बं पुत्रदारांश्च वेदाङ्गानि च सर्वशः। यज्ञं यज्ञोपवीतञ्च त्यक्त्वा गूढश्चरेन्मुनिः" इत्यादीना कुटुम्बपुत्रादित्याग उक्तः, तस्यापि प्रदर्शितवचनैकवाक्यतयैषणात्याग एवाभिप्रायः। स्वत्वनाशोपयोगिनस्त्यागस्य स्वत्वाभावप्रकारकेच्छारूपस्य तथात्वे तस्य वेदाङ्गे यज्ञे चासम्भवेन तत्रान्यादृशस्यैव त्यागस्य वक्तव्यतयैकरूपेणोभयोरसङ्ग्रहात्सकृच्छ्रुतेनोभयोरलाभेन विधिवैरूप्या-

द्वाक्यभेदापत्तेः। मम तूद्वेगाभावरूपस्य सर्वविधत्यागफलस्य संन्यासिभिरवश्यसम्पाद्यस्य सर्वत्यागशिरोमणिनैषणात्यागेनैव सुसम्पादतया तस्यैव विधेयत्वेनाभिप्रेतत्वमिति न दोषः। एतेन—यत्प्रव्रज्यामूलकविवाहान्तरेणापि स्वत्वं नश्यत्येवेत्युद्दिश्य स्पर्शभाषणादिनिषेधैः स्वत्वाभावमेवोल्लिप्य सर्वस्वत्यागमन्तरा प्रव्रज्यैव न सिध्यतीति प्रव्रज्यायां स्वत्वनाशकत्वमावश्यकमेवेत्युपसंहृतम्, तदपि—अपास्तम्। प्रव्रज्यायां स्वत्वनाशकत्वं सिद्धान्तयता प्रव्रज्यामूलकविवाहान्तरेण स्वत्वं नश्यतीत्युद्देश्यमपि विस्मृतमित्यत्रैकमतिचित्रमिति।

तत्त्याग इति। मरणोत्तरं तत्त्यागविधानेन पतिस्वत्वस्य सौभाग्यचिह्नधारणप्रयोजकत्वोन्नयनादिति भावः। एतेन वाचनिकत्वं तत्थोत्प्रेक्षयन्तोऽत्रांशद्वशः परास्ताः। अत एव भर्तृकर्तृकमङ्गलसूत्रबन्धनमन्त्रे मम जीवनहेतुनेति दृश्यते।

औचित्यादिति। यत्तु नाशमरणयोरपि स्वत्वनाशकविवाहोपयोगित्वं तुल्यन्यायात्, एकत्र तथाऽऽश्रयणमपरत्र नेत्यर्धजरतीयस्यानौचित्यादित्युक्तम्। तत्तु प्रदर्शितदिशा क्लीबत्वादीनां स्वत्वनाशकत्वतदुत्पत्तिप्रतिबन्धकत्वयोर्भावस्य निष्टङ्कं सिध्या दत्तोत्तरम्। यदपि भर्तृस्वत्वस्य प्रजोत्पत्तिमुख्यफलकत्वात्तदनुत्पत्तिप्रयोजकानां श्रुतिस्मृत्यनुरोधेनैव स्वत्वनाशकत्वमिति ग्रन्थेन वैवाहिकस्वत्वस्य सोपधिकत्वं पुनरुक्त्वा मनुस्मृतिगृह्यसूत्रवैवाहिकमन्त्रस्थैर्विवाहस्य प्रजोत्पत्तिफलकत्वबोधकैर्लिङ्गैस्तदुपोद्बलितम्। तदप्युपपादितरीत्या तत्र सोपधिकत्वस्य सम्भावयितुमशक्यत्वेन निरस्तमेव चर्वितचर्वणम्। यदपि भार्यापुत्रकन्यासु स्वत्वमेव नेति विश्वजिति सर्वस्वदाने भार्यादि न देयमिति षाष्ठसिद्धान्तविरो-

धाव्यवहारमयूखेऽपि भार्यादिषु तदभावस्य व्यवस्थापितत्वाच्च सिद्धान्तितम्, तदपि न किञ्चित्। न हि स्वत्वाभावप्रयुक्तं पुत्रादेरदानं षाष्ठसिद्धान्तविषयः, अपि तु पित्रादेः। तत्र हि स्वपदेनात्मीयत्वपुरस्कारेण पित्रादिग्रहणं प्राप्नोतीति पूर्वपक्षो ददातिसमभिव्याहारात् स्वपदस्य धनपरतां निर्णीय समाहितः। माधवाचार्यैरपि पित्रादिपदमेवोपात्तम्। पुत्रादेरदानन्तु 'देयं दारसुतादृते" इत्यस्यानारभ्याधीतत्वेन सकलसर्वस्वदानशेषभूतात् प्रतिषेधादेव, न पुनः स्वत्वाभावात्, तथा सति श्रुतिस्मृतिसदाचारेतिहासादिविरोधप्रसङ्गात्। तथाहि—ऐतरेयब्राह्मणेऽजीगर्तकृतः शुनःशेपाख्यपुत्रस्य विक्रयो हारिश्चन्द्रिणा रोहितेन तस्य क्रय इति श्रूयते। क्रीतपुत्रोदाहरणे वासिष्ठादावपि शुनःशेपोदाहरणं स्मर्यते। तत्रैव "शोणितशुक्रसम्भवः पुरुषो मातापितृनिमित्तकस्तस्य प्रदानविक्रयत्यागेषु मातापितरौ प्रभवतः" इति दत्तकप्रस्तावे। तत्रैव सप्तदशे क्षेत्रजे बीजिनः स्वत्वं क्षेत्रिणो वेति चिन्तायाम् "तत्रोभयथाप्युदाहरन्ति "यद्यन्यगोषु वृषभो वत्सान् जनयते सुतान्। गोमिनामेव ते वत्सा मोघं स्यन्दनमार्षभम्" इति। अत्र च गोनिष्ठस्वत्वप्रयुक्तं तद्वत्सेषु स्वत्वं दृष्टान्ततयाभिदधतो भार्यायां पुत्रे च स्वत्वं स्पष्टमेवोक्तम्। महाभारते आदिप० १०५ अध्याये "मातापित्रोः प्रजायन्ते पुत्राः साधारणाः कवे १२६ तेषां पिता यथा स्वामी तथा माता न संशयः" इति। ननन्दपण्डितकृत दानकौतुके च महाभारतकात्यायनादिवचनाभ्यां भार्यादानमुक्तम्। तथाहि—"राजा मित्रसहश्चापि वसिष्ठाय महात्मने। मदयन्तीं प्रियां दत्त्वा तया सह दिवं गतः" इत्यादिना। भार्यादिषु स्वत्वाभावे तु सर्वमेतदसङ्गतं स्यात्। आपामरं प्रसिद्धं हि भार्यादिषु

स्वत्वम् । मनुः—मङ्गलार्थं स्वस्त्ययनं यज्ञश्चासां प्रजापतेः । प्रयुज्यते विवाहेषु प्रदानं स्वाम्यकारणम्—इति । एवं स्थिते गवादाविव भार्यायां स्वत्वाभावं तत एव तस्यामुत्पन्नेऽपत्येऽपि स्वत्वाभावमुपगच्छन् तत्र हेतुतया क्षत्रियादीनां प्रतिग्रहाभावेन तद्भार्यासु स्वत्वाभावात्तदपत्येषु च तदभावं प्रदर्शयन् मयूखस्तु चिन्त्य एव । प्रदर्शितवसिष्ठप्रभृतिवचनैः स्पष्टमेव भार्यापुत्रेषु स्वत्वस्य प्रतीतेः । भार्यायां क्रयादेः पुत्रेऽधिगमादेश्चार्जनस्य सत्त्वात् । क्षत्रियादेरपि प्रतिग्रहस्य स्वत्वोत्पादकत्वमस्त्येव । ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विजितमित्यादिगौतमोक्तो नियमस्त्वदृष्टार्थः । स्वत्वस्य तदुपायानाञ्च लौकिकत्वादिति मिताक्षराकारादिभिरुक्तत्वात् । अत एव प्रीत्या क्षत्रियवैश्यशूद्रेभ्यो दाने दत्ते तेषां स्वत्वं ब्राह्मणादेश्च भृत्यर्जिते स्वत्वञ्च पासुलपादपर्यन्तं प्रसिद्धं सङ्गच्छते । अत एव भगवतो भार्गवस्य विजितपृथ्व्यां स्वत्वमुपपन्नम् । तस्य च ब्राह्मणस्य विजितत्वस्य प्रकृतगौतमवचनेन गर्हितत्वात् "यद्गर्हितेनार्जयन्ति कर्मणा ब्राह्मणा धनम् । तस्योत्सर्गेण शुध्यन्ति" इति गर्हितार्जितस्य त्यागबोधनात् कश्यपाय तेन तन्निष्कृत्यै पृथ्वी दत्तेत्यन्यदेतत् । स्वत्वे तु न सन्देहः । अत एव क्षत्रियस्य ब्राह्मादिर्न प्रशस्तो विवाहः,तस्मै दानस्याधर्म्यत्वादित्यभिप्रेत्य राज्ञः प्रति भीष्मवाक्यं महाभारते आदिप० १०२ अध्याये" स्वयंवरन्तु राजन्याः प्रशंसन्त्युपयान्ति च । प्रमथ्य तु हृतामाहुर्ज्यायसीं ब्रह्मवादिनः" इति । तत्रैव—२१६, २२०, २२१ अध्यायेषु सुभद्राहरणप्रस्तावेऽपि स्पष्टमिदम् । प्रसह्य हरणे तु विजितत्वप्रयुक्तमेव स्वत्वम् , तत्तु धर्म्यमेव क्षात्रियस्येति तदाशयः । इत्थञ्च भार्यादिषु स्वत्वं निष्टङ्कं सिध्यतीत्यलं विस्तरेण ॥ इति ।

अथ यथावसरं विधवोद्वाहसमाधिनामकोऽयं ग्रन्थो योऽयं काशीगतानां बहूनां प्रसिद्धतमानां पण्डितानां आशयमनुसृत्य सङ्गृहीतः, तस्य यथावदेवात्र प्रकाशनमपि समुचितं पश्यामः। येन हि विधवाविवाहविषये शास्त्रार्थस्वारस्यं बहुन्यायानुगृहीतं सर्वेऽपि निष्पक्षपातिनो ज्ञातुं प्रभवन्ति। अत्र हि ग्रन्थे विद्यासागरमहोदयानां ग्रन्थोऽक्षरशः खण्डित इति विद्यासागरमहोदयाशयः शास्त्रसम्प्रदायादिविरुद्ध इति सम्यगेव स्फुटीभवति। अत्र हि ग्रन्थे विस्तरशो विचारितानां सङ्ग्रहोऽपि ग्रन्थान्ते सङ्गृहीत इति नोक्तग्रन्थतात्पर्यसङ्कलने कस्यापि क्लेशः स्यादिति विश्वसिमः। अत्र पूर्वोक्तप्रकारापेक्षया कुत्र कुत्र च प्रकारवैलक्षण्यमपि दृश्यते चेदपि फलतो न विशेष इति तु सर्वैरपि ज्ञातव्यम्। अत्रास्मदीयात्समालोचनात्पूर्वं ग्रन्थसङ्ग्रहं प्रथमतः सम्पादयामः—तद्यथा:—

[उक्तार्थे विवाहोद्वाहशङ्कासमाधिः]

वङ्गदेशीयैः कैश्चिन्महाधीभिः स्वकृतव्यवस्थापत्रे विधवानां विवाहः कलियुगे धर्म इति व्यवस्थापितम्, तदिदं सदसद्वेति विविच्यते। तथा हि 'परिवेदनपर्याधानयोरिव स्त्रीणां पुनरुद्वाहस्याऽपि प्रसङ्गात्क्वचिदभ्यनुज्ञां दर्शयति।

"नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते॥" इति॥

नष्टो देशान्तरगमनेनापरिज्ञातवृत्तान्तः। अयं च पुनरुद्वाहो युगान्तरविषयः। तथा चादित्यपुराणम्—

"ऊढायाः पुनरुद्वाहं ज्येष्ठांशं गोवधं तथा।
कलौ पञ्च न कुर्वीत भ्रातृजायां कमण्डलुम्॥"

पुनरुद्वाहमकृत्वा ब्रह्मचर्यव्रतानुष्ठाने श्रेयोतिशयं दर्शयति।

"मृते भर्तरि या नारी ब्रह्मचर्यव्रते स्थिता।
सा मृता लभते स्वर्गम्॥"

इति माधवाचार्यैः पराशरमाधवीये प्रायश्चित्तप्रकरण उक्तम्। विद्वन्मनोहरायां पराशरस्मृतिव्याख्यायां नन्दपण्डितैस्तु "नन्वस्तु परिवेदने कन्याया ज्येष्ठसमर्पणानन्तरं पुंस्तेनैव विवाहः, वाग्दानानन्तरमनिष्पन्ने विवाहे तु वरवैगुण्ये ज्ञाते कथमित्यत आह-- नष्टे मृत इति। वाग्दानानन्तरं पाणिग्रहणात्प्राक् पतावुत्पत्स्यमानपतित्वे पूर्वस्मिन्वरे नष्टे दूरदेशगमनेनापरिज्ञातवृत्तान्ते नारीणां कन्यानामन्यः पतिर्विधीयते। तदाह नारदः॥

"परिगृह्य तु यः कन्यां नरो देशान्तरं व्रजेत्।
त्रीनृतून्समतिक्रम्य कन्यान्यं वरयेद्वरम्॥
स्त्रीपुंसयोस्तु सम्बन्धाद्वरणं प्राग्विधीयते।
वरणाद्ग्रहणं पाणेः संस्कारोऽपि विचक्षणैः॥
तयोरनियतं प्रोक्तं वरणं दोषदर्शनात्॥ इति॥

इति व्याख्यातम्। अग्रे च—

अद्भिर्वाचा च दत्तायां म्रियेतादौ वरो यदि।
न च मन्त्रोपनीता स्यात्कुमारी पितुरेव सा॥ इति॥
नोदकेन न वाचा वा कन्यायाः पतिरुच्यते।
पाणिग्रहणसंस्कारात् पतित्वं सप्तमे पदे॥ इति॥
"पाणिग्रहणसंस्कारा नियतं दारलक्षणम्।
तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे॥"

इति क्रमाद्वसिष्ठयमनुवचनान्युपन्यस्य 'नष्टे मृते, इति वाक्यस्थचकारेणान्यजातीयादेर्ग्रहणम्। तथा च कात्यायनः।

"स तु यद्यन्यजातीयः क्लीबः पतित एव वा ।
विकर्मस्थः सगोत्रो वा दासो दीर्घामयोऽपि वा ॥
उढाऽपि देया साऽन्यस्मै सहावरणभूषणा ॥"

इति। अत्राऽपीत्यपिशब्दः कैमुतिकन्यायेन वाग्दत्ताया एवान्यस्मै दानमाचष्टे, न तूढायाः, तथात्वे सगोत्राया अपि पुनर्विवाहः प्रसज्येत, तथा सति च मातृवत्परिपालयेदिति विरुध्येत। पञ्चस्विति प्रचयशिष्टसंख्यानुवादो न परिसंख्या। नन्वेवं 'वाचा दत्ता मनोदत्ताऽग्निं परिगता सप्तमं पदं नीता भुक्ता गृहीतगर्भा प्रसूताचेति सप्तविधा पूनर्भूस्तां गृहीत्वा न प्रजां न धर्मं विन्देत" इति बौधायनवचोविरोधः स्यादिति चेन्मैवम्; तस्य निर्दुष्टवरविषयत्वात्। अतएव नारदः—

दत्तां न्यायेन यः कन्यां वराय न ददाति ताम्।
अदुष्टश्चेद्वरो राजा स दण्ड्यस्तत्र चोरवत् ॥"

इति तत्र दण्डं विधत्ते। तस्मादेवंविधेषु विषयेषु कृतेऽपि वाग्दाने वरान्तराय दानं भवतीति सिद्धमित्युक्त्वा स्वकृतव्याख्यायां बीजत्वेन कलिवर्ज्यप्रतिपादकवचनविरोध उक्तः। चतुर्विंशतिमतव्याख्यायां भट्टोजीदीक्षिता अप्येवमेवाहुः॥

तदेतन्मतद्वयमपि न साधु। पुनरुद्वाहो न भवतीत्यत्र प्रमाणाभात्। प्रमाणत्वेनाभिमतानां कलिवर्ज्यवचनानामाचारविरोधेन कलियुगैकविषयकपराशरस्मृतिविरोधेन चाप्रामाण्यावधारणात्। किंच माधवाचार्यैः पुराणवचनविरोधात् स्मृतेर्युगान्तरविषयत्वमुक्तम्, तन्न सङ्गतम्, स्मृतिपुराणयोर्विरोधे पुराणवचनानां दौर्बल्यात्। कलिवर्ज्यवचनानां सामान्यविषयकत्वेन बाध्यतायाः पराशरस्मृतिवचनस्य च विशेषविषयकत्वेन बाधकताया आ-

वश्यकत्वात्। पुनरुद्वाहब्रह्मचर्ययोः कलियुगीयधर्मत्वाभावे पूर्वस्मात्परस्मिन्श्रेयोतिशयोक्तेः स्वीयाया असङ्गतेः। उपक्रमोपसंहाराभ्यां पराशरस्मृतेः कलियुगानुष्ठेयधर्मबोधकत्वे सिद्धे तद्वाक्यस्य युगान्तरीयधर्मबोधकताकल्पनस्यासङ्गतेश्च। एवं नन्दपण्डितैरूढापदस्य लाक्षणिकत्वमुक्तम्, तन्न साधु; बीजाभावेन लक्षणाया अन्याय्यत्वात्, नष्टे मृत इत्यादि स्यादेष द्विगुणो विधिरित्यन्तनारदसंहिताविरोधाच्च। तथाच विधवानां विवाहः कलियुगे धर्मशास्त्राऽनुमत एवेति केचिद्वङ्गदेशीया वदन्ति॥ तत्र यदेभिर्नष्टादिपतिकानां पुनरुद्वाहाभावे प्रमाणं नास्तीत्युक्तम्, तन्न; तासां पुनरुद्वाहप्रापकस्यैव कस्याप्यभावे तदभावस्यार्थतः सिद्धेः। तथाहि—अलङ्कृत्य कन्यामुदकपूर्वां दद्यात्; बुद्धिमते कन्यां प्रयच्छेत्, कन्यामुपयच्छेत, इत्याद्याश्वलायनबौधायनादिकल्पवाक्यसमुदाये तादृशीमुद्वहेत्कन्यामित्यादिशातातपादिस्मृतिवाक्यसमुदाये च सर्वत्र कन्यापदोपादानात् कन्यात्वं विवाहदानयोः कर्मताप्रयोजकमिति लभ्यते। तत्र कन्यात्वस्य स्वरूपं ग्राहयितुमनन्यपूर्विकामित्याद्याः स्मृतयः प्रवृत्ताः। तत्रानन्यपूर्विकात्वमदुष्टपुरुषान्तरसम्प्रदानकदानकर्मत्वाभावे सति पुरुषान्तरेणाऽकृतसंस्कारत्वम्। अन्यत्वं चात्र सर्वत्र तदुद्वाहं चिकीर्षुव्यक्तिप्रतियोगिकं ग्राह्यम्। एवमदुष्टत्वमपि सप्तपद्याः प्राग्दुष्टनिश्चयविषयत्वविशिष्टो यस्तद्भिन्नत्वम्। एतदेव च कन्यात्वं विधिवाक्यादौ विवक्षितम्। अतएव कन्यां सम्प्रदद्यादित्याद्येव गौरीरोहिण्यादिदानादिवाक्यम्। दशवर्षात्वरूपं यमपरिभाषितं कन्यात्वं तु दातुर्ब्रह्मलोकावाप्तिफलकमेव, न तु विवाहनिमित्तम्। "ऋतुत्रयमुपास्यैव कन्या कुर्यात् स्वयं वरम्" इति विष्णुस्मृतेः,

"त्रिंशद्वर्षोद्वहेत्कन्यां हृद्यां द्वादशवार्षिकम्" इति मनुस्मृतेश्च यमपरिभाषितकन्यात्वस्याभावेऽप्युक्तकन्यात्वबलेन विवाहबोधकत्वात्। "रौरवं तु रजस्वलाम्" इति मरीचिवचनं तु प्रायश्चित्तमकृत्वा रजस्वलादानं कुर्वतो दोषबोधकमिति बोध्यम्।

तत्र "वाचा दत्ता मनोदत्ता" इत्यादिनोक्तबौधायनवचसा,

यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः।
तामनेन विधानेन निजो विन्देत देवरः॥" इति

मनुवचनेन, "दत्तां न्यायेन यः कन्याम्" इति दण्डप्रकरणस्थनारदोक्त्या चादुष्टाय वाचा दत्तायाः पतितप्रतिनिध्यन्येन विवाहाभावबोधनात्तस्याः कन्यात्वाभावलाभाय प्रथमदलम्। उक्तवचने पतिः पतित्वयोग्योऽदुष्ट इति यावत्। "परिगृह्य तु यः कन्याम्" इत्यादिभिर्वचनैर्दुष्टाय वाचा दत्ताया विवाहात्पूर्वं वरदोष दर्शने वरान्तराय दानस्य विधानात्तत्रत्यपतिशब्दस्यैतदर्थकताया एवौचित्यात्। एवं नियतं दारलक्षणमित्यादिमन्वादिवचनैः पत्युर्दुष्टत्वेऽपि सप्तपदोत्तरं पतिपत्नीभावो न परावर्तत इति तत्र स्त्रिया विवाहान्तराभावो बोध्यते, तथाच दुष्टेन परिणीताया बलादपहृत्य परिणीतायाश्च कन्यात्वाभावलाभायोत्तरदल निवेशः। अत एव।

"बलाच्चेत्प्रहृता कन्या मन्त्रैर्यदि न संस्कृता।
अन्यस्मै विधिवद्देया यथा कन्या तथैव सा॥" इति

बौधायनवचनेन—

"अद्भिर्वाचा च दत्तायां म्रियेतादौ वरो यदि।
न च मन्त्रोपनीता स्यात्कुमारी पितुरेव सा॥"

इत्यनेन दुष्टदत्ताविषयकेण वसिष्ठवचनेन चादुष्टं यत्पुरुषा-

न्तरं तत्सम्प्रदानकर्मत्वाभावस्येव मन्त्रसंस्काराभावस्याऽपि विवाह-कर्मतानियामककन्यात्वघटकत्वं प्रदर्शितम्। अस्य वसिष्ठवच-नस्य दुष्टदत्तापरत्वं तु 'स तु यद्यन्यजातीय' इत्याद्युदाहृतकात्याय-नवचनैकवाक्यत्वाऽनुरोधात्। अदुष्टदत्ताया नियोगबोधनेन पितु-रेव सेत्यनेन विरोधाच्च। न चैवं सति कात्यायनवचनस्थोढापद-स्य लक्षणया वाग्दत्तापरत्वं वक्तव्यम्, नच्च न युक्तं, लक्षणायां बीजाभावादिति वाच्यम्; ऊढापदस्य प्रापणार्थकवहधातुप्रकृति कत्वेनादिकर्मार्थकक्तान्तत्वेन वा वाग्दत्तायां मुख्यत्वेन लक्षणाऽ-नङ्गीकारात्। अत एव कात्यायनवचने सगोत्रो वेति सङ्गच्छते। अत एव चैतत्समानार्थे —

कुलशील विहीनस्य षण्डादिपतितस्य चः।
अपस्मारिविधर्मस्थरोगिणां वेषधारिणाम्॥
दत्तामपि हरेत्कन्यां सगोत्रोढां तथैव च॥"

इत्यादिवसिष्ठवचने दत्तामित्येव निर्देशः। तत्र सगोत्रो-ढामित्यस्य तु सगोत्रमूढां प्रापितामित्यर्थः। वार्तावह इतिवत्स-म्बन्धार्थको वहधातुः। स चात्र स्वत्वरूपः, साधनं कृतेति समा-सः। यद्वा सगोत्रेणोढां परिगृहीतामित्यर्थः। आदिकर्मणि क्तः। तच्चात्र सप्तमपदप्रक्रमप्राक्कालिकव्यापाररूपम्। किं-चोढापदस्योढापरत्वेऽपूर्वविधित्वकल्पनप्रयुक्तं गौरवम्। न चैतद्व-चनबलाद्विधिवाक्यार्थघटककन्यात्वशरीरेऽदुष्टसंस्कृतत्वाभाव एव निवेश्यत इति वाच्यम्; एवं सकोचकल्पनापेक्षयोढापदस्य वा-ग्दत्तापरत्वकल्पनस्यैवोचितत्वात्, वक्ष्यमाणदूषणगणग्रासात्। वरणस्य नियतत्वाभावः सप्तपद्यास्तु नियतत्वमिति बोधकस्य 'तयोरनियतं प्रोक्तं वरणं दोषदर्शनात्' इति "पाणिग्रहण मन्त्रास्तु

नियतं दारलक्षणम्" इति वचनद्वयस्य विरोधाच्च। तत्र नियतमित्यस्य दुष्टाऽदुष्टरूपविषयभेदेऽपि नियमेन पतित्वसंपादकमित्यर्थः। वरणमित्यनेन सप्तमपदप्रक्रमप्राक्कालिकं कर्म ग्राह्यम्। पाणिग्रहणमन्त्रा इत्यनेन च सप्तमपदप्रक्रमान्तं कर्म बोध्यम्। दोषदर्शनादित्यस्य वरदोषदर्शनादित्यर्थः। "नोदकेन नवा वाचा" "यस्या म्रियेत कन्याया" इत्यादिभिः संवादात्॥

वरश्चेत् कुलशीलाभ्यां न युज्येत कदाचन।
न मन्त्राः कारणं तत्र न च कन्याऽनृतं भवेत्॥
समाच्छिद्य तु तां कन्यां बलादक्षतयोनिकाम्।
पुनर्गुणवते दद्यादिति शातातपोऽब्रवीत्॥

इति वीरमित्रधृतशातातपवचने मन्त्रा इत्यस्य पाणिग्रहणाप्राग्दानादिप्रयोजका मन्त्रा इत्यर्थ। अक्षतयोनिकामित्यर्थः कन्यापदस्वरसात्। "पतित्वं सप्तमे पदे,, "नियतं दारलक्षणम् इत्याभ्यां विरोधाच्च।

"देशधर्मानवेक्ष्य स्त्री गुरुभिर्या प्रदीयते।
उत्पन्नसाहसाऽन्यस्मै सा द्वितीया प्रकीर्तिता॥,,

इति पुनर्भूप्रकरणे नारदवचनम्, तत्र देशधर्मानवेक्ष्येति ताहृशदानस्याऽशास्त्रीयताबोधनाय। "अन्यस्मै" साहसोत्पादयितृपुरुषव्यतिरिक्ताय या दीयते सा पुनर्भूरित्यर्थः। अस्या विवाहे शास्त्रीयत्वाभावप्रयोजकस्य कन्यात्वाभावस्य लाभाय परेणाऽभुक्तत्वमपि निरुक्तकन्यात्वशरीरे निवेश्यम्। तत्राऽपि—

"सकामायां तु कन्यायां संगमे नास्त्यतिक्रमः।
किं त्वलंकृत्य सत्कृत्य स एवैनां समुद्वहेत्॥

इति दण्डप्रकरणस्थनारदवचनेन स्वयमुपभुक्तायाः स्वेन

विवाहो युक्त इति बोधनात् । तस्याः कन्यात्वलाभाय परेणेति । अत एव "या गर्भिणी संस्क्रियते इत्याद्युपपन्नम् । गान्धर्वादिविवाहश्चोपपन्नः । तस्या अपि गर्भाधानकर्तृ पुरुषसम्प्रदानकदानोपयोगिकन्यात्वसद्भावात् । परोपभुक्तायास्तूक्तनारदवचनेन क्षतपुनर्भूत्वं प्रसिद्धमेव । एवं "बलाच्चेत् प्रहृता कन्या मन्त्रैर्यदि न संस्कृता अन्यस्मै विधिवद्देया" इति वसिष्ठबौधायनवचनेन बलात्परोपभुक्ताया अन्यस्मै दानं विधीयत इति तस्याः कन्यात्वसम्पत्तये बलं विनेत्यपि परोपभोगविशेषणं ग्राह्यम् । बलादपहृता कन्येत्येवं तद्वाक्यपाठस्तु न साधुः । बौधायनवसिष्ठस्मृतिपुस्तकेषु अनुपलब्धेः । बलापहरणमात्रस्य कन्यादूषणत्वाभावेन तत्र कन्यात्वस्याक्षततया यथा कन्या तथैव सा इत्यस्य नैरर्थक्यात् । 'प्रहृता' क्षता तथाच बलप्रहारस्याऽपि दोषत्वान्न तस्मै दानमित्यन्यस्मा इत्युक्तम् । अभुक्ताया इव बलादुपभुक्ताया अपि भोक्त्रन्यपुरुषसम्प्रदानकदानोपयोगिकन्यात्वमस्त्यतः कन्यात्वशरीरप्रविष्टोपभोगे बलं विनेति निवेशनीयमिति विधिवाक्यतात्पर्यग्रहार्थं यथा कन्या तथैव सेति । यथाऽनुपभुक्ता तथैवेयं बलादुपभुक्ताऽपि विवाहार्हेत्यर्थः तेन सकामा येनोपभुक्ता तस्मै दातव्या, निष्कामा तु भुक्ताऽन्यस्यै दातव्येति । सकामाया उपभुक्ताया अन्यस्मै दत्तायाः पुनर्भूत्वं च सङ्गतमिति । एवं स्वेन बलादनुपभुक्तत्वमपि निवेशनीयम् । तेन स्वयं बलादुपभुक्तायाः स्वस्मै दत्तायाः पुनर्भूत्वं सिद्ध्यति । तथाच दानेन भोगेन वाऽन्यपूर्वकत्वं तदभावोऽनन्यपूर्वकत्वमिति मिताक्षराकारमाधवादीनामुक्तिरप्यनुगृहीता भवति । न चाभ्यामनन्यपूर्वकत्वशरीरेऽन्यसंस्कृतत्वाभावो न निवेशित इति वाच्यम्; दानपदेन मनुष्यकर्तृकवद्देवकर्तृकस्याऽपि ग्रहणेन

तन्निवेशबोधनात्। "तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे" इत्यादिवचनबलेन सप्तमपदप्रक्रमपर्यन्तकर्मसमूहस्वरूपपाणिग्रहणसंस्कारस्य देवकर्तृकदानप्रयोज्यप्रतिग्रहप्रकाशककर्मत्वेन दानपदेनैव ग्रहणसूचनात्। सात्म्यकरणरूपसख्यस्य चात्यन्तस्वीकाररूपत्वात्। एतद्दानस्य च नियतत्वोक्त्या दुष्टाऽदुष्टविषयभेदेन व्यवस्थाया अनाकांक्षितत्वात्, मनुष्यकर्तृकदानापेक्षया कन्यात्वशरीरे तु पृथगेव निवेश आवश्यकः। यदि च कन्याया बलात्प्रहारो न दोष इत्येवानेन बोध्यते, अन्यस्मा इति तु प्रहर्त्रन्यस्मा अपि दानस्य वैधत्वे सुतरां प्रहर्त्रे दानस्य वैधत्वमिति सूचनाय। प्रहर्तुर्वरस्याऽपकारित्वान्न दानमिति त्वन्यत्, प्रहर्त्रे दानेऽपि पुनर्भूस्तु न भवतीत्युच्यते, तदा स्वेनाऽनुपभुक्तत्वं कन्यात्वशरीरे न देयमेवेति तत्त्वम्।

एवं निरूपितकन्यात्वस्य विवाहकर्मताप्रयोजकत्वकल्पने च बहून्युक्तान्यान्यनुग्राहकाणि उच्यन्ते। तथा हि मनुः—

"यस्मै दद्यात्पिता त्वेनां भ्राता वाऽनुमते पितुः।
तं शुश्रूषेत जीवन्त संस्थितं च न लङ्घयेत्॥"
"न तु नामाऽपि गृह्णीयात्पत्यौ प्रेते परस्य तु" इति।
"देवदत्तां पतिर्भार्यां विन्दते नेच्छयात्मनः" इति।

"सकृत्कन्या प्रदीयते" इति च॥ एवंविधान्यन्यान्यपि मृतपत्युल्लङ्घननिषेधकानि मुनिवचनान्यनुसन्धेयानि।

ननु—मृते भर्तरि या नारी त्यक्तवत्यथ तं स्वयम्।
सवर्णाज्जनयेद्गर्भं भर्तुः पौनर्भवं सुतम्॥
यदि सा बालविधवा बलात् त्यक्ताऽथवा क्वचित्।
त्यक्त्वा भर्तृगृहं गच्छेत् यदि दोषं विना पुनः॥

भर्त्रा सा संस्कर्तव्या च प्रायश्चित्तादिभिः क्रमात् ।
स्त्रीणां पुनर्विवाहस्तु देवरात्पुत्रसन्ततिः ॥
स्वातन्त्र्यं वा कलियुगे न कर्तव्यं कदाचन ।"

इति ब्रह्मपुराणवचनेन कश्चिदुद्धृतेन—

"या पत्या वा परित्यक्ता विधवा स्वेच्छयाऽपि वा ।
उत्पादयेत्पुनर्भूत्वा स पौनर्भव उच्यते ॥
सा चेदक्षतयोनिः स्याद्गतप्रत्यागताऽपि वा ।
पौनर्भवेन भर्त्रा सा पुनः संस्कारमर्हति ॥"

इति मनुवचनसमानार्थकेन पतिकर्तृकः पुरुषान्तरकर्तृकश्चेति संस्कारद्वयं विधीयते, द्वितीयस्तत्र नोपपन्नः, विवाहकर्मताप्रयोजकोक्तकन्यात्वघटकस्यानन्यसंस्कृतत्वस्याभावेन पुरुषान्तरकर्तृकविवाहासम्भवादिति चेन्न ; अस्य विध्यन्तरतया कन्यात्वानपेक्षत्वेनादोषात् । अस्य च न भार्यात्वसम्पादकत्वम्, किन्तु स्वैरिणीगमनदोषादेतद्गमने दोषन्यूनतासम्पादकत्वमेव । तस्याः पूर्वं क्षतत्वाभावात् संस्कारकरणेन नियतपुंस्कत्वाच्च । अत एव श्राद्धादौ तन्निषेध उपपद्यते ।

अन्ये त्ववैधमेव पुरुषान्तरकर्तृकं संस्कारकर्म, तादृशकर्मबोधकविधेरभावात् । उक्तब्रह्मपुराणवचनस्य तु येन केन चिद्गृहीत्वा पुनः संस्कार्येत्यादिर्नार्थ । मृते भर्तरि या नारीत्यादिपूर्वश्लोकार्थाऽनन्वयात् । किन्तु भर्तरि मृते सति त्यक्तवति वा या नारी स्वयं सवर्णाद्भर्तुर्धारयितु गर्भं जनयेत् तं तस्य पौनर्भवं सुतं जानीयात् । इदं कदेत्याकांक्षायामाह, सा बालविधवा बलात् त्यक्ता वा, तदा वैधव्यत्यक्तत्वान्यतरावस्थायां येन केनचित्समानवर्णगोत्रपिंडादिना मोहवशात्पुनरपि संस्कृत्य गृहीता यदि

स्यात् तर्हि तं पौनर्भवं जानीयादित्यर्थः। एतादृशस्यैवाऽर्थस्य स्वारसिकमनुवचनार्थसंवादोऽपि। तथाहि—या पत्या स्वेच्छया परित्यक्ता विधवा वा केनचित्संस्कृता भूत्वायं पुत्रमुत्पादयेत्स पौनर्भव उच्यते, या यद्यक्षतयोनिःस्यात् इत्येकं वाक्यम् उत्तरवाक्येऽपि वाशब्दःक्षतयोनिरिति सम्बध्यते। तथा च सा यदि पौनर्भवेन पुरुषान्तरेण सह गता सती अक्षतयोनिरेव प्रत्यागता भवति। तदा भर्त्रा कृतं संस्कारमर्हतीत्यर्थस्य स्वारस्यतो मनुवाक्यात्प्रतीतेः। अत एव मोहात्परपूर्वां संस्कुर्वतस्तस्याः परित्यागं प्रायश्चित्तं चाहाश्वलायनः—

"अज्ञातश्च द्विजो यस्तु विधवामुद्वहेद्यदि।
परित्यज्य च तां चैव प्रायश्चित्तं समाचरेत्॥ इति॥

अत एव "पाणिग्राहे मृते बाला केवलं मन्त्रसंस्कृता।
सा चेदक्षतयोनिः स्यात्पुनः संस्कारमर्हति॥

इतिवासिष्ठवचने केवलमिति सङ्गच्छते। तस्य च मन्त्रैः संस्कृता न तु क्षतयोनिरित्यर्थबोधकत्वं न; सा चेदक्षतयोनि स्यादित्यनेन पौनरुक्त्यापत्तेः, किं तु केवलं मन्त्रसंस्कृता मन्त्रसंस्कार्यताऽवच्छेदककन्यात्वविरहेऽपि केनचिन्मन्त्रप्रयोगपूर्वं गृहीतपाणिरित्येवार्थः। अत्राऽमृते इति छेदः; वीरमित्रनन्दपण्डितधृत "कृत" इतिपाठेनार्थानुगुण्यात्। पुनः संस्कारश्च पूर्वपतिकर्तृकः। तथा चास्य परकर्तृकसंस्कारस्यावैधत्वमेव सिद्धमित्याहुः।

इत्थं च न क्वाऽप्यकन्याविवाहः शास्त्रेण सिध्यति। पतित्वसम्पादकं कर्म च विवाह एव शास्त्रेण विहितः। तस्य च नष्टादिपतिकासु उक्तयुक्त्या कन्यात्वाऽभावेनाभावात् पत्यन्तराभाव एव तासामिति सिद्धम्। पुनर्भ्वाः पूर्वपतिकर्तृकसंस्कारस्थले च

पूर्वसंस्कारस्य स्वेनैव कृतत्वात् तस्या अप्यन्यासंस्कृतत्वाद्विघटितं कन्यात्वमस्त्येवेति न तत्राप्यकन्याविवाहः। अपतिकाया नियोगस्थले च नियुक्तस्य देवरादेर्ऋत्विगादिवन्मुख्यपति प्रतिनिधित्वात् तत्कर्तृकसंस्कारस्य तद्द्वारा मुख्यकर्तृकत्वात् न तत्राऽप्यन्यस्मै दत्तत्वमिति सोऽपि कन्याया एव विवाहः। एतेन ब्रह्मपुराणवचनस्येव नष्टे मृत इत्यस्याऽपि विध्यन्तरत्वमिति परास्तम्; ब्रह्मपुराणवचनव्यवस्थाया उक्तत्वेन तस्य दृष्टान्तत्वासम्भवात्। इत्थं च यस्या म्रियेत कन्याया इत्याद्याभिर्नियोगबोधकत्वाद्वाग्दत्ताया अन्येनोद्वाहाभावबोधिकाभिर्वाचा दत्ता मनोदत्तेत्याद्याभिः पुनर्भूत्वबोधकत्वात् तस्या अन्येनोद्वाहाभावबोधिकाभिस्तयोरनियतं प्रोक्तं वरणमिति नोदकेन न वाचेति 'अद्भिर्वाचा च दत्तायां म्रियेतेति' तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे, इत्यादिभिस्तस्या एव वरान्तरोद्वाहबोधिकाभिः स्मृतिभिश्च अदुष्टश्चेद्वरो राज्ञेतिदण्डबोधकस्मृत्यादिसहकारेण दुष्टाऽदुष्टभेदेन व्यवस्थामास्थाय विधिघटककन्यात्वशरीरेऽदुष्टपुरुषान्तरसम्प्रदानकदानकर्मत्वाभावरूपविशेषणस्य निवेशो बोधितः। तत्र च तदन्तःपातिसम्प्रदानरूपवरविशेषणीभूताभावप्रतियोगिनां दोषाणामनुगतस्वरूपजिज्ञासायां वक्ष्यमाणरीत्याऽनुगतरूपेण वरदोषबोधनेन परिक्षीणानां नष्टे मृत इत्यादीनां पराशरकात्यायनादिस्मृतीनामर्थान्तरबोधने सामर्थ्याभावाद्विधित्वासम्भव एव। एवं विद्वद्भिः सप्तमे पद इत्यादिस्मृत्यनभिमतस्य दुष्टपरिणीताविवाहस्यापत्तेस्तदवस्थत्वेन तत्स्मृतिवैयर्थ्यापत्तिः। वक्ष्यमाणरीत्या नष्टे मृत इत्यस्य सर्वदुष्टोपलक्षणत्वात्। भवद्रीत्या नारदस्मृतिसंवादित्वेनास्य कलियुगैकविषयताया वक्तुमशक्यत्वादिति सिद्धम्।

अपिच पतित्वसम्पादकं कर्म विवाहरूपमेव वक्तव्यमन्यस्य तत्सम्पादकस्य क्वचिदप्यनुक्तेः नामधेयैश्चाच्च। विवाहादिपदार्थश्च स्वत्वविशेषोत्पत्त्यनुकूलव्यापार एव। अत एवोपायमः स्वकरणे इति पाणिनिस्मरणमुपपद्यते इत्याद्युदाहृत्योद्वहतीति विवरणं च वृत्तिकाराणां सङ्गच्छते। उद्वाहविवाहशब्दघटको वहधातुः परिणयशब्दघटको नीधातुश्च स्वीकारार्थक इत्यमरटीकाकारराजमुकुटोऽपि। तत्र धात्वर्थस्वत्वविशेषे उद्विपरिभिः स्वत्वान्तरात्प्रकर्षो बोध्यते। स च स्वनिरूपकतावच्छेदकावच्छिन्ननाशादिदोषैरनश्वरत्वस्वरूपः। अत एव 'संस्थितं च न लङ्घयेत्'।

"मङ्गलार्थं स्वस्त्ययनं यज्ञश्चासां प्रजापतेः।
प्रयुज्यते विवाहेषु प्रदानं स्वाम्यकारणम्॥"

"न निष्क्रियविसर्गाभ्यां" इति च सङ्गच्छते। एवं च यत्र विवाहोत्तरं पत्युर्दोषोत्पत्तिः पुरुषान्तरेण च सह भवदभिमतविवाहो न कृतस्तत्र दैववशात् क्लीबत्वादिदोषनाशे सर्वसम्मततत्पत्नीत्वानिवृत्तिरेव। अन्यथा तदानीं पुनः पत्नीत्वोत्पादककारणस्यानुक्तत्वेन तन्नोपपद्येत। भोक्तृत्वभोग्यत्वादिकार्यविशेषस्तु संस्कारोत्पादकतावच्छेदकसंस्कारावच्छेदकैतदुभयान्यतरशरीरावच्छेदेनैव। अत एव तं शुश्रूषेत जीवन्तमिति मनुवचने तं स्वत्वनिरूपकं संस्कारोत्पादकतावच्छेदकशरीरविशिष्टमित्यर्थकं जीवन्तमिति सङ्गच्छते। अन्यथा तद्वैयर्थ्यं स्पष्टमेव। एवं स्थिते यदि वैयात्याद्देव दोषाणां संस्कारनाशकत्वमङ्गीक्रियेत, भूतकालिकतत्कृतसंस्कारस्यैव चौर्ध्वदैहिकादिप्रयोजकत्वं स्वीक्रियेत, तथाऽपि "न च मन्त्रोपनीता स्यात्" "मन्त्रैर्यदि न संस्कृते" त्यादिवचनेषु भूतकालार्थकक्तप्रत्ययनिर्देशेन भूतकालिकसंस्कारस्यैव भोगवद्विवाहप्रतिबन्धकत्व-

लाभादन्यकृतसंस्कारावच्छेदकशरीराविशिष्टत्वादेव कन्यात्वघटकत्वमिति न दोषः। अत एव "नियतं दारलक्षण"मिति न विरुध्यते। सोऽयं विवाह एतद्विधिविषये न सम्भवति।

सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः।
तृतीयो अग्निः पतिस्तुरीयस्ते मनुष्यजः।"

इतिमन्त्रविरोधात्, तस्य मनुष्ये पत्यौ तुरीयत्वबोधकत्वात्, मनुष्यरूपपत्यन्तरस्य पञ्चमत्वेन मन्त्रप्रकाश्यतुरीयत्वाभावात्। एवं "—सोमोददद्गन्धर्वाय गन्धर्वो ददद्ग्नये।

रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम्॥" इति।

कन्याया अग्निदत्तत्वबोधकमन्त्रविरोधः। एकस्मा अग्निना प्रदत्ताया अन्यस्मै दानासम्भवात्। एवं "गृभ्णामि ते सौभगत्वाय हस्तं मया पत्याजरदष्टिर्यथा सः। भगो अर्यमा सविता पुरन्धिर्मह्यं त्वाऽदुर्गार्हपत्याय देवाः" इति पाणिग्रहणमन्त्रविरोधश्च। अर्थविरोधाच्च तेषां मन्त्राणां निवृत्तौ तत्प्रकाश्यकर्मणां प्रधानपाणिग्रहणादीनां निवृत्तौ चास्य कर्मणो विवाहस्वरूपताभङ्गेन तद्विधित्वस्य दुरुपपादत्वात्। इदं च देवकर्तृकदानं मनुरप्याह—

"देवदत्तां पतिर्भार्यां विन्दते नेच्छयात्मनः" इति।
"मङ्गलार्थं स्वस्त्ययनं यज्ञश्चासां प्रजापतेः।
प्रयुज्यते विवाहेषु प्रदानं स्वाम्यकारणम्"॥

इति च। तत्र देवकर्तृकदानप्रकाशकव्यापारोऽतीन्द्रिय इत्यन्यत्। मन्त्रे दानतदुत्तरप्रतिग्रहलिङ्गमदुर्गृभ्णामीति च श्रूयते। प्रतिग्रहप्रकाशकव्यापारश्च पुच्छाद्यवच्छेदेन गवादिग्रहणवत्पाण्यवच्छेदेन कन्याग्रहणरूपः। अत एव तन्मन्त्रे हस्तमित्युक्तम्। देवकर्तृकं दानं नैवास्तीति मतेऽपि दत्तामदुरित्याद्युक्तदानत्वेन समारूपाद्वलात्म-

न्त्रोच्चारणस्वोद्देश्यकदानभावनाभ्यामेव स्वत्वोत्पत्तेरावश्यकत्वेन प्रथमभावयितृनिरूपितसंस्काररूपस्वत्वविशेषोत्पत्तौ सत्यां पुनर्मन्त्रोच्चारणभावनाभ्यामन्यपुरुषनिरूपितस्वत्वोत्पत्तेरयोगोस्त्येवेति बोध्यम्। न च धर्मप्रजोत्पादप्रयोजकभार्यात्वसम्पत्त्यर्थमेव दानमिति तत्सोपधिकं जातमित्युपधिविगमे विवाहान्तरमपि तत्परावर्तनं भविष्यतीति वाच्यम् ; तादृशोपधिविगमे पित्रादिदानप्रयोज्यस्वत्वनाशसम्भवेऽपि संस्कारे उत्पन्ने सति पुनःसंस्कारोत्पत्त्ययोगेनानुशयस्याप्रयोजकत्वात् परावृत्तेरन्याय्यत्वात्। "नियतं दारलक्षणम्" "न च मन्त्रोपनीता स्यात्" इत्यादिवचनबलेनोपधिविगमस्य संस्काररूपस्वत्वनाशप्रयोजकत्वानङ्गीकारात्। विवाहात्पूर्वं भावितादृशोपधिविगमनिश्चये तु पित्रादिदानप्रयोज्यवरस्वत्वनाश इति त्वन्यत्। तथाचानुशयप्रकरणे "यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति" इत्यादिना विवाहप्रतिबन्धकदोषानवाख्याय कन्यां दत्तवत्तो "अकन्येति तु यः कन्यां ब्रूयाद्द्वेषेण मानवः" इत्यादिना विवाहप्रतिबन्धकदोषान्मिथ्याभिशंसतश्च दण्डमुपक्रम्य मनुः—

"पाणिग्रहणिका मन्त्रा कन्यास्वेव प्रतिष्ठिताः।
नाकन्यासु क्वचिन्नृणां लुप्तधर्मक्रिया हिताः"

इत्यनेन कन्यात्वाभावे पाणिग्रहणमन्त्रनिवृत्तिमाह। तत्र लुप्तधर्मक्रियेत्यादेरयमर्थः। लुप्ता धर्माः मन्त्रोपात्तकन्यात्वतुरीयवरसंप्रदानकचिकीर्षितदानकर्मत्वादयः क्रिया दानप्रतिग्रहादयो यासां ताः तदेवोत्तरकारिकया प्रकाश्यते। "पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम्" इति। अकन्यात्वादिदोषानाख्यानेन दाने विवाहे च सति वरानभीप्सितकन्यायाः परावृत्त्यभावेन संस्कृतत्वक्षतत्वादिदोषारोपे च सति विवाहाभावप्रसंगेन दण्ड उचित एवेति भावः।

इत्थं च पाणिग्रहणमन्त्रेषु कन्यात्वादिश्रवणेनाकन्यानां दानेन तद्भावनेन वा स्वत्वरूपसंस्कारानुत्पत्तेरेव सिद्धतया स्त्रीणां द्वितीयविवाहाभाव एवेति सिद्धम्। किंच नष्टादिपतिकायाः पुनः संस्कारे तस्या भवदनभिमतपुनर्भूत्वापत्तिः। उक्तविधान्यपूर्वत्वे सति संस्कृतत्वस्य पुनर्भूलक्षणत्वात्। "अक्षता वा क्षता वाऽपि पुनर्भूः संस्कृतापुनः" इति याज्ञवल्क्यवचने पुनरित्यादेर्विवाहाभावप्रयोजककन्यात्वाभावसंपत्त्यनन्तरं संस्कृता गृहीतपाणिरित्यर्थः। पुनर्भूर्दिधिषूढाद्विरित्यमरस्तु प्रायोवादः। अत एव देशधर्मानवेद्यं स्त्रीतिनारदवचनेन "सकामायां तु कन्यायामि"त्यत्रैवकारेण च बोधितं संस्कारात् पूर्वं क्षताया अन्येन पाणिग्रहणे पुनर्भूत्वं सङ्गच्छते। तदाह वसिष्ठः—"या वा क्लीबं पतितमुन्मत्तं वा भर्तारमुत्सृज्यान्यं पतिं विन्दते मृते वा सा पुनर्भूर्भवतीति। एतेन पुनर्भूलक्षणघटकसंस्कारविशेषणीभूतान्यांशेन नष्टादिपत्यन्यत्वनिवेश एव क्रियते इत्यपास्तम्; अक्षतविधवायाः पुनर्भूत्वाऽनुपपत्तेश्च। किंचास्य विधित्वे ब्रह्मचर्येण सहास्य गुरुतरस्य विकल्पस्य श्रेयोतिशयस्य वाकल्पनायामतिगौरवम्। तच्च सति गत्यन्तरेऽयुक्तमेवेति ध्येयम्।

यत्तु "तस्मादेकस्य बह्व्यो जाया भवन्ति नैकस्यै बहवः सहपतयः" इति श्रुतौ सहपदस्वारस्यात्क्रमिकबहुपतित्वमनुमतम्, तद्बलादेवास्य स्वतन्त्रविधित्वं सत्यऽपि दोषे कल्प्यत इति; तन्न साधु; युगपन्नानापुरुषेभ्य एककन्यादानप्रसक्तौ तन्निषेधाय सह पतयो नेत्यस्य प्रवृत्तेस्तस्य क्रमिकबहुपतिसत्त्वाऽकल्पकत्वात्। प्रत्युत विधिवाक्यीयसंप्रदानबोधकपदोत्तरैकवचनार्थविवक्षार्थोऽनुवादकत्वात्।

"यस्मै दद्यात्पिता त्वेनां भ्राता वाऽनुमते पितुः ।
तं शुश्रूषेत जीवन्तं संस्थितं च न लङ्घयेत् ॥ इति

सूत्रयित्वा उभयथाऽपि नलङ्घनाभावस्य कारणतया तत्स्वामित्वमुक्त्वा जीवल्लङ्घनाभावं चोक्त्वा मृतपतिलङ्घनाभावव्याख्याने "न तु नामाऽपि गृह्णीयात्पत्यौ प्रेते परस्य तु" इति "न द्वितीयश्च साध्वीनां क्वचिद्भर्तोपदिश्यते" इति च मृतपतिव्यतिरिक्तपुरुषगमनादिनिषेधं कुर्वता मनुनोपष्टब्धायास्तस्मान्नैका द्वौ पत्ती विन्दते इति श्रुतेर्विरोधाच्च । तथा च मृतलङ्घनाभावप्रयोजकं मृतस्याऽपि स्वत्वमस्तीति सिद्धम् । नियोगस्थले तु नियुक्तस्य मृतप्रतिनिधितया तद्भिन्नत्वात्पुत्रोत्पादकत्वेन तद्भोगे मृतस्वत्वस्याप्रतिबन्धकत्वमेवेति न दोषः । पत्यप्रतिनिधिगमने तु दोष एव । अनन्यपूर्वकत्वेन च नियुक्तायां न पुनर्भूत्वम् ॥ किञ्च नष्टादिपतिकायाः पुनर्विवाहविधाने तां गृह्णतोऽस्वभोगजन्यपातकप्रसङ्गः । न च पूर्वपतिस्वत्वनाशात्तस्यामौपादानिकमेव स्वत्वं तथा च न दोष इति वाच्यम् ; प्रदानं स्वाम्यकारणमिति मनूक्तेर्मृतस्याऽपि पत्युः स्वत्वसत्त्वात् । अत एव क्षेत्रिणोपत्यं न बीजिन इति प्रकरणे "न निष्क्रयविसर्गाभ्यां भर्तुर्भार्या विमुच्यते" इत्यनेन स्त्रीणां यावज्जीवं मृते जीवति वा पत्यौ तत्स्वत्वाक्रान्ततया तासां विवाहोत्तरं केनाऽपि दानमशक्यमित्युपक्रम्य "सकृदंशो निपतति सकृत्कन्या प्रदीयते" इति मनुनोक्तम् । तन्नाशस्वीकारेऽपि च रक्षकपरम्परान्तर्गतस्य पारतन्त्र्यनिरूपकस्य कस्योऽप्यवश्यं सत्त्वेन क्रमश उत्पद्यमानेन तस्य तस्य स्वत्वेनावरोधात् । पित्रादिकर्तृकदाने सति तु भर्तुः स्वत्वस्य नावरोधः । दातुः स्वत्वस्य दानीयस्वत्वजनकत्वात् । अत एव जन्मादिभिः पुत्रादिस्वत्वमुपपद्यते ।

न च यत्र कन्याया मातापित्रादिर्नश्यति, तत्र तस्यां राजादीनां स्वत्वं दानप्रयोजकमस्ति। तद्वदत्राऽपि यस्य कस्य चित्स्वत्वसत्त्वेन स तामन्यस्मै दातुं शक्नुयादिति वाच्यम्; तत्र पित्रादेर्दानाधिकारिणोऽसत्त्वेऽन्येन दानाधिकारिणाऽदत्तकन्यादानस्य युक्तत्वात्। इह तु तस्या एकवारं दत्तत्वेन कन्यात्वाभावाद्दानविधिविषयत्वविरहेण पुनस्तद्दाने राजादीनामनधिकारात्। न च दुष्टवरस्थले "सकृत्कन्या प्रदीयते इति विरुध्यते, तत्र तस्या अन्यस्मै दानादिति वाच्यम्; सप्तपदीप्राग्वर्त्यप्रामाण्यज्ञानानास्कन्दितदोष निश्चयविषयीभूतसम्प्रदानकत्वाभावरूपप्रकर्षविशिष्टस्यैव कन्यात्वोपलक्षितकर्मकदानस्य सकृत्त्वबोधनात्। दुष्टवरस्थले च तादृशनिश्चयस्य तन्निरूपितस्वत्वनाशकत्वात् कन्यात्वोपलक्षितकर्मकदानस्य सकृत्त्वबोधना "न्न निष्क्रयविसर्गाभ्यां" इत्युक्तसङ्गतिः। प्रदर्शितप्रकर्षस्यैव तु विवक्षणे मानानि तु गदितप्रायाणीति नेहोपन्यस्यन्ते। एतेन सकृत्कन्येति वाक्यं कन्यात्वविशिष्टायाः पुनर्दानाभावबोधकमित्यपास्तम्; प्रदर्शितोपक्रमविरोधात्, कन्यात्वसत्त्वे दानावश्यंभावाच्च। तस्माद्विवाहितां पुनरुद्वह्य गृह्णतोऽस्वभोगजन्यपातकप्रसङ्गः॥ एवं तस्यां पित्रादिदानजन्यस्वत्वाभावेन मृतपतिकृतसंस्कारस्य पूर्वोक्तमनुवचनेन यावज्जीवस्थायितायाः बोधनेन च साङ्गस्तत्संस्कारोऽप्यनुपपन्नः; प्रदानस्य विवाहप्रकरणपठितत्वेन विवाहाङ्गत्वात्, संस्कारानन्तरोत्पत्तिप्रतिबन्धकपतिकृतसंस्कारस्य च सत्त्वात्। अत एव तन्नियोगजपुत्रत्वोपयोगि तत्क्षेत्रत्वं तदुद्देशेनौर्ध्वदेहिकाचरणं तद्दायहरणं पत्न्याः, पत्नीपापपुण्याभ्यां पत्युर्निरयस्वर्गौ चोपपद्यन्ते। तत्संस्कारनाशश्चोभयनाशादेव। संस्कारप्रयोज्यशुश्रूषादिरूपकार्यविशेषस्तु तत्सं-

स्कारोत्पत्त्यवच्छेदकशरीरावच्छेदेनैव भवति॥ न च विवाहोत्तर-मपि मरणादिदोषाणां स्वत्वादि नाशकत्वं स्वीक्रियते, तादृशदान-जन्यत्वाभावसत्त्वेन च कन्यात्वसत्वात् कन्यामुद्वहेदिति विधिप्राप्तौ तदनुष्ठानेन पुरुषान्तरस्वत्वमुत्पत्स्यत इति वाच्यम्; नष्टे मृते इत्यादेः स्मृत्यन्तरक्लृप्तत्वावश्यकत्वाभ्यां वाग्दत्तानियोगा-न्यतरपरत्वेनोत्तरं दोषाणां स्वत्वनाशकल्पकत्वाभावेन माना-भावात्, नियतं दारलक्षणमित्यादिभिर्विरोधाच्च। देयात्या—देव तथा स्वीकारेऽपि अनन्यपूर्विकामित्यत्र पूर्वग्रहणात् भोगनि-वेशवददुष्टसम्प्रदानकदानजन्यस्वत्वावच्छेदकशरीरविशिष्टस्यैव तत्र भवद्भिरपि निवेशनीयतयोद्वाहोत्तरं तद्विधिप्राप्तेरयोगाद्विवा-हविधित्वस्वत्वनाशकत्वबोधकत्वैतदुभयासम्भवाच्च। तथा च प्रकृ-तसंस्कारस्वत्वयोः सकृदुत्पत्तौ तच्छरीरावच्छेदेन पुनः पुरुषान्तरीये ते नोत्पद्येते इति सिद्धमित्युक्तम्। न चेदं दानं वाचनिकमेव, न तु स्वत्वोत्पादकं, तथा चास्वामिनाऽपि केनचिदिदं विधिनिर्वाहाय कर्तुं शक्यमिति वाच्यम्; प्रदानं स्वाम्यकारणमिति मनूक्तविरो-धात्। न च तु मत्याः स्वयंवरणविधौ प्रदानाभावेन पतिस्वत्वाभा-वात् संस्कारो भोगश्च न स्यादिति वाच्यम्; तत्राऽपि यथाक्रमं पित्रादिराजान्तानुमत्यैव वरसंयोगस्य नारदादिसम्मतत्वात्। न च नियोगस्थले प्रदानस्याभावान्नियोगकर्तृकभोगसंस्कारयोरनुप-पत्तिरिति वाच्यम्; तत्स्थलीयभोगसंस्कारकर्तुर्मुख्यपतिप्रतिनिधि-तया मुख्यस्वत्वबलाद्भोगसंस्कारयोरुपपन्नतया तादृशप्रतिनिधि-स्वत्वानपेक्षणात्। अयं च नियुक्तकर्तृकः संस्कारो यथाविध्युपग-म्यैनामित्यादिना मन्वादिभिरुक्तः। मिताक्षराकारकुल्लूकभट्टाभ्यामपि परिणयेदित्युक्त्या सूचितः। भार्यात्वं तु मुख्यनिरूपितमेवेति

बोध्यम् । न चासुरराक्षसादिविवाहे प्रदानाभावेन साङ्गसंस्कारानुपपत्तिरिति वाच्यम्; प्रदानस्य ब्राह्मादिविवाहाङ्गत्ववद्रुदतीं रुदद्भ्यो हरेत् स राक्षसः इति विधिबलादपहरणस्यैव तत्र स्वत्वोत्पादकतया विवाहाङ्गत्वात्। "ब्राह्मादिषु विवाहेषु पञ्चस्वेष विधिः स्मृतः। गुणापेक्षं भवेद्दानमासुरादिषु च त्रिषु" इति नारदवचनात्तत्राऽपि दानसत्त्वाच्च । न च ब्राह्मणेन बलादपहृत्य परिणीताया विवाहे प्रदानाभावेन साङ्गसंस्कारानुपपत्तिरिति वाच्यम् ; इष्टत्वात्। अङ्गाभावेऽपि प्रधानमात्रात् संस्कारोत्पत्तौ प्रतिबन्धकाभावात्। उक्तविधकन्यात्वस्याऽपि तत्र सत्त्वाच्च । स्वपरश्च श्रेयसार्थं च पश्चात् सा पित्रादिभिर्देयैवेत्यन्यत्। प्रकृते च पूर्वपतिकृतसंस्कार एव सजातीयसंस्कारोत्पत्तिप्रतिबन्धको वर्तते कन्यात्वविरहश्चेति साङ्गसंस्कारानुपपत्तिः स्पष्टैव। न चैवमपि पुनर्भूपतेरस्वभोगसंस्कारयोरनौचित्यापत्तिर्वर्तत एवेति वाच्यम् ; इष्टत्वात्। अत एव "सप्तविधा पुनर्भूस्तां गृहीत्वा न प्रजां न धर्मं विन्देत" इति बौधायनवचनं संगच्छते ।

ननु एवं विधवायां नागकन्यायामर्जुनादुत्पन्नस्य पुत्रस्यार्जुनौरसत्वं महाभारते कथितं तस्य का गतिरिति चेत्, तस्यौरसपदयोगार्थत्वेनादोषात्, तस्य चार्जुनपुत्रत्वाभावात्। तथाहि—महाभारते भीष्मपर्वणि चतुरशीतितमाध्याये—

"ऐरावतेन सा दत्ता अनपत्या महात्मना ।
पत्यौ हृते सुपर्णेन कृपणा दीनचेतना ॥
भार्यार्थं तां च जग्राह पार्थः कामवशानुगः ।
एवमेष समुत्पन्नः परक्षेत्रेऽर्जुनात्मजः ॥" इति ॥

अत्र परक्षेत्र इत्युक्त्या पत्यौ हृतेऽनपत्या दत्तेत्युक्त्या च

तस्य नियोगधर्मजत्वस्य स्पष्टत्वात्। किञ्च भवद्भिर्नष्टे मृत इत्यनेन स्वविषय ऊढायाः पुनरुद्वाहमिति कलिवर्ज्यस्य बाधः उच्यते, सोऽपि न सम्भवति। तथाहि—"स तु यद्यन्यजातीयः पतितः क्लीब एव वा" इति कात्यायनवचने पतितक्लीब—रूपैकदेशग्रहणान्नष्टे मृत इत्यादिवाक्योपात्तानां सर्वेषामेव तुल्यन्यायेन ग्रहणमावश्यकम्। "कुलशीलविहीनस्य षण्डादिपतितस्य च" इति वसिष्ठवचने आदिपदेन वाक्यान्तरैरुपस्थितानां वृद्धत्वोन्मत्तत्वादीनां च सर्वेषामेव दोषाणां सत्प्रजोत्पादनप्रयोजकरतीच्छापुंस्त्वसान्निध्यैतन्निरतयाभावव्याप्यधर्मत्वेन रूपेण ग्रहणस्य सिद्धतयाऽस्याऽपि तत्समानार्थकत्वात्, तथा सति च सकलदोषविषये कलिवर्ज्येन कात्यायनवचनं बाध्यते, कलिवर्ज्यं च नष्टे मृत इत्यनेन स्वोपात्तदोषपञ्चव्यक्तिविषयेण बाध्यत इति वक्तव्यम्। तथा चान्यजातीयदीर्घामयादिस्त्रीणां पुनर्विवाहो न भवेत् नष्टादिपञ्चान्यतमपतिकानां तु भवेदिति वैषम्यं स्यात्। तच्चायुक्तम्। सर्वासामेवोक्तरूपवद्दोषकस्त्रीत्वसाम्यात्। अतो नष्टे मृत इत्यत्राऽपि मुन्यन्तरवचनोक्तदोषसमुच्चयार्थकचकारसत्त्वात्सर्वासामेव तादृशदोषवत्स्त्रीणां ग्रहणं कर्तव्यम्। लाघवाच्च पूर्वोक्ताऽनुगतरूपेण तद्वाक्यार्थे निवेशः कर्तव्यः। तथा च विधिनिषेधयोः सर्वांशसाम्ये किं केन बाध्यताम्। निषेध एव स्वयमन्यबाधकत्वरूपत्वाद्विधेश्च परबाधनरूपत्वाभावात् विधिं बाधेत; निषेधाश्च बलीयांस इति न्यायात्। स्वस्य च कलियुगैकविषयत्वेन युगान्तरे विधेरवकाशं बोधयेत्। तथा च स तु यद्यन्यजातीय इत्यनेनास्यैकवाक्यत्वमपि भवति। नच स्मृतिपुराणयोर्विरोधे स्मृतिरेव बलीयसीति वाच्यम्; पुराणवचनानां दौर्बल्येऽपि निरवकाशे सावकाश-

स्मृतिबाधकत्वात्। दुर्बलप्रमाणानामपि निरवकाशत्वे सावकाशप्रबलप्रमाणबाधकत्वं स्मृत्यनवकाशदोषप्रसङ्ग इत्यधिकरणे शारीरकसूत्रभाष्ये च स्पष्टम्। क्रतुबौधायनादिस्मृतीनामपि कलिवर्ज्यविषयकपुराणवचनसमानार्थकानां सत्वाच्च। अस्य पराशरवचनस्य पूर्वोक्तदोषैः स्वतन्त्रविधित्वासम्भवाद्वाग्दत्तापरत्वमेवेति त्वन्यत्। ननु वाग्दत्तापरत्वेऽपि क्लीबेचेत्यत्र चकारेण मुन्यन्तरोक्तदोषवतां समुच्चयो वक्तव्यस्तथाच पञ्चस्वापत्स्वित्यसंगतमिति चेन्न, तस्य समुच्चेयगतदोषनिष्ठप्रकारपञ्चकबोधनार्थत्वात्। तथाहि मरणाप्रयोज्यो यः सत्प्रजोत्पादप्रयोजकानां विवाहेच्छापुंस्त्वविवाहप्रयोजकसान्निध्यानां त्रितयस्याभावो नष्टप्रव्रजितक्लीबपतितानामनुगतो दोषः, स च त्रितयाभावस्तेषु प्रत्येकं भिन्नभिन्नाभावप्रयोज्य इति चत्वारो दोषप्रकाराः, मृतस्य चैकः स्वतन्त्र इति मिलित्वा पञ्च दोषप्रकारास्तानेवाह पञ्चस्विति, पञ्चप्रकारास्वित्यर्थः। अयं पञ्चशब्दः प्रकारगतसङ्ख्याभिधायी, नवद्रव्याणि चतुर्विंशतिर्गुणा इत्यादिवत्। आपत्सु स्वदुःखजनकत्वरदोषेष्वित्यर्थः। तत्र नष्टे तत्त्रितयाभावः सान्निध्याभावप्रयुक्तः, तेन दुष्टबोधकं नष्टपदं राजबद्धादीनामुपलक्षणम्; त्रितयाभावप्रयोजकनिमित्तसाम्यात्। प्रव्रजितस्यैतत्त्रितयाभावो विवाहेच्छाभावप्रयुक्तः,तेन प्रव्रजितपदं परित्यागिनां मत्तोन्मत्तानां चोपलक्षणम्, त्रितयाभावप्रयोजकनिमित्तसाम्यात्। अत एव "शूराणां निवृत्तानां च न देया कन्यका बुधैः" इति कात्यायनवचनं संगच्छते। क्लीबे पुंस्त्वाभावादेतत्त्रितयाभावः, तेन क्लीबपदं वृद्धादीनामुपलक्षणम्, त्रितयाऽभावप्रयोजकनिमित्तसाम्यात्। पतितस्य प्रजायां स्वत्वाभावात् स्वत्वविशिष्टप्रजोत्पत्तिप्रयोजकतत् त्रितयाभा-

वोवर्तते। तेन पतितपदं सगोत्रान्यजातीयरोग्याश्रमान्तरगतदासादीनामुपलक्षणम्; प्रजायां स्वत्वाभावरूपस्य तन्निरतयाभावप्रयोजकस्य साम्यात्। ननु मृतग्रहणं व्यर्थम्, दुष्टे मृते वरान्तराय दानस्य दोषान्तरेण सिद्धत्वात्, अदुष्टे तु मृते नास्त्येव वरान्तराय दानम्, "यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः" इति मनुवचनादिति चेन्न; मृत इत्यस्याचिरभावित्वेन निश्चितमरणक इत्यर्थात्, यस्या म्रियेत कन्याया इति वचनस्य चाचिरभावित्वेनानिश्चितवरमरणविषयत्वेन विरोधाभावात्। तेन मृतपदमचिरभावितया निश्चितविविधदोषवतां दीर्घामयादीनामुपलक्षणम्। तथाचोक्तरीत्या चतुरो दोषप्रकारानुक्तरूपेणानुगमय्य तद्विशिष्टान्यत्वमचिरभावितया निश्चितसत्प्रजानुत्पादप्रयोजकधर्मकान्यत्वं च कन्यात्वशरीरे सम्प्रदानविशेषणतया निवेशनीयम्। तादृशधर्मश्च सत्प्रजोत्पादकानि यानि पुंस्त्वरतीच्छासान्निध्यानि तन्निरतयाभावरूपो मरणादिसाधारणो बोध्यः। अत्रैतादृशदोषग्रहणबोधनाय प्रकारगतसंख्याबोधकं पञ्चस्विति। अन्यथा तस्य चकारस्य च वैयर्थ्यापत्तिः स्पष्टैव। एवमनुगमय्य दोषाणां निवेशे मानं तु "अलंकृत्य कन्यामुदकपूर्वां दद्यादेष ब्राह्मो विवाहस्तस्यां जातो द्वादशावरान् द्वादशपरान् पुरुषान् पुनात्युभयतः" इत्यादिकल्पसूत्रवाक्ये दत्तायां दानीयोत्पादितद्वारकपवनस्य दानविवाहफलत्वोक्तिः। अत एवोत्पादयिष्यमाणसन्तत्या द्वादशावरान् द्वादशपरान् पुरुषान् पवित्रीकर्तुमिति दानसंकल्पे धर्मप्रजासिद्ध्यर्थं विवाहं करिष्ये इति विवाहसंकल्पश्च सर्वस्मार्तानां सङ्गच्छते। अधर्मप्रजायाश्च पातहेतुत्वं तत्र तत्र स्मृतिषु स्पष्टमेव। तथाच विवाहविधिवाक्यस्थो क्तार्थतात्पर्यग्राहकमेवैतत्। विधीयते इत्यस्य-

क्रियते इत्यर्थः। विपूर्वस्य दधातेः कृत्यर्थकत्वस्य "यो ब्रह्माणं विदधाति पूर्वं" इति श्रुतौ सुप्रसिद्धत्वात्। पताविल्यस्य पतित्वेन ख्याते न तु वास्तव इत्यर्थः। आचक्षाणण्यन्तप्रकृतिकप्रत्ययान्तः पतिशब्दः। अत एव पत्ताविल्युपपद्यते। अन्यथा पत्याविति स्यात्। अत्र नारिभिरित्यनुक्त्याऽन्यकर्तृकं पतिकरणं प्रतीयते। एतेन—विधिवाक्योद्देश्यतावच्छेदस्यानन्यपूर्वकत्वरूपकन्यात्वस्याऽपि वरनिष्ठब्रह्मचारित्ववद्गुणत्वेन प्राशस्त्यमात्रपर्यवसायितया। विशेषणतया विवक्षितत्वाभावात् क्वचित्तदभावेऽपि तेनैव विधिना विवाहः सिध्यतीत्यपास्तम्। यस्याभावे विधिप्रवृत्त्यभावः, स, धर्मो विध्यन्तर्गतो, यदभावे च न विधेः प्रवृत्त्यभावः, किं तु सत्त्वेनोत्कर्षमात्रं स गुण इत्यस्य सर्वसिद्धतया पूर्वोक्तवचनैर्दोषैर्युक्तिभिश्च कन्यात्वाभावे विवाहविधिनिवृत्तेः कन्यात्वस्यावच्छेदकतया विध्यनुप्रवेशस्यावश्यकत्वेन तस्य गुणत्वाऽसिद्धेः। नहि गुणानां कान्तत्वादीनामभावे विवाहनिधिर्निवर्तते। कन्याया अदाने परपूर्वोद्वाहे च दोषश्रवणवदकान्ताया दानेउद्वाहे च दोषश्रवणाभावात्। स्मृत्यन्तरसमानार्थत्वायोद्देश्यतावच्छेदकघटकदोषस्वरूपबोधनेन कृतार्थस्य नष्टेमृत इत्यादेरुक्तस्वरूपे गुणावबोधकत्वायोगात्। तस्मात् सर्वासामेव पूनर्भूणां पुनर्भूत्वाऽनुपपत्तिः, दत्तां न्यायेन यः कन्यामिति नारदोक्तदण्डविधिनानुपपत्त्यादिभयेनोक्तवचनजातविरोधेन मन्त्रेषु विधिषु निषेधेषु दानाधिकारिबोधकेषु कन्याप्रदः पूर्वनाश इत्यादिवाक्येषु च कन्यापदस्यासकृच्छ्रवणबलेन कन्यात्वस्याविवक्षा वक्तुमशक्यैव। उद्देश्यतावच्छेदकविशिष्टे विधेयतावच्छेदकावच्छिन्नसम्बन्धस्य विधिवाक्यार्थतया कन्यात्वावच्छिन्नकर्मकदानविधौ तदर्थैकदेशकन्यात्वस्य गुणत्वकल्पनेनाविव

ज्ञाकल्पनस्य साहसमात्रत्वत्। एवं वरस्य ब्रह्मचारित्ववदिति दृष्टान्तरोऽप्यसङ्गतः। अस्नातकाय कन्यादानप्रसङ्गवारकत्वेन ब्रह्मचर्यपूर्वकमधीतवेदकत्वस्य स्नातकपदवाच्यतावच्छेदकस्य द्वितीय विवाहादावबाधेन च तस्य विधिस्वरूपान्तर्गततया गुणत्वाभावात्।

ब्रह्मचारिणे दद्यादित्यत्र ब्रह्मचारिपदमपि निरुक्तार्थपरमेव। अन्यथा ब्रह्मचर्याश्रमदशायां कन्यापरिग्रहे तदाश्रमभङ्गापत्तेः, अनन्तरं तु ब्रह्मचर्याभावेन ब्रह्मचारिणे दानाऽनुपपत्तेः। अत एव स्नातकधर्मोपदेशानन्तरमेव सर्वसूत्रेषु विवाह उक्तः। स विधिस्तु त्रैवर्णिकमात्रविषयः। शूद्रविवाहस्त्वतिदेशविधिनैव। तथाच यमः।

"शूद्रोऽप्येवंविधः कार्यो विना मन्त्रेण संस्कृतः॥ इति।
"विवाहमात्रं संस्कारं शूद्रोऽपि लभतां सदा।" इति

ब्राह्माच्च। द्वितीयविवाहस्थलेऽपि स्नातकाय कन्यार्थिने तुभ्यमहं सम्प्रदद इत्येव दानवाक्यम्। वेदविद्याव्रतस्नानरूपस्नातकत्वस्याबाधात्। स्वेच्छामात्रेण विधिस्वरूपान्तःपातिनामपि धर्माणां गुणत्वेनाविवक्षाकल्पने स्त्रीत्वादेरपि तथात्वापत्त्या पुरुषाय स्त्रीदानवत् स्त्रियै पुरुषदानप्रसङ्गात्। तथाच साध्वी भवतां कलिधर्मव्यवस्थापनव्यसनिता प्रथिता स्यात्॥

नन्वस्य पराशरवचनस्योक्ताऽनुपपत्तिभिर्वाग्दत्तापरेणोढाऽपि देया चान्यस्मा इत्यादिवचनेन समानार्थत्वे—

"अज्ञातदोषेणोढा या निर्दोषा नान्यमाश्रिता।
बन्धुभिः सा नियोक्तव्या निर्बन्धुः स्वयमाश्रयेत्॥
नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीते॥

अष्टौ वर्षाण्युदीक्षेत ब्राह्मणी प्रोषितं पतिम् ।
अप्रसूता तु चत्वारि परतोन्यं समाश्रयेत् ॥
क्षत्रिया षट् समास्तिष्ठेदप्रसूता समास्त्रयः ।
वैश्या प्रसूता चत्वारि द्वे वर्षे त्वितरा वसेत् ॥
न शूद्रायाः स्मृतः काल एष प्रोषितयोषिताम् ।
जीवति श्रूयमाणे तु स्यादेष द्विगुणो विधिः ॥
अप्रवृत्तौ तु भूतानां दृष्टिरेषा प्रजायते ।
अतोन्यगमने स्त्रीणामेष दोषो न विद्यते ॥

इति नारदस्मृतेः का गतिः। प्रतिपादितदोषाणां तत्राऽपि सत्त्वात्, अप्रसूता चेत्याद्युक्त्या तस्या वाग्दत्तापरत्वसम्भवाच्चेति चेन्न; तस्या विवाहस्वरूपताभङ्गमन्वादिवचनविरोधगौरवादिभि रुक्तदोषैर्नियोक्तव्येत्युपक्रमाच्चान्यगमन इत्युपसंहाराद्वक्ष्यमाण-वसिष्ठस्मृतिसंवादाच्च नियोगपरत्वात्। तथाहि नान्यमाश्रिता-बन्धुसत्त्वेऽन्याश्रिता स्वयं न भवेदित्यर्थः, किं तु बन्धुभिः सा नियोक्तव्या; निर्बन्धुश्चेज्ज्ञात्याद्याज्ञया नियोगधर्मेण स्वयमाश्र-येत्। दोषस्वरूपं वक्तुमाह, नष्टे मृत इति। समाश्रयेन्नियो-गधर्मेणाश्रयेदित्यर्थः। ब्राह्मण्यादीनां प्रतीक्षाकालतारतम्यं तु सत्त्वरजआदिगुणन्यूनाधिकभावनिबन्धनम्। जीवत्त्वश्रवणे प्रतीक्षाकालद्वैगुण्यं च तदागमनप्रत्याशया। सर्वत्राऽप्रसूताया न्यूनप्रतीक्षाकालोक्तिस्तु तस्याः पुरुषागमनजन्यरोगादिशंकया एवं प्रसूताया अपि नियोगोक्तिः पुत्ररहितापरा।

"द्वितीयमेके प्रजनं मन्यन्ते स्त्रीषु तद्विदः"

इति मनुस्मरणादेकपुत्रापरा वा। अप्रवृत्ताविति। धर्मा-र्थप्रतिबन्धवशात्पतिसकाशं गमनाप्रवृत्तौ त्वित्यर्थः। "दृष्टिदर्शि-

नम्। "एषा" परसमाश्रयणरूपा। "अतः" धर्मार्थप्रतिबन्धप्रयुक्तप्रवृत्त्यभावात्। "एषः" लोके ऽव्यभिचारित्वेन प्रसिद्धः। तथाच दायप्रकरणे "नियुञ्ज्यादित्येके" इत्यनेन नियोगमुक्त्वा तदकरणे प्रत्यवायसूचनाय पुत्रोत्पादप्रतिबन्धे दोषं बोधयन् पतिकरणे वक्ष्यमाणकालप्रतीक्षामुद्देष्टुं च "कुमार्यां" इत्युक्त्वा वसिष्ठोऽप्येनमेव परतोन्यं समाश्रयेदित्यादिनारदवचनार्थमनुगृह्णाति। "प्रोषितपत्नी पञ्चवर्षाण्युदीक्षेतोर्ध्वं पञ्चभ्यो वर्षेभ्यो भर्तृसकाशं गच्छेद्यदि धर्मार्थाभ्यां प्रवासमनुकामा न स्याद्यथा मृत एवं वर्तितव्यं स्यात्। एवं ब्राह्मणी पञ्च प्रजाताऽप्रजाता चत्वारि, राजन्या प्रजाता पञ्चाप्रजाता त्रीणि, वैश्या प्रजाता चत्वार्यप्रजा द्वे, शूद्रा प्रजाता त्रीण्यप्रजातैकमत ऊर्ध्वं समानार्षजन्मपिण्डोदकगोत्राणां पूर्वः पूर्वो गरीयान् न खलु विद्यमाने कुलीने परगामिनी स्यादस्य पूर्वेषां षण्णां न कश्चिद्दायादः स्यात्सपिण्डाः पुत्रस्थानीया वा तस्य धनं विभजेरन्" इत्यनेन। इदं च नियोगपरम्। औरसादिपुत्राणामंशमुक्त्वा मृतपत्नीविषयेंऽशभाक्त्वाय नियोगजपुत्रकथनेन नष्टविषयेऽपि तादृशतात्पर्यकत्वकल्पनस्यैवावश्यकत्वात्। परगामिनीत्यक्षरस्वरसाच्च। अत्र परत्वं चातिदेशानपेक्षं बोध्यम्। वसिष्ठनारदयोः कालभेदस्तु अवस्थाभेदाभिप्रायेण योजनीयः। अत्र पतिग्रहणन्तु तस्य मृतस्य कृतपालाशविधेः पत्न्या नियोगसूचनाय। पञ्चस्विति तु नष्टे मृत इत्यादीनां मिथो विशेषणविशेष्यभावशङ्का निवारणाय। अत्र चकारेण पूर्वोक्त सूत्राऽनुरोधादनुगतरूपेण दोषमात्रग्रहणं बोध्यम्। अत एव नारदेनैतत्समानार्थेऽज्ञातदोषेणोढाया इत्यत्र दोषत्वेन दोषोपन्यासः कृतः। अथ नष्टे मृत इत्यादेः पराशरीयस्य वाग्दत्तापर-

त्वेऽवान्तरप्रायश्चित्तप्रकरणसंगतिः कथमिति चेच्छृणु। तथा हि परिवेदनस्थले ज्येष्ठभ्रात्रे दत्वा पुनः कन्याग्रहणं कर्तव्यमित्ययुक्तम्, दत्ताया ग्रहणायोगादिति वक्तुमयोग्यम्। तस्याः कन्याया दानयोग्यताप्रयोजकस्योढत्वरूपदोषस्य सत्त्वेन सा दत्ताऽप्यदत्तेवेति पुनः संस्कारेण तद्ग्रहणस्योचितत्वात्। ज्येष्ठाय दानं तु परिवेदनदोषनिवारणाय तथा भावनामात्रमेवेति वस्तुस्थितिः। तथा च परिवेदनस्थले वसिष्ठाद्युक्तम् पुनर्विवाहं सूचयितुं देयदोषे दत्तस्याऽप्यदत्तत्वं च सूचयितुमूढाऽपि देया चान्यस्मा इत्यादिवचनसिद्धस्य वाग्दत्तास्थले सम्प्रदानदोषे दत्तस्याऽप्यदत्तत्वस्य दृष्टान्तविधयाऽनुवादः कृत इति संगतिः स्पष्टैव। अपुत्राऽपि दिवं व्रजेदिति एवं पतिं समुद्धृत्येति च पराशरोक्तेः पत्युः स्वस्य च नरकपतनप्रयोजकदोषध्वंसकतया जन्मजन्मान्तरीयवैधव्यप्रयोजकपातकनाशकतया च प्रायश्चित्तरूपं ब्रह्मचर्यं प्रकरणप्राप्तत्वाद्विधवानां विधत्त इत्युत्तरग्रन्थसंगतिः। अत्र ब्रह्मचर्यं ब्रह्मणि वेदे गृह्यमाणे यच्चर्यते, तच्च—

> "एकाहारः सदा कार्यो न द्वितीयः कदाचन।
> पर्यङ्कशायिनी नारी विधवा पातयेत्पतिम्॥"

इत्यादिगौतमाद्युक्तं ग्राह्यम्। ब्रह्मचर्यस्य प्रायश्चित्तत्वं तु पुन्नामनरकप्रयोजकपापनिवर्तकत्वात्। मिताक्षरायामपि प्रायश्चित्तप्रकरणे "गोष्ठे वसन्ब्रह्मचारी मासमेकं पयोव्रतः" इत्यनेनान्यत्र ब्रह्मचर्यस्य प्रायश्चित्तत्वं स्पष्टमेवोक्तम्। तदेवमुक्तरीत्या नारदस्मृतेर्नियोगपरत्वे सिद्धे तत्समानश्रुतिकत्वान्नियोगानुवादकत्वेन लाघवाच्च पराशरस्मृत्यन्तर्गतस्याऽपि नष्टे मृत इत्यस्य नियोगबोधकत्वमेव माधवस्य मतम्। एतन्मते च पतिः पतिकार्य-

कारीत्यर्थः। पताविति तु पतित्वेनाख्याते। पतित्वकार्यकारिणी-त्यर्थकम्। शेषं पूर्ववत्। यद्यपि अपूर्वविधित्वेऽपि पूर्वोक्तरीत्या कलिवर्ज्यवचनेनैतस्य बाधः सम्भवति, तथाऽप्यवान्तरप्रकरणा-संगत्या पूर्वोक्तदोषजातेन च नैतन्माधवस्याभिमतम्। नचैव-मवान्तरमहाप्रकरणयोरसंगतिरिति वाच्यम्; पूर्वं परिवेदनस्थले प्रायश्चित्तस्योक्ततया तत्र वासिष्ठादिबोधितपुनर्विवाहप्राप्तौ कलियुगे तदभावसूचनार्थं कलियुगेऽनभिमतस्य नियोगस्य दृष्टा-न्तविधयाऽनुवादात्। तस्य च दृष्टान्ततया दार्ष्टान्तिकपुनर्विवा-हाभावविशिष्टपरिवेदनप्रायश्चित्तवाक्यैकवाक्यत्वादवान्तरप्रकरणे सम्बन्धे तद्द्वारा महाप्रकरणसम्बन्धात्। पर्याधानस्य मध्ये उक्तिस्तु परिवेदनप्रायश्चित्तसाम्यात्। माधवाचार्यास्तु निषिद्धयोरपि परिवेदनपर्याधानयोर्ज्येष्ठाभ्यनुज्ञया कर्तव्यतां निषिद्धस्य गुर्वाद्य-भ्यनुज्ञावशात्कर्तव्यस्य नियोगस्य दृष्टान्तेन कथयन्तीति प्राहुः। अत एवाभ्यनुज्ञां दर्शयतीत्युक्तम्। विधित्वतात्पर्ये तु पुनरुद्वाहं वदेत्। गुर्वाद्यभ्यनुज्ञा च नारीभिरित्यनुक्त्या सूचितेति प्रागेवोक्तं न विस्मर्तव्यम्। नियोगस्याभ्यनुज्ञाधीनत्वं तु नियुक्ता गुरुभिर्ग-च्छेदित्यादिना स्मृतिषु स्पष्टमेव। औरसः क्षेत्रजश्चैवेत्यादिवा-क्येन क्षेत्रज औरस एवेति नियमकरणात्। कलियुगे नियोगः पराशरेण निषिद्ध इति त्वन्यत्। ननु नारदस्मृत्युक्तो नियोग एवा-नेन कलियुगेऽस्तीति बोध्यताम्, अव्यवधानाच्च परिवित्तिस्थले वसिष्ठाद्युक्तः पुनर्विवाहोऽप्यस्तीति बोध्यतामिति चेन्न; अव्य-वधानमात्रेण तत्र विवाहसत्त्वाबोधनात्, साक्षान्महाप्रकरण-सम्बन्धेऽवान्तरप्रकरणद्वारा तत्सम्बन्धे चावृत्तिप्रसङ्गात्, तद्द्वारैव महाप्रकरणसम्बन्धे नियोगे कलिसम्बन्धबोधनायोगात्, कथं चि-

स्कलौ तेन नियोगस्य प्राप्तावपि भवच्चिकीर्षितविधवाविवाहस्या-
सिद्धेः। किञ्च कलियुगे नियोगोऽपि न सिध्यति, येन भिक्षुपाद-
प्रसरणन्यायेन विधवाविवाहो भवद्भिः कर्तुं शक्यते; तस्य कलौ
निषेधात्। तथाच क्रतुः—

"देवरेण सुतोत्पत्ति दत्ता कन्या न दीयते।
न यज्ञे गोवधः कार्ये कलौ न च कमण्डलः॥"

अत्र देवरेण सुतोत्पत्तिरित्यनेन नारदवसिष्ठोक्तो विधवानि-
योगो निषिध्यते। दत्ता कन्या न दीयत इत्यनेन तु यस्या म्रियेत
कन्याया इत्यादिमनुवचनसिद्धो नियोगो निषिध्यते। बौधा-
यनोऽपि—

"विधिर्योऽनुष्ठितः पूर्वं क्रियते नेह साम्प्रतम्।
पुराकल्पे स एतच्च विधवाया नियोजनम्॥"

इति। एवमूढायाः पुनरुद्वाहमिति वचनमप्यूह्यम्। तत्रोढापदं
वाग्दत्तापरं पूर्वोक्तयुक्त्या बोध्यम्। पुनरुद्वाहपदं पुनःसंस्कारपुन-
रुपनयनपुनराधानादिशब्दवद्रूढ्या नियोगबोधकम्। ऊढायाः पुन-
रुद्वाहमित्यत्र पुनःपदोपादानात्। तथाच नियोगविधेर्नियोगनिषे-
धस्य च समविषयतायां निषेधाश्च बलीयांस इति न्यायाद्युगान्तरे
चरितार्थं विधिं निषेधः स्वयमचरितार्थत्वाद्युगान्तरविषयकत्वास-
म्भवाच्च बाधते। नन्वेवं पुनरुद्वाहमकृत्वा ब्रह्मचर्यव्रतानुष्ठाने श्रेयो-
ऽतिशयं दर्शयतीत्येतन्नोपपद्यते; कलियुगे नियोगस्याऽनभिमत-
त्वेन नियोगरूपपुनरुद्वाहब्रह्मचर्योभयस्य कलियुगेऽप्रसक्त्या ब्रह्म-
चर्यस्य कलियुगप्रसक्तापेक्षया श्रेयोऽतिशयाभावाद्युगान्तरप्रस-
क्तापेक्षया च श्रेयोऽतिशयप्रदर्शने उपयोगाभावादिति चेन्न;
युगान्तरे यत्रोभयं प्राप्तं तत्र नियोगरूपपुनरुद्वाहो नातिश्रेयस्करः,

किं तु ब्रह्मचर्यमेव। तथाच यो धर्मो युगान्तरेऽप्यतिशयितश्रेयो-हेतुत्वेन सिद्धः, स एव कलावनुष्ठेय इति बोधाय तथोक्तेः। दृष्टान्ततयोपन्यस्तस्य नष्टादिपतिकानियोगस्य युगान्तरविषयत्वात्कलौ नष्टादिपतिकाभिः किं कर्तव्यमिति चिन्तायां युगान्तरातिशयितत्वेन सिद्धस्य ब्रह्मचर्यस्य विधानमित्यभिप्रायः। न च परिवेदनस्थले पुनर्विवाहाभावस्याचार्याभिमतत्वे "प्रायश्चित्ताचरणानन्तरं परिवेत्तुः कर्तव्यमाह वसिष्ठः" इति माधवोक्तिर्न सङ्गतेति वाच्यम्; विवाहप्राप्त्यभावेऽनभिमतत्वसूचनायोगेन तत्प्राप्तिबोधनायैव तथोक्तेरिति माधवमतनिष्कर्षः। एवं पराशरीयनष्टेमृत इत्यस्य व्याख्याभेदेऽपि फलतो नन्दपण्डितमाधवयोरैक्यमेव। माधवमते 'स तु यद्यन्यजातीयः, इति 'कन्याया' इति कात्यायनादिस्मृतिभिर्वाग्दत्तास्थले दोषस्वरूपबोधनान्नन्दपण्डितमते च नारदादिस्मृतिभिर्नियोगस्य बोधनाद्दोषस्वरूपनियोगैतदुभयबोधनस्योभयोरपि सिद्धत्वात्। एतेन कन्यात्वशरीरेऽन्यसंस्कृतत्वाभावघटकान्यांशे क्लीबाद्यतिरिक्तत्वनिवेशतात्पर्यग्राहकमेवेदम्, तेन नापूर्वविधिप्रयुक्तं गौरवमिति परास्तम्। वाग्दत्ताया विवाहतदभावविधायकस्मृतीनां दण्डविधायक नारदस्मृतिसहकारेण दुष्टादुष्टभेदेन व्यवस्थाया वक्तव्यतया तत्र चानुगतरूपेण दोषस्वरूपाणां जिज्ञासितत्वाल्लाघवाच्च तत्स्वरूपबोधकत्वकल्पनस्यैवौचित्यात्तद्बोधनेन माधवमते क्लृप्तनियोगाऽनुवादेन च, नष्टे मृत इत्यस्योपक्षीणतया तादृशसंकोचकल्पने मानाभावात्। नियतं दारलक्षणमित्यादिस्मृतिवैयर्थ्यापत्तेश्च। 'संस्थितं च न लङ्घयेत्, सकृत्कन्या प्रदीयते, इत्याद्युपोद्बलिततया 'नैका द्वौ पती विन्दते' इति श्रुत्या विरोधाच्च क्लीबादिविषये "यस्तल्पजः प्रमीतस्य क्लीब-

स्य व्याधितस्य च" इत्यादिना मन्वादिषु नियोगस्यापि श्रवणात् स्वत्वसंस्कारनाशयोः सामग्र्या इच्छाघटितत्वस्य वक्तव्यत्वापत्तेश्च, क्लीबोन्मत्ताद्यूढस्त्रीणामन्यपुरुषपरिग्रहे पुनर्भूत्वप्रतिपादकोक्तवसिष्ठस्मृतिविरोधाच्च, सप्तपद्युत्तरं प्रव्रजितत्वादिदोषोत्पत्तिस्थले सप्तपद्याः प्राग्वर्तिदोषवच्छिन्नसम्प्रदानकदानकर्मत्वसत्त्वेन भवदभिमतपुनर्विवाहानुपपत्तेश्च, दोषे सप्तपदीप्राग्वर्तित्वानिवेशे प्रव्रजितत्वादिभावित्वनिश्चये पत्युरप्रव्रजितत्वादौ सति सप्तपद्युत्तरं विवाहापत्तेश्च। एवं विवाहोत्तरं सतयोर्नेर्नष्टादिपतिकाया भवदभिमतविवाहानुपपत्तिश्च। विवाहात्पूर्वं केनचित्क्षते तस्मिंश्च प्रव्रजिते ततोऽन्येन विवाहे तस्याःपुनर्भूत्वाऽनुपपत्तिश्च। प्रव्रजितादिपत्यन्यत्वं तु निवेशयितुमशक्यमेव; क्षतपुनर्भर्त्राः पत्युरेवाभावेन प्रव्रजितपत्यन्यस्याप्रसिद्धतया तद्दुक्तरस्यासम्भवादित्यलम्। तस्मात्पूर्वविधेरप्राप्ते विध्यन्तराभावादुक्तवचनविशेषाच्च नष्टादिपतिकानां विवाहः शास्त्रासिद्धो विरुद्धश्च। अत एव न क्वापि धर्मशास्त्रे दायप्रकरणे पत्यन्तरपरिगृहीतानां दायनिषेधः कीर्तितो, न वा तदुत्पन्नापत्यानामेकमातृकत्वादिसम्बन्धप्रयुक्तो नामविशेषः सापत्नभ्रातेतिवत्, न च क्वापि पुराणेतिहासकाव्यादावेवंविधाः स्त्रियः श्रूयन्ते, न चाप्यनादिपारम्पर्यायातैतिह्यमध्ये तथाविधस्त्रीविषयकमैतिह्यमेकमप्यस्तीति व्यर्था एव तत्प्रसाधनाय पुनर्विवाहाभावे प्रमाणाभावादित्याद्याः प्रलापाः ॥ इति ॥

[उक्तप्रबन्धसमालोचनम्] अत्र नष्टे मृते इत्यस्य वाग्दत्तापरत्वमिति नन्दपण्डितरीत्या, नियोगपरत्वमिति च माधवाचार्यरीत्या यद्वर्णितम्, तत्र पूर्वमस्माभिः कृष्णम्भट्टीयानुसारेण माध-

वाचार्यस्यैव प्रायश्चित्ताध्यायोपसंहारगतवाक्यस्यानुसारेण च माधवाचार्याणामपि नन्दपण्डितानामेवाऽऽशय इति विवेचितमित्येकं वैलक्षण्यम्। अत्र हि नियोगपरत्वमेव विवक्षितमित्यत्र हि निमित्तमूढायाः पुनरुद्वाह इतिवचनोपष्टम्भ एव ग्रन्थकाराणामभिमतः। अस्य तु वचनस्य दत्तायाः पुनर्दानपरत्वस्य विवक्षायामपि नानुपपत्तिः। वस्तुतस्तु—युगान्तरीयविवाहानन्तरविधवाविवाहस्यैव पुनरुद्वाहपदेनात्र विवक्षायामपि पराशराचार्येणात्र कलिधर्मो न विवक्षित इत्येव माधवाचार्यसम्मतमिति पूर्वमेव विवेचितमिति न दोषः। यथा हि नियोगपरत्वेऽपि तस्य कलिवर्ज्यत्वेन युगान्तरविषयत्वमेव साध्यते, एवमक्षतयोनिपुनर्विवाहोऽपि कलिवर्ज्योऽत्र विवक्षित इति वर्णने न कोऽपि दोषः। विद्यासागरमहोदया अपि हि नियोगस्य विवाहरूपत्वमङ्गीकुर्वाणाः मन्वादिभिरपि नियोग एव निषिद्धो न तु विधवाविवाह इत्येव खलु वदन्ति। तथा चोढायाः पुनरुद्वाह इत्यादीनामपि नियोगपरत्वे विधवाविवाहस्यापि कथं न निषेधः कलौ ? नहि युगान्तरे नियोग एव शास्त्रप्राप्त आसीत्, नान्यकर्तृकविवाहोऽपीति व्यवस्था समुचिता भवति। अन्यथा हि—ऊढायाः पुनरुद्वाहं ज्येष्ठांशं गोवधं तथा। कलौ पञ्च न कुर्वीत भ्रातृजायां कमण्डलुम्" इत्यादित्यपुराणे भ्रातृजायामित्यस्यस्य पौनरुक्त्यमापद्येत। व्यवस्थापितं हि वीरमित्रोदयेऽन्यकर्तृकोऽपि विधवाविवाहो युगान्तरसिद्ध इति। तत्र तदनुकूलतयाऽभिमतानि प्रमाणानि यथाः—

मृते भर्तरि या नारी त्यक्तवत्यथ तं स्वयम्
सवर्णाज्जनयेद्गर्भं भर्तुः पौनर्भवं सुतम्।
यदि सा बालविधवा बलात्त्यक्ताऽथवा क्वचित्

तदा भूयस्तु संस्कार्या गृहीता येन केन चित्।
स्त्रीणां पुनर्विवाहस्तु देवरात् पुत्रसन्ततिः
स्वातन्त्र्यं वा कलियुगे न कर्तव्यं कदाचन ॥

इति ब्रह्मपुराणवचनानि। अत्र कलिवर्ज्यप्रकरणगतानि—दत्ताक्षतायाः कन्यायाः पुनर्दानं परस्य च—इति बृहन्नारदीयवचनम्, "बालिकाक्षतयोन्योश्च वरेणाऽन्येन संस्कृतिः" इति धर्मसमयगतं वचनश्चान्यथाऽनुपपन्नं सदत्र प्रमाणतामर्हति। तथा च पुनर्विवाहो नियोगातिरिक्तोऽपि युगान्तरे आसीदिति कल्पनं कथमपि विद्यासागरमहोदयानामपि न दुष्टम्। इदमेवात्र विचारणीयम्—युगान्तरीयधर्मस्य कलिधर्मत्वमपि सम्भवति वा न वेति? यथा च पराशरस्मृतेरपि कलिवर्ज्यप्रकरणबाधकत्वं न सम्भवति, तथा पूर्वमेव विवेचितम्। एतेन—नारदादिस्मृत्यन्तरगतानि अष्टवर्षप्रतीक्षणादिपराण्यपि वाक्यानि—व्याख्यातानि। यद्यपि पूर्वं तस्यान्यथोपपत्तिरुपवर्णिता, तथापि यथाश्रुतयोजनायामपि न काऽप्यनुपपत्तिरित्यत्रोपवर्ण्यते। यदा हि पराशरस्मृतेरपि कलिवर्ज्यप्रकरणबाधकत्वं तदा कैव कथा नारदस्मृतेः। न ह्यीदानीन्तना अपि नियोगस्य यथाशास्त्रमनुष्ठेयत्वमभिप्रयन्ति। अभिप्रयन्तोवाऽपि शक्नुवन्ति। तथा च विधवोद्वाहशास्त्रीयताव्यवस्थापनमभिलषतां विद्यासागरमहोदयानामपि नियोगधर्मत्वस्थापने न तात्पर्यम्। स्पष्टं हि तैरेव नियोगाधर्मत्वं तदनुष्ठानाशक्तिश्च बृहस्पतिवचनानुसारेण निरूपितम्। तानीमानि बृहस्पतिवचनानि। तद्यथाः—

उक्तो नियोगो मनुना निषिद्धः स्वयमेव तु।
युगह्रासादशक्योऽयं कर्तुं मन्यैर्विधानतः ॥

तपोज्ञानसमायुक्ताः कृतत्रेतादिके नगः ।
द्वापरे च कलौ नृणां शक्तिहानिर्हि निर्मिता ॥
अनेकधा कृताः पुत्रा ऋषिभिर्ये पुरातनैः ।
न शक्यास्तेऽधुना कर्तुं शक्तिहीनैरिदन्तनैः ॥ इति ॥

आर्यसमाजीयास्तु नियोगविधीनपि विधवाविवाहधर्मतायाः प्रमाणतायां मन्यन्ते । तदिदन्तु विद्यासागरमहोदयैरेव खण्डितम् ।

[नियोगस्य द्विजेतरविषयत्वे बालक्रीड़ा]

अत्रावसरे प्रसङ्गात् नियोगोऽयं द्विजेतरविषय एव, न द्विजविषयोऽपीत्यत्र याज्ञवल्क्यस्मृति व्याख्याया विश्वरूपाचार्यकृताया बालक्रीड़ाया अपि वाक्यानि सर्वेषां पुरत उपस्थापयामः । तद्यथा—"अत्र चोदयन्ति—नायं नियोगपक्षः श्रेयान्; स्मृत्याचारविरोधात् । तथा च मनु– नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभिः । अन्यस्मिन् हि नियुञ्जाना धर्मं हन्युः सनातनम्—इति । पुराकल्पे चोपन्यस्योपसंहृतम्—तदा प्रभृति यो मोहात् प्रमीतपतिकां स्त्रियम् । नियोजयत्यपत्यार्थे तं विगर्हन्ति साधवः । इति ॥ अतो नास्ति नियोगः । तथा च शिष्टाचारः । नन्वियमपि स्मृतिरेव अपुत्रां गुर्वनुज्ञातामिति । मानवेऽपि—देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ् नियुक्तया—इत्यादि । न चेयं लोभादिमूलिकेति शक्यते वक्तुम्; सर्वथा विकारप्रतिषेधात् । तदुक्तम्—घृताभ्यक्तः—इति । मनुनापि च—विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि—इति । अतो नेयमपस्मृतिः । अथ श्वशुरधनादीच्छया लोभ आशङ्क्येत, तदपि—प्रजेप्सिताऽधिगन्तव्या सन्तानस्य परिक्षये—इत्यनेनैव निरस्तम् । तथा चोक्तम्—पतितौ भवतो गत्वा

नियुक्तावप्यनापदि—इति । वसिष्ठेनापि—धनलोभान्नास्ति नियोगः—इति । अतो निर्दोषः । शास्त्रविशेषात्तु प्रतिषेधो विकल्पाय भवति । अतो न विरोधः । अन्ये तु प्राग्विवाहादुपरते भर्तरि नियोगाधिकारं वर्णयन्ति सामान्यविशेषोपसंहृतिन्यायात् । यथाह मनुः—यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः । तामनेन विधानेन निजो विन्देत देवरः—इति । तत्तु—विधवायां नियुक्तस्तु इत्यनेनैव निरस्तम् । ननु च सापि विधवेति वक्तुम् शक्यम् ? न ; स्मृत्यन्तरविरोधात् । यथाह वसिष्ठः—प्रेतपत्नी षण्मासं व्रतचारिणीत्युपक्रम्य 'पित्रा भ्रात्रा वा नियोगं कारयेदिति । नन्वनूढापि प्रेतपत्यौ प्रेतपत्न्येव, नैवम् ; नहि प्राग्विवाहात् पत्नीशब्दप्रवृत्तिरिति । एवं हि भगवतः पाणिनेः स्मरणम्—पत्युर्नो यज्ञसंयोगे—इति, अतोऽसत्कल्पनम् ; उपक्रमोपसंहारात् । कथन्तर्हि—यस्याः म्रियेत कन्यायाः—इत्ययं श्लोकः । आसुरविवाहविषयतया व्याख्येयः । यस्याः कन्यायाः शुल्कं दत्वा शुल्कदो म्रियते, सा यदीच्छेत्, ततो देवराय पूर्ववत् प्रदातव्या । न चेन्नियोगं देवरेण न कारयेत् । यद्वा निजो विन्देत देवरः इति निजग्रहणात् सोदर्यो देवरोऽनेनैव विधिना नैयोगिकेन वैवाहिकेन वा विन्देतैव । सापत्नस्तु कन्यानुमतः । तथा चाह—कन्यायां दत्तशुल्कायां म्रियेत यदि शुल्कदः । देवराय प्रदातव्या यदि कन्याऽनुमन्यते—इति । यदा त्वदत्तशुल्क एव म्रियेत, तदा तस्मिन् प्रेते कुमार्येव सतीच्छयाऽन्यस्मै पित्रा विधिवद्देया । यथाह वसिष्ठः—अद्भिर्वाचा च दत्तायां म्रियेतादौ वरो यदि । न च मन्त्रोपनीता स्यात्कुमारी पितुरेव सा—इति । आदाविति वचनात् विवाहसन्निधौ वाग्दत्ताऽप्यकन्यकेति ज्ञायते । अतो न कन्या-

विषया नियोगस्मृतिः। कस्तर्हि विषयः। प्रेते पत्यौ सन्तानपरिक्षये च। प्रतिषेधसामर्थ्याच्च विकल्पः। तथा चाम्नायः— तस्मादेकस्य बह्व्यो जाया भवन्ति, नैकस्यै बहवः सहपतयः— इति। सहप्रतिषेधाच्च क्रमेण भवन्तीति ज्ञायते। तथा—यस्मै मां पिता दद्यात् नैवाहं तं जीवन्तं हास्यामीति जीवन्नहानवचनाच्च मृते भर्तरि नियोगोऽस्तीति ज्ञायते। "को वा शयुत्रा विधवेव देवरं मर्यं न योषा कृणुते सधस्थ" इत्यस्मान्मन्त्रवर्णात् स्पष्टतरो नियोगः। एवं हीन्द्राणी दृष्टावश्विनावुक्तौ—"दुर्दशौ युवां क्व पुनर्विधवेव योषा देवरं मर्यं मनुष्यभावं शयने। हर्षस्थाने आपादयन्ती कश्चिदाकुरुते वाम्, उपचरतीत्यर्थः। अनेन नियोगं स्पष्टीकरोति। तथाच वसिष्ठः—प्राजापत्ये मुहूर्ते पाणिग्रहणादुपचरेत्—इति। अतोऽनवद्यो नियोगः। अत्रोच्यते—नैवं नियोगस्मृतिर्व्याख्येया; समाचारविरोधात्, विकल्पस्य चान्याय्यत्वात्। कथन्तर्हि? शूद्राविषया नियोगस्मृतिः। कुत एतत्? मनुवचनात्। "नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभिः" इति द्विजातिसम्बद्धः प्रतिषेधः। सामान्यतः शूद्रसम्बन्धितया विधिः। तस्मादविकल्पः। तथा चोक्तम् "अयं द्विजैर्हि विद्वद्भिः पशुधर्मो विगर्हितः। मनुष्याणामपि प्रोक्तो वेने राज्यं प्रशासति" इति। मनुष्याणामपि शूद्राणामपीत्यर्थः। तथाच समाचारः। यत्पुनर्व्यासेन विचित्रवीर्यभार्यास्वपत्योत्पादनम्, तद्द्रौपदीविवाहवदनादरणीयम्। अथवा क्षत्रियाणामप्यन्वयक्षये राज्यपरिपालनाय नियोगोऽभ्यनुज्ञायते। सच राज्ञामेव; कार्यानुरोधात्, व्यासवचनाच्च। राज्ञां ब्राह्मणेनैव कारयितव्यम्। एवं च सत्याम्नाया अपि क्षत्रियविष-

याः। एवं "नैवाहं जीवन्तं हास्यामि" इति। "नैकस्यै बहवः सहपतयः" इति तु पुनःसंस्कारविषयम्। तत्र मुख्यः पतिशब्दः। मन्त्रवर्णास्तु शूद्रविषय एव व्याख्येयः। एवं देवरादिवाक्यान्यन्यान्यपि व्याख्येयानि। तथाच वृद्धमनुः—शूद्राणामप्ययधर्मोऽयं पत्यौ प्रेतेऽन्यसंश्रयः। लोभान्मूढैरविद्वद्भिः क्षत्रियैरपि चर्यते—इत्युक्त्वाह—वायुप्रोक्तां तथा गाथां पठन्त्यत्र मनीषिणः। विप्राणां न नियोगोऽस्ति प्रेते पत्यौ न वेदनम्—इति। इयं सा गाथा—अकार्यमेतद्विप्राणां विधवा यन्नियुज्यते। ऊह्यते वा मृते पत्यो देवरेण विशेषतः—इति। कथमिदानीमेतद्वसिष्ठवचनम्—भ्रातर्यव्यपदेशेन नाध्येतव्यं कदाचन—इति। अनेन ह्यध्यापनसम्बन्धात् ब्राह्मणानामपि नियोगाधिकारोऽस्ति इति गम्यते। उच्यते—नैतद्युक्तम्; उक्तं त्वाम्नायस्य। भूयसामनन्यपराणां चानर्थक्याद्वरमेकस्यान्यपरस्य च बाधकल्पना। क्षत्रियविषयं चैतद्वाक्यम्। तेषां ह्यापदि नियोगाधिकारात्, सच ब्राह्मणेनैवेत्युक्तम्। तेनैवं योजना—भ्रातर्यध्यापयत्यपि नाध्येयम्। केन ? अन्यपदेशेन। न व्यपदिश्यतेऽनेनेत्यव्यपदेशः। अन्यजातीय इत्यर्थः। किमर्थम् ? बोद्धव्यं गुरुतल्पस्य निमित्तम्। भ्रातुः शिष्यभार्यागमनात्। भर्ता ह्यापत्सु देवरः। भर्तेति भरणयोगात् श्रैष्ठ्याच्च ब्राह्मणः, स यस्मादापत्सु देवरो भवति नियोज्य इत्यर्थः। तस्मात्ततो नाध्येतव्यम्। एवन्तावच्छूद्राणां नियोगाधिकार उक्त इति। इति॥

[उक्तार्थतात्पर्यपूर्वकार्यसमाजीय मत खण्डनम्]

अनेन हि ग्रन्थेनापूर्वोऽयमेव विषयः सूचितः यन्मन्त्रवर्णानामपि शूद्राधिकारकनियोग एव तात्पर्यमिति। अनेन च—न विवाहविधावुक्तं विधवावेदनं पुनः

—इति मनुवाक्यस्यापि न पूर्वापरविरोधः, न वा मनुवाक्यस्यास्य मन्त्रवर्णविरोधः इति च सूच्यते। एतेन—नियोगसाधकतयाऽभिमतानि मन्त्रलिङ्गान्तराण्यप्यार्यसमाजाभिमतानि व्याख्याता-नि। मन्त्रलिङ्गानि हि न वयमप्यप्रमाणं मन्यामहे, किन्तु पूर्वोक्तविधयाऽधिकारिविशेषविषयाणीति। अत्र स्मतॄणामभिप्राय एव गमकः। न हि मन्त्रप्रतिपाद्यः सर्वोऽपि धर्म इति संभवति, क्वचित् प्रकृतानुपयोगिनोऽपि मन्त्रेष्वाम्नानं दृश्यते। यथा—देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां निर्वपामि-इति दर्शपूर्णमासाङ्गमन्त्रे पूषादिदेवतानामाम्नानम्। अन्यथा पूषदेवताया अपि प्रकृतदर्शपूर्णमाससम्बन्धेऽभ्युपगम्यमाने पूषानुमन्त्रणमन्त्राणां पूषदेवताके यागे उत्कर्षो लिङ्गावष्टम्भेन प्रकरणबाधेन समाख्यया व्यवस्थापितो मीमांसकानामसङ्गतः स्यात्। अतः कुत्र मन्त्रे मन्त्रलिङ्गं विवक्षितम्, कुत्र च नेत्यादि-निर्णयार्थमेव स्मृतीनां प्रवृत्तिरिति कुमारिलपादोक्तरीतिरेवात्राल-म्बनीयेति न कोऽपि विरोधः। अन्ये च विशेषा नियोगमधिकृत्यैवात्रोपपादिताः प्रकृतविषयानुपयुक्ता इति तु नात्र समालोच्यन्ते। तथा च सर्वेषामपि निबन्धकाराणां विद्यासागरमहोदयस्य च नियोगस्य विवाहात् पृथक्त्वे एवं संमते सति नियोगपरमन्त्रवर्णानु-सारेण तत्परस्मृत्यन्तरवचनानुसारेण चार्यसमाजीयानां विधवावि-वाहशास्त्रीयताव्यवस्थापनं कथमिवोपपद्यते। यश्चात्र बालक्रीडा-गतोऽपरो विशेषः, स तु केनापि न विस्मर्तव्यः स यथा—नैकस्या बहवः सहपतयः—इतिवाक्यस्य युगपत्पतिबहुत्वनिरासपर-स्यापि विधवाविवाहसाधुतायां न तात्पर्यम्; किन्तु पतिमरणान-न्तरं नियोगविधान एवेति। अनेनच—विद्यासागरमहोदयाना-

मेवद्वचनानुसारेणैतदर्थनिरूपणपराद्विपर्वगतमहाभारत व्याख्यानुसारेण च विधवाविवाहस्य शास्त्रीयतावचनमपि—परास्तम्। सर्वथा तु न पुनरुद्वाहस्य शास्त्रीयत्वम्। यथा च लोकदृष्ट्यापि विचारणायां विधवाविवाहोऽयमपि नामान्तरेण प्रकाशव्यभिचार एव, तथा सूनृतवादिन्यां विस्तरशोऽप्याशर्मविद्यावाचस्पतिमहोदया उपापीपदन् इति प्रियपाठकानां केषाञ्चनोत्साहमनुसृत्य सूनृतवादिन्येव यथावत्सङ्गृह्य प्रकाश्यते। तद्यथा—

[पुनरुद्वाहस्य प्रकाश व्यभिचारत्वे सुनृतवादिनी] "नैका द्वौ पती विन्दते" इति श्रुतिमनुवदन्नेव श्रीमान्मनुः—"न द्वितीयश्च साध्वीनां कश्चिद्भर्तोपदिश्यते,, इत्याह।

मृतस्याऽपि पत्युर्विप्रियं नाचरणीयमित्यपि तेनैवोक्तम्—

पाणिग्राहस्य साध्वी स्त्री जीवतो वा मृतस्य वा।
पतिलोकमभीप्सन्ती नाचरेत्किंचिदप्रियम्॥ इति॥

न हि स्वीयभार्यायाः पत्यन्तरकरणं कस्याऽपि महात्मनः प्रियं भवति। मन्यामहे वाचा प्रलपन्तः समाजसंस्कारप्रिया अपि नैनमर्थमनुमोदेरन्निति। न किल प्राणान्मुञ्चता केनाऽपि महात्मना स्वीये निर्वाणपत्रे समुल्लिखितं कदाचिदपि 'मृते मयि परिणयतु पुरुषान्तरं मे भार्या, इति। असह्यो हि भवति भार्यायाः पुरुषान्तरपरिग्रहः पत्युरिति। एष एव च व्यभिचार इत्यभिधीयते लोकैः। व्यभिचारो हि पुरुषान्तरपरिग्रह एव। पुरुषान्तरं च पतिभिन्नः पुरुषः। पतिश्च पाणौ ग्रहीता। पाणिग्रहणस्य च निष्ठा सप्तपदविधिनिर्वृत्तौ भवतीत्याचक्षते मुनयः। पाणिग्रहणसंस्कारात्पतित्वं सप्तमे पदे, इति। नहि विधवानां परिग्रहीतुः कस्याऽपि तत्पतित्वं व्यपदिश्यते क्वापि। संस्कारत्वाभावाद्विधवापरिग्रहस्य

असंस्कारश्च न विवाहो भवति। विवाहस्य चाभावे कुतः पतित्वोत्पत्तिः। पतित्वोत्पत्तिमन्तरा च केनाऽपि परिणीतपूर्वाया नार्याः परिग्रहो व्यभिचार एवेति नैतद्वक्तुमावश्यकम्। अत एव ब्रूमो व्यभिचार एवायं विधवापुनरुद्वाहो नामेति।

अत्राऽपरे प्रत्यवतिष्ठमानाः प्राहुः—'न किल विधवोद्वाहो व्यभिचारः। व्यभिचारो ह्यनियतपुरुषासक्तिः। पुनरुद्वाहः पुनरेकमात्रपुरुषासक्तिरेव इति॥ अयं चैतेषामभिप्रायो यत्स्वैरिणीभिः किल यथाभिलाषं नानाविधाः पुरुषा आसेव्यन्ते। पुनःपरिणयन्त्या पुनर्विधवया केवलमेकमात्रः समासेव्यते पुरुषः। तत एव च नास्ति विधवोद्वाहस्य व्यभिचारत्वमिति।

तत्त्वदर्शिनः पुनरत्र प्राहुः 'आस्तान्नामायमेतावान्भेदस्तथाऽपि तर्हि पुनरुद्वाहस्य व्यभिचारत्वमप्राकर्तुं शक्यम्। पतिभिन्नश्च पुरुषो विधवायाः परिणेता॥ इति॥ न किल स्वैरिणीनामयं नियमो यत्ताभिरनेका एव पुरुषा आसेव्यन्त इति। दृश्यन्ते ह्येकमात्रमेवात्मनोऽभीष्टं पुरुषमवलम्बमानाः साध्व्य इव व्यवहरन्त्यो वेश्याश्च स्वैरिण्यश्चापराः काश्चित्। तत्किमु ता एताः साध्व्य इत्येव व्यपदिश्येरन् केनाऽपि महाभागेन? यथा च वयं पश्यामस्तथा नैतदेवं सुघटम्। न किल कश्चिदपि महात्मा वेश्यां वाऽपरामपि वा स्वैरिणीं साध्वीमेव ब्रूयात्। पाणिग्रहीतारमन्तराऽन्यस्य पतित्वाभावात्। पाणिग्रहश्च शास्त्रीयो विधिः। न चाऽसौ स्वैरिणीभिर्वेश्याभिरपि वा समाचर्यते। एवमेव विधवाभिरपि। अनुपदेशाद्विधवायाः पाणिग्रहणस्य। तत एव च यदि न विषह्यते पतिभिन्ने पुरुषे समनुरक्ताया विधवायाः स्वैरिणीति पदम्, यदि च

नाङ्गीक्रियते तथाविधस्यानुरागस्य व्यभिचारत्वम् तदा तथाविधा वेश्या अपि साध्वीपदमेव प्राप्यन्तां महाभागैः ।

किंच पुनरुद्वाह एकमात्र एव पुरुष आसक्तिरिति नैतत्सत्यम् । यथा मृते भर्तरि पुरुषान्तरस्य स्वीकारः—एवं तस्मिन्नपि मृते तदन्यस्य तत्राऽपि निधनं गते तद्विभिन्नस्य, तत्र च पञ्चत्वमापन्ने तदपरस्येति यावदभिलाषं पुरुषपरिग्रहस्य दुर्वारत्वात् । न चाप्येतन्न सम्भवति । यासु हि जातिषु विद्यते विधवोपरिग्रहस्य आचारास्तास्ववश्यं विद्यन्ते तथाविधा नार्यो याभिर्यथाक्रमं भूयांस एव पुरुषा आसेविताः । नहीदं सम्भवति यत्कापि नारी विनैव क्रमं सकृदेव बहुभिः पुरुषैरुपभोक्तुं प्रभूयत इति । प्रतिपादितं चैतच्चिकागोनगरं प्रयातवता केनाऽप्यस्मद्देशीयेन सभायां कस्यांचित् आसीत्किलामेरिकायां निवसतो मे सखी काऽपि यया खल्वष्टाविंशतिः पुरुषाः यथाक्रमं परिणीताः!!!इति । न खल्वेकमासेवमानयापरोऽपि नाम समासेवितोऽनया पुरुषः । किंतु तमेतं पतित्वनिरयात्समुद्धृत्यैव । तथापि नैवात्र जानीमः को वात्र व्यभिचारतो विशेष इति। वेश्या अपि नन्वपरित्यज्यैकं नान्यमासेवन्ते, तथाऽपि यावन्नास्ति साध्वीत्वव्यपदेशस्तावन्न पतिविभिन्नमेकमपि पुरुषमासेवमानाया विधवायाः स्वैरिणीत्वाभावः शक्यत उपपादयितुम्। तत एव च नास्ति व्यभिचारतः कोऽपि विशेषो विधवोद्वाह इति ।

अत्राहुः केचिन्नव्यमताऽनुयायिनः 'संदृश्यते युवतीनां कासांचिद् दैववशाद्दिवं गते पत्यौ कामवेगं धारयितुमप्रभवन्तीनामपथे प्रवर्तनम् । तदपेक्षया च वरमेकमात्रस्य कस्याऽपि पुरुषस्यालम्बनम् ॥ इति ॥

एवं तर्हि प्रकाशोऽयं व्यभिचार इत्याख्यातं भवति । स्मर्यन्ते

किल द्विविधास्तेनाः स्मृतिकृद्भिः । प्रकाशाश्चाप्रकाशाश्चेति । तेन स्तेयमपि द्विविधं भवति प्रकाशमप्रकाशं च । अप्रकाशं तावत्संधिभेदादिकं प्रकाशं पुनरुत्कोचग्रहणादिकमेवेति । न पुनर्व्यभिचारस्य द्वैविध्यमभिहितं क्वाऽपि । तदिदानीं प्रतिपादयति कुलकामिनीनाम् । पुनरुद्वाह इति यत्सत्यं भाग्यमेवैतच्छास्त्रस्य ।

यदि कामावेगं धारयितुमप्रभवन्तीनां पुनर्विवाहो युक्तश्चाविगर्हितश्चेत्यभिप्रेयते, तदा जीवत्यपि भर्तरि पुरुषान्तरपरिग्रहो न्याय्य एव स्यात् । कामवेगधारणेऽप्रभविष्णुत्वमेव हि मूलं तत्रेति तेन यासामेकमात्रेण पुरुषेण न प्रशाम्यति कामस्ताभिरपि नारीभिः परिग्राह्यं पुरुषान्तरमिति प्रतिपाद्यतामेतन्महामतिना । अत्र कदाचिदुच्येत केनाऽपि कामावेगं धारयितुमसमर्थानां विधवानां पुनरुद्वाहस्याऽभ्यनुज्ञाभावेऽवश्यं ता व्यभिचरेयुः । अत एव चावश्यकस्तासां पुनरुद्वाहः इति, किं तु निःसारतममेवैतेषां वचनम्, सधवास्वपि कासुचिन् यायस्याऽस्य तुल्यत्वात् । कामवेगातिशयव्याकुला हि सधवा अपि पतिविभिन्नपुरुषपरिग्रहानभ्यनुज्ञानेऽवश्यं व्यभिचरेयुरिति । यदि तु 'दृश्यते क्वाऽपि विधवासु अप्रकाशो व्यभिचार इत्युच्यते, तदा दृश्यते एव तादृशः सधवास्वपि कासुचिद्व्यभिचारः इत्युभयत्राऽपि तुल्यमेवेदम् । यत्तु—विधवानां व्यभिचारे भ्रूणहत्याः सम्पद्यन्ते, सधवानां पुनर्नैवम् , जीवति ह्य तासां भर्ता , इत्युच्यते । तन्न वितथम् । अस्ति किल व्यभिचारिण्याः सधवायाः पत्युरनायाससाध्यं पितृत्वमिति । तत एव न स्युर्भ्रूणहत्या इति नात्र सन्देहः । किं तु नैतावता पुरुषान्तरपरिग्रहस्य व्यभिचारत्वं वारयितुं शक्यम् । यदि च भ्रूणहत्यैव विधवानां पुरुषान्तरपरिग्रहाभ्यनुज्ञाने हेतुस्तदा विद्यत एवात्र

सुकमुपायान्तरम् । तदेव चालम्ब्यतां विधवोद्वाहपक्षपातिना भवता । तच्च विधवानां भ्रूणहत्यायां दोषाभाव इति । यद्वा विधवानां व्यभिचारो निर्दुष्ट एव । एवं हि नानुभूयेतैताभिरेकमात्रपुरुषासक्तिलक्षणा नियन्त्रणापीति । अत्र वयमिदं पर्यनुयुञ्ज्महे— यत्पुरुषान्तरासक्तचित्ता एता स्वीयसमुदाचारान्तरायोऽयमिति मत्वा कदाचन स्वपतिमपि विषान्नप्रदानादिना कथं न हन्युः ? एवं भ्रूणहत्यापरिहारमभिलषतां पतिहत्यादोषः कथं परिहरणीयः ? इति ।

विधवोद्वाहश्च न व्यभिचारं ह्रासयेत् । प्रत्युत वर्धयेदेव । यावद्धि न विज्ञातः पदार्थान्तरस्यास्वादस्तावदेकस्मिन्नेव पदार्थे आसक्तिः सम्भवति । सम्भवति चान्यत्र परित्याज्यताबुद्धिः । यद्धि येन नास्वाद्यते, न किल तत्र तस्य प्रवृत्तिः स्वयं भवति । न नास्वादितमद्यस्य कस्याऽपि ब्राह्मणस्य मद्यपाने प्रवृत्तिर्दृष्टा । नाऽपिवाऽभक्षितमांसस्य मांसभक्षणेऽपीति । अविज्ञातो ह्यतस्य रस एतेनेति । अस्ति चात्रामुष्य त्याज्यताबुद्धिः । एतच्च विशदीकृतं महाभारते शान्तिपर्वणि । तदपि नाप्रासङ्गिकमिति दिङ्मात्रेणैवात्रोदाहर्तुमिच्छामः । केनाऽपि धनमदावलिप्तेन वैश्येनावपातितं शोचन्तं कमपि काश्यपं नाम ब्राह्मणमुपगतः शृगालवेषधरः शतक्रतुः प्रसङ्गवशादेनमाचष्टे ।

न खल्वप्यरसज्ञस्य कामः क्वचन जायते ।
संस्पर्शाद्दर्शनाद्वापि श्रवणाद्वाऽपि जायते ॥
न त्वं स्मरसि वारुण्या लट्वाकानां च पक्षिणां ।

इत्यादि । वारुणी मद्यम् । लट्वाका ग्रामचटकाः । एवं नास्वादितः परपुरुषास्वादो नारीभिर्यावच्च न व्यपगतो दूषणीयोऽयः

मिति बुद्धिरेतासां तावन्न खलु व्यपेतेष्वपि प्राणेषु स्वीकुर्युरेताः परं पुरुषम्। यदा तु पुनर्विवाहच्छद्मनाऽपि वा स्वीक्रियेत पुरुषान्तरमेताभिस्तदा विज्ञातपरपुरुषास्वादतयाऽवश्यं तनोऽप्यपरस्मिन्पुरुषेऽभिलाषः प्रवर्तेत ? ततश्च निरर्गलाय व्यभिचारायैव करावलम्बो दत्तः स्यात्।

किंच न खल्वस्यैव लोकस्य कृते समासेव्यते पतिः साध्वीभिः, किं तु परस्याऽपि लोकस्यार्थमिति। भवति ह्येतासां विश्वासो यज्जीवतो मृतस्याऽपि वा पत्युरनुवर्तनं परस्मिन्लोके श्रेयसे भवतीति। अत एव च जीवितनिर्विशेषं जीवितादप्यधिकं वा पश्यन्ति पाणिग्रहीतारं साध्व्यः। यदि चेह लौकिकस्यैव सुखस्य हेतोः पतिकरणमिति स्यादमूषां बुद्धिस्तदाऽवश्यमेता व्यभिचारे प्रवर्तेरन्। ऐहिकं हि सुखं यथाभिलषितमास्वादनीयं मन्यते प्राणिन इति। यश्च पारलौकिकसुखावाप्तिलक्षणो नियम्त्रणो हेतुरेतस्य, स तु सुदूरमुत्क्षिप्तः पुनरुद्वाहेनेति। अतश्चावश्यं न्यूनीभवेत्प्रेम दम्पत्योः। तथाहि—येषु किल नास्ति प्रचारः पुनरुद्वाहस्य, तेषु वर्णेषु पतिमेव दैवतं मन्वाना अनन्याऽवलम्बमेव चात्मानमाकलयन्त्योऽनुवर्तन्ते पतिं नार्यः। यदि त्वेताः पश्येयुर्गत्यन्तरम्, यदि च जानीयुर्मृ तेऽप्येकस्मिन्सुलभ एवाऽपरः पतिरिति, तदा नूनं शिथिलीभवेत्पतिप्रेमैतासाम्। नचाप्येता विप्रियमपि प्रोक्तं पत्या विषहेरन्। अनतिप्रियं चैनं रुग्णशय्यासंलग्नमुपेक्षेरन्। पश्चाऽप्येताः पुनः परिणयति। तत्राऽपि नूनमेवंविधमेवैतासामाचरितं स्यात्। कामवेगप्रशम एव फलं पतिकरणस्येति समुदयेत पुनरुद्वाहेन बुद्धिरेतासु। तेन च कष्टमस्थैव स्याल्लोकयात्रा मनुजानाम्। न चाप्येतन्न श्रद्धेयम्। यासु हि जातिषु सुप्रचारः पुन-

रुद्वाहो नारीणाम्, तासु शिथिलप्रायमेव संदृश्यते पतिगतं प्रेमैतासामिति ।

इतश्च न विनिवर्तयेऽव्यभिचारं विधवोद्वाहः । तथाहि—यत्किल यतो नियतं निष्पद्यते, तदेव तस्य कारणं भवति । यथा घटस्य मृत्तिका, पटस्य तन्तवो, भूषणानां वा सुवर्णमित्यादि । यत्पुनर्यस्मान्न सम्पद्यते, न तत्तस्य कारणं यथा पटस्य मृत्तिका घटस्य तन्तव इत्यादि । अत एव चान्वयव्यतिरेकविशिष्टस्यैव कारणत्वं तार्किका मन्यन्ते । एकस्य सत्तायामपरस्य सत्ताऽन्वयः । एकस्याऽभावेऽपरस्याऽभावो व्यतिरेक इति । ततश्च विधवोद्वाहश्चेव्यभिचारनिवृत्तेः कारणम्, तदा यत्र विधवोद्वाहस्तत्र व्यभिचाराभाव आवश्यकः । नचैतदस्ति , दृश्यते हि तास्वपि जातिषु व्यभिचारो यासु विद्यते निरर्गलः पुनरुद्वाहः । अस्ति च तासु व्यभिचाराभावो यासु नास्ति प्रचारः पुनरुद्वाहस्य । ततश्च नास्ति विधवोद्वाहस्य व्यभिचारनिवृत्तिजनकत्वमित्यवश्यम युपेतव्यम् । अत एव च नास्ति कामवासनातोऽन्यत्किमपि बीजं पुनरुद्वाह इति द्रष्टव्यम् ।

यत्तु 'पुनरुद्वाहो देशोन्नतेर्हेतुः । सन्दृश्यते हि पाश्चात्येषु प्रचारः पुनरुद्वाहस्य । समुन्नताश्चैते । अत एव चावश्यकः पुन रुद्वाहः,इति कैश्चिदुच्यते, तत्केवलमुपहासास्पदमेव प्रेक्षावताम् । समुन्नत्या समं विधवोद्वाहस्य सम्बन्धाभावात् । यदि च स्याद्विधवोद्वाहस्य समुन्नतिप्रयोजकता, तदा किमिति वा व्यतीतेष्वप्यसंख्येषु वर्षेषु नाद्याऽपि समुन्नता जघन्यजातीया भारतवर्षीयाः । अस्ति खल्वेतेषु सार्वत्रिकः प्रचारो विधवोद्वाहस्येति । किंच पाश्चात्येष्वपि नाङ्गी कुर्वते विधवोद्वाहं शिष्टा इति किल श्रूयतेऽस्माभिः । तथाऽपि न खल्वेते न समुन्नता इति शक्यते मन्तुं नव्यैः । यदि चैवंविध-

एव कार्यकारणभावस्तदा सर्वमेव सर्वस्य कारणं सम्पद्येत । तन्नां-शतोऽप्युचितमेवमालपितुम् ।

यत्तूच्यते कैश्चित्—यदि न पुनःपरिणेतव्यं नारीभिस्तदा किमिति वा पुरुषैः पौर्विक्या भार्याया मरणे पुनःपरिणीयते ? समानश्च पुरुषैः स्त्रीणामधिकारः । तन्नोचितमेवंविधं वैषम्यमिति ।

अत्रोच्यते—एतेषां तावन्मते पुनरुद्वाहो नामायमपराध एवेति नात्र सन्देहः । किंतु सोऽयं पुरुषैराचर्यत इत्यत एव स्त्रीभिरप्याचरणीय इति । परंतु नह्येकेनापराद्धमित्यपरेणापि तथैवानुष्ठेयमिति न्याय्यमिदम् । न चाप्ययं पुनरुद्वाहनिवृत्तेरभ्युपायो दृष्टः । न हि चैत्रो मद्यमास्वादयतीत्यहमपि तदास्वादयामीति वदन्मैत्रःप्रशस्येत धीमद्भिः । प्रत्युतोपहस्येतैव । एवमेवैतदपि । यदि नेष्यते पुंसां पुनर्दारपरिग्रहस्तदा निवर्त्यतामसौ कामम् । न पुनरेते पुनर्दारान्गृह्णन्तीति नारीभिरपि पुनः पुरुषान्तरमासेव्यताम्; अन्याय्यत्वात्तथाविधस्याचरणस्येति ।

यत्तूच्यते पुनरुद्वाहाभावे गरीयसी किल व्यथाऽनुभूयते कामेन क्लेश्यमानाभिर्नारीभिः । अतश्च नियन्त्रणामात्रमेतासां वैधव्यऽनुपालनम् । न चाप्येतासां नियन्त्रणा न्याय्येति । तदपि न मनोरमम् । सुखोदर्का हि नियन्त्रणा न नियन्त्रणा भवति । न हि रोगिणः पथ्यासेवनं नियन्त्रणेत्यभिधीयते क्वाऽपि केनाऽपि । तद्धि कियन्तं कालं क्लेशमपि संजनयदन्ततोऽवश्यं सुखमेव संजनयतीति । एवं च नामैतत् । अयमेव च पशुभ्यो विशेषो मनुजानां यदेतेषां केचिद्विधयः परिछिन्ना एव भवन्ति । ते च सम्भोगादयः । एतेभ्यश्चात्रभासमाना नियन्त्रणा न विनियन्त्रणा । एषा

हि विपुलस्यैव श्रेयसो मूलमिति । अतश्च विनियन्त्रणामात्रभीरुणाऽपि नानुष्ठेयः पुनरुद्वाहः । इति ॥

[विधवाकेशवपनस्य शास्त्रीयत्वम् ।]

अन्ते च वयमिदमेव सूचयामो यद्विधवानां केशवपनादिकमन्यद्वा विकारसम्पादनं सर्वं धर्मबुद्ध्यैव क्रियते,न घृणाबुद्ध्या। तासां स्वधर्मानुरागिणीनां नायं विचार इदानीमपि समस्ति यदेता प्रतार्यन्ते शास्त्रकारैरिति । यत्पुनरपराण्यपि व्यसनानि विधवानामुपवर्णयन्ति नव्यसंस्कारवासनावासिताः, तेन वयं मन्यामहे—विद्रवतीव नितान्तमन्तःकरणमेतासां निरवधिकं दुःखमालोकमानामेषाम् । कदा पुनरमीषां नयनगोचरत्वमापद्यते दुःखमेतासामिति तु नांशतोऽप्यवगन्तुं प्रभवामः । न खल्वेतद्वितथं यद्दुस्सहतमेन दयितविप्रयोगेणैवादितः परिप्लुष्यत्यन्तरङ्गमेतासाम् , तत्र च व्यसनान्तरपातनमेतास्वयुक्ततममेवेति । यथा च वयं पश्यामस्तथा नैतासु दुःखमेवंविधं पात्यते केनाऽपि क्वाऽपि । न चैतास्वालम्ब्यते परुषतरा वृत्तिः । प्रत्युत स्निग्धतमामेवैनामवलम्बन्ते भारतवर्षीयाः । वैदेशिकाचारविलोकनविकृतदृष्टयस्तु विपरीतमेवात्र पश्यन्तीति किंवाऽत्र विधीयतां भारतवर्षीयैः ?

नव्याः खल्वाहुः सर्वथा नृशंसप्रायोऽयमाचारो विधवानां वपनमिति ! न ह्यतः परं निर्दयं नामापरं किमप्यस्तीति । न पुनरेतद्युक्तम् । को हि नाम विधवानां वपनस्य निर्दयत्वेन सम्बन्धः । ये किल शास्त्रतः परिप्राप्ता विधयो नैतेषामनुष्ठापनं निर्दयत्वाय प्रकल्पेत । स्यान्नामातो नियन्त्रणमिव किमपि । तथाऽपि न हि तावता वात्सल्यशून्यत्वं निर्दयत्वमपि वा गुरुजनप्रभृतीनामनुमातुं युक्तम् । ते हि नितान्तमेवास्यां स्निह्यन्ति । समवेक्षमाणाश्च

दुःखमेतस्याः प्रकाममेव दुःखायन्ते । तथाऽपि न ह्येतद्दुःखं कारुण्यं वात्सल्यमपि वा शास्त्रप्रतिषिद्धे वर्त्मनि प्रवर्तयत्येतान् । न च नास्त्येव विधवानां वपने प्रमाणभूतं शास्त्रं किमपीति भ्रमितव्यम् । विद्यते ह्येतत् । तथा ह्युक्तं भगवता व्यासेन—

मृतं भर्तारमादाय ब्राह्मणी वन्हिमाविशेत् ॥
जीवन्ती चेत्त्यक्तकेशा तपसा शोषयेद्वपुः ॥ इति ॥

काशीखण्डेऽपि—

विधवाकबरीबन्धो भर्तृबन्धाय जायते ॥
शिरसो वपनं कार्यं तस्माद्विधवया सदा ॥ इति ॥

आदित्यपुराणेऽप्येवम् । उदाहृतं च वचनमेतद्धर्मशास्त्रप्रबन्धेषु । न च न प्रमाणं भगवतो व्यासस्य वचनं धर्मशास्त्रकृद्भिरनुदाहरणादिति वक्तव्यम्; तत्समानार्थकस्यादित्यपुराणीयवचनस्य प्रामाण्यस्वीकारेण तत्प्रामाण्यस्वीकारस्यार्थतः प्राप्तत्वात्, शिंशपाचोद्यन्यायेन च यस्य कस्याप्युपनिबन्धने बाधकाभावात् । यत्र कुत्राऽपि वा वने प्रवेष्टव्ये यदि प्रवेष्टुकामः शिंशपावनं प्रविशेत्, तदा नैष प्रश्नः समुदेति कुतो वा शिंशपावनमेवाऽसौ प्रविष्ट इति ॥ एवं विधवानां केशवपने प्रमाणतयोपन्यसनीये वचने नैष प्रश्न आत्मलाभं लभते कुतो वा वचनमेतदेव प्रमाणतयोपन्यस्तम्, कुतश्च नैतदिति । यस्य कस्याऽपि हि समुपनिबन्धने समानमेव योगक्षेममिति । समानमेव ह्यशेषाणां प्रामाण्यम् । अनुपलब्धा ह्येतद्विषयिणी श्रुतिर्वचनतोऽस्मादनुमेया । अनुमितश्रुतिमूलकानां च वचनानामेतेषां समानमेव प्रामाण्यम् । यत्र चैवं समानमेव प्रामाण्यं तत्रान्यतमस्योपन्यासेन चरितार्थतयाऽपरस्योपन्यासपक्षाभावः । अत एव च निर्णयाऽब्धिप्रभृतिषु नोपलभ्यते

व्यासवचनम् । यत्तूच्यते गृह्यसूत्रेष्वविद्यमानो वपनविधिः स्मृतिषु लभ्यमानोऽपि विरुद्धत्वादुपेक्ष्य एवेति तदेतद्विरोधस्वरूपाज्ञाना दुपेक्षणीयमेवेति ब्रूमः। तत्र हि विरोधो भवति यत्रैकस्मिन् क्रियमाणेऽपरं वैफल्यमापद्यते। यथोच्यते 'औदुम्बरी सर्वा वेष्टयितव्या' इति। अन्यत्र च प्रोच्यते 'औदुम्बरीं स्पृष्ट्वोद्गायेत्, इति। औदुम्बरी चोदुम्बरशाखा। एषा चेत्सर्वैव वाससा वेष्ट्येत नैव शक्येत स्प्रष्टुम्। यदि स्पृश्येत नैव शक्येत सर्वतः परिवेष्टयितुम्। तदत्रैकतरस्य विधेराश्रयणेऽपरस्य वैफल्यापत्तिरिति स्फुटएवात्र विरोधः। एकत्राऽनुक्तस्य पुनरन्यत्रोक्तौ समुच्चयो भवति। विरोधाभावात्।

अत एव च सूत्रेष्वनुक्तोऽपि विधवानां वपनविधिः स्मृतिषु संदृश्यमानः प्रमाणमेवेति। तत एव च विधिरसौ नैव निष्करुणत्वमवबोधयतीति। सर्वथा हि प्रमाणं भारतीयानां शास्त्रमेव कार्याकार्यविचारे। तदाहुः 'तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ' इति सुखमेव वापयन्त्यात्मनः शीर्षं कुलीना विधवा इति नैतदविदितं कस्याऽपि। अत्र च विषये विधवासु हठात्कारो भवतीति केषांचिद्दयाध्वजानामाक्षेपः सर्वथा निर्मूलः।

अपरे पुनः प्राहुः—अवमन्यन्ते विधवा भारतवर्षीयैः। एते हि कस्मैचित्कार्याय विनिर्गच्छन्तः पुरतः समापतन्तीं विधवामवेक्षमाणा अनिमित्तमिदमित्याकलयन्तीति। अहो पराकाष्ठा मौर्ख्यस्य, यदेवमसम्बद्धमेव प्रलप्यते किमपि। न ह्यपशकुनतया समाकलनं नाम मानहानये भवति। न च तावताऽपशकुनतया समाकलिते मानुषे गतः आदरो हीयते। नापि सुशकुनतया परिगणितमिति भवति सर्वथा समादरणीयं संमाननीयं वा किमपि। पति-

व्रताऽपि सधवाऽपि च वन्ध्या सर्वथैवापशकुनतया गण्यते शाकुनिकैः। सुशकुनतया पुनर्वाराङ्गनां वदन्त्येते। न ह्येतावता पतिव्रतापेक्षया वाराङ्गनासु बहुमान इति शक्यमभिधातुं केनाऽप्यनुन्मत्तेन। गमनावसरे किलैकाकी पुरः समापतन्ब्राह्मणोऽपशकुनतया स्वीक्रियते यद्यपि पारङ्गतो वेदवेदाङ्गेषु। अन्त्यावसायिष्वपि पुनः परिगणितो रजकः सह निर्णिक्तैर्वसनैः पुरः पतन् शुभशकुनतया स्वीक्रियते। सुराऽपि ननु गमनसमये पुरः सन्दृश्यमाणा शुभशकुनतां भजते। 'यथा सुराणाममृतं सुखाय तथा नराणां भुवि तक्रमाहुः' इति बहुधोपवर्ण्यमानमप्यायुर्वेदविदां प्रवरैः प्रयाणकाले सन्दृष्टं तक्रमशुभशकुनतया स्वीक्रियते। तत्किमु ब्राह्मणापेक्षया श्रेयान् रजकः, किंवा मदिरापेक्षया जघन्यं तक्रमित्यभिप्रेयते भारतवर्षीयैरिति मन्येत मतिमत्तरः कोऽपि? नचैतच्छक्यतेऽस्माभिः सम्भावयितुम्। न चास्ति शकुनविषये मानावमानादिविचारस्याऽवसरः। नाऽपि प्रदीयते कश्चावलम्बोऽस्मै विचाराय केनाऽपि। तन्न जानीमः कुतो वा नव्यानामेव मस्तिष्के घूर्णतेऽसौ मानावमानविचार इति।

[प्रकारान्तरेण विधवोद्वाहस्यायुक्तत्वम्]

व्यवस्थापितमेतावता, इदानीं पुनरस्मादपरस्याऽपि महीयसो व्यसनस्य समुत्पत्तिरिति साधयितुमिच्छामः।

विदितमेव तावद्युष्माभिर्यन्नास्ति खलु भारतीयेषून्नतश्रेणीयेषु प्रथा विधवोद्वाहस्येति। सकृदेवात्र स्त्रियः परिणीयन्ते। पुरुषास्तु द्विस्त्रिश्चतुरपि वा परिणयन्तीति। यद्येवं तदावश्यं दुर्लभाभिरेव भवितव्यं कन्याभिः। अनेकशो हि सम्पद्यते पुंसामुद्वाह इति। न पुनरेतदेवं सन्दृष्टम्। सम्प्रति हि सप्रयासम-

श्चन्त्रिच्छता भूयसा समयेन कष्टेनैव यथाकथमप्यासाद्यते पित्रा वरः कन्यायाः। भूयांसः पुनः पितरः प्रयासेनाप्यनधिगच्छन्तो वरं वीक्षमाणाश्च बाल्यात्परस्मिन्वयसि प्रगाढं प्रवेशमेतासां नितान्तमेव क्लेशमनुविन्दन्ति। भारायेव मन्यन्ते जीवितमात्मीयम्। वरं तावदनपत्यत्वमेव, न पुनः कन्यापितृत्वमित्यपि समुद्गिरन्ति वचनान्येते। कथं वाऽधिगम्यते कन्याया भर्तेति चिन्तया निरन्तरमेवाक्रान्तान्यमीषां हृदयानि। यथा यथा ह्यपक्रामति शैशवं कन्यायास्तथा तथा समेधतेऽस्वास्थ्यं पितुरिति न खल्वेतत्तिरोहितम्। सर्वतो ह्येतत्प्रत्यक्षीभवति। किं तावदत्र निदानम्? अत्र किलाविलम्बितमेव प्रतिवदेयुः समाजसंस्कारप्रिया नव्याः—वरदक्षिणाबाहुल्यमेवैनं कन्यायाः पितरं क्लेशयति। तत एव दुष्करः कन्यानामुद्वाहः। यदि तु वरदक्षिणायाः प्रथैव सुदूरमुत्सार्यते,तर्ह्यवश्यं सम्पद्येरन् सर्वासामपि कन्यानामुद्वाहाः इति। आपाततस्तावद्रमणीयमेवेदमेतेषां प्रतिवचनम्। यथायथमेतद्विचारचक्रमारोपितम्, तथा तथा निःसारत्वमेव केवलमात्मनः प्रादुष्कुर्यात्। तथाहि आस्तां तावद्वरदक्षिणाया प्राशस्त्यमप्राशस्त्यं वा। न किल तद्विचार इदानीं किमपि। तथाऽपि वरदक्षिणात एव न भवति कन्यानां विवाह इति नैतच्छ्रद्धेयम्। यदि हि सैवात्र हेतुः स्याद्यदा च न तां प्रदातुं प्रभवन्ति कन्यानां पितरस्तदा यैः प्रार्थ्यन्ते वरदक्षिणा तेषां विवाहेनैव न भवितव्यम्। वरदक्षिणाप्रदाने समर्थस्य कन्यापितुरेवाभावात्। नत्वेवं दृश्यते। प्रत्युत ये नाभ्यर्थयन्ते स्तोकामपि वरदक्षिणां ये वा विनैव विचारं समुत्सुकाः कन्याः परिणेतुम् 'तदपेक्षया भूयिष्ठां वरदक्षिणामर्थयमानानामेव परिणयाः सत्वरं सम्पद्यन्ते। अत एव च वरदक्षिणा प्रथैव कन्यानां विवाहस्य दुष्करत्व-

मापादयतीति नैतच्चतुरम्। यद्यपि निराकृता वरदक्षिणाप्रदान-प्रथा, तथाऽपि न हि युगपदेव भार्याद्वयं भार्यात्रयं वा विधीयते श्रीलैः। येन सर्वासामेव कन्यानां विवाहः सम्भवत्येव। वरदक्षि-णाया निराकरणे सम्प्रति यैर्न शक्यते प्रदातुं वरदक्षिणा, तेषां युवतीनां कन्यानां स्यान्नामोद्वाहः, किन्तु ये तावत्प्रभवन्ति प्रदातु-मिमां तेषां कन्या विनैव विवाहमवतिष्ठरेन्कष्टमेव वा परिणीयेरन्। यावन्तो हि वरास्तावतोनामेव कन्यानामुद्वाहः सम्भवति। न पुन-स्ततोऽप्यधिकानाम्। न हि वरदक्षिणाया अभावो नाम वराने-वाभिनवान् सञ्जनयेत् इति। ततश्च यासामुद्वाहो न भवति तासां स वराभावादेव न भवतीति विनाऽपि वाञ्छामवश्यं स्वीकरणी-यम्। वराणामभावश्च कन्यासृष्टेराधिक्यादेवेति नात्र सं-देहः। अन्यथा हि द्विस्त्रिरपि वा ततोऽपि वाऽधिकान्वारान्परिण-यत्सु पुरुषेषु सकृदेव च व्यवस्थापिते स्त्रीणामुद्वाहे कन्यानामेव दौलभ्यं सन्दृश्येत। तत एव च प्रतीयते। भूयस्येवात्र कन्या-सृष्टिः, पुरुषसर्गः, पुनस्ततस्तोक एवेति। अत एव चानुभूयते कष्टं कन्यानां पितृभिः॥

प्रियपाठकमहाभागाः—यद्येवं कन्यानां भूयस्त्वं वराणां चाल्पत्वं निःसन्देहमेव स्थिरीभवति, तदा स्वयमेव तावद्विचार्यतामिदं श्रीम-द्भिर्युक्तो वा विधवानां पुनरुद्वाह इति। आपातयेद्वा न वायं महीय-सीमापदं कन्यास्विति। सदृशमसदृशं वा पुंसामनेकशः परिणयन-मिति च यदि तु सावहितेन चेतसा निपुणं विचारयेयुः श्रीमन्तस्त-दावश्यं प्रतिपद्येरन् यन्नैव समुचितो विधवानामुद्वाहः। एष हि नून-मापातयेद्गरीयसीमापदं कन्यासु। युक्त एव चानेकशः पुंसां वि-वाह इति। तथाहि—विधवास्तावदङ्कुरितयौवनाः। एतासां च प-

रिण्येऽभ्यनुज्ञाते न खलु यूनामनन्यपूर्विकास्वनतिक्रान्तबाल्यभावासु मनः प्रवर्तेत। प्रवर्तेतैव च सविशेषं विधवोद्वाहे। येषां पुनर्द्वितीयस्तृतीयोऽपि वा समुद्वाहो नैते बालिकामपेक्षेरन्, प्रत्युत विधवामेव यौवनवतीमङ्गीकुर्युरिति नात्र सन्देहलेशोऽपि। ततश्च यावतीनां विधवानामुद्वाहः संपद्येत,तावत्यः कन्यका विनैव विवाहमवश्यमवतिष्ठेरन्। एवंविधायां चावस्थायां संदृष्टरजस्कास्वेतासु गरीयानेव दोषः सम्भवेत्। दूरे तावदास्तां धर्मशास्त्रोहितो दोषः। लौकिकोऽपि ह्येतासां न खलु न घटेत दोषो नाम। तथाहि—अशक्यः किल धारयितुं वेगः कामस्येति प्रतिपद्यते किलेदं नव्यैः, तत एव च वाञ्छन्त्यमी युवतीनां विधवानां पुनरुद्वाहम्। यदि च न शक्यः सोढुं यौवने कामावेगस्तदा कथं वा समुच्छलति यौवने शक्यतामसौ विसोढुं कन्याभिरिति स्वयमेव तावद्विचार्यतामेतन्मतिमद्भिः। न हि विधवानामेव कामो दुर्वारो न पुनरविधवानां युवतीनामिति कथंचिदप्यभिधातुं शक्यम्, प्रमाणाभावात्। कामवेगस्य च दुर्निवारत्वे यैव गतिः संभाव्यते युवतीनां विधवानां समाजसंस्कारकामुकैर्नव्यैः, सैवाविशङ्कमेव कन्यानां स्यात्। अर्थान्निगूढमेव प्रचरेदेतासु व्यभिचारः। प्रवर्तेरंश्च हत्या भ्रूणानाम्। भज्येरंश्च सेतवः सर्वेऽपि। एवंच विधवानां व्यभिचारवारणे प्रवृत्तस्य कन्यासु तत्प्रवृत्तिर्दुर्वारेत्येकं सन्धित्सतोऽपरं प्रच्यवति। अतश्च नैवोचितो विधवानां पुनरुद्वाह इति लौकिक्याऽपि दृष्ट्या स्फुटीभवति। पुंसां बहुविवाहस्याऽप्यत एव न्याय्यत्वम्। तथाऽपि तदेतदन्यदा वक्ष्यामः। तदेवं नोचितः पुनरुद्वाहो विधवानामिति सिद्धमित्यलं बहुनेति।

[विधवाधर्मपर्यालोचनेनापि तद्विवाहस्यायुक्तता]

एतावता च साधितं विधवोद्वाहस्याशास्त्रीयत्वं चानर्थहेतुत्वं च युक्तिविरुद्धत्वं चाऽस्माभिः। सम्प्रति पुनर्विधवाविषये समुद्भाव्यमानानाक्षेपान् परिहर्तु मिच्छामः। आसीत्किल पूर्वं विधवानामनुगमनप्रथा भारतीयेषु। एषा पुनरतिमात्रं नैष्ठुर्यमेतेषामावेदयतीत्यर्वाचीनाः प्राहुः। वस्तुतः पुनर्नैतदेवम्। न खलु कदाचिदपि विधवा कदाचिदपि केनाऽपि बलादेवाऽनुगामिताः, येनास्याः प्रथाया नृशंसत्वमनुमीयेत। किंतु पत्यौ प्रणयातिशयेन तद्वियोगानलज्वालाजालतापमसहमानाः पतिप्रणयमात्रप्रचोदिताः पतिलोकमात्राऽभिलाषिण्यः शास्त्रे च श्रद्दधानाः सानन्दमेव जुहवाञ्चक्रुः पत्युश्चितानले शरीरमात्मीयम्। ततश्च पत्यावनुरागातिशय एव नारीणामित्थं व्यचेष्टिष्ट, नैव पुनरन्यत्किमपीत्येतदेवाऽनुमीयतेऽस्माभिः शास्त्रकृद्भिरपि न ह्यनुगमनं नित्यतया विधीयते। स्मर्यते हि प्रेते पत्यौ नारीणां ब्रह्मचर्यमपि। न केवलमेतावत् किंतु ब्रह्मचर्यमेव प्राधान्येन विधीयते। 'मृते भर्तरि ब्रह्मचर्यं तदन्वारोहणं वा' इति, अत्र वचने ब्रह्मचर्यमेव प्रथमतो निर्दिष्टम्। प्रधानस्यैव प्रथमतो निर्देशो भवति नाप्रधानस्य। तत एव च प्रतीयते मृते भर्तरि नारीणां ब्रह्मचर्यस्यैव प्राधान्यमिति। अन्वारोहणं पुनर्न प्रतिषिद्धम् किन्तु वैकल्पिकतया विहितम्। विकल्पश्चायं न व्यवस्थितः; प्रमाणाभावात्। किं तु सोऽयमैच्छिक एव ततश्च सत्यामिच्छायामन्वारोहेत्। ब्रह्मचर्यं वा तदभावे समाचरेदित्येतावानेवार्थः पर्यवस्यति। प्रशस्यते च ब्रह्मचर्यं मन्वादिभिः।

मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता।
स्वर्गं गच्छत्यपुत्राऽपि यथा ते ब्रह्मचारिणः। इति

यथा च वैकल्पिकत्वेनाऽग्न्यन्वारोहणं विधीयते, न पुनरेवमन्वारोपणम्। अतश्च मृते भर्तरि तत्सम्बन्धिन एव तत्स्त्रियमन्वारोपयामासुरित्यर्वाचीनानां कोलाहलो निर्मूल एवेत्यवबोध्यम्। प्रतिषिद्धा च प्रथेयं सम्प्रति दयावशंवदैः साम्प्रतिकैरनुशास्तृभिरिति नात्र विषये किमपीदानीं वक्तुमावश्यकम्। तद्धि केवलं तुषपेषणमेवेति। प्रतिषिध्यतां नामेयं प्रथा फिरङ्गैरनुशास्तृभिः, तथाऽपि विशुद्धं पतिप्रेम भारतीयवनितानां क्वचित्क्वचिदर्पयति पदमनुगमनाध्वनीति नात्र सन्देहः। एता हि मृते भर्तरि क्षणमपि वियोगमदसीयं विसोढुमप्रभवन्त्यः सपदि विजहति प्राणानिति। न चैतत्परोक्षं कस्याऽपि। श्रूयते प्रतिवत्सरं हि द्वित्राणामपि भारतीयसाध्वीनां चरितमेतादृशमिति। एता हि मृते भर्तरि निःसारमिव शून्यमिव जीर्णमरण्यमिव निरालोकमिव निरुत्साहमिव च जगदेवक्षन्ते। मन्यन्ते च त्याज्यानेव पतिविरह आत्मनः प्राणानिति। एवं च दयितप्रेमपाशसन्दानितानां नारीणां स्वेच्छया प्राणपरित्यागे प्रवर्तमानानां स्वाभीष्टाऽनुष्ठाने तत्सम्बन्धिषु नृशंसत्वाद्यारोपोऽज्ञानमात्रमूलक एवेति नात्र सन्देहः।

ब्रह्मचर्यमपि सम्प्रति साध्वीभिरनुष्ठीयमानमुत्कोपयति केषाञ्चिन्नव्यभव्यानां शिरःशूलम्। एते हि संभावयन्तः सुदुःसहत्वमेतासां कामवेगस्य 'नोचितं ब्रह्मचर्यम्' इत्यपि प्रलपन्ति। उपन्यस्यते चात्र युक्तिवादोऽप्येतैः। तथाहि — यदि तावन्मृतायां सहधर्मिण्यां पुनः परिणीयते पुरुषैस्तदा किमिति दिवं गते भर्तरि ब्रह्मचर्यमनुपालयतां नारीभिरिति। साधयन्ति च युक्त्याऽनया नारीणां ब्रह्मचर्याभावस्यैव न्याय्यत्वम्। अपरे पुनः प्रशंसन्ति ब्रह्म-

चर्यमेतासाम् । किं तु तत्र चेन्न सामर्थ्यं तदा निर्विशङ्कमेवाऽनुष्ठेयः पुनरुद्वाह इत्याहुः ।

प्रमाणपरतन्त्राः सङ्करभीरुकास्तु नैतासां ब्रह्मचर्याभावं कथंचिदप्यनुमन्यन्ते 'न तु नामाऽपि गृह्णीयात्पत्यौ प्रेते परस्य तु' इति मन्वादिभिर्विधवायाः पत्यन्तरकरणं प्रतिषिद्धम् । 'अनन्यपूर्विकां कान्तां' इति कन्यां विशेषयद्भिश्च याज्ञवल्क्यादिभिश्च विधवायाः पाणिग्रहणं प्रत्याख्यातम् । एवं च विधवायाः पुनरुद्वाहे पुनरूढा च पुनर्विवाहयिता चेति द्वावपि शास्त्रातिक्रमकारिणौ निरयगामिनावेवेति संसिद्धम् । प्रपञ्चितं चैतत्प्रागेवास्माभिः । यस्य च प्रमाणं शास्त्रम्, नासौ पुंसां बहुविवाहे प्रत्यवतिष्ठेत ; शास्त्रस्यैवं विधेषु विषयेषु निर्णायकत्वात् । उक्तं हि 'तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।' इति । येषां तु नास्ति शास्त्रे विश्वासस्तेऽपि कन्यास्रष्टेर्भूयिष्ठत्वमवेक्षमाणाः पुंसां चाल्पत्वं प्रतिपद्यमाना निगृह्णन्त्वभिनिवेशमात्मीयमिति प्रोच्यतेऽस्माभिः । यथा चैतत्तथा विशदीकृतमेव प्रागस्माभिः ।

न च नारीणां ब्रह्मचर्यानुष्ठानं दुष्करमेवेति भ्रमितव्यम् । शास्त्रोदितेनाध्वना प्रवर्तमानानामेतासां ब्रह्मचर्याऽनुपालनस्यातिमात्रसुकरत्वात् । तथैव किल विहिताः शास्त्रेषु विधवानां धर्माः, यथा ब्रह्मचर्याऽनुपालनं नैतासां दुष्करं स्यात् । कामवेग एव हि ब्रह्मचर्यं विघातयति । कामश्च रजोगुणसमुद्भव एव । तथाह्युक्तं भगवता 'काम एष क्रोध एष रजोगुणसमुद्भवः' इति । ततश्च रजोगुणप्रतीकार एव कामं क्षपयेदित्यवश्यमभ्युपेतव्यम् । सत्त्वगुणस्य चाभिवृद्धौ रजोगुणः स्वयमेव तिरोभवति । तदेतदेवाऽनुविचिन्त-

यद्भिः शास्त्रकृद्भि सत्त्वगुणोत्पादनक्षमा एव विहिता विधवानां धर्माः समाचर्यन्ते सम्प्रति साध्वीभिः। यत्र च संलक्ष्यते रजोगुणोद्भासः त्र केवलं स्वधर्माऽनुष्ठानमेवैतासां बीजम्। अतश्च संलक्ष्यते क्वचिद्विधवानां स्खलितमिति नोचितं ब्रह्मचर्यमेतासामिति वचनमनर्हतममेवेति बोद्धव्यम्। स्खलितं च संलक्ष्य ब्रह्मचर्यप्रत्याख्यानमेकान्तत एवान्याय्यम्। अन्यद्धि निदानं स्खलितस्यान्यश्चात्र प्रतीकार इति॥ अज्ञात्वा च निदानमनारम्भः प्रतीकारस्येति नैतद्विस्मरणीयम्। यच्चात्र निदानं तदेव चेत् सुदूरतः परित्यक्ष्येत, तदा नैव पुनः संलक्ष्येरन् स्खलितानि विधवानामिति। निदानं चैतत्स्वधर्माऽननुष्ठानमेवेति। तदेव सुदूरतः परिहरणीयम्। अर्थादनुपालनीयाः स्वीया धर्मा विधवाभिः। ततश्चावश्यं शक्येत विसोढुं दुर्विषहोऽपि कामवेग एताभिः। अथवा स्वधर्मानुष्ठानेन सत्त्वगुणोद्रेके काम एवैतासां मनसि नोत्पद्येत। ततश्च विनैव प्रयासं दूरीभवेयुः स्खलितान्येतासामिति।

सम्प्रति पुनः कलिकालवशाद्वा शास्त्रगौरवस्य व्यपगतप्रायत्वाद्वा विरलविरलमेवालक्ष्यते विधवानां स्वधर्माऽनुष्ठानम्। विशेषतश्च नव्यमताऽनुयायिनामेव। एते हि नैष्ठुर्यमेवेत्यात्कलयन्तो नैतासां स्वधर्मानुष्ठानमनुमन्यन्ते। अत एव न केवलं न मुण्डयन्ति मूर्धानं प्रत्युत वेश्या इव सविशेषमेव प्रसाधयन्ति केशानेताः, "विधवाकबरीबन्धो भर्तृबन्धाय जायते, इत्यादीनि च शास्त्रवचनानि तृणाय मन्वानाः समारचयन्ति कामिजनमनोविमोहनान्धम्मिल्लान्। परिदधति तलिनतलिनानि स्वैरिणीमात्रोचितानि वसनानि। न किल न धारयन्त्याभरणानि, प्रविशन्ति यात्रासु। संलपन्ति परैः पुरुषैः। समाचरन्ति च घन-

तरममीभिः संसर्गम् । अन्तरमुखत्वमापन्नाश्च पठन्ति निगूढं वा प्रकाशमपि वा शृङ्गारैकरसानुपन्यासात् । पश्यन्ति रूपकाणि । शृण्वन्ति सङ्गीतम् । आसेवन्ते ताम्बूलम् । भुञ्जते मिष्टान्नम् । रोहन्ते हंसतूलमृदुलासु शय्यासु । आजिघ्रन्ति कुसुमानि । बहु मन्यन्ते पुरुषसम्वासम्, सत्येवं कुतो वा भवतु सुसहत्वमेतासां कामवेगस्य ? आचरितं ह्येवंविधं क्लीबानामपि मनसि कामं जनयेत् । किमु पुनरपरेषाम् । न चैतन्निष्प्रमाणमेवेति भ्रमितव्यम् । एवं हि प्रोच्यते आयुर्वेदविदां प्रवरैः । तथाह्युक्तम् श्रीमता लोलिम्बराजेन—

ताम्बूलं मधु कुसुमस्रजो विचित्राः
कान्तारं सुतनु ? न वा विलासवत्यः ।
गीतानि श्रवणहराणि मिष्टमन्नम्
क्लीबानामपि जनयन्ति पञ्चबाणम् ॥ इति ॥

अत एव चानुचिन्तयद्भिरिदं विहिता विधवानां तथाविधा धर्माः शास्त्रेषु परेशेन, यथा नैताः कथंचिदपि स्खलितं विन्देयुरिति ।

एवं च स्वधर्माननुष्ठानमेव विधवानां स्खलिते निदानं नैव पुनर्विधवानां धर्माः, नापि वा तदीय आचार इति निःशङ्कमेव स्थिरीभवति । अतः परं विधवानां धर्मानभिधाय तेषां युक्तायुक्तत्वमालोचयिष्यामः, तत्रेदानीं प्रवर्तामहे ।

यदा किल नांशतोऽपि प्राविशन्नव्यसंस्कारसमीरणोऽस्मिन् धर्मैकजीविते, भारते वर्षे न किल तदा विधवानां स्वैराचारः प्राधान्यमवाप । प्रतिषिद्धं हि तासां स्वातन्त्र्यं धर्मशास्त्रेण । न चासीत्पुरा धर्मशास्त्रप्रतिषिद्धार्थे प्रवृत्तिः कस्याऽपि भारतवर्षीयस्येति । प्रतिषेधति किल धर्मशास्त्रं भर्तृविप्रयुक्तानां नारीणां पित्राद्यन्यतमवियोगम् । यथा याज्ञवल्क्यः—

पितृमातृसुतभ्रातृश्वश्रूश्वशुरमातुलैः ।
हीना न स्याद्विना भर्त्रा गर्हणीयाऽन्यथा भवेत् ॥' इति।

भर्त्रा विना पतिशून्या विधवेत्यर्थः । पित्रादिभिर्हीना वियुक्ता न स्यात् । पित्राद्यन्यतमस्य सन्निधौ वर्तेतेति भावः । अन्यथा गर्हणीया निन्द्या भवेत् । एष खलु पित्रादिवियोगनिषेधे हेतुः । यथा पतिरात्मनो भार्यायाः स्वैरिणीत्वं न कामयते, एवं पित्रादयोऽप्यात्मनः कन्यादीनां पांसुलात्वं नाभिलष्यन्ति। स्वैरिणीत्वमेव च नारीणां प्राधान्येन गर्हाहेतुः । तत्परिहारश्च न हि विधवानां सर्वथा स्वातन्त्र्ये सुघटः । अत एव चानुशिष्यते पित्रादिसान्निध्यमेतासां मुनिभिः । पित्रादिसान्निध्ये तदाज्ञानुपालनं स्त्रीणामावश्यकं भवति । अनुपालितायां च पित्रादीनामाज्ञायां न हि स्वैरिणीत्वमेतासां कदाचिदपि घटेतेति । सम्प्रति पुनर्विपरीतमेवैतदालक्ष्यते । न खल्विदानीं विधवानां पित्रादिसान्निध्यमभीप्सितं भवति । स्वातन्त्र्यमेव ह्येताः कामयन्ते । अक्षरमुखत्वमापन्नाश्च प्रायेण तृणाय मन्यन्ते गुरुजनानेताः । का पुनः कथा कनीयसां भ्रात्रादीनां पितरमपि नन्वेता अवहेलयंत्येव । यद्यत्किल प्रतिहन्ति मनोरथमात्मीयं तत्तत्सुदूरतः परिहर्तुमीहन्ते । तत एव च न रोचते गुरुजनादेश एताभ्यः । नचापि सुहृज्जनोपदेश एतासां स्वदते । स्पृहयन्ति खल्वेताः परपुरुषसंल्लापाय । अनुशासति किल भारतवर्षीया नीतयः 'घृतकुम्भसमा नारी तप्ताङ्गारसमः पुमान् ।
तस्माद्घृतं च वह्निं च नैकत्र स्थापयेद्बुधः ।' इति ।

न केवलं विधवानाम्, अपि तु, सभर्तृकाणामपि स्त्रीणां परपुरुषसम्पर्कं प्रतिषेधति नीतिगतमिदं वचनम् । नास्ति किल तथाविधोऽनाचारसम्भवः सभर्तृकासु यथाऽयं भर्तृशून्यासु। तथाऽपि निरा-

क्रियत एतासां परपुरुषसंसर्गो नीतिग्रन्थैः । विधवानां पुनश्चिरमेव भर्तृ विप्रयुक्तानां नांशतोऽप्युचितः परपुरुषसंसर्ग इति नैतद्वक्तुमावश्यकम् । चिराय ह्यनधिगतविषयाणि प्रक्षुभ्यन्तीन्द्रियाणि पुनस्तद्विषयाधिगम इति । अतः सुतरामेव प्रतिषेध्य एतासां परपुरुषसम्पर्क इति । न च विद्वांस इति श्रद्धयाऽपि कस्यापि पित्रादिभिन्नस्य सविधेऽवस्थापनीया विधवा केनाऽपि, बलवानिन्द्रियग्रामो विद्वांसमपि कर्षतीति हि प्राहुः । सम्प्रति पुनःप्रेते पत्यौ प्रविशन्ति विद्यामन्दिराणि काश्चित्स्वतन्त्राप्राया विधवाः । अधर्मश्चायमेतासाम् । न खलु वयं ब्रूमो निरक्षराभिरेव नारीभिर्भवितव्यमिति । किं तु विद्यामन्दिरप्रवेशं विशेषतश्च परपुरुषसंसर्गमेतासां नाभिनन्दामः । स चायं विद्यामन्दिरेष्ववश्यंभावी । प्रतिषिद्धश्चैतासां विद्यामन्दिरप्रवेशो धर्मशास्त्रेण । तद्धि एतासामध्यापकविशेषत एवाध्ययनमनुशास्ति । तथा हि यमः—'पतिः पिता वा भ्राता वा नैनामध्यापयेत्परः' इति । न चैतद्विद्यामन्दिरेषु संघटते । तत एव च नेष्यते तत्र प्रवेश एतसां धर्मैकप्राणैः । जानीमः किल वयं मतमेतदस्माकमवलोकमाना समुदञ्चेयुः स्मितं नव्यसंस्कारप्रिया इति। तथाऽपि न किल तावता परमार्थमपह्नोतुमिच्छामः । प्रार्थयामहे च दूरतस्तावत्प्रक्षिप्यतां दृष्टिरमीभिरिति । येनावगम्येत प्राचां मुनीनां मतरहस्यम् । न किल मुनयो नामास्मादृशो लौकिकाः । नाप्यमीषां स्त्रीषु प्रद्वेषः समभूत् । प्रत्युतासीद्वरीयानादर एव । तत एव च ता इव जगतश्च हितमभिलष्यन्तः समादिशन्नेते 'न किल स्वतन्त्राभिर्भवितव्यं नारीभिरिति' । पित्रादिभिरधिष्ठितानां पुनर्विधवानां नास्ति घनतरस्य संम्भवः । तत एव चानुशिष्टं शास्त्रेण 'पितृमातृसुतेत्यादि ।

सम्प्रति खलु नांशतोऽपि विषह्यते नव्यशिक्षितैर्विधवानां वपनम्। एतद्धि क्रौर्यमित्याचक्षत एते। तत एव च सुदूरमेव परिहर्तुमीहन्ते तद्विधायकानि वचनान्येते। तद्धि परित्याज्यमेवैतेषां यन्नात्मनो मनोरथस्याऽनुकूलं भवति। धार्मिकाः पुनः शास्त्रैकजीविताः स्मरन्तश्च 'तस्माच्छास्त्रं प्रमाणं ते कार्याऽकार्यव्यवस्थितौ, इति भगवतो वचनं विदधत्येव विधवानां वपनम्। न खल्वेते न जानन्ति सौन्दर्ये विशेषाधायक एव नारीणां केशपाश इति॥ एतेन हि स्वमनोरथाऽनुकूलं प्रसाधितेन हृदयापहारितामापद्यते सौन्दर्यं नारीणामिति। तथाऽपि नेष्यते केशकलाप एतासां शास्त्रैकजीवितैर्भारतवर्षीयैरुन्नतजातीयैः। नार्योऽपि भारतवर्षीया विशेषतश्च नव्यमतानुयायिभिरसंसृष्टा "प्रियेषु सौभाग्यफला हि चारुता, इत्येवावगच्छन्ति। न चाप्येतासां भर्तारमन्तराऽन्यः कोऽपि प्रियो भवति। तत्किंवा चारुतापादकेन केशकलापेनेत्याकलयन्त्यः स्वयमेव परित्यजन्त्येनम्। सति ह्यस्मिन् समुत्पद्येत कदाचिदेतत्प्रसाधनाभिलाषो मनसि। प्रसाधितेषु चैतेषु सविशेषमेव समुद्भासेत मुखसरोजम्। उद्भासितं चैतत्कामिजनलोभनीयतामापद्येत। विकिरेयुश्चात्र दुराशयगर्भितां दृशं कामिनः पुरुषाः। भूयो भूयो विकीर्यमाणा चेयमसत्यप्यभिलाषे दूषयेन्मनः स्त्रीणाम्। यदर्थं च प्रसाध्य केशानुद्भासनीयं मुखकमलमापादनीयं च हृदयहारि सौन्दर्यं स एष दयित एतासां दिवं गतो भवति। तत एव च न केवलमकिंचित्करः प्रत्युतानर्थावह एव केशपाश इत्यवधारयन्त्यः स्वयमेव परित्यजन्त्येनं साध्व्यः। तदत्र स्वयमेव तावत् पृच्छयन्तां धर्मानुगामिन्यः काश्चिदपि वि-

धवा एतैरित्येव संसूच्यतेऽस्माभिः। अत्र च प्रसङ्गात् विचारत्रयमपि संगृह्यते।

"आचार्याय प्रियं धनमाहृत्य प्रजातन्तु मा व्यवच्छेत्सी"रिति प्रजातन्तवे सति विवाहे तन्मूलानीति मन्यन्ते विधवायास्त्रीणि दुःखानि पतिपुत्रान्यतरानाश्रयत्वं निर्धनत्वं कामपीडा चेति स्पष्टं दृश्यन्ते। तत्र प्रजाद्रविणदुःखावकाशो नास्तीति श्रुतिराह। यथा तैत्तिरीयारण्यके षष्ठाध्याये मन्त्रौ सहगमनप्रकरणे और्ध्वदेहिककर्मकर्तृदेवरशिष्यजरद्दासान्यतमवक्तव्यौ 'इयं नारी पतिलोकं वृणाना निपद्यत उपत्वा मर्त्य प्रेतम्। विश्वं पुराणमनुपालयन्ती तस्यै प्रजां द्रविणं चेह धेहि ॥ १ ॥ उदीर्ष्व नार्यभिजीवलोकमितासुमेतमुप शेष एहि। हस्तग्राभस्य दिधिषोस्त्वमेतत्पत्युर्जनित्वमभिसंबभूव ॥ २ ॥ विवृतिः—इयं त्वया सह जिगमिषन्ती नारी नरस्य धर्म्या विवाहप्राप्तधर्मेभ्योऽनपेताऽत एव पतिलोकं वृणाना पत्या कर्मयोगिना संपादितं लोकं लब्धुकामा हे मर्त्य मरणधर्मन्, प्रेतं परलोकं गच्छन्तं त्वा त्वां उप अनु निपद्यते म्रियते समीपं गतेति वा ॥ तत्र हेतुः—विश्वं सम्पूर्णं पुराणं पुरातनं विवाहप्राप्तं धर्ममिडूर्ग्रायस्पोषमायोभव्यप्रजाश्चतुसंख्येति सप्तविधं साप्तपदीनं धर्ममनु त्वां परम्परां चानुसृत्य पालयन्ती अनुव्रतत्वादतस्त्वामनु निपद्यत इत्यभिप्रायः। तस्मै नारीत्वात्पतिलोककामायै प्रजां त्वत्संपादितां द्रविणं च तथाविधमिहास्मिन्नेव लोके धेहि देहि। अयमेवावकाशः प्रजाधिपत्यरायस्पोषयोः प्रतिज्ञातयोर्विवाहे साफल्यस्य। अस्मिन्नेव लोके पतिसंपादितप्रजाद्रविणलाभे पतिलोकः संपादित एवेत्यभिप्रायः। तदस्य धर्म्यामित्यधिकारे 'ऋतोऽञिति' सूत्रे वार्तिकं 'नराच्चेति वक्तव्यमि'ति तत्रोदा-

हृतं नरस्य धर्म्या नारीति ॥ १ ॥ इत्थं पत्नीं प्रशंसापूर्वकं पत्युरनुज्ञया प्रजाधने भुञ्जानायाः पतिलोकवास एवेति प्रतिलोभ्य पतिप्रेतसमीपसुप्तां तामाह्वयति उदीर्ष्वेति । हे नारि नरधर्म्ये, इतासुं गतासुमेतं पतिमुपशेषे पाणिग्रहणसंप्रतिपन्नमैक्यं स्मरन्ती अतः परमुदीर्ष्व उत्तिष्ठोत्थापनाय प्रेरय वा अभिजीवमाम्रियस्व लोकं पतिसंपादितमेवेममेहि त्वां पालयिष्यामि जीवनसामग्रीमतीमित्यभिप्रायः । परावर्तने हेतुः—त्वं परावृत्य सहगमनाज्जीवन्त्यपि हस्तग्राभस्य गृहीतहस्तस्य दिधिषोः पालयितुमिच्छोः पत्युरेवासि न पतिमृतिः स्वत्वनिवृत्तिहेतुः पिपालयिषाया अनिवृत्तेरिति । तत्र हेतुमाह । एतत्ते जनित्वं जन्मजनिरेव जनित्वं देवताजनतादिवत् पत्युः अभि सर्वप्रकारैः संबभूव विवाहकाल एव । 'न निष्क्रयविसर्गाभ्यां भर्तुर्भार्या विमुच्यते, 'यो भर्ता सा स्मृताऽङ्गनेति' च स्मृतेः । मरणमपि विसर्गसदृशम् । पत्या सहाभेदमापन्नायास्ते जीवनं पत्युरेव रूपान्तरमापन्नस्य । अतस्तवात्र निवासो न परलोकविच्छेदहेतुः ; यतः पत्युः तत्र निवसतोऽप्यत्र वासः, तवात्र निवसन्त्या अपि तत्रैव वास उभाभ्यां रूपाभ्यां लोकद्वयसंपादितमयमपि परोपि लोकः पत्युरेव यदि ते जीवितेच्छा तर्हि जीवेत्यभिप्रायः । अथवा जनित्वं पत्नीत्वं; एतत् तद्वितीर्णप्रजाधनादिभोगरूपं संपन्नं बभूव । अथवा एतत् अत्र शयनान्तं कर्म यत्ते पत्नीत्वमभिसंबभूवेति ते जीवनं न पत्नीत्वविरोधीत्यभिप्रायः । न रूढ्यर्थस्य दिधिषोरत्रोपस्थितिस्तदानीमेतस्या दिधिषूत्वाभावात् । भाविवृत्त्याश्रयणे मानाभावाच्च । सहगमनान्यथानुपपत्त्या कामपरीक्षाविनियुक्तयोर्मन्त्रयोर्नोत्थापनविधिपरत्वम् । अतएव न पुनर्विवाहपरता । अत एव दिधिषोरपांक्तत्वमिति दिक् ।

नन्वद्दीर्ष्वेति लोटोत्थापनं विधीयत इति चेदनुत्थापनफललेख-वैयर्थ्यापत्तेः। अनुज्ञा तु व्यज्यते। नारीति संबोधनान्नरस्योपस्थितस्य पत्युर्धर्म्येति व्युत्पत्तेर्नानुपस्थितदिधिषो रूढार्थस्य स्वत्वं युक्तं रागप्राप्तत्वादधिकाराच्च। प्रथमोपस्थितनारीशब्दगर्भेण बलीयसा दिधिषुशब्दगर्भो रूढ्यर्थो विस्रंसितः। नच दिधिषुशब्दानुरोधेन नारीशब्दे लक्षणा वक्तुं शक्या। शब्दशक्त्या रूढ्या वानुरुध्यमानस्य दिधिषोरप्रवेशान्नारीशब्दे धर्म्यांशत्यागे मानाभावात्। पुंयोगप्रत्यये तु नरीत्येव। जातिवाचकत्वे प्रजाद्रविणप्रार्थनायां न बलम्। तस्मान्नरस्य धर्मेत्येवार्थोऽत्र मन्त्रयोः। 'डुधाञ् धारणपोषणयो' रित्यस्मादिच्छायामेव सन्। अत एव 'नोद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्यते क्वचित्। न विवाहविधावुक्तं विधवावेदनं पुनरिति' मनुः। तस्माद्दिधिषुशब्दबलात्पुनर्विवाहकल्पना निरस्तेति दिक्।

नन्वयमर्थोऽस्तु मनुसम्मतः, पुनः पतिविधानवक्तुः पराशरस्य तु न संमतस्तस्मान्मन्त्रद्वयं दिधिषुस्वत्वविधायकमेवेति चेन्न; असंभवार्थापत्तेः। नहि सहागमनसमये तस्या दिधिषुस्वत्वसंभवः। न च दिधिषुरेवानेन विधीयत इति वाच्यम्; मृते भर्तरि दिधिषुविधानेऽपि नष्टे प्रव्रजिते क्लीबे पतिते च पत्यौ दिधिषुविधानादर्शनात्स्वयं विधातुमशक्यत्वादिदं वचनं काल्पनिकमित्येव युक्तम्। 'यद्वै मनुरवदत्तद् भेषजमिति श्रुतिं जानन् पराशरः सर्वज्ञो भूत्वा धर्मं कथयन् श्रुतेरसंभवार्थं स्मृत्यन्तरविरुद्धं कथं ब्रूयादिति विचार्यम्॥ ननु स्वतन्त्रा ऋषय इति चेत्स्वतः प्रामाण्यापत्तेः। तस्मान्मनुवच्छ्रुतिमनुसरता पराशरेण वक्तव्ये कथं प्रसिद्धदिधिषुपरता? अनयैव श्रुत्या पिपालयिषौ शक्तो द्वितीयपतौ निरूढो

दिधिषुशब्द इति विज्ञेयम् । नष्टे मृते इत्यादिकारिकाभिनिवेशे सत्यपि 'यस्या म्रियेत कन्यया वाचा सत्ये कृते पतिः । तामनेन विधानेन निजो विन्देत देवरः, इति मनूक्तमनुसृत्य व्याख्येया । नष्टे मृत इत्यत्र पतिशब्दो वाचाङ्गीकृतपरो विज्ञेयः । तस्मान्न पुनर्विवाहगन्धोपीत्यलं विपश्चितस्तुष्यन्तु ॥

ननु प्रथमविवाहसंकल्पसिध्यर्थं पुनर्विवाहस्तत्रास्यां जनिष्यमाणसन्ततेः कुलोद्धारकत्वब्रह्मलोकहेतुत्वोल्लेखात्सन्तत्युत्पादनार्थं पुनर्विवाहस्तेन निर्दिष्टफलद्वयसिद्धिरिति चेत्तस्मिन्नेव कन्यादानसंकल्पेऽस्यां जनिष्यमाणसन्तत्येति यथोहस्तथास्मादित्यप्यूहो वेद्यः । अतएव तुभ्यमहं संप्रदद इति संकल्प्यते, नहि कस्मैचिद्वरायेति । एतेनास्मात्संकल्पात्कन्याया वन्ध्यात्वे वा दातुस्तुल्यं फलम् । यस्मात्पत्युराज्ञायां वा दत्तकपुत्रग्रहणाधिकारो निर्बाधः पुत्रग्रहणाधिकारः पत्युरपि विवाहमूलः ॥ ननु श्रुतौ दिधिषुशब्दो व्यर्थ इति चेद्भवन्मते नारीशब्दो व्यर्थस्तस्माद्दिधिषुशब्दस्य पोषकपतिपरत्वेन कृतार्थत्वान्नारीशब्दस्य नरधर्म्यपरत्वं युक्तम् । ननु न सामान्यायाः सहगमनं युक्तम्, सामान्यात्वात्तस्माद्धर्म्यायामेव दिधिषुविधानं मन्त्रार्थ इति चेदुच्यतां किमनेन सामान्यात्वं विधीयते धर्म्याया अपि ? यदि विधीयत इति ते मतम्, तदा दिधिषूत्वमनङ्गीकुर्वाणायाः किं प्रायश्चित्तं शास्त्रदृष्टम्? विवाहे तु तादात्म्यापादनसंपादितं नारीत्वं संपादयिष्यमाणं रागप्राप्तं दुर्बलं दिधिषूत्वं बाधेत न वा । तस्मात्तादात्म्येनोढा नारी यथाकथञ्चिदूढा नारीति व्यवस्थितम् ॥

जातिवाचकस्तूढानूढसाधारणोऽत्र मन्त्रेऽप्रयोजकः । वैदिकानामेष विवाहक्रमः सप्तपद्यधिकारदानाधिकारसिद्ध्यर्थं तादा-

त्म्यापादनमृक्सामवत्, इतरेषां विवाहस्तु सप्तपदीरहितस्ततोऽधिकारहितस्तादात्म्याभावादतस्तेषु पुनर्विवाहो युक्तः। अवैदिका अपि केचिच्छिष्टा विवाहो नाम तादात्म्यापादनं पतिरेव परायणमिति जानन्तो न संमन्वते पुनर्विवाहम्। येषां दिधिषूत्वं संमतम्, तेपि विवाहमण्डपे न प्रवेशयन्ति ताम्। तद्बीजं त एव वर्णयन्ति नानुव्रतेयमिति। यैरनुव्रतोह्यते, तैः प्रतिज्ञायते धर्मे चार्थे च कामे च नातिचरामीति तां प्रतिज्ञां बलभावे स्थापयित्वाऽनुव्रता भवति पिण्डस्य छायेव तं पिण्डं कथमुत्सृजेत् धर्मे वैधेऽर्थे दाये कामे प्रजायाम्? यद्येतेषामतिचारः, किं विवाहेनातो मृतोपि प्रार्थ्यतेऽस्या एतावानधिकार इति। अत्र प्रजां द्रविणं च धेहि परलोकं चागमिष्यति कालेन यतोनुव्रता। पतिकर्तव्यमेतावदेव पत्नीविषये पश्चादपि प्रजाद्रविणवती यावता स्यादिति तदेव पतित्वम्। अतएव सूत्रे 'बुद्धिमते कन्यां प्रयच्छेदि'ति पठ्यते। अनिष्टपरिहारकुशलता बुद्धिः। ये तु विधवानां प्रजाद्रविणाधिकारो नास्तीति वदन्ति तैरबला वञ्चिता न वेति प्रष्टव्या याज्ञिकाः। अतएव भ्रातृमतीमुपयच्छेत्। भ्राता हि दायप्रतिबन्धनिवृत्तिहेतुः। विवाहसमये निर्बन्धः कः परिणामे सिद्धान्तः कः। उपक्रमोपसंहारान्वितं शास्त्रं भवति। पत्नीं दायादिनीं मत्वैव द्वितीयविवाहसमयेऽनुज्ञा प्रार्थ्यते लोके तदभावे तदभावः। सप्तपद्यानुव्रतत्वं विधीयते। यथा "इष एकपद्यूर्जे द्विपदी रायस्पोषाय त्रिपदी मायोभव्याय चतुष्पदी प्रजाभ्यः पञ्चपद्यृतुभ्यः षट्पदी सखा सप्तपदी भव सा ममानुव्रता भव। पुत्रान्विन्दावहै बहूंस्ते सन्तु जरदष्टयः' इति। इडन्नमूर्ग्बलं रैधनं मायोभव्यमारोग्यं प्रजा यथाशास्त्रमुत्पादिताः सुता ऋतवस्तत्तत्कालप्राप्तकर्माणि ऋतव

इति यावत्। सखा कथनमनपेक्ष्य हितकर्ता सर्वान्तरङ्गः। एते सप्ताधिकारास्तव यदि मामनुव्रता तस्मात्तथा भवेति विधिः। तस्याऽनुव्रतत्वस्य फले पुत्रान्विन्दावहा इत्यादि। पुत्रो नाम सशास्त्रः सन्कुलोद्धर्ता। 'पुंनाम्नो नरकात्त्राता पुत्र इत्यभिधीयत' इति स्मृतेः। इदं मुख्यं प्रयोजनं विवाहस्य। तत्र मामशङ्किष्ठा इत्याह ते सन्तु जरदष्टय इति। जरन्त्योऽष्टयः शरीरसंघाताः। 'अशू संघाते'। अनयाशिषैतद्व्यज्यते पुत्रसंपादनं विवाहफलं यथाशक्ति यतेऽहं मत्पश्चादपि जरदष्टिरपि पुत्रं संपादय दत्तकादिना। अतएव प्रजाधिकारः सफल इत्याशीरर्थः। अत एवानुसूयाऽत्रेः परोक्षमपि पुत्रीकृत्य त्रीनपि दत्तदूर्वासश्चन्द्रान्नापराधं भेजे तादर्थ्यविज्ञानादात्मनः। वन्ध्यात्वं च निवृत्तं तस्याः। गोत्रप्रवरान्वितः पुत्रः कुलमुद्धरति तस्मादुपदिष्टं गुरुभिः प्रजातन्तुं माव्यवच्छेत्सीरिति। तदुपदेशसिद्धं मदभिन्ना मद्गोत्रप्रवरान्वितपुत्रसंकल्पं पालय तेन मम तवापि कुलमुद्धृतं भवेदिति विवाहसमय एव निर्बन्धाद्विधिषुदुर्बलो गच्छतु शूद्रादिषु श्राद्धरहितेषु। इति॥ किञ्च—

विवाहादिरनादिर्मानुषधर्मः। अविवाहादिरनादिः पशुधर्मः। तथा पुरुषपारतन्त्र्यं स्त्रियो मानुषधर्मः, स्वातन्त्र्यं सममिति प्रत्यक्षः पशुधर्मः। धर्मार्थं स्त्रीति मानुषः, रत्यर्थमिति पाशवः। प्रजा धर्म इति मानुषः, सहजेति पाशवः। आस्मृति संबन्धो मानुषः, आकार्यं संबन्धः पाशवः। अतो मानुषसंबधो दुस्त्यजो मानुषाणामिति न भवितुमर्हति मानुषेषु पुनर्विवाहो मानुषेतरसंमतः। अनवच्छिन्नपरम्पराप्राप्तशिक्षावत्त्वं मानुषत्वं धर्मनीतिरक्षासमर्थमिति

लोकतन्त्रशास्त्रतन्त्रौ मिथः संभाष्य तुष्टौ प्राप्तकालनिरीक्षणाविस्मृतचित्तौ सर्वज्ञो व्यास इति स्मरन्तौ जग्मतुर्यथेष्टम् ॥

न च्यावयेच्छास्त्रमार्गादनादेर्मान्यसंमतात् ॥
नवं न रचयेन्मार्गमसर्वज्ञत्वनिश्चयात् ॥

श्रुतोऽयं धर्मो नयश्च। तथापि विधवानां दुर्जयकामपीडितानां का गतिः, यया तासां दुर्दशा निवर्तेतेति चेत्, अयं प्रश्नो दातुः प्रतिगृहीतुर्विधवाया वा ? आद्ये न दानाधिकारः, द्वितीये न प्रतिग्रहाधिकारोऽन्यस्वत्वेन प्रतिबद्धत्वात् उभयोस्तस्या अपि । किंच किमयं धर्मप्रश्न उत कामप्रश्नः ? आद्ये न धर्मः पुनर्दानानुपलब्धेः। द्वितीये न प्रश्नसंभवः। कया कामवत्या पतिसंख्येयत्तीकृता, संपादितेपि पुनः पत्यावपर्याप्तेः सुस्थत्वात्। अत एव पतयो रुदन्ति कुलटानां। ययैका संख्या बाधिता सान्यामपि बाधेत; कामतृप्तेर्दुरूहत्वात् ॥ ननु पुरुषवदातृप्ति विवाहक्रम इति चेत् ॥ उक्तं पूर्वं परस्वत्वप्रतिबन्धादिति स न पुरुषेऽन्तो बहुपत्नीकः॥ ननु "पतिरन्यो विधीयते" इति स्पष्टमुपलब्धं पुनर्दानम्, ततः पूर्वपतिस्वत्वं निवृत्तमिति चेत्, मृतपतिकानां दायाभावप्रसङ्गः। दायार्थं स्वत्वाङ्गीकारे न पत्यन्तरलाभः। यद्युभयमिष्टम्, तर्हि गोप्यं पत्यन्तरम्, प्रकटः पतिः पूर्वगोत्रं छिनत्ति तथा संबन्धं, ततो न दायलाभः। यदि गोत्रानङ्गीकारस्तदा तु सुतरां दूरे दायः; अपिण्डत्वात्। यासां न दानं तासां निबन्धानुरूपो दायः। कन्यानां पतिस्वत्वाय दानं तन्निवृत्त्यै घटस्फोटः। तस्मान्निवृत्तस्वत्वायाः पतिरपि तादृशो योग्यः। कोऽङ्गीकुर्यात्तादृशीं शिष्टः। तस्मात्पातित्यैकपद्धतिः पुनर्विवाहः। अथ तद्दुःखनिवृत्त्युपायश्चिन्त्यते। दुःखं कस्मात् विवाहादुत पतिमरणात् ? आद्ये विवाहो धर्मादुत

कामात् । आद्ये धर्ममूलदुःखस्य धर्मार्थत्वात् प्रतिक्षणमभीष्ट-सिद्धेः सर्वं सुखम् । द्वितीये विवाहमन्तरापि कामसिद्धिर्बहुषु स्थलेषु ततस्तत्राप्रयोजको विवाहः । दायार्थं चेत्, किं धनार्थिन्योपि दायमर्हन्त्यतिप्रसङ्गात् । मरणाच्चेत्, नास्त्युपायः ; शीलप्रतिबन्धात् ॥

किंच स्त्रियस्त्रिविधाः स्वकीयाः परकीयाः सामान्या इति ॥ स्वकीयास्वहानिः कामहानिर्धनहानिरिति तासां दुःखत्रयम् । क्रमास्त्वकीयात्वरक्षणमुपायः, यतो दायो धर्मः प्रतिष्ठेति सुखत्रयं प्रथमायाः; द्वितीयाया गुप्तपुरुषान्तरम्, यतो दायः कामश्च, तृतीयायाः स्वातन्त्र्यं, यस्माद्विपुलं धनं कामश्चेति त्रय उपायाः । यदि कश्चित् सामान्यायै दायं बलाद्दापयेत् तर्हि सामान्यातुष्टस्य बलात्कारोऽयं न न्यायः । यदि न्यायस्तर्हि सामान्यात्वं दायभाक्त्वं च नैकत्र धनस्वत्वस्य पतिस्वत्वमूलत्वात्तदभावात्स्वत्वाभावः । तस्माच्छीलरक्षणं विधवानां सधवानां वा सुखोपायः प्रसिद्धतमो निर्णीतः । तच्छीलरक्षणं पुरुषाणामपि सुखोपायः । अतएव गीतायाम्—

"स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः ।
संकरो नरकायैव कुलघ्नानां कुलस्य च ॥
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥
दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः ॥
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ।
उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन ॥
नरके नियतं वासो भवतीत्यनुशुश्रुम" ॥

तस्मात्स्त्रीपुरुषाणां दुःखोपस्थापनाय पुनर्विवाहस्थापनपुरुषार्थो

किमुदात्ताः किमनुदात्ताः किं स्वरिताः। त्रयोऽपि पुनर्विवाहे संमतिं न दातुमर्हन्ति नायकत्वात्पोषणासमर्थाः। तस्मात्प्रचयसामान्यासंमतः पुनर्विवाहो वर्णसंकराद्यनर्थहेतुः। तस्मात्संस्मरतु भगवान् स्वोक्तम्—

"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहं॥
परित्राणाय साधूनां विनाशाय च दुष्कृतां।
धर्मसंस्थापनार्थाय संभवामि युगे युगे॥"

इति वचनम्। श्रीशंकरश्च—

"धर्मग्लानौ सत्यां क्रन्दन्त्यां गवि सुरेषु चलितेषु।
धर्मस्थापनदीक्षादक्षस्त्वमतो वृषारूढः॥"

इति धर्मरूपवृषवाहनत्वहेतुं स्वाभिप्रेतम्। राजानोऽपि संस्मरन्तु सिंहासनारोहणपद्धतिम्, इतरेऽपि स्वस्वपरम्परामार्गम्। येन सुखभूयांसः शान्ता नन्दतु। इति॥

सर्वथा तु न विधवापुनर्विवाहोऽयं शास्त्रसम्मतः, न वा युक्तिसम्मतः, नापि वा लोकसम्मत इत्येवास्माकं प्रतिभाति। शास्त्राणि सर्वाणि तासामपि हि प्रेषणयैव तत्तादृशान् धर्मान् व्यवस्थापयन्तीति नात्र कस्याप्यनाश्वासः समुचितः। यथा च शास्त्रं न परिस्थितिमूलकं तथा पूर्वमेव व्यवस्थापितम्। इतिहासेन तु सत्यं पूर्वतनकाले कदापि विवाहोऽप्यासीदित्यवगम्यते। को नाम वदति न विधवाविवाहः पूर्वं संवृत्तः, न वा संवर्तते, न संवर्त्स्यतीति वेति। तत्रेदमेवास्माकं वक्तव्यम्—यन्नायमाचारः शुभाचार इति नामान्तरेण प्रकाशव्यभिचार एवेति च। नहि कोऽपि कमपि धर्माधर्मयो र्निग्रहीतुं पारयति। उक्तं हि भगवता—प्रकृतिं यान्ति

भूतानि निग्रहः किं करिष्यतीति । अत्र यद्यपि बहव एव वादिनः प्रतिवादिनश्च दृश्यन्ते । बहवश्च ग्रन्था अपि मुद्रापिता अमुद्रापिताश्च दृश्यन्ते । तथापि सर्वेषामपि विचाराणां विचारणीयविषयवाक्यं प्राधान्येन—नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ, पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते—इति पराशरवचनमेव । तत्रत्ययावदप्रकाशितकृष्णभट्टयादिदर्शने न कथमपि तच्छास्त्रीयतावादिनामनुकूलम्, किन्तु तदशास्त्रीयतावादिनामेवेति वयं पश्यामः । इतः परन्तु युक्तायुक्तविवेकनिपुणाः प्रियपाठकमहोदया एव प्रमाणमिति ग्रन्थविस्तरभयादत्रैव समाप्यते । समापनञ्च मधुरेणैव कृतं सहृदयहृदयाल्हादकमिति मत्वाऽत्रावसरे सहृदयहृदयाल्हादकानि श्रवणसुन्दराणि च विचारत्रयीगतान्येतदर्थपराणि वाक्यानि केवलं सङ्गृह्णीमः । तद्यथाः—कथमपि पुनर्विवाहो न प्रसज्यते ; उक्तप्रतिबन्धात् । को नाम भुञ्जीतान्यस्मै परिविष्टं तेन च स्वीकृतं श्वमार्जारमन्तरा ? दात्रा जलपूर्वं दत्तं प्रतिग्रहीत्रा सप्तपद्या गृहीतं परिषेचितान्नमिव नान्यभोग्यमिति न्यायः । किं भोक्त्रा त्यक्तमन्नमन्येऽपीच्छन्ति मनुष्याः सन्तः ? अतस्तद्भोगस्य सर्वासम्मतत्वात् पत्युरनन्तरं सौभाग्यपरित्यागो गृहमात्रसंस्थितिश्च सम्मता सम्भावितानां सभ्यानाम् । अत एव पत्या सहगमनं प्रशंसन्ति स्म वृद्धाः । पुनः पतिविधानवचनं सप्तपद्याः प्रागस्तु यथाकथञ्चिच्चरितार्थम् ? स्वस्वत्वापादकप्रतिग्रहसंस्कारस्य सप्तपद्यन्तत्वात् । वर्णस्वरयोरिव सम्पादिता सप्तपद्या मैत्री केन भेत्तुं शक्या केन वा वोढुम् । तस्मात् विवाहस्वरसमजानद्भिः पशुप्रायैः कामतन्त्रैरङ्गीकृतः पुनर्विवाहो विवेकशैथिल्यमूलः । किं सम्पादितं मानुषजनुष्मता, किं हान्यै समर्पितं पशुभिः, प्रवृत्तिताः एतन्येऽपि

विवेकसाम्यात्। एवं स्थिते न्यायपथे कः काचपात्रं पुनरुद्वाहस्येति वदतु भवान्। अथवा "पतिरन्यो विधीयते" इत्यत्रान्यशब्दो देवरपरः। "द्वितीयो वरो देवरः" इति निरुक्तात्। स च पत्युरनुजे रूढः। स च कलिवर्ज्यः। एतेनैतद्वचनं युगान्तरविषयम्। कथमपि नैतद्वचनं पुनर्विवाहप्रतिपादकम्। दत्तदानायोगादविभागेनाङ्गीकृतत्यागायोगाल्लज्जाभारस्थगितत्वादद्यपर्यन्तं निरुद्धः पुनरुद्वाहः।

न ग्राह्यत्वं न देयत्वं स्त्रियः पत्युरनन्तरम्
न दाता न ग्रहीता वा न पाणिग्रहणं पुनः॥

विधवामुद्दिश्य स्नातकोपस्थानप्रसङ्गे दत्तादानप्रसङ्गे स्वीकृतत्यागप्रसङ्गे लज्जावार्तादूरसङ्गे च भविष्यति पुनरुद्वाहः शिक्षकाभावात्। यतः—

सकृज्जल्पन्ति राजानः सकृज्जल्पन्ति पण्डिताः
सकृत्कन्याः प्रदीयन्ते त्रीण्येतानि सकृत्सकृत्॥
किं मृतेनापि संत्यक्तः पाणिर्विधिनिपीडितः
किं छद्मिनौ दुर्बलौ वा वक्तारौ राजपण्डितौ॥

शिक्षाकालमपेक्ष्याष्टमादिद्वादशान्तं च प्रवृत्तो दानकालोऽतिगम्भीरः प्राक्तनव्यवहारो धर्मरूप इदानीन्तनै ह्रसितविवेकैर्दुर्विज्ञेयोऽप्यनुसर्तव्य एव।

'क्व धर्मो बहुगम्भीरः क्वोत्तरत्राविवेकिता।
अतः परम्पराप्राप्तमार्गो धर्मः सनातनः॥ १॥
क्व भूरिमतयः पूर्वे मन्वाद्याः पारदर्शिनः
तद्बुध्यालम्बसञ्चाराः क्वेदानीन्तनपण्डिताः॥ इति।

[साधकबाधकवचनविचारः] तदत्रान्ते विधवाविवाहसाधकानि बाधकानि च सर्वाणि वचनानि संगृह्य तदाशयनिष्कर्षमुपपाद-

यामः। तत्र तत्साधकतामर्हन्ति वचनानि प्रथममधो निर्दिश्यन्ते—

(१) उदीर्ष्व नार्यभिजीवलोकमितासुमेतमुपशेष एहि। हस्तग्राभस्य दिधिषोस्त्वमेतत् पत्युर्जनित्वमभिसंबभूव ॥

(२) कुहस्विद्दोषा कुह वस्तोरश्विना कुहाभिपित्वं करतः कुहोषितुः। को वा शयुत्रा विधवेव देवरं मर्यं न योषा वृणुते सधस्थ आ ॥ इति।

मन्त्रलिङ्गे तु न विधवाविवाहसाधके। तत्र प्रथममन्त्रे दिधिषोः पाणिग्राभस्य एतत् जनित्वमित्येतेषां पदानां सार्थक्यं हि विधवाया जन्मान्तरे उक्तपतिनैव सपतित्वमित्येतत्सिद्धान्त एव संभवति, नान्यथा। न हि अत्र दिधिषुपदेन विधवापतिर्निघण्टुसिद्धो विवक्षितुं शक्यते। यतः चिताशयनादुत्थानात्पूर्वं न तस्याः पतिः कोऽपि सम्भवति। ततश्च पुनर्विवाहेच्छोरित्येव दिधिषोरित्यस्य विवरणं योग्यम्। तत्र चैतज्जन्मसंबन्ध्येव पुनर्विवाहेच्छुरपरः किमत्र विवक्षितः, उत जन्मान्तरसंबन्धी तादृशोऽयमेवेति विचारे त्वस्माकमिदमेव प्रतिभाति—यत् प्रथमपक्षे पाणिग्राभस्येतिपदवैयर्थ्यमापततीति द्वितीय एव पक्षोऽत्राभिमत इति।

यदि तु अवश्यं मन्त्रस्य मुख्यार्थ एव ग्रहीतव्यः, न तु गौणार्थ इत्याग्रहः, एवमपीदमेव स्वीकर्तव्यमुक्तमन्त्रवर्णस्वारस्येन—यत् विधवापतिरेवापरो विधवायाः पतिर्भवितुमर्हति, न तु शुद्धोऽन्यः पतिरिति। तथाच "पौनर्भवेन भर्त्रा सा पुनः संस्कारमर्हति" इति विधवापतेः पौनर्भवत्वप्रतिपादनमपि व्याख्यातम्। सर्वथा तूक्तमन्त्रवर्णानुसारेणापीदमेवावगम्यते—यत् विधवाविवाहोऽयं निन्द्यधर्मेष्वेकतम इति। अत एव—

अज्ञातस्तु द्विजो यस्तु विधवामुद्वहेद्यदि।

परित्यज्य च तां चैव प्रायश्चित्तं समाचरेत् ॥

इत्याश्वलायनवचनम्,—

"यस्मै दद्यात् पिता त्वेनां भ्राता वानुमते पितुः ।
तं शुश्रूषेत जीवन्तं संस्थितं च न लङ्घयेत् ॥
कामन्तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः ।
न तु नामापि गृह्णीयात् पत्यौ प्रेते परस्य तु ॥
न द्वितीयश्च साध्वीनां क्वचिद्भर्तोपदिश्यते ।
न विवाहविधावुक्तं विधवावेदनं पुनः ॥
सकृदंशो निपतति सकृत्कन्या प्रदीयते ।
सकृदाह ददानीति त्रीण्येतानि सकृत्सकृत् ॥
ब्रह्मचर्यं चरेद्वापि प्रविशेद्वा हुताशनम् ।
पाणिग्रहणिका मन्त्राः कन्यास्वेव प्रतिष्ठिताः ।
नाकन्यासु क्वचिन्नॄणां लुप्तधर्मक्रिया हि ताः ॥
पाणिग्रहणमन्त्रास्तु नियतं दारलक्षणम्"

इति मनुवचनानि,—

"मृते जीवति वा पत्यौ या नान्यमुपगच्छति ।
सेह कीर्तिमवाप्नोति मोदते चोमया सह"

इयि याज्ञवल्क्यवचनम्,—

"मृतं भर्तारमादाय ब्राह्मणी वन्हिमाविशेत् ।
न विशेच्चेत्त्यक्तकेशा तपसा शोषयेद्वपुः ॥"

इति व्यासवचनम्,

"मृते भर्तरि ब्रह्मचर्यं तदन्वारोहणं वा"
मृते भर्तरि या साध्वी ब्रह्मचर्ये व्यवस्थिता ।
स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः ॥

इति विष्णुवचने,

एक एव पतिर्नार्या यावज्जीवं परायणम् ।
मृते जीवति वा तस्मिन् नापरं प्राप्नुयाद्नरम् ॥
अधिगम्य परं नारी पतिष्यति न संशयः ॥

(महाभारते आदिपर्वणि १०८ अध्याये) वचनम् ।

अत्र विधवाविवाहयोग्यतापक्षपातिभिर्निकर्षणीया विषया इमे एवे । यथाः—(१) विधवाविवाहः सर्ववर्णसाधारणः, उत शूद्रमात्रविषयः । (२) एवं तत्रापि स किं तत्तत्सामजान्तर्गतसमाजमात्रविषयः, उत सर्वसमाजसाधारणः । (३) विधवाया दानं संभवति वोत नेति । (४) विधवाविवाहे मन्त्रप्रयोगाः सन्ति वोत न सन्तीति । तत्र शूद्रविषयत्वे तत्रापि तत्समाजस्य पृथक्संस्थात्वे चोक्तमन्त्रगतदिधीषुपदं पूर्वोद्धृतव्यासवचनगतं ब्राह्मणोपदं चानुगुणं वर्तते इत्युभाभ्यामिदमवगम्यते, शूद्राणामेव तत्रापि समाजविशेष एव विधवाविवाहो नायोग्य इति । "सकृदंशो निपतति" इत्यादिवचनानि तु तस्याः पुनर्दानासंभवगमकानि वर्तन्ते । तत्र समाजविशेषेऽपि विना दानमेव व्यवस्थाविशेषपुरःसरमेव स सम्पादनीय इति गम्यत एव । "पाणिग्रहणिका मन्त्राः" इत्यादिवचनैरिदमवगम्यतेयत्—न तत्र मन्त्रसंस्कारार्हतेति । अनेन चेदं सिद्धं भवति—यत् विधवाविवाहोऽयं ब्राह्मणानां दानपूर्वकं मन्त्रसंस्कारपूर्वकं च कथमपि न सम्भवतीति । अत्र ब्राह्मणपदं मन्त्रसंस्कारार्हजातिमात्रोपलक्षणमिति त्रैवर्णिकानां मध्ये विधवाविवाहप्रचारोऽयंसर्वथाऽयोग्य इति सिद्धम् । एवं च "नष्टे मृते" इत्यादीनि सर्वाणि वचनानि त्रैवर्णिकेतरविषयाण्येव—इति केचित् ॥ अन्ये—तूक्तवचनस्य त्रैवर्णिकपरत्वेऽपि मन्त्रसंस्कारपूर्वकालप-

र्यन्तं पितृस्वत्वानिवृत्तिपरतायामेव उक्तवचनतात्पर्यात् न मन्त्रसंस्कृतायाः पत्न्याः पुनर्विवाहे किमपि प्रमाणमस्तीति—मन्यन्ते ।

मतद्वयेऽपि—विवाहानन्तरपतिमरणादौ निमित्ते त्रैवर्णिकानां पुनर्विवाहप्रचारोऽयोग्य—इति तु समानम् । अत्र च न केवलं स्मृतिवचनान्येवावलम्बः, किन्तु तैत्तिरीत्यादिश्रुतिरपि । सा यथा—

"एकस्मिन् यूपे द्वे रशने परिव्ययति, तस्मादेको द्वे जाये विन्दते, यन्नैकां रशनां द्वयोर्यूपयोः परिव्ययति, तस्मान्नैका द्वौ पती विन्दते" इति ॥

[नियोगविषयकवचनविचारः]

एतेन—"कुहस्विद्दोषा" इति मन्त्रोऽपि व्याख्यातः । सत्यम्, अत्र मन्त्रे नियोगः प्रतिपाद्यते, परन्तु सोऽपि न सर्ववर्णसाधारणः, किन्तु शूद्रामात्रविषयः । व्यवस्थापितं चैतत् प्रमाणप्रकाशे उद्धृतायां कलिवर्ज्यप्रकरणव्याख्यायां कृष्णभट्टीयायाम् । याज्ञवल्क्यस्मृतिव्याख्या बालक्रीडाप्यत्रानुकूला । सा यथा—

"नन्वेवं अपुत्रस्य मरणात् सन्तत्युच्छेदप्रसङ्गः । अस्तु । का नः पीडा । अथवा—

अपुत्रां गुर्वनुज्ञानात् देवरः पुत्रकाम्यया ।

सपिण्डो वा सगोत्रो वा घृताभ्यक्त ऋतावियात् ॥६८॥

घृताभ्यञ्जनवचनं कामप्रवृत्तिनिरोधार्थम् । ततश्चालिङ्गनादि वैकारिकत्वात् दूरापेतम् । ऋतुग्रहणं त्वन्यदा दर्शनाद्यपि कथं न स्यादित्येवमर्थम् ॥ ६८ ॥

किं सकृदेव गमनम् ? न; अदुष्टार्थत्वप्रसङ्गात् । अपत्यार्थं ह्येतद्गमनम् । अतस्तु—

आगर्भसंभवाद्गच्छेत् पतितस्त्वन्यथा भवेत्।

प्राक् गर्भसंभूतेः परित्यागात्। तु शब्दश्चैवकारार्थः।

यद्वैवं योजना। नन्वयं नियोगपक्षो दुःश्लिष्टः। पातकप्रसङ्गात्। न;

अनेन विधिना जातः क्षेत्रिणः स भवेत्सुतः।

अनेन नियोगविधिना जातः क्षेत्रिणो भ्रात्रादेरौरसवत् पुत्रो भवतीत्ययं विधिः। नात्र विचिकित्सा कार्येत्यर्थः। न चैवंवृत्तः पतितो भवति। कथं तर्हि पतितस्त्वन्यथा भवेदिति। तदनियुक्ते विकाराद्वा गच्छन्नित्यभिप्रायः। अयं पुनः परोपकाराय प्रवृत्तेरभ्युदयभागित्यनवद्यो नियोगः।

अत्र चोदयन्ति—नायं नियोगपक्षः श्रेयान्; स्मृत्याचारविरोधात्। तथा चाह मनुः—

नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभिः।

अन्यस्मिन् हि नियुञ्जाना धर्मं हन्यु सनातनम्॥ इति पुराकल्पं चोपन्यस्योपसंहृतम्—

तदा प्रभृति यो मोहात् प्रमीतपतिकां स्त्रियम्।

नियोजयत्यपत्यार्थे तं विगर्हन्ति साधवः॥ इति॥

अतो नास्ति नियोगः। तथा च शिष्टसमाचारः। नन्वियमपि स्मृतिरेव "अपुत्रां गुर्वनुज्ञानादि" त्यादि। मानवेऽपि—

देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ् नियुक्तया॥"

इत्यादि। न चेयं लोभादिमूलेतिशक्यं वक्तुम्; सर्वथा विकारप्रतिषेधात्। तदुक्तं—घृताभ्यक्त—इति। मनुनापि च—

"विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि" इति। अतो नेयमपस्मृतिः। अथ श्वशुरधनादीच्छया लोभ आशङ्क्येत्। तदपि

प्रजेप्सिताधिगन्तव्या सन्तानस्य परिक्षये—इत्यनेनैव निरस्तम्। तथा चोक्तम्—

"पतितौ भवतो गत्वा नियुक्तावप्यनापदि" इति। वसिष्ठेनापि "धनलोभान्नास्ति नियोगः" इति। अतो निर्दोषः, शास्त्राविशेषात्तु प्रतिषेधो विकल्पाय भवति। अतो न विरोधः। अन्ये तु प्राक् विवाहादुपरते भर्तरि नियोगाधिकारं वर्णयन्ति सामान्यविशेषोपसंहृतिन्यायात्। यथाह मनुः—

> यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः।
> तामनेन विधानेन निजो विन्देत देवरः॥ इति॥

तत्तु विधवायां नियुक्तस्त्वित्यनेनैव निरस्तम्। ननु च सापि विधवेति शक्यं वक्तुम्। न; स्मृत्यन्तरविरोधात्। यथाह वसिष्ठः— 'प्रेतपत्नी षण्मासं व्रतचारिणी' इत्युपक्रम्य "पित्रा भ्रात्रा वा नियोगं कारयेत्" इत्यादि। मन्त्रनूढापि प्रेते पत्यौ प्रेतपत्न्येव। नैवम्; नहि प्राग् विवाहात् पत्नीशब्दप्रवृत्तिरिति। एवं हि भगवतः पाणिनेः स्मरणम्—"पत्युर्नो यज्ञसंयोगे" इति। अतोऽसत्कल्पनम्; उपक्रमोपसंहारात्। "कथं तर्हि "यस्या म्रियेत" स्त्वयं श्लोकः? आसुरविवाहविषयतया व्याख्येयः। यस्याः कन्यायाः शुल्कं दत्त्वा शुल्कदो म्रियेत, सा यदीच्छेत्, ततो देवराय पूर्ववत् प्रदातव्या। न चेत्, नियोगं देवरेणैव कारयेत्। यद्वा 'निजो विन्देते' ति निजग्रहणात् सोदर्यो देवरः अनेन विधिना नैयोगिकेन वैवाहिकेन वा विन्देतैव। सापत्नस्तु कन्यानुमतः। तथा चाह—

> "कन्यानां दत्तशुल्कायां म्रियेत यदि शुल्कदः।
> देवराय प्रदातव्या यदि कन्यानुमन्यते॥"

इति । यदा त्वदत्तशुल्क एव म्रियेत, तदा तस्मिन् प्रेते कुमार्येव सतीच्छयान्यस्मै पित्रा विधिवत् देया । यथाह वसिष्ठः—

अद्भिर्वाचा च दत्तायां म्रियेतादौ वरो यदि ।
न च मन्त्रोपनीता स्यात् कुमारी पितुरेव सा ॥

इति । आदाविति वचनात् विवाहसन्निधौ वाग्दत्ताप्यकन्यकेति ज्ञायते । 'बलाच्चेत् प्रहृता कन्ये' त्यस्य पुनरयमर्थः—प्रहृता दूषिता, प्रशब्दसामर्थ्यात् । चात्राच्च विधेरन्यत्रैव द्रष्टव्यम्, तत्र दूषणासम्भवात् । यदि मन्त्रैर्न संस्कृता, ततोऽन्यस्मै विधिवत् प्रायश्चित्तं कारयित्वा देया । कृतप्रायश्चित्ता च यथा कन्या तथैव सेति मन्तव्यम् । इदं तु कल्पानन्तरम्—

"पाणिग्राहे मृते बाला केवलं मन्त्रसंस्कृता इति । अस्यार्थः—ग्रामधर्मेण पूर्वमपि विवाहात् पाणिग्रहणम्, तस्मिन् पाणिग्राहे मृते कन्याहुतेर्वा प्राक् पाणिग्रहणात् । यद्यक्षतयोनिः; तथाप्यन्येन भर्त्रा पुनर्विवाहसंस्कारमर्हतीति । सर्वथा परिणीतायाः पुनः परिणयनाभावः । तदुक्तम्—

"न विवाहविधावुक्तं विधवावेदनं क्वचित्" इति । तथा च बौधायनः—

"निसृष्टायां हुते वापि यस्यै भर्ता म्रियेत सः ॥"

इति । अपि निसृष्टायाम्, अपि हुते, न परिणीतायामित्यर्थः "सा चेदक्षतयोनिः स्यादि" त्येतदेव स्पष्टीकरोति, यदुपवर्णितमस्माभिः । अतो न कन्याविषया नियोगस्मृतिः । कस्तर्हि विषयः? प्रेते पत्यौ सन्तानपरिक्षये च । प्रतिषेधसामर्थ्याच्च विकल्पः । तथाचाम्नायः—"तस्मादेकस्य बह्वो जाया भवन्ति, नैकस्यै बहवः सहपतयः" इति । सहप्रतिषेधाच्च क्रमेण भवन्तीति ज्ञायते ।

तथा "यस्मै मां पिता दद्यात्, नैवाहं तं जीवन्तं हास्यामि" इति जीवन्नहानवचनाच्च मृते भर्तरि नियोगोऽस्तीति ज्ञायते । "को वां शयुत्रा विधवेव देवरं मर्यं न योषा कृणुते सधस्थ आ" इत्यस्मात्पुनर्मन्त्रवर्णात् स्पष्टतरो नियोगः । एवं हीन्द्रेण विराड् दृष्टावश्विनावुक्तौ 'दुर्दर्शौ युवां क्व पुनर्विधवेव योषा देवरं मर्यं मनुष्यभावं शयने हर्षस्थाने आपादयन्ती कश्चिदा कुरुते वाम्" उपचरतीत्यर्थः । अनेन नियोगं स्पष्टीकरोति । तथाच वसिष्ठः—"प्रजापत्ये मुहूर्ते पाणिग्राहवदुपचरेत्" इति । अतोऽनवद्यो नियोगः ।

अत्रोच्यते—नैवं नियोगस्मृतिर्व्याख्येया ; समाचारविरोधात् , विकल्पस्य चान्याय्यत्वात् । कथं तर्हि ? शूद्राविषया नियोगस्मृतिः । कुत एतत् ? मनुवचनात् । "नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभिः" इति द्विजातिसम्बद्धः प्रतिषेधः । सामान्यतः शूद्रसंबन्धितया विधिः । तस्मादविकल्पः । तथा चोक्तम्—

अयं द्विजैर्हि विद्वद्भिः पशुधर्मो विगर्हितः ।
मनुष्याणामपि प्रोक्तो वेने राज्यं प्रशासति ॥

इति । मनुष्याणामपि शूद्राणामपीत्यर्थः । तथा च समाचारः यत्पुनर्व्यासेन विचित्रवीर्यभार्यास्वपत्योत्पादनम्, तद् द्रौपदीविवाहवदनादृत्यम् । अथवा क्षत्रियाणामप्यन्वयक्षये राज्यपरिपालनाय नियोगोऽभ्यनुज्ञायते । स च राज्ञामेव ; कार्यानुरोधात् , व्यासवचनाच्च । राज्ञां ब्राह्मणेनैव कारयितव्यम् । एवं च सत्याम्नाया अपि क्षत्रियविषया एव "नैवाहं जीवन्तं तं हास्यामी"त्यादि । जीवनसमर्थो न हातव्य इत्याम्नायार्थः । "नैकस्यै बहवः सहपतयः" इति तु पुनः संस्कारविषयम् । तत्र मुख्यः पतिशब्दः । मन्त्रवर्णास्तु

शूद्रविषय एव व्याख्येयः । एवं देवरादिवाक्यान्यन्यान्यपि व्याख्येयानि । तथाच वृद्धमनुः—

> शूद्राणामेव धर्मोऽयं पत्यौ प्रेतेऽन्यसंश्रयः ।
> लोभान्मूढैरविद्वद्भिः क्षत्रियैरपि चर्यते ॥

इत्युक्त्वाह—

> वायुप्रोक्तां तथा गाथां पठन्त्यत्र मनीषिणः ।
> विप्राणां न नियोगोऽस्ति प्रेते पत्यौ न वेदनम् ॥

इयं सा गाथा—

> अकार्यमेतद्विप्राणां विधवा यन्नियुज्यते ।
> उह्यते वा मृते पत्यौ देवरेण विशेषतः ॥

इति । कथमिदानीमेतद् वसिष्ठवचनम्—

> "भ्रातृव्यपदेशेन नाध्येतव्यं कदाचन"

इति । अनेन ह्यध्यापनसम्बन्धाद् ब्राह्मणानामपि नियोगाधिकारोऽस्तीति गम्यते ? उच्यते ; नैतद्युक्तम् ; उक्तत्वान्न्यायस्य । भूयसामनन्यपराणां चानर्थक्यात् वरमेकस्यान्यपरस्य च बाधकल्पना । क्षत्रियविषयं चैतद्वाक्यम् । तेषां ह्यापदि नियोगाधिकारात् । स च ब्राह्मणेनैवेत्युक्तम् । तेनैवं योजना—भ्रातृव्यपदिश्यत्यपि नाध्येतव्यम् । केन ? अव्यपदेशेन । न व्यपदिश्यतेऽनेनेत्यव्यपदेशः अन्यजातीय इत्यर्थः । किमर्थम् ? बोद्धव्यं गुरुतल्पस्य निमित्तम् । भ्रातुः शिष्यभार्यागमनात् । भर्ता ह्यापत्सु देवरः । भर्तेति भरणायोगात् श्रैष्ठ्याच्च ब्राह्मणः, स यस्मादापत्सु देवरो भवति नियोज्यत इत्यर्थः । तस्मात्ततो नाध्येतव्यम् । आपत्स्विति चैकस्यामेवापदि । बहुवचनं गौरवार्थम् । सन्तानपरिक्षयलक्षणैवापद् यथा स्यात् । नाध्यापयितव्य इति च वक्तव्ये नाध्येतव्यमित्युक्तं क्षत्रियाः पुत्र

इति ज्ञापनार्थम् । कथं वास्य ब्राह्मणविषयत्वोपपत्तिः । न हि सोदर्ययोर्नियोगसम्भवः । कथं कृत्वा ? यदि तावन्नियोज्योऽप्यपुत्रः, तदात्मन एवोत्पादयेत् । अथ तस्य पुत्रोऽस्ति, तदा—

भ्रातॄणामेकजातानां यद्येकः पुत्रवान् भवेत् ।
सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत् ॥

इति वचनादक्षीणत्वात् सन्तानस्य कुतो नियोगः । क्षत्रियविषयत्वे तु नैष विरोधः । अथ सापत्नविषयतोच्येत । तत् क्षत्रियेऽपि समानम् । यदा त्वेकजातानामित्यस्यैकवर्णजातानामित्यर्थः, तदा स्पष्टैव क्षत्रियविषयता । यत्तु ब्राह्मण्याः प्रोषिते भर्तरि कालप्रतीक्षणवचनम्, तद्भर्तुरन्तिकगमनार्थम्, न तु नियोगार्थमिति विविच्य वचनीयम् । तस्मात्सूक्ता नियोगवाक्यानां विषयकल्पना एवं तावच्छूद्राणां नियोगाधिकार उक्तः ॥ इति ।

[कन्यालक्षणविषयकवचनविचारेणापि विधवोद्वाहस्याशास्त्रीयता]

एतदेवाभिप्रेत्योक्तं याज्ञवल्क्येन "अनन्यपूर्विकां कान्ताम्" इति । अत्र 'अनन्यपूर्विकां कान्तामसमानार्षगोत्रजाम्' इति न पर्युदासः ; किन्तु प्रसज्यप्रतिषेध एव । अत एव सगोत्राया ऊढाया मातृवत् परिपालनीयत्वमेव तत्र तत्रोक्तम्, न तु तस्या उपभोगयोग्यत्वमपि । तथा च यदि कश्चिदज्ञानेन सगोत्रामिवान्यपूर्विकामपि विवहेत् । तर्हि तत्परित्यागपूर्वकं प्रायश्चित्तमाचरेदित्येक धर्मशास्त्ररहस्यम् ।

अत एव—

अज्ञानस्तु द्विजो यस्तु विधवामुद्वहेद्यदि ।
परित्यज्य च तां चैव प्रायश्चित्तं समाचरेत् ॥

इत्याश्वलायनवचनमुपपद्यते । अत्रेदमनुसन्धेयम्—यत्

विवाहप्रकरणे वर्जनीयतयोक्ताः कन्या द्विविधा वर्तन्ते यथाऽऽजानसिद्धापरिहरणीयदोषयुक्ताः, कादाचित्कपरिहरणीयदोषयुक्ताश्च। तत्र द्वितीयासूक्तदोषपरिहारानन्तरं तादृशदोषसंभवतः पूर्वं वा विवाहः कर्तव्यः। प्रथमासूक्तदोषपरिहारासंभवात् ब्राह्मण्यादिद्विजत्वोत्पत्तिमात्रोपयोगी विवाहो भवितुमर्हति, न तु धर्मप्रजासंपत्त्युपयोगी सः। विवाहेन स्त्रिया द्विजत्वं पत्नीत्वं च, पत्या सहाधिकारः, इत्यादिकं फलम्। पुरुषस्य तु गृहस्थत्वं ऋणत्रयापाकरणाधिकारः फलम्। तत्र पत्नीत्वं सप्रतियोगिकं स्त्रीणामदुष्टानां भवति। दुष्टानां तु द्विजत्वमात्रनिष्पत्तिः। अत एव—स्त्रीणामुपनयनस्थाने विवाहं मनुरब्रवीत्—इति द्विजत्वोत्पत्तिसाधकतायां स्त्रीत्वमेव सामान्यं विवक्षितम्, न तु दोषविशेषराहित्यादिकमपि। गृहस्थः सदृशीं भार्यामित्यादिस्थल एव यत्र भार्यात्वोत्पादकतया विवाहो विवक्षितस्तत्रैव विशेषणविशेषाणां विवक्षा। तथाच दोषविशेषविशिष्टानां नाविवाह्यत्वं कस्यापि सम्मतम्, किन्तु धर्मानधिकार एव तासां विवक्षितः। तथाच परपुरुषाधिगमेन स्त्रियाः पातित्यं भवतीति धर्मशास्त्रसिद्धान्तः। तदुक्तं महाभारते आदिपर्वणि १०४ तमेऽध्याये—

"अभिगम्य परं नारी पतिष्यति न संशयः"

इति। तदयं निष्कर्षः—आजानसिद्धदोषाणां मूकभावादिदूषितानां द्विजत्वमात्रनिष्पादनोपयोगी विवाहः, अपरिहरणीयदोषाणान्तु सकृद्विवाहितानां न तन्मात्रोपयोग्यपि स संभवतीति।

[वीरमित्रोदयोपष्टम्भः] अत्र वीरमित्रोदयो यथा—तत्र याज्ञवल्क्यः—

अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम्।
अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम्॥ इति।

अन्यः पूर्वो यस्याः साऽन्यपूर्वा । अन्यपूर्वैवान्यपूर्विका, न अन्यपूर्विका तां अनन्यपूर्विकां सा च द्विविधा । पुनर्भूः स्वैरिणी च । पुनर्भूरपि द्विविधा । क्षता अक्षता चेति । तथा स एव—

अक्षता च क्षता चैव पुनर्भूः संस्कृता पुनः ।
स्वैरिणी या पतिं हित्वा सवर्णं कामतः श्रयेत् ॥ इति ।

अस्यार्थः—पुनःसंस्कृता पुनर्भूः, सा च संस्कारद्वैविध्याद्द्विविधा । तत्र विहितविवाहमात्रसंस्कृताऽनुपभुक्ता अक्षतेत्युच्यते । क्षता पुनर्विवाहात्प्रागेव निषिद्धपुरुषसम्बन्धदूषिता । या तु कौमारं पतिमुत्सृज्य पुरुषान्तरं श्रयति सा स्वैरिणी । एतासामेव किञ्चिदवान्तरभेदेन सप्तविधत्वमाह कश्यपः—

सप्त पौनर्भवाः कन्या वर्जयित्वा कुलाधमाः ।
वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला ॥
उदकस्पर्शिता या च या च पाणिगृहीतिका ।
अग्निं परिगता या च पुनर्भूप्रसवा च या ॥
इत्येताः कश्यपेनोक्ता दहन्ति कुलमग्निवत् ।इति।

बोधायनोऽपि, 'वाचा दत्ता मनोदत्ताऽग्निं परिगता सप्तमं पदं नीता भुक्ता गृहीतगर्भा प्रसूता चेति सप्तविधा पुनर्भूः, तां गृहीत्वा न प्रजां न धर्मं विन्देदिति । नारदस्तु पुनर्भूत्रैविध्यं स्वैरिणीचातुर्विध्यं चाह—

परपूर्वाः स्त्रियस्त्वन्याः सप्त प्रोक्ता यथाक्रमम् ।
पूनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्विधा ॥
कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता ।
पुनर्भूः प्रथमा प्रोक्ता पुनःसंस्कारकर्मणि ॥
देशधर्मानवेक्ष्य स्त्री गुरुभिर्या प्रदीयते ।

उत्पन्नसाहसान्यस्मै सा द्वितीया प्रकीर्तिता ॥
उत्पन्नसाहसा उत्पन्नव्यभिचारा ।
असत्सु च देवरेषु बान्धवैर्या प्रदीयते ॥
सवर्णाय सपिण्डाय सा तृतीया प्रकीर्तिता ॥
स्त्री प्रसूताऽप्रसूता वा पत्यावेव तु जीवति ।
कामात्समाश्रयेदन्यं प्रथमा स्वैरिणी तु सा ॥
कौमारं पतिमुत्सृज्य या त्वन्यं पुरुषं श्रिता ।
पुनः पत्युर्गृहं यायात्सा द्वितीया प्रकीर्तिता ॥
मृते भर्तरि तु प्राप्तान्देवरादीनपास्य या ।
उपगच्छेत्परं कामात्सा तृतीया प्रकीर्तिता ॥
प्राप्ता देशाद्धनक्रीता क्षुत्पिपासातुरा च या ।
तवाहमित्युपगमात्सा चतुर्थी प्रकीर्तिता ॥ इति ॥

एतासां सर्वासामविवाह्यत्वेऽप्यतिक्रान्तनिषेधेन परिगृहीत्रा ऋणं द्वयोरेव देयम् । तथा च स एव—

अन्तिमा स्वैरिणीनां या प्रथमा च पुनर्भुवाम् ।
ऋणं तयोः पतिकृतं दद्याद्यस्ते उपाश्रुतः ॥ इति ॥

अथान्यथापरिणयने प्रतिप्रसवः । तत्र—

याज्ञवल्क्यः—

अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया ।
सपिण्डो वा सगोत्रो वा घृताभ्यक्त ऋतावियात् ॥ इति ॥

यद्यप्यत्र गमनमात्रमेव श्रूयते, तथाऽपि परिणयनपूर्वकमेव तद्द्रष्टव्यम् ।

यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ।
तामनेन विधानेन निजो विन्देत देवरः ॥

यथाविध्यधिगम्यैनां शुक्लवस्त्रां शुचिव्रताम् ।
मिथोभजेताप्रसवात्सकृत्सकृदृतावृतौ ॥

इति मनुस्मरणात् । अयं च विवाहो वाचनिको मृतस्यैव भार्यात्वोत्पादकः । न वोढुः ।

अनेन विधिना जातः क्षेत्रजोऽस्य भवेत्सुतः ।

इति इदमा मृतस्यैव परामर्शात् । स च वाग्दत्ताविषयो नोढाविषयः । 'यस्या म्रियेत कन्याया' इति पूर्वोक्तमनुवचनात् । तथा—

"देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया ।
प्रजेप्सिताऽधिगन्तव्या सन्तानस्य परिक्षये ॥
विधवानां नियुक्तस्तु घृताक्तो वाग्यतो निशि ॥
एकमुत्पादयेत्पुत्रं न द्वितीयं कथंचन ॥

इत्येवं नियोगमुपन्यस्य मनुः स्वयमेव निषेधति—

नान्यस्मिन्विधवा नारी नियोक्तव्या द्विजातिभिः ।
अन्यस्मिन्हि नियुञ्जाना धर्मं हन्युः सनातनम् ॥
नोद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्यते क्वचित् ।
न विवाहविधावुक्तं विधवावेदनं पुनः ॥
अयं द्विजैर्हि विद्वद्भिः पशुधर्मो विगर्हितः ।
मनुष्याणामपि प्रोक्तो वेने राज्यं प्रशासति ॥
स महीमखिलां भुञ्जन् राजर्षिप्रवरः पुरा ॥
वर्णानां सङ्करं चक्रे कामोपहतचेतनः ॥
ततः प्रभृति यो मोहात्प्रमीतपतिकां स्त्रियं ।
नियोजयत्यपत्यार्थे गर्हन्ते तं हि साधवः ॥

विधवायां नियुक्तस्त्वित्यत्र विधवाशब्दो वाग्दानान-

न्तरं विवाहात्प्राङ्मृतपतिकाविषयः ; वाचा सत्ये कृते पतिरित्युपक्रमात् । नान्यस्मिन्विधवा नारीत्यत्र तु विधवाशब्दो विवाहानन्तरं मृतपतिकाविषयः ; नोद्वाहिकेषु मन्त्रेष्वितिहेतूपन्यासात् । ततश्च विषयभेदान्न मिताक्षरोक्तविकल्पशङ्कावसरः । तथाचाह पराशरः—

नष्टे मृते प्रव्रजिते क्लीवे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥

वसिष्ठबोधायनावपि—

बलादपहृता कन्या मन्त्रैर्यदि न संस्कृता ।
अन्यस्मै विधिवद्देया यथा कन्या तथैव सा ॥ इति ।

याज्ञवल्क्योऽपि—दत्तामपि हरेत्पूर्वाच्छ्रेयांश्चेद्वर आव्रजेत् । एतच्च वाग्दत्ताविषयम् । वाग्दत्ताऽपि वरदोषे ज्ञाते गुणवतेऽन्यस्मै देयेत्यर्थः । तथाच गौतमः— प्रतिश्रुत्याऽप्यधर्मसंयुक्ताय न दद्यादिति । वरदोषास्तु प्रागुक्ताः । शातातपोऽपि—

वरश्चेत्कुलशीलाभ्यां न युज्येत कथंचन ।
न मन्त्राः कारणं तत्र न च कन्यानृतं भवेत् ॥
समाच्छिद्य तु तां कन्यां बलादक्षतयोनिकाम् ।
पुनर्गुणवते दद्यादिति शातातपोऽब्रवीत् ॥
हीनस्य कुलशीलाभ्यां हरन्कन्यां न दोषभाक् ।
न मन्त्राः कारणं तत्र न च कन्यानृतम् भवेत् ॥ इति ।
स तु यद्यन्यजातीयः पतितः क्लीब एव वा ।
विकर्मस्थः सगोत्रो वा दासो दीर्घामयोऽपि वा इति

ऊढाऽपि देया सान्यस्मै सप्रावरणभूषणा ॥ इति ।

वागुदकदत्तायामप्यसंकृतायां वरमरणे न कन्यात्वहानिः । तथाच वसिष्ठः—

अद्भिर्वाचा च दत्तायां म्रियेतादौ वरो यदि ।
न च मन्त्रोपनीता स्यात् कुमारी पितुरेव सा ॥ इति ।

वरणानन्तरं देशान्तरगमने विशेषमाह कात्यायनः—

वरयित्वा तु यः कश्चित्प्रणश्येत्पुरुषो यदि ।
ऋत्वागमांस्त्रीनतीत्य कन्यान्यं वरयेद्वरम् ॥ इति ।

नारदोऽपि—

प्रतिगृह्य तु यः कन्यां वरो देशान्तरं व्रजेत् ।
त्रीनृतून्समतिक्रम्य कन्यान्यं वरयेद्वरम् ॥ इति ।

शुल्कदानानन्तरं वरमरणे विशेषमाह मनुः—

कन्याया दत्तशुल्कायाः म्रियेत यदि शुल्कदः ।
देवराय प्रदातव्या यदि कन्यानुमन्यते ॥

शुल्कदानानन्तरं देशान्तरगमने विशेषमाह कात्यायनः—

प्रदाय शुल्कं गच्छेद्यः कन्यायाः स्त्रीधनं तथा ।
धार्या सा वर्षमेकं तु देयान्यस्मै विधानतः ॥

अनेकेभ्यो वाग्दत्तायां विशेषमाह स एव—

अनेकेभ्यो हि दत्तायां अनूढायां तु यत्र वै ।
अत्यागतश्च सर्वेषां लभ्येतादिवरः सुताम् ॥
अथागच्छेयुरूढायां दत्तपूर्ववरो हरेत् ॥ इति ।

योऽयं पुनरुद्वाहो विहितः सोऽक्षतयोन्या एव ।

पौनर्भवेन भर्त्रा सा पुनः संस्कारमर्हति ।

इति मनुवचनात् ।

अत्र सेति तच्छब्देन पूर्वप्रक्रान्ता पुनर्भूरुच्यते।

यद्यपि—

या पत्या वा परित्यक्ता विधवा स्वेच्छयापि वा।
उत्पादयेत्पुनर्भूत्वा स पौनर्भव उच्यते। इति।

स्मृत्यन्तरवाक्यैकवाक्यतया पुनर्भूमात्रजातस्य पौनर्भवत्वेन पुनर्भूसामान्यस्यैव प्रक्रमोऽभिप्रेत इति ध्येयम्। तस्याश्चाक्षतयोनित्वलक्षणगुणविशेषपुरस्कारेण पुनःसंस्कारो विधीयते। तत्र कुल्लूकभट्टव्याख्या—

सा यद्यक्षतयोनिः सती अन्यमाश्रयेत, तदा तेन पौनर्भवेन भर्त्रा पुनर्विवाहाख्यं संस्कारमर्हतीति। तत्र चाक्षतयोन्याः पुनर्विवाहे पौनर्भवेन भर्त्रेत्यन्वयकरणात् गतप्रत्यागतासंस्कारे च कौमारेण भर्त्रेत्युपादानात् द्वितीयस्यैव पौनर्भवत्वं न पूर्वस्येति सिद्ध्यति। तेन च "पौनर्भवश्च काणश्चेति श्राद्धे, तथा पौनर्भवे द्विजे इति दाने च, परपूर्वापतिस्तथेत्यादिना च प्रतिषेधोऽपि द्वितीयस्य पत्युस्तदुत्पन्नानां पुत्राणां चेति सर्वनिबन्धसंमतम्, न क्वापि प्रथमस्य पत्युः पौनर्भवत्वेन तदपत्यानां वा निषेधो गम्यते। यद्यपि पुनर्भ्वा अयमिति सम्बन्धसामान्यविवक्षया पूर्वापरयोर्द्वयोरपि पत्योः पौनर्भवत्वं प्रतीयते, तथापि पुनर्भवतीति व्युत्पत्तावन्यथानुपपत्त्या भार्येति शेषस्याऽवश्यकतया यत्प्रतियोगिकभार्यात्वेनास्याः पुनर्भूत्वं तस्योपस्थितस्य विशेषस्य परित्यागे कारणाभावात् बुद्धिस्थतया चायमिति सर्वनाम्ना परामर्शसम्भवात्तस्यैव पौनर्भवत्वं युक्तम्।

यत्तु अपरार्केणोभयोरपि पत्योः पौनर्भवत्वमुक्तम्, तदुक्तयुक्त्या बाधितमिति ध्येयम्। यद्यप्यस्मिन्व्याख्याने गतप्रत्या-

गतायां क्षताक्षतात्वविशेषो न प्रतीयते, तथापि नारायणसर्वज्ञमेधातिथिभ्यां तस्यामप्यक्षतयोनिपदानुषङ्गकरणादक्षतात्वमेव सिध्यति। युक्तं चैतत्। त्यक्त्वा भर्तृगृहं गच्छेद्यदि दोषं विना पुनः॥
भर्त्रा सा संस्कर्तव्या च प्रायश्चित्तादिभिः क्रमात्॥ इति॥ दोषश्च क्षतयोनित्वम्। यथाह वसिष्ठः—पाणिग्राहे कृते कन्या केवलं मन्त्रसंस्कृता। सा चेदक्षतयोनिः स्यात्पुनः संस्कारमर्हति॥ इति॥ नारदोऽपि—उद्वाहिताऽपि या कन्या न चेत् संप्राप्तमैथुना। पुनः संस्कारमर्हेत यथा कन्या तथैव सा॥ इति॥ अतएव मनुः—पाणिग्रहणिका मन्त्राः कन्यास्वेव प्रतिष्ठिताः। नाकन्यासु क्वचिन्नृणां लुप्तधर्मक्रिया हि ताः॥ इत्यक्षतयोनीनामेव कन्याशब्दाभिधेयानां मन्त्रसंस्कारमाह, कन्या अग्निमयक्षतेति मन्त्रलिङ्गात्, एतेनापरार्कीयमपि गतप्रत्यागतायां क्षतात्वव्याख्यानं परास्तम्।

यच्च 'पुनर्भूर्या कौमारं भर्तारमुत्सृज्यान्यैः सह चरित्वा पुनस्तस्यैव गृहमाविशति सा पुनर्भूर्भवति' इत्युपक्रम्य पुनः संस्कारबोधकं वसिष्ठवाक्यमत्रोदाहृतम्, तत्रापि चरित्वेत्यत्र नैकान्ततः सुरतमेव कर्मतयोपतिष्ठते। सप्तपदीं चरित्वेत्यस्यापि सम्भवात्। बहूनामनुग्रहो न्याय्य इति न्यायेनानेकवाक्यानुरोधाच्च। वस्तुतस्तु धात्वर्थमर्यादयापि सप्तपदीचरणमेव मुख्योऽर्थो गम्यते, न सुरतमिति ध्येयम्। नन्वेवमक्षतयोन्या एव संस्कारविधाने 'या गर्भिणी संस्क्रियते ज्ञाताऽज्ञाताऽपि वा सती। वोढुः स गर्भो भवति सहोढ इति चोच्यते' इति मनुवचनं विरुध्येत। गर्भिण्याः संस्कार विधानादिति चेत्, मैवं; सहोढस्य वोढुः पुत्रत्वान्यथानुपपत्त्या तादृशसंस्काराभ्युपगमात्। तस्मादक्षतयोनिश्चेद्गतप्रत्यागता तदा पूर्वभर्त्रा पुनः संस्कृत्य परिग्राह्येति। अत्राहुः—न संग्राह्येति।

पुनस्संस्कारस्य कलौ निषेधात् । यथा 'ऊढायाः पुत्ररुद्वाहं ज्येष्ठांशं गोवधं तथा । कलौ पञ्च न कुर्वीत भ्रातृजायां कमण्डलुम् ॥' इति । तदपरे न क्षमन्ते । वरान्तरकर्तृकस्यैव पुनर्विवाहस्य कलौ निषेधो न स्वकर्तृकस्य । 'दत्तायाश्चैव कन्यायाः पुनर्दानं परस्य च' इति बृहन्नारदीयवाक्येनास्योपसंहारात् । अत एव—बालिकाऽक्षतयोन्याश्च वरेणान्येन संस्कृतिः—इति धर्मज्ञसमये स्पष्टमेवाभ्यधायि । अन्यथा चिरप्रोषितस्य जीवद्वार्तानाकर्णने कृतौर्ध्वदेहिकस्य पुनः प्रत्यागमनेपि स्त्रियाः पुनः संस्कारो निषिध्येत । तस्मान्नास्य निषेधस्यायं विषय इति न पूर्वेण भर्त्रा तस्याः परिग्रहे विरोध इति ॥ तन्न साधु, स्वपरकर्तृकस्य द्विविधस्यापि पुनः संस्कारस्य कलौ निषेधात् । यथा ब्रह्मपुराणे—

मृते भर्तरि या नारी त्यक्तवत्यथ तं स्वयम् ।
सवर्णाज्जनयेद्गर्भं भर्तुः पौनर्भवं सुतम् ।
यदि सा बालविधवा बलात्त्यक्ताथवा क्वचित् ॥
तदा भूयस्तु संस्कार्या गृहीता येन केनचित् ।
त्यक्त्वा भर्तृगृहं गच्छेद्यदि दोषं विना पुनः ॥
भर्त्रा सा संस्कर्तव्या च प्रायश्चित्तादिभिः क्रमात् ॥
स्त्रीणां पुनर्विवाहस्तु देवरात्पुत्रसंततिः ।
स्वातन्त्र्यं वा कलियुगे न कर्तव्यं कदाचन ॥ इति ॥

अत्र यत्तच्छब्दोपादानादेकवाक्यत्वम् । तच्चैवम्—या मृतभर्तृका या च जीवन्तमेव भर्तारं स्वयं त्यक्त्वा सवर्णादन्यस्मात्पुरुषाद्गर्भं जनयेज्जनयितुं प्रवर्तते, तदा सा येन केनचिद्गृहीता स्वीकृता भूयः संस्कार्या । तत्र मृतभर्तृकायास्त्यक्तभर्तृकायाश्चाविशेषप्राप्तावाह—यदि सा बालविधवेत्यादि । मृतभर्तृका यदि

बालविधवाऽक्षतयोनिस्तथा त्यक्तभर्तृका भर्त्राऽपि बलान्निर्भर्त्स्य त्यक्ता भवति, तदैव संस्कार्या नान्यथा। अनेन च—या पत्या वा परित्यक्ता विधवा स्वेच्छयापि वा—इति मनुवाक्येऽपि पत्या स्वेच्छया परित्यक्तेत्येवान्वयः सिद्धः। तेन च क्षतयोन्याः भर्तृपरित्यक्तायाश्च व्यावृत्तिः। तत्र गर्भस्य कुण्डगोलकत्वपरिहारायाह। 'भर्तुः पौनर्भवं सुत' मिति। भर्तुर्द्वितीयस्य भर्तुः पौनर्भवं (१) पुनर्भ्वामुत्पादितं सुतं पुनस्संकृतायामुत्पन्नस्यैव पौनर्भवत्वात्। एवं पुनर्भूसंस्कारमुक्त्वा गतप्रत्यागतासंस्कारमाह त्यक्त्वेति। यदि सैव पुनर्भूः पौनर्भवं भर्तारं त्यक्त्वा दोषं पुरुषसम्बन्धं विना पुनः भर्तुः पूर्वस्य पत्युर्गृहं गच्छेत्तदा सा भर्त्रा पूर्वेण प्रायश्चित्तादिभिः संस्कार्येति। तदेवमुभयविधमपि संस्कारं कलौ निषेधति। स्त्रीणामिति पुनर्विवाह उक्तविषयः। स्वातन्त्र्यं विधवायाः पित्रादिपरिहारेण स्थितिरिति। अत्र तदा भूयस्तु संस्कार्येति परकर्तृकस्य भर्त्रा सा संस्कर्तव्या चेति स्वकर्तृकस्य च पुनस्संस्कारस्य पुनः प्रक्रमात् स्त्रीणां पुनर्विवाहस्त्विति सामान्यनिषेधो द्वावपि विषयीकरोति; विशेषे विनिगमकाभावात्। यदि सन्निधिर्विनिगमकस्तदा सुतरामस्मदभीष्टसिद्धिः, स्वकर्तृकस्यैव संनिहितत्वात्। न च सामान्यरूपस्यास्य विशेषेणोपसंहार इति वाच्यम्; संनिधिलक्षणप्रकरणोपात्तविशेषद्वयान्वयेन विशेषरूपतयैवास्य नैराकाङ्क्ष्यात्, ग्रन्थान्तरीयस्य विशेषस्य विलम्बोपस्थितिकतयाऽनन्वयात्। तस्मात्पुनर्भूर्गतप्रत्यागताचेत्युभे अपि असंग्राह्ये इति।

[चतुर्विंशतिमतसंग्रहः] चतुर्विंशतिमतसंग्रहेऽप्ययमेवार्थ उपपादितः। स यथाः—

अनन्येति। या दानेनोपभोगेन वा पुरुषान्तरपूर्विका न भवति ताम्। अनेन सप्त पुनर्भुवो व्यावर्त्यन्ते। तथाचाह बोधायनः—वाग्दत्ता मनोदत्ताऽग्निं परिगता सप्तमं पदं नीता भुक्ता गृहीतगर्भा प्रसूता चेति सप्तविधा पुनर्भूस्तां गृहीत्वा न प्रजां न धर्मं विन्देदिति। अत्र वाग्दत्तामनोदत्तयोर्निषेधः पूर्वस्य निर्दोषत्वे बोध्यम्। अत एव नारदः—

दत्तां न्यायेन यः कन्यां वराय न ददाति तां।
अदुष्टश्चेद्वरो राज्ञा स दण्ड्यस्तत्र चोरवत्॥ इति॥

तत्रैव दण्डं विधत्ते। दुष्टे तु पूर्ववरे वाग्दत्ताऽपि वरान्तराय देया। तथाच पराशरः—नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ। पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते॥ इति॥

अस्यार्थः—वाग्दानानन्तरं पाणिग्रहणात्प्राक् पतौ संभावितोत्पत्तिकपतित्वे पूर्वस्मिन्वरे नष्टे सति लक्षणया दूरदेशगमनेनापरिज्ञातवृत्तान्ते सति। तथा च— नारदः—

परिगृह्य तु यः कन्यां नरो देशान्तरं व्रजेत्।
त्रीनृतून्समतिक्रम्य कन्याऽन्यं वरयेद्वरम्॥
स्त्रीपुंसयोस्तु संबन्धात् वरणं प्राग्विधीयते।
वरणात् ग्रहणं पाणेः संस्कारोऽपि विचक्षणैः॥
तयोरनियतं प्रोक्तं वरणं दोषदर्शनात्॥ इति॥

परिगृह्य वाचा दत्तां स्वीकृत्य। त्रीनृतूनिति। इदं च कन्याया अधार्यत्वे बोध्यम्। धार्यत्वे तु—

प्रदाय शुल्कं कन्याया गच्छेद्यस्त्रीधनं तथा।
धार्या सा वर्षमेकं तु देयाऽन्यस्मै विधानतः॥

इति नारदेनैव वर्षं प्रतीक्षाया अभिधानात्। स्त्रीपुंसयोरि-

त्यादेरयमर्थः । स्त्रीपुंसयोः संसर्गात्प्राक् त्रितयं क्रियते—वरणं, पाणिग्रहणं, सप्तपदीप्रक्रमश्चेति । तत्र वरणं नाम वरस्य संप्रदानत्वाय कन्यायां दात्रा प्रार्थनम् । तदेव च वाग्दानम् । एवं स्थिते तयोः पाणिग्रहणसप्तपदप्रक्रमणयोः पूर्वभावि यद्वरणं तदनियतं अनियामकमित्यर्थः । तयोरेव भार्यात्वोत्पादकत्वादिति भावः । तथाच मनुः—

पाणिग्रहणमन्त्रास्तु नियतं दारलक्षणम् ।
तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे । इति॥

दोषदर्शनादिति वाक्यशेषस्यायमर्थः । वरणस्यानियामकत्वमपि पूर्ववरस्य दोषे सत्येवेति ।

यदि तु अन्यस्मै दत्तायां पूर्ववरोऽप्यायाति, तदाऽनूढां तां लभते । ऊढायां तु स्वदत्तं द्रव्यमेव लभते, न तु कन्याम् । तदाह कात्यायनः—

अनेकेभ्योऽपि दत्तायां अनूढायां तु तत्र वै ।
पुरागतश्च सर्वेषां लभते तदिमां सुताम् ॥

अथागच्छेत वोढायां दत्तं पूर्ववरो हरेदिति ।

तदैवं नष्ट इति व्याख्यातम् । एवं मृतेऽपि । तथाच वसिष्ठः—

अद्भिर्वाचा च दत्तायां म्रियेतादौ वरो यदि ।
न च मन्त्रोपनीता स्यात्कुमारी पितुरेव सा ॥ इति ॥

मन्त्रोपनयनं पाणिग्रहणादिकं विना वाचा दानमिवाद्भिरपि दानं न भार्यात्वोत्पादकमित्यर्थः । अत एव यमः—

नोदकेन नवा वाचा कन्यायाः पतिरुच्यते ।

पाणिग्रहणसंस्कारात्पतित्वं सप्तमे पदे ॥ इति ॥
तथा प्रव्रजिते कृतसंन्यासे । क्लीबे चेति चकारा-
दन्यजातीयादेर्ग्रहणम् । तथाच कात्यायनः—
स तु यद्यन्यजातीयः पतितः क्लीब एव वा ॥
विकर्मस्थः सगोत्रो वा दासो दीर्घामयोऽपि वा ॥
ऊढाऽपि देया सान्यस्मै सप्रावरणभूषणा ॥ इति ॥
अत्रोढाऽपीत्यपिशब्दः कौमुतिकन्यायेन वाग्द-
त्ताया एवान्यस्मै दानमाचष्टे न तूढायाः । अन्यथा-
सगोत्रोढाया अपि पुनर्विवाहप्रसक्तौ मातृवत्परिपा-
लयेदिति शास्त्रं विरुध्यते ।
तदयं संग्रहः—
अनन्यपूर्विकामिति दानेनोपभोगेन पुरुषान्तरागृही-
तामित्यर्थः । अनेन पुनर्भूर्व्यावर्त्यते । अत एव
काश्यपः—
सप्त पौनर्भवाः कन्याः वर्जनीयाः कुलाधमाः ॥
वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला ॥
उदकस्पर्शिता या च या च पाणिगृहीतिका ॥
अग्निं परिगता या च पुनर्भूप्रसवा च या ॥
इत्येता काश्यपेनोक्ता दहन्ति कुलमग्निवत् ।
बोधायनः—वाग्दत्ता मनोदत्ताऽग्निं परिगता सप्तमं
पदं नीता भुक्ता गृहीतगर्भा प्रसूता चेति सप्तविधा
पुनर्भूः । तां गृहीत्वा न प्रजां न धर्मं विन्देत् । इति ।
नारदोऽपि—
कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता ।

पुनर्भूः प्रथमा प्रोक्ता पुनः संस्कारकर्मणि ॥ इति ॥

अयं भावः—ब्राह्मादिषु विवाहेषु यद्दानमुक्तं तत्सकृदेव। तथाच याज्ञवल्क्यः—

'सकृत्प्रदीयते कन्या हरंस्तां चोरदण्डभाक्।' इति ॥

मनुरपि—

सकृदंशो निपतति सकृत्कन्या प्रदीयते।
सकृदाह ददानीति त्रीण्येतानि सतां सकृत् ॥ इति ॥

एतच्चादुष्टवराभिप्रायम्। यदाह नारदः—

दत्त्वा न्यायेन यः कन्यां वराय न ददाति ताम्।
अदुष्टश्चेद्वरो राज्ञा स दण्ड्यस्तत्र चोरवत् ॥ इति ॥

किमयमुत्सर्गः? नेत्याह याज्ञवल्क्यः—

'दत्तामपि हरेत्पूर्वाच्छ्रेयांश्चेद्वर आव्रजेत्॥ इति ॥

एतद्वाग्दानाभिप्रायम्। यस्मै वाचा दत्ता ततोऽन्यश्चेत्प्रशस्ततरो लभ्यते ततस्तस्मै देया न तु दुष्टाय पूर्वस्मै। तथाच गौतमः—'प्रतिश्रुत्याप्यधर्मसंयुक्ताय न दद्यादि' ति। वरदोषास्तु कात्यायनेनोक्ताः—

उन्मत्तः पतितः कुष्ठी तथा षण्डः सगोत्रजः।
चक्षुःश्रोत्रविहीनश्च तथापस्मारदूषितः ॥
वरदोषास्तथैवैते कन्यादोषाः प्रकीर्तिताः ॥ इति ॥

यस्तु ऊढायाः पुनरुद्वाहो यमशातातपाभ्यां दर्शितः-

"वरश्चेत्कुलशीलाभ्यां न युज्येत कथंचन।
न मन्त्राः कारणं तत्र न च कन्यानृतं भवेत् ॥
समाच्छिद्य तु तां कन्यां बलादक्षतयोनिकाम्।
पुनर्गुणवते दद्यादिति शातातपोऽब्रवीत् ॥

हीनस्य कुलशीलाभ्यां हरन्कन्यां न दोषभाक् ।
न मन्त्राः कारणं तत्र न च कन्यानृतं भवेत् ॥ इति ॥
कात्यायनोऽपि—
स तु यद्यन्यजातीयः पतितः क्लीब एव वा ।
विकर्मस्थः सगोत्रो वा दासो दीर्घामयोऽपि वा ॥
ऊढाऽपि देया सान्यस्मै सप्रावरणभूषणा ॥ इति ॥
मनुरपि—
नष्टे मृते प्रव्रजिते क्लीबे च पतिते तथा ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥ इति ॥
सोऽयं पुनरुद्वाहो युगान्तरविषयः। तथाचादित्यपुराणम्
"ऊढायाः पुनरुद्वाहं ज्येष्ठांशं गोवधं तथा ।
कलौ पञ्च न कुर्वीत भ्रातृजायां कमण्डलुम् । इति ॥
यस्तु कन्यादोषमनभिधाय प्रयच्छति स राज्ञा दण्ड-
यितव्य इत्याह नारदः—
यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति ।
तस्य कुर्यान् नृपो दण्डं पूर्वसाहसचोदितम् ॥ इति ॥
याज्ञवल्क्योऽपि—
अनाख्याय ददद्दोषं दण्ड्य उत्तमसाहसम् ॥ इति ॥
कन्यादोषास्तु नारदेन दर्शिताः ।
दीर्घकुत्सितरोगार्ता व्यङ्गा संसृष्टमैथुना ।
दुष्टान्यगतभावा च कन्यादोषाः प्रकीर्तिताः ॥ इति ।
न केवलं दोषमनाख्याय ददतो दण्डः, अपि तु
साऽपि परित्याज्येत्याह मनुः—
विधिवत्प्रतिगृह्यापि त्यजेत्कन्यां विगर्हिताम् ।

व्याधितां विप्रदुष्टां वा छद्मना चोपपादिताम् ॥इति।

नारदोऽपि—

नादुष्टां दूषयेत्कन्यां नादुष्टं दूषयेद्वरम्।
दोषे सति न दोषः स्यादन्योन्यं त्यजतस्तयोः ॥इति।

एतच्च सप्तपदाभिक्रमणादर्वाग्वेदितव्यम्; तत्रैव भार्यात्वस्योत्पत्तेः। अत एव मनुः—

पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम्।
तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे ॥इति॥

यमोऽपि—

नोदकेन न वा वाचा कन्यायाः पतिरिष्यते।
पाणिग्रहणसंस्कारात्पतित्वं सप्तमे पदे ॥ इति।

पाणिग्रहणसंस्कारात्पूर्वं परिणेतुर्मरणेऽपि न कन्यात्वं हीयते। तथा च वसिष्ठः—

अद्भिर्वाचा च दत्तायां म्रियेतादौ वरो यदि।
न च मन्त्रोपनीता स्यात्कुमारी पितुरेव सा ॥ इति।

वरणानन्तरं देशान्तरगमने विशेषमाह कात्यायनः—

वरयित्वा तु यः कश्चित् प्रणश्येत्पुरुषो यदा।
त्रीनृतून्समतिक्रम्य कन्याऽन्यं वरयेद्वरम् ॥ इति ॥

शुल्कं दत्त्वा यदि वरो म्रियेत तदा किं कर्तव्यमित्यत आह मनुः—

कन्यायां दत्तशुल्कायां म्रियेत यदि शुल्कदः।
देवराय प्रदातव्या यदि कन्यानुमन्यते ॥ इति।

देशान्तरगमने तु विशेषः कात्यायनेनोक्तः।

प्रदाय शुल्कं गच्छेद्यः कन्यायाः स्त्रीधनं तथा ॥

धार्या सा वर्षमेकन्तु दद्यान्यस्मै विधानतः ॥ इति ।
एवं च वाग्दानादारभ्य सप्तपदाभिक्रमणात् प्राग्दोषदर्शने मरणादौ वा कन्यामन्यस्मै दद्यादित्युक्तम् भवति ॥

यत्तु साचेदक्षतयोनिरितिमनुवचनं तद्युगान्तरविषयम् । उक्तवचननिचयात् । अत एव तादृश्या मनूक्तस्त्यागोऽपि सांप्रतविषय एव । यथा—
विधिवत्प्रतिगृह्यापि त्यजेत्कन्यां विगर्हिताम् ।
व्याधितां विप्रदुष्टां वा च्छद्मना चोपपादिताम् ॥
विगर्हितां पूर्वं प्रतिगृहीतामक्षतयोनिमपीति मेधातिथिः । विप्रदुष्टामन्यगतभावामिति ।
नारदोऽपि—
नादुष्टां दूषयेत्कन्यां नादुष्टं दूषयेद्वरम् ।
दोषे सति न दोषः स्यादन्योन्यं त्यजतो द्वयोः ॥इति।
तदयं निष्कर्षः—
अथ कन्यागुणदोषौ । तत्र याज्ञवल्क्यः—
अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् ।
अनन्यपूर्विकां कान्तां असपिण्डां यवीयसीम् ॥
अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम् ।
अविप्लुतब्रह्मचर्योऽस्खलितब्रह्मचर्यः । एतच्च प्राशस्त्यार्थम् ।अन्यथा 'भार्यायै पूर्वमारिण्यै दत्वाग्नीनन्त्यकर्मणि । पुनर्दारक्रियां कुर्यात्पुनराधानमेव च' इति मनुवचने पुनर्दारक्रियाकरणोपदेशानुपपत्तेः । लक्षण्यां लक्षणे साध्वीं प्रशस्तलक्षणामित्यर्थः । तथा च काशीखण्डम्—सदा गृही सुखं भुङ्क्ते स्त्री लक्षणवती यदि ।

ततः सुखसमृद्ध्यर्थमादौ लक्षणमीक्षयेत् ॥ लक्षणवती प्रशस्त लक्षणा, प्रशंसयां मत्वर्थविधानात् । अनन्यपूर्विकां नास्ति अन्यः पूर्वो यस्यास्तां पुरुषान्तरायावाग्दत्तां पुरुषान्तरेणापरिगृहीतामभुक्तां चेत्यर्थः । कान्तां कमनीयां मनश्चक्षुषोरानन्दकरीम् । तथाचाप-स्तम्बः—यस्यां मनश्चक्षुषोर्निबन्धस्तस्यामृद्धिरिति । यवीयसीं कनिष्ठाम् । आरोगिणीमतिशयितरोगरहिताम् । अतिशयने मत्वर्थ-विधानात् । भ्रातृमतीमिति पुत्रिकात्वशङ्काव्युदासार्थम् । तथा च मनुः—

यस्यास्तु न भवेद् भ्राता न विज्ञायेत वा पिता ।
नोपयच्छेत तां प्राज्ञः पुत्रिकाधर्मशङ्कया ॥

पितरि ज्ञाते तद्वाक्यादेव पुत्रिकात्वाशंकानिरासः संभवतीति न विज्ञायेत वा पितेत्युक्तम् । अथवा यस्या भ्राता न भवति तां पुत्रिकाशङ्कया नोपयच्छेत् । यस्यास्तु पिता न ज्ञायतेऽयमस्या जनयितेति, तां गूढोत्पन्नां अधर्मशङ्कया नोपयच्छेदित्यर्थः । क-न्यापितुः पुत्रिकात्वाभिसन्धेरभावे त्वभ्रातृकापि विवाह्यैव ।

यत्र कन्यापितुर्नास्ति पुत्रिकाधर्मयाचना ।
तत्राभ्रातृमतीं चापि कन्यां सद्यः समुद्वहेत् ॥

इति शङ्खवचनात् । व्यासः—

अनन्यपूर्विकां लक्ष्मीं शुभलक्षणसंयुताम् ।
धृताधोवसनां गौरीं विख्यातदशपूरुषाम् ।
ख्यातनाम्नः पुत्रवतः सदाचारवतः सतः ॥
दातुमिच्छोर्दुहितरम् प्राप्य धर्मेण चोद्वहेत् ॥

धृताधोवसनामनग्नाम् किञ्चिदुपजातलज्जा-मिति यावत् । स्तनयोरनुद्रेकादधोधृतोत्तरीया-

मिति द्योतयितुमधःपदम् । अत एव गौरीम् ।
अत एव स्मरन्ति—

एष्टव्या बहवः पुत्रा यद्यप्येकोऽपि गयां व्रजेत् ।
गौरीं वाप्युद्वहेद्भार्यां नीलं वा वृषमुत्सृजेत् ॥

यजेत वाऽश्वमेधेनेति तृतीयचरणे पाठान्तरम् ।
यस्याः पितृकुले पञ्च मातृकुले च पञ्चेत्येवं
दशपुरुषा विख्यातास्ताम् । तदसम्भवे ख्यात-
नाम्न इति । स्मृतिः—

धर्मार्थकाममोक्षाणां दाराः संप्राप्तिहेतवः ।
परीक्ष्यन्ते प्रयत्नेन पूर्वमेव करग्रहात् ॥ इति ॥

दृष्टार्थश्चायं निषेधः । हीनक्रियादिकुलात्कन्याग्रहणे हि न पित्र्यमनुवर्तन्ते । मातृकं द्विपदा इति स्मरणात् । सर्वे संक्रामिणो रोगा वर्जयित्वा प्रवाहिकामिति वैद्यकोक्तेश्चापत्यमपि तथैव स्या-दिति दृष्ट एव दोषः । तथा पुराणे—

मातुलान्भजते पुत्रः कन्याका भजते पितॄन् ।
यथाशीला भवेन्माता तथाशीला भवेत्सुता ॥

माधवीये मनुः—

पितुर्वा भजते शीलं मातुर्वोभयमेव वा ।
न कथंचन दुर्योनिः प्रकृतिं स्वां विमुञ्चति ॥

तत्रैव हारीतः—कुलानुरूपाः प्रजाः सम्भवन्ति ।
माधवाचार्योऽपि—एतच्च हीनक्रियादिवर्जनं ।
तथाविधापत्यपरिहारार्थमित्याह । मनुभाष्येऽपि
पूर्वैर्व्याख्यातृभिर्दृष्टमूलताऽस्य प्रतिषेधस्य व-
र्णितेत्युक्तम् ।

एवञ्च, ये दृष्टार्थास्ते तत्रैव प्रमाणम्, येत्वदृष्टार्थास्तत्र वैदिकशब्दानुमानमिति स्मृत्यधिकरणे मीमांसाभाष्यकारैरुक्तत्वान्नात्र वेदानुमानमिति हीनक्रियादिकुलजाया विवाहः सिध्यत्येव। तद्वोढुः प्रायश्चित्तमपि न भवति, निषेधस्य दृष्टमूलतया वैदिकत्वाभावेन दृष्टदोषमात्रभागित्वाद्दुरितापूर्वकल्पनानुपपत्तेः। तथाच भविष्यपुराणे—

दृष्टार्था च स्मृतिः काचिददृष्टार्था तथापरा।
दृष्टादृष्टार्थका काचिन्न्यायमूला तथापरा॥
अनुक्तवादिनी चान्या स्मृतिः पञ्चविधा मता।
सर्वा एता वेदमूला दृष्टार्थाः परिहृत्य तु॥
अत एव कुलेन हीनापि विवाहनीयेत्युक्तम्।
मनुरपि—
श्रद्दधानः शुभां विद्यामाददीतावरादपि।
अन्त्यादपि परं धर्मं स्त्रीरत्नं दुष्कुलादपि॥
इति दुष्कुलादपि स्त्रीरत्नमादेयमाह।

न च प्रदानं स्वाम्यकरणमिति मनुवचनेन वरस्य स्वाम्योत्पत्तेः कथमन्यस्मै तस्या दानमिति वाच्यम्; उत्सर्गस्यापवादेतरविषयत्वोपपत्तेः। प्रदानमिति प्रशब्दस्यार्थवत्त्वोपपत्तेश्च। न च वाग्दानव्यावर्तकतयैव तस्यार्थवत्त्वमिति वाच्यम्; तावन्मात्रपरत्वे प्रमाणाभावात्। तस्माद्वाग्दानवदेतद्व्यावर्तनेनापि तस्यार्थवत्त्वं वाच्यम्। विशेषहेतोरभावात्। किञ्च भार्यात्वार्थं किल सा दत्ता, भार्यात्वं च पाणिग्रहणात्। तस्मिंश्चानुत्पद्यमाने प्रदानमपि निवर्तते। यद्धि यदर्थं दत्तम्, तस्यानिष्पत्तौ तद्दानस्य निवर्तनीयत्वाभिधानात्। तथाच मनुः—

धर्मार्थं येन दत्तं स्यात्कस्मैचिद्याचते धनम् ।
पश्चाच्च न तथा तत्स्यान्न दत्तं तेन तद्भवेत् ॥

अन्यस्मै तस्या दानोपदेशाच्चैतदेवं प्रतिपत्तव्यम् । पुनः मनुः—

पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम् ।
तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे ॥

तेषां पाणिग्रहणमन्त्राणां निष्ठा परिसमाप्तिः । सप्तपदीगमनं पाणिग्रहणस्याङ्गमित्यभिप्रायः । तथा यमः—

नोदकेन न वाचा च कन्यायाः पतिरिष्यते ।
पाणिग्रहणसंस्कारात्पतित्वं सप्तमे पदे ॥

तुल्यन्यायात्सप्रतियोगिकत्वाच्च भार्यात्वमपि तदैव भवति । भार्याशब्दस्य यूपाहवनीयादिवदलौकिकसंस्कारयुक्तवचनत्वात् । न च यमवचनं पाणिग्रहणात्पूर्वं वरमरणमात्रविषयमिति तत्त्वकारोक्तं युक्तमिति वाच्यम् ; तावन्मात्रपरत्वे प्रमाणाभावात् , उत्तरार्द्धासंगतेश्च । लघुहारीतः—तत्रापि न पाणिग्रहणे जायापतित्वं कृत्स्नं हि जायापतित्वं सप्तमे पद इति’ ।

यत्तु निष्ठा भार्यात्वस्य समाप्तिरूपा इति तत्त्वकृद्भिर्व्याख्यातम् , तच्चिन्त्यम्; तेषामिति प्रत्यक्षमन्त्रप्रतियोगिनमुपेक्ष्य भार्यात्वस्येत्यध्याहारे मानाभावात् । हरिवंशेपि ‘पाणिग्रहणमन्त्राणां निष्ठा स्यात्सप्तमे पदे’ इत्युक्तम् ।

तत्र चाक्षतयोन्याः पुनर्विवाहे पौनर्भवत्वेन भर्त्रैत्यन्वयकरणादुगतप्रत्यागतासंस्कारे च कौमारेण भर्त्रैत्युत्पादनात् द्वितीयस्यैव पौनर्भवत्वं न पूर्वस्येति सिध्यति । तेन च पौनर्भवश्च काणश्चेति श्राद्धे, तथा पौनर्भवे द्विजे इति दाने च परपूर्वापतिस्तथेत्यादिना च प्रतिषेधोऽपि द्वितीयस्य पत्युस्तदुत्पन्नानां पुत्राणां चेति सर्व-

निबन्धसंमतम् । न क्वापि प्रथमस्य पत्युः पौनर्भवत्वेन तदपत्यानां वा निषेधो गम्यते । यद्यपि पुनर्भ्वा अयमिति संबन्धसामान्यविवक्षया पूर्वापरयोर्द्वयोरपि पत्योः पौनर्भवत्वं प्रतीयते, तथापि पुनर्भवतीतिव्युत्पत्तावन्यथानुपपत्त्या भार्येति शेषस्यावश्यकतया यत्प्रतियोगिकभार्यात्वेनास्याः पुनर्भूत्वं तस्योपस्थितस्य विशेषस्य परित्यागे कारणाभावात् बुद्धिस्थतया चायमितिसर्वनाम्ना परामर्शसंभवात्तस्यैव पौनर्भवत्वं युक्तम् ।

विकर्मस्थः सगोत्रो वा दासो दीर्घामयोऽपि वा ।
ऊढाऽपि देया सान्यस्मै सप्रावरणभूषणा" ॥

किंतु तासां पौनर्भवत्वाद्विवाहो जघन्यः । न च मातृवदेनां परित्यज्य बिभृयादिति भरणोपदेशो नोपपद्यत इति वाच्यम्; अन्येन विवाहिताया अपि मातृवद्भरणेऽनुपपत्त्यभावात् । अयं च पुनरुद्वाहः कलौ न भवति ।

ऊढायाः पुनरुद्वाहं ज्येष्ठांशं गोवधं तथा ।
कलौ पञ्च न कुर्वीत भ्रातृजायां कमण्डलुम् ॥

इत्यादिपुराणवचनात् । कलौ त्वाज्यस्येनैव तस्योपपत्तिः । नारदः—

दीर्घकुत्सितरोगार्ता व्यङ्गा संसृष्टमैथुना ।
दुष्टाऽन्यगतभावा च कन्यादोषाः प्रकीर्तिताः ॥

काश्यपः—सप्त पौनर्भवाः कन्या वर्जनीयाः कुलाधमाः ।
वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला ॥
उदकस्पर्शिता या च या च पाणिगृहीतिका ।
अग्निं परिगता या च पुनर्भूप्रसवा च या ॥
इत्येताः काश्यपेनोक्ता दहन्ति कुलमग्निवत् ।

कृतकौतुकमङ्गला कृतं कौतुकसूत्रेण मङ्गलं यस्याः सा

तथा बद्धकौतुकसूत्रेत्यर्थः । उदकस्पर्शिता उदकेनोदककरणाद्दा-नेन स्पर्शिता प्रतिग्राहिता । कृतकौतुकमङ्गला बद्धकङ्कणा, उदकस्पर्शिता उदकस्पर्शपूर्वकं दत्तेति रत्नाकरः । पाणिगृहीता कृतपाणिग्रहणा ता खल्वेता अन्यपूर्वाः । आसामपि विवाहो भवत्येव ॥ इति ।

न च गोत्रप्रवरयोर्मिलितयोः पर्युदासनिमित्तत्वं शङ्क्यम्; प्रत्येकं दोषाभिधानात् । तदाह बोधायनः—सगोत्रां चेन्मत्योपयच्छेन्मातृवदेनां बिभृयादिति । गौतमश्च असमानप्रवरैर्विवाह इति। शातातपोऽपि—परिणीय सगोत्रां तु समानप्रवरां तथा ।

कृत्वा तस्याः समुत्सर्गमतिकृच्छ्रं विशोधनम् ॥ इति ॥

आपस्तम्बः—समानगोत्रप्रवरां कन्यामूढ्वोपगम्य च । तस्यामुत्पाद्य चण्डालं ब्राह्मण्यादेव हीयते ॥ सङ्ग्रहे—सगोत्रां समानप्रवरां कामतः परिणीय प्रजामुत्पाद्य गुरुतल्पगव्रतं चरेत् । प्रजां चण्डालेषु निक्षिपेत् । अकामतस्तप्तकृच्छ्रं प्रजाया भरद्वाजगोत्रान्तर्भावः । प्रजानुत्पादने चान्द्रायणम् । विवाहमात्रे कृच्छ्रं सर्वत्र व्रतान्तेऽष्टोत्तरशतं होमः । परित्यक्तां तां जननीवद्रक्षेत् । स्मृत्यर्थसारेऽपि—

इत्थं सगोत्रसंबन्धिविवाहविषये स्थिते ।
यदि कश्चिज्ज्ञानतस्तां कन्यामूढ्वोपगच्छति ॥
गुरुतल्पव्रताच्छुद्ध्ये द्गर्भस्तज्जोऽन्त्यतां व्रजेत् ।
भोगतस्तां परित्यज्य पालयेज्जननीमिव ॥
अज्ञानाच्चेदैन्दवैस्तु शुद्ध्येद्गर्भस्तु कश्यपः ॥ इति ॥

वीरमित्रोदये तु पालनमथवाऽन्येन विवाह इति पालनविवाहयोर्विकल्पः प्रतिपादितः । अनेनेदं सूच्यते—यत् सगोत्रात्वद्दोष इव-

परिहरणीयदोषे सत्येव पुनर्विवाहपक्षोऽपि संभवति, अन्यथा तु मातृवत्परिपालनमेवेति । एतेन—अव्यङ्गाङ्गीमित्यादयोऽपि—व्याख्याताः ।

[ऋतुमति विवाह-विचारः] एतेन ऋतुमतीविवाहोऽपि—व्याख्यातः । ऋतुमत्या अपि विवाहो भवत्येव, किंत्वसौ जघन्यः । तथाच गृह्यसंग्रहः—

नग्निकां तु वदेत्कन्यां यावन्नर्तुमती भवेत् ।
ऋतुमती त्वनग्निका तां प्रयच्छेत्त्वनग्निकाम् ॥

तुकारः पक्षान्तरे । नग्निका तु श्रेष्ठेति सूत्रयता गोभिलेन नग्निकायाः श्रेष्ठत्वमुक्तम् । तत्पुत्रस्तु अनग्निकां प्रयच्छेदिति पक्षान्तरमाह : श्रेष्ठपक्षादन्योऽयं पक्षो जघन्य इत्यर्थः । एवंचर्तुमत्या विवाहनिन्दावचनानि नग्निकाया विवाहप्राशस्त्यतात्पर्यकानि । मीमांसाभाष्यकारैरप्युक्तं—'न निन्दा निन्द्यं निन्दितुं प्रवर्ततेऽपि तु इतरत् स्तौतीति । अन्यदुपरिष्टाद्वक्ष्यामः । तथा नारदः—

कन्यर्तुमुपेक्षेत बान्धवेभ्यो निवेदयेत् ।
ते चेन्न दद्युस्तां भर्त्रे ते स्युर्भ्रूणहभिः समाः ॥
यावन्तश्चर्तवस्तस्याः समतीयुः पतिं विना ।
तावत्यो भ्रूणहत्याःस्युस्तस्य यो न ददाति ताम् ॥
अतः प्रवृत्ते रजसि कन्यां दद्यात्पिता सकृत् ।
महदेनः स्पृशेदेनमन्यथैष विधिः सताम् ॥
ऋतोः परमपि दानं दर्शयति । भ्रूणहत्यावचनं निन्दार्थं । मनुः—
त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती ।
ऊर्ध्वं तु कालादेतस्माद्विन्देत सदृशं पतिम् ॥

उदीक्षेत प्रदातारमपेक्षेत । बोधायनः—

त्रीणि वर्षाण्यृतुमती काङ्क्षेत पितृशासनम् ।
ततश्चतुर्थे वर्षे तु विन्देत सदृशं पतिम् ॥
अविद्यमाने सदृशे गुणहीनमपि श्रयेत् ।

यत्तु विष्णुनोक्तम्—

'ऋतुत्रयमुपास्यैव कन्या कुर्यात्स्वयं वरम्' इति।
तद्गुणवद्वरलाभे सति द्रष्टव्यमिति माधवाचार्याः।

मनुः—

अदीयमाना भर्तारमधिगच्छेद्यदि स्वयम् ।
नैनः किञ्चिदवाप्नोति न च यं साधिगच्छति ॥
यमधिगच्छति सोऽपि न पापमाप्नोतीत्यर्थः ।

यमः—

एवं चोपनतां पत्नीं नावमन्येत्कदाचन ।
न तु तां बन्धकीं विद्यान्मनुः स्वायंभुवोऽब्रवीत् ॥

आश्वलायनः—

कन्यामृतुमतीं शुद्धां कृत्वा निष्कृतिमात्मनः ।
शुद्धिं च कारयित्वा तामुद्वहेदानृशंस्यधीः ॥
पिता ऋतून् स्वपुत्र्यास्तु गणयेदादितः सुधीः ।
दानावधि गृहे यत्नात्पालयेच्च रजोवतीम् ॥
दद्यात्तदृतुसंख्या गाः शक्तः कन्यापिता यदि ।
दातव्यैकापि निःस्वेन दाने तस्या यथाविधि ॥
दद्याद्वा ब्राह्मणेष्वन्नं अतिनिस्वः सदक्षिणम् ।
तस्यातीततु संख्येषु वराय प्रतिपादयेत् ॥
उपोष्य त्रिदिनं कन्या रात्रौ पीत्वा गवां पयः ।

अदृष्टरजसे दद्यात्कन्याय रत्नभूषणम् ॥

तामुद्वहन्वरश्चापि कूष्माण्डैर्जुहुयाद्घृतम् ।

शुद्धां निर्दोषामव्यभिचारिणीमिति यावत् । दाने दाननिमित्तम् । तस्यातीतेति विसर्गलोपः सन्धिरार्षः । अतीतर्तु संख्येष्विति ब्राह्मणेष्वित्यनेनान्वेति । कन्याया यावन्त ऋतवोऽतीतास्तावत्संख्येषु ब्राह्मणेषु सदक्षिणमन्नं दत्त्वा तां वराय प्रतिपादयेदित्यर्थः । कन्यायाः शुद्धिप्रकारमाह—उपोष्येत्यादिना । कूष्माण्डैः कूष्माण्डमन्त्रैः । ते च मन्त्राः 'यद्देवा देवहेलनमि'त्यादयस्तैत्तरीयारण्यके पठिताः । एवं चतुर्मतीविवाहनिन्दावचनानि अन्यकृतप्रतीकारविषयाणि पर्यवस्यन्ति । मनुः—

अलंकारं नाददीत पित्र्यं कन्या स्वयंवरा ।
मातृकं भ्रातृदत्तं वा स्तेना स्याद्यदि तं हरेत् ॥
पित्रे न दद्याच्छुल्कन्तु कन्यामृतुमतीं हरन् ।
स हि स्वाम्यादतिक्रामेदृतूनां प्रतिरोधनात् ॥

अत्र लक्षणादिकन्यागुणानभिधायाह याज्ञवल्क्यः—

एतैरेव गुणैर्युक्तः सवर्णः श्रोत्रियो वरः ।
यत्नात्परीक्षितः पुंस्त्वे युवा धीमाञ्जनप्रियः ॥

एतदपि प्राशस्त्यार्थम् ।

ब्राह्मणक्षत्रियविशां शूद्राणां च परिग्रहे ।
सजातिः श्रेयसी भार्या सजातिश्च पतिः स्त्रियाः ॥

इति नारदवचनम् ।

दद्याद्गुणवते कन्यां नग्निकाम् ब्रह्मचारिणे ।
अपि वा गुणहीनाय नोपरुन्ध्याद्रजस्वलाम् ॥

इति बोधायनवचनाच्च । नग्निका अनागतार्तवा । यत्तु मनुवचनम्, "काममामरणात्तिष्ठेद् गृहे कन्यर्तुमत्यपि । नचैवैनाम् प्रयच्छेत्तु गुणहीनाय कर्हिचित्" इति, तद्गुणवते दद्यादित्यस्य प्रशंसार्थम्, न तु ऋतुमत्या गृहेऽवस्थानार्थम् । 'नोपरुन्ध्याद्रजस्वला-मिति' बोधायनविरोधात् । वक्ष्यमाणवचनजाताच्च ।

इदं हि पूर्वमुक्तम्—

उत्कृष्टायाभिरूपाय वराय सदृशाय च ।
अप्राप्तामपि तां कन्यां तस्मै दद्याद्यथाविधि ॥

इति । न हि काममामरणादित्यनेन ऋतुमत्याः गृहे स्थिति-र्विधीयते । किन्तु वरमृतुमत्यपि कन्या आमरणाद्गृहे तिष्ठेन्नचै-वैनां निर्गुणाय दद्यादिति गुणवते दानं स्तूयते । यथा—

वरम् भक्ष्यमभक्ष्यं च पिबेद्वा गर्हितं च यत् ।
वर्जनीयं प्रयत्नेन मूलकं मदिरासमम् ॥

इत्यभक्ष्यभक्षणादिकं न विधीयते, किन्त्वभक्ष्यभक्षणादि-तोऽपि मूलकभक्षणं गर्हितमिति मूलकभक्षणं निन्द्यते । तथा ऋतुमत्या गृहेऽवस्थानादपि गुणहीनाय दानं गर्हितमित्यनेन गुणवते दानमेव स्तूयते । एवं च गुणहीनाय न दद्यादित्यपि गुणवत्प्रशंसार्थम् । अपि गुणहीनायेति स्मरणात् । नोपरुन्ध्याद्रज-स्वलामित्यपि नग्निकादानप्रशंसार्थम् । तथा च गुणवते देया नग्निका देयेति मनुबोधायनवचनयोरर्थः ।

अथैवं "वरश्चेत्कुलशीलाभ्यां न युज्येत कथञ्चन ।
न मन्त्राः कारणं तत्र न च कन्याऽनृतं भवेत् ॥
समाच्छिद्य तु तां कन्याम् बलादक्षतयोनिकां ।
पुनर्गुणवते दद्यादिति शातातपोऽब्रवीत् ॥"

इति शातातपेन,—

'हीनस्य कुलशीलाभ्यां हरन्कन्यां न दोषभाक्।

न मन्त्राः कारणं तत्र न च कन्यानृतं भवे् ॥

इति यमेन च गुणहीनाय दत्तां पुनराच्छिद्य गुणवते दद्यादित्युक्तं कथं सङ्गच्छत इति चेदेवं तर्हि मतभेदोऽस्तु। तथाच वरमृतुमत्यपि देया, तथापि गुणहीनाय न दातव्येति मनोर्मतम्, गुणहीनाय दत्ताऽप्याच्छिद्य पुनर्गुणवते देयेति शातातपादीनाम् मतम्, वरम् गुणहीनाय देया न जात्वपि ऋतुमती दातव्येति बोधायनस्य मतम्। अनन्यगतेर्वचनानाम् मुनीनां मतभेदस्य च बहुलमुपलम्भात्। मनोर्मतेऽपि ऋतुमत्या गृहेऽवस्थितिर्दोषायैवेति तद्वचनभङ्ग्यावगम्यते। परन्तु गुणहीनाय दाने ततोऽपि दोषातिशय इति तस्य मतं लक्ष्यते। विष्णुः—

यावन्त्च कन्यामृतवः स्पृशन्ति तुल्यैः सकामामपि याच्यमानाम्।
तावन्ति भूतानि हतानि ताभ्याम् मातापितृभ्यामिति धर्मवादः ॥
सकामां तुल्यैर्याच्यमानामिति विशिंषन् व्यतिरेकेनैष दोष इत्यभिप्रैतीत्यवगम्यते।

अथ विवाहकालः—सम्वर्तः।

रोमदर्शनसंप्राप्ते सोमो भुङ्ऽक्तेऽथ कन्यकाम्।

रजो दृष्ट्वा तु गन्धर्वः कुचौ दृष्ट्वा तु पावकः ॥

अष्टवर्षा भवेद्गौरी नव वर्षा तु रोहिणी।

दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला ॥

माता चैव पिता चैव ज्येष्ठो भ्राता तथैव च।

त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम् ॥

तस्मादुद्वाहयेत्कन्यां यावन्नर्तुमती भवेत्।

विवाहोऽष्टमवर्षायाः कन्यायास्तु प्रशस्यते ॥
अष्टावर्षा भवेद्गौरीति वचनं यमाङ्गिरसोरपि ।
मरीचिः—गौरीं ददन्नाकपृष्टं वैकुण्ठं रोहिणीं ददत् ।
कन्यां ददद्ब्रह्मलोकं रौरवं तु रजस्वलाम् ॥ स्मृतिः—
सर्वेषामेव दानानामेकजन्मानुगं फलम् ।
हाटकगृहगौरीणां सप्तजन्मानुगं फलम् ॥

भट्टभाष्ये स्मृतिः—
यावन्न लज्जयाङ्गानि कन्या पुरुषसंनिधौ ।
योन्यादीन्यवगूहेत तावद्भवति नग्निका ॥

आचारमाधवीयेऽप्येतत्, किंतु तत्र नग्निकेत्यत्र कन्यकेति पाठः । संग्रहकारोऽपि—
यावच्चेलं न गृह्णाति यावत्क्रीडति पांसुभिः ।
यावद्दोषं न जानाति तावद्भवति कन्यका ॥

माधवीये स्मृतिः—जन्मतो गर्भधानाद्वा पञ्चमाब्दात्परं शुभम् । कुमारीवरणं दानं मेखलाबन्धनं तथा ॥ ज्योतिर्निबन्धे—षडब्द-मध्ये नोद्वाह्या कन्या वर्षद्वयं यतः । सोमो भुङ्क्ते ततस्तद्वद्ग-न्धर्वश्च तथानलः ॥ यतः प्रथमं वर्षद्वयं सोमो द्वितीयं वर्षद्वयं गन्ध-र्वस्तृतीयं वर्षद्वयं अनलो भुङ्क्ते, अतः षडब्दमध्ये नोद्वाह्येत्यर्थः ।

न चैवं सोमादिभोगकालबोधकं रोमदर्शनसंप्राप्त इत्यादि संवर्तवाक्यं विरुध्यत इति वाच्यम्; द्वयोरप्यर्थवादरूपतया विरोधा-भावात् । ज्योतिर्निबन्धे तावत् षडब्दमध्ये नोद्वाह्येत्यस्यार्थवाद-तया वर्षद्वयं यत इत्येवमादिकमुक्तम् । संवर्तेनापि रोमदर्शनसं-प्राप्ते इत्याद्यर्थवादमभिधाय, तस्माद्विवाहयेत्कन्यां यावन्नर्तुम-तीभवे दित्युपसंहृतम् ।

उभयत्रैव विधेयत्वेनाभिमतोऽर्थस्तदनुगुणार्थवादोपन्यासेन समर्थ्यत इति न किंचिदनुचितम्। गृह्यसंग्रहः—

अप्राप्ता रजसो गौरी प्राप्ते रजसि रोहिणी।
अव्यञ्जिता भवेत्कन्या कुचहीना च नग्निका॥
व्यञ्जनैस्तु समुत्पन्नैः सोमो भुञ्जीत कन्यकाम्।
पयोधरैस्तु गन्धर्वो रजसाग्निः प्रकीर्तितः॥
तस्माद्व्यञ्जनोपेतामरजामपयोधराम्।
अभुक्तां चैव सोमाद्यैः कन्यकां तु प्रशस्यते॥

रजस इति शैषिके षष्ठी। भुञ्जति भुङ्क्ते। अरजामरजस्कां ईदृशीं कन्यामभिप्रेत्य प्रशस्यते प्रशंसा क्रियते। "नग्निका श्रेष्ठेति सूत्रयता गोभिलेनेति वाक्यशेषः। सकर्मकादपि भावे लट्। अत्र च विवाहकर्त्रा तावद्धृताधोवसनाया गौर्याः प्राप्तौ यतनीयम्; तत्रैव तस्याभ्युदयविशेषोपदेशात्। रोहिणीकन्ययोस्तु ततोऽपकर्षः। पश्चाब्दषडब्दोत्तरकलपावापद्विषयौ। सप्तसंवत्सरादूर्ध्वं विवाहः सार्ववर्णिकः। कन्यायाः शस्यते राजन्नन्यथा गर्भगर्हितः इति महाभारतवचनात्। दातुस्तु निर्वसनाया दानं प्रशस्तमित्यूहनीयम्। पैठीनसिः—

यावन्नोद्भिद्यते स्तनौ तावदेव देयाऽर्थतु मती भवति दाता प्रतिगृहीता च नरकमाप्नोति पितृपितामहप्रपितामहाश्च विष्ठायां जायन्ते तस्मान्नग्निका दातव्या। नग्निकाऽनागतार्तवा।
माधवीये वसिष्ठः—

प्रयच्छेन्नग्निकां कन्यां ऋतुकालभयात्पिता।
ऋतुमत्यां हि तिष्ठन्त्यां दोषः पितरमृच्छति॥

अङ्गिराः—

प्राप्ते तु द्वादशे वर्षे यदा कन्या न दीयते ।
तदा तस्यास्तु कन्यायाः पिता पिबति शोणितम् ॥
यमः—कन्या द्वादशवर्षाणि याऽप्रदत्ता गृहे वसेत् ।
भ्रूणहत्या पितुस्तस्याः सा कन्या वरयेत्स्वयम् । तथा—
प्राप्ते द्वादशमे वर्षे यः कन्यां न प्रयच्छति ।
मासि मासि रजस्तस्याः पिता पिबति शोणितम् ॥
माता चैव पिता चैव ज्येष्ठो भ्राता तथैव च ।
त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम् ॥
यस्तां विवाहयेत्कन्यां ब्राह्मणो मदमोहितः ।
असंभाष्यो ह्यपांक्तेयः स विप्रो वृषलीपतिः ॥
वन्ध्या तु वृषली ज्ञेया वृषली तु मृतप्रजा ।
शूद्री तु वृषली ज्ञेया कुमारी तु रजस्वला ॥

प्रायेणैतावता कालेनतु मती भवतीति द्वादशवर्षोपादानम्, सर्वथा त्वनागतार्तवा दातव्येत्यत्र तात्पर्यम् ।

अत एवात्रिकाश्यपौ—

पितुर्गृहे तु या कन्या रजः पश्यत्यसंस्कृता ।
भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृता ॥
यस्तु तां वरयेत्कन्यां ब्राह्मणो ज्ञानदुर्बलः ।
अश्राद्धेयमपांक्तेयं तं विद्याद्वृषलीपतिम् ॥

द्वादशवर्षग्रहणं न कुर्वाते । अत एव पूर्वलिखितवचनेष्वपि नाग्निकाया दानमुपदिष्टम् । तथा महाभारते—

त्रिंशद्वर्षः षोडशवर्षां भार्यां विन्देत कन्यकाम् ।
अतोऽप्रवृत्ते रजसि कन्यां दद्यात्पिता सकृत् ॥
महदेनः स्पृशेदेनमन्यथैष विधिः सताम् ।

अन्यथा प्रवृत्ते रजसि ।

यत्तु मनुवचनं 'त्रिंशद्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीम् । त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः" इति ॥ इयता कालेन यवीयसी कन्या वोढव्या न पुनरेतावद्वयस एव विवाह इति तस्यार्थः । तथाच शिष्टसमाचारो न विरोत्स्यते । मृतभार्यस्य पुनर्दारकरणे नैष वयोनियमः संभवतीति पुनर्दारकरणोपदेशोऽन्यथा न स्यात् । विवाहप्रकरणमतिकाम्याभिधानाच्चैतदेवं प्रतिपत्तव्यम् । मेधातिथिरप्येवम्—पूर्वोक्तमहाभारतवचनस्वरसादप्येषैव व्याख्या समादर्तव्या भवति । मन्वर्थमुक्तावल्यामप्युक्तम्—एतच्च योग्यकालप्रदर्शनपरं । न तु नियमार्थम् । प्रायेणैतावता कालेन गृहीतवेदो भवति, त्रिभागवयस्का कन्या वोढुं नो योग्येति गृहीतवेदश्चोपकुर्वाणको गृहस्थाश्रमं प्रति न विलम्बेतेति सत्वर इत्यस्यार्थ इत्यन्तेन । विष्णुपुराणम्—

वर्षेणैकगुणां भार्यां उद्वहेत् त्रिगुणः पुमान् ॥ इति ।

एतदपि प्राशस्त्यार्थम् । कन्याया यवीयस्त्वमात्र एव विवाहे तात्पर्यम् । विवाहतत्त्वार्णवेऽप्येषैव व्यवस्था । अत एव यवीयसीमित्यवरवयस्कामिति च तत्रोक्तम् । अत एव मनुना त्रिंशद्वर्षस्य द्वादशवर्षीया, महाभारतेन च षोडशवर्षीया विवाहोऽभिहित इति ध्येयम् ॥

[ऋतुमत्या विवाहे सति तद्धर्माधिकारविचारः]

तत्र चेदमालोचनीयम्—यत् ऊढा ऋतुमत्यपि विधवेव किं परित्याज्या, उत प्रायश्चित्ताचरणपूर्वकं धर्माधिकारमप्यर्हति वा नवेति । तत्र केचिन्मन्यन्ते—यत् ऋतुमत्यप्यूढा न परित्याज्या, किन्तु प्रायश्चित्ताचरणपूर्वकं धर्माधिकारमप्यर्हत्येवेति । अयमाशयः—यथाहि सगोत्राया विधवा-

याश्च परित्यागो विहितः, न तथा ऊढाया ऋतुमत्याः परित्यागः, कुत्रापि विहितः, प्रत्युत तस्याः स्वीकारार्हतैव प्रायश्चित्तानन्तरं सर्वत्र प्रतिपाद्यते। अयमत्र निष्कर्षः—विधवात्वं हि स्त्रीणां न पातित्यापादकम्, किन्तु सम्यक् परिपालितं श्रेयस एव भवति। नहि कुत्रापि वैधव्यमपि पातित्यापादकतया विहितमिति तस्मिन् निमित्ते कस्यापि प्रायश्चित्तस्याविधानात्, प्रायश्चित्तशतेनाप्यपरिहरणीयत्वात्, अनन्यपूर्विकात्वांशस्य विवाहाधिकारप्रयोजकस्य संपादनं न संभवति। ऋतुमत्यां रजोदर्शनं हि विवाहानन्तरं न केवलमस्पृश्यत्वादिप्रयोजकम्, न वा विवाहात्पूर्वं तस्या वृषलीत्वस्य तत्पित्रादीनां भ्रूणहत्यादिपापस्य च प्रयोजकम्। किंतु तत्पतेरपि वृषलीपतित्वसंपादकमिति पातित्यप्रयोजकम्। एवं रजोदर्शने निमित्ते प्रायश्चित्तस्य विधानात् शास्त्रप्रामाण्येन तद्दोषनिर्हरणे कृते विवाहाधिकारयोग्यता सिद्ध्यति। तदिदं सिद्धम्—विधवाविवाहो न विधवायाः संस्कारार्थो न वा धर्मप्रजार्थः। ऋतुमतीविवाहस्तु सर्वार्थो भवतीति।

[ऋतुमतीविवाहस्य ब्राह्मणेतरविषयत्वम्]

इयान् विशेषः—विधवाविवाहः शूद्रेषु समाजविशेषमात्रसाधारणः, ऋतुमतीविवाहस्तु ब्राह्मणेतरविषयः। अत एव—

पितृगृहे तु या कन्या रजः पश्यत्यसंस्कृता।
सा कन्या वृषली ज्ञेया तत्पतिर्वृषलीपतिः॥
माता चैव पिता चैव ज्येष्ठो भ्राता तथैव च।
त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम्॥
उद्वहेद्यस्तु तां कन्यां ब्राह्मणो मदमोहितः।
असंभाष्यो ह्यपाङ्क्तेयः स विप्रो वृषलीपतिः—

इत्यादि लघुशातातपलध्वाश्वलायनप्रजापत्यादिवचनेषु ब्राह्म-णपदप्रयोग उपपद्यते। अयं भावः—विवाहस्त्वष्टवर्षायाः कन्या-याश्च प्रशस्यते—इत्यादिवचनानुसारेणाष्टवर्षायाः कन्याया विवाहे प्रशस्तत्वम्, रजोदर्शनतः पूर्वं नववर्षादेर्गौणत्वम्, रजोदर्शने तु व्याध्यादिप्रयुक्ते आकस्मिके आपत्कल्पनया द्वादशादिवयस्काया अपि विवाहयोग्यता वर्तते, परन्तु सापि ब्राह्मणेतरविषयैव, न तु सर्वसाधारणी। तथाच रजोदर्शनतः पूर्वमेव ब्राह्मणैः स्त्रीणां विवाहः संपादनीयः। अन्यैस्त्वापत्कल्पनया रजोदर्शनान्तरमपि विवाहः कर्तुं शक्यते।

[कन्या विवाहस्य गौणकालविचारः]

अयं भावः—"स्त्रीणामुपनयमस्थाने विवाहं मनु-रब्रवीत्" इति वचनेनोपनयनकाल एव विवाहस्य मुख्यः कालः, तत्र 'चाष्टवर्षं ब्राह्मणमुपनयीते' त्यादिना ब्राह्मणा-नामष्टमवयस एव मुख्यकालत्वात् स एव प्रशस्तः। "आषोड-शाद्ब्राह्मणस्य सावित्री नातिवर्तते" इति मनुवचनेन षोडशवयः-पर्यन्तं कालोऽभ्यनुज्ञायते।

तदुक्तं—पराशरमाधवीये यमः—

स्त्रीणामुपनयस्थाने विवाहं मनुरब्रवीत्॥
गर्भाष्टमेऽष्टमे वाब्दे ब्राह्मणस्योपनायनम्॥
राज्ञामेकादशे सैके विशामेके यथाकुलम्॥
(या० स्मृ० १-१४)

आषोडशादाद्वाविंशादाचतुर्विंशाच्च वत्सरात्॥
ब्रह्मक्षत्रविशां काल औपनायनिकः स्मृतः॥
अत ऊर्ध्वं भवन्त्येते सर्वधर्मबहिष्कृताः॥
सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः॥

(या० स्मृ० १-३७-३८)

अत ऊर्ध्वं भवन्त्येते यथाकालमसंस्कृताः ॥
सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः ॥
नैतैरपूतैर्विधिवदापद्यपि हि कर्हिचित् ॥

ब्राह्मान् यौनांश्च सम्बन्धानाचरेत् ब्राह्मणः सह ॥ इति (मनु०२-४०)

नहि वयं षोडशे वयस्येव विवाहो योग्य इति वदामः, किन्तु तस्मिन्नपीति। ततश्चाष्टमादिवयस्काया इवाषोडशवर्षाया एव ब्राह्मणकन्यायाः, एवमाद्वाविंशादिवयस्कायाः क्षत्रियादिकन्यायाश्च विवाहो योग्य एव। अत एव—

विवाहे वितते यज्ञे होमकाल उपस्थिते।
कन्यामृतुमतीं दृष्ट्वा कथं कुर्वन्ति याज्ञिकाः ॥

इत्याश्वलायनवचनमुपपन्नं भवति। अन्यथा—

अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी।
दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला ॥

इति वचनानुसारेणैकादशवयसः पूर्वमेव विवाहयोग्यत्वेऽप्रसक्तविचारापत्तिरत्र स्यात्। नहि वातप्रकृतिकाः पित्तप्रकृतिका दारुणप्रकृतिकाः याः का अपि एकादशे वयसि दृष्टरजस्का भवन्ति। तदुक्तम्—

वातजा पित्तजा चेति दारुणा त्रिविधा स्मृता।
वातजा द्वादशे वर्षे पित्तजा च चतुर्दशे ॥
दारुणा षोडशे वर्षे शोणितं पतिति ध्रुवम् ॥

(इति कालनिर्णयदीपिका)

दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला।

प्राप्ते तु द्वादशे वर्षे रजः स्त्रीणां प्रवर्तते ॥

(आपस्तम्बः) इति । एतेन—

गौरीं ददत् नाकपृष्ठं वैकुण्ठं रोहिणीं ददत् ।
कन्यां ददत् ब्रह्मलोकं रौरवं तु रजस्वलाम् ॥

इत्यादिवचनान्यपि व्याख्यातानि । एतेषां वचनानां द्वादशाद्यधिकवयस्काभिप्रायत्वात् । अयमाशयः—ऋतुकालोपक्रमो हि कासाञ्चन द्वादशे वयसि, कासाञ्चन चतुर्दशे वयसि, कासाञ्चन षोडशे वयसि । तत्र यदि वातप्रकृतिकत्वादिनिर्णयः, तर्हि कासाञ्चन षोडशवयःपर्यन्तमपि दारुणानां विवाहं विनाऽवस्थापनं योग्यमेव ऋत्वनन्तरं विवाहायोग्यतापत्तेऽपि । तत्र मुख्यः कालः अष्टमं वयः, द्वादशवर्षपर्यन्तं गौणः कालः, ततः षोडशवर्षपर्यन्तं आपत्कल्प इति विवेकः । षोडशवयसोऽनन्तरं तु व्रात्यसंस्कारेणैव विवाहयोग्यता । सर्वथा तु द्वादशवर्षमारभ्यैव विवाहकालव्यवस्थापनेन यदि परिस्थितेरस्या आनुकूल्यं भवति, तर्हि तद्व्यवस्थापनमिदं योग्यमेव प्रतीयते । तदिदं सिद्धम्—न "अत ऊर्ध्वं रजस्वला" इतिवाक्यानुसारेण दशमवयसः पूर्वमेव विवाहो योग्य इति केचित् मन्यते ।

[तत्रान्यमतम्] अन्ये तु—

ऋतुकाल इति प्रोक्तं गार्ग्यादिमुनिसत्तमैः ।
स्त्रीचिन्हं यौवनं प्राप्य षोडशे वत्सरे सदा ॥
कृत्रिमाद्दशमादूर्ध्वं औषधस्य च सेवनात् ।
एकादशे द्वादशे वा ऋतुकालं वदन्ति हि ॥
अनुरागाद् द्वादशाब्दे त्रयोदश्यां तु केचन ।
चतुर्दशे पञ्चदशे स्त्रीचिन्हं तु भविष्यति ॥

इतिवचनानुसारेण दशमवय आरभ्यापि ऋतुकालस्य संभवात् "दशवर्षा भवेत्कन्या अत उर्ध्वं रजस्वला" इति स्मृतिवचनं न कथमपि विरुद्धम्। तत्र च का वा किम्प्रकृतिरिति निर्णयादिकमतिक्लेशसाध्यमिति एकादशवय आरभ्यैव गौरवप्राप्तेः फलस्य वर्णनात् अनिष्टफलत्वेन निन्दनाच्च ततः पूर्वमेव विवाहो योग्यः। यत्तु—

ऊनषोडशवर्षायामप्राप्तः पञ्चविंशतिम्।
यद्याधत्ते पुमान् गर्भं गर्भस्थः स विपद्यते॥
जातो वा न चिरं जीवेत् जीवेद्वा दुर्बलेन्द्रियः।
तस्मादत्यन्तबालायां गर्भाधानं न कारयेत्॥
इति (सुश्रुते १०)
पूर्णषोडशवर्षा स्त्री पूर्णविंशेन संगता।
शुद्धे गर्भाशये मार्गे रक्ते शुक्रेऽनिले हृदि॥
वीर्यवन्तं सुतं सूते ततो न्यूनाब्दायाः पुनः।
रोग्यल्पायुरधन्यो वा गर्भो भवति नैव वा॥

इति (अष्टाङ्गशारी० १०८-९) सुश्रुतादिवचनजातम्, तदिदमपि दारुणप्रकृतिस्त्रीविषयमेव, न वातादिप्रकृतिस्त्रीविषयम्। अत एव—प्रायिकं चैतत्, अर्वागपि साधुगर्भदर्शनात् इति अष्टाङ्गहृदयव्याख्यायामरुणदत्तकृतायामुक्तश्लोकगतं विवरणमुपपद्यते। तथाच दशमवयसः पूर्वमेव विवाहो योग्यः, न तु द्वादशादिवयसि। एतदेवाभिप्रेत्योक्तम्—

कन्या द्वादशमे वर्षे प्रदातुर्न गृहे वसेत्।
भ्रूणहत्या पितुस्तस्याः सा कन्या वरयेत्स्वयम्॥
(यमः)

कन्या द्वादशवर्षाणि याऽप्रदत्ता गृहे वसेत् ।
ब्रह्महत्या पितुस्तस्या……(निर्णय० यमः)
प्राप्ते तु द्वादशे वर्षे यः कन्यां न प्रयच्छति।
मासि मासि रजस्तस्याः पिबन्ति पितरोऽनिशम् ॥
(पराशरः)
अष्टमे तु भवेद्गौरी नवमे नग्निका भवेत् ।
दशमे कन्यका प्रोक्ता द्वादशे वृषली स्मृता ॥
(संवर्तः)
गौरीं ददत् नाकलोकं वैकुण्ठं रोहिणीं ददत् ।
कन्यां ददत् ब्रह्मलोकं रौरवं तु रजस्वलाम् ॥
(मरीचिः)

एवं वर्णयतामस्माकं न द्वादशवयसि रजोदर्शने कन्याया विवाहायोग्यतेत्याशयः, किन्तु तया साकं पित्रादीनां संबन्धविच्छित्तिबोधन एव । अत एव पूर्वोदाहृते "कन्या द्वादशमे वर्षे" इति वचने "सा कन्या वरयेत्स्वयम्" इति स्वयंवरणाधिकारः प्रतिपादित उपपद्यते । अयं भावः—ब्राह्मविवाहादिषु हि—

आच्छाद्यार्चयित्वा च श्रुतिशीलवते स्वयम् ।
आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्तितः ॥
यज्ञे तु वितते सम्यगृत्विजे कर्म कुर्वते ।
अलङ्कृत्य सुतादानं दैवं धर्मं प्रचक्षते ।।२८॥
एकं गोमिथुनं द्वे वा वरादादाय धर्मतः ।
कन्याप्रदानं विधिवदार्षो धर्मः स उच्यते ॥
सहोभौ चरतां धर्ममिति वाचाऽनुभाष्य च ।
कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः ॥

ज्ञातिभ्यो द्रविणं दत्वा कन्यायै चैव शक्तितः ।
कन्याप्रदानं स्वाच्छन्द्यादासुरो धर्म उच्यते ॥

इत्यादिवचनविहितेषु दानपूर्वकत्वं यदपेक्षितम्, तदिदमृतुमत्याः स्वयंवरणार्थं प्रवृत्ताया अन्यकर्तृकदानाभावेऽपि स्वकर्तृकदानेनैव संपादनीयम्, न तु तस्या दाने ऋत्वनन्तरं पित्रादीनामप्यधिकारोऽस्तीति स्वयंवरविधिनाऽवगम्यते । तदिदं च ऋतुमत्याः कन्यायाः पित्रादिस्वत्वनिषेधतात्पर्यकमित्येव गमयतीति पित्रादिसम्बन्धविच्छित्तिः स्पष्टमवगम्यते । यस्तु—

इच्छयाऽन्योन्यसंयोगः कन्यायाश्च वरस्य च ।
गान्धर्वः स तु विज्ञेयो मैथुन्यः कामसंभवः ॥

इति विहितो गान्धर्वविवाहः, स स्वयंवरणपूर्वकश्चेत् ऋतुमत्या अपि पूर्वोक्तरीत्या न दोषाय। परंतु नात्र पित्रादिसम्बन्धरक्षणसम्भवः। वस्तुतस्तु रजोदर्शनतः पूर्वमपि अनुरागो द्वादशे वयसि चतुर्दशे वा यस्याः कस्याश्चन दारुणप्रकृत्याः संभवतीति नायं विवाहो रजोदर्शनानन्तरमेव भवतीति गान्धर्वविवाहविधि र्न रजोदर्शनानन्तरमेव विवाहसाधको भवितुमर्हति। तथा च यदि पित्रादिदत्तां पितृस्वत्वमात्मनोऽभिमन्यमानां च दृष्टरजस्कां कन्यामुद्वहेत्, स सर्वात्मनाऽपाङ्क्तेयो वृषलतुल्यत्वादिति सिद्धम्। एतदेवाभिप्रेत्योक्तम्—

पितुर्गेहे तु या कन्या रजः पश्यत्यसंस्कृता ।
सा कन्या वृषली ज्ञेया तत्पतिर्वृषलीपतिः ॥
यस्तां समुद्वहेत् कन्यां ब्राह्मणो मदमोहितः ।
अश्राद्धेयमपाङ्क्तेयं तं विद्याद्वृषलीपतिम् ॥
या कन्या पितृवेश्मस्था यदि पुष्पवती भवेत् ।

असंस्कृता परित्याज्या न पश्येत्तां कदाचन ॥
विवाहे च न योग्या स्यात् लोकद्वयविगर्हिता ।
पितृवेश्मनि या कन्या रजः पश्यत्यसंस्कृता ॥
तस्यां मृतायां नाशौचं कदाचिदपि शाम्यति ।

यत्तु पुनः—
"काममामरणात्तिष्ठेत् गृहे कन्यर्तुमत्यपि ।
न चैवैनां प्रयच्छेत्तु गुणहीनाय कर्हिचित् ॥

इति मनुवचनम्, तदिदं ऋतुमत्यपीत्यपिशब्दयोगात् गुणवद्वरस्तुत्यर्थमित्येवावगन्तव्यम्। तथा च गुणवद्वरालाभेऽपि ऋतोः प्रागेव कन्योदानं योग्यम्, न तु ततः परम्। "त्रीणि वर्षाण्यृतुमती कांक्षेत पितृशासनम्" इति वाक्यं तु वयं मन्यामहे वाचा दत्तस्य गुणवतो वरस्य देशान्तरगमने पुनरागमनसंभावनायां वर्षत्रयप्रतीक्षणपरमिति। अत एव —

प्रतिगृह्य तु यः कन्यां नरो देशान्तरं व्रजेत्।
त्रीनृतून् समतिक्रम्य कन्यान्यं वरयेद्वरम् ॥

इति वचनमुपपद्यते। साधितमिदं पूर्वमेव विधवाविवाहविचारावसरे यत्—"नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ" इति वचनं वाग्दत्ताविषयमिति। तथाच वाग्दत्तस्यापि मरणे दिनत्रयमाशौचविधायकवाक्यानुसारेण वाचा प्रतिग्रहीतुरपि पतित्वात् तमुल्लङ्घ्य पत्यन्तरवरणं पितृशासनसत्त्वे वर्षत्रयपर्यन्तं न कर्तव्यमित्येवोक्तवचनतात्पर्यम्। एतेनेदमपि सूच्यते—पितुरपि शासनं स्वयंवरणविरोधेन तदैव भवितुं योग्यम्, यदि गुणवान् वरः पूर्वं वाचा कश्चन निर्णीतः स्यात्। तथाच वाचापि पूर्वं कन्याया अ-

न्यस्मा अदाने ऋतुमत्याः स्वयं वरण एवाधिकारः, न तस्या दाने पित्रादीनामधिकार इति सिद्धम्। एतेन—

त्रीणि वर्षाण्युदीक्षेत कुमार्य्तुमती सती।
ऊर्ध्वं तु कालादेतस्माद्विन्देत सदृशं पतिम् ॥६०।
अदीयमाना भर्तारमधिगच्छेद्यदि स्वयम्।
नैनः किञ्चिदवाप्नोति न च यं साधिगच्छति॥
अलङ्कारं नाददीत पित्र्यं कन्या स्वयंवरा।
मातृकं भ्रातृदत्तं वा स्तेना स्याद्यदि तं हरेत्।
पित्रे न दद्याच्छुल्कं तु कन्यामृतुमतीं हरन्॥
स हि स्वाम्यादतिक्रामदृतूनां प्रतिरोधनात्॥
(मनु० ६०—६३)

ऋतुत्रयमुपास्यैव कन्या कुर्यात्स्वयंवरम्।
ऋतुत्रये व्यतीते तु प्रभवत्यात्मनस्तथा॥
(हेमाद्रौ परिशेषखण्डे विष्णुः)

इदं गुणवद्वरालाभे सति द्रष्टव्यमिति पराशर-माधवीये २—१३।

वरयित्वा तु यः कश्चित् प्रणश्येत्पुरुषो यदा।
ऋत्वागमांस्त्रीनतीत्य कन्याऽन्यं वरयेत्पतिम्॥
(निर्ण० सि० ३ प० वि० ८४० पृ० वैद्य० आ-चा० काश्या० १३४ पृ०)

त्रीनृतूनतीत्य स्वयं युज्येत (गौतमः)

कुमारी ऋतुमती त्रीणि वर्षाण्युपासीत, उर्ध्वं त्रिवर्षेभ्यः पतिं विन्देत तुल्यम् (वसि० ७ अ।

पिता दद्यात्स्वयं कन्यां भ्राता वानुमते पितुः।

मातामहो मातुलश्च सकुल्यो बान्धवास्तथा ॥
माता त्वभावे सर्वेषां प्रकृतौ यदि वर्तते ।
तस्यामप्रकृतिस्थायां कन्यां दद्युर्द्विजातयः ॥
यदा तु नैव कश्चित्स्यात्कन्या राजानमाव्रजेत् ।
अनुज्ञया तस्य वरं प्रतीक्ष्य वरयेत्स्वयम् ॥
(परा० मा० नारदः पृ० ११२)

गृहस्थोऽसमानार्षीमस्पृष्टमैथुनां कनीयसीं सदृशीं भार्यां विन्देत । कुमारी ऋतुमती त्रीणि वर्षाण्युपासीत । ऊर्ध्वं त्रिभ्यो वर्षेभ्यः पतिं विन्देत तुल्यम् ॥ वसि० ७ अध्या०)

त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती ।
चतुर्थे त्वथ सम्प्राप्ते स्वयं भर्तारमाव्रजेत् ॥ १६ ।
प्रजा न हीयते तस्या रतिश्च भरतर्षभ ।
अतोऽन्यथा वर्तमाना भवेद्वाच्या प्रजापतेः ।१०।
(महाभा० आनु० प० अ० ४७—१७)

इत्यादीनि वचनानि व्याख्यातानि ।

[उक्तविवेचनस्यनिष्कर्षः] अयमत्र निष्कर्षः—

अलंकृत्य पिता कन्यां भूषणाच्छादनाशनैः ।
दत्त्वा स्वर्गमवाप्नोति पूजितस्तु सुरादिषु ॥
रोमदर्शनसंप्राप्तौ सोमो भुङ्क्तेऽथ कन्यकाम् ।
रजो दृष्ट्वा तु गन्धर्वः कुचौ दृष्ट्वा तु पावकः॥
अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी ।
दशवर्षा भवेत्कन्या अत उर्ध्वं रजस्वला ॥
माता चैव पिता चैव ज्येष्ठो भ्राता तथैव च ।

त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम्॥
तस्मादुद्वाहयेत्कन्यां यावन्नतुमती भवेत् ।
विवाहोऽष्टमवर्षायाः कन्यायास्तु प्रशस्यते ॥
इति संवर्तेन दानप्रशंसाप्रसङ्गे,—
अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी ।
दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला ॥
प्राप्ते तु द्वादशे वर्षे यः कन्यां न प्रयच्छति ।
मासि मासि रजस्तस्याः पिबन्ति पितरः स्वयम्॥
इति पराशरेण शुद्धिप्रसङ्गे,
अष्टमे तु भवेद्गौरी नवमे रोहिणी भवेत् ।
दशमे कन्यका प्रोक्ता द्वादशे वृषली स्मृता ॥
इति संवर्तान्तरेण चोक्तेषु वचनेष्वादौ "अत-
ऊर्ध्वं रजस्वला" इत्युक्ते दशवर्षादूर्ध्वं रजस्वला-
त्वमुक्तम् । एवम्—
गौरीं ददन्नाकपृष्ठं वैकुण्ठं रोहिणीं ददत् ।
कन्यां ददद् ब्रह्मलोकं रौरवं तु रजस्वलाम् ॥
इति मरीचिना रजस्वलादाने रौरवनरकप्रति-
पादनात् ।
ऊर्ध्वं दशाब्दाद्या कन्या प्राग्रजोदर्शनात्तु सा ।
गान्धारी स्यात्समुद्वाह्या चिरं जीवितुमिच्छता ॥

इति प्रयोगपारिजाते आश्वलायनोक्त्या दशवर्षादूर्ध्वं रजोद-र्शनात् प्रागेव तस्या गान्धारीशब्दव्यवहार्यताप्रतिपादनपुरस्सरं दीर्घायुष्यमिच्छता विवाह्यतावगमात् रजोदर्शनतः प्रागेव विवाहो युक्तः ।

अत्र द्वादशवर्षग्रहणं प्रायिकम्; कस्याश्चित् तत्रापि तद्दर्शनाभावात्। अतो रजोदर्शनं न विवाहात् पूर्वं यथा स्यात्, तथा विवाहं दानं कुर्यादित्युक्तम् भवति। अत एव—

'त्रिंशद्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीम्' इति मनूक्तं सङ्गच्छते। अत एव—

'त्रिंशद्वर्षः षोडशाब्दां भार्यां विन्देत नाग्निकाम्' इति व्यासोक्तौ दृष्टरजस्काया दानं प्रतिग्रहश्च निषिध्यत इति तद्भिन्नाया एव दानं प्रतिग्रहश्च कार्यं इत्यर्थानुवादकतया नग्निकापदं स्वरसत उपपन्नम्। अत एव ऋतुदर्शनकालमुपलक्षयितुं 'द्वादशे वर्षे' इत्युक्तम्। अत एव गौतमेन 'प्रदानम् प्रागृतोः' इत्युक्तम्। यमोऽप्येतदेवाह—तस्माद्विवाहयेत्कन्यां यावन्नर्तुमती भवेत्। इति। अतश्च ऋतुदर्शनात्प्राग्यो न ददाति, स प्रत्यवायी स्यात्। एवं च असति ऋतुदर्शने द्वादशेऽपि वर्षे कन्यादानप्रतिग्रहौ न निषिद्धौ॥ तत्र—सप्तमाद्वत्सरादूर्ध्वं विवाहः सार्ववर्णिकः।

कन्यायाः शस्यते राजन् अन्यथा दोषगर्हितः॥

(निर्ण० म० भा०) इति वचनेन—

"उपायनोदितः कालः स्त्रीणामुद्वाहकर्मणि" इति वचनेन—

"तस्माद्गर्भाष्टमः श्रेष्ठो जन्मतो वाष्टवत्सरः"

इति वचनेन चाष्टमं वयः दानयोग्यतया शस्यते यथा, तथा 'कन्यायास्तु प्रशस्यते' इत्यनेन दशमं वयः ऋतुप्रादुर्भावात्प्राक्तनं वयो वा दानयोग्यतया प्रशस्यत इति विवेकः। तत्र प्राक्तने वचने शस्यते स्तूयत इत्युक्त्या शिष्टस्तुत्यत्वमुच्यते, अत्र तु 'प्रशस्यते' इत्युक्ते रतिप्रशस्तत्वमुच्यते इति न विरोधलेशावसरः। अत एव—

अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी ।
दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला ॥
प्राप्ते तु द्वादशे वर्षे यः कन्यां न प्रयच्छति ।
मासि मासि रजस्तस्याः पिबन्ति पितरोऽनिशम् ॥
माता चैव पिता चैव ज्येष्ठो भ्राता तथैव च ।
त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम् ॥
यस्तां समुद्वहेत् कन्यां ब्राह्मणो मदमोहितः ।
स भैक्ष्यभुग्जपन्नित्यं त्रिभिर्वर्षैर्व्यपोहति ॥

इति पराशरेण (७।८) द्वादशवयस्काया वराय दानाकरणे प्रत्यवाय उक्तः ।

एतेन—कन्या द्वादशवर्षाणि याऽप्रदत्ता वसेद्गृहे ।
भ्रूणहत्या पितुस्तस्याः सा कन्या वरयेत्स्वयम् ॥
एवं चोपनतां पत्नीं नावमन्येत्कदाचन ।
न तु तां बन्धकीं विद्यान्मनुः स्वायम्भुवोऽब्रवीत् ॥

इति (निर्ण० यम०) पितुर्दोषापादकं यमवचनमपि व्याख्यातम् । तदिदं फलितं यत्—

कुलं च शीलं च वपुर्वयश्च ।
विद्यां वित्तं च सनाथतां च ॥
एतान् गुणान् सप्तपरीक्ष्य देया ।
कन्या बुधैः शेषमचिन्तनीयम् ॥

इत्युक्तकुलशीलादियुक्तद्वादशवार्षिकब्रह्मचर्यानुष्ठानरूपगुणवद्वरलाभे तस्मै वराय दाता आसन्नार्तवां कन्यां दद्यात् । तथा प्राक् तादृशगुणवद्वरालाभेन दाता यदि तमन्विष्यन् ऋतुप्रादुर्भावं जानाति, तदा ऋतुप्रादुर्भावकालादारभ्य वर्षत्रयाभ्यन्तरे उक्तव-

राय तां दद्यात्। यदि ऋतुप्रादुर्भावादूर्ध्वमुक्तगुणवद्वरान्वेषणे प्रवृत्तोऽप्रवृत्तो वा दाता स्यात्, तथा ऋतुप्रादुर्भावाद्वर्षत्रयमतिक्रान्तं च स्यात्, तदा गुणवन्तमगुणवन्तं वा वरं स्वयमेव कन्या वृणुयात्। अत एव—

अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी।
दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला॥
प्राप्ते तु द्वादशे वर्षे यः कन्यां न प्रयच्छति।
मासि मासि रजस्तस्याः पिबन्ति पितरोऽनिशम्॥

इति कलियुगीयधर्मविशेषनिर्णयार्थं प्रवृत्तेन पराशरेण 'त्रिंशद्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीम्' इति मनुना च द्वादशवार्षिकायाः कन्यकाया विवाहविधानं सङ्गच्छते। अत्र द्वादशेत्युपलक्षणं ऋतोः प्राक्तनस्य वयसः। स चाग्रे स्पष्टीक्रियते। अत एव—द्वादशवर्षग्रहणं प्रायिकं कस्याश्चित्तत्रापि दर्शनाभावात्। अतो रजोदर्शनं न विवाहात्पूर्वं यथा स्यात्तथा कार्यम्—इति पराशरवचनाशयं वर्णितुं प्रवृत्तेन संस्कारमयूखे नीलकण्ठभट्टेनोक्तं सङ्गच्छते। न च—

अष्टमे तु भवेद्गौरी नवमे नग्निका भवेत्।
दशमे कन्यका प्रोक्ता द्वादशे वृषली स्मृता॥

आपस्तम्बः—

दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला।
प्राप्ते तु द्वादशे वर्षे रजः स्त्रीणां प्रवर्तते॥

एतच्च प्रायिकाभावं न पुनर्द्वादश एव रजस्वला भवतीति कासांचिदर्वागपि रजोदर्शनसंभवात्। अत एव यमसंवर्तौ—

दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला। इति (स्मृ॰ मु॰

श्रा०) वैद्यनाथेन द्वादशात्प्रागपि रजः सम्भवतीत्युक्त्या विरुद्ध्यते नीलकण्ठभट्टेनोक्तमिति वाच्यम्; एवं च यावद्रजोदर्शनं न संभवति, तावत्कन्यात्वमुक्तं भवति। अत एव यमः—

तस्मादुद्वाहयेत्कन्यां यावन्नर्तुमती भवेत्। इति (स्मृ० मु० फ० वर्णा० काण्डे) वैद्यनाथदीक्षितेन तत्रैव "अत ऊर्ध्वं रजस्वला" इत्यस्याग्रे एव नग्निकागमनार्थरूपेण "रजःशब्दः प्रशस्तऋतुपरः बहुऋतुपरः" इत्याशयेन "यावन्नर्तुमती भवेत्" इति यमोक्तं प्रमाणीकृतमिति दोषात्। अत एव "प्रदानं प्रागृतोः स्मृतम्" इति गौतमोक्तौ ऋतुशब्दोऽपि तादृशार्थक एव। अत एव-

'त्रिंशद्वर्षः षोडशाब्दां भार्यां विन्देत नग्निकाम्' इति निर्णयसिन्धौ आनुशासनिकपर्वस्थेन व्यासेनोक्तं सङ्गच्छते। अत एव—त्रीणि वर्षाण्युतुमती कांक्षेत पितृशासनम्।

ततश्चतुर्थे वर्षे तु विन्देत सदृशं पतिम्॥

अविद्यमाने सदृशे गुणहीनमपि श्रयेत्। इति (परा० माध० १ ध्या० ११२ पृ०) बौधायनेन 'त्रीनृतून् कुमार्यतीत्य स्वयं युज्येतानिन्दितेन उत्सृज्य पित्र्यानलङ्कारान्'

इति (गौ० स्मृ० १८ ध्या० २०) गौतमेन,

गृहस्थ असमानार्षामस्पृष्टमैथुनां यवीयसीं सदृशीं भार्यां विन्देत। कुमारी ऋतुमती त्रीणि वर्षाण्युपासीत्। ऊर्ध्वं त्रिभ्यो वर्षेभ्यः पतिं विन्देत तुल्यम्॥ वसिष्ठस्मृ० ७ अ० ॥

इति वसिष्ठेन—

त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती।
चतुर्थे त्वथ संप्राप्ते स्वयं भर्तारमाव्रजेत्॥ १६॥

न प्रजा हीयते तस्या रतिश्च भरतर्षभ ।
अतोऽन्यथा वर्तमाना भवेद्वाच्या प्रजापतेः ॥ १७ ॥

इति (म० भा० आ० प० ४४ अ०) व्यासेन च ऋतुप्रादुर्भावोत्तरं वर्षत्रयपर्यन्तं तद्दानकालोक्तिः, संगच्छते । एवं दानकालस्य द्वैविध्ये ऋतोः प्राक्तनकालो मुख्यः, ऋतुप्रादुर्भावादनन्तरो वर्षत्रयपर्यन्तः कालस्तु गौणो भवति ।

वस्तुतस्तु—लोके गुणवद्वरमन्विष्यैव कन्योक्तलक्षणा दीयते या। निषेधाविषया स्यात् । परन्तु सर्वेषां वराणां यावद्गुणकत्वं बहुगुणकत्वं वा न दृश्यते क्वापि । तस्माद्ब्राह्मणा वैश्याश्च यथासंभवं गुणान् दृष्ट्वा दरिद्रा दातारः किञ्चिद्धनिनो दातारश्च कन्यास्तस्मै तस्मै वराय दद्ते । क्षत्रियास्तत्रापि राजानस्तु ब्राह्मणवरापेक्षयाऽधिकगुणं वरमन्विष्यन्तो वरं तादृशमपश्यन्तो द्वादशवर्षाण्यतिक्रम्य स्वयंवरावकाशं सम्पादयन्ति । यथेच्छं धनेनापि दानादौ प्रभवः। तस्माद्गुणवद्वरान्वेषणेन कालातिक्रमः क्षत्रियाणां राज्ञामेव, न ब्राह्मणवैश्ययोरिति प्रागृतोर्ब्राह्मणवैश्यकन्यानां विवाहो युक्तः । क्षत्रियराज्ञां तु यथेच्छमिति विवेचयन्तु सुधियः ।

तच्च दानं वाचिकं प्रतिग्रहपर्यन्तं कायिकं वेति तु यथेच्छं यथानुकूलं वेत्यन्यदेतत् । नहि स्वयंवरकाल एव मुख्यो भवति। अतएव द्वादशे वर्षे कन्याऽदातृदोषश्रवणमुपपद्यते । स्त्रीणामृतुप्रादुर्भावकालस्तु द्वादशाद्विषोडशान्तः । तदुक्तमष्टाङ्गहृदये शारीरस्थाने १ अध्याये—

मासि मासि रजः स्त्रीणां रसजं स्रवति त्र्यहम् ।
वत्सराद् द्वादशादूर्ध्वं याति पञ्चाशतः क्षयम् ॥ ६ ॥

पूर्णषोडशवर्षा स्त्री पूर्णविंशेन सङ्गता ।
शुद्धे गर्भाशये मार्गे रक्ते शुक्रेऽनिले हृदि ॥ ७ ॥
वीर्यवन्तं सुतं सूते ततो न्यूनाब्दयोः पुनः ।
रोग्यल्पायुरधन्यो वा गर्भो भवति नैव वा ॥ ८ ॥
इति "ऋतुस्तु द्वादशनिशा पूर्वास्तिस्रस्तु निन्दिताः"
इति च । तथा पञ्चदशाध्याये—
यदा बाल्यमतिक्रम्य तारुण्यं याति योषितः ।
कायश्च मानसो भावस्तदा तासां विवर्तते ॥ १ ॥
स्तनौ पीनोन्नतौ स्यातां योनिश्च परिवर्धते ।
समुद्भवन्ति लोमानि बस्तिदेशो समन्ततः ॥ २ ॥
जरायुकेशान्तन्वच्छं शोणितं च प्रवर्तते ।
तदार्तवं रजश्चेति पुष्पनाम्ना च गद्यते ॥ ३ ॥
मासि मासि स्रवेद्रक्तं शशशोणितसंन्निभम् ।
लाक्षारसनिभं वापि तद्दोषं विनिर्दिशेत् ॥ ४ ॥
तिस्रश्चतस्रो वा पञ्चाप्यनुबध्नाति तन्निशाः ।
अतोऽन्यथा रजः स्त्रीणां जानीयाद्दोषवद्भिषक् ॥५॥
अरुणानामशोकानां प्रायशश्च प्रवर्तते ।
द्वादशाद्वत्सरादूर्ध्वं याति पञ्चाशतः क्षयम् ॥ ६ ॥
आर्तवस्रावदिवसादृतुः षोडश रात्रयः ।
गर्भग्रहणयोग्यस्तु स एव समयः स्मृतः ॥ ७ ॥
नारीणां प्रकृतेर्भेदादृतुकालस्य चान्यथा ।
गर्भग्रहणकालस्य कीर्तितं देहवेदिभिः ॥ ८ ॥
दिने व्यतीते नियतं संकुचत्यम्बुजं यथा ॥ इति,
वयस्त्वाषोडशाद्बाल्यं तत्र धात्विन्द्रियौजसाम् ।

वृद्धिरासप्ततेर्मध्यं तत्रावृद्धिः परं क्षयः ॥ १०५ ॥

कालनिर्णयदीपिकायामपीदमेवोक्तम् । तद्यथा—

ऋतुकाल इति प्रोक्तं गार्ग्यादिमुनिसत्तमैः ।
स्त्रीचिन्हं यौवनं प्राप्य षोडशे वत्सरे सदा ॥
कृत्रिमा दशमादूर्ध्वमौषधस्य निषेवणात् ।
एकादशे द्वादशे वा ऋतुकालं वदन्ति हि ॥
अनुरागाद् द्वादशाब्दे त्रयोदशे तु केचन ।
चतुर्दशे पञ्चदशे स्त्रीचिन्हं तु भविष्यति ॥
वातजा पित्तजा चेति दारुणा त्रिविधा स्मृता ।
वातजा द्वादशे वर्षे पित्तजा च चतुर्दशे ॥
दारुणा षोडशे वर्षे शोणितं पतति ध्रुवम् ॥

'त्रिंशद्वर्षः षोडशाब्दां भार्यां विन्देत नग्निकाम्' इति प्रागुक्तवचनात् षोडशवर्षवयस्काया अपि दानेन प्रतिग्रहस्योक्तेस्तु ऋतोः प्राग्देयेत्यर्थ एव सर्वेषामैक्यावगतिरिति यस्याः षोडशवयःपर्यन्तमपि रोगादिना कारणान्तरेण वा ऋतुप्रादुर्भावो नाभूत्तादृशकन्याया दाने दोषाभाव इत्येवाशयः । इदमेवाभिप्रेत्योक्तम्—

तस्माद्विवाहयेत्कन्यां यावन्नर्तुमती भवेत् ।
विवाहस्त्वष्टवर्षायाः कन्यायास्तु प्रशस्यते ॥ इति ।

एवं च ऋतुमतीत्वं हि नाजानसिद्धो दोष इति तद्दोषप्रसङ्गात् पूर्वमेव विवाहो योग्यः । यदि तु कृतेऽपि प्रयत्ने वरालाभादिनाऽकस्मादेव व्याध्यादितो रजोदर्शनं सञ्जातम्, तदा तु प्रायश्चित्ताचरणपूर्वकं तस्या अपि नायोग्यः । न हि षोडशवयोऽनन्तरमनुपनयनेऽपि आतृतीयकालपर्यन्तमुपनयनं व्रात्यस्तोमानन्तरं शास्त्रेऽभ्यनुज्ञातमिति वृद्धानामप्युपनयनं गौणकल्पः । किन्त्वापत्कल्प

एव। अनेन न्यायेन चतुर्मत्या अपि विवाह आपत्कल्पतयैवाभ्यनुज्ञायते शास्त्रेण प्रायश्चित्तपूर्वकम्। अत एव ऋतुमत्या अविवाहितायास्तत्र तत्र वृषलीत्वं प्रतिपादितमुपपद्यते। वचनानि तु प्रमाणपद्धिकातोऽनुसन्धेयानि। अत्रेयं संस्काररत्नमाला—तत्र याज्ञवल्क्यः—

पिता पितामहो भ्राता सकुल्यो जननी तथा।
कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः॥
अप्रयच्छन् समाप्नोति भ्रूणहत्यामृतावृतौ।
गम्यं त्वभावे दातॄणां कन्या कुर्यात्स्वयं वरम्॥

इति। भ्राता कन्यायाः।

मनुः—

यदा तु नैव कश्चित्स्यात्कन्या राजानमाव्रजेत्।

इति। उक्तसकलाधिकार्यभावे स्वयं वरयेत्।
"गम्यं त्वभावे दातॄणां कन्या कुर्यात्स्वयं वरम्"
इति वचनात्।

पुत्रि प्रदानकालस्ते न च कश्चिद्वृणोति माम्।
स्वयमन्विच्छ भर्तारं गुणैः सदृशमात्मनः॥

इति भारते सावित्र्युपाख्याने पित्रनुज्ञयापि स्वयं वरणमुक्तम्, तत्स्त्रियाधिकारत्वात्तद्विषयम्। गम्यं गमनार्हं सावर्ण्यादिगुणयुक्तमित्यर्थः। अनाथायाः कन्याया धर्मार्थविवाहकरणं तत्फलं चोक्तं पुराणान्तरे—

आत्मीकृत्य सुवर्णेन परकीयां तु कन्यकाम्।
धर्म्येण विधिना दातुमसगोत्रोऽपि युज्यते॥

अनाथां कन्यकां दृष्ट्वा यो दद्यात्सदृशे वरे ।
द्विगुणं फलमाप्नोति कन्यादाने यदीरितम् ॥
इति । अतोऽन्यदीया कन्याऽन्येनापि धर्मार्थं देया । कन्याया रजःप्राप्त्यनन्तरं दाने दोषमाह शाट्यायनिः—
माता च जनकश्चैव जेष्ठो भ्राता तथैव च ।
त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम् ।
इति । मरीचिरपि—
यस्तां विवाहयेत्कन्यां ब्राह्मणो मदमोहितः ।
असंभाष्यो ह्यपाङ्क्तेयः स उक्तो वृषलीपतिः ॥
इति । हारितोऽपि—
पितुर्गेहे तु या कन्या रजः पश्यत्यसंस्कृता ।
सा कन्या वृषली ज्ञेया तत्पतिर्वृषलीपतिः ॥
असंस्कृताऽविवाहिता । तत्र प्रायश्चित्तपूर्वकं विवाहमाह शौनकः—
कन्यामृतुमतीं शुद्धां कृत्वा निष्कृतिमात्मनः ।
पिता ऋतून् स्वपुत्र्यास्तु गणयेदादितः सुधीः ॥
दानावधि गृहे यत्नात्पालयेच्च रजोवतीम् ।
दद्यात्तदृतुसंख्या गाः शक्तः कन्यापिता यदि ॥
दातव्यैकापि यत्नेन दाने तस्या यथाविधि ।
दद्याद्वा ब्राह्मणेष्वन्नं अतिनिस्वः सदक्षिणम् ॥
तस्यातीततुसंख्येषु वराय प्रतिपादयेत् ।
उपोष्य त्रिदिनं कन्या रात्रौ पीत्वा गवां पयः ॥
अदृष्टरजसे दद्यात् कन्यायै रत्नभूषणम् ।

तामुद्वहन् वरश्चापि कूष्माण्डैर्जुहुयाद्घृतम् ॥

इति। निष्कृतिमात्मनः कृत्वा कन्यां चतुर्मतीं शुद्धां कृत्वा वराय प्रतिपादयेदित्यन्वयः। स्वपुत्र्याः कन्यायाः। तस्या कन्याया दाने कर्तव्ये यथाविधि गोदानविधिना शक्तेन तदृतुसंख्या गावो दातव्याः, अशक्तेन त्ववश्यमेकापि गौर्गोदानविधिना देयेत्यर्थः। उपोष्येतिश्लोकेन दृष्टरजस्ककन्याया उपवासत्रयान्ते गव्यपयः-पानपूर्वकं गोद्दानं विधीयते। अदृष्टरजसे कुमार्यै सरत्नभूषणदा-नेन विवाहयोग्यतोच्यते। तामुद्वहन्नित्यनेन वरस्य कूष्माण्डहोमेन तदुद्वाहयोग्यता प्रतिपाद्यते। कन्याया गोदानोत्तरं पादकृच्छ्रमपि कर्तव्यम्।

कन्यका तु विवाहात् प्राक् रजसा चेत्परिप्लुता।
पादकृच्छ्रेण शुद्धा स्यात्पाणिग्रहणकर्मणि॥

इति हेमाद्रौ स्मृत्यन्तरोक्तेः। बौधायनस्तु—

अथ यदि कन्योपसाद्यमाना वोह्यमाना वा रजस्वला स्यात्ता-मनुमन्त्रयते—पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ। पुमा-निन्द्रश्च सूर्यश्च पुमांसं वर्धयत्वियमित्यथ द्वादशरात्रमलंकृत्य प्राश-येत् पञ्चगव्यम्। ततः शुद्धा भवति—इत्याह। उपसाद्यमाना दात्रा दीयमाना। उह्यमाना वरेण पाणिग्रहणेन। वाशब्दद्वयमु-भयोः प्राधान्यं द्योतयितुम्। तस्या उपसाद्यमानाया उह्यमानाया वा पतने स एवाह—अथ यदि कन्योपसाद्यमाना वोह्यमाना वा पतेत्, तामुत्थापयेत् "उदस्थाद्देव्यदितिर्विश्वरूप्यायुर्यज्ञपताव-धात्। इन्द्राय कृण्वती भागं मित्राय वरुणाय च"—इति।

होमकाले रजोदर्शने तु यज्ञपार्श्वः—

विवाहे वितते तन्त्रे होमकाल उपस्थिते।

कन्यामृतुमतीं दृष्ट्वा कथं कुर्वन्ति याज्ञिकाः ॥
स्नापयित्वा तु तां कन्यामर्चयित्वा यथाविधि ।
युञ्जानामाहुतिं हुत्वा ततस्तन्त्रं प्रवर्तयेत् ॥

इति । "युञ्जानः प्रथमं मनः" इत्येकेन ऋङ्मन्त्रेण साध्याऽऽहुतिर्युञ्जानाहुतिस्तां हुत्वेत्यर्थः । यदा तु दात्रभावेन रजोदर्शनम्, तदा विशेषमाह बौधायनः—

त्रीणि वर्षाण्यृतुमती काङ्क्षेत पितृशासनम् ।
ततश्चतुर्थे वर्षे तु विन्देत सदृशं पतिम् ॥
अविद्यमाने सदृशे गुणहीनमपि श्रयेत् ॥ इति ।

मनुरपि—त्रीणि वर्षाण्युदीक्षेत नारी ऋतुमती सती ।
ऊर्ध्वं तु कालादेतस्माद्विन्देत सदृशं पतिम् ॥
अदीयमाना भर्तारमधिगच्छेद्यदि स्वयम् ।
नैनः किञ्चिदवाप्नोति न च यं साधिगच्छति ॥

इति । अदीयमाना दात्रभावाद् दात्रुपेक्षणाच्च । सा यं भर्तारमधिगच्छति, सोऽपि नैनोऽधिगच्छतीति माधवेन व्याख्यातम् । यत्तु विष्णुवचनम्—

ऋतुत्रयमपास्यैव कन्या कुर्यात्स्वयं वरम् ।

इति, तद्गुणवद्वरलाभे वेदितव्यम् । स्वयं वरणे विशेषमाह मनुः

अलंकारं नाददीत पितृदत्तं स्वयंवरा
मातृदत्तं भ्रातृदत्तं स्तेयं स्याद्यदि तं हरेत् ॥ इति ॥

अनेन हीदं स्पष्टमवगम्यते—यत् त्रीणि वर्षाणि ऋतुमत्याः प्रतीक्षणमपि दात्रभावे दातुरुपेक्षणे वैव योग्यम् । तथाच यदिदानींतना अपि उपेक्षया कन्यां न ददते, तर्हि सत्यं वर्षत्रयमध्ये दातुं शक्यते, तथापि तत्रापि प्रायश्चित्तविधानाद्दापत्कल्पनैव युक्ता

सर्वथा तु जघन्योऽपि ऋतुमतीविवाह आपत्कल्पतयैवाभ्यनुज्ञायत इति नेदं कस्यापि विप्रतिपन्नम् ।

[ऋतुमतीविवाहविषयेप्रसिद्धप्रबन्धसमालोचनम्]

ऋतुमतीविवाहविषये हि बहोः कालादारभ्य खण्डनमण्डनादिकं प्रवृत्तमेव वर्तते । तत्र प्रथमं श्रीनिवासशास्त्रिभिर्ऋतुमतीविवाहशास्त्रीयतासमर्थनपर एको ग्रन्थो विरचितः । तदनन्तरं तु महामहोपाध्याय—वेदान्तकेसरि—श्रीगणपतिशास्त्रिभिस्तत्खण्डनपरं वयोनिर्णयाभिधानमेकं पुस्तकं विरचितम् । तदनन्तरं तु मद्रपुरसंस्कृतकलाशालाध्यापकैः श्रीश्रीनिवासशास्त्रिभिर्विवाहकालविमर्शाभिधमेकं पुस्तकं विरचितम्, यत्र श्रीनिवासशास्त्रिणां मतमेव रक्षितम् । तदनन्तरं च तिरवाद्वीपरिषद्वृत्तान्तप्रदर्शिन्यां पुस्तिकायां तत्समर्थनपराः केचन प्रबन्धाः प्रकाशिताः । ततश्च विवाहसमयमीमांसाऽस्माभिः परिणयमीमांसा श्रीनटेशशास्त्रिभिश्च सम्पाद्येते स्म । तदयं सारांशः—

[उपोद्घातः]

यथा पुंसां जातिब्राह्मण्यानां उपनयनं विना न कर्मब्राह्मण्यसिद्धिः, एवं स्त्रीणामपि तादृशीनां विवाहं विना न तादृशब्राह्मण्यसिद्धिरित्यवश्यकर्तव्येषु कृत्येषु विवाहमपि मुख्यं मन्वानाः सर्वेऽपि कन्यापितरस्तन्निर्वर्तने महान्तमेव क्लेशमनुभवन्ति । तत्र च कारणं बहुशतपरिमितवरदक्षिणानिमित्तनिर्बन्ध एव । तत्प्रसक्तिश्च स्त्रीमात्रविषयेऽदुष्टरजःकालनियमेनैव सम्पद्यते । तत्र यदि पुंसामिव स्त्रीणामपि विषये विवाहकालनियमो नास्तीति समयो भविष्यति, तर्हि वरदक्षिणानिमित्तनिर्बन्धस्यापि नावसरः स्यात् । यत्र तु शूद्रादिविषये नैतादृशकालनियमः, नैतादृशनिर्बन्धस्तत्र दृश्यते, इत्युपाय एवेदं समयान्तरपरिकल्पनमुक्त-

निर्बन्धपरिहारे। तत्रापि सर्वथापि कालनियमाभावे पञ्चाशद्वयः-पर्यन्तमपि विवाहं विनाऽवस्थानं स्यादिति शास्त्रे गौणकालत्वेन प्रतिपादितं षोडशादिवय एव परमावधिरिति कल्पने न दोष इति मन्यामहे।

इदानीन्तनस्तु रजोदर्शनतः पूर्वमेव विवाह इति समयोऽन्ध-परम्परान्यायप्राप्तकेवलाचारमूलको न प्रमाणमिति पश्यामः। क-ल्पयितव्ये च समये रजोदर्शनानन्तरमपि वर्षत्रयं न दोषाय इत्येव समयः साधीयान्। येन बाल्यवैधव्यादिदुःखान्यपि निरव-काशानि भवन्ति। महर्षयोऽपि समे कलिवर्ज्यप्रकरणे अक्षतक-न्यापुनर्विवाहमपि समामनन्तो रजोदर्शनानन्तरविवाहसमयकल्प-नमप्यावश्यकमित्यभिप्रयन्ति। एवञ्च रजोऽनन्तरविवाहनिषेधप-राणां सर्वेषामपि वचनानां युगान्तरविषयत्वेनोपपत्तिवर्णनमेव साधीयः। युगान्तरे ह्यक्षतकन्यापुनर्विवाहोऽपि धर्मज्ञसंमत इति न बाल्यवैधव्यदोषः समापतित इति ऋत्वनन्तरविवाहनिषेधवच-नानि यथार्थान्येवेति युक्तम्।

अथवा एवं मन्यामहे—सर्वेषामपि निषेधवचनानां ऋतुस-मनन्तरवर्षत्रयसमनन्तरदानगोचरत्वेनोपपत्तिरिति, इति वदतां बोधायनाचार्याणामप्यत्रैवाशय इति कल्पयामः। यतो हि सर्वस्मृ-त्येकवाक्यतयैवार्थवर्णनं युक्तमिति "त्रीणि वर्षाण्यृतुमती का-ङ्क्षेत पितृशासनम्" इति मनुवचनाविरोधेनैवार्थबोधने बोधायन-स्मृतेरपि सामर्थ्यम्। न च शङ्कनीयम्—बोधायनैकवाक्यतया मनुस्मृतेरेव "कालेऽदाता पिता वाच्यः" इत्यादिरूपाया रजस्व-लादाननिषेधपरत्वेऽवगन्तव्ये त्रीणि वर्षाणीत्यादिवचनानामाप-त्कल्पतया तदभ्यनुज्ञानतात्पर्यकत्वमेव युक्तमिति; "मन्वर्थविप-

-रीता तु या स्मृतिः सा न शस्यते” इति वचनानुसारेण बोधायना-द्विवचनापेक्षया मनुस्मृतेरेव प्राबल्यमिति सिद्धत्वेन तदविरोधेन वचनान्तरनयनस्यैव युक्तत्वात्। एवञ्च रजोनन्तरं विवाहोऽपि धर्म इत्यवकल्पनीयः समयः। तथा सति हि कन्या स्वाभिमतमेव वरं वृणुयादिति परस्परकलहादयः तन्निबन्धनात्महत्यादिकं वापि न पदमधितिष्ठेत्। अभिसरणादिदोषस्तु वासनाविशेषनिबन्धनः इदानीन्तनसमयेऽपि दुष्परिहर इति रजोऽनन्तरविवाहसमयकल्पनं लोकहितैषिणां धर्मज्ञानामावश्यकमेवेत्यधुनातनाः केचन महाशया मन्यते।

अन्ये तु—उक्तविधसमयकल्पनायामपि वरदक्षिणानिर्बन्धपरिहारो न भविष्यति। नापि वा वधूवरयोः कलहात्महत्यापातकादिपरिहारः। नहि सकृदसकृद्वा दर्शनसम्भाषणादिमात्रेण पुरुषहृदयमिदमेवेति निश्चेतुं रजोदर्शनमात्रेण कन्या प्रभवति। प्रभवति चेदपि न वर्षत्रयपर्यन्तं स्वतन्त्रतया स्वाभिमतपुरुषवरणं पित्राऽन्यस्मिन् निर्णीते गुणवति वरे पितृवशंवदायाः सम्भवदुक्तिकम्। वर्षत्रयानन्तरमेव खलु स्वयंवरकालः, तदर्थमेव तत्समयकल्पने च सर्वेषां कन्यापित्रादीनां पातित्यं सम्पादितमिति न लोकोपकारोऽनेन समयेनेति भक्षितेऽपि लशुने न रोगशान्तिरिति सम्पद्यते।

शास्त्रं यद्यपि स्त्रीणां विषये षोडशादिवयो गौणकाल इति बोधयति “विवाहं चोपनयनं स्त्रीणामाह” वैवाहिको विधिः स्त्रीणामौपनायनिकः स्मृतः” इत्यादिरूपम्, तथापि रजोदर्शनाभावविशिष्टोपनयनकाल एव विवाहकाल इत्यकामेनाप्यभ्युपगमनीयम्, “प्रदानं प्रागृतो„ “ कालेऽदाता पिता वाच्यः” “अपि वा

गुणहीनाय नोपरुन्ध्याद्रजस्वलाम्" इत्यादिवचनाविरोधेनैवोक्त-शास्त्रोपपत्तेर्वर्णनीयत्वात् । उत्तरत्र चैतद्विस्तरेणैवोपपादयिष्यामः । त्रीणि वर्षाण्यृतुमतीत्यादिवचनानामपि यथाऽऽपत्कल्पतया रजोऽनन्तरविवाहाभ्यनुज्ञान एव तात्पर्यम्, तथोत्तरत्र स्फुटीकरिष्याम इति नोक्तानुपपत्तेरवकाशः।

एवं कलिवर्ज्यप्रकरणेऽक्षतकन्यापुनर्विवाहसमाम्नानमपि न रजोदर्शनानन्तरविवाहसमयकल्पने लिङ्गम्; येन निषेधवचनानि युगान्तरं गोचरीकुर्युः । अक्षतकन्यापुनर्विवाहो हि न संस्कारार्थः; संस्कारस्य प्रथमविवाहेनैव निष्पन्नत्वादिति कामाद्यर्थत्वेन कलिवर्ज्यप्रकरणे तदाम्नानं कामार्थविवाहनिषेधाभिप्रायेणेत्येव कल्पना साधीयसी। शूद्रस्त्रीणां तु न धर्मार्थो विवाहः , किंतु कामाद्यर्थ एवेति यदा कामस्तदा विवाह इति रजोदर्शनानन्तरमपि विवाह, इति युक्तम्, नैवं ब्राह्मणकन्यानामपि तद्दृष्टान्तेन रजोऽनन्तरविवाहसमयकल्पनं साधीयः। ब्राह्मणकन्यानान्तु धर्मार्थ एव विवाहः कलौ युगे धर्मार्थ एव विवाहः, अष्टवर्षादिबालिकामेव संस्कुर्यादित्युत्तरत्र विस्तरेणोपपादयिष्यामः । एवञ्च समयान्तरकल्पनायासो निष्प्रयोजन इति पश्यामः ।

यदपि युवतिविवाहपक्षेतावान्नास्महत्यादिः, यावत् बाल्यविवाह इति लोकोपकारार्थं समयान्तरकल्पनं युक्तमेव। पूर्वतनाश्चापि लोकोपकारार्थं शास्त्रमप्यन्यथयित्वा समयविशेषानचीक्लृपन्निति हि स्मृतिपुराणेतिहासादिभ्योऽवगम्यते । एवमिदानीन्तनैरपि धर्मज्ञैः समयविशेषकल्पने न दोष इति शङ्क्यते, तत्र प्रति ब्रूमः—एवं चेत्सर्वथाऽऽत्महत्यादिदोषो यथा न प्रसरेत्, तादृशसमयकल्पनार्थमेव यतितव्यम् । स चाङ्ग्लस्त्रीणामिव बहुकालं

यथेष्टसहासनसहशयनादिभिः पुरुषाशयविनिश्चयानन्तरमेव विवाहः समाचरणीय इति ।

ननु पूर्वस्मिन् समये "यस्यां मनश्चक्षुषोर्निर्बन्धः" "त्रिरात्रं ब्रह्मचर्यम्" इति सूत्रस्वारस्यम्, सुप्रजास्त्वायेतिमन्त्रलिङ्गस्वारस्यं च विद्यते इति चेत्, विपरीतमेतत्, प्रथमं हि सूत्रं द्वितीयस्मिन्नेव समये विशेषतः स्वरसम् । तत्र हि सूत्रे मनश्चक्षुषोर्यस्यां नितरां बन्धः सा कन्या विवाह्येति बोद्धयते । तत्र चक्षुर्निर्बन्धः सुतरां यद्यपि रूपादिदर्शनमात्रेण संभवेत्, मनोनिर्बन्धस्तु सुतरां न सहासनसहशयनादिकलापमन्तरा सम्भवेदिति सर्वानुभवसिद्धमिदम् । तत्रैवं सत्युभयनिबन्धनमपि नियतं सूत्रयन्नापस्तम्बाचार्यो हि द्वितीयसमयपक्षपातीति कल्पनैव साधीयसी । एतेन द्वितीय सूत्रमपि व्याख्यातं भवति । विवाहदिनत्रयं हि सङ्गमो निषिद्धयमानो विवाहतः पूर्वं सङ्गमं निवृत्तं ज्ञापयतीति द्वितीयसमयकल्पनायामेव गमकत्वात् । एवं चतुर्थरात्रसमावेशनमपीत्यादि स्वयमेवोहनीयम् । सुप्रजास्त्वायेति मन्त्रलिङ्गं द्वितीयसमय एव लिङ्गम् । सञ्जातगर्भामेव युवतिमुद्दिश्य सुप्रजास्त्वं प्रार्थ्यते लोके, न त्वसंस्पृष्टमैथुनामपीति द्वितीयसमयकल्पनार्थमेव कुतो न यतितमिति पर्यनुयुञ्ज्महे । ततः किञ्चिद्वर्णस्वारस्यं मनसि निधाय स्वाशयविरुद्धशास्त्राणां अन्यथानयने महदेवानर्थजातं लोकस्य भवेदिति लोकोपकारार्थं प्रवृत्तैर्लोकापकार एव कृतः स्यादिति, विनायकं प्रकुर्वाणो रचयामास वानरमितिवचनगोचरतापत्तिरिति, साधुजनक्षुण्णमार्गेणैव धर्मशास्त्रविचारः कर्तव्य इति । तथा विचारे न रजोऽनन्तरविवाहशास्त्रीयतासिद्धिरिति, रजोऽनन्तरविवाहधर्मतावादोऽसम्भवदुक्तिक एव । बाल्यवैधव्यापेक्षया युवतिवैधव्य—

मेव महतेऽनर्थाय भवतीत्यत्र च लोकज्ञा एव प्रमाणमिति विस्तरभयादुपरम्यते। एवञ्च समयान्तराकल्पनेन पूर्वतनसमयानुपालनमेव लोकोपकाराय भवतीति तत्रैव सर्वैरप्यास्तिकवर्यैर्यतितव्यमिति वर्णयन्ति। तत्र कीदृशं मतं युक्तमिति विमृश्यते। यद्यपि पण्डितवर्यैर्गणपतिशास्त्रिभिरेतद्विषयमधिकृत्य कश्चन ग्रन्थो वयोनिर्णयाख्यो निरमायि। यद्यपि च तादृशैः श्रीनिवासशास्त्रिभिस्तदुपरि कश्चन ग्रन्थो विवाहकालविमर्शाख्योऽग्रन्थि। प्रथमग्रन्थकृतस्तु रजोदर्शनात् पूर्वमेव ब्राह्मणस्त्रीणां विवाह इत्याशयः। उत्तरग्रन्थकृतस्तु रजोदर्शनानन्तरमपि नासां विवाहोऽयुक्तस्तथैव धर्मशास्त्रेभ्योऽवगमात् इत्याशयः। तत्रादौ विवाहपदार्थं निरूपयामः।

[समावेशनस्य विवाहाङ्गत्वविचारः] विवाहो नाम त्रिजातीयसंस्कारप्रयोजकं ग्रहणम्। ।ग्रहणं च ममेयमिति स्वत्वास्पदीभूततया ज्ञानम्। स्वत्वं च प्रतिग्रहजन्यं विवक्षितम्। संस्कारश्च पाणिग्रहणमन्त्रावधिसप्तपदीगमनविहितमन्त्रान्तमन्त्रसमुदायकरणकक्रियाकलापजन्यादृष्टविशेषः। तथाविधोक्तसंस्कारप्रयोजकप्रतिग्रहजन्यस्वत्वास्पदीभूतज्ञानमेव विवाहपदार्थः। एतादृशे च विवाहे समावेशनं नाम अङ्गं न किमपि शास्त्रचोदितम्।" शेषं समावेशने जपेत्" इत्यापस्तम्बसूत्रन्तु ऋतुसमावेशन एव 'आरोहोरुमि'ति मन्त्रं विदधाति। एवञ्च चतुर्थदिने समावेशनविधानान्यथानुपपत्त्या न रजोऽनन्तरविवाहधर्मतासिद्धिरिति केचित् वर्णयन्ति। इममेव पक्षं वयःकालनिर्णायका अप्यनुवर्तन्ते।

अन्ये तु—पाणिग्रहणमन्त्रान्तमन्त्रसमुदायकरणकक्रियाकलापजन्यादृष्टविशेष एव विवाहपदार्थः। ऋतसमावेशनादतिरिक्तं

विवाहचतुर्थदिनेऽनुष्ठेयं समावेशनान्तरमपि विद्यते। तदन्यथानुपपत्त्या रजोदर्शनानन्तरविवाहोऽपि शास्त्रीय इति सिद्ध्यतीति मन्यन्ते। अमुमेव पक्षं विवाहकालविमर्शकारा अप्यनुवर्तन्ते।

परे तु—यद्यपि समावेशनमन्त्रान्तमन्त्रसमुदायकरणकक्रियाकलापजन्यादृष्टविशेष एव विवाहः, यद्यपि च ऋतुसमावेशनातिरिक्तं वधूवरयोः परस्परमिथुनीभावलक्षणं समावेशनं शास्त्रेण चोद्यते, तथापि तादृशसमावेशनान्यथानुपपत्त्या रजोऽनन्तरविवाहः परं न सेत्स्यति। तत्र च युक्तिरुपरिष्टाद्वक्ष्याम इति च प्रतिपादयन्ति।

तत्र च कीदृशं वा मतं युक्तमिति विचारणायां न तावत्प्राथमिकं समीचीनम्। वयोनिर्णयकारा हि एवं वदन्ति—नहि कुत्रापि गृह्ये चतुर्थदिनेऽपि समावेशनमनुष्ठेयतया विधीयते। आपस्तम्बाचार्यैस्तु "शेषं समावेशने जपेत्" इति सूत्रेण चतुर्थदिने तद् विधीयत इति प्रतीयते। तथापि तादृशसूत्रस्य क्रमविशिष्टमन्त्रजपविधान एव तात्पर्यमभ्युपगमनीयम्, न तु समावेशनविधानेपि; तस्य निमित्तत्वेनात्र निवेशात्। नहि निमित्तानामपि चन्द्रोपरागादीनां "उपरागे स्नायात्" इति विधिविषयत्वं कस्यापि सम्मतम्। समावेश्येति मुक्तकण्ठमेव "तिस्रोऽपि जपित्वा" इतिवत्सूत्रयितव्ये "समावेशने जपेत्" इत्येवंरूपेण सूत्रयतामाचार्याणामुक्ततात्पर्यकल्पनस्यैव स्वरसत्वात्। दृश्यते हि प्रायेण सप्तम्यन्तपदोपात्तानां निमित्तत्वेनान्वयः 'उपरागे स्नायात्' इत्यादिस्थले। तत्सामान्यादत्रापि "समावेशने" इति सप्तम्यन्तपदोपात्तस्य निमित्तत्वेनान्वयवर्णनमेव युक्तम्। निमित्तत्वेनोपात्तस्य च समावेशनस्य स्वरूपं किमिति चेत्, समावेशनपदस्य वधूवरसम्मेलन एव शक्तत्वात् वधूवरसम्मेलनमेव निमित्तत्वेन प्रतीयते, तथापि सुद-

र्शनाचार्यभाष्यपर्यालोचनया ऋतुसमावेशनमेव तदिति ब्रूमः। इत्थं हि तदीयाभिप्रायः—अत्र समावेशनपदेन वधूवरयोः परस्परमिथुनीभावनिमित्तसहशयनमेव विवक्ष्यते, "रजःप्रादुर्भावात् स्नातां ऋतुसमावेशने उत्तराभिरभिमन्त्रयते" इत्यनन्तरं तृतीयसूत्रे ऋतुशब्देन साकं समावेशनपदं प्रयुञ्जानानामाचार्याणां सूत्रद्वयगतसमावेशनपदयोरुभयोरपि एकार्थकताकल्पनस्य युक्तत्वात्। एवञ्च पूर्वत्र केवलसमावेशनपदप्रयोगेऽपि तस्यार्थान्तरपरत्वापत्त्योक्तविधार्थसिद्धिर्न स्यादिति उत्तरसूत्रे "ऋतुसमावेशने" इति ऋतुशब्दोऽपि प्रयुज्यते। अयं च—समावेशनं नाम वध्वा सह मैथुनार्थं शयनम्, उत्तरत्र ऋतुसमावेशन इति ऋतुलिङ्गात्—इति वाक्यबलेन लभ्यते। इदं हि वाक्यं समावेशनपदार्थनिर्णयद्वारा तत्स्वरूपनिर्णयार्थमेव प्रवृत्तम्। यदि समावेशनपदस्य व्यवायार्थकत्वं लोकतः सिद्धम्, तर्हि अनन्तरतृतीयसूत्रेऽपि केवलसमावेशनपदमेव आचार्याः प्रयुञ्जीरन्। नैतदस्ति, एवं च तादृशं समावेशनं निमित्तीकृत्य "शेषं समावेशने जपेत्" इति सूत्रे मन्त्रजपो विधीयत इत्येवमापस्तम्बाचार्याणामाशयः। एवं च चतुर्थदिने समावेशनविधानं कुत्रापि नोपलभ्यत इति तदन्यथानुपपत्त्या ऋतुमतीविवाहसाधनं न युक्तमिति।

अन्ये तु—"शेषं समावेशने जपेत्" इति सूत्रयतामापस्तम्बाचार्याणां समावेशनविधानेऽपि तात्पर्यमभ्युपगमनीयमेव। समावेशनस्य हि विधेयनिमित्तत्वेनोपादानं न युक्तम्। नहि विधिविषयाणां कुत्रापि निमित्तत्वेनादरणं दृश्यते। अनिष्टानामेव तूपरागादीनां निमित्तत्वेनान्वयः, न त्विष्टानामपि इति समावेशनस्येप्सितस्य निमित्तत्वेनान्वयवर्णनं न सम्भवति। एतेन—रागप्राप्तस्वतन्त्रस-

मावेशनमपि न निमित्तत्वेनान्वेतीति—सूचितम् । यदि हि "शब्दक्रमादर्थक्रमो बलीयान्" इति न्यायेन "रजःप्रादुर्भावात् स्नातां ऋतुसमावेशने उत्तराभिरभिमन्त्रयते" इति समनन्तरतृतीयसूत्रार्थ एव प्रथमतो वक्तव्य इति तत्सूत्रविहितं समावेशनमनूद्यैवानेन क्रममन्त्रजपयोर्विधानमित्युपपाद्येत, तथापि प्राप्तकर्मोद्देशेनानेकगुणविधानेन वाक्यभेद इति "यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति" इति वाक्यस्येव विशिष्टविधिपरत्वमङ्गीकरणीयमिति क्रममन्त्रजपसमावेशनानां सर्वेषां विधिरित्येव भवति। एवं च समावेशनविधानेऽपि "शेषं समावेशने जपेत्" इति सूत्रतात्पर्यं सिद्धं भवति।

यदपि चोक्तं—समावेशनपदस्य वधूवरसम्मेलनमात्रशक्तिकस्योत्तरसूत्रे व्यवायपरत्वव्यवस्थापकसुदर्शनाचार्याशयविरोधप्रसङ्गः तद्वारणार्थं च समावेशनपदयोरुभयोरपि रजोऽनन्तरगर्भधारणोपयोगिपरस्परमिथुनभावनिमित्तसहशयनपरत्वमेवाङ्गीकरणीयम्। तादृशं च समावेशनं विवाहाङ्गं न भवत्येवेति, तदप्यापातरमणीयम्; केवलसमावेशनपदानामपि व्यवायपरत्वेन तत्र तत्र निर्देशात्। तथा च गौतमः—षोडशर्तुनिशाः स्त्रीणां तासु युग्मासु संविशेत्—इति। तत्र यदि केवलसंवेशनादिपदानां व्यवायार्थकत्वं न लोकसिद्धमिति स्यात्, तदा उक्तस्मृतिषु प्रयुक्तानां संवेशनादिपदानां कथमर्थनिर्णयः संभविष्यतीति भवन्त एव विवेचयन्तु।

एवं च सुदर्शनाचार्या अपि न समावेशनपदार्थनिर्णयार्थं प्रवृत्ताः, किन्तु ऋतुसमावेशनात् विवाहाङ्गं समावेशनं भिन्नरूपमिति उपपादयितुम्। इदं हि तस्य वाक्यम्—समावेशनं नाम

वध्वा सह मैथुनार्थं सहशयनमिति । यद्यपि मैथुनार्थं शयनं भार्यया साकमेव ऋतुकाल एव युक्तम्, नत्वन्यया ऽन्यकाले, "स्वदारनिरतश्चैव" इत्यादिवचनैः परिसंख्याविधया स्वदारेतरोपगमनादिनिषेधात्, तथापि "किमिव वचनं न कुर्यात्, नास्ति वचनस्यातिभारः" इति न्यायेन वध्वा सहापि चतुर्थदिने समावेशनस्य विहितत्वात् तद्दिनमात्रे तदनुष्ठानमपि युक्तमेव । एवञ्चात्र भार्यया साकं समावेशनं ऋतुकालिकं न विवक्षितमेव ; उत्तरत्र तस्य विद्यमानत्वादिति ।

अयमाशयः—चतुर्थीकर्मसमाप्त्यनन्तरमेव भार्यात्वसम्पत्तिरिति पारस्करहरिहरभाष्ये उक्तत्वात् तत्पूर्वं भार्यात्वमेव नास्ति । एवं ऋतुकाल एव समावेशनस्य विहितत्वात् ऋतुकालिकत्वमपि नास्तीति कथं व्यवायार्थशयनं कन्यया साकं विवाहचतुर्थदिने प्रयुक्तमित्याशंकायां विवाहाङ्गसमावेशनमात्रविषये वचनात् भार्यात्वसिद्धितः पूर्वमपि तत्सिद्ध्यर्थं व्यवायार्थं सहशयनं युक्तमेवेति केचित् वर्णयन्ति । एतेषां च मते यद्यपि ऋतुसमावेशनादतिरिक्तमेव विवाहाङ्गं समावेशनमिति सिद्ध्यति, तथापि रागतः प्राप्तसमावेशनमाश्रित्येति सुदर्शनाचार्यभाष्यविरोधः परं प्रतीयते ; तैः समावेशनस्य रागप्राप्तवर्णनादिति भवति शङ्का ; सा चैवं परिहरणीया—रागप्राप्तं समावेशनमिति वदन्तः सुदर्शनाचार्या नास्य समावेशनस्यावैधत्वमभिप्रयन्ति ; लोकतः पूर्वप्राप्तविधिविषयस्यापि समावेशनस्य रागतः प्राप्तियोग्यत्वमपि विद्यत एवेति बोधनमेव; रागतः प्राप्तानामपि अवहननादीनां विधिविषयत्वदर्शनात् । एवं चावहननादिविषये विधिप्रवृत्तेः प्रयोजनं यथा नियमः, एवमत्रापि समावेशनं कर्तव्यमेवेति नियम एव विधिप्र-

वृत्तेः प्रयोजनम्, समावेशनं चतुर्थापररात्रे नियमेनैव भवतीति। एवं सति तट्टीकावचनस्याप्युपपत्तिः।

तत्तु न युक्तम्; रागलोपे तु समावेशनं लुप्यत एवेति सुदर्शनाचार्यभाष्यं हि विधिप्रवृत्तिप्रयोजनं नियमं प्रतिषेधयति। तट्टीकायामपि नियमो नैव भवतीत्येव पाठो दृश्यते इति रागप्राप्तसमावेशनमाश्रित्येति वर्णयतां सुदर्शनाचार्याणामाशयविरुद्धमेव तेषां मतमिति। सुदर्शनाचार्याशयो हीत्थं रागप्राप्तमेव समावेशनमाश्रयत्वेनाभिप्रेतम्, तच्च ऋतुमतीविवाहलिङ्गं ऋतुसमावेशनातिरिक्तं चेति कन्यायामपि रागप्राप्तसमावेशनं सम्भवति इति तु न भवति। अनिषिद्धसमावेशनमेव खलु शास्त्रेणाश्रयत्वेनानूद्यते, न तु निषिद्धमपि। "नाजातलोम्न्या सह संविशेत्" इत्यादि वचनैर्हि अनृतुमतीसंगमो विशिष्य निषिद्धः। एवं च ऋतुमतीसंगम एवात्र ग्रहीतव्यः "पतित्वं सप्तमे पदे" इति हि सप्तपदीमात्रेण पतित्वपत्नीत्वयोः सिद्धिप्रतिपादनेनाभार्योपगत निषेधस्यापि अप्रसङ्गादिति रजोऽनन्तरविवाहलिङ्गमेव तत्। यावता च रागप्राप्तसमावेशनमेवात्र विवक्षितम्, तावता ऋतुसमावेशनात् भिन्नरूपमित्यप्युक्तप्रायमेव। रजोऽनन्तरसमावेशनस्य नित्यत्वेन विधिचोदितत्वेन रागतः प्राप्तत्वाभावात्। शब्दैक्यमात्रनिबन्धनप्रत्यभिज्ञानेन तु कर्मस्वरूपैक्यं न घटते। "अग्निहोत्रं जुहोतीति" वाक्ये "उपसद्भिश्चरित्वा मास मग्निहोत्रं जुहोति" इति वाक्ये च एकस्यैव अग्निहोत्रशब्दस्य श्रवणेऽपि कर्मस्वरूपभेद एवेति प्रकरणान्तराधिकरणे पूर्वतन्त्रे निरूपितत्वात्। एवं च तत्र यथा अनुपादेयगुणविशिष्टानुपस्थितिरूपप्रकरणान्तरात् कर्मभेदः, एवमत्रापि कर्मभेदस्यैव प्राप्तेः। वस्तुतस्तु एकत्र केवलं समावेशन-

पदम्, अन्यत्र ऋतुशब्दघटितसमावेशनपदमिति नामभेद एव विद्यत इति शब्दैक्यनिबन्धनप्रत्यभिज्ञानमपि नास्त्येव। "नामैकदेशे नामग्रहणमिति" तु न्यायः एकप्रकरणकत्वादितात्पर्यग्राहकप्रमाणसत्त्व एव। यथा ज्योतिष्टोमप्रकरणगते "वसन्ते वसन्ते ज्योतिषा यजेत" इति वाक्ये ज्योतिःशब्देन ज्योतिष्टोमस्य ग्रहणम्। अत्र तु समानप्रकरणकत्वाभावान्नैतादृशन्यायप्रसर इति शब्दान्तराधिकरणेनापि कर्मभेदः। युक्तं चैतत्, यथा हि "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा" इति वाक्यविहितामिक्षायाग एव तदनन्तरश्रूयमाणेन "वाजिभ्यो वाजिनम्" इति वाक्येन वाजिनं विधीयताम्; वाजमन्नं येषामिति व्युत्पत्त्या विश्वेदेवपरत्वस्य यथाकथंचित् उपपादनसंभवात् इत्याशङ्क्य उत्पत्तिशिष्टगुणावरोधे गुणान्तरविधानासंभवात् "वाजिभ्यो वाजिनम्" इति वाक्यं क्रियान्तरपरमेवेति पूर्वतन्त्रे निरूपितम्, एवं "विष्णुर्योनिं कल्पयतु" इत्याद्युत्पत्तिशिष्टगुणावरोधे "आरोहोरुम्" इति मन्त्रान्तरविधानासंभवात् क्रियान्तरपरत्वोपपादनमेव युक्तम्। यथा च मन्त्राणामुत्पत्त्यन्वयायोग्यत्वेऽपि तादृशन्यायप्रसरः, तथा अन्यत्र विस्तरः। अत एव मन्त्रप्रश्नभाष्ये आरोहोरुमिति मन्त्र व्याख्यानावसरे "समावेशने जप्यमन्त्रमाह' इति, 'विष्णुर्योनिं कल्पयतु इति मन्त्रव्याख्यानावसरे च " ऋतुसमावेशने जप्यमन्त्रमाह " इति च अवतारयामासुर्भाष्यकारा इति चतुर्थीकर्मसमावेशनमपि शास्त्रसम्मतमेव। यावता च विवाहाङ्गसमावेशनान्तरमपि शास्त्रसम्मतमेव, तावता तदन्यथानुपपत्तिप्रमाणेन रजोऽनन्तरविवाहोऽपि सिद्ध एव भवति। यद्यपि वैधसमावेशनमदृष्टार्थं कन्यायामपि भवति कृष्णलादिश्रपणवत्, तथापि समावेशनस्य रागप्राप्तत्ववर्ण-

नात् रागस्य च प्रौढायामेव संभवात् प्रौढाविवाहसिद्धिरप्रत्यूहैव। येषां तु पुनर्वयोनिर्णयकाराणां विवाहाङ्गसमावेशनान्तरासंभवः, तेषां मते "आरोहोरुम्" इति मन्त्रो विवाहाङ्गमिति न सिद्ध्येत्। इष्टापत्तौ च अधिकाराख्यप्रकरणविरोधः। यदप्युक्तवयोनिर्णयकारैः ऋतुसमावेशनाश्रितमन्त्रस्य विवाहाङ्गत्वं नानुपपन्नम्, प्रायत्यार्थं क्रियमाणमेवाचमनमाश्रित्य तदीयास्वप्सु प्राणोपासनाङ्गतया प्राणवासस्त्वादिबुद्धिविधानानुसारेण कर्माङ्गोद्गीथाश्रयणेन स्वतन्त्रतया बहुविधोपासनाविध्यनुसारेण चात्रापि समावेशनाश्रयेण विवाहाङ्गमन्त्रजपविधानेनादोषात्। कालान्तरभाविन्यपि समावेशने करिष्यमाणस्य मन्त्रजपस्य इदानीन्तनविवाहाङ्गत्वमपि एवमेव नानुपपन्नम्। कालान्तरेऽनुष्ठीयमानस्य बृहस्पतिसवस्य कालान्तरानुष्ठितवाजपेयाङ्गत्वमिव। अयमेव चार्थो "वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत" इति वाक्यबलेन लभ्यते। सुदर्शनाचार्या अपि विवाहकर्मार्थं कर्मजपयोर्विधानमिति ब्रुवाणाः करिष्यमाणसमावेशनाश्रयेणैव मन्त्रजपविधानमभिप्रयन्ति। अन्यथा मन्त्रजपसमावेशनानां विधिरित्येव ब्रूयुरिति। एवं च समावेशनान्तरानङ्गीकारेऽपि विवाहाङ्गत्वं नानुपपन्नमेवेति। न चैतद्युक्तमिव प्राणोपासनाङ्गतयापि सामान्यवचनेनाचमनस्य प्राप्तस्य अनुवादेन विशिष्य तदीयास्वप्सु प्राणवासस्त्वबुद्धिविधानवत् ऋतुसमावेशनानुवादेन मन्त्रजपविधानसंभवस्य पूर्वमुपपादितत्वेन कार्याख्यानात् तद्पूर्वमिति न्यायो न प्रसरति। एवं कर्माङ्गोद्गीथाश्रयणेन स्वतन्त्रतया विधीयमानोपासनानामिव समावेशनाश्रितमन्त्रजपस्य स्वतन्त्रफलार्थत्वाभावात् तादृशन्यायोऽपि नावसरं लभते। किञ्च तत्रैवाश्रयशब्दप्रयोगः, यत्र श्रुतिबोधितस्वस्वरूपसम्पत्तिः तत्स-

म्बन्धेनैव भवति। यथा दधिकरणत्वं होमसम्बन्धेनैव, यथा वा अवधिकरणकप्राणवासस्त्वादिबुद्धिरप्सम्बन्धेनैव। अत्र च मन्त्र-जपस्वरूपसिद्धिर्न समावेशनसम्बन्धेनैवेति वैषम्यात् समावेशन-माश्रित्येति वचनस्य समावेशनकालिकत्वबोधन एव तात्पर्यम्। एवं च समावेशनकालिकमन्त्रजप इव सन्दंशन्यायेन समावेशन-मपि विवाहाङ्गमित्येवाङ्गीकरणीयमिति विवाहप्रयोगमध्यपातित्वे-नैव उपपत्तिर्वर्णनीया। रागप्राप्तसमावेशनमाश्रित्य विवाहकर्मार्थं क्रमजपयोर्विधानमिति सुदर्शनाचार्यभाष्यमप्येवं सत्येवोपपद्यते। "प्रजापते तन्वम्" इत्यादिमन्त्रत्रयानन्तरं बहुषु मन्त्रेष्वाम्नायमा-नेष्वपि शेषमिति शेषपदेन चारोहोरुमिति मन्त्रमात्रस्य ग्रहणमपि तन्मन्त्रजपो विवाहप्रयोगान्तःपातीति ज्ञापयतीति चतुर्थदिने समावेशनाचरणादिकमप्यावश्यकमेवेति मन्तव्यम्। एवं च वैधर्तुसमावेशनाश्रयेण विवाहाङ्गत्वनिर्वाहः समावेशनान्तरस्य विवा-हान्तर्गतत्वनिर्वाहश्च न वयोनिर्णयकाराणां सेत्स्यति। एवं चाप-स्तम्बाचार्याणां तद्भाष्यकाराणाञ्च समावेशनान्तरविधान एव तात्पर्यमिति तत्सूत्रटीकापर्यालोचनेन सिद्ध्यति। वयोनिर्णयका-राणान्तु बौधायनीयसमावेशनानुवादशङ्कातत्परिहारादिकं चा-स्थान एव। अतो हि आपस्तम्बाचार्याणामेव तत्राभिप्रायं निरू-पयामः। यदपि तैरेवोक्तम्—विवाह्याया वध्वा बालिकात्वेन रागहे-तोर्दृष्टार्थस्य व्यवायकर्मणस्तदसम्भव इति। तदपि न रमणी-यम्; विवाह्याया बालिकात्वमवेत्येतावताऽनिर्णयात्। उक्तसमा-वेशनान्यथानुपपत्त्यैव रजोऽनन्तरविवाहस्यापि साधनात्। बालि-काविवाहेषु समावेशनरूपाङ्गलोपेऽपि न वैगुण्यम्; विवाहस्य नि-त्यकर्मत्वेन नित्यकर्मसु अङ्गविशेषलोपेऽपि साद्गुण्यसम्भवस्य

पूर्वमीमांसायां उपपादितत्वेनादोषात्। न हि अस्मादृशा इव महर्षयोऽपि सर्वज्ञा अनर्थकान्यसङ्गतानि च वाक्यानि प्रब्रुवीरन्। एवं चार्थापत्तिप्रमाणमपि सुस्थितमत्र प्रवर्तते। ऋतुमतीविवाहो न शास्त्रीय इति तु वचनमसङ्गतमेव। समावेशनशब्दार्थविचारणायामपि अयमर्थः स्फुटीभवति। न च समावेशनपदस्य बहुजनसम्मेलनमात्रशक्तिकत्वात्कथं तदनुसारेण रजोऽनन्तरविवाहसिद्धिरिति शङ्कनीयम्, पूर्वोक्तरीत्या गोतमादिस्मृतिपर्यालोचनया संविशेदित्यादिपदानां परस्परमिथुनीभावलक्षणव्यवायपरत्वनिर्णयेन तस्य च प्रौढायामेव संभवात् प्रौढाविवाहसिद्धेरप्रत्यूहत्वात्। समावेशनमन्त्रपर्यालोचनायामपि स्फुटं प्रतीयते। तेन हि मन्त्रेण उर्वारोहणालिङ्गनादिव्यवायव्यापार एव प्रकाश्यते। मन्त्राणां च प्रयोगसमवेतार्थस्मारकत्वेनैव प्रामाण्यमिति च मन्त्राधिकरणे पूर्वतन्त्रे निर्णीतम्। तत्र यदि मन्त्रप्रतिपादितार्थस्य प्रयोगस्य च सम्भवो न स्यात्, तदा तादृशमन्त्राणामन्यत्रोत्कर्ष एव स्यात्। पूषानुमन्त्रणमन्त्राणामिव पूषादेवताके कर्मणि। स च मन्त्रो दर्शपूर्णमासाधिकारगतः तत्प्रयोगसमवेताग्न्यादिदेवताप्रकाशनासमर्थः सन् पूषदेवताके क्रियान्तरे उत्कृष्यते इति पूर्वतन्त्रे निरूपितम्। एवं च समावेशनमन्त्रस्य अन्यत्रोत्कर्ष एव स्यात्। एवं च व्यवायप्रकाशकत्वमप्यवश्यमङ्गीकरणीयम्। "उद्बुध्यस्वाग्ने" इत्यादिमन्त्राणामपि बुधोपासनादौ विनियुक्तानां लक्षणया बुधदेवताप्रकाशकत्वमेवेति न कुत्रापि मन्त्राणामनुष्ठीयमानपदार्थेन साकमसम्बन्ध इति मन्त्रार्थपर्यालोचनानुसारेण समावेशनपदार्थो व्यवाय एवेति निश्चिनुमः। एवं च तदन्यथानुपपत्त्या रजोऽनन्तरविवाहोऽपि शास्त्रीय एवेति सिद्ध्यतीति

तदशास्त्रीयतावादोऽसङ्गत एवेति वर्णयन्ति। विवाहकालविमर्श-कारागामपि पर्यवसिताशयोऽयमेवेति मन्यामहे। परन्तु यद्यपि समावेशनानन्तरं विवाहाङ्गमापस्तम्बाचार्याणां सुदर्शनाचार्याणां च सम्मतम्, तथापि तदन्यथाऽनुपपत्त्या रजोऽनन्तरविवाहसाधनं परं नायुक्तिसहम्। तथाहि—समावेशनमपि विवाहाङ्गमितिवद-तामापस्तम्बाचार्याणां नियतमेव तदनुष्ठानमावश्यकमित्यभिप्रायो वर्णनीयः। नत्वङ्गाननुष्ठानेऽङ्गिफललाभः संभवति। अन्यथेत-राङ्गाणामप्यननुष्ठानप्रसङ्गात्। एवं चेदपि गोभिले गृह्ये केचिच्च-तुर्थदिने समावेशनमिच्छन्ति इति केचित्पदप्रयोगात् समावेशन-तदभावयोरुभयोरपि ग्रहणाग्रहणयोरिव विकल्प एव पर्यवसानात् वैकल्पिकेषु च यथाकाममेवानुष्ठानस्य शास्त्रसिद्धत्वात् यदा रा-गतः समावेशनरूपं तदा तदाश्रित्य क्रमजपयोर्विधानमित्यभिप्रा-येणैव सुदर्शनाचार्या रागतः प्राप्तं समावेशनमाश्रित्य विवाहकर्मा-र्थं क्रमजपयोर्विधानमिति वर्णयामासुः। नियमेनैवेति तट्टीकावचना-नामप्ययमेवाभिप्रायः।

न च शङ्कनीयम्—रागप्राप्तपदेन लोकतः पूर्वं शास्त्रप्रवृत्त्या विधिविषयो रागप्राप्तत्वयोग्यं च समावेशनमेव विवक्षणीयम्, तच्च पूर्वोक्तरीत्या रजोऽनन्तरमेव संभवतीति; पूर्वोत्तरवाक्यप-र्यालोचनया रजोदर्शनतः पूर्वमेवेदं समावेशनं सुदर्शनाचार्यैर्विव-क्षितमिति स्पष्टमेव प्रतीतेः। उत्तरत्र चैतत्स्पष्टीभविष्यति। नापि वा अवैधमनिषिद्धं च समावेशनमेवात्र विवक्षितमिति प्रकारान्त-रानुसरणमपि साधु; यद्यप्यस्मिन् पक्षे भोजनपर्यायव्रतदृष्टान्ते विशेषतः स्वारस्यम्, तथापि अवैधानिषिद्धरूपस्य समावेशनस्य विवाहानङ्गत्वेन तस्य विवाहाङ्गत्वसिद्धान्तासाङ्गत्यप्रसङ्गान्नात्र ग्रह-

णमिति विज्ञेयम्। न हि भोजनपर्यायव्रतं रागतः प्राप्तं कत्वङ्ग-
मिति कस्यापि सम्मतम्। न चानङ्गत्वमेवास्तामिति शङ्कनीयम्;
सन्दंशन्यायेन तदङ्गत्वस्य साधितत्वात्। एवं च वैधमेवेदं समा-
वेशनमित्येवाङ्गीकरणीयम्। वैधानां चाङ्गजालानां प्रधानफलेनैव
नैराकाङ्क्षयान्न स्वतन्त्रफलापेक्षेति इतराङ्गानीव समावेशनमपि
स्त्रीसंस्कारकमित्येवाङ्गीकरणीयम्। स च संस्कारोऽदृष्टविशेष
एवेति सर्वैरपि वादिभिरभ्युपगतमेव। एवञ्च सति समावेशनेनापि
तादृशसंस्कारः किं दृष्टद्वारैव भवति, उताहो साक्षादेवेति विचार-
णायां दृष्टफलद्वारैव तादृशफलसिद्धिरिति विवाहकालविमर्शकाराणा-
माशय इति तद्ग्रन्थपर्यालोचनेन प्रतीयते। उपपत्तिश्च तेऽत्र
समावेशनपदार्थान्यथानुपपत्तिमेवाभिप्रयन्तीति मन्यामहे। समा-
वेशनपदं च पूर्वोक्तरीत्या व्यवायकमेव बोधयति। तत्र यथा
"यूपमष्टाश्रीकरोति" इतिवाक्यविहिताष्टाश्रीकरणादीनां यादृ-
शौदुम्बरादिखण्डसम्पादनेनैव सिद्धिः, तादृशौदुम्बरादिखण्डस-
म्पादनमेवावश्यकमिति पूर्वतन्त्रे निरूपितम्। एवं यादृशस्त्रीव्य-
क्तिसम्पादनेन समावेशनस्वरूपसिद्धिः, तादृशसमावेशनयोग्यस्त्री-
व्यक्तिसम्पादनमेवावश्यकमिति समावेशनविधिपराणामाचार्याणां
रजोऽनन्तरविवाह एव तात्पर्यमिति गम्यते। साक्षादेव संस्कार-
फलकत्वपक्षे तु न केवलं समावेशनपदार्थ एव परित्यक्तो भवति,
अपि तु दृष्टद्वारकत्वसम्भवेऽदृष्टफलकत्वमिति "व्रीहीनवहन्ती"
ति वाक्यविचारावसरे पूर्वतन्त्रे उपपादितत्वात् तन्न्यायभङ्गोऽपि
समादृतो भवति। एवं च समावेशनान्यथानुपपत्त्या रजोऽनन्त-
रविवाहसाधनं युक्तमेवेति वर्णयन्ति।

वयं तु पश्यामः—साक्षादेव समावेशनमदृष्टमुपजनयतीति।

तत्र हि दृष्टफलद्वारादृष्टफलम्, यत्र दृष्टफलमपि प्रकृतोपयोगि भवेत्। यथाऽवहननजन्यवैतुष्यं विना न पुरोडाशनिष्पत्तिरिति वैतुष्यमपि प्रकृतोपयोगि भवति। अन्यथा "व्रीहीन् प्रोक्षति" इत्यत्रापि दृष्टद्वारैव संस्कारप्रयोजकत्वापत्तेरित्यन्यत्र विस्तरः।

एवं चात्र दृष्टफलस्य प्रयोगोपयोगित्वाभावेन नोक्तन्यायविरोधो भवति। एवञ्चादृष्टार्थमेवेदं समावेशनमित्येवाङ्गीकरणीयम्। न च समावेशनपदस्य तृप्तिविशेषोत्पादकव्यापारविशेषबोधकत्वात् प्रयोगानुपयोग्यपि तृप्तिविशेषस्तदनुष्ठानतः सम्भवत्येव। तथाच दृष्टार्थो वा भवतु, अदृष्टार्थो वा भवतु, सर्वथापि तु यादृशस्त्रीव्यक्तिसम्पादनेन समावेशनस्वरूपसिद्धिः, तादृशस्त्रीव्यक्तिसम्पादनमेवावश्यकमिति युवतिविवाहसिद्धिरप्रत्यूहैवेति वाच्यम्; यथा हि "कृष्णलं श्रपयति" इत्यत्र श्रपिधातोर्विक्लृत्त्यनुकूलव्यापारशक्तस्यापि विक्लृत्तिबाधाददृष्टार्थाधिश्रयणादिव्यापारमात्रबोधकत्वमिति पूर्वतन्त्रे निरूपितम्, तद्वदत्रापि समावेशनपदेनादृष्टार्थव्यापारविशेषमात्रबोधने न दोषात्। युक्तं चैतत्। यथा हि "उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति" इतिवाक्यविहितोऽग्निहोत्रहोमो "अग्निहोत्रं जुहोतीति" वाक्यविहितादग्निहोत्रहोमात् भिन्नरूपोऽपि तत्प्रयोगेणैवानुष्ठीयते, नामातिदेशेन तद्धर्माणां प्राप्तेः, फलविशेषे परं भेद एव; फलातिदेशासम्भवात्। एवं नामैक्येन ऋतुसमावेशनधर्ममात्रातिदेशेन तद्धर्माणामेव प्राप्तिः, फलविशेषे परं भेद एवेत्यङ्गीकरणीयम्। एवं च तादृशसमावेशनस्य अष्टवर्षबालिकाविवाहेऽपि संभाव्यमानतया न रजोऽनन्तरविवाहसिद्धिर्भविष्यति। तदयं निर्गलितोऽर्थः—यथा हि "वाजपेयेन यजेत" इत्यत्र तत्प्रकरणपठितानां सर्वे-

षामपि वाजपेयशब्देन स्वाराज्यफलसम्बन्धो बोध्यते, एवं पाणिग्रहणसप्तपदीसमावेशनादीनां बहूनामेव क्रियाकलापानां संस्काररूपफलसम्बन्धो बोध्यते। तत्र पाणिग्रहणफलं यथा स्त्रीसंस्कारः, एवं समावेशनफलमपि स्त्रीसंस्कार एव, स च कन्यायामपि सम्भवतीति न तदन्यथानुपपत्तिप्रमाणावसरः। यदि तु पाणिग्रहणमेव विवाहः, तदङ्गन्तु सप्तपदीगमनादिकम्, तदापि "द्रव्यसंस्कारकर्मसु फलश्रुतिरर्थवादः स्यात्" इति न्यायेन प्रयाजाद्यर्थवाद एव फलसमर्पको न भवतीति प्रयाजादीनामिव अदृष्टार्थत्वमेव। न च स्वतन्त्रमेव समावेशनं विवाहचतुर्थदिने विधीयते इति वाच्यम्; तस्य दृष्टार्थत्वे विधिवैयर्थ्यम्, अदृष्टार्थत्वे न प्रौढाविवाहसिद्धिरिति घट्टकुट्यामेव प्रभातम्। यत्तु कामसूत्रे समावेशनपदं अभ्यन्तरव्यवायपरत्वेन व्यवस्थापितम्, तदपि ऋतुसमावेशनाभिप्रायेणैव, नतु तत्सदृशचतुर्थदिनसमावेशनाभिप्रायेणापि। किञ्च चतुर्थदिनसम्बन्धिसमावेशनान्यथाऽनुपपत्त्या कथं प्रौढाविवाहसिद्धिरिति विवेचनीयम्। तत्र न तावत् यथा "स्रुवेणावद्यति स्वधितिना अवद्यति" इत्यादिस्थलेषु स्रुवकरणकावदानयोग्यत्वं आज्यस्यैव, एवं स्वधितिकरणकावदानयोग्यत्वं मांसादेरेवेति अर्थसामान्यात् निर्णयः कृतः, तथात्रापि वध्वा सह व्यवायार्थं सह शयनात्मकं समावेशनमपि तद्योग्यामेव काञ्चन स्त्रियमाक्षिपतीति प्रकारेण तदुपपादनं संभवति। आज्यपुरोडाशमांसादीनामिवात्र कन्यायुवत्योरुभयोरपि विवाहसंस्कार्यत्वस्यैतावताऽप्रसिद्धत्वेन वैषम्यादुक्तन्यायाप्रवर्तनात्। प्रमाणान्तरविचारणायाञ्च कन्याविवाह एव साधीयानित्येव भविष्यतीति तदनुसारेण युवतिविवाहसाधनं न संभवतीत्युपरिष्टादुपपादयिष्यामः। एवं चाह-

र्थमेवेदं समावेशनमिति तादृशफलस्य कन्यायामपि संभवादर्थवाधादपि समावेशनबाधो न भविष्यति । एतेन—कन्याविवाहे समावेशनरूपाङ्गवैगुण्येऽपि संस्कारसिद्धिर्भविष्यतीत्येवेति यदुक्तम्, तदपि—परास्तम् । तथा हि—किं समावेशनं प्रौढाविवाहमात्राङ्गं विवक्षितम्, उत विवाहसामान्याङ्गमिति ? नाद्यः; प्रमाणाभावात् । समावेशनविधानानुपपत्तिरेव प्रमाणं न संभवति; निरस्तत्वात् । न द्वितीयः, कन्याविवाहाङ्गत्वस्य भवतैवोपपाद्यत्वेन पूर्वापरविरोधात् ।

किञ्च नित्यकर्मसु प्रधानकर्मवैगुण्येऽपि फलसिद्धिरिति न कस्यापि संमतम् । समावेशनञ्च प्रधानकर्मैव प्रयाजादिवदिति पूर्वमेव निरूपितम् । एवं च समावेशनरूपाङ्गलोपे संस्कारस्यैव लोपः स्यादिति कन्याविवाहपक्षमपि शास्त्रीयं मन्वानानां भवतां मते कीदृशं वा समावेशनमनुष्ठाप्येत । कथं वा तादृशस्य समावेशनस्यापि आपस्तम्बाचार्यादिसंमतत्वमुपपद्येत ? तत्र यादृशयुक्तिः युष्माकमर्थसाधिका, तादृशयुक्तिरेवास्माकमप्यर्थसाधिका । यावता समावेशनमुभयसाधारणं युष्माभिरुपपाद्यते, तावता कथमन्यथानुपपत्तिप्रमाणावसर इति भवन्त एव विदांकुर्वन्तु । यदि तु ऋतुसमावेशनातिरिक्तमेव समावेशनं "शेषं समावेशने जपेत्" इत्यत्र विवक्ष्यते, एवमपि निषेकापरपर्यायमपि समावेशनं ऋतुसमावेशनतः पूर्वमनुष्ठेयतया स्मृतिज्योतिषशास्त्रादिपर्यालोचनयाऽवगम्यते, तदेव समावेशनं विवक्षितमिति । अयमाशयः—निषेको हि पुण्यदिनेऽनुष्ठेयतया शास्त्रेण चोद्यते । चतुर्थरात्रसमावेशनमपि जैमिन्यादिभिः पारस्करादिभिश्च चतुर्थरात्रे पञ्चमादिपुण्यरात्रे वा अनुष्ठेयतया प्रतिपादितम् । एवञ्च प-

गयदिनानुष्ठेयत्वसामाम्यात् चतुर्थरात्रसमावेशनमपि निषेके एव निश्चीयते, चतुर्थरात्रत्वेन पुण्यदिनत्वं तु सर्वेषामपि सम्मतमिति न दोष इति केषांञ्चिदभिप्रायः परिगृह्यते, तदापि नर्तुमतीविवाहसिद्धिः। शेषपदस्वारस्यभङ्गः परं दुःपरिहरः। यथा च निषेकपदेन बाह्यसंयोग एव विवक्षितः, तथा कामसूत्रादौ व्यक्तम्।

"स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम्।
संकल्पोऽध्यवसायश्च क्रियानिर्वृतिरेव च॥
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः॥"

इति वचनप्रतिपादितेषु बहूनामाङ्गनां कन्यायामपि संभवात् न कथञ्चिदपि समावेशनान्यथानुपपत्त्या युवतिविवाहसिद्धिः। यदा तु "ब्रह्मचर्यं नाम गुह्येन्द्रियाविकारः" इति योगसूत्रानुसारेण गुह्येन्द्रियाविकारस्य ब्रह्मचर्यपदार्थतया कन्यकादिस्त्रीव्यक्तिदर्शनमात्रेण अधीरचित्तस्य कामुकवयस्य गुह्येन्द्रियविकारस्य संभाव्यमानतया सहशयनादीनामपि कलापानां विद्यमानत्वे नितरां तस्य संभाव्यमानतया च मुख्यसमावेशनमपि कन्यायामपि संभवेदेव।

"असंस्कृतां पुष्पहीनां कन्यकां वा द्विजाधमः।
गन्तुमिच्छति पापात्मा नरकं याति दारुणम्॥"

इति वदतां मार्कण्डेयाचार्याणामप्यत्रैवानुकूलत्वादिति विभाव्यते, तदा दृष्टार्थसमावेशनाङ्गीकारादपि न युवतिविवाहसिद्धिरिति मन्तव्यम्। व्यवायो नाम गुह्येन्द्रियविकार एवेति तु न विवादास्पदम्।

एतेन—समावेशनपदस्य दृष्टार्थव्यापारविशेषशक्तत्वात् दृष्टफलस्य च प्रौढायामेव संभवात् समावेशनं नाम वध्वा सह मैथु-

नार्थं शयनमिति वदतां सुदर्शनाचार्याणां युवतिविवाह एव तात्पर्यमिति शङ्कापि—परास्ता। एवं च चतुर्थदिनसंबन्धिसमावेशनान्यथानुपपत्त्या न युवतिविवाहसाधनं युक्तमिति वर्णयन्ति। तत्सिद्धम्—समावेशनमन्त्रान्तमन्त्रसमुदायकरणकक्रियाकलाप एव विवाहपदार्थः, समावेशनं च विवाहाङ्गमेव, स चादृष्टार्थव्यापारविशेष एव, तदन्यथानुपपत्त्या च न युवतिविवाहसिद्धिरिति चापस्तम्बीयसमावेशनविधिपर्यालोचनेन निश्चीयते। एतेन—गृह्यान्तरगतसमावेशनविधयोऽपि व्याख्याताः।

अत्रेदं विचारणीयम्—विवाहकालविमर्शकारैः समावेशनाद्यन्यथानुपपत्त्या किं रजोऽनन्तरविवाहः शास्त्रीय इति प्रतिपाद्यते, उताहो अशास्त्रीयस्यापि तस्य वृषलीत्वनिवर्तकप्रायश्चित्तानुष्ठानानन्तरमपि अनुष्ठाने न दोष इत्यापत्कल्पतयाऽभ्यनुज्ञामात्रमिति? आद्ये "रतां वर्जयेत्" इत्यादिनिषेधे जाग्रति समावेशनानुपपत्तिप्रमाणानवसरेण शास्त्रीयत्वसमर्थनासंभवः; संभवे तु प्रायश्चित्तानुष्ठानव्यवस्थापनं भवतामसङ्गतमेव सम्पद्यते। नहि शास्त्रीयकर्मानुष्ठाने प्रायश्चित्तापेक्षा। अशुद्धिनिवर्तनार्थं खलु प्रायश्चित्तानुष्ठानम्। तत्र यदि ऋत्वनन्तरवर्षत्रयपर्यन्तं विवाहकाल इति स्यात्, तदा तावत्पर्यन्तं विवाहाननुष्ठानेऽपि नाशुद्धिः स्यादिति प्रायश्चित्तानुष्ठानं वितथमेव। "नोपरुन्ध्याद्रजस्वलाम्" इत्यादिवचनान्यपि दत्तजलाञ्जलीनि प्रसज्येरन्।

ननूक्तवचनेन याचमानायापि वराय यः कन्यां न प्रयच्छति, अयाचमानेऽपि वरे यस्तृतीयवत्सरे कन्यां न प्रयच्छति, तस्यैव विषयीकरणं युक्तम्। यतो हि—

अप्रयच्छन् समाप्नोति भ्रूणहत्यामृतावृतौ।

न याचते चेदेवं स्याद्याच्यते चेत्पृथक् पृथक् ॥

इति। तदनन्तरं वचनैकवाक्यता एवंसत्येवं सम्भवति। तेन हि वचनेन सामान्यतो रजस्वलादाननिमित्तं भ्रूणहत्यादिदोषं प्रतिपाद्य विशिष्य तस्य याचमानाथ वराय न दाने रजःसंख्याकत्वम्, अयाचमाने कस्मिन्नपि नदाने यावद्दानकालमेकत्र भ्रूणहत्येति प्रतिपाद्यते। तत्र यद्ययाचमाने कस्मिंश्चन यो न ददाति तस्यैका भ्रूणहत्या प्रतिपादिता। तथापि—"त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती" इति वर्षत्रयपर्यन्तं दानगौणकालस्य प्रतिपादनात् तृतीयेऽपि वत्सरे यः कन्यां न प्रयच्छति, तद्विषयकत्वमेवोचितमिति तावत्पर्यन्तं कन्याऽदाने न दोषलेशोऽस्ति। ऋतुसंख्याकगोदानेन प्रायश्चित्तविधानमपि याचमानायापि वराय यः कन्यां न प्रयच्छति, तद्विषयकमेवेति रजोऽनन्तरविवाहसामान्यस्य प्रायश्चित्तानुष्ठानपूर्वकानुष्ठानव्यवस्थापनं नास्माभिः कृतमिति चेत्, सत्यम्; तथापि न तत्संगतम् भवति; त्रीणि वर्षाणीति वचनस्य गौणकालसमर्पकत्वे प्रमाणाभावात्, प्रायश्चित्तानुष्ठानपूर्वकदानाधिकारकालबोधकत्वेनैवोपपत्तेर्वर्णनीयत्वात्। यतो गौतमेन "प्रदानं प्रागृतोः, अप्रयच्छन् दोषी भवति" इति ऋतुकालतः पूर्वमदान एव भ्रूणहत्यारूपदोषः प्रतिपादितः। अत्र च विषये "कालेऽदाता पिता वाच्यः" इत्यादिवचनान्यपि प्रमाणीकर्तव्यानि। एवं च यो हि मनुः प्रथमत ऋतुकालतः पूर्वमेव दानं प्रतिजानीते, स कथं ऋत्वनन्तरवर्षत्रयमपि दानकाल इति बोधयेत्।

'काममामरणात् तिष्ठेत् गृहे कन्यर्तुमत्यपि' इति विरोधार्थकमपिशब्दं प्रयुञ्जानश्चायं "प्रदानं प्रागृतोः" इति वचनैकवा-

कयतामेवाभिप्रैतीति एकभ्रूणहत्यादोषस्य विद्यमानत्वात् तन्नि-वर्तनार्थं प्रायश्चित्तनुष्ठानमावश्यकमेवेति तच्छास्त्रीयतावादोऽसंगत एव। उत्तरत्र चैतत् विस्तरेण उपपादयिष्यामः।

यदपि केचित्—मुख्यकालातिक्रमणनिमित्तमेवेदं प्रायश्चित्तम्, न तु निषेधशास्त्रोल्लङ्घननिमित्तम्—इति वर्णयन्ति, तदपि न संगतम्; मुख्यकालातिक्रमणमेव निमित्तमितिवचनं विना भवदीयप्रतिज्ञामात्रस्य निर्मूलस्यासाधकत्वात्। निषेधशास्त्राणां च बहूनां विद्यमानत्वेन तदुल्लङ्घननिमित्तकवर्णनस्यैव युक्तत्वाच्च। एतेन—गौणकल्पोऽयं विवाहः—इति वादः परास्तः। द्वितीये तु वयोनिर्णयसिद्धान्त एव पर्यवसानमिति महता सन्दर्भेण नग्निका-विवाहादपि ऋतुमतीविवाह एव साधीयानित्यादिनिरूपणं न संगतं भवति इति।

अत्र केचिदापत्कल्पतया प्रायश्चित्तानुष्ठानपूर्वकं वापि रजो-ऽनन्तरविवाहोऽपि शास्त्रसंमत एवेति तदनुष्ठाने न दोष इति वदन्ति।

अन्ये तु—सत्यं न दोषः, तथापि विवाहः कामार्थ एव स्यात्, न धर्मार्थः, प्रायश्चित्तानुष्ठानेन तु अविवाह्यत्वयोग्यताया एव नि-वृत्तिः, न तु धर्मानधिकारस्यापि इति वृषलीत्वनिवृत्तिर्नास्त्येवेति।

परे तु—प्रायश्चित्तानुष्ठानेन वृषलीत्वस्यापि निवृत्तिर्भवति। एवं चेदपि कन्यापित्रादीनां भ्रूणहत्यादोषस्य वर्णितत्वात् तस्य च प्रायश्चित्ताचरणेऽपि सर्वथा निवृत्त्यसंभवात् संव्यवहार्यत्वयोग्यतासिद्धावपि नरकसम्बन्धो दुर्निवारः—इति वर्णयन्ति।

सर्वथापि तु प्रक्षालनाद्धीति न्यायेन यथा वृषलीत्वादिकं क-न्यायाः, तत्पतित्वं च वरस्य, भ्रूणहन्तृत्वं च तत्पित्रादीनां न स्या-

तु तथैव कोऽपि समयोऽनादिपरंपरागतः संरक्षणीय इति रजोऽन-न्तरविवाहशास्त्रीयतासमर्थनमसंगतमेवेति अलमनेन प्रसक्तानु-प्रसक्तविचारेणेति प्रकृतमेवानुसरामः ।

यत्तु परिणयमीमांसायाम्—

तत्र तावद्भगवानापस्तम्बः 'शेषं समावेशने जपेत्' इत्याह । किमनेन सूत्रेण भगवान् चतुर्थदिने समावेशनं विदधात्याहोस्वि-न्नेति वादिविप्रतिपत्तिदर्शनात् विचारयामः । किं तावत्प्राप्तम्? विदधातीति ; कस्मात् ? प्रमाणोपलम्भात् । तथाहि—'तं चतुर्थ्या-मपररात्र' इत्यारभ्य संस्कारजातं विधायेदं पठति 'शेषं समावेशने जपेत्' इति । तस्मादुत्पश्यामः चतुर्थ्यां विधीयते समावेशनमिति। ननु 'समावेशने' इत्येव पठ्यते । तथा च तस्मिन्काले जपेत् इति फलति । समावेशनं तु किं केन कथमित्यादिकं नात्रोपलभ्यत इति चेत्, न; उत्तरत्र 'रजसः प्रादुर्भावात् स्नातामृतुसमावेशने' इति श्रुतात् ऋतुलिङ्गात् समावेशनं नाम वध्वा सह मैथुनार्थं शयन-मिति सुदर्शनाचार्येण व्याख्यातत्वात् । तर्हि उपरिनिर्दिश्यमानमे-वर्तुसमावेशनमत्रापि प्रत्यभिज्ञाप्यते शब्दैक्यादिति तदनुवादेन जप एव केवलमत्र विधीयते इति अभ्युपगच्छामः । नैवं शक्यते-ऽभ्युपगन्तुम; तत्रतु समावेशनस्य विधानाभावात् । नन्वत्रापि विधिं नोपलभामहे । बाढम् ; 'अनुपलभमाना अपि त्वनुमास्यामहे सन्निधिसामर्थ्यात् । 'तं चतुर्थ्यापररात्रमुत्थाप्य' इत्यादिकर्मजातं विधाय हि प्रकरणे तस्मिन्निदं पठ्यते 'शेषं समावेशने जपेत्' इति । तद्धि समावेशनकर्मकालं कमप्यपेक्षते ; अपेक्षितं च कालं प्रकरणं समर्पयति । तस्माद्यथा 'समिधो यजति' 'तनूनपातं यज-ति' इत्यादीनि प्रयाजादीनि कर्माणि दर्शपूर्णमासप्रकरणे पठि-

तानि तयोरङ्गभावं प्रतिपद्यन्ते। एवं समावेशनकर्मापि शेषहोमप्रकरणे पठितं सदस्याङ्गभावं प्रतिपद्य चतुर्थदिनापररात्र एवात्मानं लभते। ननु 'समावेशने' समावेशनकाले इत्येव तस्यार्थः, तथा व्याख्यातत्वात् सुदर्शनाचार्येण; न पुनः समावेशनकर्मणीति। नैष दोषः। कालार्थपरिग्रहेऽपि सोऽयं कालः कदेति शङ्कायां प्रकरणबलेन चतुर्थदिनस्यैवाक्षिप्यमाणत्वात्। तर्हि ऋतुसमावेशनं नास्तीत्यागच्छेत्? न; तत्रापि विधेः कल्पनीयत्वात्। तर्हि कर्मभेदः स्यात्; तच्चायुक्तमभ्युपगन्तुम्; शब्दैक्येनैककर्मत्वाध्यवसायादित्यवोचाम। न; शब्दैक्याभावेन प्रत्यभिज्ञाभावात्। अत्र हि 'समावेशने' इति पठ्यते, तत्र तु 'ऋतुसमावेशने' इति। कथमनयोरैक्यं स्यात्। तस्मात् कर्मभेदोऽभ्युपगन्तव्यः। अत एव सुदर्शनाचार्यः 'एतच्च रागप्राप्तसमावेशनाश्रितं विवाहकर्मार्थं क्रमजपयोविधानम्; यथा भोजनपर्यायव्रताश्रितं पयआदिविधानम्' इति ब्रुवन् सर्वनाम्नैतच्छब्देन रागप्राप्तमित्यनेन चेदं समावेशनमृतुसमावेशनादन्यत् रागतः प्राप्तत्वाच्च न विधानमर्हति चेति स्पष्टं न्यरूपयत्। ऋतुसमावेशनं तु नित्यमेव 'ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति। घोरायां भ्रूणहत्यायां पतते नात्र संशयः' इति पत्नीगमनस्य नियमेन विधानात्। 'यथा भोजनपर्यायव्रताश्रितं पयआदिविधानमिति दृष्टान्तोऽपि अस्मत्पक्षमेवानुकूलयति। तथा हि—दीक्षितस्य पयोविधानं भोजनपर्यायव्रताश्रितम्; भोजनं च रागप्राप्तम्। यदि रागो न स्यात् लुप्यत एव भोजनं तत्पर्यायं व्रतश्च। तत्र पयआदेः प्रसक्तिरेव नास्ति। ततश्चात्र समावेशनमनियतमिति फलति। अनियतत्वाच्चेदं भिन्नमेव भवितुमर्हति, ऋतुसमावेशनस्य नियमेन विधानात्। अत एवोपरिष्टाच्च

'अस्मिन्नेव क्रमे यदि दैवादृतुगमनमपि कर्तव्यं स्यात् तदा पूव-मारोहोरुमित्यादिजपः ततो विष्णुर्योनिमित्यादिजपः' इत्यब्रवीत्। यद्यत्र समावेशनमृतुसमावेशनमेव स्यात् तर्हि सुदर्शनवाक्ये ह्यपेः स्वारस्यमनादृतमेव स्यात्। अपि चतु समावेशनमेवात्र यद्याश्रय-तया विवक्ष्येत, तर्हि 'रजसः प्रादुर्भावा' दिति सूत्रारम्भो व्यर्थः स्यात्। तस्मादवश्यमत्र समावेशनद्वयमङ्गीकर्तव्यम्। ननु यदि चतुर्थदिने समावेशनमभ्युपगम्येत, तस्य प्रयोजनं वक्तव्यम्—कि-मिदं दृष्टार्थं वोतादृष्टार्थमिति। यदि दृष्टार्थं तर्हि 'रजसः प्रादु-र्भावात्' इत्यत्र विधीयमानमनर्थकं स्यात्। अथादृष्टार्थम्, तदपि न; प्रमाणाभावात् गौरवाच्च। नैष दोषः। अगतिका हीयं गतिः यदत्रादृष्टार्थं चतुर्थदिने समावेशनमभ्युपगच्छामः इति। अन्यथा पृथक्सूत्रारम्भो व्यर्थः स्यात् इत्यवोचाम। तस्मात् रागप्राप्तमिदं समावेशनं अनियतमपि अभ्युपगन्तव्यमेव। तस्मात् विधीयत एव चतुर्थदिनापररात्रे समावेशनमापस्तम्बेन भगवतेति। एवं प्राप्ते ब्रूमः—नैतदेवमिति; कस्मात्? 'प्रमाणाभावात्। तथा हि—'तिस्रो जपित्वा शेषं समावेशने जपेत्' इति हि सूत्रं भवति। तत्र समावेशने समावेशनकाले जपेत् इति टीकाकारैः व्याख्यायते। सोऽयं कालः कदेति नानेन वचनेन ज्ञायते इत्यत एवोत्तरत्र वक्ष्य-माणं ऋतुपदसमभिव्याहारमादाय ऋतुसमावेशनकालमभिप्रैति सुदर्शनः इति स्पष्टं प्रेक्षावताम्। तादृशं समावेशनमनूद्य जपमात्र-त्रमेवात्र विधीयते इति च। कथमत्रानुवादो युज्येत। शब्दभेदात् कर्मभेदाध्यवसायादित्यवोचाम। बाढमवोचः। वाचारम्भणमेवैत-दित्युत्पश्यामः; शब्दैक्येन प्रत्यभिज्ञानसंभवात्। ननु कथं समा-वेशन ऋतुसमावेशनशब्दितयोः कर्मणोरेकत्वं स्यात्। नैतत्सङ्ग-

तम् । विभक्तिभेदाभेदौ हि शब्दभेदाभेदप्रतिपादकौ हेतू, न पुनर्विशेषणसमभिव्याहारतदभावौ । अत एव 'सर्वत्र प्रसिद्धोपदेशात्' (ब्र० १-२-१) इत्यधिकरणे 'शारीरस्यात्मनो यः शब्दोऽभिधायकः सप्तम्यन्तोऽन्तरात्मन्निति तस्माद्विशिष्टोऽन्यः प्रथमान्तः पुरुषशब्दो मनोमयत्वादिविशिष्टस्यात्मनोऽभिधायकः' इत्यब्रुवन् श्रीमन्तो भगवत्पूज्यपादाः 'शब्दविशेषात्' इत्यत्र । एवमिहापि 'समावेशने' इति सप्तम्यन्तः पठ्यते । उत्तरत्र 'ऋतुसमावेशने' इति स एव सप्तम्यन्तः विशेषणविशिष्टः पठ्यते । तस्मात् सर्वप्रकारेण शब्दैक्यमपह्नोतुमशक्यम् । अतः उत्तरत्र वक्ष्यमाणमेवर्तुसमावेशनमत्र प्रत्यभिज्ञाप्यत इति अनयोरैक्यं अकामेनाप्यभ्युपगन्तव्यम् । तस्मादृतुसमावेशनमेवानूद्य जपमात्रमत्र विधीयत इत्युत्पश्यामः । यदुक्तं पृथक्सूत्रारम्भो व्यर्थ इति, अत्र ब्रूमः । आम्नातस्यार्थं प्रतिपत्तुं प्रभवामो नाम्नातं पर्यनुयोक्तुम् । 'शेषं समावेशने जपेत्' इति वाक्यस्वारस्येनर्तुसमावेशनमेकमेव विधीयत इत्यवगच्छामः, न पुनरपूर्वमत्रापि समावेशनं किमपीति । नन्वनुमास्यामहे संनिधिसामर्थ्यादित्यवोचाम । बाढमवोचः, न युक्त्युपेतमवोचः । 'वेधाद्यर्थभेदात्' (ब्र. ३. ३. २५.) इत्यधिकरणन्यायविरोधात् । तत्र हि शारीरकमीमांसायां 'हृदयं प्रविध्य' इत्यादिमन्त्राणां प्रवर्ग्यादिकर्मणां च रहस्यपठितानामपि न सन्निधिबलेन विद्याशेषत्वं संभवति, श्रुतिलिङ्गादिभिः प्रबलप्रमाणैरन्यत्र विनियुक्तत्वात् इति प्रपञ्चितम् । एवमिहापि 'शेषं समावेशने जपेत्' इति समावेशकर्मणि विनियुक्तस्य जपस्य कालः समावेशनकाल एव भवितुमर्हति । न च कथं 'समावेशने' इति शब्दः सप्तम्यन्तः सकृदुत्पन्नः समावेशनकर्म ज्ञापयित्वा

पुनः समावेशनकालमपि ज्ञापयितुमर्हतीति प्रत्यवस्थातव्यम् : दर्शपूर्णमासयोः तत्प्रख्यन्यायेन कर्मनामत्वेपि पुनः शब्दशक्त्या दर्शपूर्णमासयोः कालावपि लभ्येते इति शास्त्रेष्वङ्गीकृतत्वात्। अत एव—

'वर्षे वर्षे तु या नारी कृष्णजन्माष्टमीव्रतम्।'

इत्यत्र तत्प्रख्यन्यायेन कर्मनामत्वं शब्दशक्त्या कालश्च प्रतिपाद्यते इति प्रपञ्चितं स्मृतिकौस्तुभे। एवमिहापि भवतुमर्हति। तस्मात् 'शेषं समावेशने जपेत्' इति वाक्येन सकृदुत्पन्नेन समावेशनसंबन्धिनि काले विनियुक्तस्य कर्मणः (जपस्य वा) पुनः कथं दुर्बलेन सन्निधिना शेषहोमस्याङ्गभावः प्रतिपाद्येत। तस्मात् प्रकरणपाठावष्टंभेन प्रयाजादिवन्नास्याङ्गभावः संभवतीति भिन्नमेवेदं कर्म स्वकीये कालान्तरे भवितुमर्हति। अथापि भवतः श्रद्धामनुरुध्याङ्गभावं प्रतिपद्येमहि, एवमपि 'वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत' इति वाक्येन विहितस्याङ्गस्य बृहस्पतिसवस्येव वसन्ते कालान्तर एवानुष्ठानं समावेशनस्य न्याय्यं मन्यामहे। परमार्थतस्तु बृहस्पतिसवस्येवाङ्गभावं विदधद्वाक्यं नोपलभामह इति न युष्माकमभीष्टस्य स्यात् स्वप्नेप्यवकाशः। ननु तर्हि मिथः समीक्षणादीनां भिन्नकर्मणामपि विभिन्नाः कालाः स्युः ? न; तेषां कर्मणां कालः कदेति शंकायां सन्निहितेन प्रकरणेन कालस्याक्षेपेण शंकानिवारणस्य संभवात्। इह तु वाक्येनैव बलीयसा स्वकालः समर्प्यत इति न प्रकरणस्यावकाशो दुर्बलस्य। तस्मात् 'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत' इत्यत्रेव 'तिस्रो जपित्वा शेषं समावेशने जपेत्' इत्यत्रापि कालार्थोऽयं संयोग इति मन्तव्यम्। तस्मान्न सर्वात्मना चतुर्थदिनापररात्रे समावेशनं विधो-

यत इति सिद्धम् । अपि चादृष्टार्थं यद्यत्र समावेशनमभ्युपगम्येत, अन्याय्यमेवैतत् स्यात् । दृष्टे संभवत्यदृष्टकल्पनायाः अन्याय्यत्वात् । अपि चादृष्टार्थादस्मात् समावेशनात् कथमृतुमतीत्वमपि वध्वाः प्रतिज्ञायेत । ननु 'समावेशनं वध्वा सह मैथुनार्थं शयनम्' इति सुदर्शनाचार्यव्याख्यानात् परिभाषेति जानीमः । नेति ब्रूमः । 'केचित् असत्यपि रागे' इत्यादिपक्षान्तरोपदेशानर्थक्यात् । गौणतयापि त्वदीयवृद्धैरभ्युपगते बालिकोद्वाहपक्षे परिभाषायाः असङ्गतत्वात् । अथ तदविरोधाय समावेशनमेकत्र मेलनं शयनं वेत्यर्थं अङ्गीकरोषि, नात्र चतुर्थीसमावेशनमृतुमतीत्वं वध्वाः नियमेन उपस्थापयति । न च बालिकोद्वाहमपेक्ष्यैकत्र मेलनं शयनं वेत्यर्थः, ऋतुमतीविवाहमपेक्ष्य पारिभाषिकोऽर्थः संगच्छतामिति वाच्यम् ; विधिवैषम्यप्रसङ्गेन 'द्वयोः प्रणयन्ति' (जै, ३, ७, २३) न्यायविरोधात् । न चैवमस्माकं 'समावेशने' इति सप्तम्यन्तस्य युगपत्प्रतीयमानमर्थद्वयमङ्गीकुर्वतां विधिवैषम्यं संभवति, प्रतीयमानार्थस्य परित्यागायोगादिति सुधियो विभावयन्तु ॥

तस्मात् समावेशनबलादेवर्तुमतीत्वप्रतीज्ञा मृषैवेति सिद्धम् । न्यायतस्तु ऋतुसमावेशनमेवोपरि वक्ष्यमाणमत्रानूदितमिति प्रपञ्चितमधस्तात् । तस्मात् सिद्धम्—न चतुर्थदिने समावेशनं विदधात्यापस्तम्बो भगवानिति ।

यदुक्तं रागप्राप्तत्वाच्चतुर्थीसमावेशनमनियतम्, ऋतुसमावेशनं पुनर्नियमेन विधीयत इत्यनयोर्भेद एवाङ्गीकर्तव्य इति, अत्रैवं भवान् प्रष्टव्यः—किं पुना ऋतुसमावेशनं रागतः प्राप्नोति आहोस्विन्नेति ? यदि न स्याद्रागस्तत्र तर्हि असत्यपि रागे कथं पुन-

व्यवायो अङ्गी क्रियते। व्यवायोऽपि क्रियते रागोऽपि न भवतीति विप्रतिषिद्धं ह्येतत्। नियमविधिरपि विज्ञानेश्वराचार्यैरुपपादितः रागमवलम्ब्यैवात्मानं लभते। यथा गार्हस्थ्यधर्माः रागतः प्राप्तं विवाहमवलम्ब्यैव प्रवर्तन्ते, एवं 'ऋतुकालाभिगामी स्यात्' इत्यादिनियमविधिः स्त्रीपुंसो रागमवलम्ब्यैव प्रवर्तते। अत्राहाक्षेप्ता— कथं पुनर्विवाहो रागप्राप्तः स्यात्; यत्कारणं आश्रमान्तरवत् गार्हस्थ्यमपि नित्यसिद्धमेवेति वैकल्पिकनित्यो विवाहो व्रीहियववत् इति प्रपञ्चितमभियुक्तैर्विमर्शे। नेति ब्रूमः। 'यदि व्रीहियववत्' इत्यत्र व्यवस्थितविकल्पोऽभ्युपगम्येत, तर्हि ब्रह्मचर्यं प्राप्तेन गार्हस्थ्यं न प्रवेष्टव्यम्, गार्हस्थ्याच्च पारिव्राज्यं नाङ्गीकर्तव्यमिति स्यात्; व्यवस्थितत्वात् विकल्पस्य। अथैच्छिकोऽयं विकल्प इति ब्रूषे, तर्हि आगतोऽसि मार्गेण। रागप्राप्तो विवाह इत्युक्ते का पुनस्ते क्षतिः। अत एव 'शक्त्या च यज्ञकृन्मोक्षे मनः कुर्यात्तु नान्यथा' (याज्ञ० ३. ५७.) इति पारिव्राज्यप्रकरणे 'रागप्रयुक्तत्वाच्च विवाहस्य' इत्युक्तमाचार्येण विज्ञानेश्वरेण। आस्तां तावदिदम्। अनुसरामः प्रकृतम्। तस्मादृतुसमावेशनमपि रागप्राप्तमेवेति कथमस्य चतुर्थीसमावेशनात् भेदमुपपादयसि। ननु नियमानियमाभ्यां भेदं पश्यामः। ऋतुसमावेशनं हि नियम्यते न पुनरन्यत् इति। नेति ब्रूमः। कथं पुनश्चतुर्थीसमावेशनमनियतमेवेत्यवेदीः। रागप्राप्तत्वादिति चेत्, तर्हि ऋतुसमावेशनमपि रागप्राप्तमिति तत्राप्यनियमोऽभ्युपगम्यताम्। अथ तत्र विधिरस्ति, नात्रैवं वचनमिति ब्रूषे, तर्हि समावेशनमेव चतुर्थदिने नास्तीति कथमत्र नियमानियमयोः अन्यतरः संभवेत। पराक्रान्तं चैतत् प्रथममेव। तस्मादृतुसमावेशनमेवात्रानूद्यते इति न्याय्यं पश्यामः।

व्याख्यानमप्यस्मत्पक्षमेवोपोद्बलयति इति प्रपञ्चितं वयोनिर्णये।
अथापि भवतः श्रद्धामनुरुध्य चतुर्थीसमावेशनमभ्युपगच्छामः,
एवमपि न सर्वात्मना दोषाद्विनिर्मोक्षः। रागप्राप्तं चतुर्थीसमावेश-
नमित्यभ्युपगच्छद्भिः कथं चतुर्थदिनापरराात्र एव रागः संभवेदिति
युक्तं वक्तुम्; पञ्चमषष्ठसप्तमादिषु यदा कदा वापि यदि रागः
स्यात्, तर्हि तत्रैव विवाहकर्मार्थं भवदभीष्टं समावेशनाभासं कृत्वा
तत्रैव जपो विनियुज्येत। तस्मात् यत्किञ्चित् पदश्रवणमात्रेण
यत्किञ्चित् कल्पनमसत्प्रलाप एवेत्युपेक्षणीयम्। यदप्युक्तं 'अ-
स्मिन्नेव क्रमे यदि दैवादृतुगमनमपि' इत्यत्रापेः स्वारस्यमनादृत-
मेव स्यादिति, तत्र मौनमेव सुतरां प्रतिवचनं भवितुमर्हति।
तथापि ब्रूमः—'तिस्रो जपित्वा' इत्यादिना निर्दिष्टे क्रमे यदि
अतर्कितोपनतेन दैवेनर्तुगमनमपि कर्तव्यं स्यात् इत्यर्थः। एत-
दुक्तं भवति। 'प्रजापते तन्वं मे' इत्यन्तं हि चतुर्थदिनापररात्र-
कर्म। शेषं समावेशने भवति। यदि कदाचित् कुतोपि कारणात्
ऋतुगमनमपि अप्राप्तं प्राप्नोति, तदा पूर्वं 'आरोहोरुमि' त्योदि-
जपः। ततो 'विष्णुर्योनिम्' इत्याद्यभिमन्त्रणम् इत्येव प्रतिपादय-
तीति नास्माभिरपेः स्वारस्यमनाद्रियते। अपि च चतुर्थीसमावेश-
नमपूर्वार्थमङ्गीकृत्य तत्र समावेशनस्य परिभाषया मैथुनार्थं शय-
नमित्यभ्युपगच्छतां 'दैवादृतुगमनमपि' इत्यादिना प्राप्ते ऋतुसमा-
वेशने पूर्वं 'आरोहोरु' इत्यादि विवाहकर्मार्थं पत्नीगमनं अनन्तरमृ-
तुगमनमिति एकस्मिन्नेव दिने द्विः पत्नीगमनं प्राप्नोति, तच्चा-
युक्तं 'सुस्थ इन्दौ सकृत् पुत्र' (याज्ञ. १. ८०) इति योगीश्व-
रेण द्विर्गमनस्य प्रतिषिद्धत्वात्। न च जपमात्रं 'आरोहोरुम्'
इत्यादेः भवता अभ्युपगम्यते 'मैथुनार्थं शयनम्' इति वदता। न

च 'दध्नेन्द्रियकामस्य जुहुयात्' इत्यत्र व इहापि एकमेव पत्नीग-मनं कर्मद्वयमनुगृह्णातीति वाच्यम्; तत्र ह्येकस्मिन्नेवाग्निहोत्रक-र्मणि दध्नो गुणविधिरभ्युपगम्यते। इह तु चतुर्थीसमावेशनात् भिन्नमेवर्तु समावेशनमिति कर्मभेदोऽभ्युपगम्यते भवता। तस्मात् कुण्डपायिनामयनाग्निहोत्रन्यायेनैकस्मिन्नहनि द्विः पत्नी-गमनं प्राप्नोत्येव। किमतो यद्येवम्, एतदतो भवति दृष्टे संभव-त्यदृष्टकल्पनमन्याय्यमेव स्यादिति। अपि च पारिभाषिकमेव स-मावेशनमिति वदतां 'ऋतुसमावेशने इति ऋतुलिङ्गात्', इति लिङ्गादर्थविवरणं सुदर्शनाचार्यस्य अनर्थकमेव स्यात्। तस्मात् न सर्वात्मना चतुर्थीसमावेशनं सूत्रकारेण विहितमित्यसमञ्जसमेव परेषां प्रत्यवस्थानमिति सिद्धम्।

स्यादेतत्—आचार्येण हरदत्तेनानाकुलाख्यव्याख्यायां समा-वेशनन्त्वस्मिन्नेवापररात्रे नियमेन भवति' इति चतुर्थीसमावेश-नस्य नियमोऽभिहितः। न च कथमनेनतु मतीविवाहः सिद्ध्यतीति वाच्यम्; 'इदमेव समावेशनं मन्त्रवत् नान्यत्' इति वाक्यशेष-श्रवणात्। नूनमस्य समये युवतय एव विवाह्यमाना आसन्निति अनाकुलाख्यागृह्यव्याख्या ज्ञापयति। अन्येनापि आण्डपिल्लयार् नाम्नाचार्येण 'यदि चतुर्थीसमावेशनमृतुसमावेशनं च युगपत्प्रा-प्नुतः' इति वदता स्पष्टमेवानयोर्भेदोऽभिहितः। मन्त्रोऽप्यारोहो-रुमित्यादिकः अमुमेव पक्षमनुगृह्णाति। तस्माच्छास्त्रीय एवतु म-तीविवाह इति। एवं प्राप्ते ब्रूमः। नैतदेवमिति। न हि समावेश-नपदं भवदभीष्टे व्यवायकर्मणि प्रयुनक्ति आचार्यो हरदत्त इ-त्यत्र कारणमुपलभामहे। ननु वाक्यशेषमत्र कारणमित्यवोचाम। न। अस्मिन्नेव समावेशने 'आरोहोरुमि' ति मन्त्रजपः, नान्यत्र

इत्येव तस्यार्थो भवितुमर्हति प्रकृतत्वात् । एतेनान्योऽप्याचार्यो व्याख्यातो वेदितव्यः । यदुक्तं मन्त्रोऽप्यनुगृह्णातीति, तत् परिहृतं पूर्वमेव 'वीरिणाम्' इत्यत्र । अस्माकं पुनः पक्षे तु मन्त्राणां सुतरां प्रयोगसमवेतार्थस्मारकत्वं संभवति । ऋतुसमावेशनस्यैकस्यैव रागतः प्राप्तस्य सूत्रकारेणानूदितत्वात् । तस्मात् चतुर्थीसमावेशनमभ्युपगच्छन्नपि हरदत्ताचार्यः न भवदभीष्टं व्यवायं अङ्गीकरोतीत्यत्र कारणं पश्यामः । अपि च 'शेषं समावेशने जपेत्' इत्यनन्तरं 'यदा मलवद्वासा स्यात्' इति रजस्वलाधर्मानुपदिश्यानन्तरं ऋतुसमावेशनं ब्रवीति । यदि रजस्वलैव विवाह्या स्यात्, कथं तद्धर्मोपदेशो विवाहानन्तरं स्यात् ? तस्मादप्यसङ्गतं परेषां प्रत्यवस्थानम् ।

अथापि स्यात् । कथं रजस्वलाधर्मोपदेशेनर्तुमतीविवाहः प्रतिषिध्येत । आपस्तम्बेन भगवतोपदिश्यमानो रजस्वलाधर्मः प्राथमिक एव रजोदर्शने इत्यत्र किं मानम् । प्रत्युत प्रथमर्तौ व्रताभाव एवोपदिश्यते शास्त्रेषु । तथा च निर्णयसिन्धौ स्मृतिचन्द्रिकायाम्—'प्रथमर्तौ तु पुष्पिण्याः पतिपुत्रवतीस्त्रियः । अक्षतैरासनं कृत्वा तस्मिंस्तामुपवेशयेत्' इत्यादिभिर्व्रताभाव एवोपदिश्यते । उपरिष्टाच्च 'द्वितीयाद्यृतुषु तन्नियमानाह मदनपारिजाते दक्षः 'अञ्जनाभ्यञ्जने स्नानं प्रवासं दन्तधावनम्' इत्यादिनिषेधं पठति । आचारेऽपि प्रथमर्तौ व्रताभावमेवोपलभामहे । सूत्रे पुनरुपदिश्यते व्रतम् । तस्मात् विवाहात् प्राचीनेष्वृतुषु व्रतानुष्ठानं नास्त्येवेति अभ्युपगच्छामः । अपि च 'तिस्रो रात्रीर्व्रतं चरेदञ्जलिना वा पिबेदखर्वेण वा पात्रेण प्रजायै गोपीथाय' (तै०सं०२.५.१.) इत्युत्पत्स्यमानप्रजावैगुण्याभावफलकमिदं श्रूयते व्रतम् । तच्च कथं

विवाहात् प्राक् प्रजोत्पादनानधिकृताया संभवेत्। अथापि भवतः श्रद्धामनुरुद्ध्य अभ्युपगच्छामो व्रतम्, एवमपि प्राग्विवाहात् मन्त्रादिभिरुपदिश्यताम्; ऊर्ध्वं तु विवाहात् पतिना संस्कारार्थं नियमार्थं च पुनरुपदेशो भवतु व्रतस्य। तस्मात् न व्रतोपदेशावष्टंभेनर्तुमतीविवाहप्रतिषेधः सिद्ध्यति इति। एवं प्राप्ते ब्रूमः—नैतदेवमिति; कस्मात्? प्रमाणाभावात्। तथा हि—भगवान् आपस्तम्बः विवाहान्तरं रजस्वलाधर्मानुपदिश्यानन्तरमृतुसमावेशनं विदधाति। अतः पाठक्रमन्यायेनर्तुमतीविवाहः प्रतिषिध्यत इति गम्यते। न च विवाहात् पूर्वं रजस्वलाधर्माभाव एवेत्यत्र किमपि प्रमाणं पश्यामस्त्वद्वचनादृते। ननु प्रथमर्तौ व्रतं नास्त्येवेति निर्णयसिन्धौ प्रतिपादितमित्यवोचाम। एतदपि नाभीष्टं पुष्णीयात्; प्रागपि विवाहात् द्वितीयादिष्वृतुषु व्रतस्य अनुष्ठेयत्वात्। अथ प्राग्विवाहात् सर्वेष्वपि ऋतुषु व्रताभावमभ्युपगच्छसि, तदपि न सङ्गच्छते प्रमाणाभावात्। प्रथमर्तौ हि व्रताभावो भवन्नीत्या न पुनरन्येष्वृतुषु। वस्तुतस्तु न भवतामर्थः संभवति निर्णयसिन्धुपरिशीलने प्रेक्षावतां। अतिमन्दं हीदं प्रत्यवस्थानम्। यदुक्तं सत्यपि प्राग्विवाहात् व्रतानुष्ठाने मन्त्रादिभिरुपदिश्यतामिति, तदपि न; प्रमाणाभावात्। नन्वस्त्याचारः। न। विवाहादूर्ध्वं हि मन्त्रादिभिरुपदिश्यमानं सूत्रविरुद्धमाचारं उपलभामहे। न पुनः प्रागपि विवाहात् उपदिश्यमानम्। तस्मात् स्मृत्याचारविरुद्धमिदं मनोरथमात्रमेव केवलं स्यात् भवताम्। यदप्युक्तं प्रजावैगुण्याभावफलोद्देशेन विधीयमानत्वात् व्रतस्य प्राग्विवाहात् प्रजोत्पादनानधिकृतायाः व्रताभाव एव न्याय्य इति, अत्र ब्रूमः—नात्र फलोद्देशेन व्रतं विधीयते, कामादिशब्दाघटितत्वात्। किन्तु औदुम्बराधिक-

रणान्यायेनार्थवादो भवितुमर्हति। अन्यथा प्रजाकामनारहितया विधवया च व्रतं नानुष्ठेयं स्यात्। तच्च व्यासादिस्मृत्याचारविरुद्धमास्तिकैरनाद्रियेत। तस्मादर्थवादो भवितुमर्हति। अर्थवादत्वाच्च रजस्वलाभिरनुष्ठेयमेव। अतः प्राग्विवाहादपि रजस्वलया तद्धर्मानुष्ठानं न्याय्यमेव भवितुमर्हति। ननु प्रजोत्पादनानधिकृतया नानुष्ठेयमित्यवोचाम। न। अनधिकृतयापि विवाहानन्तरमुत्पत्स्यमानप्रजावैगुण्याभावफलोद्देशेनानुष्ठानस्य कर्तव्यत्वात्। यथा प्रागपि विवाहात् सत्पतिलाभार्थं अश्वत्थसेचनमीश्वराराधनं च क्रियत इत्याचारः क्वचित्, एवमिहापि भवतु। अपि च प्रागपि विवाहात् व्रतानुष्ठानं मास्तु इति प्रत्यावस्थानमेव तावदसङ्गतम्; रजोनिमित्तत्वात् व्रतानुष्ठानस्य। न पुनर्विवाहं निमित्तीकृत्य रजस्वलाधर्माः प्रवर्तन्ते। तस्मादप्यसङ्गतमिदं प्रत्यवस्थानम्। तस्मात् सत्यपि चतुर्थीसमावेशने केषांचिदाचार्याणां मतेन नतुमतीविवाहः शास्त्रतः प्राप्नोतीति सिद्धम्। परमार्थतस्तु चतुर्थीसमावेशनमेव नास्तीति प्रपञ्चितमधस्तात्"

इति विवेचितम्। तत्रेदमेवास्माकमालोचनीयम्—यत् चतुर्थीकर्मसमावेशनस्यादृष्टार्थस्य स्वीकारेऽपि तदभिमतसिद्ध्या किमर्थं तन्निषेधनम् इति। नहि सर्वत्र दृष्टे संभवत्यदृष्टकल्पनं न न्याय्यम्, किन्तु यत्र दृष्टार्थत्वेऽपि नियमविधिना निर्वाहस्तत्रैव। तदुक्तम्—

> लभ्यमाने फले दृष्टे नादृष्टपरिकल्पना।
> विधेस्तु नियमार्थत्वान्नानर्थक्यं भविष्यति॥

इति। नियमविधिश्च समावेशनजन्यस्य तृप्तिविशेषस्य साधनान्तरेणापि संभव एव संभवति, यथाऽर्थज्ञानस्याध्ययनेनेव भाषा-

न्तरादिनापि संभवः। "ऋतौ भार्यामुपेयात्" इत्यत्र तु कालनियम एव, न तु क्रियानियमः। तथा च "शेषं समावेशने जपेत्" इति सूत्रे समावेशनस्यापि विधानमित्यूरीकरणेऽपि "विनापि विधिना दृष्टलाभान्नहि तदर्थते" तिन्याय एवात्र प्रसरति, नतु "लभ्यमाने फले दृष्टे" इति न्यायः। न ह्यत्र शब्दैक्यनिबन्धनं प्रत्यभिज्ञानमपि ; उत्तरत्र ऋतुसमावेशनपदस्यात्र केवलसमावेशनपदस्य च प्रयोगात्। सर्वत्र प्रसिद्धोपदेशाधिकरणे हि—यत्र "शारीरस्यात्मनोऽभिधायकसप्तम्यन्तोऽन्तरात्मन्निति, तस्माद्विशिष्टोऽन्यः प्रथमान्तः पुरुषशब्दो मनोमयत्वादिविशिष्टस्यात्मनोऽभिधायकः—इति शब्दविशेषात्" इति सूत्रे विवेचितम्। तेन प्रकृत्यभेदमात्रेण न शब्दैक्यमिति बोधनेन विवक्षितः सारांशोऽमेव—यत् विभक्त्यन्तैक्य एव शब्दैक्यम्, न त्वंशत एकत्व इति। तथा च विशेषणभेदविशिष्टसमावेशनपदात् केवलसमावेशनपदस्यापि भेद इत्यत्राप्युक्तभाष्यं गमकमेव। तथा च चतुर्थीकर्मसमावेशनमपरमेव विवाहाङ्गतया विवक्षितमिति कल्पनमेव योग्यम्। अत एव पृथक् सूत्रादिस्वारस्यम्। अधिकं चात्र वक्तव्यं पूर्वमेवोक्तमित्येतावन्मात्रमत्र वर्ण्यते—यत् बहुतरगृह्यसिद्धस्य चतुर्थदिनकर्तव्यसमावेशनस्याबाधनेव समालोचनं किमपि कर्तव्यम्, नान्यथेति। स्पष्टं च बौधायनगृह्ये चतुर्थीसमावेशनमृतुसमावेशनं च भिन्नमिति विवेचितम्। अत्रानुसन्धेयानि बौधायनवाक्यानीमान्येव। तद्यथा—

"अथ विवाहस्यारुन्धत्युपस्थानात् कृत्वा व्रतमुपैति ॥ १।६-५६
उभौ जायापती व्रतचारिणौ ब्रह्मचारिणौ भवतोऽधः शयाते।
तयोः शय्यामन्तरेण उदुम्बरदण्डो गन्धानुलिप्तो वाससा

सूत्रेण वा परिवीतस्तिष्ठत्यापक्वहोमात् ॥ ६१ ॥ चतुर्थ्यां निशायां हुते पक्वहोमे व्रतं विसृज्य दण्डमुत्थापयति ॥ ६२ ॥ अथैनं वध्वै प्रयच्छति ॥ ६३ ॥ तं वधूः प्रतिगृह्णाति ॥ ६४ ॥ अथैनं वराय प्रयच्छति ॥ ६५ ॥ तं वरः प्रतिगृह्णाति ॥ ६६ ॥ अथैनं स्थूणादेशे निधायान्तिकेन प्रतिपद्यते । प्रसिद्धमुपसंवेशनम् ॥ ६७ ॥६८॥ अथ श्रीमन्तमगारं सम्मृष्टोपलिप्तं गन्धवन्तं पुष्पवन्तं धूपवन्तं तल्पवन्तं साधिवासं दिक्षु सर्पिःसूत्रेन्धनप्रद्योतितं उदकुम्भादर्शोच्छिरसं प्रपाद्य तस्मिन्नेनां संवेश्यान्तिके जपति "उदीर्ष्वात"इति।

अथैनामुपसंवेशयति "प्रजापतिस्त्रियां यश" इत्येतया ॥ अथास्याः स्तोकोतिं विवृणोति । (स्तोकोतिर्योनिरित्यर्थः) सा यद्यश्रु कुर्यात् तां अनुमन्त्रयते "जीवां रुदन्ति" इति ।

ब्राह्मणेन ब्राह्मण्यामुत्पन्नः प्रागुपनयनोज्जात इत्यभिधीयते । उपनीतमात्रो व्रतानुचारी वेदानां किञ्चिदधीत्य ब्राह्मणः, एकां शाखामधीत्य श्रोत्रियः । अङ्गाध्याय्यनूचानः । कल्पाध्यायी ऋषिकल्पः । सूत्रप्रवचनाध्यायी भ्रूणः । चतुर्वेदादृषिः । अत ऊर्ध्वं देवः । अथ यदि कामयेत श्रोत्रियं जनयेयमित्या अरुन्धत्युपस्थानात्कृत्वा त्रिरात्रमक्षारलवणाशिनावधःशायिनौ ब्रह्मचारिणावासाते अहतानां च वाससां परिधानम् । सायं प्रातश्चालङ्करणम् । इषुप्रतोदयोश्च धारणम् । उभौ कालावग्निपरिचर्या च । चतुर्थ्यां पक्वहोम उपसंवेशनञ्च ।

अथ यदि कामयेतानूचानं जनयेयमिति द्वादशरात्रमेतद्व्रतं चरेत् । व्रतान्ते पक्वहोम उपसंवेशनं च । अथ यदि कामयेत ऋषिकल्पं जनयेयमिति मासमेतद्व्रतं चरेत् व्रतान्ते पक्वहोमः उपसंवेशनं च । अथ यदि कामयेत भ्रूणं जनयेयमिति चतुर्मासानेत-

द्व्रतं चरेत् । व्रतान्ते पक्वहोम उपसंवेशनं च । अथ यदि कामयेत ऋषिं जनयेयमिति षण्मासानेतत् व्रतं चरेत् । व्रतान्ते पक्वहोम उपसंवेशनञ्च । अथ यदि कामयेत देवं जनयेयमिति संवत्सरमेतद्व्रतं चरेत् । व्रतान्ते पक्वहोम उपसंवेशनं च ।

सर्वाण्युपगमनानि मन्त्रवन्ति भवन्तीति बोधायनः । यच्चादौ यच्चवर्ताविति शालिकिः इति ॥

अत्रान्ते "यच्चादौ यच्चवर्ताविति शालिकिः" इति स्पष्टमेव समावेशनद्वयं विवेचितम् । अन्यथा यच्छब्दद्वयवैयर्थ्यात् ।

अत्रेयमापस्तम्बसूत्रकाराणां हरदत्तवृत्तिः सुदर्शनाचार्यभाष्यञ्च । तद्यथा—

तं चतुर्थ्या अपररात्र उत्तराभ्यामुत्थाप्य प्रक्षाल्य निधायाग्नेरुपसमाधानाद्याज्यभागान्तेऽन्वारब्धायामुत्तरा आहुतीर्हुत्वा जयादिप्रतिपद्यते । परिषेचनान्तं कृत्वाऽपरेणाग्निं प्राचीमुपवेश्य तस्याः शिरस्याज्यशेषात् व्याहृतिभिरोङ्कारचतुर्थीभिरानीयोत्तराभ्यां यथालिङ्गं मिथः समीक्ष्योत्तरयाऽऽज्यशेषेण हृदयदेशौ संमृज्योत्तरास्तिस्रो जपित्वा शेषं समावेशने जपेत् ॥ (हर०) शेषमनुवाकशेषम्, आरोहोरुमित्यादि समागमनकाले जपेत् । समावेशनन्त्वस्मिन्नेवापररात्रे नियमेन भवति । इदमेव समावेशनं मन्त्रवत् । नान्यानि ।

(सुदर्शनः) शेषमनुवाकशेषं 'आरोहोरुम्' इत्यादिकं समावेशने समावेशनकाले जपेत् । समावेशनं च वध्वा सह मैथुनार्थं शयनम् । "ऋतुसमावेशने" (आप० गृ० ७·१३) इत्यृतुलिङ्गात् ।

एतच्च रागप्राप्तसमावेशनाश्रितं विवाहकर्माथं क्रमजपयोर्विधानम् । यथा भोजनपर्यायव्रताश्रितं पय आदिविधानम् । के—

चित् असत्यपि रागे कर्मार्थमस्मिन् क्रमे समावेशनं नियतमेवेति समावेशनान्तरेषु तु अकर्मार्थत्वादेव नायं जपः। बोधायनेन विकल्पोऽभिहितः। "सर्वाण्युपगमनानि मन्त्रवन्ति भवन्तीति बोधयनो यच्चादौ यच्चर्ताविति शालीकिः" इति। अस्मिन्नेव क्रमे यदि दैवाद्दतुगमनमपि कर्तव्यं स्यात्तदा पूर्वं 'ओरोहोरुम्' इत्यादिजपः। ततो "विष्णुर्योनिम्" इत्यादिभिरभिमन्त्रणम् ॥

एतेन—हिरण्यकेशिगृह्यसूत्रमपि—व्याख्यातम्। तद्यथा--

अत्रैवोदपात्रं निधाय प्रदक्षिणमग्निं परिक्रम्य अपरेणाग्निं प्राचीमुदीचीं वा संवेश्य अथास्यै योनिमभिमृशति। (संवेश्य-शाययित्वा)।

अथैनामुपयच्छते (उपयच्छते अवकिरते मिथुनीभवति)।

सं नाम्नः सं हृदयानि सं नाभिः सं त्वचः।
सं त्वा कामस्य योक्त्रेण युञ्जान्यविमोचनाय ॥

अथैनां परिष्वजते।

मानुव्रता भव सहचर्या मया भव।
याते पतिघ्नीं तनूं जारघ्नीं त्वेतां करोमि ॥
शिवा त्वं मह्यमेधिः क्षुरपविर्जीरेभ्यः ॥ इति ॥

अथास्यै मुखेन मुखमीप्सते।

मधुहे मध्विदं मधु जिह्वा मे मधुवादिनी।
मुखे मे सारघं मधु दत्सु संवननं कृतम् ॥
चाक्रवाकं संवननं यन्नदीभ्य उदाहृतम्।
यद्युक्तो देवगन्धर्वस्तेन संवनिनौ स्वके ॥

मातृदत्तः—ईप्सते आप्तुमिच्छति। चोषयतीत्यर्थः। अथ-शब्दः कर्मान्तरप्रतिषेधार्थम्। सतयोर्निर्हि अत्यन्तस्वीकृता भवति।

अक्षतयोन्याः पत्युर्मरणोत्तरकालं पुनस्संस्कृत्य परिणेतव्येति स्मरणात्।

त्रिरात्रं मलवद्वासा ब्राह्मणव्याख्यातानि व्रतानि चरति। चतुर्थ्यां स्नातां प्रयतवस्त्रामलंकृतां ब्राह्मणसंभाषामाचम्योपह्वयते।

सर्वाण्युपगमनानि मन्त्रवन्तीत्यात्रेयः।

यच्चादौ यच्चर्ताविति बादरायणः॥ इति॥

अत्रापि हि "यच्चादौ यच्चर्ताविति बादरायणः" इति समावेशनद्वयं विवेचितमेव। इयान् विशेषः—यत् बोधायनसूत्रेषु इदं शालकिमतम्, अत्र तु बादरायणमतमिति।

एतेन—भारद्वाजगृह्यसूत्रमपि—व्याख्यातम्। तद्यथा—अथैनां तूष्णीं हिंकृत्य वाग्यत उपेत्य अमूहमस्मि सा त्वं द्यौरहं पृथिवी त्वं सामाहमृक् त्वं तावेहि संभवाव सहरेतो दधावहै पुंसे पुत्राय वेत्तवै रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ....। इत्यथास्या अपवृत्तार्थोऽपुंवृत्तार्थाया मुखेन मुखं सन्निधाय प्राणिपत्यैतं प्राणमपानिहीति तं सा प्रत्यपानिति। अथास्याचान्तोदकायै पाणी प्रक्षाल्याभिमृशति। करं दधच्छिवेन त्वा पञ्चशाखेन हस्तेनाऽविद्विषावता सहस्रेण यशस्विनाभिमृशामि सुप्रजास्त्वायेति भसद्देशम्। यदा मलवद्वासाः स्यादथैनां ब्राह्मणप्रतिषिद्धानि व्रतानि संशास्ति। यां मलवद्वाससमिति। चतुर्थ्यां स्नातां प्रयतवस्त्रां ब्राह्मणसंभाषां "सन्ते मनसा मन" इत्येतेनानुवाकेन उपसंविशति। सर्वाण्युपायनानि मन्त्रवन्ति भवन्तीत्याश्मरथ्यो यच्चादौ यच्चर्ताविस्यालेखनः"॥ इति। अत्र समावेशनद्वयं चालेखनमतेन प्रवृत्तम्। अत्रानुसन्धेयं मानवगृह्यसूत्रं यथा—

संवत्सरं ब्रह्मचर्यं चरतो द्वादशरात्रं (त्रिरात्रमेकरात्रं) वा।

अथास्यै गृहान् विसृजेत् । (गृहाधिकारं प्रयच्छेदित्यर्थः)

योक्त्रपाशं विषाय तौ संनिपातयेत् ।

(योक्त्रपाशं वाससोऽन्ते यद्बद्धं तद्विमुच्य तौ दम्पती एकस्मिन् शयने सन्निपातयेदिति प्रत्येकमभिसम्बध्यते । तदुपरि भार्यां पतिंच संनिपातयेत्संगमयेत् स्वं स्वं प्रति) ।

जपमन्त्राः—अपश्यन् त्वा (१) अपश्यन् त्वा (२) प्रजापतिस्तन्वम् (३) अहं गर्भमदधाम् (४)

करदिति सदभिमृशति । भसदिति गुह्यप्रदेशं पत्न्याः । जननीत्युपजननम् । (उपजननं प्रजननम्) बृहदिति जातं प्रतिष्ठितम् (अभिमृशतीत्यनुवर्तते) एतेन धर्मेण ऋतावृतौ संनिपातयेत् ।

तथा वैखानसगृह्यसूत्रमपि—

तदेवं त्रिरात्रं हविष्याशिनौ ब्रह्मचारिणौ धौतवस्त्रौ व्रतचारिणौ स्याताम् । ततोऽपरस्यां रात्रौ चतुर्थ्यामलंकृत्याग्निमुपसन्धाय नव प्रायश्चित्तानि जुहूयात् ।

अग्निं प्रदक्षिणं कृत्वा प्राच्यामुदीच्यां वा तामुपवेश्य "अभिष्ट्वा पञ्चशाखेन" इति योनिमभिमृश्य "सं नाम्न" इत्युपगच्छेत् । "इमामनुव्रता इत्यालिङ्गिनीं "मधुमान् मध्विदम्" इति मैथुनं कुर्वीत । "सुप्रजास्त्वाय" इत्युपगमनम् । सं नाम्न इत्यालिङ्गनम् । इमामनुव्रतेति वधूमुखेक्षणमित्येके ॥ इति ॥

अत्रानुसन्धेयं सव्याख्यं जैमिनिसूत्रं त्विदमेव । यथा—

स्नात्वा मातापितरौ परिचरेत् । तदधीनः स्यात् । ताभ्यामनुज्ञातो जायां विन्देतानग्निकां समानजातीयामसगोत्रां मातुरसपिण्डाम् ।

त्रिरात्रमक्षारलवणाशिनौ ब्रह्मचारिणौ अधःसंवेशनौ असंवर्तमानौ सहशयाताम्। उर्ध्वं त्रिरात्रात्सम्भवः।

श्रीनिवासाध्वरीन्द्रः—त्रिरात्रादूर्ध्वं सन्निहिते पुण्यदिने सम्भवः संयोगः स्यात्। चतुर्थस्याह्नः अपुण्यत्वे यावत्पुण्यदिनं अपरिष्वजन्तौ सह शयातामेव।

निशायां जायापतिकर्मण्यम्। प्रायश्चितीर्जुहुयात्। स्थालीपाकादग्निं प्रजापतिं चेष्ट्वा संपातांश्चमस आनीय स्रोतांस्यङ्क्ष्वेस्येतां ब्रूयात्।

व्याख्याः—भार्याहस्ते दत्त्वा सनाभिनवरन्धाणि समालिम्पेति तां ब्रूयात्।

(सू०) नाभिं प्रथमम्। ततो यान्यूर्ध्वम्, ततो यान्यर्वाञ्चि। ऊर्ध्वमर्धरात्रात्संवेशनं विष्णुर्योनिं कल्पयतु इत्येतेन त्र्यृचेन।

व्याख्याः—संवेशनं मैथुनं त्र्यृचस्यान्ते संयोगः।

(सू०) ऋतावृतावेवमेव। इति।

अत्र यद्यपि यावत्पुण्यदिनं सहशयनमात्रम्, पुण्यदिने तु संयोग इति बोधितम्, एवमपि संयोगोऽयं परिष्वङ्गमात्ररूप एव। अपरिष्वजन्ताविति विशेषात् इति केचित्। अन्ये तु पूर्णाङ्गः संयोग एवेति। तत्र द्वितीयमतेन यदि जैमिनी रजोनन्तरविवाहमात्रपक्षपातीति कल्पनम्, अत एव "जाया विन्देतानग्निकाम्" इत्यनग्निकाया एव विवाह्यत्वमुपवर्णितमिति कल्प्यते, तर्हि तु बहुस्मृतिविरोधो भवति। तथा चादृष्टरजस्कायामेव यथासंभवं चतुर्थदिनमारभ्य रागप्राप्तौ समावेशनविधिपरमित्येवोरीकर्तव्यम्। अत्र सव्याख्यं गोभिलगृह्यं तु विशेषत उपष्टम्भकम्। तद्यथाः—

नग्निका तु श्रेष्ठा । तावुभौ तत्प्रभृति त्रिरात्रमक्षारलवणाशिनौ ब्रह्मचारिणौ भूमौ सहशयाताम्, ऊर्ध्वं त्रिरात्रात्संभव इत्येके ।

चन्द्रकान्ततर्कालङ्कारः—प्रकृतात् त्रिरात्रादूर्ध्वं परतःसम्भवत्यनेनेति सम्भवः संयोगः व्यवायः कर्तव्यः । इत्येके आचार्या मन्यन्ते । अथ सूत्रमिदं शक्यमवक्तुम्; सम्भवस्य रागत एव प्राप्तेः, विवाहात्प्रभृति त्रिरात्रं ब्रह्मचर्यविधानाच्च, तदूर्ध्वं ब्रह्मचर्यनियमाभावस्यावगतेः । उच्यते । उपरिष्टात् स्नातकव्रतेषु सूचयिष्यति "नाजातलोम्न्या सहोपहासमिच्छेत्" इति । तदपवादार्थमिदमुच्यते । कथं नाम यद्यजातलोम्न्येवातीव पुरुषोपभोगाभिलाषिणी भवति, तर्हि त्रिरात्रादूर्ध्वं तद्रक्षार्थं सम्भवितव्यम् । अपि च ऋतुकालादन्यत्र रागमात्राधीनत्वात्सम्भवस्य स्त्रीणां तदभिलाषेऽपि पुंसो रागाभावात् अकरणमपि प्राप्नोति तदनेन निरस्यते । अन्यथा खलु अभिलाषपरवशा कदाचिदकार्यमपि कुर्यात् । तस्माद्विनापि ऋतुकालं स्त्रीणां रक्षार्थं सम्भवितव्यमिति ।

तदयं संग्रहः—चतुर्थदिने विवाहाङ्गं समावेशनं ऋतुसमावेशनात् भिन्नमदृष्टार्थं वर्तत इत्येकं मतम् । अपरमतम्—चतुर्थदिने नैकमपि समावेशनम्, ऋतुसमावेशनमेकमेव वर्तत इति । तृतीयं तु—सत्यमृतुसमावेशनात् भिन्नं चतुर्थदिने समावेशनमपरं भवति, परन्तु तन्न वैधम्, किन्तु रागप्राप्तमिति । तत्र तृतीयमतेऽप्यस्ति मतद्वैधम—यत् रागप्राप्तं समावेशनं दृष्टरजस्काविषयमेवेति । तत्र यस्मिन् मते ऋतावेव समावेशनम्, तत्र समावेशनमन्त्रविधिर्नतु मतोविवाहलिङ्गमिति सर्वसम्मतमिदम् । यत्र तु भिन्नमदृष्टार्थम्, तत्रापि न विवादः । यत्र पुनर्दृष्टार्थमेव, तत्र यत्किञ्चिदङ्गविशिष्टसमावेशनविवक्षायां कन्यायामपि तत्संभवा-

तु नतु मतीविवाहलिङ्गं समावेशनमन्त्रविधानम्। इतरत्र तु ऋतुमत्या एव विवाहो युक्तः इति कल्पनापत्त्या तस्य गौणतावादोऽप्यसंभवदुक्तिकः स्यात्। अत्र पण्डितरत्न म० म० लक्ष्मीपुरश्रीनिवासाचार्याणां विवाहविधिमीमांसागतः समावेशनविचारोऽपि सर्वैः समालोचनीयः। स यथा—

एवमनादिसंप्रदायसिद्धं मन्त्रलिङ्गानुगुणं भूयोगृह्यसूत्रोपबृंहितं विवाहाङ्गभूतं वधूवरयोः सर्वत एवैकत्वप्रयोजकं किंबहुना भार्यात्वभर्तृत्वनिष्पत्त्यर्थतया स्मृतिभिरेवाभिहितं समावेशनाख्यं कर्मविशेषं अत्यन्तं हातुं उपादातुं चानीश्वराः स्मृतिपथपरिष्कारचतुराः लोकं संजिघृक्षन्तः धर्मं च रिरक्षिषन्तः केचिदेतद्विचारमेव पर्यत्यजन्। केचिच्च कालान्तरे व्यवास्थापयन्। केचिच्च यथासम्भवमन्वजानन्। केचित्तु कामचारं दुराचारं शास्त्रे अन्तरभावयन्। केचित्तु शाखाभेदेन उपपत्तिमुपापादयन् वस्तुन्यपि। एवंविधविविधविप्लवनिदानं परंपरिताचारपरिपालनश्रद्धालुत्वमेवेत्यसकृदावेदितं। प्राञ्चो हि निबन्धकृतः मेधातिथिविज्ञानेश्वरप्रमुखाः आपदि गुणवद्वरलाभाावधिकं ऋतुदोषमभ्यधुः। तत्रापि केचित् असति गत्यन्तरे प्रायश्चित्तं समगृह्णन्। अर्वाञ्चस्तु हेमाद्रि—माधव सार्वभौम-कमलाकर शङ्कर-अनन्तदेव-वैद्यनाथदीक्षित-वैकुण्ठदीक्षितादयोऽधर्मभीरवः ऋतोः प्रागेव धर्म्यो विवाह इति निरचिन्वन् न्यबध्नंश्च। अतएव हि समावेशनाख्ये विवाहाङ्गभूते कर्मणि समयाधिकारिवैचित्र्यनिबन्धनाः विचित्राः सम्प्रदायाः समुपलभ्यन्ते निबन्धकारैः निर्णीताः।

तत्रायं संग्रहः (१) समावेशनमन्त्रजपान्तो विवाह इति सौदर्शनः कण्ठरव; (२) शेषहोमान्तो विवाहः। ऋतुदर्शनात्पूर्व-

मेव स्त्रीगमनं समावेशनं ऋतुसमावेशनकालात्पूर्वमेव कर्तव्यमिति वैदिकसार्वभौमादयः (३) प्रथमऋतुकालीनगमनं समावेशनं द्वितीयादिऋतुकालीनगमनं ऋतुसमावेशनमिति वैकुण्ठदीक्षितादयः (४) संवेशनं गृहप्रवेश इति संस्कारमयूखकारो भट्टनीलकण्ठः (५) संस्कारकौस्तुभकारोऽनन्तदेवस्तु ऋतुदर्शनात्पूर्वं नगन्तव्यं गन्तव्यश्चावश्यं ऋतुकाले । बोधायनगोभिलाऽश्वलायनादिगृह्यसूत्रतत्तद्ग्रन्थानुसारिपद्धतिग्रन्थानुसारेण तु वैवाहिकव्रतसमाप्त्यनन्तरं ऋतुकालात्पूर्वमपि विवाहाङ्गं गमनं कर्तव्यमिति भातीत्यवोचत् (६) निर्णयसिन्धुकर्ता कमलाकरभट्टोऽपि प्रथमऋतोः पूर्वं स्त्रीगमनं न कर्तव्यम् । अत्यन्तमाकुलश्चेत् दशवर्षादूर्ध्वं गच्छेत् प्राक् न गच्छेत् इति । (७) धर्मसिन्धुकारः काशीनाथोपाध्यायस्तु चतुर्थीहोमं केचिन्न कुर्वन्ति; प्राक् रजोदर्शनात् पत्नीगमने ब्रह्महत्यादोषोक्तेः । किन्तु प्रायश्चित्तं विधेयमिति भातीत्याह (८) चन्द्रचूडस्तु—समावेशनानुष्ठानं याजुषाणां अननुष्ठानं बह्वृचानामिति शाखा भेदेन व्यवस्थया 'प्राग्रजोदर्शनात्' इतिवचनविरोधं पर्यहार्षीत् । (९) पारस्करादिगृह्यभाष्यादौ तु विवाहैकदेशत्वात् चतुर्थीकर्म अवश्यं कर्तव्यम्, अन्यथा भार्यात्वं न निष्पद्यते । संवत्सरादिपक्षाःशक्त्यपेक्षया व्यवस्थिताः ग्राह्याः । त्रिरात्रपक्षाश्रयेऽपि चतुर्थीकर्मानन्तरमेव इत्यपरोक्षीक्रियते (१०) वीरमित्रोदये विवाहतत्त्वार्णवे च त्रिरात्रादिवत्सरान्तब्रह्मचर्यपक्षाणामष्टवर्षकन्यामारभ्य विंशतिवर्षपर्यन्तासु कन्यासु व्यवस्था ब्रह्मपुराणवचनेन निरूपिता (११) मेधातिथिस्तु—स्मृतिकाराणां गृह्यकाराणां च मतिवैषम्यं कथंचित्समरसयति स्म ॥ इत्यलं भूयसा ॥

(१) एतेषामाकरास्तु—तात्पर्यदर्शने (११६)—वैश्वदेवस्य कर्मोच्यते प्रसङ्गात्पञ्चमहायज्ञानां च। समावेशनजपान्ते विवाहे समाप्ते वैश्वदेवमन्त्राणामुपयोगे यदुक्तं "द्वादशाहमधश्शय्या" इत्यादि तत्स्वामित्वाविशेषात्सपत्नीकः चरित्वेति॥

(२) तालवृन्तनिवासीये—शेषं समावेशने जपेत्—ऋतुमधिगम्य स्नातायां 'विष्णुर्योनिमित्यारभ्य' 'तन्मेवायो समर्धय' इत्यन्तेन वधूमभिमन्त्रयते। यदि चतुर्थीसंवेशनं च युगपत् प्राप्नुतः, तदा आरोहोरुमिति जपित्वा विष्णुर्योनिमिति वधूमभिमन्त्रयते इति॥

वैनिकसार्वभौमीये गृह्यरत्ने (१९) खण्डे—अनन्तरं वरः 'प्रजापते तन्वं मे जुषस्व' इति त्रीन् मन्त्रान् जपित्वा प्राणानायम्य कर्माङ्गमभ्युदयं पुण्याहं च कुर्यात्। नाऽत्र 'आरोहोरु' मित्यादिमन्त्रान् जपेत्, तेषां समावेशने विनियोगात्, शेषान्तो हि विवाहः। अत ऊर्ध्वं स्नातकव्रतानि नियतः कुर्यात्।

तत्रैव कण्ठभूषणे-श्रीधरीये-

रात्रौ विवाहराशौ तु शेषहोमः समाचरेत्।

पश्चाद्भागेऽथ वा रात्रौ ततः संवेशनं शुभम्॥ इति॥

तथा प्रथमखण्डे—अपररात्रे संवेशनं शुभमिति ज्यौतिषं, पूर्वरात्रे संवेशयेदिति बोधायनः, प्रजाकामस्त्वपररात्रे स्वदारमैथुनं कुर्यात् इति अखण्डादर्शः। पुण्याहे पुण्याहं वाचयित्वा प्राणानायम्य संवेशनं करिष्ये इति संकल्प्य आरोहोरुमित्याद्यनुवाकान्तमुक्त्वा देवलक्ष्म पृष्ठतो निवीतं कृत्वा स्त्रियं गच्छेत्। संवेशनं ऋतुकालात्पूर्वमेव स्त्रीगमनम्। स्त्रीवाससैव संनिपातः स्यात्। ऋतुसंवेशने तु अभ्युदयमेके समामनन्ति। पुण्याहे पुण्याहं वाच-

यित्वा आचम्य प्राणानायम्य गर्भाधानं करिष्ये इति संकल्प्य विष्णुर्योनिमित्यादि जपित्वा वाग्यतो रेतः सिञ्चेत्। नग्नं कृत्वोरुमिति श्रुतिः।

भार्यासंभोगसमये पुण्यकालं विनाऽन्यदा।
उपवीतं द्विजः कुर्यात् निवीतं पृष्ठभागतः॥ इति॥

भरद्वाज इति॥

(३) वैकुण्ठदीक्षितीये गृह्यरत्नसुदीधिताववम्—अत्र कण्ठभूषणं 'शेषं समावेशने जपेदिति' सूत्रमिह भाव्यं। वृद्धहारीतः—

मानुष्येष्वंसयोः सक्तं मैथुने पृष्टभागिकं।
तर्पणे कुष्ठयोस्सक्तं निवीतं त्रिविधं स्मृतम्।

संवेशनं प्रथमऋतौ स्त्रीगमनं। गर्भाधानं पुनः द्वितीयादिऋतुगमनं। यथा वृक्षादीनां प्रथमपुष्पेषु फलाभावः, तथा स्त्रीणामपि प्रथमऋतौ गर्भधारणाभावात् मैथुनार्थं संवेशनरूपमेव। द्वितीयादिऋतौ गर्भाधानमन्त्रजपः।

अत्र कपर्दिभाष्यं—स्त्रिया सह मैथुनार्थं शयनं समावेशनम्। ऋतुलिङ्गात्। तस्येदानीं जायापत्योरिच्छतोः क्रमः। पाणिग्रहणसंस्कारैः पत्न्याः संस्कृतत्वात्। यदा सवर्णायां ऋतुकालगामी स्यात् प्रथमऋतौ "आरोहोरु" मित्यादि समावेशनविधिः। ततः ऋतुविधिरिति। संवेशनस्य मैथुनमात्रार्थत्वात् प्रथमर्तुगमने "आरोहोरु" मित्यादिजपः। ऋतुसंवेशनस्य गर्भाधानार्थत्वात् द्वितीयादिऋतुगमने "विष्णुर्योनि" मित्याद्यभिमन्त्रणम्। यदा संवेशनमृतुसंवेशनं च युगपत्स्यात्, तदा प्रथमं आरोहोरुमित्यादिजपः। विष्णुर्योन्यभिमन्त्रणं च ततः कर्तव्यं। अतः प्रथमऋतौ गमनाभावेऽपि न प्रत्यवायः। अत्र ज्योतिः शास्त्रं—

वधूराशिलग्नाभ्यामित्यारभ्य—

चतुर्थे दिवसे शान्तिं कुर्याद्वा पञ्चमेऽहनि ।
वीदोद्भर्ता पुनः पुष्पं न गच्छेत्तु ऋतावपि ॥ इति ॥

अत्र तात्पर्यदर्शनम् "प्रजापते तन्व" इत्याद्याः तिस्रो जपित्वा शेषं समावेशने जपेत् । शेषमनुवाकशेषं—आरोहोरुमित्यादि समावेशनकाले जपेत् । समावेशनं च वध्वा सह मैथुनार्थं शयनं ऋतुसमावेशने इति ऋतुलिङ्गात् । एतच्च रागप्राप्तसमावेशनाश्रितं कर्मार्थं क्रमजपयोर्विधानं । केचित्तु असत्यपि रागे कर्मार्थं अस्मिन् क्रमे समावेशनं नियतमेवेति । समावेशनान्तरेषु तु अकर्मार्थत्वादेव नायं जपः । बोधायनेन तु विकल्पोऽभिहितः—सर्वाणि उपगमनानि मन्त्रवन्तीति बोधायनः । यद्वादौ यच्चर्ताविति शालिकिरिति । अस्मिन्नेव क्रमे देवादृतुगमनमपि कर्तव्यं स्यात् तदा पूर्वं आरोहोरुमित्यादिजपः । ततो विष्णुर्योनिमित्याद्यभिमन्त्रणम् । अन्यो वैनामभिमन्त्रयेत् । इदं च अहं गर्भमदधामित्यादिलिङ्गविरोधेऽपि श्रुतेर्बलीयस्त्वादिति । अथ गर्भाधानप्रयोगः ॥ इति ॥

(४) भट्टनीलकण्ठीये संस्कारमयूखे—यज्ञपार्श्वः—

चतुर्थे दिवसे रात्रौ लिखेन्मानससरोवरं ।
हिरण्यगर्भं तन्मध्ये गन्धपुष्पाक्षतादिभिः ॥
संपूज्याप्सरसश्चैव सोमगन्धर्वपावकान् ।
संपूज्य स्वाश्वहस्त्यादीन् आरोप्य स्वगृहं प्रति ॥
संवेशनादिकं कर्म अन्यथा तु व्रजेद्भयम् ॥

संवेशनं गृहप्रवेशः ॥ इति ॥

(५) अनन्तदेवीये संस्कारकौस्तुभे—आश्वलायनः—

दीक्षितस्तु महायज्ञे पित्रोः प्राग्वत्सराद्द्विजः ।
नेयाद्भार्यां प्रयत्नेन ऋतावप्यर्थितो बुधः ॥
प्राक् रजोदर्शनात् पत्नीं नेयाद्गत्वा पतत्यधः ।
व्यर्थीकारेण शुक्रस्य ब्रह्महत्यामवाप्नुयात् ॥ इति ॥

भारते—ऋतौ गच्छति यो भार्यां अनृतौ नोपगच्छति । यावज्जीवं ब्रह्मचारी मुनिभिः परिकीर्तितः ॥ तथा—ऋतुस्नातान्तु यो भार्यां सन्निधौ नोपगच्छति । घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः ॥ अस्य वचनस्य 'जायमानो वै ब्राह्मणः त्रिभि ऋणवान् जायते ब्रह्मचर्येण ऋषिभ्यः यज्ञेन देवेभ्यः प्रजया पितृभ्यः' इतिश्रुतिमूलत्वेनोपपत्तेः श्रुत्यन्तरकल्पनायाः अन्याय्यत्वात् जातपुत्रं प्रत्येष नियमः । तथाच मनुः—ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः । पितृणामनृणश्चैव स तस्मात्सर्वमर्हति ॥ स एव धर्मजः पुत्रः कामजानितरान्विदुः ॥ इति । केचित्तु—ऋतौ श्राद्धदिनेऽपि गच्छतः न ब्रह्मचर्यहानिरिति 'षोडशर्तु निशाः स्त्रीणां' इत्येतद्व्याख्यानावसरे मिताक्षरायामुक्तम् । अन्येतु-ऋतोः निमित्तत्वात् प्रति निमित्तं नैमित्तिकावृत्तिर्विहिता । स्मरन्तिच—एष्टव्याः बहवः पुत्रा-यद्येकोऽपि गयां व्रजेत् ॥ इति ॥ व्यासः—वृद्धां वन्ध्यां असद्वृत्तां मृतापत्यामपुष्पिणीम् । कन्यासूं बहुपुत्रां च वर्जयन्मुच्यते भयात् ॥ इति । वृद्धा सरजस्कापि गर्भधारणादौ अशक्ता । नतु गतरजस्का अपुष्पिणीमित्यनेन पौनरुक्त्यापत्तेः ॥

अस्यापवादः बोधायानसूत्रानुयायिपद्धतिकर्त्रा विश्वकर्त्रभिधेनोक्तः—त्रिरात्रं व्रतं चरेदित्युपक्रम्य व्रतसमाप्तौ अस्तमित आदित्ये अन्योन्यमलंकृत्य अप आचम्य वाग्यतौ शय्यां गच्छत इति । व्रतमध्येऽपि सहशयनमुक्तं गोभिलेन—एतत्प्रभृति त्रिरात्रमेकरात्रं-

वाऽक्षारलवणाशिनौ ब्रह्मचारिणौ भूमौ सह शयीयातामिति । अत्र सूत्रं शय्यैकथात् दुर्वारमपि मैथुनं प्रयत्नतो वर्ज्यमिति ब्रह्मचारिणाविति वचनम् । एतत्प्रभृति विवाहप्रभृतीत्यर्थः ॥ आश्वलायनोऽपि—अत ऊर्ध्वं अक्षारलवणाशिनौ अलंकुर्वाणौ अधःशायिनौ स्यातां त्रिरात्रं द्वादशरात्रं संवत्सरं वैकर्षिर्जायत इति चरितव्रतः सूर्याविदे वधूवस्त्रं दद्यादिति । व्रतानन्तरं सूर्याविदे वध्वाः उपयमनकाले परिहितं वस्त्रं दद्यादिति । वृत्तिविद्भिः श्रीमत्प्रयोगरत्नकारैरपि—अथ विवाहोत्तरं दंपत्योः गृहप्रवेशदिनादारभ्य उपक्रम्य ततः शुभेऽह्नि स्वस्त्यादि वाचयित्वा स्वलंकृतां वधूमुपगच्छेद्रात्रावित्युक्तम् । धर्मप्रवृत्तौ नारायणः—ऋतुमत्यां तु भार्यायां तत्र संगादिकं चरेत् । अनतुमत्यां भार्यायां न संगमिति केचन ॥ इति । केचनेति निषेधाभावः सूचितः । कारिकायामपि—स्वस्त्यादि वाचयित्वादौ स्त्रियं तामुपगच्छति । मुहूर्ते शोभने तस्याः क्रीडनं स्याद्यथा तथा ॥ इति । व्याख्याता चेयं कारिका व्याख्यातृभिः—व्रतसमाप्त्यनन्तरं मुहूर्ते ब्राह्मणैः स्वस्त्यादि वाचयित्वा नक्तमेव वधूमुपगच्छति स्पर्शादिसंकरीकरोति । यथायं न महारणे तस्याः लालनं चरेत् सुन्दरवचनैः अपेक्षितालंकारवस्त्रादिदानैः प्रीतिमुत्पाद्य लज्जामपनीय परस्पराभिमते विषयोपभोग अनुसरतीति । विवाहप्रकरणे कात्यायनः—त्रिरात्रमक्षारलवणाशितौ स्यातामिति ॥

(६) निर्णयसिन्धौ कमलाकरभट्टीये—तथाच प्रथमतोः पूर्वं स्त्रीगमनं न कार्यम्—प्राग्रजोदर्शनात्पत्नीं नेयाद्गत्वा पतत्यधः । व्यर्थीकारेण शुक्रस्य ब्रह्महत्यामवाप्नुयात् ॥ इति तत्रैव आश्वलायनोक्तेः । एतत्तु दशवर्षात्प्राग्ज्ञेयं । प्रथमऋतौ गमने गौतमेन विशेषो दर्शितः—गौरीमपि च रत्यर्थं गच्छेत्पुरुष आकुलः । अन्यथा

वीर्यपातो हि सहस्रकुलपातकः ॥ अन्यदापि तदिच्छया भवतीति विज्ञानेश्वर इति ॥

(७) धर्मसिन्धौ काशीनाथीये—चतुर्थीहोमः कौस्तुभे दर्शितः । एनमृब्रह्मचारिवनः केचिन्न कुर्वन्ति ; प्राग्रजोदर्शनात्पत्नीगमने ब्रह्महत्यादोषोक्तेः किंचित्प्रायश्चित्तं विधेयमिति भाति ॥ इति ।

(८) चन्द्रचूडीये संस्कारनिर्णये—आश्वलायनः—प्राग्रजोदर्शनात्पत्नीं नेयाद्गत्वापतत्यधः । व्यर्थीकारेण शुक्रस्य ब्रह्महत्यामवाप्नुयात् ॥ इति । एतच्च बह्वृचादिविषयम् । तैत्तिरीयाणां तु रागप्राप्तौ गमनं कार्यमेव 'शेषं समावेशने जपेदिति' गृह्योक्तेः । सौदर्शेऽप्येवम् ॥ इति ॥

(९) पारस्करगृह्यभाष्येषु जयरामप्रमुखाः—संवत्सरादिविकल्पास्तु शक्त्यपेक्षया व्यवस्थिताः ज्ञेयाः । संवत्सरादिपक्षाशक्तौ त्रिरात्रपक्षाश्रयेऽपि चतुर्थीकर्मानन्तरं पञ्चम्यादिरात्रावभिगमनं । चतुर्थीकर्मणः प्राक् तस्याः भार्यात्वमेव नोत्पन्नम् ॥ विवाहैकदेशत्वात् चतुर्थीकर्मणः इति ॥

(१०) वीरमित्रोदये—पारस्करोऽपि—त्रिरात्रमक्षारलवणाशिनौ स्यातामधःशयीताम् । संवत्सरं न मिथुनमुपेयातां द्वादशरात्रं षड्रात्रं त्रिरात्रमन्तत इति । हिरण्यकेश्यपि—त्रिरात्रमक्षारलवणाशिनावधःशायिनावलंकुर्वाणौ ब्रह्मचारिणावासात इति । एषां पक्षाणां व्यवस्थोक्ता ब्रह्मपुराणे—कृते विवाहे वर्षं तु वस्तव्यं ब्रह्मचारिणा । यद्यष्टवर्षा कन्या स्यात् तथा तत् त्रिगुणः पुमान् ॥ त्रिगुणः चतुर्विंशतिवार्षिकः । तथा—अथ तद्द्वादशाहानि त्रिंशद्वर्षेण सर्वदा । यदि द्वादशवर्षा स्यात् कन्या रूपगुणान्विता ॥ द्वात्रिंशद्वर्षपूर्णेन यदि षोडशवार्षिकी । लब्धा तदा तु षड्रात्रं वस्तव्यं सं-

यतेन तु ॥ विंशत्यब्दा यदा कन्या वस्तव्यं तत्र वै त्र्यहं । अत-ऊर्ध्वमहोरात्रं वस्तव्यमतिसंयतैः । अथ चतुर्थीकर्म । तत्र पारस्करः—चतुर्थ्यामपररात्रे अभ्यन्तरतोऽग्निमुपसमाधाय दक्षिणतो ब्राह्मणमुपवेश्य उदपात्रं प्रतिष्ठाप्य स्थालीपाकं श्रपयित्वा आज्य-भागाविष्ट्वा आहुतीर्जुहोति । इति ॥ हिरण्यकेश्यपि—चतुर्थ्या-मपररात्रेऽग्निमुपसमाधाय प्रायश्चित्तपर्यन्तं कृत्वा नव प्रायश्चित्ती-र्जुहोति ॥ इत्यादि ॥

(११) मनुभाष्ये—उक्तो विवाहः । तस्मिन् निवृत्ते समु-पयाते दारत्वे तदहरेवेच्छयोपगमे प्राप्ते तन्निवृत्त्यर्थमिदमारभ्यते । न विवाहसमनन्तरं तदहरेव गच्छेत् । किं तर्हि ऋतुकाले प्रती-क्षेत । गृह्यकारैस्तु—अत ऊर्ध्वमक्षारलवणाशिनौ ब्रह्मचारिणाव-धश्शायिनौ स्यातां त्रिरात्रं द्वादशरात्रं संवत्सरं वेति पठितम् । तत्र सत्यपि संवत्सरस्यान्तरापतिते ऋतौ गमनं नास्ति । एवमेते स्मृती अविरोधिन्यौ भवतः । त्रिरात्रादीनां तु विकल्पः । अत्यन्त-रागपीडितयोर्गमनं धैर्यवतोस्तु ब्रह्मचर्यम् ॥ इति ॥

इत्थं शिक्षाभट्टीयादिप्रयोगग्रन्थेषु सायणीयादिनिबन्धग्रन्थेषु च चतुर्थीकर्मप्रकरणे गर्भाधानप्रकरणे वा कृतो विस्तरः तत एव द्रष्टव्य इति उपरम्यते ।

अत्रेदमवधेयं—अखिलमिदं बहुविधं प्रस्थानं अर्थकामपर-त्वविकासधर्मपरत्वसंकोचमूलकालस्यादिनिबन्धनम् । तत्र प्रथमं कारणं ब्रह्मचर्यासामर्थ्यम् । तत्र कारणं सुरुचिराहारसेवित्वम् । ततो विद्यावैधुर्यम् । ततश्च युक्ताऽयुक्तविवेकाप्रागल्भ्यम् । दुष्टशिक्षणां-कन्यारक्षणासामर्थ्यम् । ततश्च संकुचितायुष्ट्वं सन्तानदर्शनकुतू-

हलित्वं धर्मसत्वरत्वं शुश्रूषुसच्छूद्रालाभः गुणवद्वरप्रियत्वातिरेकः इत्यादिकं लोकसिद्धं च निमित्तजातमित्यतिरोहितं प्रेक्षावताम् ।

इदं पुनरिहावधेयं—एवं स्थिते वस्तुतत्त्वे प्राप्तवयस्कतामात्रावगमकेन वैदिकलिङ्गेन विवाह्यकन्यानां वयोविशेषं ये अभिलषन्ति, किमिति न ते अभिलषन्ति वैदिकलौकिकविज्ञानसमयकरणसामर्थ्य—व्रताचरणादिबहुविधार्थगर्भितमन्त्रमन्त्रार्थविज्ञान—तदनुष्ठानसामर्थ्यलक्षणं श्रुतिस्मृतिविहितम् अधिकारं वरस्य वध्वाश्च इति ।

अत्र हेमाद्रि-माधव-सार्वभौम-कमलाकर-शङ्करानन्तदेव-वैद्यनाथदीक्षित-वैकुण्ठदीक्षितादीनां मते ऋतोः प्रागेव धर्म्यो विवाहः । मेधातिथि—विज्ञानेश्वरादिमते आपदि गुणवद्वरालाभावधिकं ऋतुदोष इति विवेचनेनेदमेव विशदीक्रियते—यत् गुणवद्वरलाभे ऋत्वनन्तरमपि विवाहो योग्य इति केषाञ्चन मतम् । केषाञ्चन तु गुणवद्वरलाभेऽपि ऋतोः प्रागेव विवाहो युक्त इति । अत्रास्माकमिदमेव वक्तव्यम्—यत् बहुषु स्मृतिषु रजस्वलाया वृषलीत्ववर्णनात् व्रात्यानामिव षोडशादिवयसां गतिकल्पनार्थमेव विवाहाभ्यनुज्ञानं प्रायश्चित्तपूर्वकमित्यापत्कल्पतया ऋत्वनन्तरमपि विवाहयोग्यतासमर्थन एव विज्ञानेश्वरादिमतम्, न तु गौणकालतया । मतान्तरे तु वृषलत्वास्तस्याः प्रायश्चित्तपूर्वकं विवाहनेनापि संस्थान्तरमेवेति ।

तथाच यदि वचनानुसारं ऋतुमतीविवाहोऽभ्यनुज्ञातव्यः, यदि वातादिदोषेण दशमादिवयसि अकस्मादेव ऋतुमती कापि सञ्जाता, तर्हि तस्या एव प्रायश्चित्तपूर्वकं शुद्धजातिसम्बन्धकल्पनं योग्यम्, न तु धर्मज्ञैरपि गौणकल्पतया तद्व्यवस्थापनं कर्तव्यमिति । अयमत्र गौणापत्कल्पयोर्विशेषः—यत् गौणकालप-

यन्तं न पातित्यम्, किन्तु पापित्वमात्रम्, तस्य मुख्यकालाति-क्रमनिमित्तप्रायश्चित्तेन निर्हारः। यत्र तु गौणकालातिक्रमानन्तरं वृषलीत्वादिकं बाधितम्, तत्रापत्कल्पता। तथा चापत्क-ल्पतयाऽभ्यनुज्ञानं नामाकामादिकृतपातकनिर्हारार्थं प्रायश्चित्त-व्यवस्थापनमेव। तथाच यद्यज्ञानात् अकस्माद्वा कन्यर्तु-मती, तर्ह्येव तस्या विवाह्यत्वम्, नान्यथा। अन्यथा तु वरस्य वध्वा उभयोरपि पृथक्संस्थैव, प्रायश्चित्तेन व्यवहार्यताया असंभ-वादिति फलति।

एवंच सति कुत्रचन "हरंस्तां न विदुष्यति" इति, कुत्रचिच्च "तत्पतिर्वृषलीपतिः" ॥ इति च स्मरणमप्युपपन्नमेव। कामाकाम-प्रयुक्तत्वेन हि सर्वमुपपन्नमेव। उपरिष्टाच्चैतत् व्यक्ती-भविष्यति।

तथाच विवाहविधिमीमांसागतसमावेशनविचारसमालोचनेऽपीदमेव सिद्ध्यति—यत् समावेशनं ऋतोः प्राक्तनमृतुसमावेश-नाद्भिन्नम्, तच्चादृष्टरजस्ककन्यासाधारणमेवेति न चतुर्थीकर्म-समावेशनान्यथानुपपत्त्या रजोऽनन्तरविवाहसाधुतासिद्धिरिति।
॥ इति समावेशनविचारः ॥

[त्रिरात्रब्रह्मचर्य विचारः] अथेदानीं त्रिरात्रब्रह्मचर्यविधानपर्यालोचनाया-मपि न रजोऽनन्तरविवाहसिद्धिरित्युपपादयि-ष्यामः। सर्वेषु गृह्यसूत्रेषु एकरूपेण वधूवरयोः ब्रह्मचर्यविधानं दरीदृश्यते। ब्रह्मचर्यं च व्यवायाभाव इति सुदर्शनादिभिः प्रति-पादितम्। तत्र यदि कन्याविवाह एव शास्त्रसम्मत इति स्यात्, तदा कन्यायां व्यवायप्रसक्तेरेवाभावात् तन्निषेधो वितथ एव

संपद्येतेति तत्सूत्रसार्थक्याय ऋतुमतीविवाहोऽभ्युपगमनीय इति केचिद्वर्णयन्ति।

वयोनिर्णयकारास्तु—कामुकवयस्य कन्यायामपि रागप्रसक्तिर्विद्यत एवेति निषेधोपपत्तेः तदनुसारेण ऋतुमतीविवाहसाधनं न युक्तिसहम्। यदि हि कन्यायां राग एव न स्यादिति स्यात्, तर्हि

असंस्कृतां पुष्पहीनां कन्यकां यो द्विजाधमः।
रन्तुमिच्छति पापात्मा नरकं याति दारुणम्॥

इति वचनमसंगतार्थकं स्यात्। यदि तु रागसंभवेऽपि प्रवृत्त्यसंभवात् निषेधवैयर्थ्यमित्युच्यते, तदापि प्रवृत्तिपदेन किं प्रवृत्तिसामान्यस्य ग्रहणम्, उताहो सफलप्रवृत्तेरेवेति विवेचनीयम्। नान्त्यः, प्रवृत्तिसामान्यस्यैव नरकप्रयोजकत्वात्। प्रथमे—

अप्रौढां कन्यकां विप्रो यभेत्कामातुरोऽन्वहम्।
तस्यैव नरके वासः कानीनः स्यात्तदुद्भवः॥

इति वचनेन व्यवायप्रवृत्तिनिषेधस्य कृतत्वादत्राप्युपपत्तेः। यदि तु सफलप्रवृत्तिरेव नरकोत्पादिकेत्याग्रहः, तदपि मैथुनस्य स्मरणाद्यष्टाङ्गविशिष्टत्वेन तत्र तत्र प्रतिपादनात्, योगरत्नाकरे "विपरीतं ब्रह्मचर्यं एतदेवाष्टलक्षणम्" इति वचनानुसारेण एकाङ्गानुष्ठानेऽपि ब्रह्मचर्यव्रतभङ्गो भवेदिति कन्यायामपि व्रतभङ्गप्रसक्तेरन्यथोपपत्तिरिति वर्णयन्ति।

तदेतद्विवाहकालविमर्शकारा न क्षमन्ते। यद्यप्यपुष्पवत्यामपि रागः संभवेदेव, उक्तमार्कण्डेयवचनानुसारात्, तथापि प्रवृत्तिसामान्यन्तु न संभवेदेव। न चोक्तदेवलवचनविरोधः; तत्र प्रौढामित्यस्य योगरूढ्या परिणीतायां प्रसिद्धस्य पुष्पवतीपरत्वोपपादनासंभवात्। यदि तु योगरूढौ मानाभावेन प्रौढाशब्दस्य पुष्पवत्य-

मेव लोके प्रयोगदर्शनेन च पुष्पवतीपरत्वमेवाङ्गीकरणीयमित्याग्रहः, तदाऽस्तु नामान्यत्र तादृशार्थग्रहणम्। अत्र तु वाक्ये तादृशार्थग्रहणं न संभवत्येव। "कानीनः स्यात्तदुद्भवः" इति वाक्यविरोधात्। अपुष्पवत्यां पुत्रोत्पत्तिसंभावनाया अप्यसंभवात्। तदनेनैव वचनेन स्पष्टमवगम्यते पुष्पवत्यपि अविवाहिता कन्याशब्दव्यवहार्या इति। एवं च "अप्रौढां कन्यकां विप्रो यभेत्कामातुरोऽन्वहम्" इत्यत्राप्रौढापदेनाविवाहिताया एव ग्रहणमिति। अपुष्पवत्यां व्यवायप्रवृत्तिर्न संभवत्येवेति त्रिरात्रब्रह्मचर्यविधानान्यथानुपपत्त्या ऋतुमतीविवाहोऽपि शास्त्रीय इत्येवाङ्गीकरणीयम्। इति। माधवाचार्या अपि—कन्याशब्दोऽविवाहितापरः, नाष्टवर्षादिबालिकापरः; वृद्धादिष्वपि भारतादौ कन्याशब्दप्रयोगदर्शनात्—इति वदन्तोऽस्माकमनुकूलाः। "कन्यायाः कनीन च" इति सूत्रस्थं भाष्यमपि अस्मदनुकूलम्। तत्र हि भाष्ये—कन्याशब्दः पुंसाऽभिसम्बन्धपूर्वके संप्रयोगे निवर्तते, या तु प्रागभिसम्बन्धात् पुंसा सह युनक्ति, कन्यैव साऽभिमता—इत्युक्तम्। एवं चाविवाहितस्त्रीपरत्वमेव उक्तभाष्यात् प्रतीयते। एवं च ऋतुमत्यामप्यविवाहितायां कन्याशब्दप्रवृत्तिर्विद्यत एव।

ऋतुस्नाता तु या शुद्धा सा कन्येत्यभिधीयते।

इति वचनमपीदानीमनुकूलमिति।

अप्रौढां कन्यकां विप्रो यभेत्कामातुरोऽन्वहम्।

इति वचनं ऋतुमतीविवाहविषयमेवेत्येव वर्णनीयमिति रजस्वलाविवाहः शास्त्रीय एवेति।

परे तु—"अप्रौढां कन्यकां विप्रः" इत्यत्र कन्यकाशब्देनैवाविवाहितार्थलाभे पुनः प्रयुक्तस्य अप्रौढापदस्य तदर्थकल्पनासंभ-

वात् योगरूढिकल्पने च प्रमाणाभावात् अपुष्पवतीयभनदोषत्व वर्णन एवोक्तदेवलवचनतात्पर्यमभ्युपगमनीयम् । न च "कानीनः स्यात्तदुद्भवः" इति वाक्यशेषविरोधो भवतीति शङ्कनीयम् ; यथा प्राग् विवाहादृतुमत्या यभनं निषिद्धम् , तथा विवाहतः परमपि रजोदर्शनतः पूर्वं तद्यभनं शास्त्रनिषिद्धमिति प्रथमायां समुचित-काले समुत्पन्नस्येव द्वितीयस्यां समुचितकाले समुत्पन्नस्यापि कानीनत्वबोधनद्वारा विवाहिताया एव पुष्पवत्या एव यभनं बोध-यतां देवलाचार्याणां बालिकायामपि यभननिषेध एव तात्पर्येण तद्वत् त्रिरात्रब्रह्मचर्यविधानस्यापि उपपत्त्या तदन्यथानुपपत्तिप्रमा-णस्य नावसरः । नन्वेवं सति अक्षतयोनित्वात् कथमपत्यसंयोग इति "कन्यायाः कनीन च" इतिसूत्रभाष्यप्रदीपयोः कथमुपपत्ति-रिति चेत् , एवम् , यदा तु कन्यात्वं तदा पतियोगो न, यदा पति योगः, तदा कन्यात्वं नेति हि पूर्वः पक्षः । तदस्मन्मतेऽपि न विरुद्धम् ; अस्माभिरपि समुचितकाले समुत्पन्नस्यैव कानीनत्व-वर्णनात् ।

अथोच्येत—एवं सति भाष्यकारैरपि प्रागभिसम्बन्धात् प्राग्र-जोदर्शनाच्चेति खलु वक्तव्यं स्यात् । ते तु विवाहपूर्वकालिकं पुं-संयोगमात्रं कन्याशब्दार्थतावच्छेदकतया विवक्षयन्ति । तत्र यदि भाष्यकाराणामपि भवदीयं मतं सम्मतं स्यात्, तदा किमिति रजोदर्शनतः पूर्वं वेति न वर्णयेयुरिति सिद्धान्तभाष्यविरोधः सम्भवत्येवेति ।

तत्रेदं समाधानम्—भाष्यकाराश्चापि ऋतुदर्शनतः पूर्वमेव विवाहमभिप्रयन्ति, न तु शास्त्रविरुद्धं ऋतुमतीविवाहम् । "अभि-सम्बन्धपूर्वके संयोगे निवर्तते" इति भाष्ये हि संयोगपदेन शास्त्री-

यत्तु समावेशनमेव विवक्ष्यते। विवाहं विना च संयोगे विशिष्टाभावात् कन्याशब्दः प्रवर्तते। विवाहपूर्वकनिषिद्धसंयोगे च विशेष्याभावात् कन्याशब्दः प्रवर्तत इति रजोदर्शनतः पूर्वं वेत्यनुक्तमिति तादृशार्थ एव पर्यवसानमिति न कोऽपि दोषः।

अयमाशयः—किं भाष्यकाराणामपि ऋतुमतीविवाह एव तात्पर्यं कल्प्यते, न; ऋतुमतीविवाहेऽपि तात्पर्यस्यैव कल्पनादितिचेत्; तत्रेदं प्रष्टव्यम्—किं बालिकानां विवाहितानां पुंसंयोगेऽपि न दोष इति भाष्यकाराशयः, उत तासामपि तत्संयोगो दोषायैवेति। "जातलोम्न्या सह संविशेत" इति वचनानुसारेण दोषो नैवेति कल्पने च निषिद्धस्यापि सङ्गमस्य निषेधोल्लङ्घनेनाचरणे को वा दोष इति चेत्, तत्पुत्रस्य कानीनत्वापत्तिरिति वक्तव्यम्। तत्र च प्रमाणं "अप्रौढां कन्यकां विप्रो यभेत्कामातुरोऽन्वहम्" इति वचनमेव। तत्र यदि पुष्पवत्या अविवाहितायाः पुंसंयोगेन समुचितकाले समुत्पन्नस्यैव कानीनत्वमत्र प्रतिपाद्यते; तदा प्रौढापदवैयर्थ्यम्। अप्रौढापदेनाविवाहार्थविवक्षायां कन्यकाशब्दवैयर्थ्यमिति भवन्मते दोषः। कन्यकाशब्देनापुष्पवतीग्रहणेऽपि अस्मन्मार्गेणैव समायातम्।

अस्मन्मते तु—विवाहितायामपुष्पवत्यां पुंसंयोगे समुचितकाले समुत्पन्नस्यैव कानीनत्वं प्रतिपाद्यत इति न वैयर्थ्यम्। अभिसम्बन्धे कन्याशब्दो निवर्तते इति वक्तव्ये तत्पूर्वके संयोग इति गुरुतरमागोदरणस्यापि इदानीमेव प्रयोजनमिति न कथञ्चिदपि भाष्यकारा अशास्त्रीयमार्गानुसारिण इति कल्पयितुं शक्यते।

अयमभिप्रायः—अविवाहितायां पुष्पवत्यां पुंसंयोगे प्रायश्चित्ते चाकृते विवाहानन्तरमुत्पन्नः पुत्रः कानीनो वा नवेति विचा-

रणायां कानीन एवेति वर्णनीयमिति यथा, तथा विवाहितायामपि रजोदर्शनतः पूर्वं पुंसंयोगे अकृते च प्रायश्चित्ते समुचितकाले समुत्पन्नः कानीन इत्येवाङ्गीकरणीयम्। एवं चोक्तदेवलवचनसिद्धान्तानुवादके भाष्येऽपि प्रागभिसम्बन्धादित्यस्य प्राग्रजोदर्शनाच्चेत्येतदुपलक्षणत्वेन वाप्युपपत्तिर्वर्णनीयेति न कोऽपि विरोधः।

असंस्कृतां पुष्पहीनां कन्यकां यो द्विजाधमः।
रन्तुमिच्छति पापात्मा नरकं याति दारुणम्॥

इति वचनस्य प्रवृत्तिपर्यन्तपरत्वाङ्गीकार एव समुचितकल्प्यमानार्थकद्वयानुसारेण त्रिरात्रब्रह्मचर्यविधानोपपत्तिवर्णनं युक्तमिति न कथञ्चिदपि ऋतुमतीविवाहशास्त्रीयतावादः सिद्ध्येत्।

यदपि चोक्तम्—कन्याशब्दोऽविवाहितापर इति। तदप्येतेन परास्तम्; उक्तमार्कण्डेयवचने असंस्कृतामितिपदवैयर्थ्यापत्तेः।

किञ्चात्र भवान् पृष्टो व्याचष्टाम्—किं कन्याशब्दप्रवृत्तिनिमित्तमविवाहितत्वमिति भवदाशयः? उताहो प्रवृत्तिनिमित्तान्तरे सत्यपि अविवाहितत्वधर्मपुरस्कारेण कन्याशब्दस्य गौणयादिना वृद्धादीनां साधारण्येऽपि प्रयोगो युज्यत इति? तत्र न तावत् प्रथमः कल्पः सम्भवति; कन्याकुमारीशब्दयोः पर्यायत्वानुसारेण उभयोरपि समानप्रवृत्तिनिमित्तकत्वस्यावश्यं वर्णनीयत्वेन कुमारीशब्दस्येव कन्याशब्दस्यापि कौमारवयःप्रवृत्तिनिमित्तकत्वमेव युक्तमिति अविवाहितत्वमेव प्रवृत्तिनिमित्तमिति वर्णनासम्भवात्। तत्रैवं सति कन्याकुमारीशब्दयोः पर्यायत्वे सत्यपि "अष्टवर्षा भवेत्कन्या" इत्यादिवचनं किमर्थमिति चेत् "कन्यां ददद् ब्रह्मलोकम्" इति विहितफलविशेषसम्बन्धबोधनार्थं परिभाषीकरणमिति ब्रूमः। यथा श्येनादिशब्दानां लोकेऽर्थान्तरप्रत्यायकत्वे

सत्यपि यागविशेषपरत्वे ससंभाषणं फलविशेषसम्बन्धबोधनार्थम्। उपपादितं चैतन्माधवाचार्यैः पराशरस्मृतिव्याख्याने। एवं च माधवाचार्या अप्यस्माकमनुकूलाः। भवन्मते तु फलकथनादौ सोपयुक्तेति वचनस्वारस्यभङ्गो दुष्परिहर एवेति भवन्त एव विदांकुर्वन्तु। एवं च कन्याशब्दस्य अष्टवर्षादिबालिकापरस्यापि अविवाहितत्वसामान्यात् दैवात् दृष्टरजसि साहसेन पित्रादिभिरदत्तायां स्त्रियामपि गौण्या वृत्त्या प्रयोगोपपादन एव माधवाचार्याणां भाष्यकाराणां चाशय इति न कोऽपि विरोधः। पातञ्जलभाष्यं हि न तावत्कन्याशब्दार्थोऽयमेवेति सिद्धान्तयितुं प्रवृत्तम्, किन्तु कन्याशब्देन गौण्या लक्षणया वा अपत्यसम्बन्धयोग्यस्त्रीव्यक्तिरपि ग्रहीतुं शक्यत इति बोधयितुम्। अन्यथा प्रागभिसम्बन्धतः पुंसंयुक्तायामेव कन्यापदार्थत्वापत्त्या पुंसंयोगानन्तरमपि विवाह इत्यपि कल्पनापत्तेः। एवं चेत् दैववशात् या पुष्पवती संवृत्तापि पित्रादिभिर्न दत्ता तस्याः स्वयं वरणतः पूर्वं पुंसंयोगेऽपत्यसम्बन्धो भवेदित्यविवाहितत्वसामान्यात् तस्या अपि कन्याशब्देन गौण्या वृत्त्योपस्थितिर्भवत्येवेति न दोषः। यदि त्वनृतुमत्यामपि तपोविशेषादिमत्पुरुषसंयोगेन कुन्त्यामिवापत्यसम्बन्धो भवेत् तदा गौण्याश्रयणमावश्यकमिति पक्षान्तरानुसरणमन्येत्विति। स्पष्टतरमेव च कुमारीशब्दस्य गौण्या वृत्त्या युवतिपरत्वं व्यवस्थापितं "वयसि प्रथमे" इति सूत्रे। यदि तु कन्याकुमारीशब्दयोः युवतिसाधारणिकापि वृत्तिः स्यात्, तर्हि भाष्यकारैः किमिति गौण्याश्रयणं कृतम्? यत्तूक्तं विवाहकालविमर्शकारैः—कुमारीत्यत्र प्रकृतेरप्राप्तयौवने पुंसि शक्तत्वेन प्रत्ययविशिष्टस्य युवतिपरत्वं गौणमेवेति युक्तम्। कन्याशब्दे तु तथाऽभावान्न गौणतेति अक्र।

तद्विवाहयुवत्ययुवतिसाधारण एव कन्याशब्द इति। तत्रेदं चिन्त्यम्—कुमारीशब्दस्य प्रकृतिभूतस्य कुमारशब्दस्याप्राप्तयौवने पुंसि शक्तिरिति पुंस्त्वादिलिङ्गस्य कस्यापि प्रातिपदिकशक्यतावच्छेदककोटावप्रवेशादप्राप्तयौवनमेव शक्यतावच्छेदकम्, लिङ्गत्वं त्वन्यतो लभ्यमिति न प्रवृत्तिनिमित्तकोटिं प्रविशति। "अनन्यलभ्यः शब्दार्थः" इति न्यायात्। अन्यथा सर्वेषां स्त्रीलिङ्गानामपि स्त्रीत्वादिबोधनविषये गौणत्वापत्तिरित्यन्यत्र विस्तरः। एवं च कन्याशब्दस्यापि अप्राप्तयौवनमेव प्रवृत्तिनिमित्तमिति गौण्यादिनैव युवतिपरत्वमुपपादनीयम्; विशेषाभावात्। "कन्या कुमारी गौरी तु" इति कोषस्य चेदानीमुपपत्तिर्भवति। प्रवृत्तिनिमित्तभेदे पर्यायत्वाभावेन तथा निर्देशस्यासाङ्गत्यापत्तेः। तुशब्दस्तु गौरीनग्निकाशब्दयोर्भिन्नप्रवृत्तिनिमित्तयोः कन्याशब्दवारणार्थमित्येव स्वरसतः प्रतीयते। "वयसि प्रथमे" इति सूत्रे कुमारीशब्दं प्रकृत्य प्रवृत्तं "सम्बन्धादेव वयो गम्यते इति वाच्यवाचकलक्षणसम्बन्धेन वयो गम्यते" इत्यर्थकं भाष्यमुपपन्नं भवति। यद्यपि तत्रैव भाष्ये "कोऽसौ सम्बन्धः? पुंसा सहाभिसंयोगः" इति पुंसंयोगरहित एव कुमारीशब्दार्थः इत्यप्युक्तम्, तथापि तस्य भाष्यस्य पूर्वपक्षभाष्यत्वात् गोनर्दीयस्त्वाहेति सिद्धान्तभाष्यानुसारेणैव उपपत्तिवर्णनं युक्तमिति न दोषः। यथा च पुंस्त्वविशिष्टाप्राप्तयौवनशक्तिकत्वादिकं नोपपादयितुं शक्यते, तथा पूर्वमेव निरूपितम्। सर्वथा चासति बाधके कन्याशब्देनाक्षतयोनेरेव ग्रहणं युक्तम्। अत एव—

अकन्येति तु यः कन्यां ब्रूयात् दोषेण मानवः।
स शतं प्राप्नुयात् दण्डं तस्या दोषमदर्शयन्॥

इतिमनुस्मृतिव्याख्यानावसरे "नेयं कन्याऽक्षतयोनिरिति यो-ब्रूते" इति कुल्लूकभट्टव्याख्यानमपि संगतं भवति। सर्वथा कन्याशब्दार्थो न युवतिरिति सिद्धम्।

नैष कन्या न युवति नाल्पविद्यो न बालिशः॥ इति॥

कन्यायुवत्योः पृथक्शब्देन ग्रहणादित्यन्यत्र विस्तरः॥

यत्तु विवाहविधिमीमांसायाम्—

क्षतयोनिपदं किं पुरुषसंबन्धप्रवृत्तिनिमित्तकं आहोस्वित् कुसुमप्रवृत्तिनिमित्तकमिति जिज्ञासायां व्याप्यधर्मपुरस्कारेणैव अशेषप्रामाणिकव्यवहाराणां उपपत्तावुपलब्धौ च निरर्थकातिप्रसङ्गाप्रसङ्गावहव्यापकधर्मपुरस्कारस्यानौचित्यात्। 'अकन्येति तु यः कन्यां' इत्यत्र मनुटीकास्वेवेत्थं व्यवहारः। कुल्लूकः—अकन्येति नेयं कन्या क्षतयोनिरिति द्वेषेण यो मनुष्यो वदतीति। मेधातिथिः—अकन्या वृत्तमैथुनसम्बन्धा। राघवानन्दः—अकन्या केनापि क्षतयोनित्वात्। नन्दनः—अकन्या क्षतयोनिः 'असपिंडा च या मातुः' इत्यत्र अमैथुनी अक्षतयोनिरिति "विधिवत्प्रतिगृह्यापि" इत्यत्र विप्रदुष्टां क्षतयोनिमिति। तथा 'असंविज्ञातोपसङ्गमनात् पैशाचः' इति गौतमधर्मस्य मस्करिभाष्ये उपसंगमनशब्द उपगमनार्थेषु आलिङ्गनादिषु द्रष्टव्यः; क्षतयोनेः संस्काराभावात्। तथामनुः—

"पाणिग्रहणिका मन्त्राः कन्यास्वेव प्रतिष्ठिताः"।

तथा—

"अक्षतायां क्षतायां वा, अक्षता च क्षताचैव"

इत्यत्र—"क्षता संस्कारात्प्रागेव पुरुषसंबन्धदूषिता"॥ इति॥

तथा व्यवहारे—कन्यादूषणप्रकरणे 'कन्यामङ्गुलिप्रक्षेपयोगेन योनौ क्षतवतीं कुर्वन्" इति च मिताक्षरा। अंगुलीप्रक्षेपादि-

ना योनिक्षतं कुर्वन् दूषयतीत्यर्थः इति सुबोधिनी च। तथा—शिष्टाकोपाधिकरणे राणके च "ईश्वरेण पञ्च ते पतयो भविष्यन्तीत्युक्ते पुरुषसंयोगजयोनिक्षताभावरूपं कौमारं प्रार्थितमिति अभिधानात् प्रत्यहं अक्षतयोनित्वरूपं कौमारं तस्याः सूचितमिति मत्वा जगाद विप्रर्षिः कृष्णद्वैपायनः" इति॥

तथा—"कन्यामृतुमतीं दृष्ट्वा, पितुर्गेहे तु या कन्या रजः पश्यति" इत्यादौ कन्यर्तुमतीशब्दयोः सामानाधिकरण्यं दृश्यते। इत्थं प्रामाणिकविशदतमशिष्टपरिग्रहबहुग्रन्थसद्भावेऽपि अत्रापि पदार्थे ये परिभ्रमन्ति आग्रहन्त्यपि वा किंपुनस्ते अन्यत्र अतिगहने वा शास्त्रार्थे इत्यन्यदेतत्॥

इति विवेचितम्, तेन हीदं गम्यते—यत् ऋतुमत्यपि पुरुषसम्बन्धात् पूर्वं कन्याशब्दार्थो भवितुमर्हतीति विवाहविधौ स्मृतिषु मन्त्रेषु च तत्र तत्र कन्याशब्दप्रयोगो नतु ऋतुमतीविवाहसाधुताविरोधीति। अत्रेदमेवालोचनीयम्—क्षतयोनित्वं हि पुरुषसम्बन्धमात्रं वा, उत तत्सम्बन्धविशेषो वा? आद्ये तु कौमाराद्यवस्थायामपि तत्सम्बन्धं ऋतोः प्राक्कालिकमादायापि क्षतयोनित्वं भविष्यतीति मुख्यार्थाविरोधेनैवोपपत्तिर्युक्ता। द्वितीये तु पुरुषसम्बन्धविशेषे कन्यात्वनिवृत्त्यापत्त्या 'कानीनः स्यात्तदुद्भवः' इति विरुद्धमापद्यते। न हि असंसृष्टपुरुषसम्बन्धविशेषावस्थायां कन्यात्वावस्थायां कानीनसंभवशङ्कापि। ततश्च कुत्रचिद्विवाहितत्वधर्मपुरस्कारेण कन्याशब्दप्रयोगस्य गौण्यैवोपपत्त्या नाविवाहितस्त्रीपरत्वं कन्याशब्दस्य युक्तम्। पूर्वोक्तविधया हि विवाहचतुर्थदिने ऽदृष्टार्थसहशयनमात्रस्य ऋतोः प्रागप्यत्यावश्यकत्वादृतोः प्राक्कालिकपुरुषसम्बन्धे वैधे तत्सजातीयेऽवैधे दशमादिवयसि तर्कालंकारो-

करीत्या रागप्राप्ते वा न विवाहयोग्यत्वमित्येवाशयो विवक्ष्यते। तथाच "दशवर्षा भवेत्कन्या" इतिवचनानुसारेण दशवर्षाया एव कन्याशब्दार्थत्वं युक्तम्। तस्यामपि पूर्वोक्तप्रकारेणतोः प्रागपि क्षतयोनित्वमपि संभवतीति 'अर्यमणं तु देवं कन्या अग्निमयक्षत' इति मन्त्रवर्णस्वारस्यमपि अनृतुमतीविवाह एव वर्तते, नतु मती-विवाह इति सिद्धम्।

अयं भावः—कन्याशब्दस्य हि कुत्रचनाविवाहित्वसामान्येन वृद्धायामपि प्रयोगो वर्तते, कुत्रचिच्चाष्टमादिवयस्कायाम्। तत्र विवाहमन्त्रेषु कन्याशब्दोऽविवाहितापरः उताष्टवर्षाद्यनृतुमतीपर इति संशये तु "दशवर्षा भवेत्कन्या" इति वचनात् दशवर्षापरत्व-मेव युक्तम्। वाक्यशेषस्य यववराहाधिकरणन्यायेन नियामकत्व-स्य युक्तत्वात्। एवं च सति दशवर्षपर्यन्तं विवाहयोग्यताबोधन एव मन्त्रलिङ्गस्वारस्यं वर्तत इति 'अर्यमणं तु देवं कन्या अग्निम-यक्षत" इति मन्त्रलिङ्गमृतुमतीविवाहसाधुताविरोधीति सिद्धम्॥

एवं च "अप्रौढां कन्यकां विप्रः" इति वचनानुसारेणापुष्पव-त्यामपि व्यवायप्रवृत्तिर्भवेदेवेति सिद्धत्वात् "त्रिरात्रं ब्रह्मचर्यम्" इति सूत्रयतां सर्वेषामेवाचार्याणां रजोऽनन्तरविवाहतात्पर्यकल्पन-मिति वृथैव विवाहकालविमर्शकाराणामिह क्लेशः। अस्तु वा भवदीयव्याख्यानमेव समुचितमिति। तावतापि कन्यायामपि रागतो व्यवायप्रवृत्तिरुपपादयितुं शक्यत एव। यतो "नाजात-लोम्न्या सह संविशेत्" "जातव्यञ्जनया तु स तया सह संविशेत्" इत्यादिवचनपर्यालोचनया तादृशार्थः सिद्ध्यतीति न कोऽपि दोषः। स च व्यवायः सफलो वा भवत्वफलो वा, व्यवायत्वेनैव खलु व्यवायस्य निषेधः, न तु सफलव्यवायत्वेन। एतेन गृह्यसू-

त्रान्तराण्यपि व्याख्यातानि भवन्ति । लोकशास्त्रोभयत्रापि प्रमाणमेव । केषाञ्चन जनानां कन्यायामपि रागतः प्रवृत्तिर्दृश्यते । केषाञ्चन विरक्तानां ऋतुमत्यामपि न व्यवायार्थं प्रवृत्तिर्दृश्यते, न तु सर्वेषामेवेति कथञ्चिदपेक्षितयुवतिविवाहसिद्धिः । ये तु पुनःपंडितास्तत्त्वज्ञानसम्पन्नाश्च, तेषामपि शास्त्रार्थान्यथानयने बहुविधाधर्माचरणे च प्रवृत्तिदर्शनेन युक्तायुक्तविवेकसम्पन्नानां श्रुताध्ययनसम्पन्नानामपि रहसि व्यवायप्रवृत्तेः सम्भाव्यमानतया निषेध आवश्यक एव । श्रुताध्ययनसम्पन्नानामेव च धर्माचरणादावधिकारात् तद्धर्माचरणेनैव लिङ्गेन श्रुताध्ययनसम्पत्तिनिश्चय इति धर्माचरणे श्रुताध्ययनसम्पन्नत्वमपि न स्यादेवेत्युच्यते, तर्हि इदानीन्तनशास्त्रविचारादिकं सर्वमपि निष्प्रयोजनम् । नहि कोऽपि श्रुताध्ययनसम्पन्नो धर्माचरणमात्रबहुपक्षपातश्च पण्डितेषु पामरेषु वा विद्यते । यथा च विवाहाङ्गसमावेशनानां न दृष्टद्वारा पुत्रार्थत्वम्, तथा पूर्वमेव निरूपितम् । "पुत्रार्थो हि विवाहः" इत्यादिमिताक्षरावचनात् पुत्रो विवाहफलमिति नाभिप्रायः, किन्तु पुत्रसम्पादनस्य व्यवायसाध्यतया व्यवायस्य च स्वदारेष्वेव शास्त्रबोधितत्वात् तदर्थदारत्वसम्पादनार्थं विवाह इत्यत्रैव तात्पर्यात् । उपपादितं चैतत् बहुविवाहवाद इति तत एव द्रष्टव्यम् ।

एतेन—ब्रह्मचर्यविधानान्यथानुपपत्त्या युवतिविवाहसाधनं युक्तमेवेति विवाहकालविमर्शकारवचनमपि परास्तम् । अत्र च विषये बोधायनादिवचनानि विवाहकालविमर्शत एव द्रष्टव्यानीति ग्रन्थविस्तरभयान्नोपक्षिप्तानि ।

नन्वेवमपि "त्रिरात्रमुभयोरधःशय्या" इत्यत्रोभशब्दग्रहणं वितथं भवति; यावता कन्याविषयो निषेधो निरर्थकः, तस्य व्यवा-

यप्रवृत्तेः कथंचिदुपपादनासंभवात्। तद्ग्रहणसार्थक्याय वधूविषयेऽपि प्रवृत्तिसम्भावनाङ्गीकरणीयेति तस्या युवतिभाव एव तदुपपत्त्या युवतिविवाहः शास्त्रीय इति सिद्ध्यत्येवेति चेत्, अत्र वयोनिर्णयकाराः—आपत्कल्पतया द्वादशादिवयस्काविवाहस्यापि शास्त्रीयत्वाभ्युपगमात् तत्रोभयोरपि ब्रह्मचर्यविधिरावश्यक एव। संकोचे प्रमाणाभाव इति चेत्, उभयोरित्यंशस्य क्षारलवणवर्ज्जमित्यनेन साकमन्वय इति वरमात्रस्य ब्रह्मचर्यविधानमिति वर्णयितुं शक्यत इति न कोऽपि विरोध इति वर्णयन्ति।

विवाहकालविमर्शकारास्तु—उभयोरित्यस्य क्षारलवणवर्जमित्यनेनैव साकमन्वय इति कल्पने प्रमाणाभावः। प्रमाणसत्त्वेऽपि रजोऽनन्तरविवाहपक्षेऽप्युपपत्तिर्भविष्यति; समावेशनान्यथानुपपत्त्या तस्य साधितत्वात्। वस्तुतस्तु उभयोरित्यस्य ब्रह्मचर्यपदार्थेन साकमन्वयोऽङ्गीकरणीय एव। वरमात्रस्य ब्रह्मचर्यविधाने विवाहमध्य एवर्तुकालसम्पत्तौ नियमेन समावेशनं कर्तव्यं स्यात्। एवमपि ब्रह्मचर्यव्रतभङ्गो न सम्भविष्यति। यथा श्राद्धदिने ब्रह्मचर्यविधानेऽपि ऋतुकालत्वे समावेशनं कर्तव्यमेव। उपपादितं चैतत् "षोडशर्तु निशाः स्त्रीणां तासु युग्मासु संविशेत्" इति श्लोकव्याख्यानावसरे मिताक्षरायाम्। उभयोश्चापि तद्विधाने ऋतुकालत्वेऽपि नाभिगमनं कर्तव्यमिति उभशब्दग्रहणसार्थक्यसम्भवः। एवं च रजोऽनन्तरविवाहशास्त्रीयतायामेवोक्तसूत्रतात्पर्यमङ्गीकरणीयम्।

यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन्।
स्वदारनिरतश्चैव स्त्रियो रक्ष्या यतः स्मृताः॥

इत्यादिवचनानुसारेण योषाभ्यर्थनायां ऋतुकालभिन्नकाले-

ऽपि समावेशनस्य वैधत्वावगमात् तदनुसारेणानुष्ठितसमावेशनेनापि व्रतभङ्गो न स्यादित्युभयोरपि ब्रह्मचर्यविधानमावश्यकमिति उभयग्रहणसार्थक्यं ऋतुमतीविवाह एव सिद्ध्यतीति रजोऽनन्तरविवाहः शास्त्रीय इत्येवाभ्युपगन्तव्यमिति—वर्णयन्ति।

परे तु—चतुर्थीकर्मतः पूर्वं भार्यात्वमेव न सिद्ध्यतीति पारस्करहरिहरभाष्ये प्रतिपादितत्वेनतु कालत्वेऽपि त्रिरात्रं वैधोपगमनस्य प्रसक्त्यभावात् समावेशनानुष्ठानेऽपि व्रतभङ्गाभाववर्णनासम्भवात् वरमात्रस्य ब्रह्मचर्यविधानेऽपि स्वेष्टसिद्ध्योभयग्रहणवैयर्थ्यं तदवस्थमेवेति विवाहकालविमर्शकारैरपि क्षारलवणवर्जनपदार्थेन साकमेवान्वयोऽङ्गीकरणीय इति न कथञ्चिदपि तदन्यथानुपपत्तिप्रमाणस्यावकाशः। यद्यपि "पतित्वं सप्तमे पदे" इति सप्तपदीगमनमात्रेण भार्यात्वादिसिद्धिः, तथापि यथा—

चित्रकर्म यथा रङ्गैः सर्वैः सम्यक् प्रपूर्यते।
ब्राह्मण्यमपि तद्वत्स्यात्संस्कारैर्विधिपूर्वकैः॥

इतिवचनेन ज्योतिष्टोमाद्यनुष्ठानेनैव पूर्णब्राह्मण्यसिद्धिरिति स्थितेऽपि ततः पूर्वमपि किञ्चिन्न्यूनं ब्राह्मणत्वं विद्यते, तत एव च तस्य मन्त्राधिकारः, एवमग्निसन्धानार्थमपेक्षितभार्यात्वं सप्तपदीगमनमात्रेण सिद्धमपि वैधोपगमनोपयुक्तं भार्यात्वं साङ्गविवाहेनैव जन्यत इति न विरोधः।

अयं भावः—सर्वदेशकालावच्छेदेन दारेतरसमावेशनिषेधशास्त्रेणैव विवाहसम्बन्धित्रिरात्रावच्छेदेनापि वधूसंगमनिषेधसिद्धिसंभवात् कथं ब्रह्मचर्यविधानमिति चेत्, ऋतुमतीविवाहवादिभिरेवं परिहर्तव्यम्—यथा "नानृतं वदेत्" इति सामान्यनिषेधे सत्यपि श्रूयमाणस्य "तस्मादाहिताग्निर्नानृतं वदेत्" इतिवचन-

स्यानृतवदनाभावदर्शपूर्णमासयोरङ्गाङ्गिभावबाधकत्वेनोक्तसत्र-सार्थक्यमिति। तत्रैवं सति कन्याविवाहवादिभिरपि "न जात-लोम्न्या सह संविशेत्' इतिवचनसिद्धस्यापि तदुपगमनाभावस्य विवाहाङ्गत्वसिद्ध्यर्थं त्रिरात्रब्रह्मचर्यविधानमिति संभवात् नान्य-थानुपपत्तिप्रमाणस्यावकाशः। यथा च समावेशनान्यथानुपपत्त्या न प्रौढाविवाहसिद्धिः, तथा पूर्वमेव विवेचितम्। एवं तस्यासिद्ध्या तद्विषयकत्वेनापि क्षारलवणवर्जनयोजनमप्यसंगतमेव। यथा च समावेशनोपयुक्तभार्यात्वं सप्तपदीगमनमात्रेण नोत्पद्यते, तथा पूर्वमेव निरूपितम्। समावेशनं नाम वध्वा सह मैथुनार्थं शयन-मिति वधूपदं प्रयुञ्जानः सुदर्शनाचार्योऽप्यत्राकूलः। यथा पार-स्करहरिहराचार्याः। अत्र च विषये बहूपपादनीयं समस्ति। तच्च सत्यवसरेऽवसरान्तरे सम्यगुपपादयिष्यामः। एवं च त्रिरात्र-ब्रह्मचर्यविधानानुसारेणापि न गृह्यकाराणां ऋतुमतीविवाहे तात्प-र्यकल्पनं संभवति।

[अक्षतयोनिशब्दा-र्थविचारः]

अत्रेदं प्रसङ्गात् विचार्यते—को नामाक्षतयोनि-पदार्थ इति। किं अनृतुमती, उत ऋतुमत्यपि याऽस्पृष्टमैथुनेति? यद्यनृतुमतीपरत्वम्, तदा "पाणिग्रहणिका-मन्त्रा नियतं दारलक्षणम्" इति वचनेनानृतुमतीविवाहसिद्धिः, तस्यामेव पुरुषसंयोगे समुचितकाले समुत्पन्नस्य कानीनत्वं च सिध्येत्। यद्यसंस्पृष्टमैथुनी, तदा ऋतुमत्यामपि विवाहतः पूर्वं संयोगेन समुत्पन्नस्य कानीनत्वेन व्यवहार इति ऋतुमतीविवा-होऽपि शास्त्रीय इति सिध्येदिति।

तत्र वयोनिर्णयकाराः—अक्षतयोनिपदेन अनृतुमत्या एव संग्रहः; "असपिण्डा च या मातुरसगोत्रा च या पितुः। सा

प्रशस्ता द्विजातीनां दारकर्मण्यमैथुनी" इति वचनेन क्षतयोन्याः विवाहायोग्यत्ववर्णनात्। अत एव हि "सर्ववर्णेषु तुल्यासु पत्नीष्वक्षतयोनिषु। आनुलोम्येन संभूता जात्या ज्ञेयास्त एव ते" इति वचनेन अक्षतयोनित्वावस्थायां विवाहितपत्नीषु समुत्पन्नस्य ब्राह्मण्यमुक्तम्। तत्र क्षतयोनिपदेन अन्यपूर्वकत्वादिविवक्षणे पत्नीत्वमेव न स्यात्। ऋतुमतीत्वविवक्षणे तु ऋतुमतीनामप्यापत्कालिकविवाहाभ्युपगमेन पत्नीत्वसिद्धिर्भवतीत्यक्षतयोनिशब्देन अनृतुमतीग्रहणमेव युक्तमिति प्रतीयते। इति वर्णयन्ति।

विवाहकालविमर्शकारास्तु—क्षतयोनिपदेन ऋतुमतीग्रहणपक्षे तस्यां पत्न्यामुत्पन्नस्य अब्राह्मण्यवर्णनं न संभवति। न ह्यापत्कल्पतया रजोऽनन्तरविवाहमपि शास्त्रीयं मन्वानानां भवतां तद्विवाहसंस्कृतायां समुत्पन्नोऽब्राह्मण इति सम्मतम्। प्रायश्चित्तादिना वृषलीत्वादीनां निवृत्तत्वात्। अमैथुनीशब्दस्य अस्पृष्टमैथुनप्रवृत्तिनिमित्तकस्य अनृतुमतीपरत्वलक्षणायां प्रमाणाभावाच्च। एवं च सांप्रदायिकाशयपर्यालोचनायां अक्षतयोनिशब्देनासंस्पृष्टमैथुनाया एव ग्रहणं युक्तम्। "सर्ववर्णेषु" इति श्लोकव्याख्यानावसरे मेधातिथिप्रभृतिभिस्तथैव व्याख्यानात्।

तथाहि—मेधातिथिः—अक्षतयोनिग्रहणं पुनर्विवाहेन पत्नीत्वमाशङ्कमानं निवर्तयति। सर्वज्ञनारायणः—अक्षतयोनिषु परिणेतुरन्येनासंस्पृष्टासु। एतेन पौनर्भवस्याप्यब्राह्मण्यमुक्तम्। राघवानन्दः—अक्षतयोनिष्विति विशेषणात् कानीनादेर्द्विजत्वं गौणमिति। नन्दनः—अक्षतयोनिषु अनन्यपूर्विकासु। रामचन्द्रः—संभोगादक्षता योनयो यासां तास्विति। कुल्लूकभट्टोऽपि—पाणिग्रहणिका मन्त्राः—इति श्लोकव्याख्यानावसरेऽमुमेवार्थं प्रतिपाद-

यति । एवं बोधायनधर्मशास्त्रेऽपि गोविन्दस्वामिना—सा चेदक्षत-तयोनिः स्याद्गतप्रत्यागता सती—इति वचनव्याख्यानावसरेऽक्षत-योनिः स्यादस्पृष्टमैथुना स्यात् इति व्याख्यातम् । मिताक्षरायामपि—"अक्षता च क्षता चैव पुनर्भूः संस्कृता पुनः । स्वैरिणी या पतिं हित्वा सवर्णं कामतो व्रजेत्" इति वचनव्याख्यानावसरे "अन्यपूर्वा द्विविधा, पुनर्भूः स्वैरिणी चेति, पुनर्भूरपि द्विविधा क्षता चाक्षता चेति, तत्र क्षता संस्कारात्प्रागेव पुरुषसंस्कारदूषिता, अक्षता पुनः संस्कारदूषिता" इति व्याख्यातम् । अपरार्कव्याख्यायामपि अयमेवार्थः स्फुटीकृतः । एवं च अस्पृष्टमैथुनैवाक्षतयोनि-शब्देनात्र ग्रहणमर्हतीति वर्णयन्ति ।

परे तु योनिक्षयप्रवृत्तिनिमित्तकस्य क्षतयोनिशब्दस्य ऋतुमतीपरत्वमेव युक्तम् । "या चर्तुमती स्पृष्टमैथुनैव च सा भवेत्" "ऋतौ भार्यामुपेयात्" इति नियमेन ऋतुमत्यां नियतमेव स्पृष्ट-मैथुनभावोऽपि संपद्यतेति सर्वत्रापि स्मृतिषु अस्पृष्टमैथुनशब्देन अक्षतयोनिशब्दो विव्रियते, नतु स्पृष्टमैथुनाभावप्रवृत्तिनिमित्ताभिप्रायेण ।

"अधस्ताद्योनिरन्ध्रस्य तनुश्चन्द्रार्धसन्निभः ।
कौमारे प्रायशः स्थायी चन्द्रो नारीषु दृश्यते ॥"

इति वचनावगतत्वग्विशेषस्य योनिशब्देन ग्रहणासंभवात् क्षतयोनिशब्देन क्षीणत्वग्विशेषवत्त्वस्यापि परिस्फूर्त्यसंभवात् । न च ऋतुमतीविवाहपक्षे नियतमेव प्रथमार्तवादिषु समावेशनमनावश्यकमिति रजोवतीनामपि कासांचित् अस्पृष्टमैथुनानामवस्थान-संभवात् तासामक्षतयोनिशब्देन ग्रहणार्थमेव निबन्धकारैः अस्पृष्ट-मैथुनापदेनाक्षतयोनिशब्दार्थो विव्रियत इति वाच्यम्; तादृशव्या-

ख्यानस्य शास्त्रविरुद्धर्तुमतीविवाहाभिप्रायं विनाऽस्मदुक्तप्रकारेणैव सामञ्जस्योपपत्तौ शास्त्रविरुद्धर्तुमतीविवाहकल्पनाद्वारा समाञ्जस्यकल्पनायोगात्। वैद्यनाथदीक्षिता अपि अमैथुनाशब्दस्य अस्पृष्टमैथुनार्थकतया प्रतीयमानस्य अक्षतयोनिपदेन विवृण्वाना ऋतुमतीविवाहमशास्त्रीयमभिप्रयन्ति। कन्याशब्दसमभिव्याहारस्थले अक्षतयोनिशब्देन तं विवृण्वाना अपि निबन्धकारा अत्रानुकूलाः। कन्याशब्दश्च अप्राप्तयौवनप्रवृत्तिनिमित्तक इति पूर्वमेव निरूपितम्। एवं च "पाणिग्रहणिका मन्त्रा" इत्यत्र वा "अप्रौढां कन्यकां विप्रः" इत्यत्र वा कन्यकादिशब्देन अक्षतयोनिविवक्षायामपि न रजस्वलाविवाहसिद्धिरिति। कन्यायामपि रागतो व्यवायप्रवृत्तेरप्रौढामिति वचनानुसारेण अभ्युपगन्तव्यतया तन्निषेधेन त्रिरात्रब्रह्मचर्यविधानोपपत्तिसम्भवात् तदन्यथानुपपत्त्या ऋतुमतीविवाहसाधनं विवाहकालविमर्शकाराणां न सङ्गतमिति वर्णयन्ति।

युक्तं चैतत्, अत एव हि गृह्यसङ्ग्रहकारोऽपि "तां प्रयच्छेत्तु नग्निकाम्" इति नग्निकादानमेव विदधाति। गौतमाचार्यश्च प्रदानं प्रागृतोरिति। नग्निकाशब्दार्थश्च "नग्निका नागतार्तवा" इति कोशानुसारेण अनृतुमत्येव।

अत्र केचित्प्रत्यवतिष्ठन्ते—यदि नग्निकाशब्देन अनागतार्तवाया एव ग्रहणम्, तर्हि अनग्निकाशब्देन ऋतुमत्या एव ग्रहणं युक्तमिति "विन्देतानग्निकां कन्याम्" इति जैमिनिगृह्यसूत्रस्य ऋतुमतीविवाहप्रमाणत्वं स्यादिति।

अत्र समादधते वयोनिर्णयकाराः—नग्नशब्दात् सोढ़शे कनि

निष्पनस्य अनुपजातलज्जा गुह्याङ्गावरणमप्यजानन्त्यो यास्तत्परत्वमेव युक्तम्।

यावन्न लज्जते कन्या यावत्क्रीडति पांसुभिः।
योन्यादीन्नावगूहेत तावद्भवति नग्निका॥
यावच्चेलं न गृह्णाति यावत् क्रीडति पांसुभिः।
यावद्दोषं न जानाति तावद्भवति नग्निका॥

इति पदार्थतत्त्वविदां महर्षीणां वचनानि चामुमेवार्थमुपपादयन्ति। तादृशनग्निकाशब्दस्य नञा साकं समासे पूर्वोक्तलक्षणविपरीतोपजातलज्जा स्वतो वस्त्रधारिणी च या, तदभिधान एव सामर्थ्यम्। नग्निकापदार्थे रजोदर्शनस्यानन्तर्भावोन्न रजस्वलाबोधनेऽपि। यद्यप्यमरसिंहेन "नग्निका नागतार्तवा" इत्यप्राप्तरजस एव नग्निकापदार्थत्वमभिप्रेयते, तथापि पूर्वापरविरुद्धत्वात् ऋषिवचनविरुद्धत्वाच्चाप्रमाणमेव तत्पश्यामः। यथा 'पुण्डरीकं सिताम्भोजम्' इति कोशवचनस्य पुण्डरीकशब्देन रक्ताम्बुजस्यैव ग्रहणमिति शबरस्वामिविरोधे अप्रामाण्यम्, यथा वा "तितउः पुमान्" इतिकोषवचनस्य 'तितउः परिपवनं भवति' इति भाष्यविरोधे। एवमत्रापि। श्रुत्यर्थसन्देहे श्रुत्यन्तरेणेव स्मृत्यर्थसन्देहे स्मृत्यन्तरेणैवार्थवर्णनस्य युक्तत्वात्। न चैतावता द्विवर्षादिबालिकाविवाहोऽपि शास्त्रीयः स्यात्, नग्निकां प्रयच्छेदिति बहुषु स्मृतिषु नग्निकाविवाहविधानादिति शंकनीयम्; इष्टापत्तेः। अत एव हि 'द्विवर्षात् प्राग् विवाहश्चेत् कन्यका मरणं यदि। खननं नैव कर्तव्यं मन्त्रसंस्कारमाचरेत्॥ उत्कृष्टायाभिरूपाय वराय सदृशाय च। अप्राप्तामपि तां तस्मै कन्यां दद्याद्यथाविधि' इतिवचनमप्युपपद्यते। एवं चानग्निकाशब्देन संजातलज्जादिस्वरूपैव

विवक्षणीयेति सिद्धम् । जैमिनिगृह्यव्याख्याता श्रीनिवासाध्वरिरपि 'यस्मिन् स्वयमेव लज्जया वासः परिदधाति ताम्" इति अनग्निकापदमत्र व्याचक्षाणोऽत्रानुकूलयति । एवं च जैमिनिगृह्यपर्यालोचनयापि नर्तुमती विवाहसिद्धिर्भवति । विवाहकालविमर्शकारास्त्वेतन्न क्षमन्ते । यत्र लौकिकप्रसिद्ध्योः परस्परं विरोधः, तत्र वैदिकप्रसिद्ध्यनुसारेणैवार्थनिर्णयः । यत्र तु वैदिकप्रसिद्धिरेव नास्ति, तत्र लौकिकप्रसिद्ध्यनुसारेणैवार्थनिर्णयः । यत्र पुनः वैदिकप्रसिद्धिद्वयम् परस्परविरुद्धम्, तत्र लौकिकप्रसिद्ध्यैवार्थनिर्णय इति पूर्वमीमांसकाशयानुसारेणात्रामरकोषवचनस्यादरणीयत्वेन अनग्निकापदेन ऋतुमतीग्रहणमेव युक्तम् । "अनग्निका तु ऋतुमती" इति गृह्यसंग्रहकारवचनमप्यत एव संगतं भवति । नग्निकापदार्थनिषेधे हि भिन्नभिन्नाभिप्रायो मुनिवर्याणां दृश्यते । तथाहि—केचित् खलु नववर्षां नग्निकामभिप्रयन्ति । यथा वैद्यनाथदीक्षितीये माधवीये मनुः—

अष्टमे तु भवेद्गौरी नवमे नग्निका भवेत् ॥ इति ॥

बोधायनवसिष्ठौ तु अप्राप्तरजोदर्शनकालामेव नग्निकापदेन व्यपदिशतः । यथा—

प्रयच्छेन्नग्निकां कन्यामृतुकालभयात् पिता ॥
दद्यात् गुणवते कन्यां नग्निकां ब्रह्मचारिणे ।
अपिवा गुणहीनाय नोपरुन्ध्याद्रजस्वलाम् ॥
'अव्यञ्जना भवेत् कन्या कुचहीना तु नग्निका' ॥

इत्यन्यो महर्षिः कुचहीनामेव नग्निकामभिप्रैति । 'यावन्न लज्जते कन्या' इति वदन्तस्तु भवदभिमतां ज्ञातलज्जादिरूपां नग्निकापदार्थतयाभिप्रयन्ति । तत्र च परस्परविरुद्धवैदिकप्रसिद्धौ

बोधायनादिवैदिकप्रसिध्यनुगुणं कोषवचनमेव प्रमाणम्। द्विवर्षादिबालिकानामपि नग्निकापदार्थत्वे 'नग्निकां ब्रह्मचारिणे' इत्यादिस्थले सर्वत्रापि तासामपि ग्रहणापत्त्या तादृशविवाहोऽपि मुख्य इत्येव संपद्यते। इष्टापत्तौ च नग्निकाविवाहं विदधानैः यमादिभिर्विशिष्य बालिशादिविवाहाभ्युज्ञानं व्यर्थमेव सम्पद्येत। तथा च यमः—

बालिशा या भवेत्कन्या गुणाढ्यो यदि लभ्यते।
दद्यादप्राप्तकालेऽपि देशकालभयान्नरः॥

मरीचिश्च—

जन्मतो गर्भाधानात् पञ्चमाब्दात्परं शुभम्॥
कुमारीवरणं दानं मेखलाबन्धनं तथा॥

भारते चानुशासनिके पर्वणि—

जातमात्रा तु दातव्या कन्यका सदृशे वरे।
काले दत्तासु कन्यासु पिता धर्मेण युज्यते॥

इति। एवं चानग्निकाविवाहं विदधतां जैमिन्याचार्याणां ऋतुमतीविवाह एव तात्पर्यमभ्युपगमनीयमिति केषाञ्चिदेव पक्षः समीचीन इति।

परे तु—सत्यं नग्निकाशब्देन अप्राप्तरजोदर्शनाया एव ग्रहणं युक्तम्। अमरकोषवचनस्याप्येतादृशस्थले श्रौतार्थनिर्णये उपयोगो विद्यते। तथापि जैमिन्याचार्याभिमतो नग्निकापदार्थो नर्तुमती। "यावच्चेलं न गृह्णाति" इत्यादिवचनस्यापि प्रमाणत्वेन क्वचित्स्थले तदधीनार्थनिर्णयस्यापि युक्तत्वादत्र निर्णयस्याङ्गीकारेण नग्निकापदेन अनृतुमत्या एव ग्रहणेन न दोषः। अन्यथा हि बहुवचनविरोधः सम्पद्येत। अत एव गोभिलगृह्येऽनग्निका तु

श्रेष्ठेति अनग्निकाविवाह एव प्रशंसितः। समशाखिनां चैकार्थतात्पर्यकत्वमेव युक्तमिति जैमिन्याचार्याणामपि ऋतुमतीविवाहतात्पर्यकल्पनस्यैव युक्तत्वात्। न च "अनग्निका तु ऋतुमती" इति वाक्यशेषविरोधो "विन्देतानग्निकाम्" इत्यत्रानग्निकापदेन ऋतुमतीग्रहण इति शङ्कनीयम्। वाक्यशेषस्यापि "तां प्रयच्छेत्तु नग्निकाम्" इति नग्निकापद एव तात्पर्यात्।

तथाहि—"विन्देतानग्निकां कन्याम्" इतिवचनं नानग्निकाविवाहप्रतिपादनपरम्; विद्धातोर्लाभार्थकस्यापि ज्ञानार्थकत्वेनापि तत्र प्रयोगात्। अत्रापि तदर्थस्वीकारेण "कन्यामनग्निकां जानीयात्" (इदानीमप्राप्तयौवनाया अपि द्रागित्येव रजोदर्शनादिकं भविष्यति, ततोझटित्येव कन्यादानं निर्वर्तनीयम्) इत्येतदर्थक तात्पर्यवत्त्वमेव युक्तम्। "प्रयच्छेत्त्वनग्निकाम्" इति वाक्यशेषस्यान्यथा विरोधात्। अत्र हि वचने अनग्निकामित्यस्य अनग्निका त्वृतुमती तामित्यंशेनार्थं प्रतिपाद्य विशिष्टवाक्यतात्पर्यविषयीभूतार्थः प्रयच्छेत्वनग्निकामित्यनेनांशेन प्रतिपाद्यत एव इत्येव वर्णनीयमिति। एवं चानग्निकामित्यत्र प्रतीतितो रजस्वलाया बोधेऽपि पर्यवसानतोऽप्राप्तरजस एव कन्याया बोधो भविष्यतीति जैमिनिगृह्यपर्यालोचनया न रजोऽनन्तरविवाहसिद्धिरिति मन्तव्यम्।

[रातामित्यादिसूत्रार्थविचारः]

अथ प्रसङ्गात् रातामित्याद्यापस्तम्बादिसूत्राणां रजोऽनन्तरविवाहशास्त्रीयतायां तात्पर्यमस्ति न वेति विचारयामः।

तत्र वयोनिर्णयकाराः—"रातां पालीं मित्रां स्वनुजां वर्षकारीं वर्जयेत्" इति रातामपि स्त्रियं वर्जनीयकोटौ परिगणयतामापस्त-

स्त्वाचार्याणां ऋतुमतीविवाहनिषेध एव तात्पर्यमभ्युपगमनीयम्। रातामिति पदं सुदर्शनाचार्या रमणशीला ऋतुस्नाता इति विवृण्वते। यदि ऋतुमतीविवाह एवापस्तम्बाचार्याणां समावेशनादि लिङ्गेन तात्पर्यमिति स्यात्, तदाऽन्यसूत्रविरोधो दुष्परिहरः।

वस्तुतस्तु समावेशनरूपाङ्गविधानेऽपि तेषां तात्पर्यं नास्तीति पूर्वमुपपादितमिति नोभयविधविवाहतात्पर्यकल्पनाया अपि अवकाश इति मन्तव्यम्। किञ्च "यदा मलद्वासाः स्यादथैनां ब्राह्मणप्रतिषिद्धानि कर्माणि संशास्ति" इति सूत्रमपि ऋतुकालतः पूर्वमेव विवाहो धर्म इति ज्ञापयति। अनेन हि यदा रजस्वला भवति, तदा तस्यै तैत्तिरीय श्रुतौ संहितायां २-५-१ इति प्रश्ने उक्तान् धर्मान् वरेणोपदेष्टव्य तयाऽऽचार्योऽभिप्रैतीति संकोचं विना व्याख्यानं सिध्यति। विवाहानन्तरकालिकऋतुकालावच्छेदेन धर्मसंशासनमेवाचार्योऽभिप्रैतीति तु भवतां मते समापतति, तच्च न युक्तम्; विवाहप्राक्कालिकरजःकाले रजस्वलाधर्मानुष्ठानानावश्यकतादिकल्पने प्रमाणाभावात्। पित्रादिना तद्धर्मोपदेशाभिधानपरविध्यन्तरकल्पनायान्तु निमूलायामुक्तविधानं निरर्थकं सम्पद्यते। सकृदेव हि धर्मोपदेशो विधायते, न प्रतिरजःकालमपि; येन विवाहानन्तरकालिकधर्मोपदेशविषयकत्वेनोक्तविधानसार्थक्यं भवेत्। एवं बोधायनादिगृह्यादिगतरजस्वलाधर्मोपदेशविधानमपि रजोऽनन्तरविवाहपक्षे नोपपद्यते। ततश्च पूर्वोत्तरपर्यालोचनायामपि गृह्यसूत्राणि ऋतोः प्रागेव स्त्रीणां विवाहं कर्तव्यं बोधयन्ति न सन्ति निश्चितमापस्तम्बाद्यभिप्रायमावेदयन्तीति सिद्धम्।

अस्मिन्नेव क्रमे यदि दैवादृतुसमावेशनमपि समापतति, तदा आरोहोरुमिति मन्त्र इति सुदर्शनाचार्याणामप्यापत्कल्पतया

ऋतुस्नातद्वादशादिवयस्कस्त्रीविवाहे दैवायत्तेन अतर्कितोपनतेन रजसा मध्येविवाहं च यदि ऋतुमती, तदभिप्रायेणेति न रजोऽनन्तरविवाहोऽभिमतः। मध्येविवाहं वा रजोवती, तस्या दिनत्रयापगमानन्तरमेव शेषहोमसमावेशनादिकमिति समावेशनद्वयमपि एककालिकमेव सम्पद्यते इति चोक्तमेव। तथा चोक्तम्—

प्रधानहोमे निर्वृत्ते कुमारी यदि सार्तवा।
त्रिरात्रेऽपगते पश्चाच्छेषं कर्म समापयेत्॥

इति। स्मृत्यन्तरे च—

विवाहहोमे प्रक्रान्ते यदि कन्या रजस्वला।
त्रिरात्रं दम्पती स्यातां पृथक्शय्याशनासनौ॥
चतुर्थेऽहनि सम्प्राप्ते तस्मिन्नग्नौ यथाविधि।

विवाहहोमं कुर्याताम् ·······इत्यादिस्मृतिसंग्रहः। एवं च रजःप्रादुर्भावस्य चतुर्थदिनमारभ्य यानि द्वादश दिनानि, तान्येव ऋतुसमावेशनस्य काल इति षोडशदिनानन्तरं विवाहानुष्ठानेऽप्राप्तत्वात् अनियतप्रसङ्गमेव ऋतुसमावेशनमिति वर्णने दैवादिति पदं निरर्थकं भवति। एवं चापस्तम्बाद्याशयो रजोऽनन्तरविवाहो न धर्म इत्येव स्पष्टम् प्रतीयत इति वर्णयन्ति।

विवाहकालविमर्शकारास्तु—गृह्यविचारारम्भे वयोनिर्णयकारैरेव कदाचित्कावश्यगुणदोषकोटयोरप्रवेशस्य वर्णनेनात्र परं तस्य दोषत्वेन वर्णने पूर्वापरविरोधो भवेदिति "ऋतुस्नातान्तु वर्जयेत्' इत्यस्य ब्राह्मणैः षोडशपरिमितऋतुकालावच्छिन्नस्त्रीवरणनिषेध एव तात्पर्यम्; ऋतुस्नाताशब्दस्य तत्रैव प्रयोगात्। ऋतुस्नाताविवाहनिषेधमात्रेण ऋतुमतीविवाहनिषेधवचनासम्भवात्। यद्यप्यत्र पक्षे विवाहचतुर्थदिने ऋतुसमावेशनस्यानियतस्यापि प्रसङ्गो

नास्ति । इत्थञ्च "यदि ऋतुसमावेशनमपि समापतति" इति सुदर्शनाचार्यभाष्यविरोधः । तथापि विंशादिदिने विवाहानुष्ठाने दैवान्मध्येविवाहं रजोदर्शने च सति चतुर्थदिन एव ऋतुसमावेशनमपि प्रसक्तमेवेति न दोषः । "यदा मलद्वासाः स्यात्, अथैनां ब्राह्मणप्रतिषिद्धानि कर्माणि संशास्ति" इति सूत्रमपि उपनयनानन्तरकालिकानां "ब्रह्मचार्यसि" इत्यादिव्रतानुशासनानामिव विवाहानन्तरव्रतानुशासनानामपि विवाहिताविषयकत्व एव युक्तम् । एवं च विवाहपूर्वकालिका रजस्वला धर्महीना इत्येवाङ्गीक्रियते । उक्तसमावेशनान्यथानुपपत्त्या रजोऽनन्तरविवाहस्यापि शास्त्रीयत्वमेवेति तद्विरोधेन तत्सूत्रनयनस्यापि युक्तत्वात् । यदि पुनर्विवाहपूर्वरजःकालेऽपि व्रतानुष्ठानमावश्यकमेवेत्याग्रहः, तदापि मात्रादिभिरेव इदानीमिव तदुपदेशसम्भव इति न कोऽपि विरोधः । तथैवेदानीमप्याचारात् । सिद्धस्यापि अनृतवदननिषेधस्य संस्कारार्थं नियमार्थं च पुनरनुशासनवत् ज्ञातस्यापि रजस्वलाधर्मस्य संस्कारार्थं नियमार्थं च पुनरनुशासनमिति नोक्तसूत्रवैयर्थ्यम् । किञ्च प्रथमऋतुकाल एव व्रतानुष्ठानमावश्यकमिति आपस्तम्बाशय इति कल्पनमपि न संभवति । निर्णयसिन्धुकारैर्द्वितीयादिऋतुकाल एव ब्राह्मणप्रतिषिद्धकर्मानुष्ठानम्, न प्रथमर्तुकालेऽपीति स्पष्टं प्रतिपादनात् । अन्यथा तद्विरोधापत्तेः । उक्तमपि निर्णयसिन्धौ-प्रथमर्तौ विशेषः स्मृतिचन्द्रिकायाम्—

प्रथमर्तौ तु पुष्पिण्याः पतिपुत्रवतीस्त्रियः ।
अक्षतैरासनं कृत्वा तस्मिंस्तामुपवेशयेत् ॥
हरिद्रागन्धपुष्पादीन् दद्युस्ताम्बूलकं स्वयम् ।
दीपैर्निराजनं कुर्यात् सदीपे वासयेद्बुधैः ॥

लवणापूपमुद्गादीन् दद्युस्ताभ्यस्तु शक्तितः ।

इति । ततो द्वितीयतो तन्नियमा इति । मदनपारिजाते

दक्षः—अञ्जनाभ्यञ्जने स्नानं प्रवासं दन्तधावनम् ।

न कुर्यात्सार्तवा नारी ग्रहाणामीक्षणं तथा ॥

अत्रात्रिरपि—वर्जयेन्मधुमांसं च पात्रे खर्वे च भोजनम् ।

गन्धमाल्यं दिवास्वापं ताम्बूलं चास्यशोधनम् ॥

इति । एतदनुगुण एव लोकाचारोऽपि दृश्यत इति निरूपयन्ति ।

परे तु—पूर्वापरविरोधेन वयोनिर्णयं दूषयन्तो भवन्त एव कथं तदन्यथानुपपत्त्या "रातां वर्जयेत्" इति द्वितीयव्याख्यानस्य ब्राह्मणसम्बन्धिवरणविषयकत्वेनोपपत्तिं ब्रूयुः ? यदि पुनरेवमुच्यते—न वयं तदन्यथानुपपत्तिप्रमाणमेव संकोचनिमित्तं मन्यामहे, किन्तु प्रमाणान्तरमेवेति । तथापि तादृशप्रमाणमिदमिति निरूपणं विना भवदीयप्रतिज्ञामात्रस्यार्थसाधनत्वं न संभवति । ऋतुस्नाताशब्दोऽपि न षोडशदिनावच्छिन्नस्त्रीपरः, किन्तु ऋतुमतीपर एव । एवं चेदपि "ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति" इत्यादौ षोडशदिनावच्छिन्नाया एव ग्रहणं शास्त्रान्तरपर्यालोचनेनैवेति न कोऽपि दोषः । रमणशीला इति प्रथमव्याख्यानमपि अस्माकमेवानुकूलम् ।

यथा च रमणीशीलात्वं ऋतुमतीत्वं ऋतुस्नातात्वं चेत्यनर्थान्तरम्, तथाऽन्यत्र विस्तरः । एवं च वादकथाया विचारणायाम् "रातां वर्जयेत्" इति सूत्रयतामाचार्याणामृतुमतीविवाहनिषेध एव तात्पर्यमित्येवाङ्गीकर्तव्यम् ; तैरेवाचार्यैः "यदा मलवद्वासाः स्यात्, अथैनां ब्राह्मणप्रतिषिद्धानि कर्माणि संशास्ति" इति सूत्रेण प्रथमऋतुकालानुष्ठेयधर्मानुशासनस्य पतिकर्तृकस्य सूत्रणात्

तस्य युवतिपक्षेऽनुपपन्नत्वात् । न चोक्तव्रतानुशासनं द्वितीयाद्यृतु-कालानुष्ठेयव्रतमात्रविषयकम्; निर्णयसिन्धुकारैर्द्वितीयाद्यृतुकालावच्छेदेनैव व्रतानुष्ठानावश्यकतायाः प्रथमतौ तदनावश्यकत्व-बोधनपूर्वकं दक्षादिस्मृत्यनुसारेण सिद्धान्तितत्वादिति शङ्कनीयम् । निर्णयसिन्धुकारो प्रथमद्वितीयादिरजःकालभेदेन स्मृत्यनुसारेण भिन्नधर्मानुशासनं सत्यं प्रतिपादयति । नहि तावता प्रथम-रजःकालोऽपि धर्मविहीन इति वर्णयितुं शक्यते । न च प्रतिषिद्धधर्ममात्रोपदेशस्यैवापस्तम्बाचार्यैः सूत्रणात् प्रतिषिद्धानां च द्वितीयादिरजःकालिकत्वात् सर्वमतानुसारेण प्रथमरजःकालो धर्मविहीन एवेति वाच्यम्; येषान्तु सर्वस्मृत्येकवाक्यता नावश्यिकीत्याशयः, तेषां मते आपस्तम्बसूत्राणामपि स्मृत्यन्तराविरोधेनोपपत्तिवर्णनस्यानावश्यकत्वादापस्तम्बसूत्रं द्वितीयरजःकालिकत्वेन नेतुं न शक्यम्; येषां च सा आवश्यिका, तेषामपि ब्राह्मणप्रतिषिद्धानीतिसूत्रे प्रतिषिद्धपदस्य विहितधर्मोपलक्षणकत्वमप्यङ्गीकरणीयमेवेति प्रथमरजःकालधर्मविहीनतावादो निरालम्बन एवेति मन्यामहे । यथा चोपनयनतः पूर्वं धर्मानुष्ठानं नावश्यकम्, एवं विवाहतः पूर्वं रजस्वलाधर्मानुष्ठानं नावश्यकमित्यत्र तु न प्रमाणं पश्यामः ।

अयमाशयः—यथा हि धर्माचरणं प्रत्युपनीतत्वमेव प्रयोजकम्, नैवं रजस्वलाधर्मानुष्ठानं प्रति विवाहितत्वमेव प्रयोजकम्, किन्तु रजस्वलात्वमित्यन्यत्र विस्तरः । मात्रादिभिः तदनुशासनन्तु पतिकर्तृकानुशासनस्यैव शास्त्रसिद्धत्वात् न शास्त्रसम्मतम् । अत एव न नियमाद्यर्थशासनगोचरत्वेन उपपत्तिवर्णनमपि सङ्गतम्, धर्माचरणावगमस्य नियमाध्ययनविधायकशास्त्रेणैव विवाहपू-

वैकालिकधर्मविगमस्य केनापि शास्त्रेण अप्राप्तत्वात्। इदानींतनाचारस्तु शास्त्रविरुद्धो अन्धपरम्परान्यायप्राप्तो अप्रमाणमिति पश्यामः। एवं च सर्वथा रजस्वलाधर्मानुशासनविधानपरापस्तम्बादिसूत्रपर्यालोचनयापि रजोऽनंतरविवाहो अशास्त्रीय इति सिद्ध्यतीति वर्णयन्ति।

एतेन यदि दैवात् ऋतुसमावेशनमपि कर्तव्यं स्यादिति सुदर्शनाचार्यभाष्यस्यापि विनैव क्लेशमुपपन्नस्य अतिक्लेशेन अर्थान्तरत्वव्यवस्थापनमपि परास्तम्। यथा च 'अथैनामभिमन्त्रयते' इति सूत्रस्थसुदर्शनहरदत्तादिभाष्यानामप्युपपत्तिः, तथा पूर्वमेव सूचितम्। वैदेहेषु सद्य एव व्यवायो दृश्यते इति त्वाचार्यविशेषस्य देशविशेषे प्रतिपादनपरमित्येव वाक्यशेषादिना स्पष्टं प्रतीयत इति न कथमपि भवतामनुकूलमिति।

अत्र केचित्—रजोनन्तरविवाहाभ्युपगमेपि कदाचिदेव विवाहचतुर्थदिने ऋतुसमावेशनस्य प्रसङ्गः, न तु सर्वथा। तत्र च विना दैवं अन्यो दृष्टहेतुर्नास्तीति दैवादिति विशेषणमुपपन्नमेवेति वर्णयन्ति।

तत्र वयोनिर्णयकाराः—कार्यसामान्यं प्रति सिद्धस्य दैवकारणकत्वस्य अत्रानुवादो निरर्थकः; दैवस्य दृष्टकारणत्वमपि असम्भवदुक्तिकमेवेति दैवपदस्वारस्यभङ्गस्तदवस्थ एवेति वर्णयन्ति। एतेषां त्वाशयः—वर्णाश्रमकाण्डे "प्रधानहोमे निवृत्ते' इत्यादिवचनैः पादकृच्छ्रचान्द्रायणादिपूर्वकमेव मध्येविवाहं रजस्वलाया एव परिग्रहणार्हत्वप्रतिपादनात् हेमाद्रावपि 'विवाहे वितते यज्ञे' इत्यादिसर्ववचनशेषतयापि दृष्टेन 'पूर्वं पुष्पवती न चेत्' इत्यंशेन मध्येविवाहं रजस्वलायाः प्रायश्चित्तशतेनापि न शुद्धिरिति

वर्णनाच्च उक्तग्रन्थद्वयेनापि पुष्पवतीविवाहो न शास्त्रीय इति सिद्धे तदविरोधेनैव सुदर्शनाचार्यभाष्यतात्पर्यकल्पनमपि युक्तमिति ।

विवाहकालविमर्शकारास्तु—

विवाहे वितते यज्ञे होमकाल उपस्थिते ।
कन्यामृतुमतीं दृष्ट्वा कथं कुर्वन्ति याज्ञिकाः॥
स्नापयित्वा तु तां कन्यामर्चयित्वा हुताशनम् ।
युञ्जानहोमं कुर्वीत ततः कर्म प्रयोजयेत् ॥
प्रधानहोमे निवृत्ते कुमारी यदि सार्तवा ।
त्रिरात्रेऽपगते पश्चात् शेषं कर्म समापयेत् ॥

इति स्मृतिभास्करे,

विवाहहोमे प्रक्रान्ते यदि कन्या रजस्वला ।
त्रिरात्रं दम्पती स्यातां पृथक् शय्यासनाशनौ ॥
चतुर्थेऽहनि सम्प्राप्ते तस्मिन्नग्नौ यथाविधि ।

'विवाहहोमौ कुर्याताम्' इत्यादिस्मृतिसंग्रहः—इत्यादि वचनैः ऋतुदर्शनस्य दोषत्वमात्रं वर्णितं वर्णाश्रमकाण्डे, न तु प्रथमरजोदर्शनस्य दोषत्वं तन्निबन्धनप्रायश्चित्तादिकं वा । हेमाद्रौ तु गौतमः—

विवाहशेषहोमात्प्राक् वधूर्या प्रथमार्तवा ।
तत्पतिः सा वधूश्चोभौ प्रायश्चित्तमिहार्हतः ॥
हविष्मतीरिमा अद्भिर्वधूं तां स्नापयेन्मुदा ।
कृत्वा तदाचरेत् कृत्यं पावनं कामसंहितम् ॥
एवं वै प्रत्यहं कुर्यात् पञ्चमेऽहनि पूर्ववत् ।
स्नापयित्वा परीधाय पूर्ववच्छुद्धवाससी ॥
पूर्ववज्जुहुयाद्वह्नौ ततश्चान्द्रायणं पृथक् ।

कृत्वा तु पापशुद्धौ तावन्यथा दोषसम्भवौ ॥
तदानीं न परित्याज्या पूर्वं पुष्पवती न चेत् ।
न योग्या हव्यकव्येषु सा नारी वृषली भवेत् ॥

इत्यादिवचनैर्विधीयमानं बलवत्तरप्रायश्चित्तादिकं प्रथमार्तव-विषयमेवेति स्पष्टं प्रतीयते, एवं च वैद्यनाथदीक्षितीयवचनानां निमित्तगतविशेषाश्रवणात् प्रथमद्वितीयादिरजोविषयत्वमेव कल्प्यत इति निमित्तगतप्राथम्यतदभावाभ्यां कल्प्ययोरपि तदीययोः परस्परभिन्नत्वात् नोपसंहार इति निबन्धकृतोरुभयोरपि समानार्थ-तात्पर्यवर्णनमसंगतमेव। यदप्युक्तम्—विवाहतः पूर्वं पुष्पवत्याः प्रायश्चित्तशतेनापि न शुद्धिरिति चापि हेमाद्रावुपपादितमिति। तदपि न सङ्गतम् "तदानीं न परित्याज्या पूर्वं पुष्पवती न चेत्" इति वचनं हि न तावत् पूर्वमपुष्पवती मध्ये विवाहं च सञ्जात-पुष्पा या कन्या तादृशस्त्रियाः प्रायश्चित्तादिना शुद्धिबोधनद्वारा पूर्वं पुष्पवत्याः प्रायश्चित्तशतेनाप्यशुद्धिं बोधयतीति वर्णयितुं शक्यते। "न योग्या हव्यकव्येषु सा कन्या वृषली स्मृता" इति वाक्यशेषेणानन्वयापत्तेः। आकाङ्क्षायामेव खलु परस्परान्वयो नानाकाङ्क्षायाम्। यदा च पूर्वं पुष्पवती न चेदपरित्याज्या इति समन्वयः, तदा अपरित्याज्याया वृषलीत्वादिवर्णनमसङ्गतमेव भवति। पुष्पवती न चेदित्यत्र घटकपुष्पवत्यास्तु न योग्येति वाक्ये परामर्शो न संभवति। सर्वनाम्नां प्रधानपरामर्शस्यैवौत्सर्गिकत्वात्। युक्तं चैतत्। निर्णयसिन्धुकारैरपि 'कन्यामृतुमतीं शुद्धां कृत्वा निष्कृतिमात्मनः। शुद्धिं च कारयित्वा तां उद्वहेदाग्निशंस्यधीः' इत्याश्वलायनस्मृत्यनुसारेण विवाहतः पूर्वं पुष्पवत्या अपि प्रायश्चित्ताधीनशुद्धिप्रतिपादनात्। यद्यपि पित्रादीनामपि प्रायश्चित्तं विधा-

तृणां निर्णयसिन्धुकाराणामृतुमतीविवाहो न युक्त इत्येवाभिप्रायः प्रतीयते, तथापि यः शक्तोऽपि काले न ददाति तद्विषयमिति माधवाचार्याभिप्रायानुसारेण तेषामपि तदभिप्रायकल्पनात् न दोष इति—वर्णयन्ति।

परे तु—वर्णाश्रमकाण्डे निमित्तगतप्राथम्याश्रवणमात्रेण द्वितीयार्तवविषयीकरणं न युक्तम्; अश्रुतस्यापि तस्य वाक्यान्तरैकवाक्यतामात्रेण प्रतीतिसंभवात्। अन्यथा द्वितीयत्वादीनामश्रुतत्वेन भवदीयसिद्धान्तोऽपि कथं सिद्धिमुपेयात्? एवं चोभयोरपि निबन्धकर्त्रोरेकार्थतात्पर्यकल्पनमेव युक्तम्। युञ्जानादिहोमादिसमाननैमित्तिकादिप्रत्यभिज्ञानाच्चैकत्वमित्यन्यत्र विस्तरः।

यदपि "पूर्वं पुष्पवती न चेत्" इत्यस्यान्यथैवाभिप्रायो वर्णनीय इत्युक्तम्। तत्र प्रतिब्रूमः। यद्यपि निर्णयसिन्धुकारैर्विवाहतः पूर्वमपि पुष्पवत्याः प्रायश्चित्तादिकं प्रतिपादितम्, यद्यपि च "न योग्या हव्यकव्येषु सा कन्या वृषली स्मृता" इति वाक्यशेषे तच्छब्देन पूर्वं पुष्पवत्याः परामर्शो न संभवतीति पूर्वं पुष्पवती प्रथमार्तवा प्रायश्चित्ते कृतेऽपरित्याज्या, न चेदकृते प्रायश्चित्ते न योग्या हव्यकव्येषु इति व्याख्यानमेव युक्तमिति भवतां प्रतीतिर्विद्यते, तथापि "कृत्वा तु पापशुद्धौ तावन्यथादोषसंभवौ" इति पूर्ववाक्यार्थस्याप्यनेन वर्णनेन पौनरुक्त्यदोषो भवेत्। एवमुपक्रम एव मध्ये विवाहं प्रथमार्तवाया विशिष्य ग्रहणेन "पूर्वं पुष्पवती न चेत्" इत्यनेन पुनरनुवादोऽपि निरर्थकः सम्पद्यते। तथा पूर्वशब्देन सावधिकोऽर्थबोधकेन प्राथम्यविवक्षाऽसंभवदुक्तिका। न चेदिति चेच्छब्दघटितवाक्यार्थपूरणं प्रति प्रथमान्तपदस्यैव सामर्थ्यमिति अशाब्दप्रायश्चित्ताकरणस्य विवक्षा चासंभवदुक्तिकेत्या-

दिबहुदोषकलुषितत्वात् भवदीयव्याख्यानं न युक्तमिति वयोनिर्णा- यकारीयव्याख्यानमेव समुचितमिति पश्यामः । यावता विवाहम- ध्यकालिकप्रथमार्तवविषय एव एतादृशप्रायश्चित्तविधानम्, तावता विवाहतः पूर्वं रजोदर्शने ततोऽपि गुरुतरप्रायश्चित्तानुष्ठानमेवाव- श्यमिति निर्णयसिन्धुकारैरपि कन्यावरपित्रादीनां सर्वेषामपि प्रायश्चित्तं विहितमिति केवलकन्याशुद्धिमात्रेण न वृषलीत्वनिवृत्ति रित्यभिप्रायेणैव—"न योग्या हव्यकव्येषु सा कन्या वृषली स्मृता" इति वचनं प्रवृत्तम् । किञ्चेदं गौतमीयं वचनमिति हेमाद्रितोऽव गम्यते । गौतमश्च "प्रदानं प्रागृतोः" इति ऋतुकालतः पूर्वमेव विवाहमभिप्रैतीति तादृशतात्पर्यकल्पनं युक्ततममेव । यः शक्तो- ऽपि ऋतुकालतः पूर्वं कन्यां न प्रयच्छति, तादृशपित्रादीनामेव दोष- प्रतिपादनन्तु न युक्तमेवेत्युपरिष्टादुपपादयिष्यामः । अस्तु वा भव- दीयव्याख्यानमेव समुचितमिति । तावतापि रजोऽनन्तरविवाहध- र्मतावादः कथं वा भवतां सेत्स्यतीति विवाहकालविमर्शकारोक्तं चिन्त्यमेव । सुदर्शनाचार्यभाष्यगतं दैवादिति पदं चेदानीमेव स्वरसं सम्पद्यते । रातां वर्जयेदित्यत्र ऋतुस्नातां वर्जयेदिति व्या- ख्यानमपि अस्माकमेवानुकूलमिति मन्तव्यम् । एतेन बोधायना- श्वलायनजैमिनिगोभिलपारस्कराद्यभिमतविवाहाङ्गसमावेशनं न रजोऽनन्तरविवाहलिङ्गमिति सूचितमिति तद्धर्मतावादोऽसङ्ग त एवेति—वर्णयन्ति ।

[स्मृत्यर्थविचारः] अत्र केचित्—गृह्यसंग्रहकारैः प्रदानमात्रस्यैव विधानात् तस्य च वाग्दानादिविषयकत्वेनाप्युपपत्तिसंभवात् "विन्देतानग्निकाम्" इति वचनं स्वतन्त्रतया विवाहविधिपरमेवा- ङ्गीकरणीयम् । विवाहदानयोस्तु भिन्नाधिकारिकत्वेन भिन्नफल-

कत्वेन च भिन्नकर्मत्वेनानन्तर्यनियमो नास्तीति नग्निकावस्थायां दानप्रतिपादनपूर्वकं रजोऽनन्तरविवाहप्रतिपादन एव गृह्यसंग्रहकाराणामप्याशयः । एतेन—

दद्याद्गुणवते कन्यां नग्निकां ब्रह्मचारिणे ।
अपि वा गुणहीनाय नोपरुन्ध्याद्रजस्वलाम् ॥

इति बोधायनवचनं "प्रदानं प्रागृतोः" इति गौतमवचनम्, "प्रयच्छेन्नग्निकां कन्यां ऋतुकालभयान्नरः" इति वसिष्ठवचनम्, "अप्रयच्छन् समाप्नोति भ्रूणहत्यामृतावृतौ" इति याज्ञवल्क्यवचनम्,

"यदि वा दातृवैकल्यात् रजः पश्येत्कुमारिका ।
भ्रूणहत्याश्च तावत्यः पतितः स्यात्तदप्रदः ॥"

इति वेदव्यासवचनम्—

प्राप्ते तु द्वादशे वर्षे यः कन्यां न प्रयच्छति ।
मासि मासि रजस्तस्याः पिबन्ति पितरोऽनिशम् ॥

इति पराशरसंहितावचनञ्च व्याख्यातं भवति । सर्वेषामपि वचनानां दानमात्रविषयकत्वेन विवाहविधिपरत्वाभावात् । एवञ्च ऋतुमतीविवाहनिषेधपरस्य कस्यापि वचनस्याभावात् जैमिनीयगृह्यपर्यालोचनायां ऋतुमतीविवाहः शास्त्रीय इत्येव भवतीति तदशास्त्रीयतावादोऽत्यन्तासङ्गत इति वर्णयन्ति ।

अन्ये तु—यस्तां विवाहयेदित्यादिपारस्करगृह्यादिपर्यालोचनया भिन्नकर्मणोरपि दानविवाहयोः वाजपेयबृहस्पतिसवयोरिव क्रमनियमविवक्षाया आवश्यकत्वात् दानविधिपराणामपि तदव्यवहितविवाहपर्यन्तं व्यापारस्याङ्गीकरणीयत्वात् गृह्यसंग्रहकाराणां पूर्वोक्ततात्पर्यमेव युक्तम् । एतेन—बोधायनगौतमवसिष्ठादिव-

चनान्यपि व्याख्यातानीति ऋतुमतीविवाहशास्त्रीयतावादः असंगत एव । यदपि प्रागपि ऋतोः कन्यकाया न दानम्, ऋतावपि यावद्गुणवान् वरो न लभ्यते न तावदिति ऋत्वनन्तरमपि दानावधिविधिपरतया प्रतीयमानं वचनम्; तदपि गुणवद्वरलाभे गुणहीनाय न दातव्येत्येवंपरमित्यपरार्के प्रतिपादितमिति नास्माकं प्रतिकूलम् । अत एव—

पितृवेश्मनि या कन्या रजःपश्यत्यसंस्कृता ।
तस्यां मृतायां नाशौचं कदाचिदपि शाम्यति ॥
पितृवेश्मनि या कन्या रजः पश्यत्यसंस्कृता ।
भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृता ॥
रजस्वला च या कन्या यदि स्यादविवाहिता ।
वृषली वार्षलेयः स्यात् तस्यां जातः स एव हि ॥
पितृगेहे तु या कन्या रजः पश्यत्यसंस्कृता ।
सा कन्या वृषली ज्ञेया तत्पतिर्वृषलीपतिः ॥
माता चैव पिता चैव ज्येष्ठो भ्राता तथैव च ।
त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम् ॥
उद्वहेद्यस्तु तां कन्यां ब्राह्मणो मदमोहितः ।
असंभाष्यो ह्यपाङ्क्तेयो स विप्रो वृषलीपतिः ॥
पितुर्गेहे तु या कन्या रजः पश्यत्यसंस्कृता ।
भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृता ॥
यस्तां विवाहयेत्कन्यां ब्राह्मणोऽज्ञानमोहितः ।
असंभाष्यो ह्यपाङ्क्तेयः स विप्रो वृषलीपतिः ॥
तस्माद्विवाहयेत्कन्यां यावन्नर्तुमती भवेत् ।
विवाहो ह्यष्टवर्षायाः कन्यायाश्च प्रशस्यते ॥

इत्यादिविष्णुशङ्खलघुशातातपलघ्वाश्वलायनप्राजापत्याङ्गिरो-बृहस्पतिपराशरसंवर्तादिस्मृतयोऽपि अनुगृहीता भवन्ति। एवञ्च न रजोऽनन्तरविवाहः शास्त्रीय इति वर्णयन्ति।

वयोनिर्णयकाराणामप्ययमर्थः संमत एवेति मन्यामहे। वयोनिर्णयकारा ह्येवं वदन्ति—यद्यपि—

त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती।
ऊर्ध्वं तु कालादेतस्मात् विन्देत सदृशं पतिम्॥
अदीयमाना भर्तारं अधिगच्छेत्स्वयं यदि।
नैनः किञ्चिदवाप्नोति न च यं साधिगच्छति॥

इत्यादिवचनै रजोनन्तरविवाहः शास्त्रीय इति प्रतीयते। तथापि तेषां वचनानामापत्कल्पतया तदभ्यनुज्ञान एव तात्पर्यादुक्तानेकवचनपर्यालोचनया रजोऽनन्तरविवाहो न शास्त्रीय एव। अत एव तैत्तिरीयसंहितायां सप्तमकाण्डे—

"प्रजापतिरकामयत प्रजायेयेति, स मुखतस्त्रिवृतं निरमिमीत, तमग्निर्देवतान्वसृजत, गायत्री छन्दो रथन्तरं साम ब्राह्मणो मनुष्याणामजः पशूनाम् तस्मात्ते मुख्या मुखतो ह्यसृजन्त" इति गायत्रीछन्दसा साकं ब्राह्मणसृष्टिविधानमुपपन्नं भवति। तादृशविधानस्य हि तात्पर्यं 'छन्दस्सु पादाक्षरसमुदायवदब्दसमूह उपनयने' इति हारीतसूत्रेण यस्या जातेर्येन छन्दसा सृष्टिः, तज्जातीयस्य तच्छन्दःपादाक्षरसंख्यापरिमितवयसि उपनयनं कर्तव्यमिति प्रकाश्यते। एवञ्च ब्रह्मक्षत्रियवैश्यानां गायत्रीत्रिष्टप्जगतीछन्दोभिः साकं सृष्टिप्रतिपादनात् यथाक्रमं अष्टमैकादशद्वादशवयांस्युपनयनस्य मुख्यः कालः। मुख्यकालानुष्ठानाशक्तौ ब्राह्म-

णेन क्षत्रियवैश्ययोः मुख्यकाले एकादशद्वादशवयसोरप्यनुष्ठाने न दोषः।

अजीवंस्तु यथोक्तेन ब्राह्मणः स्वेन कर्मणा।
जीवेत् क्षत्रियधर्मेण स ह्यस्य प्रत्यनन्तरः॥
उभाभ्यामप्यजीवंस्तु कथं स्यादिति चेद्भवेत्।
कृषिगोरक्षमास्थाय जीवेद्वैश्यस्य जीविकाम्॥

इति मनुवचनेन स्वधर्माशक्तस्य ब्राह्मणस्य क्षत्रियविट्धर्मयोरप्यधिकारवर्णनात्। एवंच उपनयनस्थानीयत्वात् स्त्रीणां विवाहस्य उपनयनकाल एव तस्यापि काल इत्यङ्गीकरणीयत्वेन अष्टमवयो मुख्यः कालः, द्वादशवयःपर्यन्तं तु गौणकाल इत्येवाङ्गीकरणीयमिति कथंचिदपि नतु मतीविवाहसिद्धिः। एतदभिप्रायेणैव मनुरपि—

त्रिंशद्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीम्।
त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः॥

इति स्मरति।

विवाहकालविमर्शकारास्तु—सत्यमुपनयनकाल एव विवाहकालः। तस्य द्वादशवर्षपर्यन्तमेव गौणः काल इति वर्णनं परमसङ्गतमेव। "आषोडशात् ब्राह्मणस्येति" आपस्तम्बधर्मसूत्रेण षोडशवयःपर्यन्तं गौणकालस्य प्रतिपादनात्। एवं चेदपि अष्टमवय एव मुख्यः काल इत्येव 'विवाहो ह्यष्टवर्षाया कन्यायाश्च प्रशस्यते' इति वचनेन प्रतिपाद्यते। 'अषोडशाद् ब्राह्मणस्य सावित्री नातिवर्तते' इति मनुरपि द्वादशवर्षानन्तरमपि उपनयनकालं प्रतिपादयति। 'अजीवंस्तु यथोक्तेन' इति तु जीविकामात्रविषयमन्यत्रापि न प्रवर्तते। एवं च कन्याविवाहप्रतिपादकवचनानुसारेण ऋतु-

मतीविवाहोऽपि शास्त्रीय इत्येवाङ्गीकरणीयम्। तथा च कन्या-विवाहप्रतिपादकानि वचनानि। यमः—

विवाहं चोपनयनं स्त्रीणामाह पितामहः।

माधवीये संवर्तः—

अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी।
दशवर्षा भवेत्कन्या तत उर्ध्वं रजस्वला॥

यमः—

अष्टवर्षा भवेद्गौरी नवमे नग्निका भवेत्।
दशमे कन्यका प्रोक्ता द्वादशे वृषली स्मृता॥

इति कन्यालक्षणकथनपूर्वकं तासां दानफलविशेषमाह मरीचिः—

गौरीं ददन्नाकपृष्टं वैकुण्ठं रोहिणी ददत्।
कन्यां दद्द्ब्रह्मलोकं रौरवं तु रजस्वलाम्॥

तथा वैद्यनाथदीक्षितीये मनुः—

त्रिंशद्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीम्।
त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः॥

तथा निर्णयसिन्धुभारतवचनम्—

त्रिंशद्वर्षः षोडशाब्दां भार्यां विन्देत नग्निकाम्।
द्व्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः॥

अत्र षोडशाब्दाया नग्निकात्वविशेषणात् रजोदर्शनाभावे षोडशवार्षिककन्याविवाहोऽपि न दोषाय इति लभ्यते। एवं वयोविशेषानुपादानेन अनृतुमतीविवाहं प्रतिपादयन्ति कानिचन वचनानि वसिष्ठः—

प्रयच्छेन्नग्निकां कन्यां ऋतुकालभयात्पिता।

इत्यादीन्यत्रैव पूर्वसङ्कलितानि। एतेषां च वचनानां मुख्यकालप्रतिपादन एव तात्पर्यम्, न तु ऋतुमतीविवाहनिषेधेऽपि; मन्वादिस्मृतौ ऋतुमत्या अपि विवाहार्हत्वप्रतिपादनेन तेन साकं विरोधापत्तेः। यथा हि गुणवद्वरलाभे अप्राप्तकालेऽपि जातमात्रादीनां विवाहो युक्तः, एवं गुणवद्वरलिप्सया षोडशादिवयःपर्यन्तं प्रतीक्षणमपि युक्तमेव। तथा च मनुः—

त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती।
ऊर्ध्वं तु कालादेतस्मात् विन्देत सदृशं वरम्॥

बोधायनः—

त्रीणि वर्षाण्यृतुमती कांक्षेत पितृशासनम्।

वैद्यनाथदीक्षितापरार्कमाधवादीनामपि उक्तवचनं निर्दिश्यतामयमेवाभिप्रायः। एवं च रजोदर्शनानन्तरं विवाहनिषेधपराणां कन्यापित्रादीनां वोढुश्च भ्रूणहत्यादिदोषबोधनपराणामुक्तवचनानामन्यथैवोपपत्तिर्वर्णनीया। तथा हि दातुर्यद्दोषसंकीर्तनम्—

"ऋतुमत्यां हि तिष्ठन्त्यां दोषः पितरमृच्छति।" इति॥

तद्गुणवद्वरलाभेऽपि यः कन्यां न प्रयच्छति। तद्विषयम्, तृतीये वर्षे गुणवद्वरलाभेऽपि यः कन्यां न प्रयच्छति तद्विषयं च। तथाच बोधायनः—

त्रीणि वर्षाण्यृतुमतीं यः कन्यां न प्रयच्छति।
स तुल्यं भ्रूणहत्यायै दोषमृच्छत्यसंशयम्॥
न याचते चेदेवं स्यात् याचते चेत् पृथक् पृथक्।
एकैकस्मिन्नृतौ दोषं पातकं मनुरब्रवीत्॥

वसिष्ठश्च—

"यावच्च कन्यामृतवः स्पृशन्ति तुल्यैः सकामामपि याचमानाम्।

ऋणानि तावन्ति हतानि ताभ्यां मातापितृभ्यामिति धर्मवादः ॥'

आभ्यां हि वचनाभ्यां याचमानाय वराय कन्यां यो न प्रयच्छति, तस्यैव भ्रूणहत्यादोषो विहितः। एवमयाचमानायापि वराय वर्षत्रयेणादाने भ्रूणहत्या प्रतिपादिता। एवञ्च ऋत्वनन्तरमपि वर्षत्रयपर्यन्तमपि दानकालो विद्यत एव। सदृशवरालाभेऽपि तृतीये वर्षे कथमपि कन्या दातव्यैव। ततः परन्तु दानाधिकार एव नास्ति; स्वत्वस्यैवाभावात्। यदाह मनुः स्वयंवरं प्रक्रम्य—

पित्रे न दद्याच्छुल्कं तु कन्यामृतुमतीं हरन्।
स हि स्वाम्यादतिक्रामेत् ऋतूनां प्रतिरोधनात्॥

बौधायनः—अपि वा गुणहीनाय नोपरुन्ध्याद्रजस्वलाम्। एवमेव कन्यावृषलीत्वादिबोधकानामपि वचनानां सदृशवरलाभेऽपि या न दीयते, तद्विषयकत्वेनोपपत्तिरिति न कोऽपि दोषः। यदपि शुल्कग्रहणनिषेधादिलिङ्गैः शूद्रस्त्रीविषयकवर्णनम्, तदपि न युक्तम्; शुल्कग्रहणस्य ब्राह्मणस्त्रीविषयकत्वेऽपि प्रसङ्गात् शुल्कवत आसुरविवाहस्य षडानुपूर्व्या विप्रस्येति वचनेन ब्राह्मणविषयेऽपि विधानात्। एवमेव त्रीणि वर्षाणीत्यादिवचनानां आपद्धर्मत्वमपि असंगतम्; तत्प्रकरणस्यापद्धर्मप्रकरणत्वाभावात्। अन्यथा "आपद्यपत्यप्राप्तिश्च" इत्यत्रापद्ग्रहणवैयर्थ्यापत्तेरिति रजोऽनन्तरविवाहः शास्त्रीय एवेति वर्णयन्ति।

परे तु—उपनयनकाल एव यद्यपि विवाहकालः, यद्यपि चोपनयनस्य षोडशवर्षपर्यन्तं गौणकाल इति तत्स्थानीयस्य विवाहस्यापि निर्णयसिन्धावुदाहृतभारतवचनानुसारेण षोडशवर्षपर्यन्तं कालः, तथापि सर्वत्रापि स्मृतिषु ऋतुदर्शनरूपावधिनिर्णयस्य

कृतत्वादुक्तभारतवचनेऽपि नग्निकामितिविशेषणानुसारेण ऋतुदर्शनाभाव एव षोडशादिवयस्काया अपि विवाहबोधनात् रजोऽनन्तरविवाहः परं न सेत्स्यति।

अयमभिप्रायः—यद्युपनयनस्य यावत्पर्यन्तमनुष्ठानं शास्त्रतः प्राप्तम्, तावत्पर्यन्तं विवाहस्यापि अनुष्ठानं शास्त्रसम्मतम्, तर्हि नैवं महर्षिवर्या ऋतुदर्शनं तदवधितया निर्दिशेयुः। निर्दिशन्ति च तादृशमवधिम्, अतो ज्ञायते—अतिदेशतः प्राप्तस्य षोडशवयःपर्यन्तस्य कालस्य रजोदर्शनाभावविशिष्टस्यैव गौणकालत्वेनापि ग्रहणमिति। एवञ्च द्वादशवर्षवयसोऽपि रजोदर्शनविशिष्टस्य विवाहकालत्वं भविष्यतीत्यभिप्रायेणैव महर्षिवर्यैः "अत ऊर्ध्वं रजस्वला" "रौरवन्तु रजस्वलाम्" इति द्वादशादिवयस्काविवाहोऽपि प्रतिषिद्धः। तत्र च व्याख्यानेषु रजस्वलाशब्देन नियतमेव द्वादशादिवयःसु रजोदर्शनं सम्भवेदिति न विवक्षितम्, यदि सम्भवेत्, तदा पित्रादीनां भ्रूणहत्यादिदोषः समापतेदिति ततः पूर्वमेव विवाहकरणे न कस्यापि दोषस्य प्रसर इति वर्णितम्। "त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः" इति वदतो मनोरपि अयमेवाभिप्रायः। रजस्वलाविवाहनिषेधेन अष्टवर्षाद्यनृतुमतीविवाह एव युक्त इति बोधयतां पूर्वोक्तयमादिवचनानामपि एवंसत्येवोपपत्तिः। न च रजस्वलाविवाहनिषेधपरत्वेन भवदभिमतानां सर्वेषामपि वचनानां गौणकालप्रतिपादन एव तात्पर्यम्, न तु रजस्वलाविवाहनिषेधवचनेऽपि, "त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती" इति मन्वादिस्मृतिभिः ऋतुमतीविवाहस्यापि विधानेन तदविरोधार्थं तथैवोपपत्तेर्वर्णनीयत्वादिति वाच्यम्, तथा सति रजोदर्शनस्यानियतत्वात् यस्याः षोडशादिवयस्येव रजोद-

र्शनम्, तस्या एकोनविंशवयःपर्यन्तमपि विवाहकाल इति कल्पनापत्त्या "आषोडशाद्ब्राह्मणस्य" इत्यादिमन्वादिवचनमेव परस्परविरुद्धं सम्पद्येतेति रजोऽनन्तरविवाहनिषेधतात्पर्यकत्वस्यैव युक्तत्वात्। यथा च "कालेऽदाता पिता वाच्यः" इत्यादिना रजोऽनन्तरविवाहस्य निषिद्धत्वात् त्रीणि वर्षाणीत्यादिनाऽऽपत्कल्पतया तदभ्यनुज्ञान एव तात्पर्यम्, तथा पूर्वमेव निरूपितम्। त्रीणि वर्षाणीत्यादिवचनं हि न तावदृतुदर्शनानन्तरमप्यनापत्कल्पतयापि दानकालमभ्यनुजानाति, किन्तु गुणवदगुणवद्वरलिप्सया तत्र तत्र पर्यटतः तल्लाभतः पूर्वमेव स्वकन्यारजः पश्यतः ऋतुप्रतिरोधनिमित्तभ्रूणहत्यादोषनिवर्तकप्रायश्चित्तानुष्ठानपूर्वकं दानाधिकारं बोधयति। तद्विषये एकस्या एव भ्रूणहत्यायाः शास्त्रसिद्धत्वात्। यस्तु पुनः याचमानायापि वराय साहसादिना न कन्यां ददाति सत्स्वपि रजोदर्शनेषु, न स प्रायश्चित्तशतेनापि दानाधिकारमर्हति। कन्या त्वस्वतन्त्रा पितृशासनमेव काङ्क्षन्ती वर्षत्रयेणापि पित्रा न दत्ता स्वयं वरणमर्हतीति तथा एकस्मिन् वृते तेन चाश्वलायनोक्तप्रायश्चित्तानुष्ठानेन गृहीतायां तस्यां न कोऽपि दोषः संभविष्यति।

अयञ्चार्थः—"नैनः किञ्चिदवाप्नोति नच यं साधिगच्छति" "न याचते चेदेवं स्यात् याचते चेत् पृथक् पृथक्" इत्यादिवचनबलाल्लभ्यते।

एतेन—"न याचते चेदेवं स्यात्" इत्यादिवचनस्य गुणवद्वरलाभेऽपि यः कन्यां न प्रयच्छति, गुणवद्वरालाभेऽपि तृतीयवत्सरे यः कन्यां न प्रयच्छति, तद्विषयकत्वमेव युक्तमिति वचनमपि परास्तम्। गुणवद्वरलाभेऽपि कन्यामददतः ऋतुसंख्याकभ्रूणहत्या-

प्रतिपादकानां वचनानां तस्य दानाधिकारं प्रत्यनर्हत्वबोधन एव तात्पर्यात्। त्रीणि वर्षाणीत्यादीनामपि गौणकल्पसमर्थकत्वाभावस्य पूर्वमुपपादितत्वेन गुणवद्वरलाभेऽपि तृतीयवत्सर इति कल्पनाया अपि निरालम्बनत्वात् नोपरुन्ध्याद्रजस्वलामित्येवंजातीयकानां बहूनां वचनानामविरोधेनैव त्रीणि वर्षाणीत्यादिवचनार्थवर्णनस्य युक्तत्वात्। "विप्रतिषेधे भूयसां स्यात् सुधर्मत्व" मिति न्यायात्।

एतेन—नोपरुन्ध्याद्रजस्वलामित्यादिवचनानां वर्षत्रयानन्तरदानगोचरत्वेनोपपत्तिवर्णनमपि—परास्तम्; "न गिरा गिरे ब्रूयात्' इत्यस्येव "नोपरुन्ध्याद्रजस्वलाम्" इत्यस्याप्यनुवादत्वात्। यथाप्राप्तमेवानुवादो युक्तः इति "दद्याद्गुणवते कन्यां नग्निकां ब्रह्मचारिणे" "अपि वा गुणहीनाय" इति विधिवाक्यताऽर्थतः प्राप्तस्यनग्निकाविवाहनिषेध एवानुवदितव्यः। अनग्निकापदन्तु न ऋत्वनन्तरवर्षत्रयावच्छिन्नस्त्रियं बोधयती, किन्तु सञ्जातरजस्काम्। एवञ्च रजोदर्शनमात्रेण विवाहनिषेध एवोक्तवचनतात्पर्यमिति न कोऽपि दोषः।

एतेन—"रौरवन्तु रजस्वलाम्" इति वचनमपि व्याख्यातं भवति। "कलौ पाराशराः स्मृताः" इति पराशरसंहितावचनेन पूर्वोक्तेनतु मतीविवाहः सर्वथाऽधर्म एवेत्यवगमात् न कथंचिदपि रजोऽनन्तरविवाहशास्त्रीयतासिद्धिः। यद्यपि माधवाचार्यैः पराशरस्मृतिव्याख्याने त्रीणि वर्षाणीत्यादिवचननिर्देशात् ऋत्वनन्तरवर्षत्रयपर्यन्तं विवाहकालबोधनेऽपि तात्पर्यमिति प्रतिपादितमिति प्रतीयते, तथापि तत्र तत्रत्यमाधवग्रन्थस्यापि अस्मदभिप्रायकल्पनमेव युक्तम्। मन्वादिस्मृत्यर्थसंग्रहणेन कलियुगासाधारणधर्मो-

पदेशनार्थं प्रवृत्तैः पराशराचार्यैः ऋतुमतीविवाहनिषेधात् मन्वादीनामपि तादृशतात्पर्यकल्पनमेव युक्तमिति वर्णयन्ति ।

इतरे तु—ऋतुमतीविवाहनिषेधपरेषु सर्वत्रापि वचनेषु "यस्तां विवाहयेत्कन्यां ब्राह्मणो मदमोहितः„ इति विशिष्य ब्राह्मणग्रहणानुसारेण ब्राह्मणेतरेषामृतुमतीविवाहोऽपि न दोषायैव । क्षत्रियादीनां षोडशादिवयसामपि उपनयनकालत्वात् तत्स्थानापन्नस्य विवाहस्यापि तदानीमेवानुष्ठानस्य युक्तत्वात् । न चात्रापि रजोदर्शनाभावविशिष्टस्यैवोपनयनकालस्य विवक्षेति शङ्कनीयम् । क्षत्रियाणां द्वादशादिवयस एव मुख्यकालत्वेन ततः पूर्वं विवाहस्यानुष्ठानासम्भवात् । द्वादशादिवयस्सु रजोदर्शनस्यापि संभवात् तदभावविशिष्टद्वादशादिवयस्सर्वत्राप्युपपादनासम्भवात् । एवञ्च रजोदर्शनानन्तरमपि क्षत्रियविषये विवाहानुष्ठाने न दोष एव । एवञ्च "त्रीणि वर्षाण्युदीक्षेत" इत्यादिवचनानामपि क्षत्रियादिविषयकत्वमेव युक्तमिति वर्णयन्ति ।

तदपरे न क्षमन्ते । एवं सति "त्रीणि वर्षाण्युदीक्षेत गृहे कन्यर्तुमत्यपि" इत्यपिशब्दप्रयोगस्वारस्यभङ्गापत्तिः । अपिशब्देन हि ऋतुमत्या विवाहो वचनान्तरेण निषिद्ध इति प्रतीयते । यदि पुनर्निषेधपराणां सर्वेषामपि वचनानां ब्राह्मणशब्दप्रयोगस्वारस्यानुसारेण ब्राह्मणविषयकत्वमेवेति नियमः, तर्हि क्षत्रियादिविषये रजोऽनन्तरविवाहनिषेधपरस्य कस्यापि वचनस्याभावात् अपिशब्दप्रयोगस्वारस्यभङ्गापत्तिः । ननु "नोपरुन्ध्यात् रजस्वलाम्" "प्रदानं प्रागृतोः" इत्यादिवचनानां सर्वसाधारणत्वेन प्रतीयमानानां ऋतुमतीविवाहाशास्त्रीयत्वेनोपपत्तिरित्याक्षेपद्वारा क्षत्रियादिविषयेऽपि विवाहनिषेधपरत्वादपिशब्दप्रयोगस्वारस्यं सिद्धमेवेति चेन्न;

दाननिषेधपराणामुक्तजातीयवचनानां रजस्वलाविवाहविधिपरवैवाहिकचतुर्थरात्रसमावेशनादिविधिपरापस्तम्बबौधायनादिगृह्यसूत्रविरोधे जाग्रति तद्विवाहनिषेधपरत्विध्यन्तराक्षेपकत्वासंभवात् अपिशब्दप्रयोगस्वारस्यभङ्गस्तदवस्थ एवेति निषेधवाक्यघटकब्राह्मणशब्दसामान्यस्य क्षत्रियाद्युपलक्षणत्वमङ्गीकरणीयमेवेति निषेधाभ्यनुज्ञानशास्त्रयोरुभयोरपि सर्वसाधारणत्वमेवाङ्गीकरणीयम् ।

अथोच्येत—दानविधिनिषेधपराणां वचनानां विवाहविधिनिषेधपर्यन्तं तात्पर्याङ्गीकरणमावश्यकमिति पूर्वमुपपादितत्वात् "नोपरुन्ध्याद्रजस्वलाम्" इति शाब्दनिषेधे जाग्रति निषेधाक्षेपानपेक्षणात् अपेक्षणेऽपि चतुर्थापररात्रसमावेशनस्यादृष्टार्थत्वमेवेति पूर्वमुपपादितत्वात् न कयापि स्मृत्या विरोध इति निषेधाक्षेपस्यापि संभवात् क्षत्रियादिमात्रविषयमेवाभ्यनुज्ञानमिति । तदापि त्रीणि वर्षाणीत्यादिवचनजातं किं "ब्राह्मणो मदमोहितः" इतिविशेषवचनमुपजीव्य रजोऽनन्तरविवाहमभ्यनुजानाति, उताहो सामान्यमुखेन निषेधमुपजीव्येति विचारणायां विनिगमनाविरहेण द्विविधनिषेधोपजीवनेनैवेदमभ्यनुज्ञानशास्त्रं प्रवृत्तमिति त्रीणि वर्षाणीत्यादिवचनं सर्वसाधारणमेव । यदि पुनः सामान्यमुखेन प्रवृत्तत्वसामान्यादभ्यनुज्ञाशास्त्रमपि सामान्यतः प्रवृत्तनिषेधमेव उपजीवति, न विशेषमुखेन प्रवृत्तनिषेधमिति वर्ण्येत, तत्रेदं विचारणीयम्—विशेषशास्त्रत्वेन तदभिमतं ब्राह्मणस्त्रीणामेव रजोऽनन्तरविवाहं निषेधतीति कथं सिद्ध्यतीति । तत्र न तावत् ब्राह्मणकर्तृकविवाहेन ; संस्कारस्य स्मृतिसिद्धत्वात् । नापि प्रकारान्तरेण; तदसंभवात् । न हि "यस्तां विवाहयेत्कन्यां ब्राह्मणो मदमोहितः" इत्यत्र कर्तुरिव संस्कार्याया अपि ब्राह्मणशब्देन व्यव-

हारो विद्यते। एवञ्च ऋतुमतीसामान्यस्य विवाहनिषेध एवोक्तवचनतात्पर्यमभ्युपगमनीयम्। ऋतुदर्शनदोषसंकीर्तनपराणां सामान्यमुखेनैव प्रवृत्तिदर्शनात्। एवं च प्रत्यासत्तिन्यायेनापि ऋतुमतीसामान्यग्रहण एव अपिशब्दस्वारस्यमिति त्रीणि वर्षाणीत्यादिवचनानां सर्वसाधारणत्वमेव युक्तम्। अत एव "यः करोत्येकरात्रेण वृषलीसेवनं द्विजः" इति रजस्वलाविवाहनिषेधवाक्ये द्विजशब्दग्रहणोपपत्तिः। एवञ्च ऋतुमतीविवाहाशास्त्रीयतावादोऽब्राह्मणीविषयेऽपि युक्त एवेति।

परे तु—ब्राह्मणस्य सर्ववर्णीयविवाहाधिकारेऽपि स्ववर्णीयकन्याविवाह एव धर्मप्रजासम्पत्त्यर्थमिति तत्कर्तृकतद्विवाहगोचराणां ब्राह्मणीशब्दाघटितानामपि तद्विषयकत्वमेव भविष्यतीति संवर्तादिविशेषवचनानां ब्राह्मणीमात्रविषयकत्वात्सामान्यमुखेन प्रवृत्तानां त्रीणिवर्षाणीत्यादीनां ब्राह्मणीविषयकत्वमपि विद्यते वा न वा? आद्ये तत्समानविषयकाभ्यनुज्ञाशास्त्रमपि ब्राह्मणीविषयमेव। द्वितीये तु संकोचे प्रमाणाभावः। एवं "ब्राह्मणो मदमोहितः" इत्यत्रापि त्रैवर्णिकाविवक्षणे "यःकरोत्येकरात्रेण वृषलीसेवनं द्विजः" इति वाक्ये द्विजग्रहणानुपपत्तिः। तद्विवक्षणे तु त्रीणिवर्षाणीत्यादिवचनसमानविषयकत्वमेवेति ब्राह्मणकन्यानामपि रजोऽनन्तरविवाहोऽभ्यनुज्ञायत एव। एवं वैवाहिकचतुर्थरात्रसमावेशनान्यथानुपपत्तिरपि तत्र गमिकेति कथं तदशास्त्रीयत्वमिति शङ्कनीयम्। एवमपि वा आपत्कल्पतया तदभ्यनुज्ञान एव तात्पर्यं त्रीणि वर्षाणीत्यादीनामङ्गीकरणीयम्। "दद्यादप्राप्तकालेऽपि" इत्यादिवचनानामिव ऋतुमत्यपीत्यपिशब्दघटितानामपि अभ्यनुज्ञाशास्त्राणां आपद्धर्मव्यवस्थापकत्वस्यैव सर्वसम्मतत्वात्। वैवा-

हिकचतुर्थरात्रसमावेशनं त्वदृष्टार्थं सहशयनमात्रपर्यवसन्नं न त्वृतुमतीविवाहलिङ्गमिति पूर्वमेव निरूपितम्।

यदपि समावेशनस्य सहशयनमात्रपर्यवसानसिद्धान्तपराणां प्रमाणाञ्जलिसमर्पणमेव वरमुत्तरं मन्यामह इति। तत्र केचित् समादधते—तत्रेदं प्रष्टव्यम्, किं तेषां साहसिकत्वात् साहसिकानाञ्चात्यन्तक्रोधसंसूचकप्रणामाञ्जलिसमर्पणेनैव मौनमुद्रा स्यादित्यत्र विवक्षितम्, उताहो तेषां प्रामाणिकत्वात् प्रामाणिकानाञ्च प्रणामाञ्जलिसमर्पणपूर्वकोपसदनमेव यथावदर्थग्रहणे समुचितोपाय इति? आद्ये भवतामपि विनापि प्रमाणलेशं साहसेन प्रतिज्ञामात्रेण तत्सिद्धान्तव्यवस्थापनपराणां विषये तादृशमुत्तरं वरतममिति मन्यामहे, यतो हि साहसिकपर्यनुयोगसमुचितसन्नाह इतिविधोपदेशतो गुरवोऽपीदानीं भवन्तः संवृत्ताः। द्वितीये तु न रजोऽनन्तरविवाहसिद्धिरित्यायातं सन्मार्गेणेति मन्तव्यमिति। युक्तं चैतत्।

"नोपरुन्ध्याद्रजस्वलाम्" इति वचनं ब्राह्मणकन्येतरविषयकमिति न युक्तम्। "उद्वहेद्यस्तु तां कन्याम्" इति वचनस्य "नोपरुन्ध्याद्रजस्वलाम्" इति वचनस्य च द्वयोरपि निषेधपरत्वात् "न ब्राह्मणं हन्यात्" "नात्रेयं हन्यात्" इति वचनयोरिव न परस्परबाध्यबाधकभावादिकम्, किन्तु "नात्रेयं हन्यात्" इति वाक्येनात्रेयहनने पापाधिक्यमिव "ब्राह्मणो मदमोहितः" इत्यनेन ब्राह्मणकर्तृकरजस्वलाविवाहे पापाधिक्यवर्णन एव तात्पर्यम्। अत एव सर्वत्रापि स्मृतिषु सर्वसाधारणविवाहप्रकरण एवैतेषां निर्देश उपपद्यते। अन्यथा हि त्रीणि वर्षाणीत्यादीनां क्षत्रियधर्माधिकार एव निर्देशापत्तेः। सर्वथापि तु त्रीणि वर्षाणीत्यादिना आपत्कल्प-

तथैव रजोऽनन्तरविवाहोऽभ्यनुज्ञायते। अभ्यनुज्ञातस्यापि पितृ-परादिप्रायश्चित्तानुष्ठानपूर्वकमेवानुष्ठानमिति कन्यावरयोः सर्व-विधपापनिवृत्तिसम्भवेऽपि पितृविषये व्यवहार्यत्वमेव सम्पद्यते; भ्रूणहत्यादीनां व्यवहारनिरोधकशक्तिमात्रस्यैव प्रायश्चित्तेन निवारणात्। तदुक्तम्—"कामतो व्यवहार्यस्तु वचनादिह जायते" इति। एवञ्च भ्रूणहन्तॄणां पित्रादीनां लोकविद्विष्टत्वमपि सिद्धं भवतीति लोकविद्वेषप्रयोजकत्वादपि न रजस्वलादानादिसमय-कल्पनं युक्तम्। एतावता सन्दर्भेण सकलगृह्यसूत्राणां सर्वासा-मपि स्मृतीनां गौतमाश्वलायनबोधायनवसिष्ठपराशरादिनिमि-त्तानां अभिप्रायो निरूपितः—यथा ऋतुमतीविवाहो न शास्त्रीय इति॥

[मन्त्रलिङ्गविचारः] अत्र केचित् प्रत्यवतिष्ठन्ते—स्मृत्यादीनां पौरु-षेयत्वादपौरुषेयं मन्त्रलिङ्गमेव प्रबलमिति तदन्यथानुपपत्त्या रजोनन्तरविवाहः शास्त्रीय इति। अयमाशयः—मन्त्राणां हि प्रयोगसमवेतार्थस्मारकत्वेन प्रामाण्यमिति मन्त्राधिकरणे पूर्वतन्त्रे निरूपितम्। विवाहाङ्गभूताश्च मन्त्राः प्रौढां स्त्रियं प्रकाशयन्तो विवाह्यायाः प्रौढात्वमेवावश्यकमिति प्रमाणयन्ति। नहि "आरो-होरुम्" इति समावेशनाङ्गभूतमन्त्रप्रकाश्यमानो ऊर्वारोहणालि-ङ्गनाद्यर्थो कन्यायां भवति। यदि तु कन्याया अपि तत्सम्भव-तीति साहसमाश्रीयते, तदापि "सोमः प्रथमं विविदे गन्धर्वः" इति मन्त्रप्रतिपादितं मनुष्यस्य चतुर्थपतित्वं रजोऽनन्तरविवाह-लिङ्गं भवति। तथाहि—

व्यञ्जनेषु च जातेषु सोमो भुञ्जीत कन्यकाम्।
पयोधरेषु गन्धर्वः रजस्यग्निः प्रतिष्ठितः" इति वचनं

हि सोमस्य व्यञ्जनकाले पतित्वं पयोधरकाले गन्धर्वपतित्वं रजः-
काले अग्निपतित्वं च बोधयति। तत्र तृतीयपतेरग्ने रजःकाल एव
पतित्वे चतुर्थपतेस्तदुत्तरमेव पतित्वमर्थसिद्धमेवेति रजोऽनन्तर-
विवाहलिङ्गमेव तदिति मन्त्रलिङ्गविरोधो दुष्परिहर इति ऋतुमती-
विवाहोऽपि शास्त्रीय इत्येव भवति। यावता च ऋतुमतीविवाहो-
ऽपि शास्त्रीय इत्येतावता समावेशनादिमन्त्राणामपि स्वारस्यं सि-
द्धम्। एवञ्च मन्त्रलिङ्गाविरोधेनैव स्मृत्युपपत्तिवर्णनं युक्तमिति
तासामपि तच्छास्त्रीयतायामेव तात्पर्यम्। कन्याशब्दस्य अप्राप्त-
यौवनशक्तस्यापि अविवाहितापरत्वमपि गौण्या वृत्त्या उपपन्न-
मिति "अर्यमणं देवं कन्या अग्निमयक्षत" इत्यादिमन्त्राणामपि
न विरुद्धत्वम्। गौण्यां मानाभावेन शक्त्याश्रयणमेव युक्तमि-
त्याग्रहे तु "अग्निर्ज्योतिः ज्योतिः सूर्यः स्वाहा" इति मिश्रमन्त्रलि-
ङ्गेन देवताद्वयवदुभयविवाहोऽपि शास्त्रीय इत्यङ्गीक्रियताम्;
विनिगमनाविरहात्। एवं च समानबलमन्त्रलिङ्गद्वयमूलकयोः "नो-
रुन्ध्याद्रजस्वलाम्" 'त्रीणि वर्षाण्युदीक्षेत' इतिवचनयोरुभयोरपि
परस्परबाध्यबाधकभावायोगेन ग्रहणाग्रहणयोरिव विकल्प एव पर्य-
वसानम्। एवं 'सोमो वधूयुरश्विनौ तावुभौ वरा सूर्या पत्ये शं-
सन्तीं मनसा सविता ददात्। सकूतिमिद्रसच्युतिं जघनच्युतिं क-
नात् कामान्न आभर प्रयच्छयन्ति शत्रवौ' इत्यादिमन्त्राश्चात्र प्रमा-
णीभवन्तीति।

वयोनिर्णयकारास्तु—यद्यपि मन्त्रलिङ्गं प्रौढाविवाहसाधकमत्र
प्रसज्यते, तथापि मन्त्राणामर्थवादानाञ्च विध्येकवाक्यतयैव प्रामा-
ण्यमिति जैमिनीयसिद्धान्तानुसारेण प्रतीयमाने प्रमाणान्तरविरु-
द्धार्थे प्रामाण्यं न संभवतीति प्रत्यक्षचोदनारूपानेकस्मृतिबाधितः

रजस्वलाविवाहबोधने तात्पर्यमभ्युपगन्तुं न शक्यते। यद्यपि मन्त्रलिङ्गमपौरुषेयम्, स्मृतयस्तु पौरुषेयाः, तथापि 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्' इति बलाबलपर्यालोचनायां मन्त्रलिङ्गापेक्षया स्मृतिप्राबल्यमपि गम्यत इतिस्मृत्यनुसारेणैवार्थनिर्णयो युक्तः। नहि श्रुतिरित्येतावता तत्सर्वं प्रमाणम्, स्मृतिरित्येतावदप्रमाणम्; 'क्षुत आचामेत्' इति स्मृत्यापि 'वेदं कृत्वा वेदिं करोति' इतिश्रुतिबाधदर्शनात्। किंतु प्रमेयावगमसन्निकर्षविप्रकर्षाभ्यामेव प्रमाणस्य बलाबले। एवं चोक्तसूत्रे श्रुतिशब्देन श्रौतः स्मार्तो वा निरपेक्षतया बोधकः शब्द एव गृह्यत इति लिङ्गापेक्षया स्मृतिर्बलीयसीति सिद्धमेव लिङ्गविरोधेऽपि स्मार्तश्रुतेर्बलीयस्त्वादिति निबन्धकारवचनम्। 'वारुणी भिरादित्यमुपतिष्ठतु' इत्यत्र स्मृत्यापि मन्त्रलिङ्गबाधसिद्धान्तश्चात एवोपपन्नो भवति। यदि मन्त्रलिङ्गमेव स्मृत्यपेक्षया प्रबलमिति स्यात्, तदा 'उद्बुध्यस्वाग्ने' 'अग्निर्मूर्धा' इत्यादिमन्त्राणां अग्न्याद्याराधन एवाङ्गत्वापत्तिरिति बुधभौमादिग्रहाराधनविनियोगस्मृतीनामप्रामाण्यापत्तिः। विरोधाधिकरणे तु एकजातीयप्रमाणभूतयोरेव श्रुतिस्मृत्योर्बलाबलविचारः कृतः, न तु भिन्नजातीययोरपीति मन्त्रलिङ्गविरुद्धानामपि स्मृतीनामप्रामाण्ययोजने न तदधिकरणयोजने तात्पर्यम्। भिन्नजातीया श्रुतिः स्मृतिर्वा यतरा प्रमेयसन्निकृष्टा ततरैव बलीयसी। तदुक्तम्—

नैव तावत् श्रुतिस्मृत्योः स्वरूपेण विरुद्धता।
बलाबलपरीक्षा वा प्रमेयद्वारिका हि सा॥ इति॥

अनेन हि वचनेनार्थिकार्थपरश्रुत्यपेक्षया शाब्दप्रमेयपरस्मृतिप्राबल्यं 'क्षुत आचामेत्' इत्यादिस्मृतिविरुद्धानां 'वेदं कृत्वा वेदिं

करोति' इतिक्रमपरवचनानामप्रामाण्यबोधनार्थं निरूपितम्, तत्सो मान्यात् अत्रापि स्मृतिप्राबल्यवर्णनमेव युक्तम्। अपिच विधिना कर्मविशेषं प्रति विनियुक्ताः खलु मन्त्राः किञ्चदर्थं प्रकाशयितुमर्हन्ति नासति विनियोग इति कन्याविवाह विनियुक्तानामेतेषां कथञ्चिदपि लक्षणादिना कन्याप्रकाशकत्वमेवाङ्गीकरणीयमिति मन्त्रलिङ्गानामपि स्मृत्यविरोधेनैवोपपत्तिर्वर्णनीया।

अयमभिप्रायः—इदं कर्मानेन मन्त्रेण कार्यमिति कर्मविशेषे प्रमाणान्तरेणाङ्गत्वे गृहीते खलु तत्र लिङ्गेन कस्यचिदर्थस्यानुमानम्। लिङ्गेनैवाङ्गत्वस्य निर्णये तु परस्पराश्रयदोषः। अङ्गत्वग्राहकं च प्रमाणं स्मृतिरेवेति तदेवोपजीव्य लब्धात्मकं मन्त्रलिङ्गं कथमपि न तद्बाधकं स्यात्; उपजीव्यबाधस्यायुक्तत्वात्। लिङ्गस्वरूपसिद्धिश्च यावता स्मृत्यधीना, तावता मन्त्रलिङ्गमपि स्मार्तमेवेति समाने स्मार्तत्वे विधिस्त्वविरुद्धं लिङ्गमाभासीकरोति। युक्तं चैतत्। विध्युत्तरकालमेव मन्त्राणां प्रवृत्त्या विधिरुपक्रमस्थो मन्त्राश्च पाश्चात्त्या इति स्फुटं उपक्रमेण च प्रमाणेन दुर्बलेनापि बोधितमेवार्थं प्रबलमपि पाश्चात्यं प्रमाणं अनुसरति। उपपादितं चैतत् "वेदो वा प्रायदर्शनात्' इत्यादौ तृतीयाध्याये पूर्वतन्त्रे।

एवं च दुर्बलापि स्मृतिरेव वस्तुसाधिकेति विवाहमन्त्रलिङ्गानां कथमपि न रजस्वलाविवाहसाधकत्वम्। किञ्च कालान्तरभाविनमर्थमादायापि मन्त्रलिङ्गानि सावकाशानि भवितुमर्हन्ति। स्मृतीनां पुनर्लिङ्गबलबाध्यमानानां न कश्चिदन्योऽवकाशः शक्यः कल्पयितुमिति 'आनर्थक्यप्रतिहतानां विपरीतं बलाबलम्' इति न्यायेन स्मार्तैरपि विधिभिरेव श्रौतान्यपि लिङ्गानि अर्थान्तरवि-

क्षयतामापद्यन्त इति स्मृतिप्राबल्याङ्गीकरणमेव युक्तम्। स्मृतयो हि व्यवस्थितधर्माधर्मादिस्वरूपप्रतिपादनपरा इति न तदातनदेशकालाद्यानुगुण्येन कल्पिता इति हेतुदर्शनाच्चेति न्यायेनापि न तदप्रामाण्यशङ्कावसरः।

'श्रुतिं पश्यन्ति मुनयः स्मरन्ति च तथा स्मृतिम्।'

इति मनुवचनमप्यत्र प्रमाणम्। तासां सादित्वात् तत्प्रतिपादितोऽर्थोऽपि सादिरिति कल्पना न युक्तिसहा; ज्योतिष्टोमोऽनुष्ठेय इत्यस्मदादिवाक्यावगतज्योतिष्टोमादेरपि सादित्वापत्तेः। 'यद्यप्यर्थो नित्यः, या त्वसौ वर्णानुपूर्वी सा अनित्या' इति महाभाष्यवचनमप्यनुकूलम्। यद्यपि हेतुदर्शनाच्चेति सूत्रे स्मृतीनामप्यप्रामाण्यमुपपादितम्, तथापि न तत् मन्वादिस्मृतिविषयम्; वेदार्थं प्रत्यक्षीकृत्य तमेव शब्दान्तरेण प्रतिपादयतां महर्षिवर्याणां जितारिषड्वर्गाणां कामक्रोधादिदृष्टहेतुसम्भावनाया अपि असंभवात्।

'योऽवमन्येत ते तूभे हेतुशास्त्राश्रयान्नरः।
स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दकः॥ इति॥

मनुवचनञ्चास्माकमनुकूलम्। किञ्च कतिपयभ्रान्तजनदृष्टानि मन्त्रलिङ्गानि, स्मृतयः पुनः प्रामाणिकमूर्धन्यानेकमहर्षिजनप्रत्यक्षा इति स्मृतिप्राबल्यमेवाङ्गीकरणीयम्। किञ्च भवदुक्तवैवाहिकमन्त्रलिङ्गानि ऋषयो जानन्ति न वा? यदि जानन्ति कथमेते मन्त्रलिङ्गान्यमूदृशान्यर्थविशेषसाधकानि न गणयाम्बभूवुः? न खलु भवादृशेभ्यः हीनप्रज्ञास्ते इति विद्यमानमपि मन्त्रलिङ्गं स्मृतिविरोधादप्रमाणमेव तैर्गृहीतमिति मन्त्रलिङ्गानुसारेण रजस्वलाविवाहसाधनं न सम्भवत्येव।

अस्तु वा मन्त्रलिङ्गप्राबल्यम्, एवं चेदपि ऋतुमतीविवाहसाधनं मन्त्रलिङ्गं किमपि वेदे नोपलभ्यते। तनुसंसर्गप्रार्थनादीनां कन्यायामपि संभाव्यमानतया प्रौढालिङ्गत्वाभावात्।

यत्तु "सोमः प्रथमो विविदे गन्धर्वः" इति मन्त्रगतं मनुष्यचतुर्थपतित्वलिङ्गम्, तदपि न ऋतुमतीविवाहसाधने समर्थम्; अग्न्यनन्तरपतित्वबोधनमात्रेण अग्न्याधिपत्यकाल एव विवाह इति कल्पनायां "ऊदीर्ष्वातो विश्वावसो नमसेडामहे त्वा" इति मन्त्रलिङ्गविरोधो दुष्परिहरः। अनेन हि मन्त्रेण गन्धर्वाख्यद्वितीयपतिः स्तुतिनमस्क्रियापुरःसरं विवाहितां वधूं मम पत्नीं विहाय पितृगृहीतामन्यां कन्यां प्रति त्वया गन्तव्यमिति प्रार्थ्यते। तत्र यद्यग्न्याधिपत्यकाल एव विवाह इति स्यात्, तदा अग्निप्रार्थनमेव खलु कर्तव्यम्। ननु उक्तमन्त्रलिङ्गेन द्वादशादिवयस्काया अपि विवाहसिद्धावपि प्रथममन्त्रलिङ्गाबाधनात् तदनुसारेण ऋतुमतीविवाहोऽपि शास्त्रीय एवेति चेन्न; स्पष्टास्पष्टलिङ्गयोः स्पष्टलिङ्गानुसरणमेव युक्तमिति द्वितीयलिङ्गाश्रयणस्यैव युक्तत्वात्। न च प्रथमलिङ्गमपि स्पष्टमेवेति वाच्यम्, अस्मदादीनामिव सोमादीनां तरुणीभोगाद्यसम्भवेन 'व्यञ्जनेषु च जातेषु' इति वाक्यघटकस्य भुंक्ते इत्यस्य आत्मनेपदान्तस्यापि पालयतीत्यर्थकत्वाश्रयणेन सोमगन्धर्वाग्निपालयितृत्वबोधन एव तात्पर्येण व्यञ्जनादितः पूर्वमेव विवाहेपि तादृशलिङ्गोपपत्त्या स्पष्टत्वाभावात्। यदि तु भुङ्क्ते इत्यस्य अनुभवतीत्येवार्थस्वीकरण एवाग्रहः, तदा तु सत्कार्यवादानुसारेण अष्टमादिवयस्यपि व्यञ्जनादिसम्बन्धोपपादनसम्भवेन ऋतुमद्वयस एव ग्रहणमित्यसम्भवात् न स्पष्टलिङ्गत्वम्। विवाहाङ्गमन्त्रलिङ्गैरेव रजस्वलाविवाहासिद्धौ तदनङ्गमन्त्रलिङ्गैः प्रौ-

ढाप्रकाशनसमर्थैरपि न विवाह्यायाः ऋतुमतीत्वकल्पनं संभवदुक्तिकमिति मन्त्रलिङ्गानुसारेण तद्विवाहशास्त्रीयतावादः असङ्गत एवेति निर्णयन्ति ।

अन्ये तु—देवताधिकरणन्यायेन मन्त्राणामपि प्रतीयमानार्थप्रामाण्यमङ्गीकरणीयमेव। न च प्रमाणान्तराविरोध एव प्रतीयमानार्थप्रामाण्यम्, अन्यथा "आदित्यो यूपः" इत्यादिनामपि प्रामाण्यापत्तेः। एवं चात्र स्मृतिप्रमाणविरोधात् न प्रामाण्यमिति शङ्कनीयम्; प्रमाणान्तरपदे लौकिकप्रमाणस्यैव ग्रहणेन लौकिकप्रमाणविरुद्धार्थतात्पर्याभावेऽपि समानजातीयालौकिकप्रमाणस्य प्रथमतः प्रवृत्तिसम्भवेन भिन्नजातीयप्रमाणद्वयस्यापि प्रतीयमानार्थतात्पर्यकत्वेन विकल्पपर्यवसानेन उपपत्तिवर्णनस्य आवश्यकत्वात् अस्मदुक्तरीत्या समानजातीयमन्त्रलिङ्गद्वयमूलकस्मृतिद्वयविरोधेऽपि विकल्प एव पर्यवसानात्। अन्यथा "नातिरात्रे षोडशिनं गृह्णाति, अतिरात्रे षोडशिनं गृह्णाति" इति वाक्ययोरप्यप्रमाण्यापत्तेः।

अयमभिप्रायः—"आदित्यो यूपः" इत्यादिवाक्यानां यूपादिस्तुतिपराणां यूपे आदित्याभेदबोधनेऽपि तात्पर्याङ्गीकारप्रयोजनाभावात् वाक्यार्थबोधनतः पूर्वमेव प्रतीयमानप्रमाणान्तरविरोधात् न स्वार्थे प्रामाण्यमिति युक्तम्। मन्त्रलिङ्गाधिगतानां प्रौढात्वादीनां तु न केनापि प्रमाणेन विरोधः। स्मृत्यादीनां पौरुषेयाणामपि अपौरुषेयवेदमूलकत्वेन प्रमाणानां मन्त्रलिङ्गप्रमाणप्रवृत्तितः पूर्वमेव प्रवृत्तिरिति वर्णनासम्भवात्। सम्भवेऽपि मन्त्रलिङ्गप्रवृत्तितः पूर्वं तद्विरोधबुद्ध्यनुदयेन प्रतीयमानार्थप्रामाण्योपपादने न दोषात्। यत्र प्रवृत्तयोः प्रमाणयोः परस्परविरोधः तत्र विकल्प एव

पर्यवसानम्, यथा विधिनिषेधस्थले। एवं च मन्त्राणां स्मृतिविरुद्धानामपि स्वार्थप्रामाण्याङ्गीकार आवश्यक एव। न चैवमपि मन्त्रलिङ्गापेक्षया स्मृतीनां प्रबलत्वात् तद्विरोधेन मन्त्रलिङ्गप्रमाणं न प्रवर्तत इति वाच्यम्; अष्टकादिस्मृतीनां मन्त्रलिङ्गार्थवादादिमूलकत्वेनैव प्रामाण्यमिति स्मृत्यधिकरणन्यायेन मन्त्रलिङ्गापेक्षया स्मृतिदौर्बल्यस्य साधितत्वात्। मन्त्राणां पदैकवाक्यतया वा वाक्यैकवाक्यतया वा विध्यनन्वयस्य मन्त्राधिकरणे खण्डदेवैरुपपादितत्वेन विध्येकवाक्यतयैव अन्वयवर्णनस्यासङ्गतत्वात्। श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानामिति सूत्रेण त्वङ्गत्वप्रमाणानामेव निर्देशः, न धर्मत्वप्रमाणानामित्युक्तसूत्रे श्रुतिशब्देन स्मृतिग्रहणेऽपि न धर्मप्रमाणमन्त्रलिङ्गबाधः समुचितः। अन्यथा मन्त्रलिङ्गादिसिद्धाष्टकादिस्मृतीनां बौद्धादिपरिकल्पितनिषेधस्मृतीनां च तुल्यवत् प्रामाण्यापत्तिः स्मृतित्वाविशेषात्। दुर्बलमन्त्रलिङ्गसाचिव्यमात्रेण त्वष्टकादिस्मृतिप्राबल्यवर्णनं न संभवतीति शिष्टाचारप्रामाण्ये स्पष्टमेवोपपादितम्। न च बौद्धपरिकल्पितवचनानां स्मृतित्वमेव नास्तीति भ्रमितव्यम्। तेषामपि हेतुदर्शनाच्चेतिसूत्रे स्मृतित्वेन भट्टपादैः व्यवहारात्।

एतेन—लिङ्गविरोधेऽपि स्मार्तश्रुतेर्बलीयस्त्वादिति वचनमपि व्याख्यातं भवति; तस्यापि धर्मत्वाविषयकत्वात्। न च श्रुतिलिङ्गेतिसूत्रेऽङ्गत्वप्रमाणस्यैव निर्देश इति संकोचे प्रमाणाभावात् धर्मत्वप्रमाणस्यापि ग्रहणमित्येवाङ्गीक्रियतामिति वाच्यम्; तत्र श्रुतिशब्देन तृतीयादिकारकविभक्तेरेव ग्रहणेन तस्या अङ्गत्वमात्रग्राहकत्वात्। अङ्गत्वं हि नाम परोद्देशप्रवृत्तकृतिकारकत्वेन विधिविषयत्वम्। परोद्देशप्रवृत्तकृतेर्विधिविषयत्वस्य

चान्यलभ्यत्वात् कारकत्वलाभं विना नात्मानं लभत इति तृतीयाश्रिश्रुतेरेव तत्स्वरूपबोधकतेति युक्तम्। धर्मत्वन्तु वेदबोधितालौकिकश्रेयःसाधनत्वरूपं न तृतीयादिविभक्तिसमधिगम्यमिति श्रुतिलिङ्गेतिसूत्रे धर्मप्रमाणस्यापि निर्देश इति कल्पना न संभवत्येव। एवं च मन्त्रार्थवादसाधारणश्रुतिबोधितत्वमात्रेणैव तद्बोधसंभवात् मन्त्रलिङ्गादीनामपि धर्मत्वविषये निरपेक्षप्रमाणत्वमेव युक्तम्। भट्टपादैरपि—"चोदनालक्षणोऽर्थो धर्मः" इति सूत्रे चोदनापदेन मन्त्रार्थवादसाधारणवेद एव विवक्ष्यते, न विधिवाक्यमात्रमिति व्यवस्थापयद्भिरयमर्थोऽनुगृहीत इति मन्त्रलिङ्गस्मृत्योर्मन्त्रलिङ्गमेव प्रबलमित्येवाङ्गीकरणीयम्। एवञ्च मन्त्रलिङ्गविरुद्धानां स्मृतीनामेवाप्रामाण्यं विरोधाधिकरणन्यायेन सिद्ध्यतीति तेन न्यायेन मन्त्रलिङ्गाप्रामाण्यवर्णनमसंभवदुक्तिकमेव। एवं धर्मत्वप्रमाणविषयेऽपि विध्यपेक्षया मन्त्रलिङ्गानां विप्रकर्षाभावात् श्रौतविध्यपेक्षयापि मन्त्रलिङ्गदौर्बल्यं न संभवतीति स्थितेस्तदपेक्षप्रमाणभावानां स्मृतीनां कथं मन्त्रलिङ्गबाधकत्वमिति भवन्त एव विवेचयन्तु।

एवं च "नैव तावत्स्वरूपेण श्रुतिस्मृत्योर्विरुद्धता। बलाबलपरीक्षा वा प्रमेयद्वारिका हि सा" इति वचनेनापि न विरोध इति सूचितम्। एतेन—एकजातीयप्रमाणभूतयोः श्रुतिस्मृत्योरेव विषये विरोधाधिकरणन्यायविरोधप्रसरः; मन्त्रलिङ्गस्मृत्योस्तु भिन्नजातीयत्वात् न तत्रापि विषये तादृशन्यायप्रसर इति मन्त्रलिङ्गविरुद्धस्मृत्या अप्रामाण्यवर्णनं न युक्तमिति वचनमपि परास्तम्। तथाहि—किमिदं समानजातीयत्वं भिन्नजातीयत्वं वा? तत्र न तावत् श्रुतिलिङ्गसूत्रघटके

कश्रुतिशब्दसमधिगम्यत्वं भिन्नशब्दसमधिगम्यत्वं भिन्नजातीयत्वम्। एवञ्च विध्यात्मकवेदभागानां तादृशस्मृतीनां च एकश्रुतिशब्दसमधिगम्यत्वात् समानजातीयत्वम्, मन्त्रलिङ्गस्मृत्योस्तु भिन्नशब्दसमधिगम्यत्वात् भिन्नजातीयत्वमिति वर्णनं संभवति। उक्तरीत्या उक्तसूत्रे धर्मप्रमाणनिर्देशासम्भवेन उक्तसमानजातीयत्वस्य धर्मप्रमाणप्राबल्यदौर्बल्यनिर्णयानुपयोगित्वात्। नापि समप्राबल्यरूपं विषमप्राबल्यरूपं वा तत्। श्रुतिस्मृत्योः समप्राबल्यभावस्यासंभवात्। श्रुतित्वेनैव श्रुतीनां प्राबल्येन मन्त्राणामपि श्रुतित्वाविशेषात् तद्विरुद्धस्मृत्यप्रामाण्यबोधनेऽप्युक्ताधिकरणतात्पर्यमङ्गीकरणीयमेव। "वेदं कृत्वा वेदिं करोती" त्यत्र तु क्त्वाप्रत्ययेनानन्तर्यमात्रं बोधितम्, विधिना कर्मविशेषं प्रति विनियुक्ताः खलु मन्त्राः कञ्चिदर्थं प्रकाशयितुं अर्हन्ति नासति विनियोगे इति सत्यं विनियोजकस्मृत्यनुसारेणैव मन्त्रलिङ्गान्यथानयनं युक्तम्। यथा "उद्बुध्यस्वाग्ने" इत्यादिमन्त्राणां बुधभौमादिग्रहाराधने विनियोगानुसारेण कथञ्चिदपि बुधादिपरत्वाश्रयणम्, विनियोजिका च श्रुतिः श्रौतीव स्मार्तापीति न विशेष इति च। तथापि "नोपरुन्ध्याद्रजस्वलाम्" इत्यादिस्मृतिभिरारोहोरुमित्यादिमन्त्रविनियोजनाभावात् उक्तस्मृतीनामयमभिप्रायः—श्रुतिलिङ्गाधिकरणेन हि स्वाश्रयविनियोजकत्वविरुद्धश्रुत्यपेक्षया मन्त्रलिङ्गदौर्बल्यमेव बोध्यते, न तु श्रुतित्वेन श्रुतीनां मन्त्रलिङ्गत्वेन मन्त्रलिङ्गानाञ्च प्राबल्यदौर्बल्ये।

एतेन—"वारुणीभिरादित्यमुपतिष्ठते" इति स्मृतिग्राह्यत्वेऽपि लिङ्गस्य नात्र विरोध इति सूचितम्। लिङ्गविरोधेऽपि स्मार्तश्रुतेर्बलीयस्त्वादिति निबन्धवचनस्याप्ययमेवाभिप्रायः। आरो-

होरुमित्यादिमन्त्राणान्तु विवाहाङ्गकर्माङ्गतया विनियोगेऽपि कन्याविवाहाङ्गतया विनियोगाभावात् कन्याप्रकाशकत्वमेव कथञ्चिदप्याश्रयणीयमिति वचनमपि न सम्भवति। न च स्मृतिप्रमाणेन कन्याविवाह एव शास्त्रीय इति सिद्धौ तद्विवाहाङ्गतायामेव पर्यवसनात् कन्याप्रकाशकत्वमेवाङ्गीकरणीयमिति वाच्यम्; उक्तमन्त्रलिङ्गविरोधे स्मृतेरप्रमाणत्वेन कन्याविवाहस्यैवासिद्धेः। "अर्यमणन्तु देवं कन्या अग्निमयक्षत" इति मन्त्रलिङ्गेन कन्याविवाहसिद्धौ "आरोहोरुम्" इत्यादिमन्त्रलिङ्गेन रजस्वलाविवाहोऽपि सिद्ध्यतीति न किञ्चिदनुपपन्नं नाम।

वस्तुतस्तु स्मृतीनामपि रजोऽनन्तरविवाहाधर्मताबोधने न तात्पर्यमिति पूर्वमुपपादितत्वात् स्मृतिबाधं विनापि तद्विवाहसिद्धौ न कोऽपि दोषः समापतति। रजस्वलाविवाहनिषेधपरत्वमेव युक्तमिति कल्पना तु न सम्भवति। मन्त्रलिङ्गविरुद्धानामप्रामाण्यादन्यथानयनमेव युक्तम्। उपजीव्यानुरोधेनोपजीवकान्यथानयनम्, न तूपजीवकानुसारेणोपजीव्यान्यथानयनम्। मन्त्रलिङ्गं च स्वाश्रयमन्त्राणां यत्किञ्चिन्निरूपिताङ्गत्वग्रहणानन्तरमेव स्वात्मानं लभते इत्यङ्गत्वग्रहणस्य स्मृत्यधीनत्वात् स्मृतिप्राबल्यमेव युक्तम्, लिङ्गेनैवाङ्गत्वस्यापि ग्रहणे तु परस्पराश्रयदोष इत्यपि न शङ्कनीयम्; सामान्यसम्बन्धबोधकप्रकरणादिसचिवस्य लिङ्गस्याप्यङ्गत्वग्राहकप्रमाणकोटौ निर्देशेनाङ्गत्वग्रहणानन्तरमेव लिङ्गस्वरूपसिद्धिरितिवचनस्यातिफल्गुत्वात्। तेनैव चाङ्गत्वनिर्णयसम्भवे स्मृत्युपजीव्यत्ववादासाङ्गत्यात्। उपजीव्यत्वेऽपि यादृशांशयोरुपजीव्योपजीवकभावः, तत्रैवोपजीव्येनोपजीवकबाधः, न त्वंशान्तरेऽपि, प्रत्यक्षोपजीव्यत्वेऽपि आगमस्य प्रत्यक्षबाधकत्वा-

ङ्गीकारात्। स्पष्टतरं चैतत् भामत्यद्वैतसिद्ध्यादौ। एवं च वयोनिर्णयांशे स्मृत्युपजीव्यत्वाभावात् स्मृतिविरोधेन वयोनिर्णयेऽपि नोक्तन्यायप्रसरः। यदप्यर्धजरतीयन्यायापादनम्, तदप्यज्ञानविजृम्भितमेव। यथा हि—अलाब्वर्धांशभक्षणेऽपि तद्भक्षणनिषेधशास्त्रोल्लङ्घनं सिद्धम्, नैवं वयोनिर्णयांशबाधेऽङ्गत्वांशबाधादिकमिति वैषम्यात्। अभ्युपेत्यापि स्मृत्युपजीव्यत्वमेवं वर्णितम्।

वस्तुतस्तु—स्मृत्युपजीव्यत्वमेव मन्त्रलिङ्गानां न संभवति। तथाहि—किमिदमुपजीव्यत्वं प्रामाण्यांशे, उत उत्पत्त्यंशे? नाद्यः; मन्त्राणां स्वतःप्रमाणत्वात्। न द्वितीयः; मन्त्रनित्यत्वेन तल्लिङ्गस्यापि नित्यत्वात्। मन्त्राधिकरणपर्यालोचनायां तु स्मृत्युपजीव्यत्वमेव मन्त्रलिङ्गानामिति पूर्वमुपपादितत्वात् यत्किञ्चिदेतत्। यदपि चोक्तम्—विध्युत्तरकालमेव मन्त्राणां प्रवृत्त्योपक्रमस्थत्वेन विधिप्राबल्यमिति। तत्र प्रतिब्रूमः—अस्पष्टमन्त्रलिङ्गापेक्षया तद्विरुद्धस्पष्टविधिवाक्यप्राबल्याङ्गीकारेऽपि न क्षतिः। विधिशब्देन च श्रौतविधिरेव गृह्यते युक्तत्वात्। न तु स्मार्तविधिरपि। एवञ्च विधिप्राबल्याङ्गीकारेऽपि स्मृतिबाधोपपादनं भविष्यत्येव। यद्यपि इषेत्वेति मन्त्रप्रवृत्त्यनन्तरमपि "इषेत्वेति शाखामाच्छिनत्ति" इति ब्राह्मणप्रवृत्तेर्दर्शनात् विध्युत्तरकालमेव मन्त्राणां प्रवृत्तिरिति न नियमः संभवति, यद्यपि चोपक्रमस्थत्वमात्रेण प्राबल्यमपि न भविष्यति; उपक्रमगतानामपि "इदं रजतम्" इत्यादीनां उपसंहारगतेन "नेदं रजत" मिति बाधज्ञानेन बाधदर्शनात्। यदि पुनरन्योन्यसापेक्षाणामर्थवादविधीनां परस्परविरुद्धानामुपक्रमोपसंहारगतानां सतां किमनुरुध्य कस्य नयनमिति शङ्कायां उपक्रमगतमप्यर्थवादमनुसृत्यैव प्रधानस्यापि विधेर्नयनमित्येव तादृशन्या-

यशरीरम्, भ्रमबाधज्ञानयोस्तु उत्पत्तौ प्रवृत्तौ वा परस्परनिरपेक्षत्वात् नोपक्रमगतेनापि भ्रमेण बाधज्ञानबाध इति युक्तम्। विधिमन्त्रयोस्तु परस्परसापेक्षतयैव प्रवृत्तेरुपक्रमगतविधिप्राबल्यवादो युक्त एवेत्युच्यते। तत्रेदं प्रष्टव्यम्—मन्त्राणां परस्परापेक्षत्वं किं प्रमाणसिद्धम्, उताहो स्वकपोलकल्पितम्? तत्र न तावत् प्रथमः कल्पः संभवति, मन्त्राणां पदैकवाक्यतया वा वाक्यैकवाक्यतया विध्यर्थबोधकत्वेन प्रामाण्याभावस्य मन्त्राधिकरणे खण्डदेवैरुपपादितत्वात्। अन्यथाऽर्थवादाधिकारणेनैव गतार्थत्वात् मन्त्राधिकरणं वितथं प्रसज्येत। न द्वितीयः; अप्रामाणिकभवदीयकल्पनाया अकिञ्चित्करत्वात्। एवञ्च विधिमन्त्रयोर्भ्रमबाधज्ञानयोरिव परस्परापेक्षत्वं नास्त्येवेति नोक्ताधिकरणप्रसक्तिः। किन्तु "पूर्वात्परबलीयस्त्वं तत्र नाम प्रतीयताम्। अन्योन्यनिरपेक्षाणां यत्र जन्म धियां भवेत्" "पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्" इति वचनानुसारेणापच्छेदाधिकरणन्यायेनोत्तरकालप्रवृत्तिकानां मन्त्राणामेव प्राबल्यं स्यादित्युपक्रमोपसंहारन्यायसंचारादिकं गाढाज्ञानविजृम्भितमेव।

एवं चोपक्रमस्थत्वमात्रेण प्राबल्यनिरूपणमपि न संभवत्येव। तथाप्यभ्युपेत्याप्युपक्रमस्थत्वं तत्प्रयुक्तप्राबल्यं च स्मृतिप्राबल्यखण्डनार्थमेव युक्तमिति न कथञ्चिदपि मन्त्रालिङ्गाप्रामाण्यशंकावसरः। यदप्युक्तम्—मन्त्राणां भाविरजस्वलात्वबोधनेनापि चारितार्थ्यादचरितार्थानामपि स्मृतीनामेव वाऽनर्थक्यप्रतिहतानां विपरीतं बलाबलमितिन्यायेन न प्राबल्यमिति। तदपि न सङ्गतम्। प्रयोगसमवेतार्थस्मारकत्वेन खलु मन्त्राणां चारितार्थ्यम्। न तु संभवदर्थप्रकाशकत्वमात्रेणेति रजस्वलाया विवाहसम्बन्धबोधनं विना मन्त्रचारितार्थ्यबोधनासंभवात् मन्त्राणामपि चारितार्थ्याभा-

वात्। अन्यथा स्मृतीनामपि पूर्वकालिकाष्टवर्षत्वबोधनेन चारितार्थ्यसंभवादिति मन्त्रलिङ्गप्राबल्यमेव पर्यवस्यति। एवञ्च व्यवस्थितधर्माधर्मविषयकाणामपि स्मृतीनां तदातनदेशकालाद्यानुगुण्येन कल्पितत्वशङ्काया अप्रसरेण हेतुदर्शनाच्चेति सूत्रेणाप्रामाण्यवर्णनायोगेऽपि विरोधाधिकरणन्यायेन अप्रामाण्यवर्णनं संभवत्येव।

ननु मन्वादिस्मृतीनां वैदिकार्थविषयकत्वमेव नियतम्; "श्रुतिं पश्यन्ति मुनयः" इत्युक्तवचनानुरोधात्। एवञ्च मन्त्रलिङ्गविरुद्धानामपि तासां प्रामाण्यमङ्गीकरणीयमेवेति चेत्, ननु भोः; किं मूलप्रमाणाप्रत्यक्षेऽपि तत्प्रामाण्याङ्गीकरणमभिप्रेतम्, उताहो तत्प्रत्यक्ष एव वा ? नाद्यः; प्रत्यक्षमन्त्रलिङ्गविरोधे मूलश्रुत्यनुमानासंभवेन विरोधाधिकरणन्यायेनाप्रामाण्यस्यैवाङ्गीकरणीयत्वात्, "वैसर्जनहोमीयं वासोऽध्वर्युर्गृह्णाति" इति स्मृतेरप्यप्रामाण्यस्य व्यवस्थापितत्वात्। न द्वितीयः; इष्टापत्तेः। एवं च समावेशनादिमन्त्रलिङ्गविरुद्धस्मृतिमूलप्रामाण्यस्याप्रत्यक्षत्वेन न रजस्वलाविवाहनिषेधपराणां वचनानामुपपत्तिर्भविष्यतीति रजस्वलाविवाहः शास्त्रीय इत्येवाङ्गीकरणीयम्।

यदप्युक्तम्—कतिपयभ्रान्तजनदृष्टानि मन्त्रलिङ्गानि, स्मृतयस्तु प्रामाणिकमूर्धन्यानेकमहर्षिप्रत्यक्षा इति। तदपि न युक्तम्; उक्तमन्त्रलिङ्गानामपि तत्प्रत्यक्षत्वात्। अत एव हि ते "त्रीणि वर्षाण्यृतुमती" इत्यादिवचनैः स्पष्टमेव रजस्वलानामपि विवाहमनुजानते। यदि तूक्तजातीयवचनानां ऋतुमतीविवाहपरत्वं नास्तीति पूर्वमेवोपपादितमिति तदप्रत्यक्षाण्येव इमानि मन्त्रलिङ्गानीति कथ्यते, तदा कामं भवन्त्वप्रत्यक्षाणि लिङ्गानीति। न हि

तावता विद्यमानमपि मन्त्रलिङ्गमविद्यमानं सम्पद्येत। यदि महर्षिजनप्रत्यक्षं लिङ्गं किमपि नास्तीति कथ्यते, तर्हि उक्तलिङ्गमपि तत्प्रत्यक्षमित्यास्ताम्। प्रत्यक्षं चापि लिङ्गं साहसादिना ते न निर्दिशन्तीति वदामः। यथाहि "औदुम्बरीं स्पृष्ट्वोद्गायेत्" इति प्रत्यक्षामपि श्रुतिमनादृत्य तद्विरुद्धामेव काञ्चन स्मृतिं "औदुम्बरी सर्वा वेष्टयितव्या" इतिरूपामस्मार्षुः। एवम्। एतेन—भवदुदाहृतवैवाहिकमन्त्रानृषयो जानन्ति वा न वा? यदि जानन्ति, कथमेते लिङ्गवचनान्यमूदृशान्यर्थविशेषसाधकानि न गणयाम्बभूवुः? न खलु भवादृशेभ्यो हीनप्रज्ञास्ते इत्यादिवचनमपि परास्तम्। "औदुम्बरी सर्वा वेष्टयितव्या" इति स्मृतिकारा अपि "औदुम्बरीं स्पृष्ट्वोद्गायेत्" इति श्रुतिं जानते वा न वा? यदि जानते, कुतस्ते न गणयाम्बभूवुः? न खलु शबराचार्यादिभ्यो हीनप्रज्ञास्ते, इति पर्यनुयोगस्य भवतामपि विषये समापत्तेरिति कथञ्चिदपि मन्त्रलिङ्गाप्रामाण्यवर्णनं न सम्भविष्यतीति मन्तव्यम्। उपपादितं चैतत् शिवार्कमणिदीपिकायां दीक्षितवर्यैरिति तत एव द्रष्टव्यम्। श्रुतप्रकाशिकाकारकुमारिलभट्टाचार्यैश्चायमर्थोऽपि विशेषत उपपादितः। यावता च मन्त्रलिङ्गप्रामाण्यसिद्धिः, तावता समावेशनादिमन्त्रलिङ्गेन ऋतुमतीविवाहशास्त्रीयतापि सिद्धा भवति। यदि तु कन्यायामपि गौणसमावेशनादिसंभवात् न तत्प्रौढालिङ्गमित्युच्यते, तर्हि सोमः प्रथममिति मन्त्रलिङ्गं तादृशमास्ताम्। ननु तदपि न प्रौढालिङ्गं भवतीति पूर्वमुपपादितमिति चेत्, सत्यमुपपादितम्, उपपन्नन्तु न भवति। तथाहि—न वयमग्न्याधिपत्यकाल एव विवाह इति वदामः, किन्तु तदापि विवाहः शास्त्रीय इति। तत्र "उदीर्ष्वात" इति

मन्त्रलिङ्गवशेन द्वादशादिवयस्काविवाहवत् उक्तमन्त्रलिङ्गवशेन ऋतुमतीविवाहोऽपि शास्त्रीय इति वदामः। न च "व्यञ्जनेषु च जातेषु" इत्यत्र भुङ्क्तेपदस्य रक्षतीत्यर्थकत्वेन कन्याविषयकत्व-मपि संभवतीति "सोमः प्रथमः" इति मन्त्रलिङ्गं न स्पष्टमिति वाच्यम्; भुङ्क्ते इत्यात्मनेपदान्तस्य "भुजोऽनवने" इति पाणि-नीयसूत्रेण रक्षणार्थे आत्मनेपदनिषेधात् अनुभवतीत्यर्थकत्वाश्रय-णस्यैव युक्तत्वात्। लक्षणया तदुपपादने—

"पूर्वं स्त्रियः सुरैर्भुक्ताः सोमगन्धर्ववह्निभिः।
भुज्यन्ते मानुषैः पश्चात् न ता दुष्यन्ति कर्हिचित्।"

इति वचनविरोधो दुष्परिहरः। न हि रक्षणरूपेण भोगेन कोऽपि दोषः कन्यायां प्रसज्यते।

"व्यञ्जनैस्तु समुत्पन्नैः" इति व्यञ्जनादीनामेव भोगकलाप-त्वेन स्मरणादुपभोगोऽपि संभवदुक्तिक एव। सत्कार्यवादानुरोधेन भाविकायामपि तदनुभवसमर्थनन्तु—

"व्यञ्जनेषु च जातेषु सोमो भुङ्क्ते च कन्यकाम्।
पयोधरेषु गन्धर्वो रजस्यग्निः प्रतिष्ठितः॥"

इति वचनगतक्रमबाधापत्त्याऽसङ्गतम्। तत्र मते उत्पत्तेरेवा-भिव्यक्तिरूपत्वेन जातेष्वित्युत्पत्तिकालावच्छेदेनैव अनुभवितृत्व-बोधनात् तस्य च कन्याया असंभवात् प्रौढालिङ्गमेव तदिति पश्यामः। "इयमेव सा प्रथमा व्यौच्छदन्तरस्यां चरति प्रविष्टा वधूर्जजान" इत्यादिमन्त्रास्तु विवाहाङ्गभूता अपि इतिहासरूपाः सन्तो रजस्वलाविवाहे प्रमाणीभवन्तीति सर्वविधमन्त्रलिङ्गान्यपि रजोऽनन्तरविवाहे प्रमाणमिति—वर्णयन्ति। विवाहकालविमर्श-काराणामपि पर्यवसिताशयोऽयमेवेति जानीमः।

परे तु—सत्यम्, मन्त्रलिङ्गापेक्षया स्मृतिरप्रमाणम्, तावतापि ऋतुमतीविवाहसिद्धिः परं न भविष्यति। मन्त्राणां हि यदङ्गत्वं यत्र क्लृप्तम्, तत्स्मारकत्वमात्रेण तत्र चारितार्थ्यात् अर्थान्तरधर्मादिबोधनेऽपि न सामर्थ्यम्। मन्त्रार्थत्वव्यापकं न धर्मत्वप्रयोगसमवेतत्वादिकम्, किन्तु तत्समानाधिकरणं तदित्येव सिद्धान्तात्। यत्र पुनः प्रकरणप्रमाणेनाग्निहोत्रहोमाङ्गत्वमात्रं निश्चितम्, प्रकाशनीयार्थस्तु न निश्चितः, तत्रापेक्षिताग्न्यादिधर्मत्वादिबोधनेनैव मन्त्रचारितार्थ्यमिति मन्त्रलिङ्गवशेनैवाग्न्यादिनिर्णयः। एवञ्च पाणिग्रहणसमावेशनादिमन्त्राणां क्लृप्ताङ्गभावे पाणिग्रहणसमावेशनादिस्मारकत्वेनैव सामर्थ्योपक्षयात् न प्रौढाधर्मत्वबोधनेऽपि व्यापारः। यथाहि—निर्वपामि इत्यादिभिस्त्रिपदैरेव प्रयोगसमवेतार्थस्मरणे सम्भवत्यपि देवस्यत्वेत्यादिपदसमुदायवत् निर्वपामीत्यादिपदोपस्थापितनिर्वापस्मरणेनैवादृष्टसिद्धिः। एवत्रापि सुप्रजास्त्वायेत्यादिपदसमुदायविशिष्टेन "पाणिं गृह्णामि ते" इत्यादिना तत्स्मरण एवादृष्टसिद्धिरिति। किञ्च मन्त्रप्रकाश्यमानानामर्थानां कन्यास्वपि संभवान् न किमपि प्रौढालिङ्गमुपपद्यत इत्यपि वक्तुं शक्यते। यत्तूक्तम्—"सोमः प्रथमो विविदे" इति मन्त्रेण बोध्यमानं मनुष्यचतुर्थकत्वं प्रौढाविवाहशास्त्रीयतायां गमकमिति। तत्र प्रतिब्रूमः—सोमस्य प्रथमपतित्वं गन्धर्वस्य द्वितीयपतित्वं वन्हेस्तृतीयपतित्वं च किं विवाहसम्बन्धिप्रथमद्वितीयतृतीयादिदिनविषयकत्वेनाभिप्रेतम्, उताहो व्यञ्जनेष्विति वचनानुसारेण व्यञ्जनोत्तरकालं सोमपतित्वं तदुत्तरकालं पयोधरोत्तरकालं गन्धर्वपतित्वं तदुत्तररजोऽनन्तरकालं वन्हिपतित्वं तदनन्तरविवाहोत्तरकालं मनुष्यपतित्वमिति विवेचनीयम्? आद्येऽपि

प्रथमदिने व्यञ्जनोत्पत्तिः, द्वितीयदिने पयोधरोत्पत्तिः, तृतीयदिने रजोधर्मोत्पत्तिरिति विवक्षितं वा न वा ? नाद्ये प्रथमः—एकैक-दिनात्ययमात्रेण पयोधरादीनामुत्पत्त्यसंभवात्। नाद्ये द्वितीयः ;

"व्यञ्जनेषु च जातेषु सोमो भुङ्क्तेऽथ कन्यकाम्।"

इतिवचनविरोधात् कन्याऽविवाह एव पर्यवसानाच्च। न द्वितीयः;—

व्यञ्जनैस्तु समुत्पन्नैः सोमो भुञ्जीत कन्यकाम्।
पयोधरैस्तु गन्धर्वो रजसाऽग्निः प्रतिष्ठितः॥
तस्माद्व्यञ्जनोपेतामरजामपयोधराम्।
अभुक्तां चैव सोमाद्यैः कन्यकां तु प्रशस्यते।

इति गृह्यसंग्रहकारवचनविरोधात्। अनेन हि वचनेन व्यञ्जनोत्पत्तिपूर्वमेव अविवाहितासम्बन्धिसोमाद्यनुभवस्य दोषत्वसंकीर्तनपूर्वकं व्यञ्जनोत्पत्तितः पूर्वमेव विवाहः शास्त्रीय इति प्रतिपाद्यते। न च "तस्माद्व्यञ्जनोपेताम्" इति वचनस्य "व्यञ्जनैस्तु समुत्पन्नैः" इतिगृह्यसंग्रहवाक्यशेषत्वेऽपि 'व्यञ्जनेषु च जातेषु' इति संवर्तवाक्यशेषत्वाभावात् उक्तार्थतात्पर्यकल्पनं न संभवतीति वाच्यम्, शाखान्तरीयवाक्यशेषानुसारेण शाखान्तरीयवाक्यार्थनिर्णय इति 'बृहस्पतेर्वा एतदन्नं यन्नीवाराः" इतिवाक्यस्य यागविधिपरत्ववर्णनावसरे खण्डदेवैरुपपादितत्वेनोक्ततात्पर्यकल्पनस्य तत्र युक्तत्वात्।

एतेन—"पूर्वं स्त्रियः सुरैर्भुक्ताः सोमगन्धर्ववह्निभिः।
भुज्यन्ते मानुषैः पश्चात् न ता दुष्यन्ति कर्हिचित्"

इति वचनमपि व्याख्यातं भवति। विवाहितानान्तु स्त्रीणां व्यञ्जनादिकालावच्छेदेन सोमाद्यनुभवस्य शास्त्रप्रामाण्येनादोष-

त्वेऽपि अविवाहितानां तदनुभवस्य दोषत्वादिति। अयमाशयः— द्विविधं हि पतित्वं स्वामित्वलक्षणमनुभवितृलक्षणञ्च, प्रथमं तु पतित्वं पूर्वं व्यञ्जनादितः, द्वितीयं तु व्यञ्जनकाले सोमस्य, पयोधरकाले गन्धर्वस्य, द्वादशादिवर्षसि रजःकाले तु वन्हेः; ऋतुस्नानानन्तरं तु मनुष्यस्येति विवेकः। न चोक्तविधद्विविधपतित्वे प्रमाणाभाव इति शङ्कनीयम्; 'सोमः प्रथमो विविदे' इति 'सोमोऽददत् गन्धर्वाय' इति च मन्त्रद्वयाम्नानस्यैव प्रमाणत्वात्। एवं च—

'विवाहो ह्यष्टवर्षायाः कन्यायाश्च प्रशस्यते।'

इत्यादिस्मृतयः प्रथममन्त्रार्थानुवादिकाः।

'व्यञ्जनेषु च जातेषु सोमो भुञ्जीत कन्यकाम्'

इति वचनं द्वितीयमन्त्रार्थानुवादकमिति न कोऽपि दोषः। एतेन—

तासां सोमोऽददच्छौचं गन्धर्वः शिक्षिताङ्गिरम्।
अग्निश्च सर्वभक्षत्वं तस्मान्निष्कल्मषाः स्त्रियः॥

इति वचनमपि व्याख्यातं भवति। न च 'षडब्दमध्ये नोद्वाह्या' इति वचनशेषत्वेन विवाहतः पूर्वमेव प्रथमद्वितीयतृतीयवत्सरद्वयेन सोमाद्यनुभवस्य प्रतिपादनात् तद्वचनविरोध इति शङ्कनीयम्, उपनयनस्थानीयस्य विवाहस्य गर्भाष्टमतः पूर्वमप्रसक्तत्वात् 'नान्तरीक्षेऽग्निश्चेतव्यः' इतिवदुक्तवचनस्यार्थवादत्वेन स्वार्थाप्रामाण्यात्, व्यञ्जनकालावच्छेदेन तु विवाहस्यातिदेशतः प्राप्तेः। तस्माद्व्यञ्जनोपेतामिति वचनं तु तदर्थमेवेति युक्तम्। 'व्यञ्जनेषु च जाते' ष्वित्यस्य तु हेतुमन्निगदार्थवादस्यापि स्वार्थे प्रामाण्यमपि देवताधिकरणन्यायेन युक्तमेव। तस्यापि स्वार्था-

प्रामाण्यकल्पनायामपि नास्माकं क्षतिरित्यन्यत्र विस्तरः। सर्वथापि तु नोक्तलिङ्गमृतुमतीविवाहगमकम्। अत एव 'नाजातलोम्न्या सह संविशेत' इति वचनमपि सार्थकं भवति। यदि व्यञ्जनोत्पत्त्यनन्तरमेव विवाह इति स्यात्, तदा व्यञ्जनोत्पत्तितः पूर्वं भार्यात्वस्यैवासंपन्नत्वात् 'नाभार्यामुपगच्छेत्' इति वचनेनैव अनुपगमनस्य सिद्धत्वेन वितथमेव तत्संपद्येत। व्यञ्जनोत्पत्तितः पूर्वमेव विवाह इत्यङ्गीकारे तु सार्थक्यसम्भव इति तत्त्वम्। न चास्माभिर्व्यञ्जनोत्पत्तितः पूर्वमपि विवाहस्याङ्गीकारादस्मन्मतेऽप्युक्तवचनसार्थक्यसम्भव इति वाच्यम्; सङ्कोचे प्रमाणाभावात्, असङ्कुचितसार्थक्यासम्भवाच्च। न च 'ऋतौ भार्यामुपेयादिति' वचनेन ऋतुकालभिन्नकालावच्छेदेन स्वभार्यागमनस्यापि निषिद्धत्वात् तद्वचनवैफल्यं भवन्मतेपि तुल्यमिति वाच्यम्; ऋतुस्नानानन्तरं 'विष्णुर्योनिं कल्पयतु' इत्यादिमन्त्रजपविशिष्टसमावेशनरूपस्य विहितस्य गर्भोत्पत्तिप्रयोजकस्य ऋतुकालभिन्नसप्तदशादिरात्रावच्छेदेनापि प्रसक्तस्योपगमनस्यैव निषेधे उक्तवचनतात्पर्यम्, न तु व्यञ्जनादिपूर्वकालावच्छेदेन रागतः प्रसक्तस्योपगमनस्य निषेधेऽपि। न च सङ्कोचे प्रमाणाभाव इति शङ्कनीयम्; रागप्राप्तोपगमनापेक्षया विधिप्राप्तोपगमनस्यैव प्रत्यासन्नत्वात्। अस्तु वा उभयविधोपगमनस्याप्यत्र ग्रहणम्, तावतापि नोक्तवचनवैफल्यम्।

> ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति।
> घोरायां ब्रह्महत्यायां पतते नात्र संशयः॥

इत्यादि वचनानुसारेण 'भार्यामेव उपगच्छेदेव' इति नियमद्वयाङ्गीकारेऽपि ऋतावेवेति कालनियमानङ्गीकारात्।

'यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन्' ॥ इति ॥

याज्ञवल्क्यस्मृत्या ऋतुकालभिन्नकालावच्छेदेनापि भार्योपगमनस्य विहितत्वात्। व्यञ्जनजन्मतः परं ऋतुकालतः पूर्वं तु सोमाद्यनुभवकालत्वात् न मनुष्याद्यनुभवप्रसङ्गः इत्यलमनेन प्रसक्तानुप्रसक्तविचारेण।

इदमेवाभिप्रेत्य विधिमीमांसायामुक्तम्—

ननु मन्त्रलिङ्गस्य स्मृतेश्च क्वचिद्विरोधे कथं विनिर्णयः। अत्रोच्यते—यत्र स्मृत्या मन्त्रार्थमनूद्य विधानान्तरं तत्र विकल्प इति प्रागुक्तमेव। यत्र पुनर्नानुवादः तत्र बाध एव स्मृतेरिति नयविदां मतम्। तथा च तन्त्रवार्तिकं 'यत्र पुनः श्रुतिरानुमानिकी लिङ्गं च प्रत्यक्षम्, तत्र कथम्,यथा स्मृतिर्वैदिकलिङ्गविरोधे। तत्र स्मृतेः मूलान्तरमपि संभाव्यते, न तु लिङ्गस्येति तदेव बलवदिति अनुसर्तव्यं।

'दुर्बलस्य प्रमाणस्य बलवानाश्रयो यदा।
तदापि विपरीतत्वं शिष्टाकोपे यथोदितम् ॥
अत्यन्तबलवन्तोऽपि पौरजानपदा जनाः।
दुर्बलैरपि बाध्यन्ते पुरुषैः पार्थिवाश्रितैः ॥ इति ॥

[विवाहनित्यत्वानित्यत्वविचारः]

तादृशश्च विवाहः नित्यो वा उत काम्यो वेति विचारणायां काम्य एव विवाहः। "निराश्रमी न तिष्ठेत दिनमेकमपि द्विजः" इति वचनेन यत्किञ्चिदाश्रमे आस्थानमात्रस्यैव प्रतिपादनात्। तत्र च द्विजशब्दप्रयोगानुसारेण द्विजत्वप्रयोजकब्रह्मचर्यव्यतिरिक्ताश्रमसामान्यस्य काम्यत्वमेवेति बहुविवाहवादकारा वर्णयन्ति। वयोनिर्णयकारा अप्यमुमेव सिद्धान्तमवलम्बन्ते। स्त्रीणां विषये उपनयनस्थानीयत्वेनाकरणप्रत्यवायश्च-

वर्णाश्च नित्यत्वेऽपि पुंसां विषये काम्य एव विवाह इति वर्णयन्ति। विवाहकालविमर्शकारास्तु—कलियुगे वानप्रस्थसंन्यासयोर्निषिद्धत्वाद्ब्रह्मचर्याश्रममात्रेऽवस्थानस्यापि तथात्वात् नियत एव पुंसामपि विषये विवाह इति वर्णयन्ति। परे तु कलियुगे इदानीन्तनाग्निहोत्रनिषेधे "चत्वार्यब्दसहस्राणि चत्वार्यब्दशतानि च। कलौ यदा गमिष्यन्ति तदा त्रेतापरिग्रहः। संन्यासश्च न कर्तव्य इति वेदविदां मतम्" इति वचनस्य न तात्पर्यम्।

"यावद्वर्णविभागोऽस्ति यावद्वेदः प्रवर्तते।
संन्यासं चाग्निहोत्रं च तावत्कुर्यात्कलौ युगे॥

इति वेदप्रवृत्तिपर्यन्तं तदनुष्ठानस्यावश्यकत्वपरवचनानुसारेणान्यथैवार्थवर्णनस्य युक्तत्वात्। उपपादितं चैतत् सज्जनरञ्जने वसुमारकमर्दनखण्डने चास्मत्कृत इति तत एव द्रष्टव्यम्। एवं चोक्तप्रकारेण पुंसामपि विषये विवाहनित्यत्वसाधनं न भविष्यत्येव। तथाप्यविरक्तान् स्नातकान्विधुरांश्चोद्दिश्यैव गृहस्थाश्रमप्रवेशोपयोगिविवाहस्य विधानेन तेषां नियतमेव तदनुष्ठानं आवश्यकमेवेति पुंसामपि विषये विवाहो नित्य एव। उक्तं चैतत्, यथाहि विवाहस्स्त्रीसंस्कारः, एवं पुरुषसंस्कारोऽपि, स्त्रियां जायात्वसम्पत्तेरिव पुरुषे पतित्वसम्पत्तेरपि विवाहप्रयुक्तत्वाङ्गीकारावश्यकत्वात्।

अत एव हि दत्ताया अपि कन्याया पाणिग्रहणादिसंस्कारानिवृत्तौ वरान्तरायापि दानादिविधानम्। यदि हि प्रतिग्रहणमात्रेणैव स्वामित्वं धान्यादेरिव स्यात्, तदा पित्रादेः पुनर्दानादिविधिरसम्मत एव सम्पद्येत। अत एव हि यथेष्टविनियोगानर्हत्वमपि भार्यायाः श्रुतिचोदितमुपपन्नं भवति। एवञ्चोभयसंस्काररूपस्य विवाहस्यांशभेदेन नित्यकाम्यत्वविभागो न सम्भवत्येव।

न च कर्तृभोक्तृभयाश्रितस्यापि श्राद्धस्य कर्त्रंशे नित्यत्वं भोक्त्रंशे तु काम्यत्वमिति दृष्टत्वात्तदनुसारेणात्राप्युपपत्तिरिति शङ्कनीयम्; उभयाश्रितस्यापि श्राद्धस्य उभयसमवेतफलजनकत्वाभावेनोभयपर्याप्तदाम्पत्यफलप्रयोजकविवाहवैषम्येण तद्दृष्टान्तेन विवाहविषयेऽप्युपपत्तिवर्णनासम्भवात्। न च स्त्रीमात्रसंस्काररूप एव विवाहः, उपनयनस्थानीयत्वात्। उपनयनं हि कुमारमेव संस्कुरुते, न तु पितरमपि तत्कर्तारमिति सर्वसम्प्रतिपन्नमिति शङ्कनीयम्; उपनयनोत्तरकालिकानां अध्ययनादीनां उपनीतमात्रविषयकत्ववद्विवाहोत्तरकालिकधर्मविशेषाणामपि विवाहितामात्राधिकारिकत्वापत्तेः।

अयमाशयः—"अष्टवर्षं ब्राह्मणमुपनयीतेति" विहितमन्त्रकरणकोपनयनस्य न पितृसंस्कारोऽपि फलमिति युक्तम्; तत्फलस्य द्विजत्वसम्पत्तेः पूर्वमेव सिद्धत्वात्। अष्टवर्षं ब्राह्मणमिति कुमारस्यैव द्वितीयान्तपदेनोपादानमपि तत्र गमकम्। विवाहविषये तु

"गार्हस्थ्यमिच्छन् व्रतिकः कुर्याद्दारपरिग्रहम्।"

इतिवचनावगतगार्हस्थ्यप्रयोजनस्य पुरुषविषये विवाहतः पूर्वमसिद्धत्वात् तस्य विवाहप्रयुक्तत्ववर्णनं युक्तमेवेति वैषम्यात्। अस्तु वा स्त्रीमात्रसंस्काररूपम्, तावतापि "निराश्रमी न तिष्ठेत दिनमेकमपि द्विजः" इतिवचनेन नियतमेव अविरक्तानां स्नातकादीनां तदनुष्ठानावश्यकताऽवगमात् नित्यत्वाङ्गीकरणस्यावश्यकत्वात्। न हि कुमारमात्रसंस्काररूपोपनयनमिति पित्रादिविषयेऽपि तत्कर्तृत्वं कामनाप्रयुक्तमिति सम्भवति। किञ्चोपनयनस्थानीयत्ववर्णनस्य विवाहेनैव स्त्रीणां ब्राह्मण्यादिसिद्धिरिति वर्णनस्य कालातिदेश एवोपयोगः नान्यत्र। अन्यथा उपनयनं यथा पित्रै-

व कर्तव्यं तथा स्त्रीणां विवाहोऽपि पित्रैव कर्तव्य इत्यपि कल्पना-प्रसङ्गात्। यदि तु तत्र पित्रादिव्यतिरिक्तगार्हस्थ्यकामानामेव विवाहानुष्ठानेऽधिकारः शास्त्रचोदित इत्युच्यते, तर्हि तेनैव शास्त्रेण "निराश्रमी न तिष्ठेते"ति तस्य नित्यत्वमपि प्रतिपादितमिति कथं विवाहकाम्यतावादोपपत्तिरिति भवन्त एव विवेचयन्तु। एतेनोपनयनस्यैव विवाहस्यापि षोडशवयःपर्यन्तमपि काल एवेति वचनमपि परास्तम्; उपनयनस्थानीयत्वमात्रेण शास्त्रविरुद्धाङ्गीकरणायोगस्यानुपदमेव प्रतिपादितत्वात्। "नोपरुध्याद्रजस्वलाम्" इति बहुशः रजोदर्शनानन्तरं विवाहानर्हतायाः प्रतिपादितत्वात्। षोडशवयस्काया अपि विवाहवचनपरभारतवचनादिनामपि "ऋतुदर्शनाभावेसतीति विज्ञेयमि"तिनिबन्धकारवचनस्यापि चैवंसत्येवोपपत्तिरित्यस्मदुक्तरीत्यैवोपपत्तिवर्णनं युक्तमित्यृतुमतीविवाहशास्त्रीयतावादोऽसङ्गत एवेत्यलमनेन प्रसक्तानुप्रसक्तविचारेण।

सर्वथापि तु विवाहकाम्यतावादोऽत्यन्तासङ्गत एव। न च "निराश्रमी न तिष्ठेत क्षणमेकमपि द्विजः" इति वचने यत्किञ्चिदाश्रमेऽवस्थानमात्रस्यैव प्रतिपादितत्वात् ग्रहस्थाश्रमस्वीकरणमेव युक्तमिति नियमाभावात् तदनुसारेण विवाहनित्यत्वसमर्थनं न युक्तमिति वाच्यम्; अस्य हि वचनस्य यस्य यस्य यादृशयादृशाऽऽश्रमः शास्त्रचोदितः, तस्य तस्य पुरुषस्य तादृशतादृशाश्रमावस्थानं विना एकमपि दिनमवस्थानं न युक्तमिति प्रतिपादन एव तात्पर्यम्, न तु यत्किञ्चिदाश्रमेऽवस्थानमात्रबोधने, अन्यथा संन्यस्तानामपि पुनर्गृहस्थाश्रमप्रवेशापत्तेः, क्रमसंन्यासप्रतिपादकानां वचनानामत्रैव तात्पर्यात्। यत्तु "ब्रह्मचर्याद्वा प्रव्रजेत् गृहाद्वा वनाद्वे"ति'वचनम्, तदपि विरक्तविषयकमेवेति तत्र

तत्रोद्धोषितमिति अविरक्तानां स्नातकादीनां गृहस्थाश्रमस्वीकारस्यैव शास्त्रचोदितत्वात् विवाहनित्यतासमर्थनं युक्तमेव। पुत्रकामार्थविवाहयोस्तु अपत्नीकस्यैवाधिकार इति निराश्रमी न तिष्ठेतेति वचनस्यैतद्विषयेऽप्रवर्तनात् तादृशविवाहयोः काम्यत्वमेव। तत्संस्कृतानां च उपगमनमात्रयोग्यतासम्पत्त्या न कर्माधिकारः, धर्मप्रजार्थविवाहसंस्कृतानान्तु उपगमनादौ धर्मादौ चोभयत्रापि अधिकारः। सर्वविधविवाहानां च प्रयोगः परमेक एव। नित्यकाम्ययोः प्रयोगवैलक्षण्याभावात्। तत्र ब्राह्मणस्त्रीणां धर्मानुष्ठानावश्यकत्वात् केवलपुरुषार्थविवाहे कामार्थविवाहे च नाधिकारः। अत एव हि सपत्नीकद्वितीयादिविवाहेऽपि धर्मप्रजासम्पत्त्यर्थमित्येव सङ्कल्पः शिष्टवर्यैः क्रियते। काम्यविवाहे च यदा कामः तदा विवाह इति युक्तं रजोदर्शनानन्तरमपि विवाहः शूद्राणाम्। वस्तुतस्तु काम्यकर्मणामपि शास्त्रचोदितकालिकानुष्ठानमेव फलाय कल्पते, न तु कामप्राप्तकालिक इत्यन्यत्र विस्तरः। अयमाशयः—विवाहोऽपि त्रिविधः धर्मप्रजार्थः केवलप्रजार्थः कामार्थश्चेति। प्रथमो नित्यो अन्तिमौ तु काम्यौ। यद्यपि मिताक्षरायां धर्मपुत्ररत्यर्थत्वेन विवाहस्त्रिविध इति आचाराध्याये धर्मार्थविवाहः पुत्रार्थविवाहः कामार्थविवाह इत्येव त्रैविध्यमुपपादितम्, तथापि पुत्रार्थविवाहस्यापि नित्यकाम्यभेदेन तत्र द्वैविध्योपपादनाद्विवाहचातुर्विध्यापत्त्या "जातपुत्रः कृष्णकेश" इति श्रुत्या धर्मार्थमेव पुत्रार्थत्वस्यापि संसूचितत्वेन च मिताक्षराकाराणामपि धर्मप्रजार्थः केवलपुत्रार्थः केवलकामार्थश्चेत्येव त्रैविध्यवर्णने तात्पर्यम्। यद्यपि सपत्नीकद्वितीयादिविवाहसंस्कृतानां न कर्माधिकारः, तथापि ज्येष्ठभार्याया मरणानन्तरं कनिष्ठभार्याया अपि

कर्माधिकारसंभवात् स्वरूपयोग्यत्वं विद्यत एव। अत एव हि तस्या ज्येष्ठभार्याया सप्तदशायामुत्पन्नस्यापि ब्राह्मणत्वमेवेति सिद्धान्तः। यथा च धर्मप्रजार्थविवाहे नैव द्वितीयजन्मसम्भवः, तथान्यत्र विस्तरः। बहुविवाहवादे तु सर्वभार्याणामपि सर्वकर्माधिकार इति सप्रमाणं निरूपितमिति तत्सिद्धान्तादरणे न कस्यापि पर्यनुयोगस्यावकाशः। तादृशे च विवाहे ऋतुदर्शनाभावविशिष्टोपनयनकाल एव काल इति ऋत्वनन्तरमपि तच्छास्त्रीयतावादोऽसम्भवदुक्तिक एव।

तदयं निर्गलितोऽर्थः—

ऋतकालतः पूर्वमेव ब्राह्मणस्त्रीणां विवाहः करणीयः।

तत्राप्यष्टमादिकाल एव मुख्यकालः। यदि तु पित्रादिप्रमादेन रजोदर्शनं तदापत्कल्पतया प्रायश्चित्तानुष्ठानपूर्वकं विवाहानुष्ठानमप्यभ्यनुज्ञायते।

यदि तु ऋतुदर्शनानन्तरमपि साहसादिना पित्राभिर्न दीयते, तदा वर्षत्रयप्रतीक्षणेन कन्यया स्वयं वरणं कर्तव्यम्।

तत्रापि वरेण कन्यायाः स्वस्य च आश्वलायनोक्तप्रकारेण शुद्धिः संपादनीयेति।

ये तु पुनर्दैवात् दृष्टरजस्कायाः कन्यायाः कूपादिष्वेव पातनं शास्त्रीयं मन्यन्ते, मन्ये साहसिकानां कठिनहृदयानां च तेषां शास्त्रमप्यनाद्रियमाणानामास्तिकत्वाभिमान एव केवलं नास्तिकभावोऽपीति सुधीरमुद्घोषयामः। सर्वथापि तु आपत्कल्पनयैव रजस्वलाविवाहः शास्त्रेऽभ्यनुज्ञायत इति वयोनिर्णयकाराणामाशयः समीचीनः, न त्वनापत्कल्पनयापि रजोदर्शनानन्तरं विवाहः शास्त्रचो-

दित इति विवाहकालविमर्शकाणामाशय इति सर्वम—नवद्यमिति वर्णयन्ति।

अस्माकमपि परेषां मतमेव समीचीनमिति प्रतिभाति। अतो वयमपि तमेव पक्षमनुवर्तामहे। यदि त्वन्यैरास्तिकवर्यैः पक्षान्तरानुसरणमेव युक्तमिति समुचितप्रमाणजातैरुपपाद्येत, तर्हि पूर्वाचार्यक्षुण्णमार्गानुसरणमेव निःश्रेयसं मन्यमाना वयमपि तत्सिद्धान्तमेवानुसरिष्यामः।

इति श्रीसन्तोजीमहाराजादिवाल्यमानसनातनधर्मोज्जीविनीसभाङ्गभूतग्रन्थप्रणयनसमितिसम्पादिते सनातनधर्मप्रदीपे विवाहप्रकाशः समाप्तः।